THE
KASHI-SANSKRIT-SERIES
(*HARIDAS SANSKRIT GRANTHAMĀLĀ*)
NO. 65.
(Vedānta Section No. 8

THE SIDDHĀNTABINDU

OF

MADHUSUDANA SARASVATI.

Being a Commentary on the Das'as'lokī of S'aṅkarāchārya

WITH TWO COMMENTARIES

NYAYA RATNAVALI OF GAUDABRAHMANANDA,
and
LAGHUVYAKHYA OF NARAYANA TIRTHA.

Edited with Notes etc. by

Tryambakram S'astri Vedāntachārya,

HEAD PROFESSOR, STATE PATHASHALA, JAMNAGAR.

PRINTED, PUBLISHED & SOLD BY
JAI KRISHNADAS-HARIDAS GUPTA,
The Chowkhamba Sanskrit Series office, Vidya Vilas Press,
North of Gopalmandir, Benares City.

1928.

Registered according to Act XXV. of 1867.
(*All Rights Reserved by the Publisher.*)

Printed-Published & sold by
JAI KRISHNADAS-HARIDAS GUPTA,
The Chowkhamba Sanskrit Series Office,
VIDYA VILAS PRESS,
North of Gopal Mandir,
BENARES CITY.

Printed by Jai Krishna Das Gupta
at the Vidya Vilas Press, Benares,

Agents:
1 Otto Harrassowitz, Leipzig:
GERMANY.
2 Arthur Probsthain,
Oriental & Foreign Bookseller,
London.
3 The Oriental Book-supplying Agency,
POONA.

हरिदास संस्कृत ग्रन्थमाला सम ख्य-
काशीसंस्कृतसीरिज़पुस्तकमालायाः

६५

वेदान्तविभागे(८)अष्टमं पुष्पम्।

भेदिभेदकविविधागमपारङ्गम श्रीमधुसूदनसरस्वती कृतः

सिद्धान्तबिन्दुः।

पूज्यपादजगद्गुरुश्रीशङ्कराचार्यविरचितदशश्लोकीव्याख्यारूपः

श्रीगौडब्रह्मानन्दकृतन्यायरत्नावल्या-श्रीनारायण-तीर्थकृतलघुव्याख्यया च युतः।

सौराष्ट्रान्तर्गत-धराङ्कधरावास्तव्यप्रथितयशोवैभव-मूलजीभट्टसूनुना काशीस्थ-राजकीयसंस्कृतपाठशालायाः सुवर्णपदकचतुष्टयोपलब्धिपूर्वकं समासादितवेदान्ताचार्यपदवीकेन जामनगरस्थराजकीयपाठशालाप्रधानाध्यापकेन त्र्यम्बकरामशास्त्रिणा सङ्कलितया ग्रन्थान्तरस्थपाठभेदादिप्रदर्शयित्र्या टिप्पण्या विषयानुक्रमणिकया भूमिकया चोपस्कृतः तेनैव संशोधितश्च।

प्रकाशकः—

जयकृष्णदास—हरिदासगुप्तः—

चौखम्बा संस्कृत सीरिज आफिस, विद्याविलास प्रेस,

गोपालमंदिर के उत्तरफाटक, बनारस सिटी।

१९८५

राजशासनानुरोधेन सर्वेऽधिकाराः प्रकाशकेन स्वायत्तीकृताः।

इस कार्यालय द्वारा "काशीसंस्कृतसीरिज" के अलावा और भी ३ सीरिजयथा "चौखम्बा संस्कृत सीरिज" "बनारससंस्कृतसीरिज" "हरिदाससंस्कृतसीरिज" ग्रन्थ-मालायें निकलती हैं तथा इन ४ सीरिजो के पश्चात् और भी विविध शास्त्र की पुस्तकें प्रकाशित की गई है तथा अन्य सब स्थानों के छपे हुए संस्कृत तथा भाषा-भाष्य के ग्रन्थ विक्रयार्थ प्रस्तुत रहते हैं, सूचीपत्र पृथक् मंगवाकर देखें, इसके अलावा हमारे यहां सर्व प्रकार की संस्कृत, हिन्दी, अङ्ग्रेजी की सुन्दर छपाई होती है, परिक्षा प्रार्थनीय है ।

पत्रादि प्रेषणास्थानम्—

जयकृष्णदास-हरिदास गुप्तः—

"चौखम्बा संस्कृतसीरिज़" आफिस, विद्याविलास प्रेस,

गोपालमन्दिर के उत्तर फाटक, बनारस सिटी ।

॥ श्रीः ॥

ईषत्प्रास्ताविकम् ।

शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥

हंहो विद्वन्मणयः !

अस्ति चात्र सकलभूमण्डलमण्डनायमानानां श्रद्धाराध्यसद्गुरूणां श्लथीकृतदृढग्रन्थीनां विपश्चिदपश्चिमानां पुरुषधौरेयाणां निश्चप्रचं वेदान्तदर्शनं स्वपरपुरुषार्थार्पकमिति शेमुषी । वेदस्य अन्तो बोधकतासम्बन्धेन तात्पर्यविषयो यत्रेति व्युत्पत्त्या यद्यपि 'तत्त्वमसी'त्यादिमहावाक्यानामेव वेदान्तत्वं तथापि 'वाक्यार्थबोधे पदार्थज्ञानं कारणम्' इति न्यायेन तदादिपदार्थशोधकस्य निखिलागमसारभूतस्य चतुर्लक्षण्यात्मकस्य शारीरकस्य तदनुकूलयुक्त्यादिसमर्पकत्वेन भामत्यादिनिबन्धानामपि वेदान्तत्वे नास्ति क्षतिः ।

वेदान्तदर्शने द्वैतविशिष्टाद्वैतविशुद्धाद्वैताद्वैतादिभेदस्य जागरूकत्वेपि 'परमं साम्यमुपैति' इति श्रुतिसमन्वयस्य विरोधात्, सम्भवत्याञ्चैकवाक्यतायां वाक्यभेदकल्पनस्यायुक्तत्वात्, अद्वैते ह्येकस्मिन्ननेकान्तर्भावस्य सुसम्पादत्वात्, अनेकत्वसिद्धेरेकत्वसिद्ध्यधीनत्वेन द्वैतस्याद्वैतनान्तरीयकत्वात्, अद्वैतसिद्धेरनन्याधीनत्वात्, अद्वैतमत एव सर्वासामुपनिषदां साक्षात्परम्परया वा तात्पर्यपर्यवसानमिति आचार्यादिभिः 'तत्तुसमन्वयात्' इत्यत्र सुनिपुणं निरूपितत्वाच्च नेह प्रतन्यते ।

अस्मिन्दर्शने कियद्भिः सूरिभिर्लेखिनी सञ्चालितेति परिगणनं विबुधायुषापि दुःशकमिति नास्त्यतिशयोक्तिशङ्कागन्धोपि । जगतीतलेऽद्यावधि न बभूवैतादृशो दार्शनिककोविदो विदितयशा येन स्वयशोवतंसो वेदान्त एकोपि निबन्धो न निबद्ध इति । वैय्याकरणैः, किम्बहुना साहित्यरसिकैरालङ्कारिकैरपि जीवनान्तवेलायां जीवनसाफल्याय जीवात्मविचारे मनो नियुज्य सिद्धान्तलेशादयोऽपूर्वाः प्रबन्धाः प्रबद्धा इति बहून्युदाहरणानि सन्ति । तेनाद्य संस्कृतादिविविधासु वाक्षु पाणितलमलङ्कुर्वाणानि यावन्ति वेदान्तशास्त्रपुस्तकानि तावन्त्यन्यशास्त्रेऽद्यावधि कर्णाभ्यर्णमपि न समासादितानीति नाविदितं समेषाम् ।

एतादृशेऽतिविस्तृतेऽतिगभीरे सर्वदर्शनमुकुटायमाने वेदान्तदर्शने खण्डनचित्सुखाद्वैतसिद्धित्रयं मरकतायते इत्यपि विदितप्रायं तत्र भवतां भवताम्। त्रयेप्यस्मिन्नव्यनैयायिकशिरोमणिगदाधरजगदीशादीनां तार्किकाणामनुमानान्यनुमानाभासयती अद्वैतसिद्धिः आत्मबोधायालमिति श्रीमधुसूदनसरस्वतीभिरेव—

बोधाय वादिविजयाय च सत्वराणा-
मद्वैतसिद्धिरियमस्तु मुदे बुधानाम्।

इति भणितमारम्भे। सिद्धिवार्धैः ब्रह्मानन्दजनितया चन्द्रिकया-ऽऽवेलं तर्कतरङ्गभङ्गप्रचुरप्रकारैः प्रचयगमने किन्नाम भूरि भणितव्यं भवेत्।

तेषामेव श्रीमधुसूदनसरस्वतीनामयमपि सिद्धान्तबिन्दुनामा भगवत्पादीयदशश्लोकीमुपजीव्योपनिबद्धो निबन्धो गौडब्रह्मानन्दकृतया न्यायरत्नावल्या साकमद्वैतसिद्धिमप्यतिशेत इति प्रतिज्ञातं टीकाकृता—

अद्वैतसिद्धेष्टीकायास्तदीयायाश्च सङ्ग्रहात्।
विचित्ररचना काचिद् ब्रह्मानन्देन रच्यते॥ इति।

इदं हि वैशिष्ट्यमत्र यत्स्वल्पेप्यस्मिन्प्रबन्धे प्राय उपयोगिनो विषयस्य सर्वस्य सङ्कलनं कृतं तच्च विषयानुक्रमणिकातस्तूर्णमवगन्तुं शक्यत इति नात्र तन्यते। सूत्रभूतायां दशश्लोक्यां कथमाचार्येण सर्वः शास्त्रार्थो निवेशितः, कीदृशी सहजा प्रसन्ना च कविता, कीदृक् तस्या भावगाम्भीर्यम्, कथञ्च बिन्दुकृद्भिराचार्याशयोद्घाटनं कृतम्, तच्च सर्वं ग्रन्थत एवावसेयं स्यात्।

अथात्र ग्रन्थकृतां समयादिविषयमधिकृत्य किञ्चिन्मीमांस्यते। तत्र तावच्चतुर्ग्रन्थीयं वर्तते—

१ दशश्लोकी श्रीशङ्करभगवत्पूज्यपादानाम्
२ सिद्धान्तबिन्दुः.....श्रीमधुसूदनसरस्वतीनां दशश्लोकीव्याख्या
३ नारायणी श्रीनारायणतीर्थानां सिद्धान्तबिन्दुव्याख्या
४ न्यायरत्नावली ...श्रीगौडब्रह्मानन्दानाम् ,,

श्रीशङ्करभगवतः पाण्डित्यपरिचयोऽस्माभिः प्रदेय इति तु मक्षिकयाऽऽकाशान्तान्वेषणनिभमेव भवेत्, तथापि त्विमे पद्ये सर्वज्ञमुनिमधुसूदनसरस्वतीभणिते भण्येते। तदुक्तम्—

वक्त्रमासाद्य यमेव नित्या सरस्वती स्वार्थसमन्वितासीत्।
निरस्तदुस्तर्ककलङ्कपङ्का नमामि तं शङ्करमर्चिताङ्घ्रिम्॥ १॥

न स्तौमि तं व्यासमशेषमर्थं समग्रसूत्रैरपि यो बबन्ध।
विनापि तैः सङ्ग्रथिताखिलार्थं तं शङ्करं नौमि सुरेश्वरञ्च ॥ २ ॥

श्रीशङ्करभगवतः द्राविडदेशोद्भवत्वं तु सर्वैः स्वीकृतमिति तत्रापरमापादयितव्यं नावशिष्यते, परञ्च तेषां कालनिर्णये विप्रतिपत्तयः सन्त्येव। केचन वृद्धाः द्विसहस्रवर्षात्मकं कालं कल्पयन्ति, परे चतुर्विंशतिशतात्मकमन्ये पञ्चविंशतिशतात्मकमिति। एतेषां मतं खण्डयन्तो नवीनास्तु बहूनि ऐतिह्यानि प्रदर्शयन्त इशवीयाष्टमशताब्दीं कल्पयन्ति। आचार्यसमयनिर्णयाय तैस्तैर्विद्वद्भिः प्रदर्शिता युक्तयोऽन्यत एवावगन्तव्या इति तत्र वयं स्वमतप्रदर्शनाद्विरमामः।

एतेषां साक्षाच्छङ्करस्वरूपत्वमप्यन्यत्र निर्णीतमिति किम्पिष्टपेषणेन। एते हि भगवतीकृपाकटाक्षपातप्रतिहतापुण्यपुञ्जप्रथितपाण्डित्यप्रकाण्डा इति तैरेव सौन्दर्यलहर्यां प्रतिपादितम्। यथा—

तव स्तन्यं मन्ये तुहिनगिरिकन्ये हृदयतः
पयः पारावारः परिवहति सारस्वत इव।
दयावत्या दत्तं द्रविडशिशुरास्वाद्य तव यत्
कवीनां प्रौढानामजनि कमनीयः कवयिता ॥

अथेयमाख्यायिका टीकाया उपलब्धा। पूर्वाश्रमे बाल्यावस्थायां स्थितेषु भगवत्सु एकदा पितुराकस्मिककार्येण ग्रामान्तरगमने सम्भूते मातुरपि रजोधर्माभिभवे च जाते, मात्रा शिशवे तस्मा उक्तं "वत्स! इदं शर्करामिश्रं दुग्धं भगवत्यै निवेदय" इति, ओमित्युक्त्वा दुग्धपात्रेण सह मन्दिरान्तः प्रविश्य भगवत्याः पुरः पयःपात्रं प्रस्थाप्य बालस्वभावचापल्यानुगुणं कलितं 'कल्याणि! पिब पय' इति। बहुशः कथनेपि जडया प्रतिमयाऽपीते पयसि हस्तौ पादौ पृथिव्यां प्रसार्य प्रताड्य परस्परमङ्गानि प्रचण्डं रोदनं प्रक्रान्तम्। 'बालानां रोदनं बलम्' इति प्रसिद्धमेव। भगवत्यास्तु शरणागतदीनार्तपरित्राणपरायणत्वे वक्तव्यमेव नास्ति। अथापि च 'न कस्य मोदमाधत्ते गद्गदं बालजल्पित'मित्याभाणकप्रसिद्धेः वत्सलयाऽम्बया स्वयमागत्य पात्रं स्वकरेणोत्थाप्य पीतं पयः नावशेषितं स्वल्पमपि। दृष्टे च रिक्ते पात्रे पुनः प्रचुरतरं रोदनादिकमारब्धं भगवता मस्तकाद्यङ्गधूननपूर्वकम्।

भगवत्या भणितं 'वत्स! कथमधुनापि रोदनं क्रियत' इति।

कथं त्वया सर्वं दुग्धं पीतमद्य? पित्रा तु प्रत्यहं तव पीतावशिष्टं मह्यं दीयतेऽद्य कथं विस्मृतवत्यसि!

वत्स ! अद्यप्रभृति तथैवाचरिष्यामि परमद्य तु मया पीतमपीतं कथं भवेत्।

यद्भवतु तद्भवतु मह्यं तु यच्छाधुनैव इत्युक्त्वा पुना रोदनमारेभे। अतिस्निग्धया जगज्जनन्या तत् पात्रं स्वकीयात्स्तन्यादेव प्रपूरितं पायितञ्च द्रविडशिशवे। भगवतस्तत्क्षणं विद्युदुपस्पर्शेणेव चमत्कृतिशालिनामपि गर्वगञ्जनी कवितामयी वाक्प्रसूताऽस्यास्यपद्मात्' 'तव स्तन्यं मन्ये' इत्यादिका' इति।

शङ्करभगवद्भिर्निबन्धा बहवो रचिता इति नाविदितं विपश्चिताम्। तत्रास्या दशश्लोक्या अपि समावेशः। अस्याष्टीकारूपेण सिद्धान्तबिन्दुनामा प्रबन्धो मधुसूदनेन प्रबद्ध इति निवेदितं पूर्वमेव। एते श्रीमधुसूदनसरस्वत्योपि द्राविडा इत्यैतिह्याभावेपि किंवदन्ती विद्यत एव।

केचनैतेषां बङ्गीयत्वं ब्रुवते, ज्ञापकं चाहुः। यथा 'भगवता नीलाचलनायकेन नारायणेनानुगृहीता' इति वेदान्तकल्पलतिकायां श्रीमधुसूदनसरस्वतीभिरुक्तम्। नीलाचलनायकपदं हि विरजाक्षेत्रस्थस्य भगवतो जगन्नाथस्यैव वाचकमित्यपि सिद्धम्। तस्मिन्समये प्रायः सर्वत्रैव बङ्गदेशे तद्भक्तेः प्राचुर्येण स्थितत्वात्तदुपासकत्वमपि श्रीमधुसूदनसरस्वतीनां स्वोपास्यदेवनामोपन्यासात्सम्भाव्यते।

अपि च अस्यान्ते 'बलभद्रस्य कृते कृतो निबन्ध' इति ग्रन्थस्यैतच्छिष्यपुरुषोत्तमसरस्वतीकृतव्याख्यायां 'बलभद्रो भट्टाचार्यः' इत्युक्तम्। भट्टाचार्यत्वन्तु तस्मिन्समये बङ्गदेशीयेषु प्रसिद्धमिति तत्प्रियशिष्यस्य बङ्गीयत्वे गुरोरपि बङ्गीयत्वसम्भावना नाकिञ्चित्करी। अन्यच्च 'यदत्रासौष्ठवम्' इतिमूलस्य नारायणी व्याख्यायामसौष्ठवमिति प्रतीकमुपादाय 'भाष्यभामतीविवरणाद्यपेक्षया कठीनत्वरूपम्, अखिलविद्याप्रवीणतार्किक-शिरोमणि-भट्टाचार्यरीत्यनुसरणादिति भाव' इति ग्रन्थसमाप्तावत्र वर्णितमतः शिरोमणिभट्टाचार्यशिष्यत्वं साम्प्रदायिकत्वं वा ध्वन्यते। अनेन कल्पनाकाण्डेनैतेषां बङ्गीयत्वे सिद्धे फरीदपुरमण्डलान्तर्गतः 'कोशलीपाडा' नामको ग्रामोपि वासस्थानत्वेन, प्रमोदनपुरन्दराचार्याः पूर्वाश्रमपितृत्वेन, कमलजनयनाभिधा च पूर्वाश्रमीया इत्यपि कल्पयन्ति।

मधुसूदनसरस्वतीनां परमगुरवो रामसरस्वत्यो गुरवो विश्वेश्वरसरस्वत्यो विद्यागुरवो माधवसरस्वत्य इति अद्वैतसिद्धिमङ्गलावसरे 'श्रीरामविश्वेश्वरमाधवाना'मिति स्वेनैवोक्तं स्पष्टीकृतं च लघुचन्द्रिकायां ब्रह्मानन्देनापि।

एते हि गदाधरचक्रवर्तिनः सतीर्थ्याः सन्तो नवद्वीपे श्रीहरिरामतर्कवागीशानां समीपे न्यायशास्त्रमध्यगच्छन्। जन्मजरामरणाद्यापत्तियुक्तान् जनानालक्ष्य प्रथमाश्रम एव समुपजातवैराग्या वाराणस्यां चतुःषष्टिघट्टे गोपालमठे श्रीविश्वेश्वरसरस्वतीनां सकाशात्तुरीयाश्रमदीक्षां श्रीमधुसूदनसरस्वत्यभिधां चावापुः। आनन्दवनाभिधोयं प्रदेशस्तत्कालमारभ्य अन्वर्थत्वमन्वभवत्। तुरीयाश्रम एव वेदान्तादिदर्शनान्यधीतान्याचार्यैः। पाण्डित्यप्रौढत्वप्रस्थापकाः प्रायः सर्वे प्रबन्धा अपि परिव्राडवस्थायामेव प्रबद्धाः। एभिः कति स्वतन्त्रग्रन्था ग्रथिता टीकाश्च विनिर्मिता इति मन्निकटवर्तिनां साधनानामतिस्वल्पत्वादधुना निर्णेतुमशक्यमेव तथापि प्रसिद्धान् प्रबन्धान्प्रदर्शयिष्यामः।

१ अद्वैतसिद्धिः २ अद्वैतरत्नरक्षणम् ३ आत्मबोधटीका ४ आनन्दमन्दाकिनी ५ ऋग्वेदजटाद्यष्टविकृतिविवरणम् ६ कृष्णकुतूहलनाटकम् ७ प्रस्थानभेदः ८ भक्तिसामान्यनिरूपणम् ९ भगवद्गीतागूढार्थदीपिका १० भगवद्भक्तिरसायनम् ११ भागवतप्रथमश्लोकव्याख्या १२ राज्ञां प्रतिबोधः १४ वेदस्तुतिटीका १५ वेदान्तकल्पलतिका १६ शाण्डिल्यसूत्रटीका १७ शास्त्रसिद्धान्तलेशटीका १८ संक्षेपशारीरकटीका १९ सर्वविद्यासिद्धान्तवर्णनम् (प्रस्थानभेदः) २० सिद्धान्तबिन्दुः २१ हरिलीलाव्याख्या चेत्येकविंशतिसङ्ख्याका ग्रन्थाः।

सर्वापेक्षया च सिद्धान्तबिन्दोः प्राचीनत्वं सम्भाव्यते। तथाहि—

अद्वैतसिद्धौ दृष्टिसृष्टिप्रकरणे ५३७ पृष्ठे (निर्णयसागरीयपुस्तके) 'सिद्धान्तबिन्दुकल्पलतिकयोरभिहितम्' 'सिद्धान्तबिन्दुकल्पलतिकयोर्विस्तर' इति अस्य नाम्नो निर्देशात्(१) अत्र चाद्वैतसिद्धेर्नामनिर्देशविरहात्। यद्यप्यत्र कल्पलतिकाया नामनिर्देशः कृतः ४४२ पृष्ठे 'विस्तरेण चैतत्प्रपञ्चितमस्माभिर्वेदान्तकल्पलतिकायामित्युपरम्यत" इति, तथापि वेदान्तकल्पलतिकायामप्यस्य तथैव नामोपदिष्टम्—'विस्तरेण चैतत्प्रपञ्चितमस्माभिः'—सिद्धान्तबिन्दौ' इत्यत्र, ८७ पृष्ठे (मेडिकलहाल् यन्त्रालये वाराणस्यां मुद्रितपुस्तकस्य) तथाच कल्पलतिकासिद्धान्तबिन्द्वोः समकालिकत्वं प्रतीयते। रीतिरियं बहूनां ग्रन्थकृतां यत्पूर्वं ग्रन्थान्निर्माय तेष्वेकत्रोक्तस्य विषयस्यान्यत्र नियोजनेन परस्परं नामानि निर्दिशन्तीति।

(१) अद्वैतसिद्धेस्तु इतरानेकग्रन्थापेक्षया पश्चाद्भवत्वं भवत्येव, तस्यां गीतानिबन्धनस्य नामोक्तेः, गीताटीकायां भक्तिरसायननामोपन्यासेन, भक्तिरसायने च कल्पलतिकाया अभिधानप्रदर्शनेनेति।

एते हि मुनीन्द्रा अपि निर्व्यापाराधुनिककाषायाम्बरधारियतिव्यपदेशभराक्रान्ता नासन् , किन्तु गदाधरादीनां नव्यतार्किकानामन्येषाञ्च समकालं कालं नयन्तो विचक्षणतर्ककर्कशाशयानां हेतून्हेत्वाभासयन्तोऽनुमानोपाधिविषमीकृतचेतसःश्रुतिभणिततत्त्वोपदेशप्रदानेनानुत्तरयन्तो नास्तिकवाचाटान्मूकयन्तो वेदान्तादिदर्शनान्युपदिशन्तः प्रायो वाराणसीमधिवसन्तो विचरन्तोपि कदाचित्क्वचिच्छुताः। तथोक्तं कविनैकेन—

नवद्वीपे समायाते मधुसूदनवाक्पतौ ।
चकम्पे तर्कवागीशः कातरोऽभूद् गदाधरः ॥

एकदा गदाधरभट्टाचार्याणामातिथ्यं स्वीकुर्वद्भिरेभिः स्वानुनेयानध्यापयन्तो भट्टाचार्याः सावेपमुक्ताः 'किम्भोः ! पठनावसरे घुष्टा एव कोट्यः पाठ्यन्ते' इति । 'का नामात्रानुपपत्ति'रिति साभियोगां भट्टाचार्योक्तिमुपश्रुत्य तैः साकं शास्त्रार्थमुपचक्रुः । मधुसूदनमुनेर्बाल्यकालतोप्यधिकतरां न्यायशास्त्रीयपदार्थसम्पत्तिं प्रतिभाधिक्यं चावलोक्य गदाधरभट्टाचार्याः सविनयं तच्चरणयोः पेतुरिति राखालदासमहामहोपाध्याया भणन्ति स्म ।

'मधुसूदनसरस्वत्याः पारं वेत्ति सरस्वती' इति तत्र तत्र श्रीगौडब्रह्मानन्दोक्त्या, एभिर्विनिर्मितग्रन्थदर्शनेन च पाण्डित्यपरिचयो भवत्येवेति किम्बहुजल्पनेन। गोस्वामिनस्तुलसीदासस्यापि तत्समीपं शास्त्रीयविषयावगत्यर्थं गमनं श्रूयते । एतत्सर्वमाचार्याणां समयनिर्धारणाय पर्याप्तमेव ।

गोस्वामितुलसीदासस्य समयस्तु सर्वथाऽऽदितो निर्णीत एव । १६३१ विक्रमाब्दे रामायणारम्भस्तुलसीदासेन कृतः । अद्यापि तुलसीदासहस्तलिखितं रामायणपुस्तकं काशिकराजकीयसरस्वतीभवने(१) वर्तते, तस्मिन्लेखनकालोपि १६४१ विक्रमाब्दः स्वेनैव लिखित इति नास्त्यत्र शङ्कावसरः । अकबरे राज्यं प्रशासति गोस्वामिनो रामायणनिर्माणमित्यपि साम्प्रदायिकानां वचनमस्यैव समयस्योपोद्बलकम् ।

अपि च वृत्तरत्नाकरटीकाकारस्य नारायणभट्टस्येतिवृत्तं इन्डियन् एन्टिक्वेरी (Indian Antiquary 1612, 9,) नामके मासिकपत्रे दत्तम् । तत्र च प्रवृत्तिमार्गविरोधिनो निवृत्तिमार्गस्य समूलकाषं कषिता ग्रहस्थाश्रमी वेदान्तदर्शननिष्णातोपि कर्मठोऽयं प्रसिद्धपाण्डित्यः सर्वैरेव न्यासिभिर्वेदान्तिभिश्च वादमचीकरत् । भट्टेनानेन सर्वतन्त्रस्वतन्त्रा अपि नैय्यायिकदिग्गिभगण्डस्थलोद्धृतमदमौक्तिका अपि मधुसू-

(१) Government's Princess of wales Sarasvati Bhavana'

दनसरस्वत्यादयो न्यासिनः पराजिता इत्यपि लिखितम्। अनेन नारायणभट्टेन वृत्तरत्नाकरटीका १६०२ विक्रमाब्दे लिखिता इति निर्णीतमन्यत्र(१)।

ईशवीय १६६० वर्षे १७१७ संवत्सरे अप्पय्यदीक्षिताः कैलासवासिनः समभूवन्। श्रीमधुसूदनसरस्वतीयतिवरा अद्वैतसिद्धौ दीक्षितान् परिमलकारत्वेन स्मरन्ति दीक्षिताश्च सिद्धान्तलेशसङ्ग्रहे समेषां वेदान्तविदां नामानि मतानि च प्रदर्शयन्तो मधुसूदनसरस्वतीनामभिधां न स्मरन्तीति तदर्वाक्त्वमपि युज्यत एव।

एतेन श्रीमधुसूदनाचार्याणां गोस्वामितुलसीदासाकबरनारायणभट्टगदाधराणाञ्चेशवीयसप्तदशशताब्द्यारम्भकाल इति निर्णीयते।

अस्य श्रीमधुसूदनविरचितसिद्धान्तबिन्दोः प्रथमा टीका नारायणतीर्थकृता लघुव्याख्या नामिका वर्तते। इमां लघुकायामालक्ष्य ग्रन्थे द्वितीयटीकात्वेन योजनं कृतमिति ज्ञेयम्, अन्यथा ब्रह्मानन्दगुरूणां नारायणतीर्थानामेषा टीका इति प्राथम्यमेवार्हतीति।

इमे नारायणतीर्था बिन्दावेवापरां महद्व्याख्यामचीकॢपन् इति तत्र तत्र लघुव्याख्यायां तैरेव (२)'विस्तरस्त्वस्मत्कृतमहद्व्याख्याने द्रष्टव्यः' (३)एतन्मतनिष्कर्षस्तु अस्मत्कृतसिद्धान्तबिन्दुगुरुटीकायां द्रष्टव्यः" इत्यादिवदद्धिः प्रतिपादितम्। अथाप्यद्यावधि कुत्रापि महद्व्याख्यायाः पुस्तकं नोपलब्धमिति करालकालमहिमानमेवात्र प्रभुं पश्यामः।

श्रीनारायणतीर्थाः विद्यापारावारीणेभ्यः श्रीवासुदेवतीर्थेभ्यः सर्वं वेदान्तशास्त्रमध्यगच्छन्। नारायणतीर्थाः समर्थाः शेमुषीवैभववन्त इति तु निर्विवादमेव। तथोक्तं ब्रह्मानन्दैर्लघुचन्द्रिकासमाप्तौ—

श्रीनारायणतीर्थानां षट्शास्त्रीपारमीयुषाम्
चरणौ शरणीकृत्य तीर्णः सारस्वतार्णवः॥ इति।

लघुव्याख्यायाः क्वचित्क्वचिन्मूलव्याख्यानस्य ब्रह्मानन्दैर्न्यायरत्नावल्यामक्षरशोऽवतारः कृत उपलभ्यते। अत एवेदमपि अत्यन्तं सम्भाव्यते यन्नारायणतीर्थानामेव महद्व्याख्यां किञ्चिन्न्यूनाधिकभावेन ब्रह्मानन्दा न्यायरत्नावलीत्वेन नियोजयामासुरिति। एतत्तत्त्वन्तु महद्व्याख्याया अनुपलब्ध्यवध्यानुमानिकमेव। लघुचन्द्रिकासमाप्तौ तु गौडब्रह्मानन्दसरस्वतीभिः—

महानुभावधौरेयशिवरामाख्यवर्णिनः।
एतद्ग्रन्थस्य कर्तारो लेखकाः केवला वयम्॥

(१) वेदान्तकल्पलतिकाभूमिकायाम्।
(२) अस्यपुस्तकस्य २३३ पृष्ठे (३) ,, ,, २३९ पृष्ठे।

इति वदद्भिर्लघुचन्द्रिकाकर्तृत्वेन शिवरामवर्णिनो नाम निर्दिष्टम्, तथापि एतच्छ्लोकस्य प्रक्षिप्तत्वसम्भावनया, ब्रह्मानन्दकृतस्यैव ग्रन्थस्य शिवरामवर्णिकृतत्वेन व्यवहारमात्रो ब्रह्मानन्दसरस्वतीभिरेव कृत इति सम्भावनया, गुरुचन्द्रिकाकर्तारः शिवरामवर्णिनो गौडास्तु लघुचन्द्रिकाकर्तार इति वा सम्भावनयेदं सर्वमद्यावधि विनिर्णयशून्यमिति तथैवास्मिन्नपि विषये निर्णययोग्यं प्रबलं प्रमाणं न प्रचाकशीति ।

टीकाकृतो ग्रन्थकर्तारो वा अन्येभ्यो ग्रन्थेभ्यो विशिष्टविषयानुद्धृत्य नूतनं निबन्धं निबध्नन्तीति तु प्रायो विदितमेव समेषां विद्याचणानामिति सर्वासां विद्यानामन्ततोगत्वाऽनादित्वं सिद्धमेव । अथ च ग्रन्थान्तरेभ्योऽत्रापेक्षितविषयस्यैकत्र नूतनग्रन्थनिर्माणकाले सङ्ग्रहोऽतिगूढविषयस्य स्वप्रतिभया युक्तिप्रयुक्तिभ्यां विशदीकरणमेव ग्रन्थनिर्माणपाण्डित्यमित्यत्र काऽनुपपत्तिः ? ।

यत्किञ्चिदस्तु परञ्च ब्रह्मानन्दसरस्वतीभिः मधुसूदनसरस्वतीकृताः सर्वे ग्रन्थाः स्वकीयटीकया विभूषिता इति महतामुक्तिं प्रत्यक्षीकुर्वन्तो वयन्तु नारायणीमनुसृत्य न्यायरत्नावली ब्रह्मानन्दसरस्वतीविरचिता इति मन्महे ।

नारायणतीर्थानां बहवो ग्रन्थाष्टीकाश्च प्रायः सर्वस्मिन् दर्शने लिखिता वर्तन्ते । तेच यथा—

१ तत्त्वचन्द्रः । साङ्ख्यतत्त्वकौमुदीव्याख्या
२ न्यायकुसुमाञ्जलिकारिकाव्याख्या
३ भक्तिचन्द्रिका । शाण्डिल्यसूत्रव्याख्या
४ भक्त्यधिकरणमाला सटीका
५ योगचन्द्रिका
६ योगसूत्रवृत्तिः गूढार्थ द्योतनिका
७ वेदस्तवटीका
८ वेदान्तविभावतटीका
९ साङ्ख्यचन्द्रः । ईश्वरकृष्णसाङ्ख्यकारिकाटीका
१० सिद्धान्तबिन्दु महद्व्याख्या
११ सिद्धान्तबिन्दु लघु व्याख्या

इति तेषां सर्वतन्त्रस्वतन्त्रत्वे किम्बहूक्तेन । एतेषां समयस्तु प्रायो निर्णीत एव (१७९०) नवत्यधिकसप्तदशशततमेशवीयवर्षनिकटवर्तीति । तथाच तच्छिष्यब्रह्मानन्दसरस्वतीनामपि समयनिर्णये न प्रमाणान्तरान्वेषणापेक्षेति ।

नारायणी टीका न्यायरत्नावल्यपेक्षया सहजा लघुकाया सिद्धान्तबिन्दुतत्त्वं स्वेनवाधिजिगमिषूणां कृतेऽतीवोपयोगिन्यप्यद्यावध्यमुद्रितेति तस्या दौर्लभ्यदूरीकरणाय प्राचीनसंस्कृतपुस्तकोद्धरणे प्रबद्धपरिकराणां चौखम्बासंस्कृतग्रन्थमाला-(Secretary of Chowkhamba Sanskrit Series)—ध्यक्षाणां जयकृष्णदासगुप्तानामुत्साहमवाप्यास्या मुद्रणकार्ये संशोधकत्वं स्वीकृतमस्माभिः, परमस्यां बहूनि कष्टान्यनुभूतानि। प्रथमं तस्य मुद्रणायोपलब्धस्य हस्तलिखितपुस्तकस्य कियद्दूरं पत्राङ्कभावेन मुद्रणालयीयलेखकेन तत्पुस्तकाल्लेखनावसरेऽव्यवस्थितान्युपलभ्य पत्राणि तथैवाव्यवस्थितमुल्लिखितं तच्च यद्यपि पूर्वमितरेषां समीपे शोधनाय गतमेवाथापि तैः परावर्तितमस्मत्समीपमागतं सुनिपुणं निरीक्ष्य प्रथमतः पत्राणि व्यवस्थितानि विधाय पश्चात्संशोध्य मुद्रणाय प्रदत्तम्। अस्याष्टीकाया द्वितीयमुपुस्तकं मुद्रणारम्भानन्तरं मासचतुष्टयादूर्द्ध्वं सरस्वतीभवनाल्लब्धं तथापि क्वचित्क्वचित्तु मूलटीकाविभागविरहितमशुद्धिबहुलं तदिति ततः परिश्रमपौष्कल्ये सत्यपि क्वचिदुपयोगित्वं पाठान्तरस्यालोच्य प्रायः सर्वोपि पाठभेदो निवेशितोऽत्र।

ब्रह्मानन्दसरस्वत्यो हि गुरुलघुचन्द्रिकाकर्तृत्वेन वेदान्तदर्शनोदधिमथनोद्भूतामृतमन्यायेनानैक्ये पथि निनयिषुभ्यः सुरेतरेभ्य इव माध्वीयेभ्यः प्रत्यानयितुः श्रीमधुसूदनस्याप्यद्वैतसिद्धिमृतं स्वकीयेभ्यो दीयमानस्य कृष्णद्वैपायनस्याशयं चौर्येणापहर्तुं राहोरिव तरङ्गिणीकृततरङ्गभङ्गभञ्जका इति तच्छीलिनां नाविदितम्। यद्यपि माध्वीयैर्लघुचन्द्रिकाखण्डनोद्योगः कृतो न्यायभास्करादिषु, तथापि न्यायभास्करखण्डनन्यायेन्दुशेखरादिग्रन्थपर्यालोचनोत्तरं स्पष्टं प्रचाकशीति यन्न्यायभास्करकारादिभिः सर्पबुद्ध्या रज्जुप्रताडनाकाण्डताण्डवितमेवेति।

अस्याश्च न्यायरत्नावल्यां सिद्धान्तबिन्दुस्पृष्टेभ्यो बहुभ्यो विषयेभ्यः स्वकीयशेमुषीवैभवपरिचायकः प्रकाशः प्रक्षिप्तः

इति तेषां विशिष्टविषयानामत्रानुक्रमणिका प्रदीयते ।

	पृष्ठ०
उच्छेदपदार्थविचारे प्रसङ्गाज्ज्ञाने इच्छाद्यनुपपत्त्यादि चिन्ता	१३–१७
ज्ञानस्य स्वविषयानिवर्तकत्वविचारः	१७–२५
समाधिविचारः	४३–४९
सर्वपदलक्षणया पौनरुक्त्युद्धारः	५०–६३
वाक्यानां कार्यत्वान्वितस्वार्थानुभावकत्वशङ्का समाधाने प्रसङ्गादभिहितान्वयान्विताभिधानादिमतानां दिग्दर्शनमपि	७३–१०२
इतरेतरेतराध्यासः	२०७–२१६
जडे अज्ञानकल्पनं निष्प्रयोजनम्	२४१–२४६
स्मृतेः प्रामाण्यवारणे प्रसङ्गात्प्रामाण्यस्वतस्त्वादिविचारः	२४६–२५५
अर्थवादानां शाब्दभावनायामपेक्षितप्राशस्त्यज्ञानान्वय-बोधकत्वविचारेऽनेकेषां मतप्रदर्शनम्	२३२–३३३
एकस्यैवेश्वरस्य चतुर्भुजाद्याकारा इत्यत्र विविधमत-प्रदर्शनं प्रसङ्गाद् भक्तेर्विचारश्च	३५१–३६४

अन्यत्रापि ब्रह्मानन्दैर्बहूक्तन्तथापि तत्तु विद्याचुञ्चुभिर्ग्रन्थत एव लप्स्यत इत्युपरम्यते प्रयासादस्मात् । अस्यातिकिलप्रग्रन्थस्य संशोधन-कार्येऽस्मद्गुरुवर्यैः विश्वविख्यात–सनातनधर्मरक्षणैकप्रवणैः महामहो-पाध्यायपदवीविभूषकैः श्रीलक्ष्मणशास्त्रि द्राविडैः तथा महामहोपाध्यायैः वर्तमानकालिकमहर्षिभिः स्वनामधन्यैः गुरुवर्य श्रीनित्यानन्दपन्तपर्वती-यैश्च योग्यं साहाय्यम्प्रदत्तमिति तेषामानृण्यं कथंकारमुपकारप्रदर्शनेन भवेत् । तथैवास्मिन्कार्ये आरम्भाच्च समाप्तिपर्यन्तं काशिक राजकीय-पाठशाला प्रधानाध्यक्षाणां एम्. ए. इत्युपाधिधारिणां कविराजश्री गोपीनाथशर्ममहोदयानां सविशेषं सूचनादिकं पण्डितानां समयनिर्णय-सरणिश्च प्राप्ता इति तेषामुपकारं सधन्यवादं प्रकटीकुर्मः । न्यायो-पाध्यायानां श्रीदुण्ढिराजशास्त्रिणां साहाय्यादेवास्माकं संशोधनकार्ये शैघ्र्येण जातमिति तेऽपि परममुपकारकराः सर्वदास्माकम् । ग्रन्थ-समाप्त्युत्तरं तूर्णमेव जामनगरपाठशालायामस्मदीय नियोजनात् साध-नाभावाच्च समयादिनिर्णयाय वरकले इत्युपाह्वेभ्यो वैद्यनाथशास्त्रि-भ्योपि परिश्रमो दत्त इति तेषां नामात्र प्रदर्शनीयं भवति । अन्येपि

अस्मिन्संशोधनकार्ये सन्त्येवोपकारकास्तान्सर्वान्धन्यवादान्वितरामः।

यैर्यैर्महाशयैरस्मिन्संशोधनकार्ये लिखितानि मुद्रितानि वा पुस्तकानि प्रदत्तानि तेषां नामानि सधन्यवादं प्रकटीकरवाम.

श्री गोपीनाथकविराज, एम्. ए., प्रिन्सिपाल, गवर्न्मेन्ट संस्कृत कालेज, बनारस

श्री नारायणशास्त्री खिस्ते, सरस्वती भवन हस्तलिखित पुस्तकालयाध्यक्षः

श्री माधवशास्त्री भण्डारी, प्रधानाध्यापकः, संस्कृत कालेज, लाहार

श्री दामोदर विष्णु गाडगिल्, हैद्राबाद कर

श्री प्रज्ञानन्दसरस्वती, कैवल्यधाममठ, श्री काशी

ये पथप्रापका मह्यं मुक्तारामा हि दीक्षिताः।
मोकाटेस्वामिमिश्राश्च धन्योऽहं यदनुग्रहात् ॥ १ ॥
धन्योहं मूलजीभट्टो जनको यस्य विश्रुतः।
लाडकी जननी पञ्च भ्रातरोन्ये प्रजायुताः ॥ २ ॥
ममेशानुग्रहः पूर्णो पूर्णो ग्रन्थोपि शोधितः।
पार्वतीत्र्यम्बकाभ्यां किं स्वरूपाभ्यां नते नते ॥ ३ ॥

विद्वद्भिरस्य बहुदोषयुतत्वमित्थम्
किं वास्य केवलगुणप्रथनं भवेच्चेत्।
तुल्यं द्वयं मम हितप्रददं भवेत्तत्
कष्टं नु तत्तदुभयं ब्रुवते हि मन्दाः ॥ ४ ॥
संशोधनं तु बहुयत्नकृतं नु मन्ये
पत्राणि चापि रुचिराणि तथाक्षराश्च।
संयोजकस्य मम दृष्टिगतांश्च दोषान्
सन्त्यज्य मे सफलयन्तु परिश्रमं भोः ॥ ५ ॥

अन्ते च

संशोधने सहृदयाः सदया भवन्तु इति कव्युक्त्या प्रार्थयते—

भाद्रपद शुक्ला प्रतिपत् १९८९
जामनगर

विपश्चितां वशंवदः
त्र्यम्बकरामशास्त्री भट्टः
जामनगर राजकीय पाठशाला प्रधानाध्यापकः

सिद्धान्तबिन्दोर्विषयानुक्रमः

अवतरणे विषयाः

मङ्गलम्	४—५
सङ्क्षेपेण प्रयोजनकथनम्	७—८
निष्प्रयोजनत्वशङ्कासमाधी	९—१९
महावाक्यानामात्मतत्त्वबोधकत्वव्यवस्थापनम्	१९—२५
अवान्तरवाक्यीयपदार्थप्रतिपाकत्वम्	२५—३९
प्रमितिप्रमात्रोर्महावाक्यार्थबोधेऽभानम्	४२—४३
तत्त्वंपदार्थमात्रानुभवात्कृतकृत्यत्वं न भवति	४९—५०
लक्ष्यस्याखण्डार्थत्वं पदजन्यस्मरणस्य निर्विकल्पकत्वं च	६४
अङ्गकथनपूर्वकं प्रकृते निर्विकल्पवाक्यार्थबोधव्यवस्थापनम्	६६—७३
विचारवैयर्थ्यशङ्कापरिहारौ	१०३—१०४
त्वंपदार्थे विप्रतिपत्तयः	१७५—११३

प्रथमश्लोके विषयाः

विप्रतिपत्तिनिरासाय प्रथमश्लोकयोजनम्	११४
आत्माभेदेपि सुखादिव्यवस्था	१२३—१२५
ध्वंसाद्यभावप्रतियोगित्वं नात्मनः किन्तु देहादेः	१२६—१३४
सुषुप्तावात्मनोऽभावशङ्का तत्परिहारश्च	१३४—१३८
प्रमातृभिन्ने साक्षिणि तार्किकाद्याक्षेपः ग्रन्थकर्तुः समाधानं च	१३८—१४७
निरवयवस्यात्मनः प्रतिबिम्बत्वं कथमिति शङ्कातत्परिहारश्च	१४७—१५४
आत्मनः प्रतिबिम्बे प्रमाणप्रश्नोत्तरे	१५४—१२९
प्रतिबिम्बसत्यत्वमिथ्यात्वविचारौ मतभेदेन	१५९—१६०
अध्यासानुपपत्तिशङ्का	१६०—१७४
समाधानं श्रुत्या	१७४—१७७
,, युक्त्या	१७७—१७८
भ्रान्तिकारणत्वेनानिर्वचनीयाज्ञानासिद्धिः	१८८—१८९
अज्ञानस्याभावादिरूपत्वनिरासेनानिर्वचनीयत्वव्यवस्थापनम्	१८९—१९८
इतरेतराध्यासेऽज्ञानस्य कारणत्वं तत्रात्माश्रयादिदोषपरिहारश्च	१९७—१९८
अनेकविधाध्यासनिरूपणम्	१९८—२१५
अध्यासस्यानादित्वे भाष्योक्तसंस्कारजन्यत्वशङ्का	२१५—२१६
भाष्योक्तेरन्यपरत्वकथनम्	२१६

अध्यासस्य लक्षणान्तरम् २१७
अध्याससिद्धौ जीवेश्वरव्यवस्था वार्तिकमतेन २१७—२२४
,, सर्वज्ञमुनिमतेन २२५—२२६
,, वाचस्पतिमतेन २२७—२३२
,, दृष्टिसृष्टिमतेन २३३—२३७
परस्परविरुद्धमतानामप्रामाण्यशङ्कापरिहारौ २३७—२३९
घटादिद्वैतज्ञानस्यापि अद्वैते प्रामाण्यादिना नाद्वैतज्ञानस्य द्वैतज्ञानेन बाधः २३९—२५६
प्रश्नपूर्वकं प्रतिकर्मव्यवस्थाप्रदर्शनम् २५६—२६७
वृत्तेरावरणाभिभवार्थत्वचिदुपरागार्थत्वविवेकः २६८—२८३
चिदुपरागार्थत्वपक्षे धर्मादीनां सर्वदा भानप्रसङ्गशङ्कासमाधी २७३—२८४
ब्रह्मणः कथमावरणमिति शङ्का तत्समाधानञ्च २८१
आवरणभङ्गार्थत्वपक्षे घटादिज्ञानेन मोक्षप्रसङ्गशङ्का तन्निरासश्च २८४—२८७
ब्रह्मज्ञानेनाप्यनिर्मोक्षप्रसङ्गः तन्निरासश्च २८७—२९०
अनुमानादिना आवरणं निवर्तते न वेति शङ्का तत्समाधिश्च २९०—२९६
अन्तःकरणधर्माणां कर्तृत्वादीनां द्वेधावभासशङ्का तन्निरासौ २९६—२९७

द्वितीयश्लोके

वेदप्रामाण्यार्थमपि प्रमातृत्वादेः सत्यत्वमभ्युपेयमित्याशङ्कानिवृत्तये द्वितीयश्लोकयोजनम् २९८—३०१

तृतीयश्लोके

वर्णाश्रमादिव्यवहारस्य मिथ्यात्वदृढीकारकारणत्वेन तृतीयपद्ययोजना ३०१—३०६

चतुर्थश्लोके

तत्पदार्थे वादिविप्रतिपत्तयः ३०७—३१७
विप्रतिपत्तिनिरासाय चतुर्थपद्यावतारः ३१७—३३३

पञ्चमश्लोके

ब्रह्मणः सर्वव्यापकत्वदृढीकाराय श्लोकं योजयति ३३४

षष्ठश्लोके

ब्रह्मणि अनर्थसम्भावनानिरासपरत्वेन षष्ठं पद्यं योजयति ३३६—३३९

सप्तमश्लोके

ब्रह्मणो ब्रह्मभावोपदेशे आनर्थक्यप्रसङ्ग इति तत्परिहारपरत्वेन सप्तमं पद्यं योजयति ३४१—३४७

अष्टमश्लोके

जाग्रदादीनां लक्षणतः स्वप्नत्वेपि अविद्याकृतविशेषसम्भवात् व्यवस्था परमार्थतस्तु न कापील्याहाष्टमेन पद्येन ३४८

पदार्थो द्विविधः	३४९
ईश्वर–जीव–साक्षि–भेदेन दृशस्त्रैविध्यम्	३४९
ईश्वरत्रैविध्यम्	३५०—३६७
जीवत्रैविध्यम्	३७०—३७२
प्रपञ्चस्य (दृश्यस्य) त्रैविध्यम्	३७२—३७४
अव्याकृताभिधायाः साभासाविद्याया भूतोत्पत्तिः	३७४
भावरूपस्यान्धकारस्याप्यविद्याया उत्पत्तिः	३७६
दिक्कालयोः प्रमाणाभावः	३७७
भूताद्युत्पत्तिक्रमः	३७८—३८७
पञ्चीकरणप्रक्रिया	३८७
त्रिवृत्करणपूर्वपक्षः तन्निराकरणञ्च	३८८—३९२
शरीराद्युत्पत्तिक्रमः	३९२—३९५
लयक्रमः	३९५—३९८
जागरणनिरूपणं विश्वभोग्यत्वं च	३९८
स्वप्ननिरूपणम् तैजस ”	
स्वप्नाध्यासाधिष्ठानविचारः	४०३—४०५
जीवचैतन्यस्य कथमधिष्ठानत्वमिति शङ्का तत्परिहारश्च	४०५—४१३
मनोवच्छिन्नस्य ब्रह्मचैतन्यस्य वा स्वाप्नाधिष्ठानत्वे दोषोद्भावनं परिहारश्च	४१३—४१६
सुषुप्त्यवस्था तदभिमानिनः प्राज्ञस्य च निरूपणम्	४१६
अनाप्तवाक्यजन्य परोक्षविभ्रमेप्यविद्यावृत्तित्वातिदेशः	४२५
तर्कस्यापि मनोवृत्तित्वव्याख्यानम्	४२७
सुषुप्तौ दुःखानुभवाशङ्का तत्परिहारश्च	४३७
अवस्थात्रयस्यापि त्रैविध्यम्	४३७
क्रममुक्तिप्रक्रिया	४३९

नवमश्लोके

साक्षिणः सत्यत्वं ख्यापयन् नवमं श्लोकमवतारयति	४४२
आत्मनः पुरुषार्थत्वव्यवस्था	४४५—४४७
मोक्षे सुखं संवेद्यते नवेति प्रश्नः	४४७—४४९
प्रश्नोत्तरत्वेन श्लोकावयवयोजनम्	४५०

दशमश्लोके

जगतस्तुच्छस्याभावनिरासाय श्लोकं योजयति	४५५
ग्रन्थान्ते मङ्गलम्	४६१

पाठभेदार्थं प्राप्तानां पुस्तकानां परिचयः

क इति संज्ञितम् मूलं नारायणीटीकायुतं हस्तलिखितं कैवल्यधाममठात् सम्प्राप्तम्

ख ,, मूलं नारायणीयुतं हस्तलिखितं सरस्वतीभवनाल्लब्धम् अत्यन्तमशुद्धं मूलटीकयोर्विभागोपि क्वचित्क्वचित्कष्टतोऽवबुध्यते

ग ,, मूलं न्यायरत्नावलीयुतमद्वैतमञ्जरीमुद्रितम्

घ ,, मूलं ,, हस्तलिखितं मनोहराक्षरं शुद्धं म० म० गुरुवर्यनित्यानन्दपन्तपर्वतीयद्वारा दामोदर विष्णु गाडगिल हैदराबाद करसकाशात् लब्धम्

च ,, मूलं न्यायरत्नावलीयुतं मुद्रितमपि पठनकाले शोधितं श्रीमद्भिर्माधवभण्डारिशास्त्रिभिर्लब्धम्

छ ,, मूलं न्यायरत्नावलीयुतं हस्तलिखितं मदीयम्

आवश्यकीयम्

२७१ पृष्ठादारभ्य अङ्कादिरहितः केवल() मेतच्चिह्नमध्यगः पाठः अत्यावश्यकत्वात्पुस्तकेषु केष्वप्यभावादस्माभिर्वर्धित इति बोध्यम् । यथा २७१ पृष्ठे नारायण्यां (सम्बन्ध) २७३ पृष्ठे न्यायरत्नावल्याम् (इव) इत्यादि । २७१ पृष्ठात्पूर्वन्त्वेतस्य चिह्नस्य पाठभेदायाप्युपयोगः कृतः, परन्तु (१)(२) इत्याद्यङ्केन साकमिति बोध्यम् ।

अत्र असँल्लग्नस्य पाठस्य ग्रन्थस्थस्य [] अस्मिन् चिह्ने निवेशनं कृतमित्यपि बोध्यम् ।



तत्सत्परमात्मने नमः ।

अथ

श्रीमधुसूदनसरस्वतीविरचितः

सिद्धान्तबिन्दुः ।

अथ

गौडब्रह्मानन्दकृता सिद्धान्तबिन्दुटीका

न्यायरत्नावली ।

नमो नवघनश्यामकामकामितदेहिने ।
कमलाकामसौदामकणकामुकगेहिने ॥ १ ॥

अथ नारायणतीर्थकृता लघुव्याख्या

श्रीशं शान्तमनन्तमद्वयसुखं स्वाध्यस्तसत्ताप्रदं
नत्वाचार्यवरं गुरूंश्च सततं सिद्धान्तबिन्दोर्गिरः ।
सत्प्रीत्यै श्रुतिमुख्यमाननिवहैः सिद्धान्तसङ्ग्राहिका
दुर्बोधाः प्रकटीकरोति मतिमान्नारायणाख्यो यतिः ॥ १ ॥

ॐतत्सत्

नत्वा साम्बं सतनयं त्र्यम्बकं त्र्यम्बकः प्रभुम् ।
ग्रन्थान्तरस्थितं पाठभेदं संयोजयाम्यहम् ॥ १ ॥
टीकाकृताऽपरित्यक्तं मूलं टीकास्थितं तथा ।
क्लिष्टं स्थलं समासाद्य टिप्पणी क्रियते मया ॥ २ ॥

न्यायरत्नावली ।

अद्वैतसिद्धेष्टीकायास्तदीयायाश्च सङ्ग्रहात् ।
विचित्ररचना काचिद्ब्रह्मानन्देन रच्यते ॥ २ ॥
शङ्करोक्तिसुधाम्भोधेर्गुरूणामुपदेशतः ।
उद्धृतां प्रकटीकुर्वे न्यायरत्नावलीमिह ॥ ३ ॥

तत्राद्वितीयस्वप्रकाशनिरतिशयानन्दरूपयोर्जीवब्रह्मस्वरूपयोरैक्यमुक्तानन्दरूपं बोधयत् 'अहं ब्रह्मास्मी'त्यादिवेदान्तमहावाक्यं द्वितीयविषयकप्रत्यक्षादिसर्वप्रमाणबाधकम् । अतोऽनात्मभूतं सर्वं मिथ्येत्याद्यर्थविवेचनवचनरोचमानं श्रीमद्बादरायणशङ्करसुरेश्वराचार्यवर्यकृतमर्यादं वेदान्तदर्शनं दर्शनेषु सर्वेषु दर्शनीयतमं (१)दर्शनम् । तस्य च विचारशास्त्रस्य विचार्यवेदान्तवाक्यद्वारा परमं तात्पर्यमुक्तैक्ये । अवान्तरं तु शुद्धजीवब्रह्मस्वरूपयोः तदैक्यसाक्षात्कारहेतुश्रवणादौ च । प्रत्यक्षादिप्रमाणसिद्धदृग्दृश्याद्यनेकभागभागिन्यां प्रक्रियायां त्वनुवादकत्वम् । तत्र चानुवाद्यप्रक्रियायां पदार्थो द्विवि-

नारायणी ।

(२)परमात्मा परं ब्रह्म निर्विशेषः स्वसाक्षिकः ।
सच्चित्सुखघनोऽद्वैतोऽनृताधिष्ठानकारणम् ॥ २ ॥
तदभेदधिया स्वस्य जाग्रत्स्वप्नादिसाक्षिणः ।
स्वाध्यस्तानर्थविलयान्मोक्षस्तद्रूपसंस्थितिः ॥ ३ ॥
इति वेदान्तसिद्धान्तो भगवत्पादसंमतः ।
कृष्णद्वैपायनाभीष्ट इति सन्तोऽत्र सादराः ॥ ४ ॥

"एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति ।तमात्मस्थं येनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् । ब्रह्मविदाप्नोति परम्, ब्रह्म वेद ब्रह्मैव भ वति" इत्यादिश्रुत्याऽद्वैतज्ञानस्यैव नित्यनिरतिशयानन्दरूपमोक्षसाधनत्वनिश्चयात् । तादृशानन्दरूपश्चात्मैव, तस्यैव स्वार-

(१) दर्शनीयतमं दर्शनीयम् इति पाठो गपुस्तके ।
(२) श्रीशाङ्कर भाष्याब्धौ प्रविश्य येऽर्थाश्चिरं लभ्याः ।
इह ते खलु प्रयतनैर्लभ्याः सभ्यैरशेषेण ॥ २ ॥
अयं द्वितीयः श्लोकोऽधिकः खपुस्तके ।

न्यायरत्नावली ।

धः । दृक् दृश्यं च । दृगपि चिद्रूपा उपाहितानुपाहतरूपेण द्विविधा । अनुपहिता मोक्षदशायां केवलैव भाति, संसारदशायां तु भासमानसर्वानुस्यूतरूपेणापि । तथा च श्रुतिः–'तमेव भान्तमनुभाति सर्वं' मिति । अनुमानमपि-घटादयो भानविषयाः आनयनादिविशेषणतया प्रवृत्तिविषयत्वादिति । घटादिसर्वभासमानपक्षकानुमितौ लाघवादेकभानव्यक्तिर्विषयः । उपाहिता तु ईश्वरजीवभेदेन द्विविधा । तत्रेश्वरोऽविद्योपाधौ बिम्बीभूतः । जीवस्तु तत्र प्रतिबिम्बीभूतः । तयोश्चानादिभेदसत्त्वादुपास्योपासकभावेन चित्तशुद्ध्या स्वरूपप्रबोधप्राप्त्या समूलबन्धाद्विमुच्यते जीवः । तदेवमादिसर्वं सकलविद्यापारावारपारीणैः श्रीमधुसूदनसरस्वतीभिः सिद्धान्तबिन्दौ सूत्रितमिति तदवलम्ब्य प्रकटीक्रियते । तत्र गुरुपरम्परामूलभूतश्रीशङ्कराचार्यरूपेश्वरप्रणामरूपं स्वाचरितग्रन्थसमाप्तिप्रतिबन्धकनाशकं मङ्गलं शिष्याणामनुषङ्गतो मङ्गलसम्पादनाय कथयन् मोक्षहेतुतत्त्वधी-

नारायणी ।

सिकेष्टत्वात् । तत्र यद्यपि सुखमात्मरूपतया नित्यप्राप्तं तथाप्यनिर्वचनीयानाद्यविद्यया विस्मृतग्रैवेयकादेरिवाप्राप्तत्वभ्रमात्सांसारिकसुखाभासप्राप्तयेऽनेककर्माण्याचरन् तज्जनितसुखदुःखे अनुभवन् सर्वोऽपि जीवो दुरन्तदुर्वारसंसारचक्रे बभ्रमीति । अतः सर्वानर्थहेतुरात्मानवबोध इति । नित्यनिरतिशयस्वप्रकाशसच्चिदानन्दरूपयोर्जीवब्रह्मणोरैक्यरूपशुद्धचिन्मात्रगोचरनिर्विकल्पकसाक्षात्कारद्वारा तदपनयनेन स्वस्वरूपसाम्राज्यदाने प्रवृत्तापि "तत्त्वमसि, अहं ब्रह्मास्मि" इत्यादिश्रुतिः प्रत्यक्षाद्यविरोधाय कणभक्षाक्षचरणजैमिनिकपिलपतञ्जलिभिरसद्भिः साध्वीव स्वस्वपक्ष आकृष्यमाणा स्वाभिप्रायमनर्पयन्ती न फलाय कल्पत इति तदभिप्रेत्यैकतरतत्त्वप्रकाशनाय भगवद्बादरायणसूत्रतद्भाष्यादीनि। तानि च कठिनत्वाद्बहुतरत्वाच्च मन्दमध्यमयोरनतिप्रयोजनानीति मत्वा शिष्टाग्रणीर्ग्रन्थकारः कमपि बह्वर्थवहं निबन्धं करिष्यन् तस्य निर्विघ्नपरिसमाप्तये(१) गुरुदेवतानमस्कारात्मकं मङ्गलं शिष्यान् शिक्षयि-

(१) 'कृतम्' इत्यधिकः पाठः खपुस्तके स च युक्तः ।

श्रीशङ्कराचार्यनवावतारं विश्वेश्वरं विश्वगुरुं प्रणम्य ।

न्यायरत्नावली ।

प्रयोजकं प्रकरणं कर्तव्यतया प्रतिजानीते–श्रीशङ्करेत्यादिना । श्रीशङ्कराचार्यश्चासौ नवावतारश्चेति कर्मधारयः । तद्गुणसंविज्ञानबहुव्रीहिणा शङ्कराचार्यप्रणामलाभेऽपि गौरवान्न स आश्रितः । नवं यथा स्यात्तथाऽवतरत्यस्मिन्निति नवावतारः । करणाधिकरणयोश्चेत्यधिकारस्थेन 'अवेतृस्त्रोर्घञि'त्यनेन तथानुशासनात् । अवतरणं च तादात्म्याभिमानः [तस्य] विषयत्वं सप्तम्यर्थः । तथा च शङ्कराचार्यरूपे शरीरे विश्वेश्वरस्याभिनवतादात्म्यसत्त्वात्तयोरभेदान्वयः । न चावतारशब्दस्य पाचकादिशब्दवत् क्रियाशब्दत्वेन विशेष्यत्वानुपपत्तिः, विशेषणविशेष्यकर्मधारयविधायकसूत्रे द्रव्यशब्दस्यैव विशेष्यत्वमिति पदमञ्जर्यादावुक्तत्वादिति वाच्यम् । तथा सति पुण्डरीक मिताम्भाजमित्यादावम्भाजपदस्यापि तदनुपपत्त्यापत्तेः ।

नारायणी ।

तु(१)मादौ निबध्नन् ग्रन्थारम्भं प्रतिजानीते श्रीशङ्करेत्यादिना । श्रीशङ्कराचार्यश्चासौ नवावतारश्चेति कर्मधारयः । रामकृष्णादिशरीरापेक्षया नवं शरीरमवतरति(२) गच्छतीति नवावतारः । तथा च शङ्कराचार्यरूपेण नवतयाऽवतीर्णं विश्वेश्वरं(३) प्रणम्येत्यर्थः ।(४)विश्वेश्वरमित्यनेन शास्त्रार्थेष्वनावरणं ज्ञापितं जगदीशितुरावरणायोगात् । विश्वगुरुमित्यनेन ज्ञानमार्गप्रदर्शकावतारत्वोक्त्याऽवतारान्तरतोऽप्युत्कर्षः सूचितः । प्रमाणं चात्र—

व्याकुर्वन् व्याससूत्राणि श्रुतेरर्थं यथोचिवान् ।
श्रुतेर्न्याय्यः स एवार्थः शङ्करः सवितानतः ॥

इति शैवपुराणम् ।

(१)—व्याख्यातृश्रोतृणामनुषङ्गतो मङ्गलाय च ग्रन्थादौ–इत्यधिकः पाठः खपुस्तकीयः श्लिष्टः ।

(२) अवतरति शक्त्याऽऽविशतीति नवावतारः इति पाठः खपुस्तके ।

(३) विश्वेश्वरं विश्वगुरुं प्रणम्येति पाठः खपुस्तके ।

(४) अत्र विचित्रशक्त्यवतारत्वाद्व्यासादेरिव विश्वस्रष्टृत्वादिसामर्थ्यमबाधितमित्यभिप्रेत्य विश्वेश्वरमिति कथनेन—इति पाठः खपुस्तके ।

वेदान्तशास्त्रश्रवणालसानां बोधाय कुर्वे कमपि प्रयत्नम् । १।

न्यायरत्नावली ।

अथ तस्य योगरूढत्वेन पद्मरूपद्रव्यवाचकत्वस्यापि सत्त्वेन न विशेष्यत्वानुपपत्तिः । तर्ह्यवतारशब्दस्यापि रथादावप्रयोगेण नोक्तानुपपत्तिः । शङ्कराचार्येत्यस्यापि द्रव्यरूपव्यक्तिविशेषरूढत्वस्यापि सत्त्वेनोपपत्तिः । अन्यथा आचार्यशब्दस्यापि—

आचिनोति च शास्त्रार्थमाचारे स्थापयत्यपि ।

इत्यादिना क्रियावाचकत्वस्योक्तत्वात् शङ्करशब्दस्य द्रव्यवाचकत्वाच्च कर्मधारयत्वानुपपत्तेः । अथवा शङ्कराचार्यरूपं रामकृष्णादिशरीरापेक्षया नवं शरीरमवतरति गच्छतीति नवावतारः । 'कर्मण्यणि'त्यनुशासनात् कुम्भकारादिवत् । तथा च शङ्कराचार्यरूपेण नवतयावतीर्णं विश्वेश्वरं प्रणम्येत्यर्थः ।

'चतुर्भिः सह शिष्यैस्तु शङ्करोऽवतरिष्यति ।

इति वायुपुराणोक्तेः शङ्कराचार्यस्येश्वरावतारता । चतुर्भिः पद्मपादतोटकहस्तामलकसुरेश्वराचार्यैः । अनेन शुद्धचितोऽपि आविद्यकभेदेन ईशजीवादिनानारूपेण उपास्योपासकत्वादिसम्भव इति सूचितम् ।

वेदान्तशास्त्रेति । शारीरकमीमांसारूपचतुरध्यायी—तद्भाष्य—

नारायणी ।

चतुर्भिः सह शिष्यैस्तु शङ्करोऽवतरिष्यति ।
इति वायुपुराणम् ।

भविष्यत्यवतारेण शङ्करो नीललोहितः ।
श्रौतस्मार्तप्रतिष्ठार्थं भक्तानां हितकाम्यया ॥
उपदेक्ष्यति यज्ज्ञानं भक्तानां ब्रह्मसंज्ञितम् ।
सर्ववेदार्थसारं हि धर्माद्वेदनिदर्शनात् ॥
ये तद्विप्रा निषेवन्ते संन्यासेनोपचारतः ।
विजित्य कलिजान्दोषान्यान्ति तन्मयतां हि ते ॥
इत्यादिकूर्मपुराणं चेति ।

वेदान्तेति । वेदान्तो नामोपनिषत् सा चोप—समीपे प्रत्यगात्मपराणां

न्यायरत्नावली ।

तदीयटीकावाचस्पत्य-तदीयटीकाकल्पतरु-तदीयटीकापरिमलरूप-ग्रन्थपञ्चकेत्यर्थः । श्रवणालसानां संक्षिप्तसाररूपेण तदर्थं श्रोतुकामानाम् । बोधायेति । उक्तशास्त्रप्रतिपाद्यार्थनिश्चयायेत्यर्थः । तथा च तच्छास्त्रे श्रुतेऽपि यत्सन्दिग्धं तदनेन प्रकरणेन निश्चेतुं शक्यते इति भावः ।

तच्छास्त्रप्रतिपाद्यानि चोच्यन्तेऽध्यायभेदतः ।
आद्ये श्रुतीनां जीवेशाभेदे तात्पर्यनिश्चयः ॥
द्वितीये तदभङ्गाय दुष्टशास्त्रोपमर्दनम् ।
तृतीये तत्त्वबोधस्य साधनानां निरूपणम् ॥
चतुर्थे तत्फले जीवन्मुक्तिः कैवल्यमीरिते ।
प्रसङ्गः सगुणस्यापि शास्त्रेऽस्त्यत्र तु नो तथा ॥

अत्र विश्वेश्वरमित्यनेन जगत्सृष्ट्यादिसामर्थ्यरूपैश्वर्योक्त्या तन्मूलीभूतसार्वज्ञ्यसूचनेन शास्त्रार्थेषु सुतरामनावरणमिति सूचितम् । विश्वगुरुमित्यनेन नास्तिकषड्दर्शनीकर्तृणामास्तिकषञ्चदर्शनीकर्तृणां च शिक्षक आचार्य इति सूचनात् वेदान्तदर्शनस्य सर्वदर्शनशिरोमणित्वं सूचितम् । कमपीत्यनेन लघुरपि बहुर्थवहश्चिन्तामणिरिव निबन्धोऽयमिति वक्ष्यमाणमस्य सर्वग्रन्थापेक्षयोपादेयत्वं प्रवर्तमानोत्साहाय सूचितम् ॥ १ ॥

नारायणी ।

सहेतुं संसारं सादयति नाशयतीति व्युत्पत्त्या ब्रह्मविद्या, सा शिष्यते निर्धार्यतेऽनेनेति शास्त्रं उपनिषत्तन्मूलकतद्भाष्यादीनि तच्छ्रवणेऽलसानां सङ्क्षिप्तसाररूपेण तदर्थं श्रोतुकामानां बोधाय तत्प्रतिपाद्यार्थनिश्चयाय कमपि अपूर्वं १) सर्वसिद्धान्तसङ्ग्राहकम् ॥ १ ॥

(१) अत्रायमधिकः पाठः खपुस्तके—"सकलशास्त्रसङ्ग्राहकं ततोऽप्यपूर्वामित्यर्थः । तथाहि—

शास्त्रं ब्रह्मविचाराख्यं तत्राध्यायाश्चतुर्विधाः ।
समन्वयाविरोधौ द्वौ साधनं च फलं तथा ॥

इह खलु साक्षात्परम्परया वा सर्वान् जीवान् समुद्दिधीर्षुर्भगवान् श्रीशङ्करोऽनात्मभ्यो विवेकेनात्मानं नि-

न्यायरत्नावली ।

सर्वानिति ।

श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः ।

इति स्मृतेः पुराणादिश्रवणे शूद्रस्याप्यधिकारसम्भवात् श्रावकस्य ब्राह्मणस्यैतत्प्रकरणाधीनशास्त्रार्थज्ञानेन व्याख्यानकौशलाच्छूद्रस्योद्धार्यता । कीटादीनामपि कदाचिद्ब्राह्मणादिभावं प्राप्स्यतामुद्धरिष्यमाणतेति भावः । उद्दिधीर्षुः—दुःखेनात्यन्तं विमुमोचयि-

नारम्भणी ।

प्रेक्षावत्प्रवृत्तये विषयप्रयोजनाधिकारिसम्बन्धान् दर्शयितुं भूमिकामारचयति इहेत्यादिना । इह—भुवि । खलु वाक्यालङ्कारे । साक्षात् ब्राह्मणादित्रैवर्णिकान्, [(१)शूद्रादींस्त्वेतद्ग्रन्थार्थज्ञानवद्भक्तृकेतिहासादिश्रवणद्वारा] परम्परया [केनचित्पुण्येन] मनुष्यादिभावप्राप्तान्कीटादीन् समुद्दिधीर्षुः—दुःखेनात्यन्तं विमोचयिषुः, भगवान्—

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
वैराग्यस्याथ मोक्षस्य षण्णां भग इतीङ्गना ॥

इत्युक्तषड्गुणवान् श्रीशङ्करः मोक्षरूपः श्रीमान् शङ्कराचार्यः। अनात्मभ्यः अविद्यातत्कार्येभ्यः विवेकेन—भेदेन अनात्मप्रतियोगिकभेदेनोपलक्षितमा-

तत्रापि प्रथमे तत्र वेदान्तानां समन्वयः ।
परमात्मन्यद्वितीये मुनिना दर्शितः स्वयम् ॥
द्वितीये स्मृतितर्काभ्यामविरोधोन्यदुष्टता ।
भूतभौतिकलिङ्गानां विरोधस्य निराकृतिः ॥
तृतीये विरतिस्तत्त्वंपदार्थपरिशोधनम् ।
गुणोपसंहतिर्ज्ञानबाहिरङ्गादिसाधनम् ॥
चतुर्थे जीवतो मुक्तिरुत्क्रान्तिर्गतिरुत्तरा ।
ब्रह्मप्राप्तिब्रह्मलोकाविति सर्वार्थसङ्ग्रहः ॥
सर्वं तदत्र सारेण दशश्लोकेषु दर्शितम् ।
तेनापूर्वं ततो ज्ञेयं शब्दसङ्क्षेपकौशलात् ॥

(१) [] [] एतच्चिह्नमध्यगौ पाठौ खपुस्तके न स्तः ।

त्यशुद्धबुद्धमुक्तस्वभावं सङ्क्षेपेण बोधयितुं दशश्लोकीं प्रणिनाय ।

न्यायरत्नावली ।

षुः । विवेकेन भेदेनोपलक्षितमात्मानं बोधयितुमित्यर्थः । तेन भेद-विशिष्टात्मविषयकज्ञानस्योद्धारहेतुत्वेऽपि न दोषः । नित्यं-कालापरिच्छिन्नम् । शुद्धं-रागद्वेषाद्यशुद्धिरहितम् । बुद्धं-स्वप्रकाशनिरतिशयानन्दम् । मुक्तम्-अविद्यारूपबन्धशून्यम् । स्वभावम्-स्वमेव भावः सत्ता यस्य तम् अनन्याधीनसत्ताकम् । आत्मानम्-अनात्मनामधिष्ठानस्वरूपभूतम् । तद्विज्ञानेन श्रुतिषु सर्वविज्ञानस्य प्रतिज्ञानात् ।

ननु आत्मानात्मनोस्तादात्म्यारोपमम्भवे तयोर्विवेकज्ञानमुपयुज्यते, तयोस्तु तमःप्रकाशवदत्यन्तविरुद्धत्वेन प्रतीयमानत्वात्तदसम्भवः, आत्मा हि सच्चिदानन्दरूपः प्रतीयते, अनात्मा तु मिथ्याजडदुःखरूपः, तथा चानात्मनां सर्वेषामात्मानं तादात्म्येन कल्पितत्वमित्यौपनिषदमतस्यासम्भवेन आत्मवदनात्मनां सत्यत्वमेव, एवं च 'अहं गौरः' इत्यादिप्रत्ययो गौरादिदेहस्वामित्वविषयकः, 'अहं कर्ता दुःखी'त्यादिधीस्तु भ्रमैव, 'असङ्गो ह्ययं पुरुष'इत्या-

नारायणी ।

त्मानं अनात्मनामधिष्ठानम् बोधयितुमित्यन्वयः । (१)नित्यं-ध्वंसप्रागभावाऽप्रतियोगिनम्, शुद्धं-रागादिरहितम् । बुद्धं-बोधरूपम् । मुक्तम्-अविद्यारूपबन्धरहितम् । स्वभावं-स्वमेव भावः सत्ता यस्येति स्वस्वरूपसत्ताकम्, सङ्क्षेपेण-प्रासङ्गिकोपासनादिविचाररहित्येन । बोधयितुम्-अप्रतिबद्धाऽपरोक्षसाक्षात्कारार्थम् । अत्रात्मानं बोधयितुमित्यनात्मज्ञानं विषयः । ग्रन्थविषययोः प्रतिपाद्यप्रतिपादकभावः सम्बन्धः ।

(१) अनात्मप्रतियोगिकभेदेनोपलक्षितात्मविषयकाप्रतिबद्धापरोक्षसाक्षात्कारार्थमिति यावत् । एतेन स्वमते विशिष्टज्ञानस्योद्धारहेतुत्वेपि न हानिः । आत्मनोऽनात्मभ्यो भेदकं विशेषमाह नित्येत्यादि । नित्यश्चासौ शुद्धश्चासौ बुद्धश्चासौ मुक्तश्चासौ स्वभावश्चेति नित्यशुद्धबुद्धमुक्तस्वभावः तम् । इत्यधिकः पाठः खपुस्तके ।

नन्विदङ्कारास्पदेभ्योऽनात्मभ्यो विवेकेनाहङ्कारास्पदमात्मानं सर्वो लोकोऽहमस्मीति प्रत्येति दुःखं चानुभ-

न्यायरत्नावली ।

दिश्रुतयस्तु स्तुतिपरा इत्याशयेन शङ्कते-नन्वित्यादिना । इदङ्कारास्पदेभ्यः-इदमित्याकारकधीविषयेभ्यः । अहङ्कारास्पदम्-अहमित्याकारकधीविषयम् । अनात्मभ्य आत्मानमिति तु फलितार्थोक्तिः। सर्वो लोक इति । गौरोऽहमित्यादिज्ञानस्य देहस्वामित्वेनात्मानं

नारायणी ।

समुद्दिधीर्षुरित्यनेनाविद्यादिनिवृत्त्या स्वस्वरूपानन्दावाप्तिः फलम्, तत्कामोऽधिकारी च सूचितः ।

(१)सन्दिग्धाऽपूर्वसप्रयोजन एव प्रेक्षावत्प्रवृत्तेरात्मनश्चातथात्वान्न तत्प्रतिपादनमुचितमित्यभिप्रेत्याहंप्रत्ययस्य प्रमात्वाभिमानी शङ्कते नन्वित्यादिना । **इदङ्कारास्पदेभ्यः इदमितिधीविषयेभ्यः दृष्टभिन्नेभ्य इति यावत् । अत एव अनात्मभ्यः परिच्छिन्नेभ्यः, विवेकेन भेदेन, अहङ्कारास्पदम् अहमितिधीगोचरम्, सर्वो लोक आस्तिकनास्तिकसाधारणो जनः, प्रत्येति अनुभवति । अयं भावः । *देहेन्द्रियादीनामवस्थाभेदेषु व्यभिचारित्वान्नानुवृत्ताहम्प्रत्ययविषयत्वं युक्तम्, बुद्धिमनसोश्चक्षुरादिवत्करणत्वादेव न तथात्वं युक्तम्, अहंप्रत्ययस्य कर्तृमात्रविषयत्वात्, अतो देहेन्द्रियमनोव्यतिरिक्त आत्मव विषयः* । गौरोहमन्धोहमित्यादयस्तु प्रयोगा असत्यप्यभेदे कथञ्चिन्मञ्चाः क्रोशन्तीत्यादिवदौपचारिका एव(२),अतः प्रतिबन्धकभेदग्रहसत्त्वे तादात्म्यारोपासम्भवादनावृतत्वेनासन्दिग्धत्वादपूर्वत्वाभावाच्च शास्त्रं निरर्थकमिति । अपि च शास्त्रजन्यज्ञानान्नैव दुःखनिवृत्तिरूपपुरुषार्थसम्भवः प्रत्यक्षप्रमयापि तस्यानिवृत्तेरित्यभिप्रेत्याह** दुःखं चेति । **तथा च धारयाऽनादिदुःखादिरूपस्य बन्धस्य**

(१) ननु सन्दिग्धापूर्वसप्रयोजनस्यैव प्रेक्षावत्प्रतिपित्सितत्वात् । इति खपुस्तकीयः पाठः श्लिष्टः ॥

* * एतच्चिह्नद्वयमध्यस्थः पाठः खपुस्तके शब्दतो भिन्नोप्यर्थत एक एव । आत्मैव विषयः इत्यस्यानन्तरम् "व्यावृत्तेष्वनुगतधियो व्यावृत्तभिन्नानुगतविषयत्वस्य दामकुसुमबुद्ध्यादौ दर्शनात्" इत्यधिकः पाठः ।

(२) मम देहो मैमेन्द्रियाणि मम मनो मम बुद्धिरिति भेदबुद्धेर्जागरूकत्वात् । अयं पाठः खपुस्तकीयः आवश्यकः ।

वति । तेन ज्ञातज्ञापकत्वान्निष्प्रयोजनत्वाच्चात्मतत्त्वप्रतिपादनं व्यर्थमिति चेन्न। चिद्भास्यत्वेन लक्षणेन इदङ्कारा-

न्यायरत्नावली ।

गृह्णतो देहादिभिन्नत्वेनात्मज्ञानं विनोत्पत्त्यसम्भवात्सर्वेषां तदस्तीति भावः । ननु पूर्वं ज्ञातस्यापि विवेकस्य शास्त्रीयज्ञानमदृष्टद्वारा मुक्ति हेतुरिति कल्प्यताम् , अत आह-निष्प्रयोजनत्वादिति । भाष्यादौ समन्वयसूत्रादिषु दूषितत्वान्नोक्तकल्पना युक्तेति भावः । चिद्भास्यत्वेन—श्रवणादिपरिपाकसहकृतशास्त्रजन्याखण्डाकारमनोवृत्त्यभिव्यक्तचिद्भास्यत्वेन । लक्षणेन—ज्ञापकेन । इदङ्कारा-

नारायणी ।

प्रत्यक्षप्रमयाप्यनुवृत्तेर्न शास्त्रजन्यज्ञानेन तन्निवृत्तिः सम्भाविता, शास्त्रजन्यज्ञानस्य परोक्षत्वात्, बंधत्वाभावेन चादृष्टद्वारकरूपोत्कर्षाभावाच्च । अतोऽपि शास्त्रमनर्थकं सप्रयोजन एव शास्त्रस्य प्रामाण्या(१)दिति भावः। पूर्वपक्षार्थमुपसंहरति तेनेति । इतरभेदावगाहिप्रत्यक्षसत्त्वेन । तत्सत्त्वेपि बन्धसत्त्वेन चेत्यर्थः । ज्ञातज्ञापकत्वात्-इतरभिन्नतया ज्ञातस्यैव ज्ञापकत्वात् प्रमापकत्वात्,निष्प्रयोजनत्वात् २)-परोक्षप्रमाया उत्कर्षाभावेन बन्धनिवृत्तिरूपप्रयोजनशून्यत्वात् । (३)प्रतिपादनं प्रतिपत्त्यनुकूलो व्यापारः, शास्त्रं तदेकदेशप्रकरणं च व्यर्थ-पुरुषार्थसाधनरहितम्(४)। अहमस्मीति प्रत्ययस्य प्रमात्वे स्यादेवं न तु तथा,गौरोहमित्यादिप्रतीतेः(५ रापचारिकत्वायोगात्तद्वत् भ्रमत्वमेवेत्यभिप्रेत्य समाधत्ते चिद्भास्यत्वेनेत्यादिना । चिद्भास्यत्वेन (६)लक्षणेन हेतुना । इदङ्कारास्पदानामपि-इदमितिधीविषया-

(१)—त्प्रेक्षावतां प्रवृत्तेश्चेति भावः । इति पाठः ख पुस्तके ।

(२) प्रत्यक्षप्रमाया इति पाठः खपुस्तके ।

(३) आत्मतत्वप्रतिपादनम्—आत्मनः तत्त्वं याथार्थ्यं परब्रह्मणैक्यं तस्य प्रतिपादनम्—इति पाठः खपुस्तके ।

(४) आरम्भानर्हमिति वा । एतन्मते जीवब्रह्मणोरेकत्वेन जीवे ज्ञाते ब्रह्मणोपि ज्ञातत्वादथातो ब्रह्मजिज्ञासेत्याद्युक्तो ब्रह्मविचारो व्यर्थ इति भावः । इति पाठः खपुस्तकेऽधिकः।

(५) अनुपदं वक्ष्यमाणयुक्त्या औपचारिकत्वायोगादिति पाठः खपुस्तके ।

(६) चिद्भास्यत्वेन साक्षिभास्यत्वेन दृश्यत्वेनेति यावत् इत्यधिकः पाठः खपुस्तके ।

स्पदानामपि देहेन्द्रियमनसां प्रतिभासतोऽहङ्कारास्पदत्वेन तदविवेकात्, तेन च शुद्धेऽप्यात्मनि दुःखित्वाद्यभिमानात् शास्त्रीयेण च ब्रह्मात्मैक्यज्ञानेन समूलस्य तस्य निवृत्तेः,

न्यायरत्नावली ।

स्पदानामात्मभिन्नतया दृढतया ज्ञातानाम् । प्रतिभासतोऽहङ्कारास्पदत्वेन उक्तमनोवृत्तेः पूर्वं प्रतीयमानात्मतादात्म्यवत्त्वेन । अविवेकात्–उक्तमनोवृत्तिरूपविवेकज्ञानसमुच्छेद्यसकलभ्रमनिदानानाद्यज्ञानकल्पनात् । तथा च आत्मानात्मनोरत्यन्तविरुद्धस्वभावत्वेऽपि तादात्म्यप्रतीतेरनुभूयमानत्वात्तदन्यथानुपपत्त्या तदुपपादकमनाद्यज्ञानं कल्प्यते । यदा तूक्तमनोवृत्त्युत्पत्तिः(१)स्तदुत्तरं सकलदृश्यानामाभासीकृतानां प्रारब्धभोगशेषं क्षपयता जीवन्मुक्तेन मिथ्यात्वदृश्यत्वादिहेतुनाऽऽत्मभिन्नत्वेन ज्ञायमानत्वेऽपि न शास्त्रवैयर्थ्यशङ्का । शास्त्रस्याप्याभासीकृतत्वेन वैयर्थ्यस्येष्टत्वादिति भावः । आत्मानात्मनोस्तादात्म्याध्यासे स्थिरीभूते तद्धर्माणामपि मिथः संसर्गाध्यासः प्रतीयते तस्य तन्निबन्धनत्वादित्याशयेनाह–तेन चेति । अनात्मतादात्म्याध्यासेन चेत्यर्थः । तृतीयार्थो ज्ञापकहेतुता दुःखित्वाद्यभिमानं प्रति बोध्या । युगपदेव धर्मितादात्म्यधर्मसंसर्गयोरध्यासेन कारकहेतुत्वासम्भवात् । शुद्धे–अनात्मधर्मदुःखादिना परमार्थतो हीने । समूलस्य–मूलीभूताज्ञानसहितस्य । तस्य–उक्ताध्या-

नारायणी ।

णामपि दृष्टभिन्नानामिति यावत्(२) । प्रतिभासतः–गौरोऽहं काणोऽहं कर्तास्मीत्यादिभ्रमात् । अहङ्कारास्पदत्वेन–अहमितिधीविषयत्वेन । तदविवेकात् (३)आत्मन इतरभिन्नत्वेनाज्ञानात् । तेन च

(१) अत्र तदुत्तरमित्यस्य स्थाने तदोत्तरमित्यावश्यकं यदाशब्दानुरोधात् । अथवा तदा शब्दोऽध्याहार्यः ।

(२) दृश्यत्वेनेत्यत्र तृतीयार्थो ज्ञानज्ञाप्यत्वं द्रष्टृभेदे साध्येऽन्वेति, तथाच शास्त्रा यावद् दृग्दृश्यविवेको न भवति तावत् । इत्यधिकः पाठः खपुस्तके ।

(३) तस्य आत्मनः अविवेकात् इतरभिन्नत्वेनाज्ञानादित्यर्थः ।

न्यायरत्नावली ।

सस्य । निवृत्तेः-उच्छेदात् ।

ननु कोऽयमुच्छेदः ? । न ध्वंसः । तस्य हि सत्यत्वे अद्वैतश्रुतिविरोधः । मिथ्यात्वे चरममनोवृत्त्युत्पत्त्युत्तरमुत्पन्नस्य तस्य समुच्छेदकाभावेन उच्छेदाभावात् 'विद्वान्नामरूपाद्विमुक्त' इत्यादिश्रुतिविरोधः । अथोक्तध्वंसस्य सत्यत्वेऽपि श्रुतेर्न विरोधः, तया भावाद्वैतबोधनादिति चेन्न । असङ्कुचिताद्वैतस्य श्रुत्यर्थतया प्रतीयमानत्वात् । अत्रोच्यते । दृश्याधिकरणक्षणे दृश्याधिकरणक्षणपूर्वत्वानधिकरणत्वं दृश्योच्छेदः । शास्त्रीयचरमतत्त्वज्ञानोत्पत्तिक्षणे च दृश्याधिकरणक्षणपूर्वत्वं नास्ति, तदुत्तरतादृशक्षणस्याप्रसिद्धत्वात् । तत्पूर्वत्वस्य क्षणान्तरे प्रसिद्धस्यापि तत्रासम्भवात् । नानाजीवपक्षे तज्जीवीयचरमतत्त्वज्ञानक्षणे तज्जीवीयदृश्याधिकरणकालपूर्वत्वाभावो वाच्यः । जीवान्तरीयदृश्याधिकरणकालपूर्वत्वसत्त्वात् ।

ननु दृश्यपूर्वत्वाभाव एव निवेश्यतां किं दृश्याधिकरणकालनिवेशेनेति चेन्न । दृश्यपूर्वत्वं दृश्यप्रागभावकालवृत्तित्वम् । तथा च तदभावो न दृश्योच्छेदशब्दार्थः(१) । चरमतत्त्वज्ञानक्षणवृत्तिदृश्यानामग्रिमकालानुवृत्तिवादिनां तार्किकादीनां मतेऽपि तादृशोच्छेदव्यवहारसम्भवात्, अविद्याद्यनादिदृश्यानां तादृशोच्छेदव्यवहारासम्भवाच्च, तेषां प्रागभावाप्रसिद्धेः । ननु क्षणप्र-

नारायणी ।

अज्ञानेन च । (२)दुःखित्वाद्यभिमानात् दुःखित्वादिभ्रमात्(३) ।

(१) दृश्यपूर्वत्वाभाव इत्यस्य दृश्यप्रागभावकालवृत्तित्वाभाव इत्यर्थः । तथाच दृश्यप्रागभावरूपस्य तस्य दृश्यरूपत्वमेव समायास्यतीति ।

(२) शुद्धेऽपि सर्वधर्मार्तीतेऽपि । आत्मनि सर्वाधिष्ठाने साक्षिणि । इत्यधिकः पाठः ।

(३) आदिना कर्तृत्वादिभ्रमपरिग्रहः । दुःखमेव साक्षाद्बन्ध इति ज्ञापयितुं दुःखस्य कण्ठरवेणोक्तिः । इत्यधिकं खपुस्तके ।

न्यायरत्नावली।

वेशो व्यर्थः, व्याप्तिविशेषबलेन क्षणस्यैव तादृशपूर्वत्वाभावस्स्वीक्रियते, तत्त्वप्रमाक्षणो यो यो भवति स तत्त्वाज्ञानतत्प्रयुक्तदृश्यकालपूर्वत्वाभाववान्, तत्त्वप्रमोत्पत्तिद्वितीयक्षणः तादृशाभाववानिति वा व्याप्तेः, तत्त्वज्ञानस्य क्षणिकत्वस्वीकारे आद्यः, कस्यापि न क्षणिकत्वमिति पक्षे द्वितीय इति चेत्। सत्यम्। तथापि तादृशव्याप्तिसूचनाय क्षणपदमिति बोध्यम्। अथैवमुच्छेदस्य निर्वचनेऽपि तत्र ज्ञानस्याजनकत्वेन ज्ञानेनेति तृतीयानुपपत्तिरिति चेन्न। तृतीयायाः प्रकृते ज्ञापकहेतुबोधकत्वात्। एतत्समानार्थकश्रुतयोऽप्येवं व्याख्येयाः।

नारायणी।

शास्त्रीयेण-तत्त्वमस्यादिवाक्यजनितेन। ब्रह्मात्मैकत्वज्ञानेन-ब्रह्मात्मनोः परञ्चोवयोरखण्डरूपाभेदाऽर्थज्ञानेन। समूलस्य तस्य-अज्ञानरूपमूलसहितस्याहङ्काराद्यध्यासस्य। निवृत्तेः-नाशात्। नाशश्चाग्रे निरूपणीयः(१)। अयं भावः। श्रुतिस्मृतिपुराणादिषु समस्तोपाध्यनवच्छिन्नानन्तानन्दैकरसमद्वितीयमात्मतत्त्वं पठ्यते इति नाहंप्रत्ययस्य सोपाधिकार्थस्यात्मतत्त्वावगाहित्वं वक्तुं शक्यम्, स्वतःप्रमाणश्रुत्यादिविरोधात्। अहमिहैवास्मि सदन इत्यादिप्रतीतेर्भ्रमत्वावश्यकत्वाच्च आत्मनो व्यापकत्वात्। नापि तादृशप्रतीतीनां गौणत्वं वक्तुं शक्यम्,भेदाग्रहात्(२)। अतोहंप्रत्ययत्वाविशेषात् गौरोहं कर्तेत्यादिप्रत्यया अपि भ्रमरूपा एवेति सङ्क्षेपः।

(१) स्वाभिमतैक्यज्ञानस्य प्राह्याभावानवगाहित्वेपि मणिमन्त्रादिन्यायेनैव सकलतादृशभ्रमनिवर्तकत्वं श्रुतिस्मृतिप्रमाणादिति भावः। अत्रैतन्मते अन्तःकरणधर्मस्य आत्मन्यसम्बन्धान्न तन्नाश उद्देश्यः सम्भवतीति तु न वाच्यम्, साक्षादसम्बन्धेपि कारणतादात्म्याध्यासवशादाध्यात्मिकतत्सम्बन्धाङ्गीकारात्। समूलस्य तस्येत्यनेन पुरुषव्यापारो हेतुरुच्छेदे। पुरुषार्थत्वं तु दुःखनिवृत्तेः स्वत इष्यमाणत्वादिति ज्ञापितम्। यद्यप्येतन्मते स्वप्रकाशब्रह्मसम्पत्तिरेव मोक्षः न तु दुःखाभावः, तथापि मोक्षे दुःखाभाव आवश्यकः स चोद्देश्योपि भवतीत्यत्र तथोक्तः, अविद्यानिवृत्तेस्तु दुःखनिदाननिवृत्तित्वेन गौणमेव पुमर्थत्वं न मुख्यमिति भावः। व्यक्तीभविष्यति चेदमुपरिष्टात्। इत्यधिकः पाठः खपुस्तके।

(२) शास्त्रजन्यविवेकज्ञानात् पूर्वं नाहं गौरो नाहं बाधिरो नाहं कर्ता नाहं भोक्ता चेति भेदस्याग्रहादित्यर्थः।

न्यायरत्नावली।

अथैवमपि ज्ञाने इच्छानुपपत्तिः, मनोवृत्तिरूपस्य ज्ञानस्य (१)सुखदुःखाभावान्यत्वात्तत्साधनान्यत्वाच्चेति चेन्न। नितरां निरुध्य मनो निदिध्यासनादिना यतमानतया मुमुक्षुपुरुषे जायमानाया दुःखधारायाः निरतिशयात्मसुखाभिव्यक्तिनिदानत्वेन दुःखत्वेनागणनीयायाश्चरममनोवृत्तिसमुदयक्षणमारभ्य विच्छिन्नाया ध्वंसरूपत्वस्य चरमवृत्तौ सम्भवात्। यस्योत्पत्तिक्षणे हि यद्विच्छिद्यते, तत्पूर्वं च वर्तते, स एव मनःपरिणामस्तस्य ध्वंसः। यथा एकक्षणान्तरितोत्पत्तिकसमानविषयकज्ञानेच्छादिस्थले, तादृशोत्तरपरिणामस्य पूर्वपरिणामध्वंसरूपत्वौचित्यात्। तदन्यस्य ध्वंसस्य स्वीकारे तत्स्वरूपतद्धेतुत्वादिकल्पने गौरवात्। अभिव्यज्यमानात्मसुखव्याप्यत्वाच्च चरमवृत्तावेच्छा। यो हि यदा यदिच्छति स कदाचित्तद्व्याप्यमपीच्छतीति सर्वानुभवसिद्धम्। युक्तं चैतत्। यस्मिन् सत्यवश्यमिष्टाभावस्तत्र द्वेषस्यव, यस्मिन् सत्यवश्यमिष्टं तत्रेच्छाया अनुभवात् चरमतत्त्वज्ञाने इच्छा। इष्टव्याप्यमपि हि लोकैरिष्यत इति सर्वानुभवसिद्धम्। अत एव विपदोऽपि स्वकीयाः श्रीकृष्णभगवद्दर्शनव्याप्यतया कामिताः कुन्त्या। तदुक्तं श्रीभागवते—

विपदस्सन्तु नश्शश्वत्तत्र तत्र जगद्गुरो !।
भवतो दर्शनं यत्स्यादपुनर्भवदर्शनम्॥ इति।

युक्तं चैतत्। यस्मिन् सत्यवश्यमिष्टसम्बन्धस्तस्यापीष्टत्वौचित्यात्। अत एव "मोक्षः पुनरात्यन्तिकी दुःखनिवृत्तिरित्युक्त्वा काम्यश्च दुःखाभावः दुःखस्य स्वभावतो हेयत्वात्। सुखार्थं तथाऽयमिति चेन्न। दुःखाभावस्य सुखाहेतुत्वात्। अथ सुखव्या-

(१) सुखदुःखेति। सुखदुःखाभावयोर्वा सुखसाधने दुःखाभावसाधने वा इच्छा भवति, मनोवृत्तिरूपज्ञानस्य तदभावात्तत्र इच्छाभाव इति तात्पर्यम्।

प्यत्वात्स तथेति चेन्न । तस्य तदव्याप्यत्वादि"त्युक्तमुदयनाचार्यैर्बौद्धाधिकारे । सुखव्याप्यत्वस्य काम्यत्वाप्रयोजकत्वे अथेत्यादिशङ्कानुपपत्तेः । तस्मात्सुखत्वादिवत्सुखादिव्याप्यत्वमपीच्छाप्रयोजकम् ।

वस्तुतस्तु अस्मदर्शने सुखमात्मैव । चन्दनादियोगजन्यमनोवृत्तेस्तत्र व्यञ्जकत्वमात्रम् । तस्य च न केवलरूपेण काम्यता, सिद्धत्वात् । नापि भानविषयत्वेन, तस्य स्वप्रकाशत्वेन भानाविषयत्वात् । नाप्यावरणाभावविशिष्टतया, आवरणस्य तत्र कल्पितत्वेन तदभावस्यावरणकालेऽपि सत्त्वेन सिद्धत्वात् । किन्तु स्वावरणविरोधिमनोवृत्तिविशिष्टतया । यद्यप्यनवच्छिन्नानन्दरूपेण आत्मा मूलाज्ञानेन संसारकाले सदैवावृतः, तथाप्यवच्छिन्नसाक्ष्यानन्दाद्यावरणावस्थाविशेषस्य चन्दनादियोगजन्यमनोवृत्त्या समुच्छेदात्तस्याः स्वपूर्वकालीनसाक्ष्यानन्दाद्यावरणं प्रति विरोधित्वेन तद्विशिष्टतया काम्यत्वम् । एवं चरममनोवृत्तेरनवच्छिन्नात्मानन्दावारकमूलाज्ञानविरोधित्वात्तद्विशिष्टतया काम्यता । आवारकाज्ञानविरोधित्वं तु आवारकाज्ञानतत्प्रयुक्तदृश्ययोरुक्तोच्छेदवान् यः क्षणः तत्र वर्तमानत्वम् । यद्यपि साक्ष्यानन्दे कालान्तरावच्छेदेनावारकाज्ञानस्य एतत्कालीनमनोवृत्त्युत्पत्त्यव्यवहितपूर्वम् आवारकत्वाभावात् अज्ञानानामनादित्वेऽपि कदाचिदेव कस्यचिदज्ञानस्यावारकत्वमिति सिद्धान्ते स्वीकारात् कालान्तरावच्छेदनावारकाज्ञाने एतत्कालीनमनोवृत्तिर्न विरोधिनी, तथापि या मनोवृत्तिः स्वोत्पत्त्यव्यवहितपूर्वकाले यादृशानन्दावारकाज्ञानस्य विरोधिनी तद्विशिष्टतया तादृशानन्दस्य काम्यतेत्युक्तौ न दोषः । तथा च तत्त्वज्ञाने इच्छानुत्पादेऽपि तद्विशिष्टरूपेण अनवच्छिन्नानन्दे इच्छासम्भवात् तादृशानन्दरूपेष्टप्रयोजकत्वज्ञानात् श्रवणादौ प्रवृत्तिः ।

वस्तुतस्तु मन्मतेऽपि तार्किकादिमत इव सुखत्वजातिमत्त्वेनैव

काम्यता, न तु तादृशवृत्तिमत्त्वेन, गौरवात् । उक्तजातिस्तु तादृशवृत्त्युपहितात्मनि स्वीक्रियते । असत्त्वापादकाज्ञानाविषयत्वप्रयोजकाविशिष्टचिति ज्ञानत्वजातिरिव, कैवल्यदशायामात्मनि ज्ञानत्वस्येव, सुखत्वस्यासत्त्वेऽपि तदुपलक्षितप्रकाशसत्त्वान्न दोषः । पदवाच्यतावच्छेदकमात्रस्य तदानीमस्वीकारात् सर्वथापि मुमुक्षोस्तत्र प्रवृत्तिरुपपद्यते ।

अथैवमपि तत्त्वधीकालपर्यन्तमनुवर्तमानः संसारबन्धस्तत्त्वज्ञानोत्पत्त्युत्तरकाले क्व गत इति प्रश्ने किमुत्तरं भवदर्शनइति चेत् । दर्शनान्तरे यदुत्तरम् । अथ दर्शनान्तरे आत्यन्तिको दुःखध्वंसस्तत्त्वज्ञानेन जायत इति चेत्, किं तावता, दुःखं तु क्व गतम् । अथ न कुत्रापि गतम्, तत्त्वज्ञानोत्तरं तु कुतो न प्रमीयते इति चेत्, ध्वंसाधिकरणकालस्य प्रतियोग्यधिकरणत्वाभावनियमस्वीकारादिति चेत्, सत्यम् । सखे न खेदं तदा याहि । तत्त्वज्ञानोत्पत्तिक्षणस्य दुःखाधिकरणकालपूर्वत्वाभावनियमोऽपि नापलापितुं शक्यते तद्वत् अस्मदीयदर्शनेऽपि प्रमायाः स्वसमानविषयकाज्ञानतत्प्रयुक्तदृश्यविरोधित्वनियमः, शुक्त्यादिप्रमायां तथा दर्शनात् ।

अथ तत्त्वज्ञानस्य संसारनाशहेतुत्वे सत्येवेदमुपपद्यते, नाशजनकस्य प्रतियोगिविरोधित्वनियमात्, अन्यथा व्याप्तिग्राहकतर्कानवतारादिति चेन्न । घटदुःखादीनां तत्तत्कालाविशिष्टं कपालात्मादिकमेव नाश इति प्राभाकरादिमतेऽपि मुद्गरपाततत्त्वज्ञानादीनां घटदुःखादिविरोधित्वस्वीकारात् । यदि तेषां तन्न स्यात्, तदाऽग्रेऽपि घटाद्यनुवृत्तिस्स्यात् इत्यादितर्कावताराच्च । एकाज्ञानपक्षे शुक्त्यादिप्रमाया उक्ताविरोधित्वाभावात् अदृष्टान्तत्वेऽपि व्यतिरेकव्याप्तिग्रहसम्भवात् सम्भवत्येव प्रमाया उक्ताविरोधित्वानुमानम् । 'विद्वान्नामरूपाद्विमुक्त' इत्यादिश्रुतिप्रामाण्याच्चोक्तवि-

तस्मादज्ञातज्ञापकत्वात्सप्रयोजनकत्वाच्चात्मतत्त्वप्रतिपा-

न्यायरत्नावली।

रोधित्वमिति दिक्।

ननु जीवन्मुक्तिस्वीकारपक्षे तत्त्वज्ञानस्य नोक्तविरोधित्वमिति चेन्न। अप्रामाण्यज्ञानाद्यनास्कन्दिततत्त्वेनैव भ्रमव्याप्यभुज्यमानादृष्टाद्यभावेनापि तत्त्वज्ञानस्य विशेषणीयत्वात् तादृशस्य दर्पणादिसन्निधानस्य समकालीने तत्त्वज्ञाने प्रतिबिम्बादिभ्रमविरोधित्वादर्शनादज्ञानतज्जन्यभ्रमयोरुच्छेदेऽपि भ्रमसंस्काराधीनभयकम्पादिकार्यदर्शनेन तत्त्वज्ञानाधीनदृढसंस्कारसहिततत्त्वधीविशेषस्यैव उक्तविरोधित्वनियमाच्च। स्वसमानविषयकाज्ञानतत्सम्बन्धतदधीनदृश्यसत्यत्वधीविरोधित्वनियमस्तु तत्त्वधीमात्रस्य न व्याहत इति दिक्। उपसंहरति—तस्मादिति।

नन्वात्मभिन्नवस्तुमात्ररूपस्य समूलबन्धस्य तदुपहितात्मज्ञानेन नोच्छेदः, ज्ञानस्य स्वविषयानिवर्तकत्वात्। 'तमेव विदित्वातिमृत्युमेती'त्यादिश्रुत्याऽऽत्ममात्रविषयकज्ञानस्यैव बन्धनिवर्तकत्वोक्तेश्च। तादृशज्ञानं च न प्रत्यक्षम्, आत्मनो बहिरिन्द्रियायोग्यत्वात्। तस्य स्वप्रकाशत्वेन सुखादीनां स्वप्रकाशसाक्षिमात्रभास्यत्वेन च मनसो बहिरिन्द्रियाग्रसहकृतस्य ज्ञानाकरणत्वाच्च। 'औपनिषदं पुरुषं पृच्छामी'त्यादिश्रुत्या उपनिषद्वाक्यमात्रबोध्यत्वोक्तेश्च। नापि शाब्दम्। परोक्षज्ञानस्य प्रत्यक्षाध्यासानिवर्तकत्वात्।

अत एव नानुमितिः। तत्र हि अनात्मरूपे पक्षे आत्मनः संसर्गो

नारायणी।

फलितार्थमुपसंहरति तस्मादिति। तस्माच्छास्त्रजप्रमातः पूर्वमध्यासानुगुणाज्ञानकल्पनात् अज्ञातज्ञापकत्वात् अज्ञानविषयतावद्विषयकत्वात्। तथा चाहंप्रत्ययस्य केवलात्मविषयत्वाभावादात्मनः सन्दिग्धत्वापूर्वत्वादिसम्भवात्तत्र प्रमाणं सच्छास्त्रं सार्थकमेवेति भावः। अत एव प्रयोजनसद्भावादपीत्याह सप्रयोजनकेति। भ्रमनिवृत्तिरूपप्रयोजनस-

न्यायरत्नावली ।

विषयः ? अथवाऽऽत्मरूपे ?। नाद्यः । तादृशज्ञानस्य बन्धानिवर्तकत्वात् । नान्त्यः । अत्यन्ताभेदे संसर्गासम्भवात् । तद्घटस्तद्घट इत्यादिज्ञानस्याप्रमात्वेन तद्घटादिव्यक्तिभिन्नवस्त्वनुयोगिकसंसर्गेण तद्घटादिव्यक्तिविशिष्टज्ञानत्वं तद्घटादिव्यक्तिप्रमात्वमित्यस्यावश्यवाच्यत्वात् । तद्व्यक्तौ तादात्म्यसम्बन्धेन तद्व्यक्तिविशिष्टज्ञानस्यानुवादरूपत्वेनाप्रमात्वाच्च । स्वकारणीभूताद्घट इति ज्ञानविषयादधिकं घटे द्रव्यत्वसंसृष्टाभेदं विषयीकुर्वतो हि ज्ञानस्य प्रमात्वं युक्तम् । तद्व्यक्तौ तद्व्यक्तिस्वरूपं तद्व्यक्तितादात्म्यं विषयीकुर्वता तु ज्ञानेन स्वकारणीभूततद्व्यक्तिरितिज्ञानविषयादधिकं किं विषयीकृतम्, येन धारामध्यगज्ञानवदप्रमा न स्यात् ।

ननु विशेषणतावच्छेदकप्रकारकज्ञानादेः विशिष्टवैशिष्ट्यबुद्धौ हेतुत्वस्य मीमांसकैरस्वीकारात्, स्वीकारेऽपि कार्यभूतज्ञानस्य विषयतायाः कारणीभूतज्ञानविषयतातः विलक्षणत्वेन च नानुवादकत्वमिति चेन्न । विलक्षणाया अपि विषयतायाः नैष्फल्येन ज्ञानेऽनुवादतुल्यत्वस्य दुर्वारत्वात् । न हि 'घटो घट' इति ज्ञानस्य स्वीकारे तस्य संशयादिनिवृत्तिरूपं फलमस्ति । 'घटो घटो नवे'त्यादिज्ञानस्याहार्यत्वेन तन्निवृत्तेरफलत्वात् । जीवत्वेश्वरत्वोपलक्षितयोः ऐक्याज्ञाननिवृत्तिस्तु तादृशैक्यस्य निर्विकल्पकादेव । तच्च नानुमितिः । तस्याः किञ्चिद्धर्मविशिष्टपक्षसाध्यावगाहित्वनियमात् । तस्मादभेदे सत्यपि उपाधिभेदप्रयुक्तो वा, विशिष्टकेवलभावप्रयुक्तो वा यत्र विशेषणविशेष्यव्यक्त्योर्भेदः; तत्रैवाभेदसंसर्गस्य प्रमा । यथा घटो द्रव्यं विशिष्टसत्ता शुद्धसत्तेत्यादौ । अत एव घटाभावो घटाभाववानित्यादौ एकत्वादिविशिष्टघटाभावत्वादिरूपेणैव घटाभावादेर्विशेष्यता ।

नाप्युपमितिः । 'स गौरनेन गवयेन सदृश'

दनं न व्यर्थम् । तस्य चात्मतत्त्वस्य 'तत्त्वमस्यहं ब्रह्मास्मी' त्यादिवेदान्तमहावाक्यमेव प्रमापकम् ।

न्यायरत्नावली ।

इत्याद्युपमितिस्थल इव प्रकृते सदृशवस्तुद्वयावगाहने मतान्तरे पदवाच्यत्वावगाहने च अनात्मविषयकत्वापत्तेः । नाप्यर्थापत्तिः । आत्मनि तत्संसर्गं विना कस्याचिदर्थस्यानुपपन्नत्वाभावात् । संसर्गस्यात्मरूपत्वे अनात्मरूपत्वे वा पूर्वोक्तदोषापत्तेश्च । नाप्यनुपलब्धिकरणकम् । तस्याभावमात्रे प्रमात्वात् । स्वाभावाभावत्वेनाभावग्राहकत्वेऽपि अनात्मविषयकत्वतादवस्थ्यात् । प्रमेयस्यात्मत्वे अनात्मत्वे वा पूर्वोक्तदोषापत्तेश्च । तस्मान्नोक्तज्ञानोत्पत्तिसम्भव इत्यत आह—तस्य चेति । ब्रह्मात्मैक्यस्य चेत्यर्थः । आत्मतत्त्वस्य साक्षिस्वरूपस्य । प्रमापकं प्रत्यक्षप्रमाकरणम् । शब्दकरणकमपि आत्मज्ञानं प्रत्यक्षमेव, साक्ष्यभिन्नविषयकत्वात् । घटत्वावाच्येत्यर्थः । न व्यर्थं न पुरुषार्थसाधनरहितम् । (१)

नारायणी ।

नतु तथापि शास्त्रं व्यर्थं तस्य परोक्षज्ञानजननस्वाभाव्यात् परोक्षज्ञानस्य चापरोक्षाध्यासाप्रतिक्षेपकत्वात्, अन्यथा श्वैत्याद्यनुमानादिनापि पीतः शङ्ख इत्यादिभ्रमस्य निवृत्त्यापत्तिस्तत्राह तस्य चेति । ब्रह्मात्मैकत्वलक्षणस्याखण्डार्थस्येत्यर्थः । आदिना 'प्रज्ञानं ब्रह्म' 'अयमात्मा ब्रह्मे'त्यादिपरिग्रहः । प्रमापकं साक्षात्काररूपप्रमाया जनकम् । ज्ञानस्य वस्तुमाहात्म्यकृतमेव परोक्षत्वमपरोक्षत्वं च नतु प्रमाणस्वभावकृतम्, ब्रह्म च 'यत्साक्षादपरोक्षात्' ब्रह्मेति श्रुतेः स्वतोऽपरोक्षमेवातस्तद्गोचरं वाक्यजन्यं ज्ञानं दशमस्त्वमसीत्यादाविवापरोक्षमेवेति सङ्क्षेपः(२) ।

(१) नारम्भानर्हमिति वा । यद्यप्येतन्मते भ्रमनिवृत्तेरात्मस्वरूपतया नोद्देश्यत्वं सम्भवति सिद्धत्वज्ञानस्य प्रतिबन्धकत्वात् तथापि परोक्षासिद्धत्वज्ञानेऽप्यपरोक्षसाध्यकत्वभ्रमजन्यप्रवृत्तितः प्रातीतिकसाध्यत्वरूपफलत्वस्याबाधनोद्देश्यत्वं सम्भवत्येवेत्यग्रे स्फुटीभविष्यति । इत्यधिकः पाठः खपुस्तके ।

(२) अयमत्रात्यन्तमधिकः पाठः खपुस्तके । यथाः—

न च दशमस्त्वमसि इत्यादौ वाक्यात्पदार्थोपस्थितौ मानसः संसर्गबोधः, वाक्यसहकृतेन चक्षुषैव वा साक्षात्कार इति वाच्यम् । तथा सत्याद्ये सर्वस्विन्नपि वाक्ये तथास-

म्भवेन शब्दप्रमाणमात्रोच्छेदापत्तिः, द्वितीये वाक्यान्वयव्यतिरेकिविरोधप्रसङ्गः। न ह्यालोकादिरिव अन्वयव्यतिरेकौ तौ न करणत्वसाधकाविति वाच्यम्। तथासति व्यासङ्गदशायां सत्यपीन्द्रियसम्बन्धे प्रत्यक्षादर्शनान्मन एव सर्वत्र प्रमाणं चक्षुरादि तु सहकारिकारणमिति कल्पनायाः सम्भवात् सर्वत्र प्रमाणमात्रोच्छेदापत्तिः। सिद्धमतः शब्द एव तत्र करणं तज्जन्यं चापरोक्षमेव, तदन्तरं साक्षात्करोमीति प्रतीतेः। एवं कृतेपीत्यभिप्रेत्यैवात्र वाक्यमेवेत्येवकारः। अनेनेन्द्रियकरणकं ज्ञानं प्रत्यक्षमितिप्रत्यक्षलक्षणानुरोधात् भावनया सहकृतेन मनसैवापरोक्षप्रमा भवति वाक्यात्तु प्रथमतः परोक्षप्रमैव भवति करणस्वाभाव्यादिति योगिनां मतनिरासः। इन्द्रियकरणकमेव ज्ञानं प्रत्यक्षमिति प्रत्यक्षलक्षणानुरोधेन मनसैव तस्यापरोक्ष्यमित्यभ्युपगमे 'यन्मनसा न मनुते' इति श्रुतिविरोधः। भावनाजन्यत्वे तस्य कामातुरस्य कामिनीं भावयतो व्यवहितकामिनीसाक्षात्कारस्येवाप्रामाण्यप्रसङ्गश्च।

ननु भावनाजन्यत्वं न तत्राप्रामाण्यप्रयोजकं किन्तु बाधितविषयत्वम्, शुक्तिरजतादिभ्रमेषु भावनां विनापि जातेषु बाधितविषयत्वेनैवाप्रामाण्यनिश्चयात्, ब्रह्मसाक्षात्कारे त्वबाधितविषयत्वात्प्रामाण्यं भावनाजन्यत्वेपि न व्याहन्यते, नापि भावना सर्वत्र दोषः, येन भावनारूपदोषजन्यत्वेनाप्यप्रामाण्यं स्यादिति चेत्। सत्यम्। तथापि परोक्षज्ञानमूलकभावनाया अपरोक्षधीजनकत्वबाधस्य वह्न्यनुमितिमूलकभावनायां दृष्टत्वान्न भावनाकोटिभिरपि साक्षात्कारो भवति किन्तु शब्दादेव, तदर्थस्यापरोक्षत्वादिति भावः। तत्र विषयगतापरोक्षत्वं-स्वाकारवृत्त्युपहितप्रमातृचैतन्यसत्तातिरिक्तसत्ताकत्वशून्यत्वे सति योग्यत्वम्। धर्माधर्मयोः प्रत्यक्षवारणाय विशेष्यदलम्। रूपी घट इत्यादिप्रत्यक्षस्थले सङ्ख्यापरिमाणादेः प्रत्यक्षत्ववारणाय सत्यन्तदले स्वाकारवृत्त्युपहितेति प्रमातृविशेषणम्। तथाच रूपसङ्ख्यादीनामेकदेशस्थत्वेन तदवच्छिन्नचैतन्यानामैक्याद्रूपावच्छिन्नचैतन्यस्य प्रमात्रभेदे सङ्ख्याद्यवच्छिन्नस्यापि प्रमात्रभिन्नतया सङ्ख्याद्यवच्छिन्नसत्ताया रूपप्रमातृचैतन्यसत्तातिरिक्तस्वाभावेपि न सङ्ख्यादीनां रूपाद्याकारवृत्तिदशायां प्रत्यक्षत्वं तदानीं सङ्ख्याद्याकारवृत्त्यभावेन सङ्ख्यादिसत्तायाः सङ्ख्याद्याकारवृत्त्युपहितप्रमातृचैतन्यसत्तातिरिक्तत्वाभावात्। प्रमात्रभिन्नत्वमपहाय तादृशशून्यत्वोक्तिस्तु बाह्यविषये वस्तुतः प्रमात्रभेदस्य 'अहमिमं पश्यामि' इति भेदानुभवबाधितत्वात्। तादृशशून्यत्वं च ब्रह्मचैतन्ये स्वत एवास्ति चैतन्यांशस्यैकत्वेनैवैकसत्ताकत्वात्। बाह्ये त्विन्द्रियसन्निकर्षादिबलेनान्तःकरणं यदा बहिर्निःसरति तदा विषयचैतन्यप्रमातृचैतन्ययोरेकदेशस्थत्वेनैक्यात्स्वावच्छिन्ने ब्रह्मचैतन्येऽध्यस्तं विषयादिकं प्रमातृचैतन्य एवाध्यस्तं भवति, आरोपितस्याधिष्ठानभूतविषयचैतन्याभिन्नप्रमातृचैतन्यसत्तामात्रत्वात्, आरोपितपदार्थस्याधिष्ठानसत्तातिरिक्तसत्ताया अनङ्गीकारात्। अतएवानुमित्यादिस्थले न वह्न्यादेः प्रत्यक्षत्वं तत्रान्तःकरणस्य बहिर्निर्गमनाभावेन विषयचैतन्यप्रमातृचैतन्ययोरेकत्वाभावेन प्रमातृचैतन्यस्याधिष्ठानत्वाभावात् वह्न्यादेस्ततः पृथक्सत्ताकत्वात्।

अथवा निवृत्ताज्ञानत्वमपरोक्षत्वं तच्च चितोऽज्ञानविषयताशून्यत्वे सति चिद्रूपत्वम्, दृश्यानान्त्वज्ञानविषयतानवच्छेदकत्वे सति दृश्यत्वम्। तत्राद्ये विशेष्यदलं वक्ष्यमाणयुक्त्या स्वतोऽज्ञानाविषयस्य घटादेः सर्वदाऽपरोक्षव्यवहारवारणाय। विशेषणदलं त्वज्ञाननाशकवृत्तेः पूर्वमपि साक्षिणोऽपरोक्षव्यवहारवारणाय। द्वितीये विशेष्यं विकल्पोल्लिखिते तुच्छेऽतिव्याप्तिवारणाय। सत्यन्तमाकाशादेः प्रत्यक्षत्ववारणाय। चिदाचितोर्द्वयोरपि कथितप्रकाराज्ञानशून्यत्वं तु प्रमासामग्र्यैव प्रमाकाले भवति 'तरति शोकमात्मवित्, विद्वान्नामरूपाद्विमुक्तः' इत्यादि श्रुतिभिः ज्ञानसमकालं मुक्त इति वृद्धोक्तिभिश्चाज्ञाननाशस्य ज्ञानसमकालिकत्वप्रतिपादनेन प्रमासामग्र्या एवाज्ञानानाशकत्वज्ञापनात्। सा च सामग्री इन्द्रियसन्निकर्षादिरूपा, योग्यत्वंपदार्थाभेदपरशब्दादितात्पर्यनिश्चयरूपा च। प्रमया तु प्राक्त्वं विषयस्येति न प्रमाया अपि वैयर्थ्यमिति सङ्क्षेपः। ज्ञानस्यापरोक्षत्वं तु तादृशापरोक्षयोरन्यतराश्रयविषयकत्वम्। अथवा ज्ञानस्यापरोक्षत्वं तत्तदिन्द्रिययोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वम्। अतीतसुखादिस्मृतादतिव्याप्तिवारणाय वर्तमानत्वं विषयविशेषणम्। धर्मादिशाब्दबोधेऽतिव्याप्तिवारणाय योग्येति। सुरभि चन्दनमित्यादौ सौरभादेः प्रत्यक्षत्ववारणाय तत्तदिन्द्रियेति सङ्क्षेपः। अथवा सामान्यतो ज्ञातस्य विशेषतो ज्ञानार्थं मननापरपर्यायो विचारः तदनु निदिध्यासनं च सामान्यज्ञानमेव तत्तु निर्गुणत्वादिना प्रमाणायोग्यस्य कुतस्तत्राह—**तस्य चेति। प्रमापकं** शाब्दपरोक्षप्रमाजनकं निदिध्यासनं प्रति श्रवणस्य कारणताज्ञापनाय वाक्यमेवेत्येवकारः। श्रुतिभिरेवावगतस्य भावनासहकृतेन मनसाऽऽपरोक्ष्यम् 'मनसैवानुद्रष्टव्य'मिति श्रुतेरिति भावः। न च 'यन्मनसा न मनुते' इति श्रुतिविरोधः, भावनां विना मनोगम्यं न भवतीति तदर्थत्वात्। अन्यथा औपनिषदत्वमपि न स्यात् 'यतो वाचो निवर्तन्ते' इति श्रुतेः। तस्माद्यथा औपनिषदत्ववागगम्यत्वयोर्द्वयोरप्यविरोधाय शक्त्या वाचो निवर्तन्ते इत्येवार्थो न तु सर्वथा निवर्तन्ते एवेति तथा प्रकृतेपि 'मनसा न मनुते' 'मनसैवानुद्रष्टव्यम्' इति द्वयोरविरोधाय भावनां विना न कदाचिन्मनसा जानाति भावनायान्तु जानात्येवेत्यर्थः तथैवोपलब्धेरिति भावः। एतेन परोक्षत्वापरोक्षत्वयोः प्रमाणस्वभावकृतत्वेपि न हानिः, मनोरूपेन्द्रियजन्यत्वेन ब्रह्मज्ञानस्यापरोक्षत्वाभ्युपगमात्। एवं भावनाजन्यत्वेन व्यवहितकामिनीसाक्षात्कारवन्नाप्रामाण्यमपि, अबाधितार्थत्वेन प्रामाण्यसम्भवात्।

अयमत्रनिष्कर्षः। शाब्दापरोक्षत्ववादिमते 'मनसैवानुद्रष्टव्य' मित्यत्र कर्तृत्वं तृतीयार्थो न करणत्वं 'यन्मनसा न मनुते' इति श्रुतिविरोधात्, औपनिषदसमाख्याविरोधाच्च। तथा च साधनचतुष्टयसम्पदनन्तरं श्रुतिकरणकमनःकर्तृकदर्शनविषय आत्मेति तत्रार्थः। योगजापरोक्षवादिमते तु शब्दादेव परोक्षं न मानान्तरात्, [औपनिषदसमाख्याविरोधात्] अपरोक्षं तु भावनासहकृतान्मनस एव, केवलस्य व्यभिचारित्वेन करणत्वासम्भवेपि योगसहकृतस्यायोग्यपरमाण्वादिप्रत्यक्ष इव कारणत्वे बाधकाभावात्। 'निदिध्यासितव्य'

न्यायरत्नावली।

चाक्षुषादीनामपि प्रत्यक्षत्वं नेन्द्रियकरणकत्वादिरूपम्, सुखादिप्रत्यक्षे आत्मसाक्षिमात्ररूपे अव्याप्तेः। किन्त्वज्ञानविषयतासामान्यशून्यविषयकत्वम्। घटादिकं च यद्यपि जडत्वात् सर्वदैवाज्ञानाविषयः, तथापि तत्र चाक्षुषादिवृत्त्यभावकाले तदवच्छिन्नचितोऽज्ञानविषयत्वात्तत्तादात्म्यापन्ने घटादावप्यज्ञानविषयत्वव्यवहारः। अत एव चाक्षुषादिवृत्त्यभावकालीने घटादिपरोक्षज्ञाने न प्रत्यक्षव्यवहारः। चाक्षुषादिवृत्तिकालीने तु घटादेरपरोक्षज्ञाने प्रत्यक्षत्वव्यवहारो निष्प्रत्यूहः। विद्यमानसुखादौ तु साक्षी सर्वदैव प्रत्यक्षः। सुखादितादात्म्यापन्नस्य साक्षिणः सर्वदैवाज्ञानाविषयत्वात्, ब्रह्मात्मैक्याकारमनोवृत्तिकाले च ब्रह्मात्मैक्यस्याज्ञानाविषयत्वात्तद्विषयकत्वेनोक्तवृत्तेः प्रत्यक्षतेति न कोऽपि दोष इति भावः।

ननु वृत्तिः प्रत्यक्षरूपा सती अज्ञाननाशिका, प्रत्यक्षत्वं च तस्या अज्ञानाविषयाविषयकत्वम्, तथा चाज्ञाननाशात् पूर्वमज्ञानाविषयत्वस्य विषयेष्वभावात् वृत्तेरज्ञाननाशकत्वानुपपत्तिरिति चेन्न। न हि वृत्तिरज्ञाननाशिका, किन्त्वज्ञानाधिकरणक्षणवृत्तिवृत्तेरेवाज्ञाननाशकत्वात्(१)।

नारायणी।

वाक्यबोधकरीतिस्तु सङ्क्षेपेण प्रदर्श्यते।
पदयोस्तु समानाधिकरणत्वं पदार्थयोः॥
विशेषणविशेष्यत्वं लक्ष्यलक्षणतापि च।
सम्बन्धः सोयमित्यादाविव तस्माद्विरुद्धकम्॥
त्यक्त्वा विरुद्धं तत्रैव विशिष्टपरमात्मनोः।
स्वरूपं लक्षयत्येकं तत्त्वमस्यादिका श्रुतिः॥
उपक्रमादिलिङ्गेन नैव भिन्नार्थिका ततः॥

अयमर्थः। पदयोर्भिन्नप्रवृत्तिनिमित्तयोरेकस्मिन्नर्थे प्रवृत्तिरूपं सामा-

इत्यादिना भावनायाः कारणत्वप्रतिपादनाच्च। तत्र प्रथममते श्रवणमननिदिध्यासनानां क्रमेणाप्रामाण्यशङ्काऽसम्भावनाविपरीतभावनानां निवृत्तिः फलम्, द्वितीयमते तु ज्ञानं प्रत्येव द्वारद्वारिभावेन हेतुत्वमिति विवेकः। व्यक्तीभविष्यति चेदमुपरिष्टात्।

(१) किन्त्वज्ञानाधिकरणक्षणवृत्तिः वृत्तेरेवाज्ञाननाशकत्वादिति सर्वत्र पाठः स च विरुद्ध एव भातीत्ययमस्माभिर्निवेशितः।

न्यायरत्नावली ।

तत्रापि इन्द्रियजन्या वृत्तिः स्वसमानविषयकाज्ञाननाशः । आत्मविषयका तु शब्दजन्यापि । तथा च यादृशाज्ञानाभावो यद्वृत्तेरुत्पत्तिक्षणावधि प्रतीयते, सा वृत्तिः तदज्ञाननाश इति तु निष्कर्षः । वृत्तिविशेषस्याज्ञानविशेषनाशकत्वे तु तदुत्पत्तिक्षणे तद्वृत्तितदज्ञानयोः प्रत्ययस्यानुभवविरुद्धस्यापत्तेः । न हि युगपदेकस्मिन्विषये ज्ञातत्वाज्ञातत्वे केनाप्यनुभूयेते । यदि तु घटाद्यवच्छिन्ना चिच्छुद्धचितो न भिन्ना (१)तथा च ब्रह्मसाक्षात्कारोत्तरं घटाद्याकारवृत्त्यभावकाले अज्ञानाविषयशुद्धचित्तादात्म्यस्य घटादौ सत्त्वात् अपरोक्षव्यवहारापत्तिरित्युच्यते, तदा चितः अपरोक्षत्वमज्ञानाविषयचिद्रूपत्वम् । विशेष्यमात्रस्योक्तौ तत्त्वज्ञानात् पूर्वमपि आत्मब्रह्मणोरैक्यं साक्षात्करोमीति धीस्स्यात् । विशेषणमात्रस्योक्तौ घटादौ सर्वदा अपरोक्षव्यवहारस्स्यात् । दृश्यानामपरोक्षत्वं त्वज्ञानाविषयतानवच्छेदकत्वविशिष्टदृश्यत्वम् । तादृशापरोक्षत्वयोरन्यतराश्रयविषयकत्वं ज्ञानस्यापरोक्षत्वम् ।

नारायणी ।

नाधिकरण्यम्, पदार्थयोः परस्परोद्देश्यविधेयभावेन परस्परभेदव्यावर्तकत्वात् व्यावर्त्यव्यावर्तकभावरूपो विशेषणविशेष्यभावः, पदयोः पदार्थयोश्च विरुद्धविशिष्टत्वांशपरित्यागेनाविरुद्धनिष्कृष्टधर्मिमात्रेण सह लक्ष्यलक्षणभावः, पदप्रत्यगात्मनोः प्रतिपाद्यप्रतिपादकभावरूपः, पदार्थप्रत्यगात्मनोस्तु उपपाद्योपपादकभावरूपश्चेति सम्बन्धत्रयस्य सोयं पुरुष इत्यादिवाक्येष्विव तत्त्वमस्यादिवाक्येष्वपि सद्भावात् । तेन श्रुतेरपि निष्कृष्टयोरैक्यरूपं शुद्धं स्वरूपं बोधयति । तथाहि यथा सोयं पुरुष इति वाक्ये स इति तत्पदस्य तद्देशतत्कालवैशिष्ट्यं प्रवृत्तिनिमित्तम् अयंशब्दस्यैतत्कालैतद्देशवैशिष्ट्यं भिन्नप्रवृत्तिनिमित्तयोः सोयंशब्दयोरेकस्मिन्पुरुषपदोपस्थापितपिण्डे तात्पर्यम् । सोयमयं स इति च विशेषणविशेष्य-

(१) अत्र "तथाच घटाद्याकारवृत्त्यभावकाले अज्ञानाविषयशुद्धचित्तादात्म्यस्य घटादौ सत्त्वात् ब्रह्मसाक्षात्कारोत्तरमपरोक्षव्यवहारापत्तिरित्युच्यते" इतिपाठो गपुस्तके परन्तु तत्त्वे ग्रन्थासङ्गतेरत्र घपुस्तकीयो निवेशितः ।

न्यायरत्नावली।

ननु उक्तवाक्यादपि नोक्तज्ञानस्योत्पत्तिसम्भवः, उक्तवाक्यान्तर्गततत्त्वमादिपदार्थापरिचयात् । मानान्तरप्रमिते हि पदार्थे गृहीतसङ्केतसम्बन्धस्य पदस्य ज्ञानेन उपस्थापिते सति वाक्यार्थः प्रमीयते । तत्त्वमादिपदानां चार्था न मानान्तरेण प्रमिताः । जगत्कारणत्वादिविशिष्टचिद्रूपस्य तत्पदवाच्यस्य हि नानुमानेन ज्ञानम् । 'आद्यकार्यं सकर्तृकम् कार्यत्वात् यद्यत्कार्यं तत्तत् सकर्तृकम्, यथा घट' इत्याद्यनुमानस्याप्रयोजकत्वात् । यदि हि कार्यसामान्ये कर्ता करणं स्यात् तदा कार्यत्वं कर्तृजन्यत्वरूपसकर्तृकत्वव्याप्यं स्यात् । यदा तु घटादिकार्येऽपि न कुलालादिः कारणम्, कुलालादिक्रियादेरवश्यं कारणत्वस्य वाच्यत्वेन कुलालादेः तत्पितृवदन्यथासिद्धत्वात्, तदा आद्यकार्ये कर्तुः कारणत्वस्य का कथा । आरम्भवादस्वीकारेण आद्यकार्यस्य क्रियासंयोगादिप्रयोज्यत्वासम्भवात् । 'आत्मन आकाशस्सम्भूत' इत्यादिश्रुत्यनुसारेण महत आकाशादेरेव प्रथममुत्पत्तेः उक्तश्रुतेस्तावकत्वेन न स्वार्थे प्रामाण्यम् । तत्प्रामाण्यवादिनो देवताधिकरणस्य अस्वीकारिणि 'न कदाचिदनीदृशं जग'दिति मीमांसकसिद्धान्ते सृष्टिप्रलयाभावेन आद्यकार्यस्यैवा-

नारायणी।

भावः, विशिष्टशक्तयोः सोयंशब्दयोर्विरुद्धविशिष्टांशत्यागेन पुरुषेण सह लक्ष्यलक्षणभावश्च । तथा तत्त्वमस्यादिवाक्येष्वपि जगत्कर्तृत्वादिवैशिष्ट्यं तत्पदस्य प्रवृत्तिनिमित्तम्, त्वंपदस्यावस्थात्रयवत्त्वम् । भिन्नप्रवृत्तिनिमित्तयोः तत्त्वंपदयोरेकस्मिन् शुद्धे तात्पर्यम्, तत्त्वं त्वं तदिति विशेषणविशेष्यभावः, विरुद्धार्थधर्मत्यागेन शुद्धेन सह लक्ष्यलक्षणभावश्चेति । विशिष्टयोस्तत्त्वंपदाभ्यां शक्त्योपस्थापितयोर्भिन्नयोरभेदायोगेन लक्षणया बोधितयोः शुद्धपदार्थयोरैक्यं सामानाधिकरण्यमर्यादया प्राप्तमप्युपासीतेति पदकल्पनाभ्रमनिरासद्वाराऽसीत्यादिपदेन दृढीक्रियते। एवमन्यत्रापीति दिक्। नच तत्त्वमसीति वाक्यस्य तस्य त्वमसीत्यर्थ इति वाच्यम्। 'एकमेवाद्वितीय' मित्युपक्रम्य 'ऐतदात्म्यमिदं सर्वम्' इत्युपसं-

वाक्यं च पदार्थज्ञानद्वारैव ज्ञापकमिति तत्त्वंपदा-
र्थयोः प्रकृतवाक्यार्थानुकूलयोरन्यतोऽसिद्धत्वात्ताचपि

न्यायरत्नावली ।

लीकत्वात् । उक्तान्यथासिद्धिमस्वीकृत्य कुलालादिहेतुत्वं च स्वीकृत्य तदृष्टान्तमात्रेणाद्यकार्ये कर्तृजन्यत्वस्वीकारेऽपि बहुजनाश्रयप्रासादादिदृष्टान्तेन पृथिव्यादेर्नानाकर्तृकत्वानुमानापत्तेश्च । अत एव कार्योत्पत्त्यन्यथानुपपत्तिरपि नेशस्य जगत्कारणत्वे मानम् । तथा च तत्पदवाच्यस्याननुभूतत्वेन तत्सम्बन्धित्वेन शुद्धब्रह्मणस्तत्पदलक्ष्यस्य सुतरामननुभूतत्वान्न तत्पदेनोपस्थितिसम्भवः । त्वम्पदवाच्यस्य तु जाग्रदाद्यैकैकावस्थाविशिष्टरूपेण साक्षिणा गृहीतत्वेऽपि अवस्थात्रयविशिष्टस्य त्वम्पदमुख्यार्थस्य त्वम्पदलक्ष्यस्य शुद्धजीवस्वरूपस्य चाननुभूतत्वेन न त्वम्पदेनोपस्थितिसम्भव इति तत्त्वम्पदलक्ष्यार्थयोरैक्यं कथं बोध्यमित्यत आह—वाक्यं चेति । ज्ञापकं—पदार्थयोरैक्यादिज्ञापकम् । तत्त्वम्पदार्थयोः—पदाभ्यां वाच्ययोर्लक्ष्ययोश्च । प्रकृतवाक्यार्थानुकूलयोः—तत्त्वमसीति वाक्यार्थबुद्धौ प्रयोजकीभूतोपस्थितिविषययोः । वाच्योपस्थितिद्वारकलक्ष्योपस्थितेरेव लक्ष्यघटितवाक्यार्थबोधे हेतुत्वात् । अन्यतः—श्रुतिभिन्नप्रमा-

नागायणी ।

हारादिलिङ्गविरोधात् । कौशीतक्यां तत्त्वमसीत्यात्माऽवगम्य इत्युक्त्वा तत्त्वमसिवाक्यस्य 'अहं ब्रह्मास्मी'त्यर्थप्रदर्शनाच्चेत्यन्यत्र विस्तरः ।

ननु तत्त्वंपदार्थयोर्मानान्तरगम्यत्वमस्ति न वा ? आद्ये मानान्तरानधिगतत्वरूपापूर्वत्वलिङ्गभङ्गप्रसङ्गः । अन्त्ये शास्त्रादपि तद्बोधासंभवः । मानान्तरेण प्रमिते पदार्थे गृहीतवृत्तिकस्य पदस्य ज्ञानेनोपस्थापिते सति वाक्यार्थबोधस्यानुभवसिद्धत्वात् न तयो रूपाद्यभावान्मानान्तरगम्यत्वं संभवति वक्तुं वा युक्तं सिद्धान्तभङ्गप्रसङ्गादित्यत आह—वाक्यं चेति । पदकदम्बात्मकं वाक्यं चेत्यर्थः । पदार्थज्ञानद्वारैव—वृत्त्या पदजन्यपदार्थोपस्थितिद्वारैव, ज्ञापकं-वाक्यार्थप्रमापकम् । तत्त्वंपदार्थयोः—तत्त्वंपदाभ्यां वाच्ययोर्लक्ष्ययोश्च, प्रकृतवाक्यार्थानुकूलयोः—प्रकृतवाक्यार्थबुद्धिप्रयोजकीभूतोपस्थितिविषययोः । अन्यतोऽसिद्धत्वात्—उपनिषद्भिन्न-

शास्त्रेणैव प्रमातव्यौ, यूपाहवनीयादिपदार्थवत् । ततश्च 'यतो वा इमानि भूतानि जायन्ते, येन जातानि

न्यायरत्नावली ।

णात् । शास्त्रेणैव-श्रुत्यैव । यूपेत्यादि । यथा यूपपदार्थोद्देशेन तक्षणादिसंस्कारकर्मविधायकस्य 'यूपं तक्षती'त्यादिवाक्यस्य पर्यालोचनात्तक्षणादिजन्यसंस्कारविशिष्टकाष्ठं यूपपदवाच्यमिति निर्णीय 'यूपे पशुं बध्नाती'त्यादिवाक्याद् यूपसंसर्गो बुध्यते, यथा वा 'वसन्ते ब्राह्मणोऽग्नीनादधीत' 'नक्तं गार्हपत्यमादधाति दिवाऽऽहवनीय' मित्यादिवाक्यपर्यालोचनेन दिवाधानादिसाध्याग्न्यादिराहवनीयादिपदवाच्य इति निर्णीय 'आहवनीये जुहोति 'गार्हपत्ये पत्नीस्संयाजयन्ती'त्यादिवाक्यादाहवनीयादिसंसर्गो बुध्यत इत्यर्थः । भूतानीति । उत्पन्नानीत्यर्थः । तेन पञ्चभूतान्यस्य गुणक्रियादेर्दृष्टादृष्टयतादात्म्येक्षणादेश्च ब्रह्महेतुकत्वलाभः । जायन्ते-उत्प-

नारायणी ।

मानतोऽप्रमितत्वात् । तावपि-तत्त्वंपदवाच्यलक्ष्यावपि, शास्त्रेणैव-वाक्यशेषरूपश्रुत्यैव । जन्यत्वं तृतीयार्थः । प्रमातव्यौ-प्रमार्हौ, श्रुतिप्रमाणमात्रजन्यप्रमाविषयाविति यावत् । तथाच मानान्तरतो ऽप्रमितत्वेपि वाक्यशेषैरेव प्रमिते तत्त्वंपदार्थे गृहीतवृत्तिकस्य तत्पदादेर्ज्ञानेनोपस्थापने सति वाक्यार्थबोधसंभवान्नानुपपत्तिरिति भावः । तत्र दृष्टान्तमाह यूपेति । यथा यूपे पशुं बध्नातीति वाक्यात् यूपे पशुबन्धनसंसर्गे प्राप्ते यूपपदार्थाकाङ्क्षायामन्यतोऽप्राप्तं यूपपदार्थं 'यूपं तक्षती'ति वाक्यं यूपोद्देशेन तक्षणादिसंस्कारविशेषविशिष्टं काष्ठं यूप इति वाक्यमर्यादया प्रमापयति एवम् 'आहवनीये जुहोति' इति वाक्येनाहवनीये होमसंसर्गे प्राप्ते आहवनीयपदार्थाकाङ्क्षायामन्यतोऽप्राप्तमाहवनीयपदार्थम् 'वसन्ते ब्राह्मणोऽग्नीनादधीत' 'नक्तं गार्हपत्यम्' 'दिवा आहवनीय'मितिवाक्यं दिवाऽऽधानादिसामग्रीविशिष्टोऽग्निराहवनीय इति प्रमापयति । एवं गार्हपत्यादिकमपि । आदिपदात् स्वर्गादिपरिग्रहः । एतेन यूपाहवनीयादेः केवलस्य प्रत्यक्षयोग्यत्वेपि न हानिः स्वर्गादेरतथात्वादिति दिक् । उपपादनफलमाह—ततश्चेति । प्रमानान्तरेण प्रमितार्थस्य वाक्यशेषैरेव प्रमित्यङ्गीकारादेवेत्यर्थः । यतो वेत्यादि 'यतो वा इमानि भूतानि जायन्ते येन

जीवन्ती'त्याद्याः सृष्ट्यादिश्रुतयस्तत्पदवाच्यार्थस्य समर्पिकाः । 'सत्यं ज्ञानमनन्त'मित्यादयस्तु लक्ष्यार्थस्य । एवं

न्यायरत्नावली ।

द्यन्ते । जातानि–दृश्यतया प्रादुर्भूतानि दृश्यानीति यावत् । जीवन्ति–सत्तास्फूर्तिमर्यादादिकं प्राप्नानि । प्रयन्तीति शतृप्रत्ययान्तं लयं लभमानानीत्यर्थः । तथा च यतो ब्रह्मणो हेतोः कार्यं सर्वमुत्पद्यते, दृश्यानि सर्वाणि यतः सत्तास्फुरणादि लभन्ते, लीयमानानि च सर्वाणि प्रलयकाले यत्प्रविशन्ति, तद्ब्रह्मेत्यर्थः । पञ्चमीतृतीययोर्हेतुसामान्यार्थकत्वेऽपि लीयमानकार्याधारत्वोक्त्योपादानत्वं लभ्यते । 'तदैक्षत बहुस्यां प्रजायेये'ति 'सोऽकामयत तदात्मानं स्वयमकुरुते'ति ईक्षणकामनाकृतीनां जगत्कारणनिष्ठतया निर्देशाद्ब्रह्मणो जगत्कर्तृतालाभः । 'येने'त्याद्येकवचननिर्देशात् 'य एको जालवानीशत ईशनीभि'रित्यादिश्रुतेश्च जगज्जन्मादिहेतोरेकत्वमिति बोध्यम् । तत्पदवाच्यार्थस्येति । तत्त्वमसीति वाक्यप्रवृत्तेः पूर्वं सृष्ट्यादिवाक्यस्य प्रकृतत्वात् प्रक्रान्तवाचितत्पदस्य सृष्ट्यादिकारणं वाच्यमिति भावः । इत्यादयस्तु लक्ष्यार्थस्येति ।

नारायणी ।

जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मे, त्याद्याः सृष्टिस्थितिप्रलयबोधिकाः श्रुतयः । श्रुत्यर्थस्तु यतः यस्मादुपादानात् वै एव इमानि प्रत्यक्षाद्यवगतानि नामरूपात्मकानि भूतानि ब्रह्मादिस्तम्बपर्यन्तानि जायन्ते उत्पद्यन्ते येन निमित्तभूतेन जातानि उत्पन्नानि जीवन्ति वर्धन्ते यत्प्रयन्ति यत् ब्रह्म लयसुषुप्त्यादौ वासनारूपेण गच्छन्ति अभिसंविशन्ति बाधेन ज्ञानकाले तन्मात्रस्वरूपाणि भवन्ति तद्विजिज्ञासस्व तद्विचारय विचार्यमाणे यत्सृष्ट्यादिकर्तृ तद्ब्रह्मेत्यर्थः । तत्पदवाच्यार्थस्य––तत्पदशक्यार्थस्य ब्रह्मणः, समर्पिकाः–प्रमापिकाः । एवं प्रमिते विशिष्टे गृहीतशक्तिकेन तत्पदेन लक्षणया शुद्धोपस्थितौ कारणीभूतानुभवजनकं वाक्यमाह—सत्यमिति । 'सत्यं ज्ञानमनन्तं ब्रह्म, यो वेद निहितं गुहायां सोऽश्नुते सर्वान्कामान्' इत्याद्याः श्रुतय इत्यर्थः । लक्ष्यार्थस्य–तत्पदलक्ष्यस्य लक्षणया तत्पदबोध्य-

जाग्रत्स्वप्नसुषुप्त्यादिश्रुतयः(१) 'तद्यथा महामत्स्य उभे कूले अनुसञ्चरति पूर्वं चापरं चैवमेवायं पुरुष एतावुभावन्तावनुसञ्चरति स्वप्नान्तं च बुद्धान्तं चे'त्याद्यास्त्वंपद-

न्यायरत्नावली ।

'ब्रह्मविदाप्नोति पर'मित्यनेन शुद्धब्रह्मज्ञानस्य मोक्षहेतुत्वे उक्ते किं तद्ब्रह्मेत्याकाङ्क्षायां सत्यमित्यादिवाक्यस्य प्रवृत्तत्वेन तत्पदलक्ष्यशुद्धब्रह्मपरत्वमिति भावः ।(२) कूले—नद्यास्तीरे, अन्तौ—कर्मफलपरिपाकरूपौ, अनुसञ्चरति—अनुगच्छति, स्वप्नान्तं—स्वप्नभोगरूपमन्तम्, बुद्धान्तं—जाग्रद्भोगरूपमन्तम् । बुद्धान्तं चेत्याद्या इत्यत्राद्यशब्देन 'तद्यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः संहत्य पक्षौ सल्लयायैव ध्रियते एवमेवायं पुरुष एतस्मा अन्ताय धावति यत्र सुप्तो न कञ्चन कामं

नारायणी ।

स्येति यावत् प्रमापिका इति शेषः । श्रुत्यर्थस्तु यः पुरुषधौरेयः ब्रह्म व्यापकं सत्यं कालत्रयाबाध्यं ज्ञानं ज्ञानस्वरूपं अनन्तं न विद्यते अन्तो यस्येति परिच्छेदत्रयरहितं गुहायां पञ्चकोशाख्यायां निहितं साक्षित्वेन स्थितं जानाति सर्वान् कामान् सर्वानानन्दान् अश्नुते अनुभवति सः । 'ब्रह्मविदाप्नोति पर'मित्यादिना शुद्धस्यैव प्रक्रान्तत्वात्सत्यादिवाक्यं शुद्धतात्पर्यकमिति भावः ।

तत्पदार्थस्योभयविधस्य बोधिकामुक्त्वा त्वंपदवाच्यसमर्पिकामाह—तद्यथेति । 'तद्यथा महामत्स्य उभे कूलेऽनुसंचरति पूर्वं चापरं चैवमेवायं पुरुष एतावुभावन्तावनुसंचरति स्वप्नान्तं च बुद्धान्तं च । आदिना 'तद्यथा श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः पक्षौ संहत्य सल्लयायैव ध्रियते एवमेवायं पुरुष एतस्मा अन्ताय धावती'त्याद्याः श्रुतयः । अयमर्थः । तत्

(१) तद्यथा महामत्स्य इत्याद्यास्त्वंपदवाच्यार्थस्येति पाठः घपुस्तके । तद्यथा महामत्स्य इत्याद्या जाग्रत्स्वप्नसुषुप्त्यादिश्रुतय इति खपुस्तके । घपुस्तके न्यायरत्नावल्यामेषा श्रुतिः संपूर्णा पठिता मूले त्वंश एवास्या इति ।

(२) इति भावः इत्यस्यानन्तरं बुद्धान्तं चेत्यादिः तथा २९ पृष्ठेऽप्येषश्रुतिसङ्ग्रह इत्यनन्तरं कूले नद्या इत्यादिपाठः गपुस्तके, घपुस्तके तु तद्यथा इत्याद्या श्रुतिरेवात्र टीकायां दृश्यते, मूले त्वंश एवास्याः । अस्माभिस्तु मूलानुरोधात् स्थानपरिवर्तनं कृतमिति ।

न्यायरत्नावली।

कामयते न कञ्चन स्वप्नं पश्यती'ति श्रुतिसङ्ग्रहः। सुपर्णः शीघ्रगतिः श्येनः विपारपत्य विशेषण नानादेशेषु पतित्वा श्रान्ता भूत्वा पक्षौ संहृत्य संयुक्तीकृत्य सल्लयाय नीडाय ध्रियते नीडप्राप्त्यर्थं यतते। अन्ताय उपरतावस्थारूपान्तप्राप्त्यर्थं धावति यतते।

ननु जाग्रदाद्येकैकावस्थाविशिष्टस्यापि त्वम्पदवाच्यतासम्भवनावस्थात्रयविशिष्टस्य सा कथमुक्ता। एवं जन्माद्येकैकहेतुत्वविशिष्टस्यापि तत्पदवाच्यतासम्भवन जन्मास्थातसहाररूपत्रयहतारेव सा कथमुक्ता। न च 'स वा अयमात्मा ब्रह्म' इत्यादि वाक्यस्य 'तद्यथा महामत्स्य' इत्याद्यवस्थात्रयाविशिष्टजीवबोधकवाक्योत्तरं विद्यमानत्वाज्जीवबोधकपदानां महावाक्यस्थानामवस्थात्रयाविशिष्टचिदेव मुख्योऽर्थः, एवं तत्त्वमस्यादिवाक्यस्य जन्मादिहेतुब्रह्मबोधकवाक्योत्तरं सत्त्वात् तादृशं ब्रह्मैव ब्रह्मबोधकपदमुख्यार्थ इति वाच्यम्। श्रुतष्वप्यवस्थात्रयस्य जन्मादित्रयस्य च कथ निर्देश इति पर्यनुयोगात् एकैकघटितस्यैव वाच्यतेत्यभिप्रायेणापि उक्तश्रुतिसङ्गतेश्च। न च जन्मलयहेतुत्वस्याविद्यायामपि सम्भवेनातिप्रसक्त्या स्थितिहेतुत्वमावश्यकम्, एवं विशेषविज्ञानाभावरूपसुषुप्तेरपि घटादावतिप्रसक्तत्वेन न मुख्यार्थतावच्छेदकत्वम्, (१)ये एव हि तत्त्वम्पदयोर्मुख्यार्थोपलक्षिते स्वरूपे, तयोरैक्यं महावाक्येन बोधनीयमिति वाच्यम्। स्थितिहेतुत्वस्य ब्रह्मण्येव सत्त्वात्तदन्यवैयर्थ्यात् घटादौ सुषुप्तिव्यवहाराभावेन उपरतमनस्कत्वस्य तद्रि-

नारायणी।

तत्र स्वप्नबुद्धान्तयोः संचरन्नप्यात्माऽसङ्गत्वात्कर्तृतद्धर्मैरवशीकृत एव, यथा लोके महामत्स्यो नादेयस्रोतसाऽवशीकृत एव पुर्वं च परं चेत्युभे कूले तटावनुक्रमेण संचरति ताभ्यां भिन्नः सन्, एवमेवायं पुरुष उपाधिभिन्नः सन्नुपाधिनाऽवशीकृत एव अन्तौ कर्मफलपरिपाकावनुसंचरति। स्वप्नान्तं

(१) एवं हि तत्त्वंपदयोरिति पाठः घपुस्तके।

न्यायरत्नावली ।

शिष्टानन्दसामान्यानुभवितृत्वस्य वा सुषुप्तित्वात् 'आनन्दभुक् चेतोमुखः प्राज्ञ' इति श्रुत्या तथा बोधात्, जाग्रदाद्यन्यतरमात्रस्यानतिप्रसक्तत्वाच्च । न च जन्मादित्रयहेतूनां ब्रह्मविष्णुरुद्राणां जाग्रदाद्यवस्थावतां विश्वतैजसप्राज्ञानां (१)चैकस्वरूपमिति लाभाय श्रुतिषु त्रयमुक्तम्, अन्यथा हि जन्ममात्रहेतुत्वस्य एकवाक्येनोक्तौ मदेशान्तरयोर्वाक्याभ्यां स्थितिसंहारयोरेकैकहेतुत्वोक्तौ जन्मादित्रयहेतूनां त्रयाणामैक्यं न लभ्येत, एवं विश्वतैजसप्राज्ञानामप्येकप्रदेशानुक्तौ नैक्यं लभ्येत, तथा च त्रयाणां त्रिभिरैक्यस्य महावाक्यात्लाभेऽपि स्वरूपत्रयस्य सत्यत्वापत्त्या अद्वैतश्रुतिविरोध इति कल्पतरूक्तं युक्तमिति वाच्यम् । 'एकमेवाद्वितीय'मित्यादिना ब्रह्मणः, 'असङ्गो ह्ययं पुरुषः सोऽयं एका दृष्टा अद्वैतो भवती' त्यादिना च जीवस्य निरङ्कुशाद्वैतस्वरूपबोधनात् तदर्थमुक्तप्रयासस्यानौचित्यादिति चेत् । अत्रोच्यते । जन्मादिहेतुत्वानां जाग्रदाद्यवस्थानां च एकैकमात्रस्योक्तौ महावाक्यस्थतत्त्वम्पदाभ्यामेकैकमात्रोपलक्षितस्वरूपयोरैक्यं बोध्येत, तथा च तयोरेव भेदभ्रमो निवर्तेत । न तु हेतुतात्रयोपलक्षितेशस्वरूपादवस्थात्रयोपलक्षितजीवस्वरूपस्य भेदभ्रमो निवर्त्येत । न हि 'छत्री कुण्डली वासस्वी यः स श्यामः स्थूलश्चैत्रो ने'ति भ्रमः छत्री श्याम इति वाक्यजन्यज्ञानेन निवर्तते । निवर्तते तु चैत्र इत्यन्तोक्तवाक्यजन्यज्ञानेन । तादृशज्ञानयोस्तद्व्यक्तिमात्रविषयत्वात् (२)अविशेषेऽपि सामग्रीविशेषजन्यज्ञानस्यै-

नारायणी ।

स्वप्नभोगरूपम्, बुद्धान्तं जाग्रद्भोगरूपम्, सुपर्णः गरुदजातिः, श्येनः शरभजातिः, विपरिपत्य नानादेशेषु पतित्वा, अतः खिन्नः सन् पक्षौ संहत्य

(१)—म्प्येकप्रदेशेनुक्तौ नैक्यं लभ्येत एवं त्रयाणामित्यादि पाठभेदः घपुस्तके ।

(२) अत्र यद्यपि तादृशज्ञानयोस्तद्व्यक्तित्वाविशेषात् अविशेषेपि इत्यादिपाठः सर्वत्रोपलभ्यते, किन्तु विषयत्वाविशेषेपीति समस्तेन भाव्यम् । .लेखकदोषादेवं जातमिति लक्ष्यते ।

वाच्यार्थस्य समर्पिकाः । 'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः, न दृष्टेर्द्रष्टारं पश्ये'रित्यादयस्तु ल

न्यायरत्नावली ।

वोक्तभ्रमानिवर्तकत्वेन सर्वानुभविकत्वात् । तस्मात् त्रितयोपलक्षितस्वरूपयोरैक्यविषयकस्य मूलाज्ञानस्य तादृशैक्यज्ञानं विनोच्छेदासम्भवात्तं विना च तादृशाज्ञानमूलकभेदभ्रमोच्छेदासम्भवात्तादृशज्ञानमावश्यकम् । तच्च त्रितयविशिष्टोपस्थितिपूर्वकशुद्धोपस्थितिजन्यमेवेति तादृशोपस्थित्यर्थमेकस्मिन्नेव वाक्ये त्रितयोक्तिरावश्यकीति बोध्यम् ।

योऽयमित्यादि । बृहदारण्यके (१)चतुर्थाध्याये तृतीयब्राह्मणे 'एष ब्रह्मलोक' इत्यादिवाक्येन शुद्धजीवब्रह्मणोरैक्यस्य वक्ष्यमाणत्वेन तदुपयुक्तस्वप्रकाशजीवस्वरूपमादित्यचन्द्राग्निवाचामभावे जीवस्य व्यवहारप्रयोजकं ज्योतिः किमिति प्रश्नपूर्वकेणैव 'आत्मैवास्य ज्योतिर्भवती'त्यन्तेन उक्त्वा 'कतम आत्मे'त्यनेन शुद्धात्मस्वरूपमात्रज्ञाने आकाङ्क्षामुत्थाप्य योऽयमित्यादिवाक्यस्य उक्तत्वेन शुद्धात्मपरत्वम् । तत्र च वाक्येऽयमर्थः-विज्ञानमयः बुद्धिविकाराभिमानी प्राणेषु अभिमानसम्बन्धेन प्राणसम्बन्धी हृदि हृदयस्थमनोऽभिमानी अन्तर्ज्योतिर्मनोवृत्तिरूपः [बहिर्ज्योतिरन्यस्वभावः] पुरुषः

नारायणी ।

संप्रसार्य सख्याय नीडाय ध्रियते यतते अन्ताय उपरतावस्थार्थं धावति यतते । तथाचात्माऽवस्थात्रयवान् त्वंपदार्थ इति सिद्धम् ।

एवं प्रमिते विशिष्टे गृहीतवृत्तिकेन त्वंपदेन लक्षणया शुद्धोपस्थितौ कारणीभूतानुभवजनकं वाक्यमाह—योऽयमिति । अयमहमितिधीगोचरः यः तवापि संमतः विज्ञानमयः विज्ञानप्रायः विज्ञानाभिमानीति यावत्, प्राणेषु ज्ञानकर्मेन्द्रियप्राणपञ्चकेषु अन्तर्यामितया स्थितः हृदि बुद्धौ अन्तर्ज्योतिः अन्तर्वर्तमानज्योतिः आदित्याग्निवाचामभावेपि प्रकाशकज्योतिः स्वप्रकाशः पुरुषः सर्वदृश्यानुस्यूतः । श्रुत्यन्तरं—न दृष्टेरिति । द्रष्टेः

(१) सर्वेषु पुस्तकेषु 'षष्ठाध्याये' इति वर्तते तल्लेखकप्रमादादित्यवसेयम् ।

क्ष्यार्थस्य । तेन प्रथममवान्तरवाक्येभ्योऽनुभूतयोः शुद्ध-योर्जीवब्रह्मणोस्तत्त्वमस्यादिवाक्ये मुख्यार्थान्वयानुपप-

न्यायरत्नावली।

पूर्णः । तथा च ज्योतिरात्मेत्यनेनाहमाकारधीविषयत्वे पूर्ववाक्येन ज्योतिषो ज्ञानेऽपि बुद्ध्यादीनां सर्वेषामेव तत्सम्भवाद्विज्ञानमयादि-पदैर्बुद्ध्यादिविलक्षणं स्वप्रकाशरूपं प्रदर्शितम् । तेनेति । उक्त-श्रुतिभिर्वाच्यलक्ष्योभयसमर्पणेनेत्यर्थः । वाच्यसमर्पणस्य फलमाह-मुख्यार्थान्वयानुपपत्त्येति । मुख्यवृत्त्युपस्थापितयोर्विशिष्टजी-वब्रह्मणोरैक्यबोधस्य प्रमात्वानुपपत्तिज्ञानेनेत्यर्थः । वाच्यलक्ष्योभ-यसमर्पणस्य फलमाह-अवान्तरवाक्येत्यादिना । अवान्तर-वाक्येभ्योऽनुभूतयोः शुद्धयोर्लक्षणया स्मरणोपपत्तिरिति योजना । वाच्यसमर्पणे सति वाच्ययोरन्वयानुपपत्तिज्ञानम्, ततश्च वाच्य-ज्ञानात्तत्सम्बन्धिनो लक्ष्यस्य अवान्तरवाक्यार्थीनपूर्वानुभवादी-नसंस्कारजन्यस्मृत्या तदैक्यरूपवाक्यार्थप्रमेति भावः ।

ननु वाच्ययोरशुद्धयोश्च अवान्तरवाक्यानुभूतत्वं वक्तव्यम्,

नारायणी ।

प्रमाणजन्यवृत्तेः द्रष्टारं भासकं न पश्येः न पश्यसि? सर्वभासकं त्वमि-दं निर्धर्मकत्वात् प्रमाणायोग्यं यत्साक्षात्परोक्षाद् ब्रह्म तन्मे व्याचक्ष्वेति पृष्टं त्वंपदलक्ष्यं ब्रह्मेत्यर्थः । धर्मिप्रमापक प्रदर्श्य वाक्यार्थबोधमुपसंहरति-तेनेत्यादिना । तेन वाच्यलक्ष्यसमर्पणेन । तत्र लक्षणाबीजभूतवाच्यसमर्पण-फलमाह—प्रथममिति । तत्त्वमस्यादिवाक्ये मुख्यार्थयोः तत्त्वंपदशक्यार्थयोः विशेषणभेदाद्भिन्नयोः अन्वयानुपपत्त्या तादात्म्यसंसर्गरूपान्वयस्य बाधि-तत्वप्रतिसन्धानेन(१) वाच्यसमर्पणे सत्येव वाच्ययोरन्वयानुपपत्तिप्रति-सन्धानं ततो वाच्यज्ञानाद्वाच्यसम्बन्धिनो लक्ष्यस्यावान्तरवाक्यैरनुभवे सति तन्मूलकस्मृत्या वाक्यार्थप्रमा भवतीति । वाच्यलक्ष्योभयसमर्पणफ-लमाह अवान्तरेत्यादिना । 'सत्यं ज्ञानमनन्तम्, योयं विज्ञानमय' इत्याद्यवा-न्तरवाक्यजन्यानुभवविषययोर्निरतिशयपरमानन्दरूपयोः परापरात्मनो-

(१)—नेनेत्यर्थः तात्पर्यानुपपत्तित एव लक्षणायाः सर्वत्र प्रतिपादने विशिष्टान्वयबो-धस्यौत्सर्गिकत्वात् तद्बाधितत्वप्रतिसन्धानादपि लक्षणेति भावः इत्यधिकः पाठः खपुस्तके ।

न्यायरत्नावली ।

शुद्धयोरपि वा तन्न वक्तव्यम् , तेनेत्यनेनैव तल्लाभात् ; किमिति-शुद्धयोरेव तदुक्तमिति चेत् । अत्रोच्यते । यद्यपि वाच्ययोरपि यतो वेत्यादिना तद्यथेत्यादिना च वाक्येनानुभवोऽस्ति तथापि तत्र तयोर्नावान्तरवाक्यत्वम् । तत्रैव तात्पर्यापर्यवसानात् , तयोर्ब्रह्मजीवलक्षणबोधकत्वेन लक्षणविशिष्टब्रह्मजीवबोधनद्वारा शुद्धब्रह्मजीवस्वरूपपरत्वात् । लक्षणबोधकवाक्यमात्रस्य लक्षणविशिष्टबोधनद्वारा लक्षणोपलक्षिताखण्डव्यक्तिपरत्वमित्यस्यार्थस्याद्वैतसिद्धिद्वितीयपरिच्छेदे जन्मादिसूत्रकल्पतरौ च व्यवस्थापितत्वात् । तथा च यतो वेत्यादिवाक्ययोरपि शुद्धबोधपर्यवसितत्वेन शुद्धयोरेवान्तरवाक्यानुभूतत्वोक्तिर्युक्तैवेति भावः ।

अत्रेदं बोध्यम् । वाच्यसमर्पकत्वं तत्पदवाच्यबोधद्वारकशुद्धचिद्बोधपरत्वम् । तेन सत्यादिवाक्यस्यापि सत्यादिपदवाच्यबोधद्वारकशुद्धचिद्बोधपरत्वेऽपि न वाच्यसमर्पकत्वम् । शुद्धबोधपरत्वेऽपि यतो वेत्यादिवाक्यं न स्वरूपलक्षणपरम् । ब्रह्मस्वरूपं सत्यत्वाद्युपलक्षितात्यन्ताभिन्नं न वेत्यादिसंशयाद्यनिवर्तकत्वात् , स्वरूपे भ्रमसंशयनिवर्तकधीपरस्यैव स्वरूपलक्षणपरत्वात् । एवं तत्पदवाच्यत्वं न सृष्ट्यादित्रितयजनकत्वम् , प्रलये तदभावात् । न हि तदा सृष्ट्याद्यन्यतमस्यापि उपधायकत्वमस्ति । न चोपलक्षणविधया तादृशत्रयोपधायकत्वं वाच्यतावच्छेदकमिति वाच्यम् । काकवन्तो देवदत्तस्य गृहा इत्यादावुत्तृणत्वादेरिवोपलक्ष्यतावच्छेदकस्यावश्यमुपलक्षणबोद्ध्यतया तस्यैव वाच्यतावच्छेदकत्वस्य युक्तत्वात् । किन्तु सृष्ट्यादिजननस्वरूपयोग्यतावच्छेदकीभूताविद्याबिम्बस्वरूपमीश्वरत्वम् । एवं त्वम्पदवाच्यत्वमपि नावस्थात्रयवत्त्वम् । मूर्छासमाध्योस्तदभावात् । किन्तु अवस्थात्रयसम्बन्धयोग्यतावच्छेदकीभूताविद्याप्रतिबिम्बत्वरूपं जीवत्वम् । न च मूर्छायां कर्म-

त्या लक्षणया स्मरणोपपत्तिः । सुषुप्तौ निर्विकल्पकमा-

न्यायरत्नावली ।

न्द्रियव्यापारसत्त्वात् जाग्रद्रूपत्वम्(१) समाधिकाले तु न जीवस्य त्वम्पदवाच्यतेति जाग्रदाद्यन्यतमवत्त्वस्य त्वम्पदवाच्यत्वेऽपि न दोष इति वाच्यम्। मूर्छायां कायक्रियामात्रेण गात्रकम्पादेस्सत्त्वेऽपि कर्मेन्द्रियव्यापारसत्त्वे मानाभावात्(२)। समाधेस्तु असम्प्रज्ञातरूपस्याप्यविद्यानिवृत्तेः पूर्वमपि त्वम्पदार्थसाक्षात्कारहेतुतयाऽनुष्ठेयत्वेन तदानीं जीवत्वसत्त्वेन त्वम्पदवाच्यतानपायात् । नन्ववान्तरवाक्यैश्शुद्धेऽनुभूते सति महावाक्यस्थपदैः शुद्धस्मृतिसम्भवः, अवान्तरवाक्यस्थपदैस्तु कथं शुद्धस्य स्मृतिः ? तत्पूर्वं शुद्धस्यानननुभवादित्यत आह—**सुषुप्तावि**ति । **निर्विकल्पके**ति । साक्षिस्वरूपसुखस्वरूपाज्ञानस्वरूपाकाराः निर्विकल्पास्तिस्रोऽविद्यावृत्तयः सुषुप्तौ जायन्त इति विवरणेऽङ्गीकृतम् । साक्षिणश्चाविद्योपहितचिद्रूपत्वपक्षेऽप्यविद्यायाः साक्षिस्वरूपाघटकत्वात् शुद्धचिद्रूपत्वमेव । पक्षान्तरे तु वक्ष्यन्त्याचार्या एव-'साक्षी तु सर्वानुगतस्तुरीयः (३)तथा एकः कूटस्थः साक्षी'त्यादि । तथा च, सौषुप्तिकनिर्विकल्पकानुभवमूलि-

नारायणी ।

रित्यर्थः—लक्षणया—**जहदजहत्स्वार्थलक्षणया, स्मरणोपपत्तिः स्मृतिसंभवः तत्त्वमादिपदैरिति शेषः । तथाच लक्षणयोपस्थितयोः शुद्धयोरन्वयबोधोऽयत्नसिद्ध एवेति भावः। अवान्तरवाक्येभ्योप्यनुभवे हेतुभूतमनुभवमाह—** सुषुप्तावि॑ति । **अथवा न केवलमवान्तरवाक्येभ्य एव तत्त्वंपदलक्ष्ययोरनुभवः किन्तु सौषुप्तप्रत्यक्षतोपीत्याह**—सुषुप्तावि॑ति । **अन्तःकरणवृत्युपरमावस्थायामित्यर्थः**। निर्विकल्पके॑ति । **निर्विकल्पको यः साक्षिचैतन्यविषयकोऽनुभवो**

(१) विशेषविज्ञानाभावात्सुषुप्तित्वं च इत्यधिकः पाठो घपुस्तके स च युक्तः ।

(२) उपरतमनस्कत्वे सत्यानन्दानुभवितृत्वस्यैव सुषुप्तत्वेन तत्र तदभावात्, तदा गात्रकम्पादिसत्त्वेन जीवस्य त्वम्पदवाच्यतानपायात् इत्यधिकः पाठो घपुस्तके स च युक्ततरः ।

(३) तथा शब्दो घपुस्तके नास्ति ।

न्यायरत्नावली ।

केवा(१)न्तरवाक्यस्थपदजन्या शुद्धस्मृतिरिति भावः ।
ननु वार्तिककारमते सुषुप्तौ नोक्तनिर्विकल्पकवृत्तिः स्वीक्रियते ।
तत्कथमवान्तरवाक्यस्थपदैः स्मरणम् । न चैवं तन्मते 'सुखम-

नारायणी ।

ज्ञानाख्योऽविद्यापरिणामस्तस्य सुखमहमस्वाप्समिति स्मृत्यन्यथानुपपत्त्या विवरणाचार्यादिभिः स्वीकृतत्वादित्यर्थः(२) ।

(१) 'एव' इति घपुस्तके नास्ति ।

(२) अयमत्राधिकः पाठः खपुस्तकेः—

'तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किंचन वेद नान्तरमेवमेवायं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किंचन वेद नान्तर' मित्यादिश्रुत्या कामुकस्य सुखसम्पत्त्या सर्वावेदनदृष्टान्तेनाहमर्थस्य ब्रह्मसम्पत्त्या सर्वावेदनकथनात्तत्र भासमानं सुखं तत्पदलक्ष्यं ब्रह्मैव, सामग्र्यभावेन तत्र वैषयिकसुखासत्त्वात्तस्यैवाहमर्थनिष्ठस्वापे विशेषणत्वात् । अहमर्थस्य सुखं सन्नहमस्वाप्समिति सुखभिन्नतयाऽप्रमीतेश्च । स्वापश्च मनोलयसहितं मूलाज्ञानं सर्वविषयकं तूलाज्ञानं च । मनसो लीनत्वादेव च न तत्र विशिष्टा वृत्तिः किन्तु साक्षात्कारा सुखाकारा स्वापाकारा चेति तिस्रो निर्विकल्पका अविद्यावृत्तयः समूहालम्बनरूपाः । तादृग्भिः संस्कारद्वारा प्रबोधे स्मृतिरपि स्वसमानाकारा निर्विकल्पकसमूहालम्बनरूपैव, निष्प्रकारकानुभवात्सप्रकारकस्मृतेरसम्भवात् । निर्विकल्पकानुभवान्निर्विकल्पकस्मृतिस्त्वनुभवस्मृत्योः समानविषयत्वेन सामान्यविषयकार्यकारणभावादुपपद्यते । अस्मिन्मते अहङ्कारस्य 'अस्वाप्सम्' इति भूतलकारोत्तमपुरुषाभिलापस्तु स्मर्यमाणाभिन्नसाक्षिणि तादात्म्येनाध्यासेन स्मर्यमाणत्वाभिमानादित्यग्रे स्फुटीभविष्यति ।

ननु प्रबोधे स्वापविशिष्टस्मृतेरेवानुभाविकत्वात्तज्जन्यरूपविशिष्टविषयकानुभव एवाविद्यावृत्तिरूपः कल्पयितुमुचितः, समानप्रकारत्वेनैवानुभवस्मृतिभ्यां संस्काराणां कार्यकारणभावात्, अन्यथाऽतिप्रसङ्गात् । नच विशिष्टानुभवेऽहङ्कारस्य निमित्तत्वात् सुषुप्तौ च तदभावात्प्रथमाविद्यको विशिष्टानुभवः स्यादिति वाच्यम् । अविद्यावृत्तौ अहङ्कारस्य निमित्तत्वे मानाभावात् । तथा च कथं तत्र केवलानुभवः ? । अपि चाहमर्थस्य वर्तमानतया प्रत्यक्षत्वादस्मरणे सौषुप्तसुखसाक्षिणोरपि नित्यतया सर्वदाऽनुवर्तमानत्वेन प्रत्यक्षत्वात् न स्मृतिविषयत्वसम्भवः । एवं जागरणाद्यक्षणेऽनुभूयमानपदार्थगोचरतदानन्तिनाज्ञानस्य नष्टत्वेन मनोलयस्य चातीतत्वे स्मृतिसम्भवेऽपि मूलाज्ञानस्य विषयाज्ञानानां च यावत्स्वविषयकज्ञानोदयमनुवर्तमानत्वात्तदसम्भव एव । अत एवोक्तं वार्तिककारपादैः 'न सुषुप्तिगेत्यादि'ग्रन्थस्त्वभिन्न एवास्मात् ।

क्षिचैतन्यानुभवाङ्गीकाराच्च । अद्वितीयब्रह्मविजिज्ञापयि-

न्यायरत्नावली ।

हमस्वाप्सं न किञ्चिदवेदिष'मित्याकारकज्ञानस्य जाग्रत्कालीनस्य स्मृतित्वं न स्यादिति वाच्यम् । तस्य तन्मतेऽनुभवत्वस्वीकारात् । उक्तं हि अव्याकृतपक्रियायां वार्तिके—

न सुषुप्तिगविज्ञानं नाज्ञासिषमिति स्मृतिः ।
कालाद्यव्यवधानत्वान्न ह्यात्मस्थमतीतभाक् ॥

कालाद्यव्यवधानत्वादिति । यदा स्मृतेः परेण वा-धा, तदापि साक्षिरूपानुभवोऽस्तीत्यर्थः । अत्र हेतुः—न ह्रीति । आत्मस्थं सुषुप्तिजावस्थं साक्षिचैतन्यम्, अतीतभाक् अतीततामाक् । न चाज्ञानाकारवृत्तिं विना नाज्ञासिषमित्याकारो नोपपद्यत इति वाच्यम् । न किञ्चिदवेदिष-मित्यनेन अनेकविषयकाज्ञानस्यैवोल्लेखात् । तन्नाशादेव तदवच्छि-न्नविनाशरूपसंस्कारोत्थादेव स्मृतिसम्भवात्, नाज्ञासिषमिति स्मृ-तिरिति मूलाज्ञानस्मृतिनिषेधः । न च तथापि वार्तिकमते साक्षिणः स्वप्रकाशतया सर्वदा भानस्यानपलापात् तद्बलाच्छुद्धस्मृतिरवान्त-रवाक्यस्थपदैः स्यादेवेति वाच्यम् । जन्यानिर्विकल्पक विना तत्मू-क्ष्मावस्थारूपसंस्कारजस्मृत्यसम्भवादित्यत आह—अद्वितीयेति ।

नारायणी ।

ननूत्थितस्य तादृशप्रत्ययो न स्मृतिः साक्षिणोऽव्यवधानेनोत्थान-कालस्यानुभवकालत्वात् । अत एवोक्तं वार्तिके—

न सुषुप्तिगविज्ञानं नाज्ञासिषमिति स्मृतिः ।
कालाद्यव्यवधानत्वान्न ह्यात्मस्थमतीतभाक् ॥ इति ।

तथाच तादृशस्मृत्यन्यथानुपपत्या सुषुप्तावनुभवायोगात् उत्थानका-ले च सर्वानुस्यूतरूपेणैव साक्षिणो भानादनुपहितरूपेण भानाभावात्कथं पदैः स्मृतिसंभव(१)स्तत्राह—अद्वितीयेति । अथवा नन्वेवं शुद्धयोरपूर्वत्वभ-

(१) कथं वा पदानां शक्यसम्बन्धरूपः शक्तिग्रहस्तत्राह अद्वितीयेति । सजातीय-विजातीयस्वगतभेदशून्यब्रह्मणः । इत्याधिकः पाठः खपुस्तके ।

षया प्रवृत्तानां सत्यज्ञानादिपदानामुपाधिविशिष्टचैतन्ये शक्तत्वेऽपि चैतन्यमात्रे तात्पर्येण तत्रैव तदंशे एव संस्कारोद्बोधाच्च।

इच्छन्ति ह्याकाशादिपदादपि निर्विकल्पकं स्मर-

न्यायरत्नावली।

शुद्धेत्यर्थः। विजिज्ञापयिषया-प्रमार्थम्। उपाधीति। सत्यत्वादीत्यर्थः। शक्तत्वेऽपि-शक्ततया ज्ञातत्वेऽपि। चैतन्यमात्रे-शुद्धचैतन्ये। तात्पर्येण-तात्पर्यनिश्चयेन। तदंशे-शुद्धचिद्रूपे, विशिष्टस्यांशे। संस्कारोद्बोधात्-स्मृतिरूपकार्यजनने संस्कारस्य सहकारित्वकल्पनात्। सत्यज्ञानादिपदानामित्यनुषज्यते। तथा च विशिष्टस्यैव पूर्वमनुभूतत्वेन संस्कारसत्त्वेऽपि सत्यादिवाक्ये शुद्धब्रह्मतात्पर्यानुरोधेन तस्य संस्कारस्य सत्यादिपदज्ञानसहकृतशुद्धस्मृतिहेतुत्वं कल्प्यत इति भावः।

ननु पदपदार्थयोः वृत्तिज्ञानजन्या पदार्थोपस्थितिरेवान्वयबोधे हेतुः, सत्यादिपदस्य शुद्धे लक्षणारूपवृत्तिज्ञानं न सम्भवति, शुद्धस्य पूर्वमज्ञानात् अत आह-इच्छन्तीति। मणिकारादय इति

न्यायरत्नावली।

ङ्गप्रसङ्गः, सौषुप्तप्रत्यक्षेण ग्रहादत आह—अद्वितीयेति। अद्वितीयब्रह्मविजिज्ञापयिषया-न विशेषेणाखण्डसच्चिदात्मना ज्ञापयितुमिच्छया, प्रमार्थमिति यावत्। प्रवृत्तानां किं तत् ब्रह्मेत्याकाङ्क्षापरिपूरकत्वेन पठितानाम्, सत्यादिपदानां--सत्यज्ञानानन्तविज्ञानमयादिपदानाम्। उपाधिविशिष्टचैतन्ये शक्तत्वेपि--पदस्वाभाव्यादिना सत्यत्वादिधर्मविशिष्टचैतन्ये कल्प्यमानशक्तिमत्त्वेऽपि, चैतन्यमात्रे--अनुपहितचैतन्ये तात्पर्येण, तदंश एव--विशिष्टस्यांशे विशेष्ये शुद्ध एव, संस्कारोद्बोधाच्च--संस्कारोद्बोधकत्वाच्च। सत्यादिपदानामिति शेषः। सत्यत्वादिविशिष्टविषयकशक्त्यनुभवजनितसंस्कारस्यैव धर्मांशमोषेण शुद्धस्मृतिहेतुत्वं कल्प्यते तात्पर्यानुगृहीतसत्यादिपदज्ञानरूपोद्बोधवत्त्वादिति यावत्।

विशिष्टसंस्कारात् शुद्धस्मृतिस्तार्किकाणामपि सम्मतेत्याह-इच्छन्तीति।

न्यायरत्नावली।

शेषः। शक्तिवादे हि मणावुक्तम्-"आकाशादिपदस्य शब्दाश्रयत्वादिविशिष्टे न शक्तिः, कदाचिदष्टद्रव्यान्यद्रव्यत्वरूपेणाप्याकाशादिपदाच्छाब्दबोधोत्पत्तेः तद्विशिष्टेऽपि शक्त्यापत्तेरेकस्यामाकाशादिव्यक्तौ केवलायामेव शक्तिसम्भवात्(१) शक्त्यनुगमार्थमेव किञ्चिद्धर्मविशिष्टे शक्तिस्वीकारात्। न च शुद्धे शक्तिज्ञानात्स्मृतौ सत्यां शुद्धस्यैव शाब्दबोधः स्यात्, न तु शब्दाश्रयत्वादिविशिष्टस्येति वाच्यम्। यद्यपि शब्दाश्रयत्वाद्यंशे न शक्तिर्गृह्यते,

नारायणी।

तार्किका अपीति शेषः। आकाशादिपदादपि-आकाशः शब्दाश्रय इत्यत्राकाशपदादपि, निर्विकल्पकं स्मरणम्। अन्यथा तत्र शब्दाश्रयः शब्दाश्रय इति पौनरुक्त्या शाब्दबोधानुपपत्तेः। अतः आकाशपदस्य यद्यपि शब्दाश्रयत्वविशिष्टे शक्तिस्तथापि तत्र(२)मोषात् शुद्धस्यैव स्मृति-

(१) अत्र गपुस्तके 'सम्भवाच्च' इति पाठः।

(२)—तत्र शब्दाश्रयत्वांशे मोषात् शुद्धस्यैव स्मृतिरङ्गीक्रियते प्रतीत्यनुसारात्। आदिना रामरावणादिपदेभ्योपि प्रमेयत्वरूपेणानुभवजनितसंस्कारसचिवैर्मोषादिबलतो रामरावणादीनां शुद्धरूपेण स्मृतिः स्पष्टैवेति ज्ञापितम्। अपिनेतरबाधादितर्केभ्योपि शुद्धस्य स्मृतिर्ज्ञापिता। इत्थं च प्रकृतेपि विशिष्टघटकचिदंशस्य शक्त्यैवोपस्थितौ निषेधवाक्यादिना द्वैतत्वावच्छिन्नं मिथ्येति बोधिते तर्कादपि शुद्धोपस्थितौ पदानां भागत्यागवृत्तिः सुकरेति भावः। उभयमते तादृशकल्पनायां बीजं कण्ठरवेणाह—तात्पर्याधीनत्वादिति। तात्पर्यविषयप्रमानुसारियथासम्भवकल्पनाविषयत्वात्। शब्दवृत्तेः बोधानुकूलसामर्थ्यरूपशब्दवृत्तेः। शक्तिलक्षणान्यतररूपशब्दस्य चेत्यर्थः। तथा च दृष्टान्ते यदा शुद्धस्याकाशविशेष्यकशब्दाश्रयत्वप्रकारकशाब्दबोधे तात्पर्यं तदा विशिष्टशक्तस्यापि पदस्योक्तप्रकारेण शुद्धस्मृतौ सामर्थ्यं कल्प्यते, यदा त्वाकाशपदस्य अष्टद्रव्यातिरिक्तद्रव्यत्वादिना बोधे तात्पर्यं तदा लक्षणा। एवं दार्ष्टान्तिके यदा पुरुष 'एकधैवानुद्रष्टव्य'मिति श्रुत्यनुसार्युक्तोपधायकनिर्विकल्पकबोधे तात्पर्यं तदा सर्वपदानामुक्तप्रकारेण शुद्धस्मृतौ सामर्थ्यं शुद्धे भागत्यागलक्षणा च, यदा तु न तादृशबोधे तात्पर्यं तदा तत्तत्पदबोध्यत्वादिनैव लाक्षणिकान्वयबोधसम्भवान्न मोषादिकल्पनेति भावः।

अथवा ननु तर्हि लक्षणेति प्रवादो व्यर्थः शक्त्या मोषेणैव स्मृत्युपपत्तेः इति चेदिष्टापत्तिरेवेत्याभिप्रेत्याह—तात्पर्याधीनत्वादिति। इति पाठः खपुस्तके।

णम् । तात्पर्याधीनत्वाच्छब्दवृत्तेः ।

न्यायरत्नावली ।

तथापि शब्दाश्रयत्वेनोपस्थिताकाशव्यक्तौ शक्तिग्रहस्यैव शब्दाश्रयत्वादिविशिष्टविषयकस्मृतिहेतुत्वसम्भवेन विशिष्टविषयकस्मृतिहेतुकशाब्दबोधसम्भवात् । अथवा आकाशादिपदान्निर्विकल्पकमेव स्मरणमास्ताम् । ततः शुद्धाकाशस्यैव सुबर्थोपरागेण शाब्दबोधे भानसम्भवात् । निर्धर्मितावच्छेदकशाब्दबोधास्वीकारेऽपि आकाशमस्तीत्यादवाक्यादेकमस्तीत्याकारक, आस्तित्वाश्रयत्वमेकवृत्तीत्याकारके वा शाब्दबोधे बाधकाभावा"दिति । तदत्र कल्पद्वये मणिकारोक्तेऽपि(१) आद्ये शब्दाश्रयत्वाद्यंशे शक्त्यग्रहात्तद्विशिष्टस्य स्मृत्या शाब्दबोधासम्भवः । यदंशे वृत्तिः पूर्वं ज्ञायते, तत्स्मृतेरेव शाब्दबोधजनकत्वात् । द्वितीये शुद्धस्य पूर्वाननुभूतत्वेन स्मृत्यसम्भवः । तथापि तत्कल्पनेव मन्मतेऽपि युक्तं (२)पूर्वोक्तकल्पनमिति भावः । (३)अत्रापिशब्दस्य स्मरणमित्यस्योत्तरं योजनया उक्ताद्यकल्पमिच्छन्तीत्यपि लभ्यते ।

ननु तदप्यनुपपन्नमेवेत्यत आह-तात्पर्याधीनत्वादिति । तात्पर्यविषयवाक्यार्थप्रमानिर्वाहकयथासम्भवकल्पनाविषयत्वात् । शब्दवृत्तेः-शब्दार्थसम्बन्धरूपशक्त्यादिज्ञानस्य । तथा च तात्पर्य-

नारायणी ।

रङ्गीक्रियते प्रतीत्यनुसारादिति यथा तथाऽस्मन्मतेपीति भावः । अपि शब्दादेकरूपेणानुभवसंस्कारतोऽन्यरूपेण स्मृतिर्मोषादिना रामरावणादिपदेभ्यः स्पष्टैव ज्ञाप्यत इति दिक् ।

उभयमते तादृशकल्पनायां बीजं कण्ठरवेणाह--तात्पर्येति । वृत्तेः-प्रवृत्तेः । बोधानुकूलसामर्थ्यस्येति यावत् । अथवा ननु तर्हि कथं लक्षणेति प्रघाहः शक्त्या मोषेणैव स्मृत्युपपत्तेरित्याह—तात्पर्येति । तात्पर्यगोचर-

(१) अपि शब्दो नास्ति घपुस्तके ।

(२) पूर्वोक्तेति । विशिष्टसंस्कारस्य शुद्धस्मृतिहेतुत्वमिति ।

(३) अत्रापीति । मूलस्थस्य आकाशादिपदादपीत्यपिशब्दस्येत्यर्थः ।

नारायणी ।

प्रमानुसारिकल्पनाविषयत्वात्, शब्दवृत्तेः-शब्दसम्बन्धस्य शक्तिलक्षणान्यतरसम्बन्धस्य(१) अत्रान्वयप्रतियोग्युपस्थितेरेव लक्षणात्वाङ्गीकारादिति भावः । तदुक्तम्—

(१) अत्रायमधिकःपाठः खपुस्तके । अयं भावः । यत्र शुद्धबोधे एव तात्पर्यं तत्र व्यक्तावेव शक्तिरङ्गीक्रियते न विशिष्टे, केवलोपस्थितेरेवापेक्षितत्वात् । यत्र तु विशिष्टान्वयबोधे तात्पर्यं तत्र तु विशिष्टे एव शक्तिः, यदंशे वृत्तिग्रहः तदंशस्यैव स्मृतीतिरिति नियमात् ।

ननु विशिष्टबोधादपि यत्प्रकारकः शाब्दबोधः तदंशेऽनतिप्रसक्तत्वरूपावच्छेदकत्वावगाहित्वेनोपलक्षितवृत्तिज्ञानस्य हेतुत्वाङ्गीकारे घटादिपदादप्यनतिप्रसक्तघटत्वादेरेवोपस्थितिसम्भवात् अतिप्रसक्तानां द्रव्यादीनां च बोधसम्भवात् तद्धिया विशिष्टे वृत्त्यङ्गीकारो निरर्थक इति चेत्, कानो हानिः ? उपलक्षणतया व्यवच्छेदकस्य कथितप्रकारेण शाब्दबोधे भानसम्भवात्, तात्पर्यकृतमोषाभावोपपत्तेश्च । यदि तु शक्यतावच्छेदकविशिष्टे एव शक्तिरिति नियमः विशिष्टज्ञानस्यौत्सर्गिकत्वात्, तदापि न हानिः; मतान्तरेपि यथाकथञ्चिदन्वयप्रतियोग्युपस्थितेरेव शाब्दबोधे हेतुत्वात् । तत्रान्वयप्रतियोग्युपस्थितेरेव लक्षणात्वमङ्गीकृत्य निर्वाहात्। तदुक्तम्—

स्मृतिरन्वयिनो या हि शक्त्याद्यन्येन रूपतः ।
लक्षणा गदिता सा हि वृद्धतार्किकसम्मता ॥

इति यथा तथा अन्यत्र शक्यसम्बन्धस्यैव लक्षणात्वेप्यत्र शक्याद्यन्येन रूपेणोपस्थितिरूपैव लक्षणाऽङ्गीक्रियते, महावाक्यार्थप्रमित्यनुसारात् । लक्षणयेत्यस्य तु मोषेणेत्यर्थ इति दिक् । लक्षणापदमपि लाक्षिणिकमिति यावत् ।

अथवा पदजन्यवृत्त्या पदजन्यपदार्थोपस्थितिर्वाक्यार्थबोधहेतुरिति तार्किकनियममाश्रित्य तथोक्तम्, तथाच शक्यसम्बन्धस्य लक्षणात्वेपि न हानिः । विशिष्टघटके चिदंशे शुद्धविशिष्टसम्बन्धिनि मोषेणोपस्थिते भागत्यागस्य सुकरत्वेन तेनैवोपस्थितौ शाब्दबोधासम्भवात् । एतेन विशेषणयोरन्वयेपि 'गेहे घटोस्ति, नीलोयं घटः' इत्यादाविव विशेष्ययोरन्वये बाधकाभावान्न लक्षणेति प्रवादो व्यर्थ इति वदतां प्रलापोपि निरस्तः, परिभाषामात्रभेदात् । अन्वयप्रतियोगिमात्रपदार्थमात्रवृत्त्योपस्थित्यङ्गीकारात् । विशेष्ये बाधेन विशेषणान्वये गौर्नित्येत्यादौ लक्षणाभावप्रसङ्गाच्च । न च निराकाङ्क्षत्वात्तल्लक्षणा न विशेष्य यथा गौरानित्येत्यादाविति वाच्यम् । गोत्वादिविशिष्टेऽनित्यत्वान्वये गोत्वस्यापि तत्प्रसङ्गात् तदुपलक्षित एव वाच्यः तथाच लब्धपदैव लक्षणेति सङ्क्षेपः । महावाक्यार्थबोधो न निर्विकल्पकः किन्तु त्रिपुटीरूप एव, ज्ञानस्य सर्वत्र तथावगमात् । 'तमेव विदित्वे' त्यादिश्रुतौ तु प्रकृतित्रितयान्यविषयस्यैव व्यवच्छेदो नैयायिकानामिव, तं विदित्वैवेत्येवकारव्यत्यासो वेति वदतां प्राभाकराणां मतमतिदेशेन निराकरोति—एतेनेति ।

न्यायरत्नावली।

निर्वाहाय प्रथमकल्पो लाघवेन युक्त एव। अत एव सर्वेषां पदानां नवीनैस्तथा कल्प्यते। लक्ष्यतावच्छेदके लक्षणाया इव शक्यतावच्छेदके शक्तेर्ग्रहानुपयोगात्। न च लक्ष्यतावच्छेदकेऽपि लक्षणा गृह्यत एव, तीरसम्बन्धिप्रवाहशक्तं गङ्गापदमिति ज्ञानस्यैव तत्त्वात्, तीरसम्बन्धित्वस्यैव तीरत्वलक्षणात्वात्। लक्षणासम्बन्धेन लक्ष्यप्रकारकस्यैव हेतुत्वस्वीकारेऽपि उक्तज्ञानस्य समानविषयतया स्वाश्रयसम्बन्धप्रवाहशक्तत्वसम्बन्धेन गङ्गापदं तीरत्वप्रकारकत्वसम्भवाच्च। तथा च लक्ष्यतावच्छेदक इत्यादिदृष्टान्ताश्चिरोमण्युक्तोऽसिद्ध इति वाच्यम्। उक्तशक्तत्वसम्बन्धेन तीरत्वविशिष्टमित्याकारकत्वस्यानुमित्यादिरूपे तीरलक्षणाज्ञानेऽसम्भवात्, जातिशक्तिज्ञानात् व्यक्तिशाब्दधीस्वीकारात्, यदंशे वृत्तिरित्याद्युक्तनियमस्य गौरवपराहतत्वाच्च। द्वितीयकल्पोऽपि युक्तः। विशिष्टविषयकशक्त्यनुभवजन्यसंस्कारस्य पदज्ञानसहकृतस्य तात्पर्यानुरोधेन शुद्धविषयकस्मृतिहेतुत्वसम्भवात्। अत एव प्रमेयवदनुभवजन्यसंस्कारस्य शुद्धदशरथत्वादिजातिविशिष्टांश एवोद्बोधकं प्रकल्प्य स्मृते तस्मिन् दशरथादिपदशक्तिग्रहः। अन्यथा शुद्धदशरथत्वादिजातेर्दशरथादिपदेनानुपस्थित्या तात्पर्यविषयशाब्दबोधे तद्विशिष्टस्य भानासम्भवादिति वदन्ति। एवं मन्मतेऽपि विशिष्टशक्तिविषयकस्य सत्यादिपदज्ञानसहकृतविशिष्टसंस्कारस्य तात्पर्यानुरोधेन शुद्धस्मृतिहेतुत्वं कल्प्यते। न चैवं लक्षणया शुद्धबोध इति सिद्धान्तविरोध इति वाच्यम्। विशिष्टशक्तेर्विशिष्टशाब्दबोधप्रयोजकत्वस्य औत्सर्गिकस्य त्यागेन विशेष्यमात्रशाब्दबोधप्रयो-

नारायणी।

अन्वयप्रतियोगिनो या स्यात्स्मृतिः सा निगद्यते।
लक्षणा न तु शक्यस्याशक्ये वृत्तिरिहोच्यते॥ इति।

तथा च अन्यत्र शक्यसम्बन्धस्यैव लक्षणात्वेपि अत्र शक्यादन्येन रूपे-

एतेन प्रमितिप्रमात्रोर्महावाक्यार्थबोधे भानमपा-

न्यायरत्नावली ।

जकतायां लक्षणाशब्देन गौण्या वृत्त्या शास्त्रे व्यवहारात् । प्राचीनतार्किकमीमांसकमतयोरिव मन्मते शक्यसम्बन्धरूपलक्षणाज्ञानस्य शाब्दबोधाहेतुत्वेन शक्तिज्ञानप्रयोज्यत्वेन शक्यसम्बन्ध्युपस्थितेर्लक्षणात्वेन तत्स्वरूपस्यैव शाब्दबोधहेतुत्वेनोक्तसिद्धान्ताविरोधाच्च ।

एतेन-तात्पर्यानुरोधतो महावाक्यजन्यज्ञानस्य शुद्धं ब्रह्मैव विषयो नान्यदिति स्वीकारेण । भानं-प्राभाकरसम्मतं विषयत्वम् । मणिकारोक्तप्राभाकरनव्यमते हि सर्वज्ञानेषु स्वं स्वाश्रयश्च विषय इति स्वीक्रियते । प्राचीनप्राभाकरमते तु प्रमाया विषयत्वं न प्रमितिप्रमात्रोः स्वीक्रियते । प्रमायास्तादात्म्यसमवायाभ्यामेव तयोर्व्यवहारसम्भवात् । ननु 'तमेव विदित्वातिमृत्युमेती' त्यादिश्रुत्याद्यालोचनेन शुद्धब्रह्मान्यो महावाक्यजन्यज्ञाने विषयो नेति निर्णीयते, तथापि प्रमितिप्रमात्रोर्विषयत्वमेव, तदन्यस्यासाधारणस्य विषयस्यैव तथा निर्णयात् , भवत्सिद्धान्तेऽपि हि प्रमितिप्रमात्रोर्महावाक्यार्थबोधकाले साक्षिणा भाने बाधकाभावः, तथा च प्राभाकरमते नित्यसाक्ष्यसम्भवात् सर्वज्ञानानां मितिमातृविषयकत्वं युक्तमेव, सुषुप्त्यन्यकाले हि सदा मितिमातृमेयरूपा त्रिपुटी मत-

नारायणी ।

णोपस्थितिरूपैव लक्षणाऽङ्गीक्रियते महावाक्यार्थप्रमानुसारात् । लक्षणयेत्यस्य तु मोषेणेत्यर्थ इति दिक् ।

एतेन—निरुक्ततात्पर्यबलतो निर्विकल्पकबोधाङ्गीकारेण, प्रमितिप्रमात्रोः-प्रमितिप्रमाश्रययोः भानम् । सर्वस्यैव ज्ञानस्य घटत्वेन घटं जानामीत्याद्यनुव्यवसायरूपत्वात्प्रकृतेप्यात्मत्वेनात्मानं जानामीति सम्भाविते प्रत्यये प्रमेयस्येवावश्यकं प्रभाकरसंमतं विषयत्वमपास्तम्, कर्तृकर्मविरोधेन स्वविषयत्वस्य बाधादाश्रयभानस्याप्ययोगात्सर्वत्र त्रिपुटीवादस्याप्रमाणिकत्वादिति भावः । श्रुतिस्मृतियोगशास्त्रादिषु सविकल्पकनिर्विकल्पकभेदेन समाधिद्वैविध्यस्योक्तेरपि मुक्तिजनकात्मसाक्षात्कार-

स्तम् । असम्प्रज्ञातसमाधेः श्रुतिस्मृतिसिद्धत्वाच्चेति ।

न्यायरत्नावली ।

द्वयेऽपि भासते, तत्राह–असम्प्रज्ञातेति । सर्ववृत्तिशून्यनिरुद्धमनोरूपेत्यर्थः । श्रुतिस्मृतिसिद्धत्वादिति । मैत्रायणीयशाखादौ हि श्रूयते—

लयविक्षेपरहितं मनः कृत्वा सुनिश्चलम् ।
यदा यात्यमनीभावं तदा तत्परमं पदम् ॥
तावन्मनो निरोद्धव्यं हृदि यावद्गतक्षयम् ।
एतज्ज्ञानं च मोक्षश्च शेषास्तु ग्रन्थविस्तराः ॥
समाधिनिर्धूतमलस्य चेतसो निवेशितस्यात्मनि यत्सुखं भवेत् ।
न शक्यते वर्णयितुं गिरा तदा स्वयं तदन्तःकरणेन गृह्यते ॥
अपामापोऽग्निरग्नौ च व्योम्नि व्योम न लक्षयेत् ।
एवमन्तर्गतं यस्य मनस्स परिमुच्यते ॥
मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धाय विषयासक्तं मोक्षे निर्विषयं स्मृतम् ॥ इति ॥

अत्र भाष्यं–'लयो निद्रा, विक्षेपो विषयस्मृत्यादिः । अमनीभावः मनःप्रवेशकृतविशेषस्यात्मनि त्यागः तम् यदा याति

नारायणी ।

स्य निर्विकल्पत्वमेवेत्याह—असम्प्रज्ञातेति । निर्विकल्पकसमाधेरित्यर्थः । श्रुतीति । उपलक्षणमेतद्योगसूत्राणामपि । सिद्धत्वात्–प्रमितत्वात् । तथा च श्रुतिः—

यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह ।
बुद्धिश्च न विचेष्टति तामाहुः परमां गतिम् ॥
अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ ।

इत्यादिका । स्मृतिश्च—

यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥

इत्यादिका । सूत्राणि तु–'योगश्चित्तवृत्तिनिरोधः' । 'तदा द्रष्टुः स्वरूपे-

तदा परमं पदं याति । न(१)पुनरावृत्तिप्राप्तिरस्येत्यर्थः । हृदि हृदयसाक्षिणि । गतः प्राप्तः क्षयो विनाशो येन तत्तथा । तथा च सूक्ष्मावस्थारूपस्य मनस आवृतत्वात् अमनीभावे केवलसाक्षिभानं समाधाविति भावः । तस्य परमसुखव्यञ्जकत्वमाह-समाधीति । अन्तःकरणेन शुद्धसत्त्वेन निरुद्धेन गृह्यते व्यज्यते । यद्वा अन्तः-करणावस्थाविशेषवशात् साक्षिणा स्वयं गृह्यते स्वप्रकाशतया त-द्भातीति । अपाम् अप्सु आपः क्षिप्ता इत्यध्याहारः । अग्निरग्नौ निक्षिप्त इत्यनुषङ्गः । व्योम घटाद्याकाशम् । एवमिति । तथा च निरुद्धं सत् न्यग्भूतं भवती' ति । असम्प्रज्ञातसमाधिकाले साक्षि-स्वरूपं ब्रह्मैव भातीत्यर्थः । एवं कठवल्लीषु श्रूयते—

यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह ।
बुद्धिश्च न विचेष्टति तामाहुः परमां गतिम् ॥
अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ ।

ज्ञानानि ज्ञानेन्द्रियाणि मनोबुद्धिश्च न विचेष्टति वृत्तिरूपेण नपरिणमते । अप्रमत्तः द्वैतभानरूपप्रमादशून्यः । प्रभवाप्ययौ-(२)पुण्यहेतुः पापनाशकश्च । निरुद्धस्य मनसोऽपि न्यग्भावेन सा-क्षिभास्यत्वाभावात् । सौषुप्तलयावस्थाया इव निरुद्धावस्थाया अप्यावृतत्वेन न्यग्भाव इति भावः । तथा च व्याख्यातम्-

यदा विनियतं चित्तमात्मन्येवावतिष्ठते ।

इत्यादि गीताश्लोके सरस्वतीभिः । विनियतं सर्ववृत्तिशून्य-तया निरुद्धम् । आत्मन्येवावतिष्ठते चितेरेव प्राधान्यात् न्यग्भूतं भवतीति । स्मर्यते च गीतायाम्-

यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥

(१) न पुनरप्राप्तप्राप्तिरित्यर्थः इति पाठो घपुस्तके ।

(२) गपुस्तके प्रभवाप्ययाविति प्रतीको न दृश्यते ।

न्यायरत्नावली ।

सुखमात्यन्तिकं यत्र बुद्धिग्राह्यमतीन्द्रियम् ।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥
यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।
यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यते ॥
तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम् ।
स निश्चयेन योक्तव्यो योगो निर्विण्णचेतसा ॥

योगसेवया असम्प्रज्ञातसमाधिरूपयोगाभ्यासेन । यत्र यस्मिन् मनःपरिणामे जाते सति चित्तं निरुद्धं सर्ववृत्तिशून्यं सदुपरमते कमपि विषयं न गृह्णाति, विषयाकारपरिणामाभावे च सुषुप्तिवत् सूक्ष्मावस्थं मन इति भावः । यत्र च मनःपरिणामे सति आत्मना शुद्धसत्त्वेन मनसैव व्यञ्जकेन आत्मानं ब्रह्माभिन्नसाक्षिणमेव पश्यन् पुरुषः आत्मन्येव तुष्यति, द्वैतभानप्रयुक्तानन्दाल्पतारहितः तं परिणामं योगसंज्ञितं विद्यात् । निरुद्धेन मनसा ब्रह्मैव भाति, न तदन्यत् । मनसोऽपि न्यग्भावेनावृतत्वादिति भावः । आत्मन्येव तोषमुपपादयति—यत्र मनः परिणामे सति । आत्यन्तिकं सर्वसुखेभ्य उत्कृष्टं सुखं वेत्ति । विषयसुखाद्विनत्ति—अतीन्द्रियं विषयेन्द्रिययोगाजन्यम् । सौषुप्तसुखाद्विनत्ति—बुद्धिग्राह्यं निरुद्धमनोऽभिव्यक्तम् , सुषुप्तौ तु मनो न व्यञ्जकम् , लीनत्वात् । तदुक्तं गौडपादैः—

लीयते तु सुषुप्तौ तन्निरुद्धं नैव लीयते । इति ।

आत्यन्तिकत्वे हेतुमाह—यस्मिन् परिणामे स्थितो योगी तत्त्वतो ब्रह्माभिन्नस्वरूपात्परमार्थान्न चलति, द्वैतभानाभावात् । तथा च पातञ्जलसूत्राणि—'योगश्चित्तवृत्तिनिरोधः । तदा द्रष्टुः स्वरूपेऽवस्थानम् । वृत्तिसारूप्यमितरत्र' । इति । तदा सकलचित्तवृत्तिनिरोधकाले द्रष्टुः दृग्रूपस्य पुरुषस्य स्वरूप एव अवस्थानम् ,

न्यायरत्नावली।

न तु बुद्धिवृत्तौ प्रतिबिम्बितत्वम्। इतरत्र कालान्तरे तु वृत्तिसारूप्यं बुद्धिवृत्तिप्रतिबिम्बितत्वम्, द्वैतभानं विषयवासना च आत्यन्तिकसुखानाभिव्यक्तौ प्रयोजकम्। तत्राद्यं तत्त्वतो न चलतीत्यनेन द्वितीयम् अयमित्यनेन निर्वासनबोधकेन निरस्तम्। एतस्यासम्प्रज्ञातसमाधेरावश्यकतामाह-यं परिणामं लब्ध्वा अवस्थितः अपरं श्रवणादिभिन्नं लाभं महावाक्यार्थधीप्रयोजकं शास्त्रेण नाधिकं मन्यते। तस्यैव शुद्धत्वम्पदार्थसाक्षात्कारद्वारा महावाक्यार्थधीप्रयोजकत्वात्। अधिकमित्यनेन देहाद्यधिष्ठानतया आत्मज्ञानस्य निरोधसमाधिकारितया तत्तुल्यत्वं ज्ञापितम्। उक्तं च तयोस्तुल्यत्वं वासिष्ठे गीताटीकायां च। तत्र वासिष्ठम्—

द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघव!।
योगस्तद्वृत्तिरोधश्च ज्ञानं सम्यगवेक्षणम्॥
असाध्यः कस्यचिद्योगः कस्यचित्तत्त्वनिश्चयः। इति।

चित्तनाशस्य चित्तादर्शनप्रयुक्तस्य शुद्धात्मदर्शनस्य। क्रमौ साधनानुष्ठानक्रमेण क्रियमाणावुपायौ। गीताटीकायां तु—

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।

इति पद्ये तथोक्तम्।

ननु, देहाद्यधिष्ठानतयाऽऽत्मज्ञानं कथं शुद्धात्मसाक्षात्कारं प्रति हेतुः, तस्याप्रमाणत्वादिति चेत्। उच्यते। तादृशविवेकज्ञानोत्तरं देहादीनां हेयतया केवलात्मन एव जिज्ञास्यत्वात्। तेनैव प्रतिबन्धादहङ्काराद्यभाने साक्षिमात्रविषयकसौषुप्तवृत्तिरिवाविद्यावृत्तिविशेषरूपः तादृशविवेकज्ञानोत्तरं त्वम्पदार्थशोधकवाक्यस्मृत्या मनोवृत्तिरूपो वा शुद्धात्मसाक्षात्कारः। एवं निरोधस्थलेऽपि तत्साक्षात्कारः। महावाक्यार्थसाक्षात्कारोत्तरमपि तदावश्यकतायामाह-यस्मिन् स्थित इत्यादि। गुरुणा तत्त्वदर्शनानाश्रमभुज्य-

न्यायरत्नावली ।

मानकर्मजन्येन । प्रारब्धकर्मापेक्षयाऽपि समाधेर्बलवत्त्वेन तन्नाशकतया दुःखं नोत्पद्यत एव । अत एवाणिमाण्डव्यादीनां समाधिस्थानां चोरबुद्ध्या शूलाग्रपातितानामपि न दुःखमुत्पन्नम् । प्रत्युत समाधिमाहात्म्येन तदपेक्षयाप्युत्कृष्टतेति महाभारतादावुक्तमिति भावः । तथा च सम्प्रज्ञातसमाधिपाटवेनासम्प्रज्ञातसमाधिलाभः । सम्प्रज्ञातसमाधिस्तु मनोदेहादिभिन्नतया साक्षिणो ज्ञानप्रवाहरूपः । 'ब्रह्मास्मी'ति शाब्दज्ञानोत्तरं तु तादृशधीप्रवाहरूप एव । असम्प्रज्ञातसमाधिस्तु सकलवृत्तिशून्यनिरोधरूपेण परिणतमावृतं मन एव । वेदान्तसारादौ तु 'निरोधरूपेण परिणामोऽपि असम्प्रज्ञातः, स केवलात्माकारवृत्तिरूपः, मनोवृत्तिभानाभावे समानेऽपि मनोवृत्तिसत्त्वासत्त्वाभ्यामसम्प्रज्ञातसमाधिसुषुप्त्योर्भेदादि'त्युक्तम् । तन्न । 'मोक्षे निर्विषयं स्मृतम्, यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह, तद्यच्छेच्छान्त आत्मनी'ति श्रुतीनामुक्तसूत्राणां च विरोधात् । सर्वथा प्रमात्रादिभानशून्यस्यासम्प्रज्ञातसमाधेरावश्यकत्वात्, सुषुप्तिभिन्नसर्वकाले प्रमात्रादिभानमिति स्वीकारासम्भवात्, भिन्नविषयकानुमित्यादिसामग्रीरूपप्रतिबन्धककालीनघटादिमात्रप्रत्यक्षे व्यभिचारेण सुषुप्तिसमाधिभिन्नसर्वकाले प्रमादिभानमित्यस्याप्यसम्भवात्, प्रमात्राद्यविषयके महावाक्यार्थबोधे बाधकाभाव इति भावः । अथवा अवान्तरवाक्यार्थानुभवकारणपदार्थस्मृतौ सौषुप्तानुभवः कारणमिति सुषुप्तावित्यादिनोक्तम् । वार्तिकमते सौषुप्तजन्यानुभवास्वीकारात्, तन्मतेऽद्वितीयब्रह्मविजिज्ञापयिषयेत्यादिना शुद्धतात्पर्यज्ञानसहकृतस्य विशिष्टविषयकसंस्कारस्यैव शुद्धविषयकस्मृतिहेतुत्वमुक्तम् । इदानीम् असम्प्रज्ञातसमाधेरपि तादृशस्मृतिहेतुत्वं सम्भवतीत्याशयेनाह-असंप्रज्ञातेति । न च नियामकाभावेन न तस्य शुद्धचिद्विषयकत्वसम्भव इति वाच्यम् । सम्प्रज्ञातसमाधिपाटवस्यैव

न्यायरत्नावली ।

अनात्माकारसर्ववृत्तिनिरोधेच्छासहितस्य तादृशनिरोधहेतुत्वात् 'समाधिनिर्धूतमलस्य चेतस' इत्यादिश्रुत्या 'आत्मसंस्थं मनः कृत्वे'त्यादिस्मृत्या च तथा प्रत्ययात्, निरोधविवेकज्ञानयोः पश्चात्केवलात्मसाक्षात्कारस्य पूर्वोक्तस्य कल्पनापेक्षया तयोरेव तत्साक्षात्कारत्वकल्पनस्य युक्तत्वात्, केवलात्मजिज्ञासासहितस्य विवेकज्ञानहेतोरेव विवेकोपलक्षितशुद्धात्मसाक्षात्कारहेतुत्वसम्भवात् । 'मोक्षे निर्विषयं स्मृतम्' इत्यादिश्रुतिस्तु असंप्रज्ञातसमाधेः आत्मान्याविषयकत्वबोधिका । एवं योगसूत्राण्यपि बोध्यानि । अत एवोक्तं संक्षेपशारीरके--

आत्मानात्माकारं स्वभावतोऽवस्थितं यदा चित्तम् ।
आत्मैकाकारतया तिरस्कृतानात्मदृष्टि विदधीत ॥ इति ।

न चैवं निरोधस्य संप्रज्ञातसमाधितो विशेषानुपपत्तिरिति वाच्यम् । निरोधरूपपरिणामविशेषत्वप्रमाणाजन्यत्वाभ्यां ततो विशेषात् । अस्मिन् पक्षे निरोधस्यैव वाक्यगतपदार्थस्मृतिहेतुत्वानुभवत्वेन निरोधस्य वाक्यजन्यत्वेन प्रमाणाजन्यता । तस्मादात्मविषयकनिरोधपरिणामस्य सूक्ष्मावस्थारूपसंस्कारद्वारा शुद्धस्मृतिहेतुत्वं निर्दोषम् । गीताटीकायान्तु निरोधसमाधिरूपस्य योगस्य पुण्यविशेषद्वारा यथार्थप्रत्यक्षहेतुत्वात् परमार्थभूतात्ममात्रप्रत्यक्षहेतुता । उक्तं हि पतञ्जलिना-'निर्विचारवैशारद्येऽध्यात्मप्रसादः । ऋतम्भरा तत्र प्रज्ञा । श्रुतानुमानाभ्यामन्यविषया विशेषार्थत्वादिति । निर्विचारः सूक्ष्मवस्तुविषयकनिर्विकल्पकसमाधिः, तस्य वैशारद्ये पाटवे सति अध्यात्मप्रसादः अत्यन्तसत्त्वोद्रेको भवति । ततः ऋतम्भरा सत्यमेव गृह्णती प्रज्ञा जायते । सा च शब्दानुमानविषयाभ्यामन्यविषया । शब्दानुमानग्रहणायोग्यविशेषविषयत्वात् । अत्र शब्दस्य विषयः तच्छक्तया ग्राह्यः । तेन ब्रह्मणः श्र-

(१)पारोक्ष्यसद्वितीयत्वाभ्यां च न तत्त्वम्पदार्थमात्रानु-

न्यायरत्नावली।

ल्लक्ष्यत्वेऽपि न क्षतिरिति तदर्थः। तथा च योगजधर्मजन्यप्रत्यक्षमेवेदान्तरवाक्यस्य पदजन्यस्मृतिमूलमित्युक्तम्।

ननु महावाक्यार्थबोधे शुद्धं ब्रह्मैव विषय इत्युक्तम्, तदयुक्तम्, अवान्तरवाक्यार्थस्यापि शुद्धचिद्रूपत्वेन महावाक्यस्यानुवादकत्वापत्तेः तत्राह--पारोक्ष्यसद्वितीयत्वाभ्यामिति। ब्रह्मणि परोक्षताभ्रमस्य जीवस्वरूपे दुःखित्वादिभ्रमस्य च सत्त्वादित्यर्थः। पदार्थानुभवात्-तत्त्वम्पदार्थानुभवात्, अवान्तरवाक्यजन्यतत्त्वम्पदार्थानुभवात्। कृतकृत्यता-महावाक्यजानुभवकार्योक्तभ्रमनिवृत्तिलाभः। तथा चावान्तरवाक्यजानुभवादुक्तभ्रमनिवृत्त्यभावेन उक्तभ्रममूलीभूतमूलाज्ञानस्यापि न निवृत्तिरिति। अवान्तरवाक्यजन्यबोधोत्तरमज्ञातमैक्यं बोधयन्महावाक्यमननुवादकम्। तज्जन्य-

नारायणी।

ऽवस्थानम्' 'वृत्तिसारूप्यमितरत्र' इत्यादीनि(२)।

ननु निर्विकल्पमहावाक्यार्थपक्षे महावाक्यस्यावान्तरवाक्यानुवादकत्वापत्तिस्तेनापि शुद्धस्यैव बोधजननादि(३)त्यत आह—पारोक्ष्येति। सत्याद्यवान्तरवाक्यैः सत्यादिपदवाच्योपस्थितिद्वारा तत्पदलक्ष्यस्यावान्तरवाक्यार्थस्य बोधनेऽपि तत्रापरोक्षत्वं(४)पदार्थाभेदानवगाहनात् परोक्षता भ्रमस्य, एवमवान्तरवाक्यैस्त्वंपदार्थस्य बोधनेपि तत्र तत्पदा-

(१) तत्त्वमसीत्यादिमहावाक्यैर्जीवब्रह्मणोस्तयोरभेदस्य च यथार्थानुभवे जाते किमपरमापादनीयमिति चेत्तत्राह—पारोक्ष्येति। अभेदस्य यथार्थानुभवान्निःश्रेयसं विन्देत यदि बलवद्विरोधिज्ञानं न स्यात्। विद्यन्त एव परोक्षत्वापरोक्षत्वसद्वितीयत्वाद्वितीयत्वादीनि विरोधिज्ञानानीति नानुभवादेव कृतकृत्यतेत्याशयः।

(२) 'ऋतम्भरा तत्र प्रज्ञा' श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात्' इति। तथाच प्रकारस्य अनात्मत्वेन तदभानाय समाधेरनुसरणात् मोक्षहेतोर्बोधस्य निर्विकल्पत्वमेव युक्तमिति पाठः खपुस्तके।

(३) इष्टापत्तौ तु तत एव कृतार्थताप्रसङ्गस्तत्राहेति पाठः खपुस्तके।

(४) त्वंपदार्थभेदावगाहनात् इति पाठः खपुस्तके।

भवादेव कृतकृत्यता । वाच्यार्थाभेदावभासान्न पौन-

न्यायरत्नावली ।

बोधे च मूलाज्ञाननिवृत्त्या सर्वभ्रमोच्छेदेन कृतकृत्यतेति भावः । अथ शुद्धब्रह्मप्रमायाः भ्रमनिवर्तकत्वेनावान्तरवाक्यात् शुद्धप्रमोत्पत्तौ न कुतो भ्रमनिवृत्तिरिति चेन्न । उक्तरूपपरोक्षदुःखोपलक्षितत्वस्वरूपस्यापरोक्ष्याभावात् ।

ननु तथापि सत्यज्ञानादिपदानां सर्वेषां लक्षणया शुद्धब्रह्मबोधकत्वात् पौनरुक्त्यम्, तत्राह—वाच्यार्थाभेदावभासादिति । वाच्यार्थानां तादात्म्यज्ञाननजननरूपप्रयोजनसत्त्वादित्यर्थः । सत्यमित्यादिनानापदानामिति शेषः । सत्यत्वज्ञानत्वादिविशिष्टानां सत्यादिपदवाच्यानां तादात्म्यबाधनद्वारा शुद्धयारैक्यं वाक्यन बोध्यते । ननु—वाच्ययोस्तादात्म्यधीश्शक्त्यैव वक्तव्या न तु लक्षणया, वक्ष्यमाणरीत्या वाच्यार्थबोधोत्तरं विरोधप्रतिसन्धाने सत्येव लक्षणावतारात् । शक्तिज्ञानजन्योक्तधीस्तु एकवाच्यतावच्छेदकविशिष्टे वाच्यतावच्छेदकान्तरविशिष्टस्य तादात्म्यविषयिका, अन्यथा विशिष्टे विशिष्टान्वयबोधस्य लाक्षणिकादुपहितान्वयादुपलक्षितान्वयाच्च मुख्यत्वस्य 'लोहितोष्णीषा ऋत्विजः प्रचरन्ती'-

नारायणी ।

र्थाभेदाप्रतीतेर्भिन्नत्वादिभ्रमस्य च सत्त्वात् तत्त्वंपदार्थमात्रानुभवादेव-तत्त्वंपदार्थलक्ष्ययोरेवावान्तरवाक्यजानुभवादेव, न कृतकृत्यता-न समूलबन्धनिवृत्तिः, तयोरभेदाज्ञानात् । तथा च तयोरज्ञातमैक्यं बोधयन्महावाक्यमननुवादकमेवेति भावः ।

ननु तथापि सत्यादिपदानां (१)सत्यत्वाद्युपलक्षितैकधर्मिबोधकत्वात्पौनरुक्त्यं तत्राह—वाच्यार्थेति । वाच्यार्थानां सत्यत्वादिविशिष्टानामभेदावभासस्तादात्म्यज्ञानं(२) तस्मान्न घटः कलश इतिवदर्थपुनरुक्तता-नैकव्यक्तिबोधकत्वेनान्यतरवैयर्थ्यं सत्यादिपदानामिति शेषः । वाच्यार्था-

(१)—लक्षणया निरुक्तरीत्या शक्त्यैव वा सत्यत्वा० इत्यादिपाठः खपुस्तके ।

(२) तस्मादित्यर्थः । पौनरुक्त्यं घटः कलश० इत्यादिपाठः खपुस्तके ।

न्यायरत्नावली ।

त्यादौ महाभाष्याद्युक्तस्यामाङ्क्त्यापत्तेः । विशिष्टे विशिष्टस्य तादात्म्यधीस्तु विशेषणीभूतयोर्वाच्यतावच्छेदकयोस्तादात्म्यमेकवाच्यतावच्छेदकोपहितेऽपरवाच्यतावच्छेदकतादात्म्यं चावगाहते, तथा च तादृशबुद्ध्यनुपपत्तिः बाधबुद्धेर्विरोधित्वादिति चेन्न । बाधबुद्धेस्तत्राविरोधित्वात् । तदुक्तं खण्डने—

अत्यन्तासत्यपि ज्ञानं स्वर्थे शब्दः करोति हि । इति(१)

अत्यन्तासति बाधिते सति । हिशब्देन तादृशज्ञानस्य कलहादिस्थले प्रसिद्धिलाभः । तथा चोक्ततादात्म्यज्ञानस्य सम्भवात्तद्विना विरोधाप्रतिसन्धानेन लक्षणानवतारात् । तदवतारार्थं सत्यादिपदानां विशिष्टतादात्म्यबोधकत्वेनावश्यकत्वम् । न चैवमपि पदद्वयादेव लक्षणावतारासिद्धेस्तृतीयादिपदवैयर्थ्यमिति वाच्यम् । वाच्यार्थानां मिथो भेदज्ञानस्यान्योन्यभेदज्ञानं विना निवर्तयितुमशक्यत्वात् । ननु सत्यत्वाद्युपलक्षितस्य भेदधाब्रह्माण निवर्तनीया, तन्निवृत्तेरेव वक्ष्यमाणरीत्या प्रकृतोपयोगात् । तन्निवृत्तिस्तु ब्रह्मणि तत्तादात्म्यबुद्ध्यैव, न तु सत्यादिपदवाच्यतादात्म्यबुद्ध्येति वाच्यार्थभेदावभासादिति मूलमयुक्तमिति चेन्न । ब्रह्मणि सत्यत्वाद्युपलक्षितभेदबुद्धौ सत्यत्वाद्युपहिततादात्म्यबुद्धेरपि विरोधित्वात् । तदुपहिततादात्म्यावगाहितया तद्विशिष्टवाच्याभेदबुद्धेरपि तद्विरोधित्वात् । यथाहि 'भूतलं न द्रव्य'मिति ज्ञाने भूतलं द्रव्यमित्यस्य भूतलं नीलद्रव्यमित्यस्य च विरोधित्वम् , तादात्म्येन द्रव्यप्रकारत्वनिरूपितभूतलविशेष्यताकत्वस्य विरोधितायोजकस्यांशस्य तत्र सत्त्वात् ; तथा ब्रह्मत्वोपलक्षिते सत्यत्वाद्युपलक्षितस्य भेदबुद्धौ ताभ्यामुपलक्षितयोरुपहितयोश्च तादात्म्यबुद्धेर्विरोधित्वम् । उपहितप्रकारकबुद्धौ शुद्धयोरुपलक्षितयोस्तादात्म्यस्य

(१) अबाधात्तु प्रमामत्र स्वतः प्रामाण्यनिश्चलाम् ॥ इत्युत्तरार्धम् ।

न्यायरत्नावली।

विषयत्वात्। तस्यां (१)तस्याविषयत्वेऽपि तयोः प्रकारत्वात्। तस्यां तयोरप्रकारत्वेऽपि तयोर्भेदबुद्धौ उपहितयोरेव तादात्म्यबुद्धेर्विरोधित्वात्। अन्यथा इयं सत्ता नेति शुद्धसत्ताभेदबुद्धौ इयं विशिष्टसत्तांत तादात्म्यबुद्धश्शुद्धघटभेदबुद्धौ च नीलत्वाद्युपहितघटतादात्म्यबुद्धेर्विरोधित्वस्य सर्वानुभाविकस्यापलापापत्तेः। न चोपलक्षितयोश्शुद्धयोर्भेदज्ञानस्य घटो न घट इति ज्ञानवदाहार्यत्वेन न तत्र किमपि ज्ञानं विरोधीति वाच्यम्। भिन्नधर्मोपहितयोरिव भिन्नधर्मोपलक्षितयोरपि भेदज्ञानस्याहार्यत्वाभावात्। न हि यत्र तत्ता, यत्र चेदन्ता, तयोरेकत्रापरस्य भेद इति ज्ञानमाहार्यत्वेन व्यवह्रियते, तादिदं न द्रव्यं न घट इति ज्ञानवत्। एवं च यत्र ब्रह्मत्वं यत्र च सत्यत्वं तयोरेकत्रापरस्य भेद इत्याकारकज्ञाने (२)तयोरेकत्रापरस्य न भेद इत्याकारकज्ञानस्य विरोधित्वं युक्तमेव।

किञ्च तयोः (३)तादात्म्यज्ञानं एकवाच्यतावच्छेदकरूपविशेषणे अपरवाच्यतावच्छेदकरूपस्य विशेषणस्यापि तादात्म्यमवगाहत (४)एवेति तद्वदेव एकवाच्यतावच्छेदकोपलक्षितेऽपि विशेष्ये अपरवाच्यतावच्छेदकोपलक्षितस्य विशेष्यस्यापि तादात्म्यमवगाहते। एवं च ब्रह्मत्वोपलक्षिते सत्यत्वाद्युपलक्षिततादात्म्यावगाहनात् वाच्यतादात्म्यज्ञानस्य सुतरामुपलक्षितयोर्भेदबुद्धौ विरोधित्वम्। शुद्धयोः उपलक्षितयोः अत्यन्ताभेदात् यद्यपि (५)न तादात्म्यं सम्बन्धः, तथापि निरूढलक्षणया

(१) गपुस्तके तस्यामिति नास्ति।

(२) तयोरेकत्रापरस्य भेद इत्याकारकज्ञाने इति पाठो गपुस्तके प्रमादभ्रष्टः प्रतिभाति, आवश्यकत्वात् घपुस्तकीयो निवेशितोऽस्माभिः।

(३) वाच्ययोस्तादात्म्येति पाठो घपुस्तके।

(४)-तथाचैकवाक्यतावच्छेदकोपलक्षिते विशेष्येऽपरवाच्यतावच्छेदकोपलक्षितस्य विशेष्यस्यापि तादात्म्यमवगाहते—एवेति तद्वदिति पाठो घपुस्तके।

(५) यद्यप्युपलक्षितयोः न तादात्म्यमिति पाठो गपुस्तके।

न्यायरत्नावली।

विशेषणविभक्त्युपस्थापितस्य भेदाभावस्यैव विशेष्यतया भानं सम्भवति। तयोरेकत्रापरभेदो नेत्याकारकस्य सम्भवात्। भेदाभावत्वस्यैव धर्मितावच्छेदकत्वसम्भवात् न निर्धर्मितावच्छेदकत्वं शाब्दबोधे दोषः। नीलो घट इत्यादौ तु तादात्म्यस्य सम्बन्धतासम्भवात् विशेषणविभक्तिः पदसाधुत्वार्था। अत एव मणिकारादिभिरुक्तम्--'विशेषणविभक्तिस्साधुत्वार्था अभेदार्थिका वे,-ति। न हि तार्किकादीनाम्मतेऽपि अत्यन्ताभेदे तादात्म्यस्य कापि सम्बन्धत्वमुक्तम्, प्रत्युत जातिशक्तिवादादौ शब्दमण्यादिषु तस्यासम्बन्धत्वमेव प्रकटितम्। तच्च पूर्वमेव उक्तम्। न च घटो घट इत्यादौ अत्यन्ताभेदे 'सम्बन्धाभावादेव शाब्दधीवारणसम्भवेन निराकाङ्क्षत्वोक्त्यैव तद्वारणमसङ्गतमिति वाच्यम्। योग्यताभ्रमेण शाब्दबोधे आपादिते निराकाङ्क्षत्वेन तद्वारणस्य युक्तत्वात्।

न च विशेषणविभक्त्यर्थे तत्प्रकृत्यर्थस्य विशेषणतयाऽन्वयसम्भवेऽपि विशेष्यपदार्थस्य तत्र विशेषणत्वेनान्वयोऽव्युत्पन्न इति वाच्यम्। प्रकृतवाक्यस्थले विशेषणविशेष्यपदार्थयोर्भेदबुद्धिविरोधिशाब्दबोधो हि सर्वानुभवसिद्धः; तत्र शुद्धयोः तादात्म्याभावात् तादात्म्यसंसर्गकतादात्म्यप्रकारकबोधासम्भवे भेदाभावत्वावच्छिन्नविषयताकबोधस्यावश्यकत्वे विशेष्यपदार्थस्य शुद्धत्वेन विशेष्यत्वासम्भवे चागत्या व्युत्पत्तिवैचित्र्यकल्पनेनोक्तबोधस्वीकारात्। प्रथमाया विशेष्यपदोत्तराया आधेयत्वार्थतया विशेष्यवृत्तित्वस्य विशेषणभेदाभावे बोधो वा। निपातसाधारणनामार्थयोरभेदेनैवान्वय इति पक्षे घटो न पट इत्यादौ घटवृत्तिपटप्रतियोगिकभेदबोधस्य तस्य आधेयत्वार्थकत्वेनैव निर्वाहात्। गगनं द्रव्यं भवतीत्यादौ भवत्यर्थे तादात्म्यादौ द्रव्यवृत्तित्वबोधाच्च।

व्युत्पन्नश्च विभक्त्यर्थे विभक्त्यर्थस्यान्वयः। क्रयाचैत्रस्य धनमि-

न्यायरत्नावली ।

स्यादौ स्वत्वे क्रयजन्यत्वस्यान्वयात् । न च शुद्धरूपेणोपस्थितिं पदजन्यां विना शुद्धयोर्भेदाभावः शाब्दबोधे न भातुमर्हतीति वाच्यम् । इतराविशेषणत्वेनोपस्थितिं विनाऽपि प्रकृते विशेषणयोः तादात्म्यभानवत्, घटः प्रमेयवानित्यादौ सर्वमतेऽपि विशेषणयाः तादात्म्यभानवच्चेतराविशेषितेन रूपणोपास्थातं पदजन्या विनाऽपि शुद्धयोः भेदाभावभानसम्भवात् । विशिष्टविषयकशक्तिज्ञानाद्विशेषणान्वययोग्यतातात्पर्यज्ञानादिरूपकारणान्तरसहितात् तादृशविषयताशालिशाब्दधीसम्भवात् । यत्र तु तात्पर्याभावनिर्णयादिना विशेष्टयोर्नान्वयबोधः, तत्र विशेषणविशेष्ययोः तादात्म्यस्य शुद्धयोः भेदाभावस्य चाभानात् शाब्दबोधस्य नोक्तशक्तिज्ञानजन्यत्वम् । किन्तु लक्षणयोपाहितयोः तादात्म्यस्य शुद्धयोर्भेदाभावस्याखण्डैक्यस्य वा भानम् । ननु सत्यत्वाद्युपहितस्य सत्यादिपदवाच्यसत्यादिसम्बन्धाऽसम्भवात् सत्यत्वादिपदलक्ष्यत्वासम्भव इति चेन्न । विशिष्टस्य सत्यादिपदवाच्यत्वेन सत्यत्वाद्युपहितस्य तत्र तादात्म्यसत्त्वात् । विशिष्टं हि विशेष्यं विशेषणं चेति द्वयम् । तत्र च उपहितान्यत्वसत्त्वेनोपहिततादात्म्यमस्त्येव । तथा च उपहिततादात्म्यवद्यद्यद्विशेष्यविशेषणोभयं तत्पर्याप्तशक्यतावं सत्यादिपदमित्याकारकलक्षणाज्ञानं सम्भवत्येव ।

वस्तुतस्तु नोपहितान्वयबोधे लक्षणायाः धीः कारणम्, किन्तु शक्तेः । विशिष्टनिरूपितशक्तेरुपहितेनापि निरूप्यत्वात् । उपहितनिरूपितत्वेनैव तत्स्थले शक्तिग्रहो हेतुः, लक्षणास्थल इव तादृशत्वेन शक्तेस्स्मृतिकल्पनात् । 'तात्पर्याद्धि वृत्तिः' इति मण्युक्तेः । अत एव एकदेशशक्तेरपि लक्षणावदमुख्यवृत्तित्वम् । शक्यतापर्याप्त्यधिकरणे गृह्यमाणशक्तेरेव मुख्यवृत्तित्वात्, न तु विशिष्टनिरूपितत्वेन, विशेषणनिरूपितत्वाप्रतीतेः । तथा चोपहिता-

न्यायरत्नावली ।

न्वयस्थले विशिष्टान्वयाभावात् लक्षणत्युपचारः, शुद्धविशेष्यकनिर्विकल्पकशाब्दस्थलवत् । यदि तूपाधौ शक्तरग्रह तस्योपाहितान्वयबोधे भानासम्भवः, वृत्तिज्ञानविषयस्यैव शाब्दधीविषयत्वात्, अन्यथा उपाधौ शक्तिस्वीकारवैयर्थ्यादिसालोच्यते; तदा उपहितान्वयबोधेऽपि विशिष्टे शक्तिज्ञानं हेतुः । परन्तु विशिष्टान्वयबोधे तेन जननीये यत् कारणं विशेष्यान्वयिनि विशेषणस्य योग्यताज्ञानं तात्पर्यज्ञानं वा, तस्योपहितान्वयबोधे तेन जननीये(१) प्रतिबन्धकत्वम्, तदभावस्सहकारी । शुद्धविशेष्यान्वयबोधे तु शुद्धविशेष्ये शक्तिज्ञानं हेतुः । एवं च उपहितमात्रान्वयबोधाद्विशिष्टान्वयबोधस्य मुख्यत्वमुपपद्यते । विशिष्टान्वयधीसामग्रीसत्त्वे तदनुत्पत्तेः । शुद्धविशेष्यशाब्दबोधापेक्षया तु उपहितमात्रान्वयधीः विशिष्टान्वयधीश्च मुख्या । तादृशधीद्वयं लक्षणयेति पक्षस्तु युक्तः । उक्ताभावस्य हेतुत्वाकल्पनेन लाघवात् । (२)*एवं च शुद्धयोर्भेदस्य महावाक्यार्थधीपूर्वं बाध्यत्वेन प्रातीतिकत्वात् तज्जनकाज्ञानस्योक्तभेदाभावधीबाध्यत्वसम्भवात् तादृशाभेदधीस्साक्षादेवोक्तधीविरोधिनी, न तु स्वजन्यसंस्कारविशिष्टनिर्विकल्पकप्रमाद्वारा । यदि च शुद्धयोर्भेदो व्यावहारिक एव महावाक्यार्थधीप्रयोजकादवान्तरवाक्यार्थज्ञानात् पूर्वं बाध्यत्वस्यैव प्रातीतिकरूपत्वात् । व्यावहारिकभेदस्य च न *व्यावहारिकाभेदधीबाध्यत्वम् । बाध्यसत्ताधिकस-

(१) यत्कारणं विशेष्यान्वयिनि विशेषणस्य योग्यताज्ञानं तात्पर्यज्ञानं वा तस्योपहितान्वयबोधे तेन जननीये इति पाठो घपुस्तके संशोधितो दृश्यते ।

(२)*.....*एतच्चिह्नद्वयमध्यस्थः पाठोतिविशदो घपुस्तके दृश्यते तत्र हि— एवं च शुद्धयोरभेदस्तदा सत्यत्वाद्युपाधिविशिष्टे शक्तिज्ञानस्य कार्यतावच्छेदकमुपहितमात्रान्वयधी-शुद्धविशेष्यमात्रशाब्दधी-विशिष्टान्वयधी-त्रितयसाधारणविशेषणभूतसत्यत्वाद्यन्यधर्मानवच्छिन्ना सती सत्यत्वाद्यन्यधर्मानुपहितब्रह्मनिष्ठा या विषयता तच्छालिशाब्दत्वम् । न चैवं विशिष्टान्वयशाब्दबोधस्थलेप्युपहितमात्रान्वयधिया शुद्धविशेष्यमात्रशाब्दबोधापत्तिरिति वाच्यम् । विशिष्टान्वयभानसामग्रीसत्त्वे तदभावस्यापादयितुमशक्यत्वेन तादृशबोधापत्तेरसंभवात् ।

तादृशसामग्री च विशेष्यान्वायिनि विशेषणान्वयस्य तात्पर्यज्ञानयोग्यताज्ञानादिकम्। तदभावे तादृशबोधापत्तिरिष्टैव। अत एवानुकूलत्वयत्नत्वाभ्याम् विशिष्टे शक्तात् आख्यातात्केवलानुकूलत्वरूपेण गमनानुकूलव्यापारस्य रथो गच्छतीत्यादौ शक्त्यैव धीरिति कुसुमाञ्जलावुक्तम्, बलवदनिष्टाजनकत्वविशिष्टसाधनत्वे शक्तादपि विधिप्रत्ययात् 'श्येनेनाभिचरन् यजेते'त्यादौ इष्टसाधनत्वमात्रधीः शक्त्यैवेति चिन्तामणितदालोकादावुक्तम्। सेयं जहदजहत्स्वार्था वृत्तिस्तार्किकादिभिरपि स्वीकृता तत्र लक्षणा शब्देनौपनिषदैर्व्यवहियते, शक्यतापर्याप्त्यधिकरणविषयकबोधाधायकधीविषयवृत्तेरेव शक्तित्वेन व्यवहारस्यौचित्यात्। अस्मिंश्च पक्षे शुद्धब्रह्मणः पूर्वमज्ञातत्वेपि सत्यत्वादिविशिष्टब्रह्मणि शक्तिज्ञानोत्तरं सत्यादिपदज्ञानस्य शुद्धब्रह्ममात्रे संस्कारोद्बोधकत्वकल्पनात् शुद्धब्रह्मनिर्विकल्पकस्मृतिशाब्दधियोरुपपत्तिः, सौषुप्तेनासम्प्रज्ञातसमाधिरूपेण वा निर्विकल्पानुभवेन शुद्धब्रह्मणः पूर्वं ग्रहणसम्भव इति पक्षे तु शुद्धब्रह्मणि शक्तिज्ञानं तच्छब्दानुभवे हेतुर्विशिष्टब्रह्मणि शक्तिस्तु सत्यत्वाद्युपाधिवच्छिन्ना या विषयता तच्छालित्वसम्बन्धेन सत्यत्वादिशिष्टो यः शाब्दबोधस्तदनुकूलशक्तिः। शक्तिस्तु पदार्थान्तरम्। तथा चोपाध्यंशेपि शक्तिग्रहान्न तस्य शाब्दबोधविषयत्वानुपपत्तिः। सत्यत्वाद्युपहितान्वयितावच्छेदकधर्मविशिष्टे सत्यत्वाद्युपाधिप्रकारिका शाब्दधीरपि तादृशादेव शक्तिज्ञानाद्योग्यताज्ञानादिसहितात्। अथ प्रथमपक्षे विशिष्टप्रकारकतादृशशाब्दधीसामग्रीसत्त्वे पूर्वोक्तरीत्या उपहितमात्रकेवलविशेष्यशाब्दधियोरनुत्पादे च विशिष्टप्रकारकशाब्दधीस्तादृशधीद्वयापेक्षया भवतु मुख्या, चरमोक्तपक्षे तु कथं तदपेक्षया सा मुख्या, विशिष्टे केवलविशेष्ये च युगपच्छक्तिज्ञाने सति तयोः शाब्दबोधस्य युगपत्सम्भवात्। यदि च तस्याः सामग्री तच्छाब्दधियः प्रतिबन्धिका कल्प्यते तस्या मुख्यत्वानुरोधात्, उक्तं हि महाभाष्ये 'लोहितो णिषा ऋत्विजः प्रचरन्ती'त्यादौ लौहित्यस्योपाधित्वोपलक्षणत्वापेक्षया विशेषणत्वमभ्यर्हितम्। अतः 'सर्वादिः सर्वनामे'त्यत्र सर्वपदस्य विशेषणत्वात्सर्वनामसंज्ञेत्युच्यते तदा तादृशस्य प्रतिबन्धकत्वस्य च कल्पने मानाभावः। न्यायमूलक हि तद्वचनं धर्मशास्त्रवद्वा? अन्त्ये विचाराभावः। आद्ये तु कोयं न्यायः उच्यते, विशिष्टस्यान्वयधीर्मुख्यैव उपहितान्वयितावच्छेदकधर्मविशिष्टे उपाधिप्रकारकप्रवृत्त्यादिरूपस्याधिकप्रयोजनस्य तस्याः सत्त्वेन तस्यामेव तात्पर्यनिश्चयात्। यद्यपि हि 'अर्थेनुपलब्धे तत्प्रमाण'मित्यादि जैमिन्युक्त्या प्रयोजनवदर्थमात्रे तात्पर्यमुक्तं तथाप्यधिकप्रयोजनवति शब्दस्य तात्पर्यसम्भवेनाल्पप्रयोजनवति तात्पर्यमयुक्तं शास्त्रस्य महाफलकत्वौचित्यात्। अत एव नामधेयस्थले प्रवृत्त्यतिशयकरत्वेन गुणविधित्वशङ्कातस्मात् न्यायमूलमेवोक्तमहाभाष्यम्। यत्र तु विशिष्टान्वयो बाधितः तत्रेतरौ बोधौ स्वीक्रियेते एव, तयोरेव तात्पर्यात्, न विशिष्टान्वयबोधः। एवं च शुद्धयोर्भेदस्य महावाक्यार्थधीपूर्वं बाध्यत्वेन प्रातीतिकत्वे तज्जनकाज्ञानस्योक्तभेदाभावधीबाध्यत्वसम्भवात्तादृशाभेदधीः साक्षादेवोक्तभेदधीविरोधिनी, न तु स्वजन्यसंस्कारविशिष्टनिर्विकल्पकप्रमाद्वारा। यदि च शुद्धयोर्भेदो व्यावहारिकः एवं च महावाक्यार्थधीप्रयोजकाद्वाक्यान्तराद्वाक्यार्थज्ञानात्पूर्वं बाध्यत्वस्यैव प्रातीतिकत्वरूपत्वेन वक्तुं शक्यत्वात्। व्यावहारिकभेदस्य च न इत्याद्यग्रे समः।

त्वाकविषयज्ञानस्यैव बाधकत्वात् । न च उक्ताभेदधीजन्यसंस्कारविशिष्टोक्तनिर्विकल्पकज्ञानस्य उक्तभेदबाधकत्वं सर्वसम्मतम् ,तार्किकैस्तस्याकल्पनात् । (१)अभेदव्यापकतासंस्कारविशिष्टज्ञानस्यैव तैः तत्कल्पनादित्यालोच्यते,(२)तथाऽपि विशेषणविभक्त्या विशेषणभेदाभावस्य यथा बोधः, तथा (३)तया विशेष्यविभक्त्या वा विशेष्यव्यापकत्वस्य विशेष्यनिष्ठभेदाप्रतियोगित्वरूपस्य विशेषणनिष्ठतया शाब्दधीसम्भवात् । अत्यन्ताभिन्नविशेष्यविशेषणस्थले विशेष्यव्यापकत्वविशिष्टतादात्म्यस्य सम्बन्धविषया (४)भानासम्भवात् विशेष्यव्यापकत्वबोधस्यानुभाविकत्वाच्च । पूर्ववद्व्यापकत्वस्य नापार्थद्वयविशेषितरूपेण भानसंभवाच्च । शुद्धब्रह्मनिष्ठभेदाप्रतियोगित्वस्य सत्यत्वाद्युपलक्षितनिष्ठतया बोधसम्भवेन तादृशव्यापकत्वधीजन्यसंस्कारविशिष्टनिर्विकल्पकप्रमायास्सत्यत्वाद्युपलक्षितस्य भेदः शुद्धब्रह्मनिष्ठ इत्याकारकभेदधीविरोधित्वं सर्वसम्मतं सम्भवत्येव । व्याप्यत्वव्यापकत्वाभ्यां तादात्म्यसम्बन्धावच्छिन्नाभ्यां गृहीतयोरनाहार्यभेदबुद्धेः केनाप्यस्वीकारात् । द्रव्यव्याप्या पृथिवीति ज्ञानजन्यसंस्कारे उद्बुद्धे सति पृथिवी द्रव्यं नेति ज्ञानस्यानाहार्यस्यानुत्पत्तेः ।

ननु व्यापकत्वं विशेषणविभक्तेर्विशेष्यविभक्तेर्वार्थ इति कैरपि तान्त्रिकैर्नोक्तमिति स्वकपोलकल्पितमिति चेन्न । (५)यथा ह्यत्यन्ताभेदे तादात्म्यस्यासम्भवात् भेदाभावस्यापि सम्बन्धत्वासम्भवात् असम्बन्धतया भेदाभावस्य भानाय विशेषणविभक्त्यर्थत्वं शब्दमणावुक्तम्, तथा विशेषणे विशेष्यव्यापक-

(१) अभेदव्याप्यतेति पाठः घपुस्तके । (२) तदापीति घपुस्तके ।

(३) तथा विशेष्यविभक्त्या विशेष्यव्यापकेत्यादिपाठो घपुस्तके, तया वा इति शब्दौ न स्त इत्यर्थः ।

(४) भानसम्भवादिति पाठो गपुस्तके । (५) तथाहीति पाठो घपुस्तके ।

त्वस्य बाधकाभावे सति सम्बन्धतया भानस्य तान्त्रिकैरुक्तत्वात् । विशेष्यविशेषणयोः अत्यन्ताभेदे तादृशभानस्य असम्भवात् । असम्बन्धतया (१)भानाय विशेषणविभक्त्यर्थत्वस्य तत्र तान्त्रिकाभिप्रेतत्वमुन्नीयते । तथा च विशेषणविभक्तिरभेदार्थिकेत्यत्र मण्यादिवाक्ये अभेदेत्युपलक्षणम् । (२)व्यापकत्वाद्यर्थिकेत्यपि बोध्यम् । अत एव विशेषणभिन्नभिन्नत्वरूपं विशेषणव्याप्यत्वमपि विशेषणविभक्त्यर्थः सम्भवतीति तत्र विशेष्यवृत्तित्वभानमपि प्रकृते वक्तुं शक्यम् । न चैवमपि व्यापकत्वादिसंस्कारस्यैव उक्तभेदधीविरोधित्वेन तद्विशिष्टाया निर्विकल्पकप्रमायास्तद्विरोधित्वोक्तिरयुक्तेति वाच्यम् । उद्बुद्धसंस्कारस्यैव विरोधित्वेनोक्तप्रमाया एव प्रकृते(३)उद्बोधकत्वेन विनिगमकाभावात्, उक्तसंस्काराविशिष्टोक्तप्रमाया उक्तसंस्कारोक्तप्रमयोर्वा विरोधित्वेन तदुक्तेर्युक्तत्वात् । अन्यथा व्यावहारिकव्यापकत्वादिविषयकत्वेन संस्कारमात्रस्य बाधकत्वासम्भवात् ।

न च भेदाभावज्ञानस्य भेदभ्रमविरोधित्वपक्षे निर्विकल्पकप्रमा व्यर्थेति वाच्यम् । पदार्थज्ञाने तात्त्विकप्रमात्वज्ञानं विना महावाक्यार्थज्ञाने तदसम्भवात् , शुद्धपदार्थज्ञानं विना तदघटितस्य निर्विकल्पकस्यासम्भवात्, 'ब्रह्मविदाप्नोति पर' मिति श्रुतेः 'तमेव विदित्वे' त्यादिश्रुत्यनुसारेण शुद्धब्रह्मणो ज्ञानस्य मोक्षहेतुत्वे(४)सिद्धे कैर्विशेषणैरुपलक्षितं तत् ब्रह्मेति जिज्ञासायास्तत्त्वमस्यादिवाक्यजन्यनिर्विकल्पकं विना निवृत्त्ययोगात् । भेदाभावज्ञाने शुद्धस्य भानेऽपि सत्यत्वाद्युपलक्षितत्वस्य तत्पका-

(१) तद्भानायेति पाठो घपुस्तके । (२) व्याप्यत्वाद्यर्थिकेति पाठो घपुस्तके ।
(३) प्रकृते उद्बुद्धत्वेन उद्बोधकत्वेन च विनिगमकाभावादिति पाठो घपुस्तके ।
(४) मोक्षहेतुत्व बुद्धे इति पाठो घपुस्तके ।

न्यायरत्नावली ।

रकधीद्वारकनिर्विकल्पकविषयत्वरूपस्याभानात् । न च सिद्धान्ते एकयज्ञानेनैव तद्ज्ञानस्य भेदभ्रमसहितस्य निवृत्तिसम्भवात् द्वारीभूतसप्रकारकधीः व्यर्थेति वाच्यम् । व्यावर्तकाकारत्वस्य तत्प्रयोजकत्वेन विशेषणतया तस्याप्रमात्वप्रयोजकत्वेन चोपलक्षणतया तस्यावश्यकत्वे सप्रकारकधीद्वारकत्वस्यावश्यकत्वात् । उक्तं चाद्वैतसिद्ध्यादौ तथा (१) ।

ननु शुद्धयोर्भेदज्ञाने भेदाभावधीः विरोधिनीत्युक्तम् । शुद्धयोर्भेदज्ञानमेव न सम्भवति । अभावबुद्धौ प्रतियोग्यनुयोगिविशेषणभाननियमात् । तदुक्तं शिरोमण्यादौ 'प्रतियोगिविशेषिततद्ज्ञानं विशिष्टवैशिष्ट्यबोध(२)मर्यादां नातिशेते' इति (३) । प्रतियोगिनः वैशिष्ट्यमवश्यमभावेऽवगाहते । तथानुयोगितावच्छेदकविशिष्टे अवश्यमभावस्य वैशिष्ट्यम् । तुल्यन्यायत्वादिति तदर्थादिति चेन्न । (४)उक्तवाक्ये भानमित्यस्य लौकिकप्रत्यक्षार्थकत्वेन प्रतियोगिविशेषिताभावलौकिकप्रत्यक्षस्यैव तथा नियमात् । (५)ससम्बन्धिविषयकलौकिकप्रत्यक्षे सम्बन्धितावच्छेदकविशिष्टसम्बन्धिविषयकत्वनियमस्य संयोगादिलौकिकप्रत्यक्षे दृष्टत्वात् । न ह्यभावत्वमात्ररूपेण गोत्वादिशुद्धप्रतियोगिकाभावत्वमात्ररूपेण वा शाब्दधीर्न जायते ।

न चोक्तनियमोऽपि न(६); अयं गौरिति ज्ञानोत्तरं शुद्धगोत्वप्रकारकज्ञानवानहमिति ससम्बन्धिकज्ञानस्य प्रत्यक्षे तत्सम्बन्धेना गोत्वस्य स्वरूपेणैव भानन सम्बन्धितावच्छेदकाभा-

(१) तथा शब्दो नास्ति गपुस्तके । (२) बोधशब्दो नास्ति गपुस्तके ।

(३) प्रतियोगिविशेषिताभावज्ञानं प्रतियोगितावच्छेदकतया ज्ञायमानधर्मेण विशिष्टस्य प्रतियोगिनः वैशिष्ट्यम् इत्यादिपाठो घपुस्तके ।

(४) उक्तशिरोमणिवाक्ये इत्यर्थः । (५) सत्वसम्बन्धीति पाठो गपुस्तके ।

(६) 'न' इति पदं नास्ति गपुस्तके ।

न्यायरत्नावली।

नादिति वाच्यम्। तत्र शुद्धगोत्वस्यैव सम्बन्धित्वेन सम्बन्धिता-वच्छेदकविशिष्टसम्बन्धिविशेषितविषयकलौकिकप्रत्यक्षस्योक्तानि-यमानपायात्। यद्धर्मावच्छिन्नसम्बन्धिताकं यत् तद्विषयकलौकि-कप्रत्यक्षस्य तद्धर्मावच्छिन्नविषयतानिरूपिततन्निष्ठलौकिकविषय-ताकत्वनियमात्। अयं गौरिति ज्ञानस्य गोत्वविशिष्टविषयतारूप-सम्बन्धितायाः केनाप्यनवच्छिन्नत्वात्। शुद्धगोत्वस्य तत्प्रत्यक्षे भानेऽपि यादृशी सम्बन्धिता अवच्छिन्ना अनवच्छिन्ना वा, तादृशरू-पेण तन्निरूपकज्ञानादिलौकिकप्रत्यक्षे तस्याः भाननियमस्य पर्यवसि-तत्वात्। अत एव जातिमानिति ज्ञानस्य जातिमत्त्वावच्छिन्नविषय-तारूपा सम्बन्धिता तद्रूपेणैव तत्प्रत्यक्षे भाति। तथा च शुद्धप्र-तियोगिविशेषितभेदत्वेन भेदस्य परोक्षज्ञाने(१) बाधकाभावः। तादृश-रूपेण लौकिकप्रत्यक्षस्यापि शुद्धगोत्वप्रकारकज्ञान(२)प्रत्यक्षस्येव स्वीकारात्।

न च प्रतियोगितावच्छेदकविशिष्टविशेषिताभावबुद्धेरेव प्रतियोगिमत्ताधीप्रतिबध्यत्वात् तादृशबुद्धेरेव प्रतियोगिमत्ताधीवि-रोधित्वमिति(३) यदा स्वीक्रियते, तदा तादृशबुद्धेरेव भेदाभावधी-विरोधित्वात् तादृशभेदबुद्धिं प्रत्येव तादृशभेदाभावबुद्धेर्विरोधि-त्वमिति वाच्यम्। शुद्धप्रतियोगिविशेषिताभावबुद्धेरपि शुद्धप्रति-योगिमत्ताधीविरोधित्वस्यावश्यकत्वात्। अन्यथाऽयं घट इत्या-दिबुद्धेर्बाधप्रतिबद्ध्यत्वानुपपत्तेः। न च नायं घट इति भेदधीरेव तत्र प्रतिबन्धिका, तस्याः घटतादात्म्यविषयकत्वादिति वाच्यम्। विरोधिन्या अनुमित्यादिसामग्र्याः सत्त्वे, अत्र शुद्धघट-

(१)—ज्ञानकाले बाधकाभाव इति पाठो घपुस्तके।

(२) 'ज्ञान' इति पदं नास्ति गपुस्तके।

(३) यथा स्वीक्रियते तथा० इति पाठो घपुस्तके।

त्वप्रकारकप्रत्यक्षं भवत्वितीच्छया जातस्योक्तप्रत्यक्षस्य घटतादात्म्याविषयकत्वात् ।

न च शुद्धघटत्वप्रकारकेदंविशेष्यकज्ञानेऽपि घटभेदबुद्धेर्विरोधित्वमिति वाच्यम् । तत्कल्पनापेक्षया लाघवेन शुद्धघटत्वविशेषितात्यन्ताभावबुद्धेरेव तत्कल्पनात् । एवं च शुद्धप्रतियोगिकभेदबुद्धौ तदभावबुद्धेर्विरोधित्वं युक्तमेव । न च यादृशयोः भावाभावयोः सहानवस्थाननियमः, तादृशयोरेव तयोर्ज्ञाने मिथो विरोधिनी, शुद्धघटत्वतदभावयोस्तु न सः, शुद्धघटत्ववति(१) शुद्धघटत्वपटत्वोभयाभावादिसत्त्वादिति वाच्यम् । यथा जातिमानिति ज्ञाने जातित्वमात्रावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नप्रकारताकज्ञानस्य विरोधित्वकल्पनात् घटवृत्तिजातिरत्र नास्तीति धीर्न विरोधिनी, तथा शुद्धघटत्वप्रकारकज्ञान घटत्वानधिकरणावच्छिन्नप्रतियोगिताकात्यन्ताभाव(२)ज्ञानत्वेन विरोधित्वकल्पनादुक्तोभयाभावादिमत्त्वज्ञानस्याविरोधित्वात् । तथा च तादृशयोर्भावाभावयोः सहानवस्थानस्यापि सत्त्वान्नोक्तदोषः । प्रागभावस्यानवच्छिन्नप्रतियोगिताकत्वेऽपि तद्वत्ताधीर्न विरोधिनी, (३)अत्यन्ताभावत्वस्य विशेषणात् । किञ्चोभयत्वविशिष्टं शुद्धघटत्वादतिरिक्तमिति तदभावात्तदभावस्याप्यतिरिक्तत्वाच्छुद्धघटत्वपटत्वोभयाभावयोस्सहानवस्थाननियमाभावेऽपि न क्षतिः । तस्माच्छुद्धघटत्व(४)तदभावधियोरिव शुद्धब्रह्मभेदतदत्यन्ताभावधियोर्विरोधित्वे न किञ्चित् बाधकम् ।

न च सत्यादिवाक्यात् प्रथमत एव निर्विकल्पकधी-

(१) शुद्धघटत्ववतीति गपुस्तके नास्ति ।

(२)-अभावत्वज्ञानत्वेनेति पाठो घपुस्तके ।

(३) अत्यन्ताभावत्वान्निवेशात् इति पाठो घपुस्तके ।

(४)-तदत्यन्ताभाव० इत्यादिपाठो घपुस्तके ।

र्जायत इति सिद्धान्तेऽपि स्वीकारात् भेदाभावादिविशेष्यकज्ञानस्य द्वारता न युक्तेति वाच्यम् । तस्यापि सिद्धान्ते स्वीकारात् । तदुक्तं संक्षेपशारीरके—

सामानाधिकरण्यमत्र भवति प्राथम्यभागन्वयः
पश्चादेव विशेषणेतरतया पश्चाद्विरोधोद्भवः ।
उत्पन्ने च विरोध एकरसके वस्तुन्यखण्डार्थधीः
सर्वैरेव ततः पदैरयमिह ज्ञेयः क्रमः सूरिभिः ॥ इति ।

सामानाधिकरण्यं पदयोस्समभिव्याहारज्ञानम् । अन्वयः वाक्यतात्पर्यविषयवाक्यार्थधीप्रयोजकः । विशेषणेतरतया विशेषणविशेष्यभावेन वाच्यार्थाभेदज्ञानमन्वय इत्यनुषज्यते । विरोधः विरोधज्ञानम्, वाच्यार्थाभेदज्ञाने प्रमात्वासम्भवेन तात्पर्याविषयत्वज्ञानान्निर्विकल्पकशाब्दबोधे तात्पर्यज्ञानमिति यावत् । अन्वय इत्यनुषज्यते । यदि तु सत्यादिवाक्यजन्यनिर्विकल्पकप्रमोत्तरमर्थापत्त्या सत्यत्वाद्युपलक्षितानामभेदनिश्चयः 'सत्यत्वाद्युपलक्षितानामभेदः परस्परतात्तार'त्याकारको जायते, समानाधिकरणसत्यज्ञानादिपदजन्यनिर्विकल्पकविषयत्वस्य तादृशाभेदं विनाऽनुपपत्तेः, तदुक्तं कल्पतरौ—'इतरव्यावृत्त्यादिकमर्थात्, न तु शब्दादिती'ति पक्षोऽद्वैतसिद्ध्यादावाश्रितः आश्रियते, तदा नोक्तक्लेशः । वाच्यार्थभेदावभासादिति पाठे तु वाच्यानां मिथो भेदज्ञानस्य सत्त्वात्तन्निवर्तकनिर्विकल्पकज्ञानस्य वाच्याभेदज्ञानद्वारकवाक्यार्थज्ञानस्योत्पत्तये सत्यादिनानापदानामावश्यकत्वात् न पौनरुक्त्यमित्यर्थः । ननु तादृशभ्रमनिवृत्तिं विनापि शुद्धपदार्थद्वयप्रमापूर्वकमहावाक्यार्थप्रमासम्भवात् तादृशभ्रमनिवर्तकज्ञानार्थकतया कथं पदसार्थक्यमिति चेन्न । उक्तज्ञानं विना हि ब्रह्मणोऽसत्यत्वशङ्कया वाक्यार्थज्ञानेऽप्यसत्यविषयकत्वरूपाप्रामाण्यशङ्का स्यात् । एवं ब्रह्मणः स्वप्रकाशकज्ञानानन्दानन्तादिभिन्नत्वशङ्कयाऽप्यपुरुषार्थवि-

न्यायरत्नावली ।

नाशित्वादिशङ्कासम्भवात्, मोक्षे परमपुरुषार्थान्यत्वशङ्कया स्वर्गादित्यागपूर्वकमोक्षेच्छादिना श्रवणादौ प्रवृत्तिर्न स्यात् । निष्प्रयोजनत्वशङ्कया ब्रह्मणः श्रुतितात्पर्याभावशङ्कापि स्यात् । तस्मात् तत्तच्छङ्कानिवर्त्तकज्ञानार्थं सत्यज्ञानानन्दानन्तादिपदानामावश्यकता ।

किञ्च सत्यत्वाद्युपलक्षितब्रह्मैक्यापन्नजीवस्वरूपाज्ञानस्य तादृशैक्यज्ञानं विना ानवृत्त्यसम्भवात् तादृशज्ञानस्य च तादृशब्रह्मावषयकावान्तरवाक्यार्थज्ञानमन्तरेणासम्भवात् तदर्थकतया सत्यादिपदान्यावश्यकानि । अत एव 'अस्थूलमनण्वह्रस्वमदीर्घ'मित्यादिवाक्यगतानि अस्थूलादिपदान्यपि आवश्यकानि, अस्थूलत्वाद्युपलक्षितब्रह्मैक्यज्ञानार्थकत्वात् । अज्ञानस्य तादृशजीवस्वरूपविषयकत्वन्तु (१)सत्यत्वादिविशिष्टब्रह्मधीपूर्वकसत्यत्वाद्युपलक्षितं

नारायणी ।

न्वयानुपपत्तिप्रतिसन्धाने सत्येव लक्षणया शुद्धबोधस्य संभवाल्लक्षणया तद्बोधार्थमेव पदान्तरोपन्यास इति भावः । वाच्यार्थस्य भेदावभासादिति पाठे तु सत्यादिपदानां नैकधर्मिबोधक(२)स्वरूपा पर्यायता, लक्ष्यार्थस्यैकत्वेपि शक्यार्थस्य(३) भेदाङ्गीकारात्, तथा च शक्त्यैकधर्मावच्छिन्नबोधकत्वमेव पर्यायत्वं नान्यदिति भावः ।

(१) सत्यत्वादिविशिष्टब्रह्मधीपूर्वकस्य सत्यत्वाद्युपलक्षितं ब्रह्म न जानामीति व्यवहारस्य विषयत्वम् इत्यर्थोत्रावसेयः ।

(२)—त्वेपि पर्यायता—इत्यादिपाठः खपुस्तके ।

(३)—सत्यत्वादिविशिष्टस्य शक्यतावच्छेदकस्य सत्यत्वादेरेव भेदाङ्गीकारात् । तथाच नैकधर्मिकबोधकत्वमात्रं पर्यायत्वं द्रव्यघटादिपदानामपि पर्यायतापत्तेः, किन्तु अभिन्नप्रवृत्तिनिमित्तत्वम् , तच्चात्र नास्त्येव, सत्यत्वादिभिन्नधर्मप्रवृत्तिनिमित्तकत्वादिति भावः ।

लक्ष्यार्थस्याविशेषेपि व्यवच्छेद्यविभेदतः । ज्ञानानन्दादिशब्दानां पर्यायव्यर्थते नहि ॥
भ्रमप्रतीतभेदस्याश्रयत्वप्रतियोगिते । (अवच्छिन्नवृत्ति यद्यत्तदुपलक्षितो बोधतः ॥)
भेदभ्रमनिवृत्तिर्हि सोयमित्यत्र दृश्यते । अतोऽनेकपदानां च श्रुतौ नहि विरुध्यते॥ इत्यादि इत्यधिकः पाठः खपुस्तके ।

रुक्तत्वम् । लक्ष्यस्य चार्थस्यैकत्वादखण्डार्थता । पदजन्यस्मरणस्य निर्विकल्पकवाक्यार्थानुकूलस्य निर्विकल्पकत्वमनुभववदेवाविरुद्धम् ।

न्यायरत्नावली ।

ब्रह्म न जानामिति व्यवहाराविषयत्वम् । एतेन ज्ञानस्य सत्यत्वादिविशिष्टप्रकारकधीद्वारा सत्यादिवाक्यजन्यत्वमेव सत्यत्वाद्युपलक्षितब्रह्मविषयकत्वम्, अज्ञानस्य त्वजन्यत्वात् कथं तादृशब्रह्मविषयकत्वमित्यपास्तम् ।

ननु वाच्याभेदज्ञापकत्वे सत्यादिवाक्यस्य शुद्धब्रह्ममात्रबोधकत्वरूपमखण्डार्थत्वं न स्यात् तत्राह--लक्ष्यस्य चेति । एकत्वाच्छुद्धत्वात् । ननु किञ्चिद्धर्मविशिष्टस्यैव स्मृतिः पदज्ञानाधीना वाक्यार्थज्ञानहेतुः, लोके तथा दृष्टत्वात्, तथा च कथं निर्विकल्पकस्मृतिः तथा तत्राह-पदजन्यस्मरणस्येति । वाक्यार्थानुकूलस्य वाक्यार्थबोधहेतोः । अनुभववदिति । वाक्यार्थानुभवस्येवेत्यर्थः । यथा चन्द्रस्वरूपमात्रजिज्ञासोत्तरं प्रवृत्तस्य प्रकृष्टप्रकाशश्चन्द्र इत्यादिवाक्यस्याज्ञातचन्द्रस्वरूपमात्रपरत्वम्, विशेषणसंसर्गपरत्वे मानाभावात् । तथा ब्रह्मस्वरूपमात्रजिज्ञासायां प्रवृत्तस्य सत्यादिवाक्यस्य तन्मात्रपरत्वम् । यथा तत्र जिज्ञासा-

नारायणी ।

ननु तर्हि संसर्गागोचरधीजनकत्वरूपाखण्डार्थत्वभङ्गप्रसङ्गः, संसर्गावगाहिबोधाङ्गीकारादत आह—लक्ष्यस्येति । लक्षणया पदबोध्यस्य । एकत्वात्-एकमात्रव्यक्तत्वात्, अखण्डार्थता-प्रतिपिपादयिषितपदार्थसंसर्गागोचरधीजनकता, वाक्यानामिति शेषः । ननु पदानां पदार्थतावच्छेदकपुरस्कारेणैव धीजनकत्वदर्शनात्कथं सत्यादिपदान्निर्विकल्पकस्मृतिः । आकाशादिपदात् त्वन्ततः सुबर्थैकत्वप्रकारिकां स्मृतिमिच्छन्ति तार्किकास्तत्राह—पदजन्येति । सत्यज्ञानादिपदजन्यस्मरणस्येत्यर्थः । निर्विकल्पकेति । निर्विकल्पकवाक्यार्थबोधहेतोः । निर्विकल्पकत्वं-निष्प्रकारकत्वम्, अनुभववत्-तत्त्वमस्यादिवाक्यजन्यानुभवस्येव। अविरुद्धं-प्रामाणिकम्,

न्यायरत्नावली।

प्रयोजकस्य प्रकृष्टप्रकाशकत्वचन्द्रत्वाद्युपलक्षितयोः भेदसंशयस्य निवृत्तिः, तथा तादृशस्य सत्यत्वज्ञानत्वाद्युपलक्षितयोः भेदसंशयस्य निवृत्तिः। यथा च तत्त्वमस्यादिवाक्यस्य तत्त्वंपदार्थोपलक्षितयोः भेदसंशयभ्रमनिवृत्त्यर्थं प्रयुक्तस्य सोऽयमिति वाक्यस्य तयोरैक्यमात्रपरत्वेन व्यक्तिमात्रनिर्विकल्पकजनकत्वम्, तद्व्यक्तौ तद्व्यक्तेः संसर्गाभावात्। तथा जीवत्वेश्वरत्वोपलक्षितयोः भेदसंशयभ्रमनिवृत्त्यर्थं प्रयुक्तस्य महावाक्यस्य तयोरैक्यमात्रपरत्वेन व्यक्तिमात्रनिर्विकल्पकहेतुत्वम्, तद्व्यक्तौ तद्व्यक्तेः संसर्गाभावात्। न चोपलक्षितव्यक्त्योर्भेदधीरेव न सम्भवति, अभावप्रत्ययस्य प्रतियोग्यनुयोग्यंशे (१)किञ्चित्संसर्गविषयकत्वनियमादिति वाच्यम्। अभावलौकिकप्रत्यक्षस्यैव तथा नियमात्। प्रकृते च जीवस्वरूपस्य प्रत्यक्षत्वेन भेदप्रत्यक्षसम्भवेऽपि ईश्वरस्वरूपस्य परोक्षतया तत्र भेदप्रत्यक्षस्यासम्भवेन तत्र भेदज्ञाने शुद्धयोः प्रतियोग्यनुयोगितासम्भवात्। न च तथापि तादृशभेदज्ञानस्यैक्यप्रमानिवर्त्यत्वानुपपत्तिः, प्रतियोग्यनुयोग्यंशे निर्विशेषणकस्य विरोधिधीनिवर्त्यत्वानभ्युपगमादिति वाच्यम्। प्रतिबद्ध्यत्वरूपनिवर्त्यत्वस्यानभ्युपगमेऽपि ऐक्यज्ञाननिवृत्तिद्वारा नाश्यत्वरूपस्य निवर्त्यत्वस्य तत्रानुभूयमानत्वेन तत्र निर्युक्तिकानभ्युपगमोक्त्या निरासासम्भवात्। न च उक्तज्ञानं प्रति अप्रतिबन्धकस्य निर्विकल्पकस्य जनकत्व सोऽयमित्यादिकं वाक्यमेव न स्यात्। विपरीतज्ञानप्रतिबन्धकधीजनकत्वस्यैव वाक्यत्वादिति वाच्यम्। विपरीतज्ञानाभावप्रयोजकधीजनकस्यैव वाक्यत्वं त्वयाप्युच्येत! तादृशप्रयोजकत्वं निर्विकल्पकस्य त्वन्मते न सम्भवति, प्रतिबन्धकत्वाभावात्। मन्मते त्वज्ञाननिवृत्तिद्वारा सम्भवत्येव। यदि चोक्तवाक्यस्य द्वारीभूतं तत्त्वोपलक्षितस्य भे-

(१) किञ्चिद्धर्मसंसर्गेति पाठो घपुस्तके।

सविकल्पकवाक्यार्थबोधे च सविकल्पकपदार्थोपस्थितिरङ्गम्। (१)निर्विकल्पकवाक्यार्थबोधे च निर्विकल्पपदार्थोप-

न्यायरत्नावली।

दाभाव इदंत्वोपलक्षितवृत्तिरित्याकारकज्ञानं तद्द्वारा तेन निर्विकल्पकजननात्, तदा तादृशज्ञानस्य तज्जन्यसंस्कारस्य वा निर्विकल्पकोत्पत्तिकाले सत्त्वात्, तादृशनिर्विकल्पकस्य तादृशसंस्कारोद्बोधकत्वात्, तादृशसंस्कारोद्बोधकयोर्भेदधीप्रतिबन्धकत्वं तार्किकरीत्यैव सम्भवति। (२)+परे तु औपनिषदानां कर्ममीमांसकवत् स्वशास्त्रे व्यवहारात् तद्वदेव विपरीतज्ञानविरोधित्वम्, तैश्च विपरीतज्ञानानुकूलशक्तिनाशद्वारा विपरीतज्ञानाभावे प्रयोजकत्वमेव प्रतिबन्धकत्वं विपरीतज्ञानं प्रति विशेषदर्शने स्वीक्रियते। औपनिषदानां तदनुकूलशक्तिरज्ञानमेव। तन्नाशद्वारा तदभावप्रयोजकत्वं निर्विकल्पस्येति तेषामाशयः+। तथा च वाक्यार्थानुभवस्य निर्विकल्पकत्वे सिद्धे तन्निर्वाहाय स्मरणमपि तथा कल्प्यमेवेति भावः।

एवमपि घटमानयेतिवाक्यार्थबोधस्य सविकल्पकत्वात् तत्र सविकल्पकस्मरणमावश्यकमिति नाव्यवस्थेत्याह—सविकल्पकेत्यादि। निर्विकल्पक इति। कुत्रचिद्विशेष्यतया विशेषणतयैव वा यत्रात्मा भाति तदन्येत्यर्थः। 'अहं ब्रह्म, घटादिकं मिथ्ये'ति ज्ञाने

नारायणी।

सोयं देवदत्तः प्रकृष्टप्रकाशश्चन्द्र इत्यादावपि फलानुसारेण तथा कल्पनात्। तथा च शक्त्यैव सप्रकारकधीजनकत्वनियमो न तु लक्षणयापीति दिक्।

तर्हि पदार्थोपस्थितिशाद्बबोधयोः कार्यकारणभावव्यवस्था कथं तत्राह—सविकल्पकेति। घटमानयेत्यादिवाक्यजन्यशाद्बबोधे इत्यर्थः। सविकल्पकेति। घटत्वादिप्रकारकेत्यर्थः। अङ्गम्-हेतुः। निर्विकल्पक इति।

(१) +···+एतच्चिह्नद्वयमध्यवर्ती पाठो घपुस्तके नास्ति।

(२) निर्विकल्पकवाक्यार्थबोधे च निर्विकल्पपदार्थोपस्थितिरङ्गम्। अयं पाठो गपुस्तके प्रमादभ्रष्टः प्रतिभाति।

स्थितिरङ्गम्। प्रकृते च निर्विकल्पको वाक्यार्थबोधः। तस्यैव प्र-

न्यायरत्नावली ।

(१)घटादेरेव विशेष्यत्वविशेषणत्वाभ्यां भानम्, न त्वात्मन इति तत्सङ्ग्रहः । 'अहं ब्रह्म, घटादिकमात्मनि कल्पितमि'ति ज्ञाने आत्मा विशेषणतयैव न भाति, (२)किन्त्वसंसृष्टरूपेण विशेषणतयापि भातीति तत्सङ्ग्रहः। प्रमात्वेन–अबाधितविषयकत्वेन । विशेष्यतया हि भासमान आत्मा संसर्गानुयोगी, विशेषणतया च (३)भासमानः संसर्गप्रतियोगी, तयोश्च मिथ्यात्वात्तदन्यताविषयकं ज्ञानं न प्रमेति नाविद्यातत्प्रयुक्तदृश्योच्छेदकम्, अधिष्ठानाविषयकत्वादिति भावः ।

ननु 'अहं ब्रह्म, घटो विनाशी'त्यादिसमूहालम्बन(४)स्य दैववशसम्पन्नकारणबलात् घटादिविषयकस्य अविद्योच्छेदकत्वमास्ताम् । इष्टापत्तौ च प्रमात्रादेः महावाक्यार्थबोधे भानानिराकरणस्य पूर्वकृतस्यानुपपत्तिरिति चेन्न । शुद्धस्वरूपान्यस्य तात्पर्याविषयत्वेन वाक्यार्थबोधे नियमतो न भानम् । दैववशसम्पन्नकारणबलात् प्रमात्रादेर्भानं तु स्यादेवेत्याशयबलेन नियमतः प्रमात्रादिभानस्यैव पूर्वं निराकृतत्वात् । न च 'तमेव विदित्वे'-

नारायणी ।

निष्प्रकारकशाद्बबोधे निष्प्रकारकपदार्थोपस्थितिः, सप्रकारस्थले सप्रकारकत्वेन निष्प्रकारस्थले च निष्प्रकारकत्वेनेति कार्यकारणभावद्वैविध्यकल्पनान्नाव्यवस्थेति भावः । एवंविधकल्पनासिद्धिमाह—प्रकृतेति । किमर्थं तत्राह—तस्यैवेति । निर्विकल्पकबोधस्यैवेत्यर्थः । प्रमात्वेन–अबाधितषिषयकत्वेन । लक्ष्यतावच्छेदकविशिष्ट एव लक्षणेति

(१)—अहं ब्रह्म, मिथ्यात्वं घटादिवृत्तीति ज्ञाने च इत्यधिकः पाठो घपुस्तके ।

(२) किन्तु असंसृष्टरूपेण भाति विशेषणतयापीति तत्सङ्ग्रह इति पाठो घ चपुस्तकयोः।

(३)—भासमानसंसर्गप्रतियोगीति पाठो गपुस्तके स चासमञ्जस एव ।

(४)—समुहालम्बनं दैववशसम्पन्नकारणबलात् घटादिविषयकमाविद्योच्छेदकमास्ताम् इति पाठो गपुस्तके ।

न्यायरत्नावली ।

त्वादिश्रुत्या आत्मान्याविषयकज्ञानस्याविद्यानिवर्तकत्वोक्त्या प्रमात्रादिविषयकं(१)शुद्धज्ञानं नाविद्यानिवर्तकमिति वाच्यम् । 'अन्नमेव भुक्त्वा तृप्तिविशेषमाप्नोति' इत्यादेरन्नेतरभोजनत्वविशिष्टाजन्यतृप्तिविशेषाद्यर्थकत्ववत्, 'व्याप्त्यादिकमेव विदित्वानुमिनोति, ब्राह्मणानेव दृष्ट्वा अयमतितुष्यती'त्यादौ व्याप्त्याद्याविषयकज्ञानाजन्यानुमित्याद्यर्थकत्ववच्च 'तमेव विदित्वे'त्यादावात्मान्याविषयकत्वविशिष्टज्ञानाजन्यमुक्त्यर्थत्वाद् आत्माविषयकज्ञानाजन्यमुक्त्यर्थत्वाद्वा। तं विदित्वैवेति योजना तु न युक्ता, श्रुतौ श्रुतसमभिव्याहारभङ्गस्यायुक्तत्वात्(२) । उक्तं च विद्यारण्यश्रीचरणैः—

न बुद्धिं मर्दयन् दृष्टो घटतत्त्वस्य वेदिता ।
उपमृद्नाति चेत् बुद्धिं ध्याताऽसौ न तु तत्त्ववित् ॥ इति ।

तत्त्वज्ञानस्य इतराविषयकत्वराहित्याय बुद्धिमर्दनं नापेक्ष्यते, इतरविषयकस्यापि तत्त्वविषयकत्वसम्भवात् । ध्याने तु विजातीयधीरहितसजातीयधीप्रवाहरूपे तदपेक्ष्यत इति ध्यानदीपिकास्थोक्तवाक्यार्थः । यत्तु 'जीवन्मुक्तस्य कदाचिदद्वैतात्मदर्शनं कदाचित् द्वैतदर्शनं न युगपत्सन्तमसबहुलालोकाविवे'ति विवरणे उक्तम् । तदद्वैतात्मजिज्ञासाकाले तदन्याविषयकज्ञानपरम् । अन्यथा प्रारब्धभोगसामग्रीबलाज्जायमानस्य द्वैतविषयकस्य शुद्धात्मज्ञानस्य वारणासम्भवात् । अथवा यथा 'घटो न घट' इति ज्ञानमाहार्यमेव, तथा शुद्धात्मस्वरूपाधिष्ठानतदारोपितद्वैतरूपविरुद्धद्वयविषयिका 'अहं ब्रह्म, घटो विनाशी'त्यादिवृत्तिराहार्यैव वाच्या । सा च न ज्ञानम् । अस्मन्मते हि आहार्यवृत्तिरिच्छादिवत् दृश्यन्तरमेव, न तु धीः । अतस्सा नात्मदर्शनमित्यद्वैतात्मदर्शनद्वैतदर्शनयोर्न यौगपद्यम् ।

न च तार्किकादिमते 'घटो न घट' इति ज्ञानस्य

(१) प्रमात्रादिविषयकशुद्धात्मज्ञानमिति पाठो घपुस्तके ।

(२) तस्मात्तत्त्वज्ञानस्य दृश्यविषयकत्वेपि न क्षतिः । इत्यधिकः पाठो घचपुस्तकयोः ।

न्यायरत्नावली ।

एकधर्मिणि विरुद्धयोरेकविशिष्टे अपरसंसर्गविषयकत्वेनाहार्यत्वेऽप्यतथाभूतमुक्तज्ञानं कथमाहार्यमिति वाच्यम् । 'नेह नानास्ति किञ्चने'त्यादिवाक्यैः प्रपञ्चस्य ब्रह्मणि निषेधा-(१)त्तदभावस्य शुद्धब्रह्मव्यापकत्वेन ग्रहात्, शुद्धब्रह्म(२)स्वरूपस्य तादात्म्येन घटाद्यभावव्याप्यतया गृहीतत्वात्, तादृशसद्रूपतादात्म्यस्य च दृश्याकारवृत्तौ दृश्यांशे भाननियमस्य सिद्धान्ते स्वीकारात्, 'अहं ब्रह्म सत् घटादिकं विनाशी'त्याकारकवृत्तेः घटाद्यभावव्याप्यतया गृहीतत्वेन घटादिविरुद्धे सद्रूपे घटादितादात्म्यविषयकत्वेनाहार्यत्वानपायात्, गन्धाभावव्याप्यतया गृहीते जलादौ गन्धसंसर्गविषयकवृत्तिवत् । अस्मिन् पक्षे च उक्तवृत्ति(३)र्नाविद्यानाशिका, ज्ञानत्वाभावात् । वस्तुतस्तूक्तवृत्तेः द्वैताद्वैतविषयकत्वेऽपि द्वैतांशे प्रमात्वानिश्चयेन प्रमात्वेन निश्चीयमानयोरेव द्वैताद्वैतधियोर्न यौगपद्यमित्यर्थकत्वेनोक्तविवरणवाक्यमविरुद्धम् ।

परमार्थतस्तु विशेषदर्शनस्य भ्रमविरोधित्वं सर्वानुभवसिद्धम् । तच्च तार्किकादिमते भ्रमप्रतिबन्धकत्वम् । वेदान्तदर्शने तु विशेषदर्शनस्याधिष्ठानज्ञानरूपस्य (४)+भ्रमं प्रति नाशरूपत्वं नाशजनकत्वं

(१) प्रपञ्चाभावस्येत्यर्थः ।

(२) शुद्धब्रह्मरूपसद्रूपस्य इति पाठो घपुस्तके ।

(३) नाविद्याविरोधिनी, ज्ञानान्यत्वादिति घपुस्तके ।

(४) अयमत्रात्यन्तं भिन्नोऽत्यन्तमधिकश्च पाठो घपुस्तके+·····+एतच्चिन्हद्वयवर्ती—

+एकत्वेन भ्रमकालानवस्थायित्वेन भ्रमनाशत्वमिति । तथाच तत्त्वज्ञानोत्पत्तिक्षणोत्तरक्षणे विद्यमानं तत्त्वज्ञानभिन्नं यद् दृश्यं तद्भिन्नयोर्भ्रमतद्विषययोर्नाशत्वस्य तत्त्वज्ञाने स्वीकारात् तत्त्वज्ञानं न घटादिदृश्यविषयकम्, दृश्यविषयकत्वे सति तस्य बाधितविषयकत्वेनांशिकभ्रमत्वापत्त्या तत्त्वज्ञानभिन्नतादृशदृश्याभिन्नत्वस्य तत्त्वज्ञानेऽपि सत्त्वात् । तत्त्वज्ञानरूपस्य तादृशदृश्यभिन्नभ्रमस्य नाशत्वं तत्त्वज्ञाने वक्तुमशक्यमित्युक्तानियमभङ्गः स्यात् । तत्त्वज्ञानभिन्नमित्यस्य दृश्यविशेषणस्यानुक्तौ तादृशदृश्यं तत्त्वज्ञानमपि तथापि तस्य

न्यायरत्नावली ।

वा । तथा च तत्त्वज्ञाने तदुत्पत्तिक्षणोत्तरक्षणवृत्तिदृश्येतरदृश्यप्रतियोगिनाशकत्वस्वीकारात् तत्त्वज्ञानं न भ्रमात्मकम् । स्वस्य स्वनाशत्वासम्भवात् । तादृशक्षणवृत्तिदृश्यन्तु तत्त्वज्ञानमज्ञानसंस्कारः तत्कार्यं प्रारब्धकर्मभोगोपयुक्तं अज्ञानोपादानककार्यं चेति तेषां तादृशक्षणवृत्तित्वादेव तन्नाशत्वं च तत्त्वज्ञानस्य सम्भवति । +न हि नाशः प्रतियोगिक्षणपूर्वक्षणवृत्तिः । तादृशदृश्येतरदृश्यं त्वज्ञानतत्प्रयुक्तानादिदृश्यं प्रारब्धभोगानुपयुक्तं अज्ञानोपादानक-

भ्रमत्वेपि तदन्यदृश्यनाशत्वं तत्त्वज्ञाने सम्भवतीति तत्त्वज्ञानस्य उक्तभ्रमान्यत्वासिद्धिरूपस्योद्देशस्य आसिद्धिः, अतस्तदुक्तम् । न च तादृशदृश्यान्यो भ्रमविषयः तत्त्वज्ञानमपीति तन्नाशत्वं तत्त्वज्ञानस्य न सम्भवतीत्युक्तनियमभङ्ग इति वाच्यम् । भ्रमविषस्य तत्त्वज्ञानान्यत्वेन विशेषणीयत्वात् । न चैवं भ्रमविषय इव भ्रमेपि तत्त्वज्ञानान्यत्वविशेषणोक्तिसम्भवेन तत्त्वज्ञानस्य भ्रमत्वमपि कुतो नोच्यत इति वाच्यम् ।

मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धाय विषयासक्तं मोक्षे निर्विषयं स्मृतम् ॥

इत्यादिमैत्रायण्यादिश्रुतिविरोधात् । विषयपदस्यानात्मपरत्वेन मोक्षपदस्य मोक्षसाधनपरत्वेन च प्रथमाविभक्तिश्चतुर्थ्यर्थकत्वेन वा अनात्माविषयकमनःपरिणामे मोक्षसाधनत्वस्य लाभात् । मोक्षसाधनमनःपरिणामत्वावच्छेदेन आत्मविषयकत्वाभावलाभाद्वा ।

लये सम्बोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः ।
सकषायं विजानीयात् शमप्राप्तं न चालयेत् ॥

इति गौडपादाचार्यीयपद्ये निरोधसमाध्यनुष्ठाने निराकरणीयत्वेनोक्तेषु लयविक्षेपकषायेषु आद्यतृतीययोः अनात्मविषयकमनःपरिणामरूपयोः मोक्षसाधनत्वासम्भवेपि मोक्षसाधनमनःपरिणामयोः सम्प्रज्ञातासम्प्रज्ञातसमाध्योस्तत्त्वज्ञाने चानात्माविषयकत्वसत्त्वात् । द्वितीयपक्षस्यादोषत्वात् ।

लयो—निद्रा, विक्षेपो—ऽनात्माकारवृत्तिः, कषायः—आत्मानात्मनोः कस्यापि ग्रहणायोग्यत्वं स्तब्धीभावाख्यम् । तत्त्वज्ञानोत्पत्तिक्षणोत्तरवृत्तितादृशदृश्यं तु प्रारब्धकर्मभोगोपयुक्तं तत्त्वज्ञानमदृष्टमनःशरीरादिकमज्ञानोपादानकं सुखदुःखादिकमज्ञानसंस्कारोपादानकं च, तेषां तादृशक्षणवृत्तित्वादेव न तत्त्वज्ञानरूपनाशप्रतियोगित्वम् । +नहि नाशः इत्यादि सममग्रे ।

न्यायरत्नावली ।

कार्यं (१)*भ्रमतद्विषयरूपं यत् तस्य सर्वस्य नाशः तत्त्वज्ञानम् । तत्पूर्वनष्टस्यापि सूक्ष्मावस्थारूपनाशं प्रति नाशत्वस्य तत्त्वज्ञाने सत्त्वेन तादृशनष्टप्रतियोगिकनाशत्वस्यापि सत्त्वात्, प्रागभावादिनाशात्मकघटादिनाशे प्रागभावनाशत्ववत्* । न चाज्ञानसंस्कारस्य सविषयकभ्रमविशेषोपादानत्वेनावश्य(२)कल्प्यतया तस्यैवाज्ञानादितादृशदृश्यनाशत्वमास्ताम्, तथा च तत्त्वज्ञानस्य घटादिविषयकत्वे बाधकाभाव इति वाच्यम् । पूर्वोक्तश्रुतिसिद्धेन दृश्याविषयकत्वेन तत्त्वज्ञानस्यापि तादृशदृश्यनाशत्वसम्भवात्, तादृशदृश्यनाशरूपसंस्कारोत्पत्तिक्षणोत्पन्नत्वेनैव तत्त्वज्ञानस्य भ्रमरूपत्वासम्भवाच्च । न हि नाशोत्पत्तिक्षणे प्रतियोगी विद्यते ।

किञ्च तत्त्वज्ञानस्योत्पत्तिक्षणमारभ्य क्षणत्रयं भ्रमात्यन्ताभावनियमस्तार्किकादिमते सिद्धः । मन्मते तु तादृशदृश्यात्यन्ताभावनियमः । तथा च(३)तादृशदृश्यवत्क्षणोत्तरक्षणेषु तादृशदृश्यनाशं विना तादृशदृश्यात्यन्ताभावासम्भवात् तत्राद्यक्षणे तादृशनाशस्योत्पत्तिर्वाच्या । स च तत्त्वज्ञानरूपः । ज्ञानसामग्र्याः तद्धेतुत्वस्य कल्पनत्वेन कल्पनहेतुनैव तदुत्पत्तिनिर्वाहे तद्भिन्ने तस्या हेतुत्वस्य कल्प्यत्वे गौरवात् । (४)ज्ञानतन्नाशयोरेव अज्ञानसंस्कारशब्देन शास्त्रे व्यवहारसम्भवात् । तदन्याज्ञानसंस्कारे मानाभा-

(१)—*च, तस्य सर्वस्य भ्रमतद्विषयात्मकस्य नाशः तत्त्वज्ञानम्, तत्पूर्वनष्टघटादेः सूक्ष्मावस्थारूपनाशस्य नाशस्तत्त्वज्ञानम्, अतः तादृशघटादेरपि नाशः । यथा प्रागभावनाशात्मकघटादेर्नाशः प्रागभावनाशः*—इति भिन्नः पाठे घपुस्तके ।

(२)—आवश्यकत्त्वेन तन्नाशस्यैवाज्ञानादिनाशत्वमास्ताम् इति गपुस्तके ।

(३)—तादृशदृश्यवत्क्षणान्तरेषूक्तक्षणाद्दिक्षणत्रये तादृशदृश्यनाशं विना तादृशदृश्यात्यन्ताभावसत्त्वासम्भवात् तादृशक्षणत्रयाद्यक्षणे तादृशनाशस्योत्पत्तिर्वाच्या—इति घपुस्तके ।

(४) ज्ञानतन्नाशयोरेव अतत्त्वज्ञानसंस्कारशब्देन शास्त्रे व्यवहारात् । तदन्यतत्संस्कारे मानाभावात् इति पाठो गपुस्तके ।

मात्वेनाज्ञाननिवर्तनसामर्थ्यात् । अतो(१) नलक्ष्यता-

न्यायरत्नावली ।

वात् तत्त्वज्ञानमेव तादृशदृश्यनाशः । एवं तत्त्वज्ञानस्य भ्रमनाशकत्वपक्षेऽपि न भ्रमत्वम्, स्वस्य (२)स्वनाशकत्वासम्भवात् । स्वोत्तरवृत्तिज्ञानादीनामेव ज्ञानादिनाशकत्वाङ्गीकारात् । अन्यथा क्षणिकत्वापत्तेः ।

अथवा सन्तमससामान्याभावः यथा बहुलालोकः तथा तादृशदृश्यसामान्याभावः तत्त्वधीतन्नाशयोरन्यतरत् । (३)अत एव 'सन्तमसबहुलालोकाविव न युगपत् द्वैताद्वैतदर्शने' इति विवरणदृष्टान्तस्वारस्यम् । एतेन नाशजनकत्वेनाभिमता सामग्री (४)अत्यन्ताभावस्य व्याप्या । स च प्रतियोगिमत्क्षणोत्तरक्षणे नाशोत्पत्तिं विनापि (५)सम्भवतीत्युक्तावपि न क्षतिः । अतो न लक्ष्यावच्छेदकमिति । निर्विकल्पकस्मरणस्य प्रकृतोपयुक्तत्वात् तद्धेतुतया शुद्धे लक्षणाज्ञानस्य कल्पनाया अन्यत्रादृष्टत्वेन प्रकृतेऽनुपपत्तिर्नेत्यर्थः । उक्तकल्पनोपपत्तौ हेतु-

नारायणी ।

यो नियमः सोपि निर्धर्मितावच्छेदकबोधस्याङ्गीकारेण नास्तीत्याह—अत एवेति । निर्धर्मितावच्छेदकशाद्बोधस्याङ्गीकारादेवेत्यर्थः । लक्ष्यतेति । शक्यसम्बन्धितावच्छेदकं विना, सप्रकारकवृत्तिज्ञानस्यान्यत्र साधन-

(१) अत एव न लक्ष्यतेत्यादिनारायणीसम्मतः पाठः ।

(२) स्वनाश्यत्वासम्भवात् इति घपुस्तके ।

(३) अत एव इति नास्ति गपुस्तके ।

(४) स्वोत्तरकालत्वसम्बन्धेन अत्यन्ताभावस्य व्याप्या इति ।

(५) —सम्भवतीति तादृशनाशे स्वीकृतेपि तादृशात्यन्ताभावोपि स्वीकार्य एव, तस्य तद्बुद्धापकत्वात् । शक्यते च नाशकत्वाभिमतसामग्र्या एवात्यन्ताभावं प्रति क्षेमसाधारणकारणत्वं प्रयोजकरूपोऽखण्डधर्मो वा वक्तुम् । एवं शुद्धे लक्षणया ज्ञानस्य शुद्धस्मृतिहेतुत्वं कल्प्यते अन्यथा शुद्धस्मृतेः प्रकृतोपयुक्ताया अनुपपत्तेरित्याह—अतो न लक्ष्यतावच्छेदकमिति । इति पाठो घपुस्तकेऽधिकः ।

वच्छेदकमन्तरेण लक्षणानुपपत्तिः । प्रकृतवाक्यार्थानुकूलपदार्थोपस्थितेरेव शक्तिलक्षणासाध्यत्वात् ।

न्यायरत्नावली ।

माह—प्रकृतेति । वाक्यार्थानुकूलेति । वाक्यार्थानुभवजनकेत्यर्थः । साध्यत्वादिति । ज्ञानसाध्यत्वादित्यर्थः । शक्तिज्ञानप्रयोज्यसम्बन्ध्युपस्थितेः लक्षणात्वमते वाक्यार्थानुभवस्य लक्षणासाध्यत्वात् तज्जनकोपस्थितेरपि तदुक्तिसम्भवः ।

'ननु तत्त्वमसी'त्यादिवाक्यानां शाब्दधीजनकत्वं नोपपद्यते, तदादिपदानां कार्यत्वान्वितार्थशाब्दानुभवं प्रत्येव हेतुत्वस्य कल्पनत्वात्। तथाहि—'तमानये'त्यादिवाक्यात् पित्राद्युच्चरितात् तदानयनं कार्यमित्यादिकमर्थं बुध्वा तदानयने प्रवृत्तस्य बालकस्य तदानयनरूपाञ्चेष्टामुपलभ्य तत्स्वरूपेण कार्येण तदनुकूलप्रवृत्तिमुक्तवाले अनुमाय तादृशप्रवृत्तिरूपकार्येण तत्कारणभूतां 'तदानयनं कार्य'मित्यादिबुद्धिमुक्तबालेऽनुमिनोति, ततस्तस्या बुद्धेरुपस्थितोक्तवाक्यजन्यतामनुमाय तदाद्यैकैकपदस्यानयेत्यादिपदान्तरार्थाघटितकार्यत्वघटितार्थशाब्दानुभवहेतुत्वं कल्प्यते । 'तमपसारये'त्यादावानयनादिकमविषयीकृत्य कार्यत्वं विषयीकृत्यैव तदादिपदार्थबुद्ध्युदयात् । लिङादिपदस्यापि कार्यरूपोऽर्थः 'स्वर्गकामो यजेत' इत्यादौ वेदे शक्त्या प्रतीयमानः का-

नारायणी ।

तया कल्पनस्य प्रकृते परित्यागे बीज स्पष्टयति—प्रकृतेति । अभिमतवाक्यार्थधीप्रयोजकेत्यर्थः । शक्तीति । शक्तिलक्षणान्यतरज्ञानजन्यत्वात् । सप्रकारकशाब्दबोधानुकूलसप्रकारकोपस्थित्यर्थमेव सर्वत्र सधर्मके लक्षणाङ्गीक्रियते न स्वभावतः, प्रकृते निर्विकल्पकबोधस्यैवाङ्गीकारात्तदुपस्थितये शुद्ध एव लक्षणोचिता अतो वृत्तिज्ञानोपस्थित्योरपि सप्रकारकत्वेन सविषयकत्वेन चेति द्विधा कार्यकारणभावः कल्पनीय इति भावः । शक्तीत्यनेन लक्ष्यतावच्छेदकं विना लक्षणेव शक्यतावच्छेदकं विना शक्तिरपि वक्तुं शक्येति ज्ञाप्यते इत्यन्यत्र विस्तरः ।

र्यत्वघटित एव । 'ओदनकामः पचेत' इत्यादिलौकिकवाक्यस्थ-लिङादिना लक्षणया बोद्ध्यमानं कार्यत्वघटितमेव, तद्विषयकधी-विषयस्य तद्घटितपदार्थत्वात् । कार्यत्वविषयको यस्तदा-दिपदार्थस्य शाब्दबोधस्तत्त्वेनैव तदादिपदज्ञानकार्यता । यदि च 'फलिनो वृक्षास्तानानये'त्यादिवाक्यजन्यशाब्दबोधे स्वातन्त्र्येण फलित्वादेः विषयतेत्यानुभाविकम्, तदा तादृशकार्यकारणभावो न स्वीक्रियते, परन्तु घटकर्मत्वादिनिष्ठं यत् कार्यत्वविधेयतानिरू-पितोद्देश्यतावच्छेदकत्वं तेन सम्बन्धेन शाब्दबोधं प्रति 'घटः कर्मत्व'मित्यादिनिराकाङ्क्षपदाजन्यघटकर्मत्वाद्युपस्थिति(१)विशिष्ट-कार्यत्वाद्युपस्थितिः हेतुः । 'आनये'त्यादिपदे श्रूयमाणे 'घट'मित्यादि-पदज्ञानं विनापि तादृशोपस्थितिमात्रेणोक्तसम्बन्धेन शाब्दबोधोत्पत्तेः 'घट'मित्यादिपदज्ञानस्य नोक्तधीहेतुत्वम् । (२)कार्यत्वविधेयतानि-रूपितोद्देश्यतासम्बन्धेनानयनादिनिष्ठेन शाब्दबोधे 'आनयनं कार्य'-मित्यादिनिराकाङ्क्षपदाजन्यकार्यत्वोपस्थितिविशिष्टानयनोपस्थिति-र्हेतुः । एवं नीलघटकर्मत्वाद्युपस्थितेरपि हेतुत्वम् । पदजन्या तदन्या वा या या उपस्थितिः यादृशयादृशशाब्दबोधोपधायिका, तत्तदुपस्थितिपर्याप्तानां शक्तिविशेषाणामेव तादृशतादृशशाब्दहेतु-तावच्छेदकत्वम्, न तु तादृशतादृशोपस्थितित्वानाम्, अतो नान-नुगमगौरवे । तच्च हेतुत्वं व्यापारविधया । करणत्वं तु तादृशोप-स्थितिजनकानां 'घट'मित्यादिपदानां तत्समानविषयकानामध्या-हृतनामान्तराणां च विभिन्नशक्तिविशेषवत्त्वेनैव, पदज्ञानेऽध्याहृ-तनामान्तरे च एकस्याश्शक्तेस्स्वीकारे क्रियापदकारकपदयोरेक-स्याप्यज्ञाने शाब्दबोधापत्तेः । कारकपदज्ञानकारकाध्याहारयोर-

(१)—कर्मत्वाद्युपस्थितिर्हेतुः इति पाठो घपुस्तके शोधितो दृश्यते ।

(२) कार्यतानिरूपितोद्देश्यतेत्यादि पाठो घपुस्तके ।

न्यतरस्य च फलोपधायकत्वात् । (१)विभिन्नपदे शक्तिस्वीकारे च कारकपदक्रियापदयोः कारकपदक्रियाध्याहारयोः क्रियापदकारकाध्याहारयोर्वा मिलितयोरेव दण्डचक्रवत् फलोपधायकत्वान्नोक्तापत्तिः ।

वस्तुतस्तु कारकपदक्रियापदकारकाध्याहाराक्रियाध्याहारेषु न शक्तिचतुष्टयं वाच्यम् । तथा चैकैव लाघवाच्छक्तिरस्तु । तस्या (२)एकस्या एव, घटत्वादेस्तत्तद्घटव्यक्तिष्विव क्रियाकारकपदयोः क्रियापदकारकाध्याहारयोः कारकपदक्रियाध्याहारयोश्च पर्याप्तिस्वीकारात् तदुभयसत्त्वे तादृशशाब्दधीरिति । अथवा पर्याप्तिर्न प्रकृते निवेश्यते, तृणफूत्कारसंयोगादाविव क्रियाकारकपदमेलनादिषु त्रिषु एकस्या एव शक्तेः स्वीकारसम्भवात् , क्रियाकारकाध्याहारमेलनादिषु तदस्वीकारसम्भवाच्च । एवं च 'फलिनो वृक्षा' इत्युक्तवाक्ये वृक्षादेर्नान्वयधीः, प्रथमान्तपदस्य विधेयीभूतकृतिसाध्यत्वैकदेशकृतौ विशेषणतया सम्बोध्यतया वा स्वार्थबोधकत्वात् , 'स्वर्गकामो यजेते'त्यादौ स्वर्गकामस्य कृत्या साध्यो याग इत्यादिशाब्दबोधात् । सम्बोध्यत्वं च प्रकृतवाक्यजन्यशाब्दधीमत्त्वेन तद्वाक्यवक्तुरिच्छाविषयत्वम् । प्रथमाविभक्त्यन्तचैत्रादिनामार्थे तस्यान्वयः । प्रकृते (३)तदन्वये निराकाङ्क्षत्वबाधौ । एवं चार्थान्तरशाब्दबोधस्य कार्यत्वोपस्थितिं विनाऽनुपपत्तेः तदुपस्थापकपदासमभिव्याहृतवाक्ये पदाजन्ययापि तदुपस्थित्यैव वाक्यार्थबुद्ध्युत्पा-

(१) विभिन्नशक्तिस्वीकारे इति पाठो घपुस्तके ।

(२) तस्या एकस्यैव घटत्वादेस्तद्घटव्यक्तिष्विवेति सर्वत्र पाठः, तस्यायुक्तत्वमालोच्य शोधितोऽस्माभिः । अथवा एकस्य घटत्वादेः इति दृष्टान्ते योजनीयम् , तथात्वेपि एकस्या इत्यध्याहार्यमेव ।

(३) प्रकृते त्वर्थान्वये निराकाङ्क्षत्वबाधाविति घपुस्तके ।

न्यायरत्नावली ।

दकत्वं न तां विनापि(१), शाब्दधीमात्रस्य कार्यत्वविषयत्वनियमात् तत्त्वमसीत्यादेः न ब्रह्ममात्रप्रमापकत्वसम्भव इति प्रभाकरानुयायिनो वदन्ति, तदसारम् । तदादिपदस्य हि न कार्यत्वघटितार्थशाब्दबोध एव हेतुत्वं कल्प्यते, 'स आगतः, स जीवती'त्यादौ कार्यत्वाविषयकशाब्दबोधस्यानुभाविकत्वेन कार्यत्वं विषयीकृत्यैव तदादि(२)बुद्ध्युदयादित्युक्तहेतोरसिद्धेः; किन्तु इतरान्वितार्थशाब्दबोधं प्रत्येव । तथा च शाब्दधीजननसामर्थ्यरूपा शक्तिः पदानामितरान्वितघटत्वादावेव, न तु कार्यत्वघटितघटत्वादौ ।

ननु, 'स आगत' इत्यादिवाक्यजन्यबोधात् न प्रवृत्तिः । कार्यताज्ञानस्यैव प्रवर्तकत्वात् । तथा चोक्तरीत्या शाब्दानुभवहेतुत्वस्यान्वितार्थे ग्रहीतुमशक्यतया कथमुक्तहेतुतारूपशक्तिग्रह इति चेत्, शृणु । उक्तवाक्ये तदादिपदस्य भ्रातृपुत्रादिप्रियपरत्वस्यापि सम्भवात्, तदागमनज्ञानस्य सुखहेतुतया उक्तवाक्यार्थबोधादुत्पन्नसुखपुरुषस्य मुखस्मेरत्वेन कार्येण तत्कारणं सुखमनुमीयते, तेन तद्धेतुमुक्तवाक्यार्थज्ञानमनुमिनोतीति हेत्वन्तराभावस्य निश्चयात् । उक्तवाक्यस्य प्रियागमनधीपरत्वनिश्चयाच्च । ततोऽन्वयव्यतिरेकाभ्यां तदादिपदस्य बुद्धिस्थपुत्रादिरूपेतरान्वितं प्रति तादृशशक्तिर्निर्णीयते । एवं 'नायं सर्प' इति वाक्यस्थलेऽपि भयनिवृत्तिकार्यनिष्कम्पगात्रत्वादिलिङ्गकानिर्भयत्वाद्यनुमित्यादिप्रकारेण सर्पादिपदस्यान्वितसर्पत्वादौ शक्तिर्निर्णयः ।

ननु, तथापि 'तत्त्वमसी'त्यादावनुपपत्तिः, अन्वितानुभावकत्वेन कल्पितस्य तदादिपदस्यानन्वितब्रह्मानुभावकत्वासम्भवादिति चेन्न । अन्वितेत्यस्य स्वघटितवाक्यतात्पर्यविषयार्थकत्वात् । तथा च यस्य पदस्य स्वघटितवाक्यतात्पर्यविषयो योऽर्थोऽन्वितोऽनन्वितो

(१) विनापीति घपुस्तके । (२) तदादिपदार्थबुध्युदयादिति घपुस्तके ।

वा, तत्रैव तस्यानुभावकत्वम् । ननु 'तत्त्वमसी'त्यादौ सर्वपदानां लाक्षणिकत्वेनानुभावकत्वमनुपपन्नम् । अनुभावकत्वमेव हि अभिहितान्वयवादे अन्विताभिधानवादे च पदानां शक्तिः । तस्याश्च लाक्षणिकपदे(१) स्वीकारे मुख्यामुख्यपदविभागानुपपत्तिः । अथाभिहितान्वयवादे तादृशदोषाभावः, पदाभिहितपदार्थज्ञानस्यैवानुभावकत्वेन पदस्याननुभावकत्वात् ।

न चोक्तवादे पदानां संसर्गरूपवाक्यार्थलक्षकत्वस्वीकारात् लक्षणाज्ञानविधया पदज्ञानानामेवानुभावकत्वमिति वाच्यम् । वाक्यार्थे हि स्वरूपसती पदवाच्यसम्बन्धरूपा लक्षणोपयुज्यते, घटमित्यादिपदशक्यस्य घटत्वीयकर्मत्वादेः तत्प्रतियोगिकत्वरूपो यस्सम्बन्धः तदाश्रयस्यैव दर्शनादिक्रियानिष्ठस्य निरूपकत्वादिसंसर्गस्योक्तकर्मत्वादिज्ञानानुभाव्यत्वात् । उक्तकर्मत्वाद्यप्रतियोगिकस्य निरूपकत्वस्य क्रियायामुक्तकर्मत्वादेस्संसर्गतया भाने औत्सर्गिकस्य स्वतः प्रमात्वस्य बाधापत्तेः । औत्सर्गिकस्वतःप्रमात्वं च दोषासहितायां ज्ञानसामान्यजनकसामग्र्याः व्यापिका प्रमोत्पत्तिरित्येवंरूपम् । (२)एवं च नोक्तलक्षणाधीः संसर्गशाब्दबोधे उपयुज्यते, न तरां तद्रूपेण पदज्ञानं हेतुरिति चेन्न । अभिहितान्वय इत्यस्य हि अयमर्थः—विभक्त्यन्तपदाभ्यां स्वार्थानुभवौ जन्येते, तादृशानुभवविषयत्वमेव पदार्थस्याभिहितत्वम्, तदुत्तरं तु तादृशानुभवाभ्यामेव विभक्त्यन्तपदार्थयोः संसर्गानुभवः, न तु पदेन, तथा च पदाभिहितयोरर्थयोरन्वयधीः, न तु विभक्त्यन्त(३)पदार्थयोर्मध्ये एकपदार्थान्वितस्यापरपदार्थस्य पदजन्यानुभव इति ।

अन्विताभिधानमित्यस्याप्ययमर्थः—एकपदस्य विभक्त्यन्त-

(१)—पदेऽपि स्वीकारे इति घपुस्तके ।

(२) एवं चोक्तलक्षणाधीः.....न तद्रूपेण० इति पाठो घपुस्तके ।

(३)—पदयोर्मध्ये इति घपुस्तके ।

न्यायरत्नावली।

स्यार्थेनान्वितोऽन्यपदार्थः पदेनानुभाव्यते, न तु विभक्त्यन्तपदार्थमात्रमिति। तथा चाभिहतान्वयपक्षे विभक्त्यन्तप्रत्येकपदजन्यानुभवस्य वाक्यार्थधीहेतुत्वेन 'घटमानये'त्यादौ स्वीकारेण 'तत्त्वमसी-'त्यादावपि निर्विकल्पकस्य तादृशस्य प्रकृतिप्रत्ययोभयतात्पर्यविषयार्थानुभवस्यावश्यकत्वेनोक्तदोषानवकाशात्(१)। घटमित्यादौ हि घटत्वकर्मत्वादिरूपोऽर्थः प्रकृतिप्रत्ययाभ्यामभिधीयते। (२)तादृशाभिधायकत्वशक्तिसम्बन्धरूपघटादिपदस्य स्वार्थस्मारकत्वम्। अन्वितघटत्वानुभावकत्वमेव घटत्वेन घटपदस्य सम्बन्धः। अन्वितकर्मत्वानुभावकत्वमेव कर्मत्वस्य द्वितीयाविभक्तौ सम्बन्धः। कर्मत्वाद्यन्वयानुभावकत्वस्याभिहितकर्मत्वादावेव(३) स्वीकारेण पदेष्वस्वीकारात्। यदि त्वनुभावकत्वं न स्मारकसम्बन्धस्स्वीक्रियते, तदा घटादिपदस्य घटत्वादिस्मारकत्वं नोपपद्यते। न हि स्मरणानुकूलशक्तिरेव स्मार्यस्मारकयोस्सम्बन्धः स्मृतिप्रयोजकः, तथा स्वीकारेऽनुभवाविरोधात्। तादृशशक्त्यन्यस्य संयोगादेः सम्बन्धस्य हस्तिहस्तिपकादिनिष्ठस्य स्मृतिप्रयोजकस्य दृष्टत्वाच्च। उक्तानुभावकत्वान्यस्य उक्तशक्त्यन्यस्य सम्बन्धस्य च कल्पने गौरवम्।

ननु घटादिपदेषु घटत्वादिस्मारकत्वस्याभिहितान्वयपक्षे स्वीकारे--

अभिहितघटना यदा तदानीं स्मृतिसमबुद्धियुगं पदे विधत्तः।
परदृशि पुनरन्विताभिधाने पदयुगलात् स्मृतियुग्ममेव पूर्वम्॥

इति संक्षेपशारीरकोक्तिविरोधः। घटना अन्वयः, परदृशि

(१)—दोषानपायादिति घपुस्तके।

(२) तादृशाभिधायकत्वरूपशक्तिसम्बन्धमादाय घटादिपदस्य स्वार्थस्मारकत्वम्। घटत्वान्वितानुभावकत्वमेव घटत्वस्य घटपदे सम्बन्ध इति घपुस्तके।

(३) कर्मत्वादेव इति गपुस्तके।

न्यायरत्नावली ।

शुद्धचितीत्यादिर्हि तदर्थः, इति चेन्न । पदपदस्य प्रत्ययान्तप्रकृतिपरत्वात् । तथा च प्रकृतिप्रत्ययाभ्यां जायमाना धीर्न स्मृतिः । घटत्वीयकर्मतामनुभवामीति शृणोमीति चानुभूयमानत्वात् । स्मृतिशक्तत्वान्यस्य स्मृतिप्रयोजकसम्बन्धस्यानुभावकत्वरूपस्यैव पदे वाच्यत्वाच्च । नापि प्रमाऽनुभवः, ज्ञातविषयकत्वात् । अतः स्मृतिसमः ।

ननु केवलेनापि प्रकृतिपदेन प्रत्ययपदेन च घटत्वादेः कर्मत्वादेरनुभव एवाभिहितान्वयपक्षे उत्पद्यते, न स्मृतिः । तथा च पदपदस्य कथं प्रत्ययान्तपरत्वमिति चेन्न ।

प्रत्ययप्रकृतिशब्दतो बहिर्विद्यतेऽभिहितसङ्गतिश्च नः ।
प्रत्ययप्रकृतिशब्दयोः पुनर्नित्यमन्वितधियो निमित्तता ॥

इति संक्षेपशारीरकोक्त्या प्रकृतिप्रत्ययथोः घटत्वाद्यन्वितानुभावकत्वस्यैवोक्तत्वात् । प्रत्ययप्रकृतिशब्दतो बहिरिति । प्रकृतिप्रत्ययशब्दार्थयोः केवलयोः यस्संसर्गः तदन्यस्य पदार्थयोः संसर्गस्येत्यर्थः । विभक्त्यन्तपदार्थप्रतियोगिकसंसर्गस्येति यावत् । अभिहितसङ्गतिरिति । पदाभिहितार्थानुभाव्यतेत्यर्थः । अन्वितधियः प्रकृत्यर्थान्वितप्रत्ययार्थानुभवस्य । तद्भूतार्थाधिकरणीयवार्तिकोक्तपक्षाणां चरमत्वात्(१) अयमेव पक्षः प्रामाणिकः । तथाहि—

भावनैव हि वाक्यार्थः सर्वत्राख्यातवत्तया ।
अनेकगुणजात्यादिकारकार्थानुरञ्जिता ॥
अन्वयव्यतिरेकाभ्यां प्रत्ययार्थस्तु सेष्यते ।
कैश्चिदन्यैस्तु धात्वर्थः साभीप्येनोपकारतः ॥
अपरैस्समुदायार्थः तत एव हि गम्यते ।
पाकादौ यत्र दृष्टा सा भवत्यादौ तथैव च ॥

(१) चरमत्वादप्ययमेवेति घपुस्तके ।

न्यायरत्नावली।

इति वार्तिक। वाक्यार्थः वाक्यजन्यशाब्दधीमुख्यविशेष्यः। आख्यातवत्तया आख्यातसामान्यबोध्यत्वात्। प्रत्ययार्थः प्रत्ययमात्रवाच्यः। एवं धात्वर्थादिकं बोध्यम्। ततः अन्वयव्यतिरेकाभ्यां पचतीत्यादिस्थले आख्यातान्वये भावनान्वयः। पाक इत्यादिस्थले तद्व्यतिरेकेण भावनाव्यतिरेकः। भवत्यादौ सिद्धकर्तृक्रियावाचकधातौ। तदुक्तं वार्तिके—

सिद्धकर्तृक्रियायोगादाख्यातप्रत्यये सति।
सामानाधिकरण्येन करोत्यर्थोऽवगम्यते॥

इत्यर्थके। भावनामात्रं प्रत्ययगम्यमिति प्रथमपक्ष उक्तः, तत्र भावनेति कर्मत्वादेरुपलक्षणम्। तथा च प्रत्ययमात्रं कर्मत्वादिमात्रस्य वाचकम्। वाचकत्वं च अनुभावकत्वम्। शक्तिविषयकसंस्कारेणोद्बुद्धेन सहितादमादिपदात् कर्मत्वादेः प्रथमत एव शाब्दोऽनुभवः, न तु तत्स्मरणोत्तरम्। एवं घटादिपदादपि घटत्वादेस्तथा। तदस्मिन् पक्षे केवलघटत्वादेश्शाब्दानुभवस्यानुभवपराहतत्वात् द्वितीयतृतीयपक्षावुक्तौ। तत्र द्वितीयपक्षे प्रकृतेः प्राधान्येन मुख्यत्वात् कर्मत्वाद्यन्वितघटत्वाद्यनुभावकत्वम्, धातुपदस्य प्रकृतिमात्रपरत्वात्। सोऽयं पञ्चकं प्रातिपदिकार्थवादः। स्वार्थद्रव्यलिङ्गसङ्ख्याकर्मत्वादिरूपस्य पञ्चकस्य प्रातिपदिकार्थस्य तन्मते स्वीकारात्। उक्तं च वैयाकरणैः—

वाचिका द्योतिका वा स्युर्द्वित्वादीनां विभक्तयः।
स्याद्वा सङ्ख्यावतोऽर्थस्य समुदायोऽभिधायकः॥ इति॥

न तु तस्या घटत्वाद्यन्वितकर्मत्वाद्यनुभावकत्वम्, तस्यास्तद्वाचकत्वाव्यवहारात्। यन्मुख्यविशेष्यकशाब्दबोधानुकूलशक्तिमत्त्वं यत्पदे तिष्ठति, तत्रैव तद्वाचकत्वव्यवहारात्। कर्मत्वादिप्रकारकघटत्वविशेष्यक एव शाब्दबोधे घटपदस्य शक्तत्वात्तद्वाचकत्व-

न्यायरत्नावली ।

व्यवहारः । तार्किकादीनामपि सम्मतमेवैतत् । घटत्वादिवाचकत्वस्य घटादिपदे (१)तैरस्वीकारात् । (२)शक्तिज्ञानस्य कारणत्वे घटत्वानुभवानुकूलशक्तिमत्त्वेनैवेत्यन्यत् । अस्मिन्(३) पक्षे करणत्वविशिष्टं दधि विधीयते, 'दध्नेन्द्रियकामस्य जुहुया' दित्यत्रेति शास्त्रदीपिकाद्युक्तिः । तदत्रापि पक्षे कर्मत्वादेर्विशेष्यत्वेन बोधस्य सर्वानुभाविकस्य बाधात्तृतीयः पक्ष उक्तः । तत्र घटत्वादिविशिष्टकर्मत्वादिविषयकशाब्दानुभवे प्रकृतिपदोत्तरत्वविशिष्टप्रत्ययपदस्य कारणताग्राहकमानेन विशेषणीभूतप्रकृतरपि कारणत्वग्रहात् घटत्वाद्यन्वितविषयकशाब्दत्वेन घटादिपदकार्यता । अमादिपदस्य तु प्रकृत्युत्तरत्वविशिष्टत्वेन रूपेण घटत्वादिविशिष्टकर्मतादिशाब्दबोध इवाम्त्वादिकेवलरूपेणान्वितकर्मत्वादिशाब्दत्वावच्छिन्ने कारणत्वम् । द्वितीयपक्षे प्रत्ययः पूर्ववृत्तितारूपेण सामीप्यसम्बन्धेन प्रकृतिनिष्ठकारणतावच्छेदकत्वात् प्रकृतेरुपकारकः । न तु कारणम् । तस्य कारणतायामुपाधित्वेन दण्डत्वादेरिव विशेषणत्वस्यास्वीकारात् । तृतीयपक्षे प्रकृतिरुत्तरवृत्तितारूपेण सामीप्यसम्बन्धेन प्रत्ययनिष्ठकारणतावच्छेदकत्वात् प्रत्ययस्योपकारिका । विशेषणत्वस्वीकारात् ज्ञायमानलिङ्गमिव कारणमपीति भावः । तस्मात् केवलस्य घटत्वादेः स्मृतिरेव नानुभवः । घटत्वाद्यन्वितकर्मत्वादेस्तु न स्मृतिः नापि प्रमानुभवः, तस्य 'घटं पश्ये'त्यादिवाक्यार्थधीपूर्वमपि ज्ञातत्वेनाज्ञातविषयकत्वघटितप्रमात्वस्याभावात् । दर्शनादेर्घटत्वादिकर्मत्वेनाज्ञातत्वेऽपि घटत्वादेः कर्मत्वादिमात्रमुक्तवाक्यं विनापि ज्ञायत एव । अतो 'घटं पश्ये'ति प्रत्ययान्तपदाभ्यां ज्ञातविषयकत्वेन स्मृतिसममनुभवद्वयं जन्यते ।

(१) तैः स्वीकारात् इति घपुस्तके तैरपि स्वीकारादिति चपुस्तके ।

(२) शक्तिज्ञानस्य तु कारणत्वमिति घचपुस्तकयोः ।

(३) अस्मिन्नेव पक्षे इति घपुस्तके ।

न्यायरत्नावली ।

अन्विताभिधानपक्षे तु तयोर्घटत्वीयकर्मत्वाद्य(१)नुभावकत्वस्वीकारात्तदेव सम्बन्धं पुरस्कृत्य घटत्वकर्मत्वादेर्दर्शनाद्यन्वितप्रत्ययार्थस्य च स्मृतिद्वयमेव ताभ्यां जन्यते । प्रकृतिप्रत्ययाभ्यां हि तादृशस्मृतिशक्तत्वं केवलघटत्वादिस्मृतिशक्तत्वमुक्तान्वयानुभावकत्वं वा सम्बन्धं पुरस्कृत्य घटत्वकर्मतात्वयोः स्मृतिद्वयम् । तेन च घटत्वीयकर्मतास्मृतिः । कर्मत्वस्याखण्डशक्तिरूपत्वे तु तस्यैव(२)स्मृतिः। अतः प्रत्ययान्तपदघटकाभ्यां प्रत्येकपदाभ्यां प्रयुक्तत्वादन्वितकर्मतास्मृतिः प्रत्ययान्तपदजन्येति व्यवह्रियते ।

नचाभिहितान्वयपक्षे अन्विताभिधानपक्षे च प्रथमत एव घटत्वाद्यन्वितकर्मत्वादिस्मृतिसम्भवात्, तया च यथामतं शाब्दधीसम्भवात् तत्पूर्वस्मृतिस्वीकारो व्यर्थ इति वाच्यम् । अन्वितकर्मतानुभावकतात्वादिरूपेण उक्तानुभावकत्वरूपशक्तिज्ञानं नोक्तकर्मत्वादिशाब्दधीहेतुः, गौरवात् ; किन्तु घटत्वानुभावकतात्वकर्मत्वानुभावकतात्वादिरूपेण । तथा चानुभावकत्वरूपशक्तेः यदीयतया ग्रहणं यत्र पदे भवति, ततस्तस्यैव स्मरणादाद्यपक्षे स्मृतिद्वयव्यवधानेन द्वितीयपक्षे स्मृतित्रयव्यवधानेन उक्तशाब्दधीः । अत एव 'घटमानये'त्यादौ घटादेर्लक्षणया शाब्दधीः शक्यस्मृतिजन्या, शक्यस्मृतेरेव लक्षणात्वात् । 'घटेन जलमाहरे'त्यादौ तु घटत्वादेरेव जलाहरणादौ करणत्वेन शाब्दधीः । अत एव 'व्रीहिभिर्यजेते'त्यादिश्रुतौ व्रीहित्वादेरेव करणत्वेन शाब्दधीः, करणीभूतव्यक्तिपरिच्छेदद्वारा जातिगुणादेरपि करणतासम्भवात् । 'गोमयैः पचति, काष्ठैः पचती'त्यादौ परम्परयापि करणत्वव्यवहारात् । एवं च 'घट'मित्यादिपदजन्यं ज्ञानं घटत्वकर्मतादेरादिपक्षे शाब्दधी-

(१)—कर्मत्वाद्यन्वयानुभावकत्वेति चपुस्तके ।

(२) तस्यैव प्रथमतः स्मृतिरिति पाठो घपुस्तके ।

जनकम्, तदन्वयस्य द्वितीयपक्षे, तथापि 'घट'मिति पदं न घटत्वादिशक्तमुच्यते, 'घटे'त्यस्यैव कर्मत्वकरणत्वादिरूपघटत्वान्वितमात्रं प्रत्यनुभावकत्वात् । उद्बोधकविधया स्वजन्यां स्मृतिं द्वारीकृत्य हि पदज्ञानस्य शाब्दबोधे कारणत्वम् । तच्च यद्रूपविशिष्टपदविशेष्यकजातिरूपार्थशक्तिज्ञानत्वेन हेतुता, तद्रूपविशिष्टपदज्ञानत्वेनैव । तच्च रूपं घट इतिपदत्वम्, घट इति पदविशेष्यकस्यैव घटत्वशक्तिज्ञानस्य लाघवेन घटत्वान्वितविषयकशाब्दधीत्वावच्छिन्नं प्रति प्रथमपक्षे, घटत्वान्वितप्रतियोगिकान्वयशाब्दधीत्वावच्छिन्नं प्रति द्वितीयपक्षे हेतुत्वात् । द्वितीयाविभक्त्यादिविशेष्यकस्यैव (१)कर्मत्वादिशक्तिज्ञानस्यान्वितकर्मत्वादिशाब्दधीत्वावच्छिन्नं प्रति प्रथमपक्षे, कर्मत्वाद्यन्वयशाब्दधीत्वावच्छिन्नं प्रति द्वितीयपक्षे हेतुत्वात् । अत एव 'घटत्वशक्तं घटपद'मित्यादि मीमांसकानां व्यवहारः । यत्पदस्य यच्छक्तत्वज्ञानत्वेन हेतुता, तच्छक्तत्वेनैव तत्पदस्य व्यवहारात् ।

वस्तुतस्तु 'अभिहितघटने'त्युक्तवाक्यस्य तत्त्वमस्यादिवाक्यमधिकृत्योक्तत्वात् तत्रैव तत्त्वम्पदयोः स्मृतिसमधीद्वयजनकत्वम् । तादृशधीद्वयस्य निर्विकल्पकत्वात्, पदार्थमात्रविषयकत्वेन पदार्थस्य च सत्यादिवाक्येन पूर्वं ज्ञातत्वात् स्मृतिसमत्वम् । न चोक्तपदाभ्यां प्रत्येकं शाब्दबोधजनने मानाभाव इति वाच्यम् ।

प्रातिपदिकान्यनतिरिक्तविषयाणि
प्राह भगवान् प्रथमशब्दितविभक्त्या ।
पाणिनिरतस्सकलतर्कसमयज्ञो
वष्टि वचसोरनातिरिक्तविषयत्वम् ॥

इति संक्षेपशारीरकोक्त्या तथा लाभात् । अत एव 'संसर्गा

(१) कर्मत्वादेः शक्तिज्ञानान्वितकर्मत्वादीति पाठो घपुस्तके ।

न्यायरत्नावली ।

विषयकप्रमाजनकत्वे सत्यपर्यायशब्दत्व'मिति अखण्डार्थकत्वलक्षणे घटः कलश इत्यादि वारणायापर्यायशब्दत्वमित्युक्तमित्यद्वैतसिद्धावुक्तम् ।

किञ्च अभिहितान्वयरक्षार्थमेव प्रत्ययान्तपदमात्रजन्यानुभवोऽवश्यं वाच्यः । अभिहितान्वये हि प्रत्ययान्तप्रकृतिपदमात्रधीजनितेन शाब्दानुभवेन जनितः प्रत्ययान्तपदद्वयार्थशाब्दानुभवः । प्रत्ययान्तपदाभ्यां स्वजन्यस्मृतिद्वारा एकस्यैव शाब्दानुभवस्य स्वीकारे (१)जन्यजनकभावापन्नयोरनुभवयोरसम्भवः । तथा च तत्त्वमसीतिवाक्यस्थपदयोरेव स्मृतिसमधीद्वयहेतुत्वात् घटत्व(२)कर्मत्वादिबोधस्याज्ञातविषयकत्वेऽपि न क्षतिः । (३)आद्यपक्षे घटत्वाद्यन्वितकर्मत्वादिशाब्दज्ञानस्य तादृशकर्मत्वाद्यन्वितशाब्दधीत्वावाच्छिन्न प्रति हेतुत्वेपि घटादिपदस्यापि घटत्वाद्यन्वितानुभावकत्वात्(४) ।

ननु तत्त्वमस्यादिवाक्यस्थपदानां लाक्षणिकानामपि प्रत्ययान्तपदतात्पर्यविषयत्वानुभावकत्वात् , तादृशविषयशक्तत्वापत्त्या मुख्यामुख्यपदविभागानुपपत्तिर्दोष इति चेन्न । लक्ष्यार्थशाब्दधीस्थले लक्षणाया एव तादृशधीहेतुत्वात् , लक्षकपदज्ञानस्य (५)हेतुत्वे मानाभावः । तस्याश्शाब्दत्वं तु शब्दाजन्यत्वेऽपि शब्दप्रयोज्यत्वादेव । अन्यथा भट्टमतेऽपि महावाक्यार्थज्ञानस्य शाब्दत्वानुपपत्तेः । यन्मते हि लक्षणाज्ञानं कारणम् , तन्मते गङ्गादिपदविशेष्यकस्य तीरादिसम्बन्धिप्रवाहशक्तत्वज्ञानस्य

(१) स्वीकारे तु कार्यकारणभावापन्नयोरनुभवयोरसम्भव इति घपुस्तके ।

(२) घटत्वान्वितकर्मत्वादीति घपुस्तके ।

(३) तस्मादाद्यपक्षे इति घपुस्तके ।

(४) घटत्वाद्यन्वितानुभावकत्वात्, तत्त्वमस्यादिवाक्येत्यादि पाठो घपुस्तके ।

(५) तद्धेतुत्वे इति घपुस्तके ।

न्यायरत्नावली ।

तीरस्मृतिहेतुत्वात्तस्य तद्द्वारा तीरशाब्दधीहेतुत्वसम्भवः । प्रवाहशक्तत्वप्रकारकगङ्गादिपदज्ञानजन्यप्रवाहस्मृतिजन्यतीरस्मृतिरूपलक्षणाया एव तीरशाब्दधीहेतुत्वमिति प्राचीनतार्किकमीमांसकादिमते तु तादृशस्मृतौ पदज्ञानस्य हेतुत्वे न मानमस्ति । गङ्गापदज्ञानस्य तादृशज्ञानत्वेनोद्बोधकविधया कारणत्वस्य गङ्गापदशक्तिज्ञानसंस्कारजन्यस्मृतिं प्रत्येव क्लृप्तत्वेन तीरादिशाब्दधीजनकस्मृतिं प्रत्यक्लृप्तत्वात् ।

न चैवं शक्यस्मृत्यैव शक्यार्थशाब्दबुद्धेः सम्भवात् तादृशस्मृतावेव पदज्ञानं हेतुरस्तु, न तूक्तशाब्दबुद्धाविति वाच्यम् । शक्तिग्रहकाले प्रवृत्त्यनुमितशाब्दबोधं प्रति पदज्ञानस्य हेतुतां कल्पयित्वा तस्यास्साक्षादसम्भवेन तदुपपादकतया शक्यस्मृतिद्वारकत्वस्य क्लृप्ततयोक्तस्मृतेः कारणत्वमादाय पदज्ञानकारणत्वस्येदानीं त्यागे उपजीव्यविरोधापत्तेः । शक्यार्थशाब्दधीहेतुधीविषयत्वस्यैव पदे (१)शक्यसम्बन्धरूपत्वेन तत्र तस्याक्लृप्तत्वे सम्बन्धिज्ञानविधया पदज्ञानजन्यायाः शक्यस्मृतेरसम्भवाच्च । लक्ष्यशाब्दधीस्थले तु प्रवृत्त्यनुमितया तया स्वकारणतया न पदं कल्प्यते, किन्तु तादृशलक्षणैव । (२)अतश्च पदं न लक्ष्यस्यानुभावकमिति न तत् शक्तम् , ततश्च लक्ष्यार्थं प्रत्यमुख्यमेवेति न मुख्यामुख्यपदविभागानुपपत्तिः । एवं च तत्त्वमस्यादिवाक्ये सर्वपदलाक्षणिकत्वेऽपि 'लाक्षणिकं नानुभावक'मिति सिद्धान्तस्य न भङ्गः, तत्त्वमादिपदानामनुभावकत्वास्वीकारात् । उक्तपदज्ञानजन्यशक्यापस्थितमूलकलक्ष्योपस्थितेरेवानुभावकत्वस्वीकारात् ।

न चैवं भट्टमते पदाध्याहारनियमो न स्यात् , सर्वपदलाक्षणिकस्थले शाब्दबोधस्य पदाजन्यत्ववत् शाब्दबोधहेतुस्मृतेः पदा-

(१) शक्तिसम्बन्धेति गपुस्तके । (२) अत एव पदमित्यादिपाठो घपुस्तके ।

जन्यत्वसम्भवादिति वाच्यम् । पदप्रयोज्यस्मृतेस्तदजन्यस्मृतिसहकारेण शाब्दबुद्ध्यनुपधायकत्वेन द्वारमित्येव श्रुते पिधेहीति पदस्यावश्यकल्प्यत्वात् । (१)शाब्दीतिन्यायेन श्रुतशब्दस्य शब्देनैवाकाङ्क्षापूरणात् । अत एव यत्र पदं किमपि न श्रूयते, तत्र न पदाध्याहारः, यथा—

पश्यतः श्वेतिमारूपं हेषाशब्दं च शृण्वतः ।
खुरविक्षेपशब्दं च श्वेतोऽश्वो धावतीति धीः ॥
दृष्टा वाक्यविनिर्मुक्ता न पदार्थैर्विना क्वचित् ।

इति वाक्याधिकरणे भट्टैरुक्तम् । तच्च न्यायरत्नाकरे व्याख्यातम् । अश्वत्वाद्यनुपहितं श्वेतत्वं पश्यन् तस्मिन् प्रदेशे हेषाशब्देनाश्वं खुरशब्देन गमनञ्चानुमिमानोऽनुपलब्धिप्रमाणेन तत्प्रदेशे श्वेतत्वाद्यन्वययोग्यवस्त्वन्तरस्याभावं जानन् पुरुषः कल्पयति 'श्वेतत्वादीनामन्यान्वयसाकाङ्क्षाणां मिथोऽन्वयं विनानुपपन्नत्वधीसहकृतं साकाङ्क्षत्वयोग्यत्वसन्निधिसहकृतं च श्वेतत्वादीनां ज्ञानं तेषां मिथोऽन्वयधीकरण'मिति । न च घटमानयेत्यादौ पदानामेकवाक्यताज्ञानस्यार्थज्ञानसहकारितया क्लृप्ततया तदभावेऽर्थज्ञानस्य शाब्दबुध्युपधायकत्वासम्भवात् 'श्वेतोऽश्वो धावती'ति वाक्यमेव तत्र कल्प्यते, न तु तादृशस्यार्थज्ञानस्य शाब्दधीकारणत्वमिति वाच्यम् । नानावर्णघटितपदानां कल्पनापेक्षया एकस्यानुपपत्तिज्ञानस्यैव कल्पनाया लघुत्वात् । मीमांसकमते हि वर्णानां नित्यत्वात् घकारोत्तरटकारत्वं न घटपदत्वम्, किन्तु घज्ञानोत्तरज्ञेयटत्वम् । तथा च वर्णसमसङ्ख्याकज्ञानानां पदघटकत्वात् पदसमसङ्ख्याकज्ञानानां च वाक्यघटकत्वात् अनुपपत्तिज्ञानस्य चैकत्वात् तदपेक्षया तस्य लघुत्वं स्पष्टम् । सम्म-

(१) शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्यते इति न्यायेन ।

न्यायरत्नावली ।

वांते च श्वेतत्वं तदश्च दृश्यमानमश्वान्याससंसर्गित्वेन प्रतीयमानमश्वसंसर्गित्वं विनानुपपन्नमिति धीः । एवं धावनेऽप्यनुपपत्तिर्बोध्या । तस्माद्यत्र गवाश्वादिमत्त्वेन सम्भाविते देशे श्वेतत्वं दृश्यते, तत्रैव पदानि कल्पयित्वा तदेकवाक्यताज्ञानात् शाब्दधीः स्वीक्रियते । तदभावे तु तत्र न भवत्येव सा । भवन्त्यपि वा 'गौरश्वो वा श्वेतो धावती'ति संशयात्मिका, विप्रतिपत्तिवाक्यजन्यधीवत् ।

न चैवं 'श्वेतोऽश्वो धावती'ति धीरर्थापत्तिरेव, न शाब्दधीरिति वाच्यम् । पदज्ञानस्य पदार्थस्मरायामेवोपक्षीणत्वेन साकाङ्क्षयोग्यासन्नार्थज्ञानस्यैव श्रूयमाणपदस्थले वाक्यार्थशाब्दधीकरणत्वेन क्लृप्ततया शाब्दधीत्वस्यापि तस्यां सिद्धत्वात् । मीमांसकमते गुणे जात्यस्वीकारेण शाब्दत्वार्थापत्तित्वादीनामखण्डोपाधित्वाद्विषयताविशेषरूपत्वाद्वा साङ्कर्यस्यादोषत्वात् । अथवा अश्वान्यद्रव्यवृत्तित्वबाधधीसहकृता द्रव्यवृत्तित्वशाब्दधीसामग्री अश्वद्रव्यवृत्तित्वशाब्दधियं जनयति । इतरबाधधीसहकृतसामान्यसामग्र्या विशेषरूपेण ज्ञानजनकत्वात् । तथा च तादृशज्ञानं शाब्दधीरेव, नार्थापत्तिः । प्राचीनमते तु सामान्यसामग्री सामान्यरूपेणैव ज्ञानजनिका, न त्वितरबाधसहकृतापि विशेषरूपेण । विशेषरूपं विनाऽनुपपत्तिधीस्तु विशेषरूपेणैव । सर्वमते विशेषरूपेणैव धीजनिकेत्याशयेन न्यायरत्नाकरेऽनुपपत्तिज्ञानानुसरणम् । तस्मादुक्तार्थज्ञानं शाब्दसामान्ये करणम् । विशेषकरणं तु पदैकवाक्यत्वज्ञानादिरूपमेकम्, तत्र कार्यतावच्छेदकं तदुत्तरशाब्दधीत्वम्; अपरमनुपपत्तिज्ञानादिकम्, तत्कार्यतावच्छेदकं तदुत्तरशाब्दधीत्वम् । अत एव प्राभाकरमतेऽपि घटमित्यादिपदं विना घटकर्मत्वाद्यर्थाध्याहारादपि शाब्दधीः स्वीक्रियते, परन्तु आनयेत्यादिपदधीसहकृतात् । एवं

तदर्थाध्याहारादपि तदर्थशाब्दधीः घटमित्यादिपदधीमहकृतादिति बोध्यम् । उक्ताधिकरणे भाष्येऽप्युक्तम्–'अन्तरेणापि पद शुक्लत्वादेरन्वयधी'रिति। यदि तु 'लाक्षणिकमननुभावक'मिति वृद्धोक्तेः लाक्षणिकपदं स्वजन्यया स्मृत्या नानुभावकमित्यर्थकत्वात् स्वजन्यशक्यस्मृतिजन्यया लक्ष्यस्मृत्या लाक्षणिकस्यानुभावकत्वं स्वीक्रियते एव, तथापि न तस्य लक्ष्यार्थशक्तत्वम् । स्वजन्यशक्यस्मृतिमात्रद्वारकानुभावकत्वस्यैव शक्तित्वात् । अत एव मुख्यामुख्यविभागोऽपि नानुपपन्न इति चिन्त्यते, तदापि न क्षतिः ।

वस्तुतस्तु सत्यत्वादिविशिष्टशक्तपदस्य(१) सत्यत्वाद्युपलक्षितविशेष्यमात्रेऽपि शक्तिसत्त्वात्तस्य तदनुभावकत्वेऽपि न लाक्षणिकस्यानुभावकत्वापत्तिः । शक्त्यैवानुभावकत्वेन तत्र तस्य लाक्षणिकत्वाभावात् । प्रत्याख्यातं च पूर्वमस्माभिस्तस्य लाक्षणिकत्वम् । ननु गङ्गादिपदज्ञानस्य गङ्गात्वान्वितशाब्दत्वावच्छिन्नं प्रति हेतुत्वं न युक्तम् । तादृशशाब्दत्वं हि गङ्गात्वप्रकारतानिरूपितसांसर्गिकविषयताशालिशाब्दत्वम् । तथा च उक्तप्रकारताशालिशाब्दत्वेनैव तत्कार्यत्वमुचितम् । एवमन्विताभिधानपक्षे गङ्गात्वान्वितप्रतियोगिकान्वयशाब्दत्वेन गङ्गात्वप्रकारतानिरूपितसांसर्गिकविषयताशालिशाब्दत्वे पर्यवसितेन न तत्कार्यत्वं युक्तम्, किन्तु गङ्गात्वप्रकारताशालिशाब्दत्वेन, लाघवात् इति चेन्न । गङ्गात्वाद्यन्वयनिष्ठसांसर्गिकविषयतायां गङ्गादिपदज्ञानकार्यतावच्छेदककुक्षावप्रवेशे आकस्मिकतापत्तेः ।

न च 'गङ्गा'मित्यादिपदज्ञानस्य गङ्गात्वान्वितकर्मत्वादिशाब्दधीकरणत्वमवश्यं वाच्यम्, अन्यथा 'अम् गङ्गे'त्यादिज्ञानादपि तदापत्तेः, तथा च तादृशविषयतायास्तादृशकारणनियम्यत्वे-

(१)—पदस्य केवलविशेष्यांशेपि शक्तेः सत्त्वात्तदनुभावकत्वेपि इतिपाठो घपुस्तके

न्यायरत्नावली।

नाकस्मिकत्वाभावात् गङ्गादिपदज्ञानस्योक्तहेतुत्वे मानाभाव इति वाच्यम्। तथा सति गङ्गात्वप्रकारताशालिशाब्दत्वस्यापि तत्कार्यतावच्छेदकत्वस्य लोपापत्तेः। परामर्शत्वादेरनुमित्यादिकारणतावच्छेदकस्य घटकतया व्याप्तिज्ञानत्वादेरिव 'गङ्गा'मितिपदज्ञानत्वरूपशाब्दधीकारणतावच्छेदकस्य घटकतया 'गङ्गे'तिपदज्ञानत्वस्यान्यथासिद्धत्वात्। अथ स्वतन्त्रान्वयव्यतिरेकाभ्यां प्राचीनमते वह्निव्याप्तिज्ञानत्वादिना वह्न्यनुमितावि व गङ्गादिपदज्ञानत्वेन गङ्गात्वप्रकारकशाब्दबोधे हेतुत्वम्, तर्हि गङ्गात्वप्रकारतानिरूपितसांसर्गकविषयताकशाब्दत्वेनैव तत्कार्यत्वं युक्तम्। तद्रूपेणवान्वयव्यतिरेकज्ञानात्। 'गङ्गां गङ्गया गङ्गायै' इत्यादौ हि तादृशबोधस्यान्वये हि गङ्गापदस्यावश्यमन्वयः, तत्पदाभावेऽवश्यं (१)बोधाभावः। यत्तु गङ्गापदज्ञानत्वेन गङ्गात्वप्रकारकशाब्दत्वावच्छिन्नेऽपि न कारणत्वमिति। तन्न। गङ्गादिपदमात्रज्ञानादपि गङ्गात्वादिस्मृतिदर्शनेन स्मार्यस्मारकसम्बन्धस्य स्मार्यानुभावकत्वरूपस्यावश्यकत्वात्।

न च 'गङ्गा'मित्यस्य स्वजन्यां गङ्गात्वकर्मत्वोपस्थितिं द्वारीकृत्य गङ्गात्वान्वितकर्मत्वशाब्दधीहेतुत्वस्यास्वीकारे 'गङ्गा कर्मत्व'मित्यादिपदजन्योपस्थितिसहितात् 'गङ्गे'तिपदज्ञानादपि शाब्दबोधापत्त्या तादृशहेतुत्वमावश्यकम्, तथा च 'गङ्गा'मित्यादेरेव शाब्दधीहेतुस्मृतिहेतुत्वसम्भवात् 'गङ्गे'त्यादेस्तन्नावश्यकम्, शाब्दबोधानुपधायकगङ्गात्वादिस्मृतिहेतुत्वं तु तादृशशाब्दधीहेतुगङ्गामित्यादिपदघटकत्वरूपं गङ्गात्वादेस्सम्बन्धमादायाप्युपपद्यत इति गङ्गादिपदं नानुभावकमिति वाच्यम्। उक्तघटकत्वसम्बन्धप्रकारकगङ्गादिपदविशेष्यकसंस्कारोद्बोधकविधया गङ्गादिपदज्ञानस्य

(१) तादृशबोधाभाव इति घपुस्तके।

न्यायरत्नावली ।

गङ्गात्वादिस्मृतिहेतुत्वे गौरवात्, गङ्गात्वानुभावकत्वस्यैव उक्तघटकत्वस्थले निवेशनेन व्याप्तिज्ञानदृष्टान्तस्योक्तत्वेन च उक्तहेतुत्वौचित्येन गङ्गादिपदस्यानुभावकत्वे सिद्धेऽनुभावकघटकत्वापेक्षया लघोरनुभावकत्वस्यैव प्रयोजकताया युक्तत्वात् । गङ्गापदस्यानुभावकत्वकल्पनापेक्षयाऽनुभावकघटकत्वघटकानां विशेषणाविशेष्यभावस्याविनिगम्यत्वेन स्मृतिं प्रति नानाहेतुत्वानां गुरुतररूपैः कल्पने महागौरवात् । अत एव गङ्गात्वानुभावकत्वविषयकसंस्कारत्वेन(१) शाब्दधीहेतुस्मृतिहेतुत्वम्, न तु गङ्गानुभावकत्वसंस्कारत्वेन, गौरवात् । अतश्च शाब्दबोधोऽपि गङ्गात्वान्वितस्यैव कर्मत्वादेः शक्त्या, न तु गङ्गान्वितकर्मत्वादेरित्याकृत्यधिकरणे स्थितम् ।

किञ्च त्वदुक्तरीत्यापि विनिगमनाभावात् गङ्गापदोत्तराम्पदपूर्वगङ्गापदत्वेनापि ज्ञानं गङ्गात्वकर्मताशाब्दधीहेतुरिति वाच्यम् । तथा च शक्तिज्ञानतज्जन्यसंस्कारयोर्गङ्गात्वानुभावकत्वप्रकारकगङ्गादिपदविशेष्यकत्वेनैव हेतुतास्तु, अन्वितकर्मत्वादेरिव अम्पदपूर्वत्वादेरपि उक्तहेतुतावच्छेदकशरीरे निवेशे गौरवात् । अम्पदपूर्वगङ्गापदज्ञानत्वावच्छिन्नाया गङ्गात्वान्वितकर्मत्वादिशाब्दबोधत्वावच्छिन्नजन्यतानिरूपितजनकतायाः एव गङ्गापदज्ञाने गङ्गात्वानुभावकतात्वेन भानसम्भवात् । एवं च गङ्गापदत्वेन रूपेण गङ्गात्वं प्रत्यनुभावकत्वरूपसम्बन्धग्रहात् तेन रूपेण तज्ज्ञानस्य तत्स्मृतिहेतुत्वात् तेनैव रूपेण तज्ज्ञानस्य गङ्गात्वान्वितविषयकशाब्दधीहेतुत्वम्, व्यापारजनकतावच्छेदकत्वेन उपस्थितस्यैव फलजनकतावच्छेदकत्वौचित्यात् । तादृशहेतुत्वनिरूपितजन्यतापि गङ्गात्वान्वितशाब्दत्वेन, न तु तदन्वितकर्मतादिशाब्दत्वेन, गङ्गा-

(१)—संस्कारत्वेनैव इति घपुस्तके ।

त्वान्वितकरणत्वादिशाब्दासङ्ग्रहात् । नापि गङ्गात्वशाब्दत्वेन, 'गङ्गा'मित्यादेः गङ्गात्वकर्मताशाब्दधीहेतुतायां आवश्यकत्वेनोक्तत्वात् । 'यद्विशेषयोः कार्यकारणत्वं कल्प्यं तत्सामान्ययोरपी'ति न्यायेन सामान्यतो हेतुत्वे वाच्ये विशेषरूपकर्मतादित्यागेऽपि (१)तदन्वयांशस्य त्यागायोगात् । अन्यथा गङ्गात्वान्वयशाब्दत्वावच्छिन्नाभावस्य गङ्गामितिपदज्ञानत्वगङ्गयेत्यादिपदज्ञानत्वरूपविशेषकारणतावच्छेदकावच्छिन्नाभावकूटप्रयुक्तत्वे गौरवात् ।

अत एव वह्न्यनुमितित्वावच्छिन्नाभावस्य परामर्शाभावकूटप्रयुक्तत्वे गौरवात् वह्निव्याप्तिज्ञानत्वेनैव वह्न्यनुमितिहेतुता । अपि च गङ्गात्वविषयता नोक्तकार्यतावच्छेदिका, अज्ञातार्थविषयतायां एव मीमांसकमते प्रमाणप्रयुक्तत्वस्वीकारात् । प्रमाणकार्यतावच्छेदकत्वस्यैव प्रकृते प्रमाणप्रयुक्तरूपत्वात् । पदार्थमात्रस्य शाब्दबोधात् पूर्वमुपास्थितत्वादज्ञातत्वाभावेन पदार्थयोरन्वयस्यैवाज्ञातत्वेन तद्विषयतायां एव तादृशजन्यतावच्छेदकत्वस्यौचित्यात् । अत एव वह्न्यादिव्याप्तिज्ञानादिजन्यतापि वह्न्यादिसम्बन्धविषयकानुमितित्वादिनैव । ननु कर्मत्वादिकारकं गङ्गात्वाद्यन्वितमिति ज्ञानस्य गङ्गामित्यादिशब्दजन्यशाब्दधीपूर्वं सत्त्वेन गङ्गात्वाद्यन्वयोऽपि नाज्ञात इति चेन्न । तादृशज्ञानस्योक्तधीपूर्वं (२)सत्त्वानियमेन तादृशसत्त्वाभावकाले गङ्गादिपदज्ञानस्याज्ञातान्वयविषयताप्रयोजकत्वानपायात् । कस्याश्चित् क्रियायां 'कर्मता गङ्गात्वीया' इति ज्ञानस्योक्तशाब्दधीपूर्वं सत्त्वनियमस्त्वसम्भवी । अत एव 'स्मृतिसमबुद्धियुगं पदे विधत्त' इत्यपि तत्त्वमस्यादिवाक्यस्थलाभिप्रायेण पूर्वं व्याख्यातम् । गङ्गात्वादिपदार्थमात्रं त्ववश्यं शाब्दधीमद्भिः सर्वैः पुरुषैः पूर्वं ज्ञातमिति विशेषात् ।

(१) तदन्यरूपान्वयांशस्येति घपुस्तके । (२)—सत्त्वानियमेनेति गपुस्तके ।

न्यायरत्नावली ।

किञ्च मीमांसकमते जातेस्संस्थानव्यङ्ग्यतास्वीकारेण गुणकर्मणोरवयवसंयोगविशेषरूपसंस्थानाभावेन तयोर्जात्यस्वीकारेण शाब्दत्वानुमितित्वादेर्ज्ञानगतस्याखण्डस्य धर्मस्यैकस्मिन् ज्ञाने साङ्कर्ये बाधकाभावः । तथा च स्मृत्यनुमितिशाब्दबोधादिसामग्रीणां दैववशेन मेलने सम्पन्ने स्मृतित्वानुमितित्वशाब्दत्वविशिष्टमेकमेव ज्ञानं स्वीक्रियते । एवञ्च 'गङ्गयेत्यादिवाक्यजन्यशाब्दबोधे अनुमित्यादिधीसामग्रीबलात् (१)पूर्वं पर्वतवह्निसंयोगादिभानेऽपि 'तादृशसंयोगं शाब्दयामी'ति प्रत्ययाभावात् तादृशप्रत्यये तादृशसंयोगविषयकत्वावच्छिन्नशाब्दत्वं विषयो वाच्यः । तादृशशाब्दत्व प्रयोजकं पदज्ञानादिकमेवेति तादृशसंयोगादिबाधकपदज्ञानाभावकाले न तादृशशाब्दत्वविशिष्टोत्पत्तिः । तथा च 'पर्वतवह्न्यास्संयोगमनुमिनोमि, न तु पर्वतं वह्निं वा अनुमिनोमि, किन्तु साक्षात्करोमि स्मरामि वे'ति प्रत्ययस्यैव, 'गङ्गात्वकरणत्वयोः सम्बन्धं शृणोमि, न तु गङ्गात्वं करणत्वं वा शृणोमि; किन्तु स्मरामी'ति प्रत्ययस्य सार्वलौकिकत्वात् (२) गङ्गात्वादिविषयतामात्रस्य शाब्दत्वानवच्छेदकत्वात् । शाब्दत्वानवच्छेदकविषयतायाश्च पदज्ञानादिप्रयुक्तत्वे मानाभावः अत एव अनुवादवाक्ये वाक्यार्थभूतान्वये स्मरामीति प्रत्ययस्यैव स्वीकारेण तद्विषयतायाश्शाब्दत्वानवच्छेदकत्वेन पदज्ञानाप्रयुक्तत्वात् स्मृतिसामग्रीप्रयुक्तत्वमेव । न च अनुवादवाक्यस्थलेऽपि पदज्ञानादिकारणबलादन्वयविषयतावच्छिन्नशाब्दत्वावच्छिन्नोत्पत्तिः स्यादिति वाच्यम् । उक्तशाब्दत्वावच्छिन्नं प्रति अन्वयाज्ञानस्य हेतुत्वात् । तस्मादन्वयघटितमेव पदशक्यम् ।

(१) पूर्वमितिपदं घचपुस्तकयोर्नास्ति ।

(२)—सार्वलौकिकत्वादिति विषयतामात्रस्येति पाठो घपुस्तके ।

न्यायरत्नावली ।

अत एवोक्तं शाबरभाष्ये—'प्रातिपदिकादुच्चरन्ती द्वितीयाविभक्तिः प्रातिपदिकार्थो विशेषक इत्याहे'ति । विशेषको व्यावर्तकः । उपलक्षणविधया व्यावर्तकत्वलाभार्थमितिशब्दः । तथा च प्रातिपदिकार्थोपलक्षितो(१)ऽन्वयः तद्विशिष्टवाचिका सेत्यर्थः । अत एव च निरुक्तकारैरुक्तम्—'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत'इति । घटत्वकर्मत्वाद्यंशे प्रकृतिप्रत्ययोरनुवाद(२)कत्वादन्वयमात्रांशे पर्यवसितं सहवाचकत्वमिति भावः । न्यायरत्नमालादौ घटत्वादिकमेव घटादिपदस्य शक्यम्, न त्वन्वयांशस्य तत्र निवेशः । तथा च घटत्वादिमात्रविषयकानुभवो घटादिपदधीजन्यः । न चैवं-स्मृतिरपि तादृशी वाच्या, पदज्ञानस्य साक्षादनुभवाहेतुत्वात्, तथा चानुभवविरोधः, न हि पदज्ञानोत्तरं तादृशधीद्वयं क्रमिकमनुभूयत इति वाच्यम् । तादृशस्मृतौ मानाभावात्, साक्षादेव तस्य तद्धेतुत्वात् । तदिदं पूर्वोपदर्शितवार्तिकोक्तपक्षत्रयस्याद्यपक्षावलम्बनम् । तन्न युक्तम्, उक्तभाष्यादिविरोधात् । पदतदर्थयोः सम्बन्धाग्रहेऽपि (३)पदज्ञानादर्थानुभवापत्तेः । अथ यथा पञ्चपाद्यामुक्तम्—व्याप्तिसंस्कारसहिता पक्षसम्बद्धधूमादिधीरनुमितिहेतुः, न त्वन्तरा व्याप्तिस्मृतिः कल्प्यते, गौरवादिति, तथा शक्तिसंस्कारसहिता पदधीः पदार्थानुभवहेतुः, न त्वन्तरार्थस्मृतिः कल्प्यते, तथा च नोक्तदोष इति चेन्न । तथाप्युक्तयुक्तिभिरन्वयघटितार्थस्यैव पदशक्यत्वात् । इदं तु बोध्यम् । अभिहितान्वयमतमेव युक्तम्, 'घटत्वकर्मतां शृणोमीति' अनुभवस्यानपलापात् ।

यत्तु समानार्थकपदत्रयस्थले अन्विताभिधानमते पदेषु प्रत्येक-

(१)—लक्षितो योऽन्वयस्तद्विशिष्टवाचिका इति घ च पुस्तकयोः ।

(२)—रनुभावकत्वादिति गपुस्तके । (३) पदज्ञानार्थानुभवापत्तेरिति गपुस्तके ।

न्यायरत्नावली।

मर्थे इतरान्वये च शक्तिकल्पनात् षट् शक्तयः कल्प्याः, अभिहितान्वयमते तु पदेषु प्रत्येकमेकैका शक्तिरर्थे च एकैव वाक्यार्थानुभावकशक्तिरिति शक्तिचतुष्टयं (१)ममेति न्यायरत्नमालोक्तम्, तन्न। मतद्वयेऽप्युक्तस्थले शक्तिद्वयस्यैव कल्पनात्। तृणारणिमणिष्विव वह्निशक्तेः अभिहितान्वयमते पदत्रयेऽ(२)प्यर्थानुभावकशक्तेरेकस्या एव युक्तत्वात् । अन्विताभिधानमतेऽप्यन्वितार्थानुभवरूपकार्यस्यैक्येनार्थेऽन्वये च पृथक्छक्तेरयुक्तत्वात् । अर्थानुभवे अभिहितान्वयमत इवार्थस्मृतौ अन्वितार्थानुभवशक्तेरन्विताभिधानमतेऽप्यावश्यकत्वात् । न हि फलाशक्तो व्यापारः केनापि स्वीक्रियते ।

न चैवमुक्तरीत्या साक्षादेवान्वितानुभवहेतुत्वस्य पदज्ञाने सम्भवात् स्मृत्यस्वीकारेणैकैव शक्तिरन्विताभिधानमत इति लाघवमुक्तस्थल इति वाच्यम् । पदधीवाक्यार्थानुभवयोर्मध्ये अर्थज्ञानस्यानुभाविकस्यापलापासम्भवात्(३) । अर्थस्मृतिशक्तिस्तु पदज्ञानेऽभिहितान्वयमतेऽपि कल्प्यैव, परन्तु अर्थानुभवे तादृशस्मृतेर्नोपयोग इति पञ्चपादिकादृष्टान्तेनोक्तम् । तस्मादन्वयघटितार्थस्यैव पदशक्यत्वमिति सिद्धम् ।

अथ पदार्थद्वया(४)न्वितविषयतावच्छिन्नशाब्दत्वं 'गङ्गा'मित्यादिविभक्त्यन्तपदज्ञानस्यैव जन्यतावच्छेदकम्, 'गङ्गे'त्यादिपदज्ञानजन्यता तु अन्वयविषयतामात्रावच्छिन्नशाब्दत्वेनैवास्ताम् , न तु गङ्गात्वान्वयविषयतावच्छिन्नशाब्दत्वेन, गौरवात्, अन्वयविषयतात्वं च सांसर्गिकविषयतात्वमिति चेन्न । पदसामान्यज्ञानरूपसामान्यकारणस्योक्तशाब्दत्वावच्छिन्नहेतुत्वेऽपि गङ्गापदज्ञान-

(१) शक्तिचतुष्टयमेवेति लाघवमिति न्यायरत्नमालोक्तमिति घपुस्तके ।

(२)—अप्येकार्थानुभवशक्तेरिति घपुस्तके ।

(३)—सम्भवादर्थस्मृतिः शक्तिस्तु इत्यादि घपुस्तके ।

(४)—द्वयान्वयविषयतेति घचपुस्तकयोः ।

न्यायरत्नावली ।

रूपविशेषकारणस्य गङ्गात्वविषयतावच्छिन्नसंसर्गतावच्छिन्नशाब्दत्वावच्छिन्नं तादृशसंसर्गतानिरूपितमुख्यविषयतावच्छिन्नशाब्दत्वावच्छिन्नं वा प्रत्येव हेतुत्वौचित्यात् । घटत्वाद्यन्वयविषयतावच्छिन्नशाब्दत्वस्य गङ्गापदज्ञानाप्रयुक्तत्वेनान्वयविषयतामात्रस्य तत्कार्यतावच्छेदके प्रवेशनस्यायुक्तत्वात् । अत एव गङ्गात्वान्वयविषयतामात्रस्य प्रत्यक्षादिसाधारणस्य न तत्कार्यतावच्छेदकत्वम्, किन्तु तदवच्छिन्नशाब्दत्वस्य कर्मतायां 'गङ्गात्वं शाब्दयामी'ति प्रत्ययात् गङ्गात्वविषयतानिरूपितसंसर्गतानिरूपितकर्मताविषयत्वादिकमेव शाब्दत्वावच्छेदकम्, अतस्तादृशेत्याद्युक्तम् । पदज्ञानतज्जन्यस्मृत्योर्नाशेऽपि गङ्गात्वकर्मताविशिष्टं दर्शनमिति महावाक्यार्थबोधस्य उत्पत्तेस्तत्र व्यभिचारात् मुख्येत्युक्तम् । तादृशबोधीय(१)गङ्गात्वकर्मताविषयता शाब्दत्वावच्छेदिका । अवान्तरवाक्यार्थबोधे जातेऽपि (२)भ्रमत्वशङ्कया तादृशबोधस्य तादृशकर्मतायामज्ञानानाशकत्वेन तदज्ञानसत्त्वेन तादृशविषयताप्रयोजकसामग्रीसत्त्वात् ।

एतेन घटत्वीयकर्मताविषयतावच्छिन्नशाब्दत्ववति बोधे तत्समानविषयकाज्ञानस्य हेतुत्वात् अवान्तरबोधे जाते जायमाने महावाक्यार्थबोधे तादृशाब्दत्वाभावेनैव तद्वारणात् (३)मुख्येति व्यर्थमित्यपास्तम् । तादृशविशिष्टविषयत्वाघटकविषयतानिरूपकत्वशून्येति मुख्यपदार्थः । गङ्गात्वविषयतायामपि तादृशविशेषणं देयम् । अन्यथा 'गङ्गा'मिति वाक्यजबोधोत्तरं 'शोभनगङ्गा'मिति वाक्यजे शोभनगङ्गात्वकर्मताबोधेऽनुपपत्तेः । न च तादृशहेतुत्वकल्पनं व्यर्थम्, तादृशविषयताशालिशाब्दत्वावच्छिन्नाभावस्तु (४)'गङ्गा'-

(१) बोधीया च इति घपुस्तके । (२) प्रमितिभ्रमत्वशङ्कया इति घपुस्तके ।
(३) अमुख्येति गपुस्तके । (४) गङ्गादिपदज्ञानाभावादेवेति गपुस्तके ।

मित्यादिपदज्ञानाभावकूटादेव, न तु 'गङ्गे'तिपदज्ञानाभावात्, अग्गङ्गेतिपदज्ञानकाले तथा वक्तुमशक्यत्वादिति वाच्यम् । तथापि गङ्गापदज्ञानसामान्याभावकालीनस्योक्तशाब्दत्वावच्छिन्नाभावाधिकरणत्वस्य(१) गङ्गापदज्ञानस्य सामान्याभावेनैव प्रयुक्तस्य वाच्यत्वात् । अधिकरणताविशेषाणामेव कारणाभावप्रयुक्तत्वात् । अत एव काष्ठस्य दाहाभाववत्त्वं मणिप्रयुक्तम् , न तु जलस्येति धीः । अस्तु वा विभक्त्यन्तगङ्गापदज्ञानत्वेनैव तादृशशाब्दबोधहेतुत्वम् । अथ गङ्गात्वप्रकारतैव तादृशकार्यतावच्छेदके निवेश्यताम्, न तु तद्विषयता; व्यापकरूपत्वेनान्यथासिद्धत्वादिति चेन्न । 'गङ्गास्ती'तिवाक्याद्गङ्गात्वविशेष्यकशाब्दोत्पत्तेः तदभङ्गापत्तेः । यद्यपि गङ्गात्वत्वादेरुपस्थापकपदाभावात् धर्मितावच्छेदकत्वेनाभानात् निर्धर्मितावच्छेदकशाब्दास्वीकाराच्च गङ्गात्वं शुद्धं न विशेष्यम् , तथाप्येकत्वस्य सामानाधिकरण्यसम्बन्धेन गङ्गात्वे विशेषणत्वेनास्तित्वांशे धर्मितावच्छेदकत्वसम्भवः । विशिष्टवैशिष्ट्यबुद्धौ विशेष्यतावच्छेदकप्रकारकधियो हेतुत्वास्वीकारेण प्रथमत एव एकमस्तीति शाब्दधीसम्भवात् ।

न चाभिहितान्वयमते नामार्थक्रियान्वयबोधे नामार्थविभक्त्यर्थयोरवान्तरबोधस्य हेतुत्वात्तं विना तदुत्पत्तिर्न सम्भवतीति वाच्यम् । 'श्वेतोऽश्वो धावती'त्याकारकवाक्यजन्यक्रियाबोधानुरोधेन क्रियान्वयबोधमात्रे क्रियान्वय्यर्थज्ञानमात्रस्यैव हेतुत्वेनावान्तरशाब्दबोधस्याहेतुत्वात् । अर्थज्ञानमात्रं तु स्मृतिरनुभवो वा शब्दादन्यतो वा जायत इत्युक्तम् । न च 'गङ्गा'मित्यादा कर्मत्वादेः जातिवदखण्डत्वेन विशेष्यत्वासम्भव इति वाच्यम् । शक्तिविशेषरूपकर्मत्वादीनामखण्डत्वेऽपि सामानाधिकरण्यसम्बन्धेन

(१)—त्वस्य तस्य गङ्गापदज्ञानसामान्याभावेनैव इति घपुस्तके ।

सङ्ख्यावैशिष्ट्यरूपस्य विशेष्यत्वसम्भवात् । परमार्थतस्तु शाब्दबोधे एकपदार्थांशे अपरपदार्थविशेष्यतायाः किञ्चिद्धर्मावच्छिन्नत्वनियमेऽपि शाब्दबोधीयविशेष्यतामात्रस्य नोक्तनियमः । आख्यादिपदजन्ये धनवदादिबोधे धनत्वाद्यंशे विशेष्यतायां व्यभिचारात् । तथा चानन्वितयो(१)र्गङ्गात्वनिष्ठानवच्छिन्नविषयतैकत्वनिष्ठैकत्वत्वावच्छिन्नविषयताशालिसमूहालम्बनशाब्दधीसम्भवेन क्रियान्वये तज्जन्यत्वमपि सम्भवत्येव ।

यत्तु एकत्वत्वजातेरेव शक्यतया तादृशशाब्दबोधे भानसम्भवेन सङ्ख्याया न विशेष्यता, किन्तु तन्निष्ठजातौ निर्विकल्पकविषयतेति; तत्तुच्छम् । भावनायां सङ्ख्याविशिष्टकरणत्वादिबोधे विशेषणीभूतसङ्ख्याया एव द्रव्यपरिच्छेदद्वारा करणत्वेनान्वयस्य आनुभाविकत्वात् । सङ्ख्याया एव शक्यत्वेनोक्तजातिमात्रस्यावोधात् । अथ नीलादिवदेकत्वादिकमे(२)कमखण्डमेव शक्यमित्युच्येत, तथापि प्रकृते न कोऽपि दोषः ।

परे तु सङ्ख्यादिविशिष्टं कारकं नामार्थे विशेष्यम्, कारकविभक्तेरभावे सङ्ख्यैव विशेष्येत्याहुः । तदसत् । प्रधानवाचकनाम्नो मन्त्रघटकतया प्रकृतक्रियान्वितत्वोपयोगार्थं गुणीभूतसङ्ख्यावाचकस्य बहुवचनस्यैकत्वलक्षणादिकल्पनाया 'अदितिः पाशान् प्रमुमोक्त्वेता'नितिमन्त्रादौ पाशाधिकरणोक्तायां विरोधापत्तेः । न च प्रथमबोधे सङ्ख्याया विशेष्यत्वेऽपि पार्ष्टिकबोधे सङ्ख्याया गुणत्वेन भानान्नोक्तविरोध इति वाच्यम् । नामार्थसङ्ख्ययोरन्वयबोधस्य जातत्वेनानाकाङ्क्षितोक्तबोधस्य व्यर्थत्वात् । अरुणैकहायन्योस्तु परिच्छेदकाकाङ्क्षासत्त्वादेवोक्तबोधस्वीकारात् ।

अन्ये तु (३)गङ्गादिव्यक्तिरुक्तस्थले सङ्ख्याविशेष्यतया भा-

(१) अनन्वितयोः तयो इति घपुस्तके । (२) एकैकमिति घपुस्तके ।
(३) गङ्गादिव्यातिरिक्तस्थले इति पाठो गपुस्तके प्रामादिकः ।

ति, अस्तित्वाश्रयत्वं तु व्यक्तौ विशेषणं न तु विशेष्यम्, भावनाया एव कारकेषु विशेष्यत्वात् । अत एवोक्तम्—

जातेरस्तित्वनास्तित्वे न हि काश्चिद्विवक्षति ।
नित्यत्वात् लक्षणीयाया व्यक्तेस्ते हि विशेषणे ॥ इति ॥

अत एव घटमानयेत्यादौ कर्मत्वादौ व्यक्तेरेवान्वयः । तथा च गङ्गापदं नोक्तबोधे कारणम्, लाक्षणिकत्वात् । उक्तबोधीयव्यक्तिविषयताया गङ्गात्वान्वयविषयतानिरूपितत्वेऽपि (१)शाब्दत्वानवच्छेदकत्वेन गङ्गापदधीकार्यतानवच्छेदकत्वात्, व्यक्तिगङ्गात्वयोरन्वयस्य (२)अपदार्थघटकत्वेन उक्तविषयतायाश्शाब्दत्वानवच्छेदकत्वात्, पदार्थयोरन्वयविषयताया एव शाब्दत्वावच्छेदकत्वादित्याहुः। तदप्यसत् । तावतापि नाम्नो मुख्यार्थबोधकत्वानुपपादनात्, जातेरेव शक्यताया आकृत्यधिकरणे स्थितत्वात्, व्यक्तिपरिच्छेददद्वारा जातेरेव करणत्वाद्यन्वयधीसम्भवाच्च । प्रकृते जातेरेवान्वयसम्भवे तत्त्यागस्यायुक्तत्वात्, विद्यमानव्यक्त्यवच्छेदेनास्तित्वस्य कालसम्बन्धरूपस्य नष्टव्यक्त्यवच्छेदेन नास्तित्वस्य च जातौ विवक्षासम्भवाच्च । एवमन्विताभिधानपक्षेऽपि गङ्गात्वान्वितविषयतानिरूपितान्वयविषयतानिरूपितविषयतावच्छिन्नशाब्दत्वेनैव गङ्गादिपदधीजन्यता ।

एतेन उक्तपक्षे साकाङ्क्षयोग्यासन्नपदान्तरार्थान्वितघटत्वादिकं घटादिपदशक्यम् । तथा च 'घटेन जलमानये'त्यादौ आनयनकरणीभूतं घटत्वं घटपदेनानुभाव्यते, 'घटत्वकरणकमानयनमानयतिना'इति वाक्यार्थभेदात् वाक्यभेदः स्यात् । न च घटपदेनापि घटत्वकरणकमानयनमनुभाव्यत इति वाच्यम् । तदा घटपदस्य नानार्थत्वापत्तिः,

(१) शाब्दत्वानवच्छेदकत्वात् । व्यक्तिगङ्गात्वयोरिति घपुस्तके पाठः ।
(२) पदार्थघटकत्वेनेति गपुस्तके ।

न्यायरत्नावली ।

आनयनस्येव घटत्वस्यापि तदनुभाव्यत्वेन शक्यभेदादित्यादिशास्त्रदीपिकाद्युक्तिरपास्ता । घटत्वान्विते(१) घटपदस्य, करणत्वान्विते तृतीयाविभक्तेः, अन्वितानयने आनयतेः, कार्यत्वान्विते लौकिकलिङ्गादिपदस्य, अन्वितकार्ये वैदिकलिङादिपदस्यानुभावकतया तेषामेकवाक्यतया 'घटत्वकरणकानयनं कार्यमि'त्यनुभवोत्पत्तेः ।

अथैवमप्यभिहितान्वयपक्षे (२)घटत्वान्वितस्यान्वितकरणत्वस्य च पृथग्भानेन घटत्वान्वितं करणत्वमित्येव ज्ञानस्याकारो न स्यात् । अन्विताभिधानपक्षे च (३)घटत्वान्वितस्य करणत्वान्वितस्य पृथग्भानेन घटत्वान्वितकरणत्वान्वितमानयनमित्येवाकारो न स्यादिति चेन्न । 'प्रकृतिप्रत्ययौ सहार्थं ब्रूत' इति निरुक्तकारानुशासनेनोक्तपृथग्भावेनोक्ताकारनियमस्थितेः । उक्तपृथग्भाने हि सति प्रकृतिप्रत्ययोरेकवाचकत्वरूपस्य सहवाचकत्वस्य भङ्गापत्तिः । 'घटत्वान्वितं करणत्वमि'ति बोधे पदाभ्यां जनिते तु पदयोस्सहवाचकत्वमुपपद्यते । एकस्यैवान्वयस्य भानादुभयकार्यतावच्छेदकविशिष्टस्योत्पत्तिः । एवं द्वितीयपक्षेऽपि घटत्वान्वितविषयतानिरूपितान्वयविषयतायां एव करणत्वान्वितविषयतानिरूपितान्वयविषयतात्वेन पदद्वयकार्यतावच्छेदकविशिष्टस्योत्पत्तिनिर्वाहः । यद्यप्याद्यपक्षे प्रकृतिप्रत्ययोः घटत्वकर्मत्वाद्यंशे न सहवाचकत्वं तथापि न क्षतिः, तदंशविषयतायाः स्मृतित्वावच्छेदकत्वेन शाब्दत्वानवच्छेदकत्वात्, तदंशे वाचकत्वस्यैवाभावेनान्वितांश (४)एव सहवाचकत्वसत्त्वात् । एवं द्वितीय-

(१) घटत्वान्विताऽन्विते इति घपुस्तके ।

(२) घटत्वान्विताऽन्वितस्य करणत्वान्वितस्य च इति घपुस्तके ।

(३) घटत्वान्विताऽन्वितस्य इति घपुस्तके ।

(४) अन्वितांशसहवाचकत्वसत्त्वादिति घपुस्तके ।

न्यायरत्नावली ।

यपक्षेऽप्यन्वयांश एव सहवाचकत्वम् । पक्षद्वयेऽपि तदन्यांशो वाच्योपाधिः, न तु वाच्यः । दण्डत्वादिरिव कारणोपाधिः, न तु कारणम् । अत एव घटत्वान्वितयोः शक्तयोर्भेदात् शक्तिभेदापत्तिरित्यपास्तम् । ज्ञाने पदानां (१)शक्तिः शक्यत्वादिति न्यायेन शाब्दज्ञानस्यैव पदशक्यत्वाच्च । अत एव गोत्वोपहिता धानकर्मविशेषा एव धेनुपदशक्याः न तु गोत्वमिति प्राभाकराः ।

ननु अन्विताभिधानपक्षे 'गङ्गात्वकर्मतां शृणोमी'ति प्रत्ययानुपपत्तिः, गङ्गात्वान्विताऽन्वितविषयतायां एव शाब्दत्वावच्छेदकत्वादिति चेन्न । तत्पक्षे 'गङ्गात्वकर्मतां स्मरामी'ति प्रत्ययस्यैव स्वीकारेण गङ्गात्वकर्मताविषयतायाः शाब्दत्वानवच्छेदकत्वेन स्मृतित्वावच्छेदकत्वस्यैव स्वीकारात् । तत्पक्षे क्रियाकारकान्वयरूपवाक्यार्थस्यैव शाब्दत्वात् । अन्यथा 'घटत्वीया कर्मते'ति शाब्दधीस्वीकारे शाब्दधीमात्रस्य कार्यत्वविषयत्वानियमस्य तत्पक्षे स्वीकृतस्य भङ्गापत्तेः । एवं च तस्याः ज्ञातानिष्ठविषयतात्वादपि प्रमाणाप्रयुक्तत्वेन न गङ्गादिपदज्ञानकार्यतावच्छेदकत्वमिति दिक् । वेदान्तदर्शने तु गङ्गादिपदघटितवाक्यतात्पर्यविषयविषयकशाब्दत्वेनैवोक्तकार्यत्वस्वीकारेणेयं गङ्गेति वाक्यात् अखण्डार्थकशाब्दबुद्ध्युपपत्तिः । अत एव तत्त्वमस्यादिवाक्येऽपि नानुपपत्तिः । तदयं निष्कर्षः-अभिहितान्वयपक्षे अन्विताभिधानपक्षे च लाक्षणिकसर्वपदप्रयुक्तवाक्यस्थले पदानामनुभावकत्वाभावेऽपि पदजन्यशक्योपस्थितिजन्यलक्ष्योपस्थितेः वाक्यार्थानुभावकत्वम् । न चैवम्—

प्रत्ययप्रकृतिशब्दयोः पुनर्नित्यमन्वितधियो निमित्तता ।

(१) शक्तिशक्यादिन्यायेनेति गपुस्तके पाठः प्रामादिकः ।

न्यायरत्नावली।

इति संक्षेपशारीरकोक्तिविरोध इति वाच्यम्। तथा हि प्रकृतिप्रत्यययोरन्वितविषयकशाब्दधीप्रयोजकत्वमेवोक्तम्। प्रकृतिप्रत्यययोरेकैकमात्रं(१) न स्वार्थमनुभावयति। अत एवैकैकमात्राभिहितार्थानुभवो न प्रकृत्यर्थान्वितप्रत्ययार्थान्वयानुभवहेतुः, किन्त्व(२)लाक्षणिकप्रकृतिप्रत्ययाभ्यां मिलिताभ्यां स्वार्थस्मृतिद्वारा स्वार्थयोरन्वयानुभवो जन्यते। लाक्षणिकसर्वपदस्थलेऽपि वाक्यार्थबोधः परम्परया (३)प्रकृतिप्रत्ययाभ्यां प्रयुक्त इत्यत्रैव तस्यास्तात्पर्यात्। अत एव—

प्रत्ययप्रकृतिशब्दतो बहिर्युज्यतेऽभिहितसङ्गतिश्च नः।

इति पूर्वार्धे तथोक्तम्। अथ वा लाक्षणिकस्थले मुख्यार्थान्वये तात्पर्याभावज्ञानद्वारा लाक्षणिकार्थे तात्पर्यज्ञानाय मुख्यार्थान्वयानुभवस्य तात्पर्याविषयस्यापि स्वीकारात् उक्तसंक्षेपशारीरकोक्तिः तमादायैव सङ्गमनीया। उक्तं च तत्त्वमस्यादिवाक्यस्थले संक्षेपशारीरक एव—

सामानाधिकरण्यमत्र भवति प्राथम्यभागन्वयः
पश्चादेव विशेषणेतरतया पश्चाद्विरोधोद्भवः।
उत्पन्ने च विरोध एकरसके वस्तुन्यखण्डार्थधीः
सर्वैरेव ततः पदैरयमिह ज्ञेयः क्रमस्सूरिभिः॥ इति।

सामानाधिकरण्यं पदयोस्समभिव्याहारधीः। अन्वयः—तात्पर्यविषयवाक्यार्थधीप्रयोजकः। विशेषणेतरतया—विशेषणविशेष्यताशालिनी वाक्यार्थधीरित्यनुषज्यते। विरोधोद्भवः उक्तज्ञाने तात्पर्याभावधीद्वारा लक्ष्यार्थघटितवाक्यार्थज्ञाने तात्पर्यधीरन्वयधीरित्यनुषज्यते। एवं च अभिहितार्थानुभवस्यापि सर्वपदलाक्षणिक-

(१) प्रकृतिप्रत्यययोरेकैकमिति गपुस्तके।
(२) किन्तु लाक्षणिकेति गपुस्तके।
(३) परस्परप्रकृतिप्रत्ययाभ्यामिति घपुस्तके।

तास्थले वाक्यार्थानुभवहेतुता वक्तुं शक्यते। अत एवाद्वैतसिद्धौ तत्त्वमस्यादिवाक्यस्थले पदाभिहितपदार्थानां वाक्यार्थानुभावकत्वमित्युक्तम्। लाक्षणिकस्थले मुख्यार्थान्वयानुभवस्यानावश्यकत्वे तु तदसङ्गतम्, पदार्थस्य पदाभिहितत्वाभावात्। पदजन्यानुभवविषयत्वं हि पदाभिहितत्वम्, न तु पदजन्यधीविषयत्वम्। प्रकृत्यर्थमात्रस्यापि पदाभिहितत्वापत्त्या 'प्रत्ययप्रकृतिशब्दतो बहि'रित्यादिसंक्षेपशारीरकविरोधात्।

ननु तार्किकादिमतेऽपि प्रकृत्यर्थान्वितप्रत्ययार्थशाब्दानुभवस्य क्रियाकारकान्वयबोधे हेतुत्वम्, गङ्गादिपदज्ञानस्य गङ्गादिपदार्थान्वयविषयताकशाब्दसामान्यहेतुत्वं च स्वीक्रियते; तथा च अभिहितान्वयवादात्तन्मतस्याविशेष इति चेन्न। तार्किकादिमते गङ्गादिपदज्ञानस्य (१)स्वप्रयोज्यगङ्गादिपदार्थधीद्वारा तदर्थविषयकशाब्दानुभवहेतुत्वस्वीकारेण स्मृतिरूपोक्तधीद्वारा प्रकृत्यर्थविशेषितप्रत्ययार्थशाब्दधीरूपोक्तानुभवस्य तादृशानुभवद्वारा क्रियाकारकान्वयधीरूपोक्तानुभवस्य च गङ्गादिपदज्ञानात् उत्पत्तिस्वीकारात्। अभिहितान्वयवादे च स्मृतिरूपोक्तार्थधीद्वारा उक्तप्रत्ययार्थशाब्दानुभव एव हेतुत्वस्योक्तपदज्ञाने स्वीकारेण क्रियाकारकान्वयानुभवस्योक्तपदज्ञानादुत्पत्त्यस्वीकारात्, गङ्गापदार्थान्वयविषयतायाश्चोक्तपदज्ञानजन्यतावच्छेदकत्वस्वीकाराच्च द्वयोर्मतयोर्विशेषात्। न ह्यभिहितान्वयवादे क्रियाकारकान्वयानुभवस्य पदज्ञानकरणकत्वं स्वीक्रियते। पदज्ञानकरणकानुभवस्यैव तत्करणतास्वीकारात्। पदज्ञानस्य हि स्वप्रयोज्यधीद्वारा स्वार्थशाब्दधीर्निकार्या, प्रयोज्यत्वस्य स्मृतावन्तरवाक्यार्थधीबोधे चानुगतस्यैकस्याभावात्। स्मृतौ हि कार्यत्वं स्मृतित्वेन, शाब्दबोधे

(१) स्वप्रयोज्यगङ्गापदादिपदार्थधीद्वारा इति गपुस्तके पाठः।

ननु तर्हि वेदान्तवाक्येभ्य एव पदार्थोपस्थितौ वाक्यार्थबोधे च सति तस्य स्वत एव प्रामाण्यात्तेनाज्ञानत-

च तत्त्वेन। तथा च स्वजन्यस्मृतिद्वारा ऽवान्तरवाक्यार्थबोधे पदज्ञानस्य हेतुत्वम्, तद्द्वारा महावाक्यार्थबोधे तु हेतुत्वान्तरम्। तथा च द्वितीये मानाभावात् महावाक्यार्थधीरवान्तरवाक्यार्थज्ञानेनैव जन्यते, न तु पदज्ञानेनेति भट्टमते स्वीक्रियते। न वा तार्किकादिमते अन्वयविषयताघटितरूपेण पदज्ञानस्य कार्यतायां मानमस्ति, ज्ञातार्थविषयताया अपि प्रमाणप्रयुक्तत्वस्वीकारेणोपदर्शितमानासम्भवात्। न हि तन्मते प्रमाणानामज्ञातज्ञापकत्वनियमः।

किञ्च तार्किकादिमते प्रकृत्यर्थविशिष्टप्रत्ययार्थशाब्दबोधोत्तरमेव क्रियाकारकान्वयानुभव इति नियमो न स्वीक्रियते, 'खले कपोत'न्यायेन युगपदेव तादृशानुभवस्यापि स्वीकारात्। वाक्यार्थकर्मके कुलकादौ चावान्तरवाक्यार्थानुभवपूर्वकमहावाक्यार्थस्वीकारेऽपि महावाक्यार्थानुभवसामान्यस्य तादृशनियमास्वीकारात्, अभिहितान्वयमते च तादृशनियमस्वीकारात्, स्फुट एवोक्तमतयोर्विशेषः। अन्विताभिधानवादात्तु तार्किकादिमते स्फुटतरो विशेषः। तार्किकैः प्रकृत्यर्थविशिष्टप्रत्ययार्थमात्रस्य शाब्दानुभवस्वीकारात् अन्विताभिधानमते तदस्वीकारादित्यास्तां विस्तरः।

ननु प्रमात्वेन भासमानज्ञानादेवाज्ञाननिवृत्तिरिति वाक्यजज्ञानीयप्रमात्वभानार्थं शास्त्रमपेक्ष्यताम् तत्राह—तस्येति। स्वत एव—साक्षिमात्रभास्यादेव। प्रामाण्यात्—प्रमात्वात्। तेनाज्ञाननिवृत्त्युपपत्ताविति यत्र हेतुरयम्। विचारेण—विचारशास्त्रेण।

विचारस्य सार्थकत्वं साधयिष्यन्नाशङ्कते नन्विति। वेदान्तवाक्येभ्य एव-उक्तमहावाक्येभ्य एव। पदार्थोपस्थितौ—तत्त्वंपदार्थोपस्थितौ। वाक्यार्थबोधे च सति—पदार्थयोरैक्यरूपान्वयबोधे च सति। तस्य—महावाक्यार्थबोधस्य।

त्कार्यनिवृत्त्युपपत्तौ किं विचारेणेति चेत्सत्यम् । वेदान्ता यद्यपि स्वतःप्रामाण्यान्निर्विकल्पकमात्मसाक्षात्कारं जनयन्ति, तथापि तस्य मन्दबुद्धीनां वादिविप्रतिपत्तिजसंशयप्रतिबन्धेन अज्ञाननाशकत्वासामर्थ्यात्, विचारेण तु संशयनिवृत्तौ निरपवादमज्ञाननिवृत्तिरिति सं-

न्यायरत्नावली ।

श्रीकृष्णकृपाकटाक्षैः नितरां शुद्धचित्तस्य न विचारशास्त्रापेक्षेत्याशयेनाह—सत्यमिति । तथाप्यतथाभूतान्मन्दाधिकारिणः प्रति विचारशास्त्रमावश्यकमित्याशयेनाह—वेदान्ता यद्यपीति । स्वतः प्रामाण्यात्—साक्षिमात्रभास्यं प्रमात्वमुत्सर्गतः प्राप्य । जनयन्ति—उत्पादयन्ति । संशयप्रतिबन्धेन—तात्पर्यसंशयरूपदोषनियतप्रमात्वावरणप्रयुक्तेनापवादकेन प्रमात्वसंशयरूपेणाज्ञाननिवृत्तिविरोधिना। निरपवादम्—उत्सर्गसिद्धस्वतः(१)प्रमात्वस्यापवाद-

नारायणी ।

स्वत एव प्रामाण्यात्-स्वग्राहकसाक्षिभास्यप्रमात्मकत्वात् (२)। *स्वतस्त्वं च स्वविषयत्वं विषयश्च साक्षिरूपा न प्रभाकरसम्मता स्वात्मिका किन्त्वविद्यावृत्तिरूपैव । अत एव भट्टसम्मता ज्ञाततालिङ्गकानुमितिरपि न. साक्षिणा च वृत्त्युत्पत्तिसमय एव तद्गताबाधितविषयकत्वरूपं प्रामाण्यमपि गृह्यत इति न तत्रापि विचारशास्त्रापेक्षेत्यर्थः *तेन-गृहीतप्रमात्वकेन बोधेन । अज्ञानेति-साध्यासाज्ञाननाशसम्भवे किं विचारशास्त्रेण श्रुतेर्निरपेक्षप्रमाणत्वेन बोधार्थं विचारशास्त्रापेक्षाऽयोगादिति भावः । भगवदनुगृहीतानां विचारशास्त्रमनतिप्रयोजनकमपि मन्दार्थं सार्थकं भवत्येवेत्यभिप्रेत्यार्धाङ्गीकारवाक्यमाह—सत्यमिति । स्वतः प्रामाण्यात्—स्वतः प्रामाण्यं प्रापय्य । निर्विकल्पकं—संसर्गानवगाहि । तस्यआत्मसाक्षात्कारस्य । वादीति । वक्ष्यमाणाभ्यो वादिविप्रतिपत्तिभ्यो जातो योऽहं कर्तृभोक्तृरूपो नवेत्यादिसंशयस्तदात्मकप्रतिबन्धेन । संशयनिवृत्तौ-विप्रतिपत्तिनिरासद्वारोक्तसन्देहनिवृत्तौ । निरपवादेति—निरप-

(१) उत्सर्गसिद्धप्रमात्वस्येत्यादिः घपुस्तके ।

(२) * * एतच्चिह्नद्वयमध्यगः पाठः खपुस्तके नास्ति ।

शयबीजभूतवादिविप्रतिपत्तिनिरासार्थं विचार आरभ्यते । तत्र त्वम्पदार्थे प्रथमं विप्रतिपत्तयः प्रदर्श्यन्ते । तत्पदार्थस्य शास्त्रतात्पर्यविषयतयाऽभ्यर्हितत्वेऽपि त्वम्प-

न्यायरत्नावली ।

कोक्तसंशयशून्यम् । इदं च निवृत्तिक्रियाविशेषणम् । तथा चौत्सर्गिकस्वतःप्रमात्वस्य दोषसमवधाननियतेन प्रमात्वावरणेनापवादात् प्रमात्वसंशयोदयेनानिश्चितप्रमात्वकस्य साक्षात्कारस्य नाविद्यानिवर्तकत्वम्,विचारे सति तु निश्चितप्रमात्वसाक्षात्कारस्याविद्यानिवर्त्तकतेति भावः । त्वम्पदार्थे—मोक्षवादीभिः मोक्षभागित्वेनाभिमते । शास्त्रतात्पर्येति । जीवस्वरूपस्य शुद्धस्यापि सुषुप्त्यादिसिद्धत्वेन ज्ञातत्वात्, ब्रह्मस्वरूपस्याज्ञातस्यैव सत्यादिवाक्येन शुद्धरूपेण ज्ञापयित्वा महावाक्येन जीवस्वरूपानुवादेन ब्रह्मस्वरूपस्य तदभेदेन विधानात्, सत्यादिवाक्यविशिष्टमहावाक्यस्य विधायकत्वान्महावाक्यस्यैव द्वारीभूतशुद्धजीवोपस्थितिहेतुत्वम्पदवत्त्वेन शुद्धजीवानुवादकत्वात्, शुद्धब्रह्मण्येव शास्त्रतात्पर्यमिति ज्ञायते । महावाक्यार्थनिश्चयात्पूर्वं तत्त्वम्पदलक्ष्यस्वरूपगोर्भेदनिश्चया(१)त्तत्त्वम्पदार्थयोर्जीवस्वरूपस्यैव ब्रह्मरूपाभिन्नतया ज्ञाय-

नारायणी ।

वादं प्रतिबन्धरहितं यथा स्यात्तथा ऽज्ञाननिवृत्तिः । संशयेति—विषयप्रमागतोभयसन्देहेत्यर्थः । तत्र—तत्त्वंपदार्थयोर्मध्ये । त्वंपदार्थे—ज्ञानाधिकारिणि । विप्रतिपत्तयः—विरुद्धाः प्रतिपत्तयः, कोट्यन्तरोपस्थापकानि वादिनां वाक्यानि इति यावत् । प्रथममिति स्वोक्ते बीजं स्पष्टयति—तत्पदार्थस्येति । जगत्कर्तृत्वाद्युपलक्षितस्य । शास्त्रेति । जीवे सद्वयत्वादिभ्रमनिवृत्त्यर्थं विधेयत्वेन शास्त्रप्रवृत्त्युद्देश्यप्रमितिविषयतयेत्यर्थः । अभ्यर्हितत्वेपि-सूत्रकारादिभिर्ज्ञेयत्वाद्युक्त्या पूजितत्वेपि । शास्त्रजन्येति—परम्परया शास्त्र-

(१)—भेदनिश्चयसत्त्वात् । अथवा जीवब्रह्मस्वरूपयोरेकत्वेन शास्त्रतात्पर्यविषयत्वनिश्चयस्य श्रवणफलस्य काले. उक्ताविषयत्वरूपाभ्यर्हितत्वनिश्चयेपि तत्पूर्वं तत्त्वंपदार्थयोर्जीवस्वरूपस्यैवेत्यादिपाठोऽधिको घपुस्तके ।

दार्थस्य शास्त्रफलमोक्षभागितया ततोऽप्यभ्यर्हितत्वात् । तत्र देहाकारेण परिणतानि चत्वारि भूतान्येव त्वम्प-

न्यायरत्नावली ।

मानस्य मोक्षभागित्वेन स्वीकारात् जीवोऽभ्यर्हितः । शास्त्रतात्पर्यविषयापेक्षया हि शास्त्राधीनप्रतिपत्तिफलं मुख्यम् , तदर्थं तस्य ज्ञेयत्वात् । फलापेक्षयापि फलकामो मुख्यः, तस्य (१)तद्गत-साक्षात्काररूपभोगजनकत्वादिति भावः ।अभ्यर्हितत्वादिति । प्रथमश्लोके(२) आचार्यैः पूजितत्वादित्यर्थः । तेन आचार्यैः मोक्षभागित्वेन प्रथमतः जीवस्वरूपस्य विवेचितत्वात् तत्रास्माभिरपि प्रथमं विप्रतिपत्तिरुच्यते(३) । उच्यत इत्यर्थलाभात् आद्यश्लोकस्य प्राथम्येऽपि हेतुलाभः । देहेत्यादि । यद्यपि भूतानि जडस्वभावानि, तथाऽपि मदिराकारपरिणतस्यान्नस्य मादकत्ववत् देहाकारपरिणतस्य भूतचतुष्टयस्य ज्ञातृत्वम् , स्थूलोऽहं जानामि' इति प्रत्ययादिति भावः । चार्वाकैकदेशिनां मतान्याह-

नारायणी ।

जन्यमोक्षरूपफलभागितयेत्यर्थः । त्वंपदार्थस्य-अधिकारिणः । ततोपि--तत्पदार्थादपि । अभ्यर्हितत्वात्--आदृतत्वात् । आचार्यैरिति शेषः । ज्ञेयापेक्षया ज्ञानाधिकारिणो मुख्यत्वात् अधिकारिणं विना विचारस्यैवानुत्थानादिति भावः । अत—तत्पदार्थत्वंपदार्थयोर्मध्ये । देहाकारपरिणतानि-देहाकारेण विकृतानि । चत्वारि भूतानि—पृथिव्यप्तेजोवायवाख्यानि भूतसंज्ञकानि । त्वंपदार्थः--त्वंपदाभिधेयश्चेतनो जीव इत्यर्थः । गौरोह जानामीत्यादिप्रतीत्या गौरस्यैव ज्ञानवत्त्वप्रतीतेरिति भावः । देहानामवस्थाभेदेन भेदेप्यहंप्रत्ययस्यानुवृत्तेर्नाहं प्रत्ययगोचरो देहः किन्तु काणोहमित्यादिप्रतीतेर्यथासम्भवमिन्द्रियमेवेति

(१) तद्गतेति घपुस्तके नास्ति ।

(२) न भूमि र्न तोयं·····शिवः केवलोहमिति श्लोके ।

(३) विप्रतिपतिरुच्यते इत्यर्थलाभादिति घपुस्तके । युक्तश्चायम् ।

दार्थं इति चार्वाकाः । चक्षुरादीनि प्रत्येकमित्यपरे । मिलितानीत्यन्ये । मन इत्येके । प्राण इत्यपरे । क्षणिकं वि-

न्यायरत्नावली ।

चक्षुरादीनीति । तत्र मृते देहे ज्ञातृत्वाभावात् पश्यामीत्यादिप्रतीतेश्चेन्द्रियमात्मा । तत्र चक्षुः सर्वापेक्षया अधिकसुखहेतुत्वेन श्रेष्ठत्वात् तदेव ज्ञातृ । तदभावे श्रोत्रमेव, अन्यापेक्षयाऽधिकसुखहेतुत्वात् । तयोरभावे त्वगिन्द्रियम्, तद्धि यद्यपि रात्रिन्दिवं बहुधा विषयग्राहिचक्षुश्श्रोत्रापेक्षया निकृष्टम्, तथापि रसनापेक्षया बहुधा विषयग्राहित्वेन श्रेष्ठम् । तदभावे रसनम्, प्रतिदिनमावश्यककार्यत्वेन घ्राणापेक्षया श्रेष्ठत्वात् । तदभावे घ्राणम् । मिलितानीति । यावन्ति इन्द्रियाणि एकशरीरे मरणपर्यन्तं तिष्ठन्ति, तावन्तीत्यर्थः । 'पश्यामी'त्यादिप्रत्ययेभ्यः कस्यचिच्चक्षुषः अधिकसुखम् अधिकविषयग्राहित्वमिव कस्यचिच्छोत्रादिनैव तदुभयमिति विनिगमकाभावात् कस्य केनेन्द्रियेण तदुभयमिति परेण ज्ञातुमशक्यत्वाच्च । अन्यानीन्द्रियाणि आलोचनात्मकानिर्विकल्पकसाधनत्वात् नात्मा । मनस्तु सविकल्पकसाधनत्वादन्येन्द्रियप्रवृत्तिमूलसङ्कल्पादिमत्त्वात् श्वेतद्वीपवासिनामन्योन्द्रियाभावेऽपि सत्त्वात् आत्मेति केचित् । सर्वदा प्राणस्यैकरूपत्वादमनस्कानामपि योग्यादीनां प्राणसत्त्वात् प्राण एवात्मेत्यन्ये । क्षणिक-

नारायणी ।

चार्वाकानुजमतमाह--चक्षुरित्यादि । विनिगमकाभावात्सर्वाण्येवात्मेत्यपरानुजमतमाह--मिलितानीति । इन्द्रियाणामभावेपि स्वप्नेऽहमिति प्रतीतेर्नेन्द्रियाण्यात्मा किन्तु मन एवेत्यपरमतमाह--मन इति । मनसोऽभावेपि सुषुप्तौ स्वापानुभवात् न मन आत्मा किन्तु प्राणवायवः श्वासादिहेतुभूता इत्यपरमतमाह—प्राण इति । ज्ञानं विना बाह्यपदार्थस्यासिद्धेर्बाह्यपदार्थ आत्मा किन्त्वर्थक्रियाकारित्वरूपे(१)ण प्रतिक्षणविनाशि ज्ञानमेवात्मेति सौगतमतमाह—क्षणिकमिति । द्वितीयक्षणवृत्तिध्वंसप्रतियोग्या-

(१)—रूपसत्त्वेन प्रतिक्षणेति पाठः खपुस्तके ।

न्यायरत्नावली।

मिति। यद्यपि सत्यं सर्वं क्षणिकम्, तथापि ज्ञानमेवात्मा, ज्ञानभिन्ने ज्ञातरि मानाभावात्। तत्राहमिति आलयविज्ञानं पूर्वपूर्वेणैव उत्तरोत्तरं जायते। इन्द्रियादिजन्यं प्रवृत्तिविज्ञानं षड्विधम्। न च क्षणिकस्यात्मनः कालान्तरभाविभोगार्थं प्रवृत्त्यनुपपत्तिरिति वाच्यम्। क्षणिकत्वभावनापरिपाकं विना स्थिरत्वगोचरानादिदृढवासनानुच्छेदात्। उक्तपरिपाके तु (१)मोक्षप्राप्त्या प्रवृत्त्यभाव इष्ट एवेति वादिनः चत्वारः सौगताः। तत्र सर्वाधमः सौत्रान्तिकः। स हि मन्यते घटपटादयो बहिर्विषयाः सर्वे नित्यानुमेयाः, (२)घटाद्याकारे हि ज्ञाने घटादीनां प्रतिबिम्बमुपलभ्य, 'तत्प्रतिबिम्बं बिम्बपूर्वकम् प्रतिबिम्बत्वात् मुखादिप्रतिबिम्बवदि'त्यनुमीयते।(३)तत्र श्रेष्ठो वैभाषिकः। स हि घटादीनां प्रत्यक्षं नापलपति। तयोर्भेदे भ्रमस्थले शुक्त्यादौ रजताद्यभावेऽपि ज्ञानरूपमेव रजतादिकं ज्ञायते, तत्रैव चेदन्तवादेः संसर्गाध्यासः। ततोऽपि श्रेष्ठो योगाचारः। स हि मन्यते घटादिकं सर्वं ज्ञानमेव, बहिरर्थस्य परमाणुसमूहरूपत्वे स्थौल्यादिबुद्ध्यनुपपत्तिः, अवयवित्वे च आवृतत्वानावृतत्वम(४)कम्पत्वाकम्पत्वनीलत्वानीलत्वादिविरुद्धधर्माध्यासस्य भेदकस्य (५)बाधकत्वम्, अतस्तस्य दुर्वचत्वात् तादात्म्यजातीयसम्बन्धस्य घटो द्रव्यमित्यादौ तु कल्पत्वात् तादात्म्यान्यस्य ज्ञानविषययोः सम्बन्धस्य कल्पने गौरवाच्च। घटादिकं ज्ञानात्मकमि(६)त्याकारविशेषः ज्ञानस्य निरंशत्वात्

(१) शुद्धवि ज्ञानधारारूपेश्वरप्रवेशरूपमोक्षप्राप्त्या इत्यादि घपुस्तके।

(२) नित्यानुमेया अपि घटाद्याकारे इति गपुस्तकीयः पाठः प्रामादिकः।

(३) ततः श्रेष्ठो वैभासिक इति भाव्यम्।

(४) सम्यक्त्वासम्यक्त्वनीलत्वेत्यादि पाठो घपुस्तके।(५) साधकत्वमिति गपुस्तके।

(६)-मिथ्याभूताकारविशेषः ज्ञानस्य निरंशत्वात् मूर्ताभूर्तादिविरुद्धनानाकारत्वानाम् इत्यादिपाठो घपुस्तके।

न्यायरत्नावली ।

विरुद्धनानाकारत्वानां संशयादिस्थलेऽनुपपत्तेर्न वास्तवः । एवं सर्वबौद्धमते प्रमाणप्रमातारोऽपि ज्ञानस्य कल्पिताकाराः । प्रमेयप्रकाशनव्यवहारोपधायकत्वविशिष्टज्ञानरूपा प्रमितिः-प्रमितिव्यवहारानुकूला शक्तिः प्रमाणम्, तदाश्रयः प्रमाता, पूर्वपूर्वज्ञानादेवोत्तरोत्तरज्ञानमुत्पद्यते, ज्ञानं च सर्वं स्वविषयकम्, न तु ज्ञानान्तरविषयः, अनवस्थाद्यापत्तेः । विज्ञानवादिमते घटादेः ज्ञानाकारस्यैव विषयत्वेन ज्ञानानां क्षणिकानां भिन्नकालीनत्वेन विषयविषयिभावसम्बन्धाभावात्, त्रयाणामेषां तु विशुद्धक्षणिकविज्ञानभावनया तद्धारारूप(१) ईशप्रवेशो मोक्षः । उक्तभावनारूपपरिज्ञानस्य जीवसन्तानस्थस्य यस्मिन् विशुद्धविज्ञाने हेतुत्वम्, तस्येश्वरसन्तानस्थेन तत्कालीनेन क्षणिकेन विज्ञानेन लाघवादैक्यस्वीकारेण मुक्तजीवेश्वरसन्तानयोरैक्यसम्पत्त्या (२)जीवस्येश्वरसन्तानप्रवेश उच्यते। संसारिनानाजीवस्थानां तु विज्ञानानां नैकसन्तानप्रविष्टतापत्तिः, मिथो विलक्षणत्वात् । तत्सन्तानानां भिन्नकालगतसुषुप्तिपूर्वापरावधिकत्वेन तद्गतज्ञानानां कार्यकारणभावानापन्नत्वाच्च । सुषुप्तिर्हि विज्ञानसन्तानानां (३)पूर्वापरावधिः । उक्तं हि पञ्चपाद्यां बौद्धमतविवेचने—'सुषुप्तौ विज्ञानलेशस्याप्यभावात् अकस्मादेव जागरेऽहमिति धीदर्शना' दिति । बौद्धाधिकारादौ तु सुषुप्तावप्यालयविज्ञान प्रवृत्तावज्ञानरहितं पक्षान्तरमालम्ब्य स्वीकृतम् । ततोऽपि श्रेष्ठो माध्यमिकः । स हि मन्यते विज्ञानरूपमपि सर्वं मिथ्यैव । क्षणिकभावनया शून्यभावनया च आत्म-

(१)—तद्धारेति । शुद्धविज्ञानधारेत्यर्थः ।

(२) जीवस्येश्वरसन्तान प्रवेश उच्यते । नहि जीवसन्तानेन जायमानस्य विशुद्धविज्ञानस्य विशुद्धविज्ञानस्वरूपमोक्षस्येश्वरसन्ताने जायमानज्ञानाद्भेदे मानमस्ति । संसारिनानेत्यादिः घपुस्तके पाठः ।

(३) पूर्वोऽपरश्चावधिरिति घपुस्तके ।

ज्ञानमिति सुगताः । शून्यमिति माध्यमिकाः । देहेन्द्रियातिरिक्तो देहपरिमाण इति दिगम्बराः । कर्ता भोक्ता जडो विभुरिति वैशेषिकतार्किकप्राभाकराः । (१)जडो

न्यायरत्नावली।

ज्ञानरूपो मोक्ष इति । तदेतत् विज्ञानरूपात्ममिथ्यात्वमतमेव शून्यमात्मेत्यनेनोक्तम् । न हि शून्यं नाम किञ्चित्तत्त्वं तेनोच्यते । अत एव तत्त्वस्य कस्यचित्त्वयानङ्गीकारात् तत्त्वज्ञानं विना सर्वबाधासम्भवेन सर्वमिथ्यात्वासिद्धिरिति तन्मतं दूषितं भामत्याम् । सर्वं मिथ्येति माध्यमिकमतमिति खण्डनकारैरप्युक्तम् । दिगम्बरा-आर्हताः, अर्हन्नाम नित्यसिद्धः पुरुषः, तत्कृतशास्त्रानुयायित्वात् । ते च मन्यन्ते देहसमानपरिमाणः आत्मा, महान्तं देहं त्यक्त्वा न्यूनदेहग्रहणे आत्मनो ह्रासेऽपि न नाशः । परिमाणभेदेऽपि द्रव्यस्यानाशात् । आत्मा सन्ततोर्ध्वगतिस्वभावोऽपि कर्मपाशेनापि बद्धत्वात् न संसारकाले ऊर्ध्वं गच्छति । कर्मणामत्यन्तोच्छेदे तु(२)सततोर्ध्वगतिं लभते, सैव मोक्षः; अलौकिकाकाशगमनं वेति । नास्तिकानां षड्दर्शनीमुक्त्वा आस्तिकानां तामाह- कर्तेत्यादि । वैशेषिकादयस्तु आत्मनः सुखदुःखयोगात् तद्धेतुभूतं विहितनिषिद्धक्रियार्कर्तृत्वमावश्यकम् । स च ज्ञानस्वरूपभिन्नत्वाज्जडः ।

नारायणी ।

लयविज्ञानधारारूपमित्यर्थः । प्रमेयत्वेन दृग्दृश्ययोरपि मिथ्यात्वान्न सद्रूपं क्षणिकं विज्ञानमात्मा किन्तु मिथ्याभूतं क्षणिकं विज्ञानमिति सौगतराजमतमाह--शून्यमिति । मिथ्याभूतं क्षणिकं विज्ञानमित्यर्थः । क्षणिकत्वे कर्तृभोक्तृव्यवस्थानुपपत्तेर्न क्षणिकं विज्ञानमात्मा किन्तु देहेन्द्रियाद्यतिरिक्तो देहसमपरिमाणवान्, अन्यथा भोगव्यवस्थानुपपत्तेरिति । जैनमतमाह देहेन्द्रियेति । सावयवत्वेन विनाशित्वापत्त्याऽकृताभ्यागमप्रङ्गान्न देहेन्द्रियाद्यतिरिक्तो देहपरिमाणवानात्मा किन्तु निरवयवो नित्यो विभुर्ज्ञानवानिति तार्किकादिमतमाह—कर्तेत्यादिना ।

(१) जडबोधात्मक इति खघपुस्तकयोः । (२) स तदोर्ध्वगतिं लभते इति गपुस्तके ।

बोधात्मक इति भाट्टाः । भोक्तैव (१)केवलबोधात्मक

न्यायरत्नावली ।

जानामीति, ज्ञानाश्रयत्वेन स भाति, न ज्ञानरूपत्वेन । सर्वमूर्तसंयोगित्वरूपविभुत्वमपि तस्यावश्यकम् । अणुपरिमाणत्वे हि देहव्याप्त्यभावेन युगपज्ज्ञानावयवावच्छिन्नसुखादिसमवायित्वं न स्यात्, प्रत्यक्षविषयता च न स्यात्, महत्त्वस्य तस्यां प्रयोजकत्वात् । मध्यपरिमाणत्वे च सावयवत्वेन जन्यत्वापत्तेर्जन्यभावत्वेन विनाशित्वापत्त्या परममहत्परिमाणत्वस्वीकारेण विभुत्वोपपत्तिः । देहादिभिन्नत्वेन आत्मज्ञानपरिपाकात् आत्यन्तिककर्मोच्छेदेनात्यन्तिकदुःखोच्छेदरूपमोक्ष इत्याहुः । तादृशमेव भाट्टमतम् । अत्यन्तदुःखोच्छेदः नित्यसुखसाक्षात्कारो वा मोक्षः, मोक्षकाले हि चक्षुरादिविच्छेदेऽपि मनसो विच्छेदास्वीकारात् कर्मरूपस्य प्रतिबन्धस्योच्छेदेन नित्यसुखविशिष्टतयाऽऽत्मानं मनसैव साक्षात्करोति । आत्मनस्तु अंशद्वयमस्ति । चिदंशेन द्रष्टृत्वम्, 'सोऽहमि'तिप्रत्यभिज्ञाविषयत्वादिकं च, अचिदंशेन ज्ञानसुखादिरूपपरिणामित्वं च, 'मामहं जानामी' ति ज्ञेयत्वं च, ज्ञानरूपातीन्द्रियव्यापारेण विषयनिष्ठज्ञाततारूपसंवित्कर्तृत्वं चेति विशेषः । भोक्तैवेति ।

नारायणी ।

कर्ता—कृतिमान्, भोक्ता—सुखदुःखाद्यनुभविता, जडः—ज्ञानभिन्नः, विभुः—सर्वमूर्तसंयोगी । न केवलं जडो विभुरात्मा 'योऽयं विज्ञानमय' इत्यादिश्रुतिविरोधात्, किन्तु 'मामहं जानामी'ति द्रश्यत्वद्रष्टृत्वयोरपि प्रतीतेरंशतो जडोंऽशतश्च बोध इति मीमांसावार्तिककारमतमाह—जड इत्यादि । जडबोधावात्मा स्वरूपं यस्येत्यंशतो जडबोधस्वरूप इत्यर्थः । (२)'निष्क्रियं निष्कलं शान्त'मिति श्रुतेः निरवयवत्वेनात्मनोंशतो जडबोधरूपत्वासंभवान्न जडबोधरूप आत्मा किन्तु नित्यज्ञानस्वरूपो भोक्तैव न कर्ता अपरिणामित्वादिति साङ्ख्यपातञ्जलयोर्मतमाह—भोक्तैवेति । चेतनत्वा-

(१) केवलो बोधात्मक इति घपुस्तके ।

(२) अत्र सर्वास्तिकेषु वैशेषिकोऽधमः शब्दप्रमाणरूपस्य वेदस्यानुमानविधया प्रामाण्यास्वीकारात् । शब्दप्रामाण्यस्वीकर्तृणां मध्ये तार्किकोऽधमः तत्त्वमस्यादिवाक्यस्य लक्षणया

इति साङ्ख्याः पतञ्जलिश्च । अविद्यया कर्तृत्वादिभाक्

न्यायरत्नावली ।

न तु कर्ता, बुद्धिरेव कर्त्री, तदविवेकादात्मनः कर्तृत्वव्यवहारः, सर्वत्रैव हि भ्रमस्थले विषययोः असंसर्गाग्रहात् संसर्गव्यवहारः, धर्मिधर्मज्ञानयोर्भेदाज्ञानात् ज्ञानैकत्वव्यवहारः, न तु विशिष्टं ज्ञानमस्ति, अन्यथाख्यात्यनभ्युपगमात् असंसर्गाग्रहाख्यदोषात् । एवं चासंसर्गग्रहेण न कस्यापि बाध इति लाघवम् । अत एव भ्रमस्थले प्राभाकरोऽप्येवमाहेति भावः । केवलबोधात्मक इति । (१)असङ्गस्वप्रकाशकूटस्थचिदात्मकः । अत एव भोक्ता । सुखदुःखाभ्यां विद्यमानाभ्यां बुद्धिधर्माभ्यामविवेकोपलक्षितानुभवस्वरूप हि भोक्तृत्वम्, तच्च सत्यमेवेति भोक्तैवात्मा । तस्य बुद्धिविवेकज्ञानेन संप्रज्ञातासंप्रज्ञातसमाधिपरिपाकपर्यन्तेनाविवेकनिवृत्त्या दुःखात्यन्तोच्छेदो मोक्ष इति विशेषः । सर्वास्तिकमतसारमतमाह–अविद्ययेत्यादि । वैशेषिको हि आस्तिकानामधमः, शब्दप्रामाण्यानभ्युपगमेन वेदप्रामाण्यानङ्गीकारात् । वेदप्रामाण्यस्वीकर्तृणां मध्येऽपि तार्किको न्यूनः, 'असङ्गो ह्ययं पुरुष' इत्यादि

नारायणी ।

द्भोक्तृरूप इत्यर्थः । एवकारात्कर्तृत्वव्यवच्छेदः । अयं भावः, अपरिणामिस्वभावतया कर्तृत्वायोगेपि भोक्तृत्वं युक्तम् , अचेतनस्य देहादेर्भोगायोगात्, अन्यथा मृतदेहादेरपि भोगाद्यापत्तेरिति । केवलबोधात्मकः–जडत्वादिकल्पनारहितबोधस्वरूप इत्यर्थः । वस्तुतो न भोक्ताऽऽत्मा 'असंगो ह्ययं' मिति श्रुतिविरोधात् किन्तु प्रातिभासिककर्तृत्वभोक्तृत्ववानिति वेदान्तमतमाह–अविद्ययेति । निःसङ्गत्वेप्याविद्यकभोक्तृत्वमिव कर्तृत्वमपि युक्तमित्य-

भावनापरत्वाङ्गीकारात् । प्राभाकरस्तु केवलोपनिषदां तन्मूलेतिहासादीनां च स्वार्थे प्रामाण्यं नेति वक्ता सर्वास्तिकाधमोऽपि ज्ञानस्य स्वतः प्रामाण्याङ्गीकारादभावस्याधिकरणात्मत्वाङ्गीकाराच्चान्तवेदार्थाङ्गीकारात्ततोधिकः । भट्टस्तु जीवस्य बोधरूपाङ्गीकारात्प्रमाणषट्काङ्गीकाराच्च ततोप्यधिक इति विवेकः । अयं पाठोऽधिकः कपुस्तके परन्तु तथात्वे ग्रन्थसम्बन्धविच्छेदात् न्यायरत्नावल्युक्तस्य टिप्पणीभूतोयं लेखकदोषान्मूले पतित इत्यालोच्य तत उद्धृत्य टिप्पण्यामेव निवेशितोऽस्माभिः । खपुस्तके नास्त्येवैषः ।

(१) असंसर्गस्वप्रकाशेत्यादिः गपुस्तके ।

परमार्थतो निर्धर्मकः परमानन्दबोध (रूप) एवेत्यौपनिषदाः॥

न्यायरत्नावली।

शुद्धजीवप्रतिपादकश्रुतीनां तत्त्वमसीत्यादिश्रुतीनां च अभेदभावनापरत्वाभ्युपगमात्, 'इदं सर्वं यदयमात्मा, सर्वं खल्विदं ब्रह्म, ब्रह्मैवेदं सर्वमित्यादिश्रुतीनां ब्रह्मकर्तृकं विश्वमित्यर्थकत्वाभ्युपगमात्। प्राभाकरभट्टयोस्तु वेदान्तदर्शने विद्वेषाभावः—

इत्याह नास्तिक्यनिराकरिष्णुरात्मास्तितां भाष्यकृदत्र युक्त्या।
दृढत्वमेतद्विषयस्तु बोधः प्रयाति वेदान्तनिषेवणेन॥

इति तर्कचरणीयभट्टकारिकया वेदान्तदर्शनपुरस्कारात्। आत्मा निष्प्रपञ्चं ब्रह्मैव, तथापि कर्मप्रसङ्गेन तथा वाच्यम्। उक्तं हि श्रीकृष्णेन भगवता—

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्।

इति प्राभाकरग्रन्थगतोक्तेः। तथापि भट्टैः जडबोधात्मक आत्मेति स्वग्रन्थवाक्येन अविद्योपहितचिद्रूप आत्मेति सूचनात्, प्राभाकरेण स्वप्रकाशजन्यबोधाश्रयो(१)ऽचिद्रूप आत्मेति स्वग्रन्थे कथनात्, प्रपञ्चज्ञानेऽन्यथाख्यातित्वमात्रस्याप्यकथनाच्च प्राभाकरो भट्टापेक्षया न्यूनः। भाट्टा अपि साङ्ख्यपातञ्जलापेक्षया न्यूनाः, साङ्ख्यादिवत्स्वग्रन्थे आत्मन असङ्गत्वाद्यनुक्तेः। साङ्ख्यास्तु पातञ्जलापेक्षया न्यूनाः, 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर' इति सूत्रेण हि पातञ्जल ईश्वरं स्वीकृतवान् न (२)साङ्ख्या इत्याशयेन वैशेषिकादिनिर्देशोत्तरं तार्किकादि निर्दिष्टवानाचार्यः। निर्धर्मकत्वे हेतुमाह—अविद्यया कर्तृत्वादि-

नारायणी।

भिप्रेत्याह—कर्तृत्वादीति। मिथ्याज्ञानवासनाप्रयुक्तं नैय्यायिकमतेप्यस्ती-

(१)—बोधाश्रयः चिद्रूप इति गपुस्तके पाठः प्रामादिकः।

(२) न तथा साङ्ख्या इत्याशयेन पातञ्जलं साङ्ख्यनिर्देशोत्तरं निर्दिष्टवानाचार्य इत्येव युक्तम्।

एवं सामान्यतोऽहम्प्रत्ययसिद्धे चिदात्मनि वादिविप्रतिपत्तिभिः सन्दिग्धे अहम्प्रत्ययस्यालम्बनविशेषनिर्णयायाह भगवानाचार्यः—

न भूमिर्न तोयं न तेजो न वायु-
र्न खं नेन्द्रियं वा न तेषां समूहः ।
अनेकान्तिकत्वात्सुषुप्त्येकसिद्ध-
स्तदेकोऽवशिष्टश्शिवः केवलोऽहम् ॥ १ ॥

(१)अस्यार्थः अहम्-अहम्प्रत्ययालम्बनम् । एकः-अद्वि-

न्यायरत्नावली ।

भागिति । अविद्यात्मककर्तृत्वादिमानित्यर्थः । सन्दिग्धे-'शरीरादिस्वभावो न वे'ति विशेषतः सन्दिग्धे । अहमित्यादि । अहम्प्रत्ययस्य यदालम्बनविशेषो देहाद्यात्मकतया भासमानं स्वरूपं तस्य भूम्यादिभिन्नतया निर्णयायेत्यर्थः । अहम्प्रत्ययालम्बनं-देहादितादात्म्येन भासमानं स्वरूपम् । अद्वितीय इति । 'एके मुख्यान्यकेवला' इति कोशादावेकशब्दस्य नानार्थकत्वोक्तावपि प्रकृते पदान्तरेणैवात्मनः प्रपञ्चापेक्षया मुख्यत्वान्यत्वयोर्लाभाद् केवलार्थत्वमेव । केवलत्वं च इतरसम्बन्धशून्यत्वम् । तत्रैकेन घटेन जलमाहरेत्यादौ घटत्वादिसंसृष्टस्य करणत्वादौ तात्पर्यावधारणात्

नारायणी ।

त्यत आह—परमार्थत इति । प्रतीतिकालेपि परमार्थत्वेन धर्माभाववानित्यर्थः । साङ्ख्याद्विशेषान्तरमाह—परमानन्दबोधरूप इति । नित्यानन्दबोधस्वरूप इत्यर्थः । एवं--दर्शितप्रकारेण, सामान्यतः--जीवत्वात्मत्वादिना, वादिविप्रतिपत्तिभिः--विरुद्धकोट्युपस्थापकनिरुक्तवादिशब्दैः, सन्दिग्धे-अहं कर्तृभोक्तृस्वरूपो न वेति विशेषतः सन्दिग्धे । अहंप्रत्ययस्येति । अहंधियोऽकर्तृभोक्तृस्वरूपविषयविशेषनिर्णयायेत्यर्थः । अहंप्रत्ययालम्बनम्-अहंप्रत्ययविषयः । अद्वितीयः-द्वित्वादिसङ्ख्यापूरकमा-

(१) अस्यार्थ इति खगपुस्तकयोर्नास्ति

तीयः । अवशिष्टः-सर्वद्वैतबाधेऽप्यबाधितः । शिवः-परमानन्दबोधरूपः । तस्यैव मङ्गलरूपत्वात् । केवलो-निर्धर्मकः । तेनाद्वितीयः सर्वप्रमाणाबाध्यः परमानन्द-

न्यायरत्नावली ।

एकपदार्थसङ्कोचकल्पनया घटान्तररूपेतरसम्बन्ध(१)बाधः । प्रकृते तु शुद्धस्वरूप एव तात्पर्यावधारणेन सङ्कोचाभावात् आत्माभिन्नरूपद्वितीयमात्रशून्यत्वं बुध्यत इति भावः । अवशिष्टपदमुपयुक्तसंसृष्टमनुपयुक्तं बोधयति । (२)आत्मा ज्ञानेनोच्छेद्यतया नोपयुक्तः उच्छेद्यपश्चसंसृष्टश्चेति स एव तत्पदार्थ इत्याशयेनाह—अवशिष्ट इति । ननु शिवपदमिष्टार्थकम्, कथं परमानन्दार्थकमुक्तं तत्राह-तस्येति । मङ्गलेति । इष्टेत्यर्थः । ननु एकपदं द्वितीयाभावसंसृष्टपरं न वा ? आद्ये द्वितीयसामान्याभावसंसर्गव्याघातः, संसर्गस्यैव द्वितीयत्वात्, सत्यकामादिश्रुतीनामपि सत्यकामत्वादिसंसृष्टपरत्वापत्तेश्च । द्वितीये एकपदवैयर्थ्यम् सद्वितीयत्वभ्रमानिवर्तकत्वात् तत्राह—केवलो निर्धर्मक इति । धर्माभावोपलक्षित इत्यर्थः । तथा च पूर्वोक्तरीत्या उपलक्षणतया द्वै(३)ताभावसम्बन्धज्ञानस्यापि सद्वितीयत्वभ्रमानिवर्तकत्वसम्भवात् एकपदमसंसृष्टपरम् । अत एव 'एकमेवाद्वितीय'मिति श्रुतौ एकप-

नारायणी ।

यातत्कार्यरूपद्वितीयरहितः । सर्वद्वैतबाधेपि-आत्मतत्त्वधिया सर्वद्वैतस्य मूलोच्छेदेपि, स्वयं सत्यः बाधसाक्षितयापि तत्सत्त्वावश्यकत्वादिति भावः । परमानन्दबोधरूपः—नित्यानन्दबोधस्वरूपः(४) । शिवशब्दस्य परमानन्दार्थता कथं तत्राह—तस्यैवेति । परमात्मन एवेत्यर्थः । मङ्गलरूपत्वात्—कल्याणरूपत्वात् । 'प्रेयोन्यस्मात् सर्वस्मादि'त्यादिश्रुतिभिरिष्टतमत्वावगमेन कल्याणरूपत्वौचित्यादिति भावः । निर्धर्मकः-निर्गतं धर्मसामान्यं यस्मादिति धर्मसामान्याभाववानित्यर्थः ।

(१) सम्बन्धशून्यत्वबाधः इति घपुस्तके । (२) प्रकृते चात्मा इति घपुस्तके ।
(३)—उपलक्षणतयान्वितभाव० इत्यादिः गपुस्तके ।
(४) नित्यानन्दबोध इति कपुस्तके प्रमादभ्रष्टं प्रतिभाति ।

बोध एवाहम्प्रत्ययालम्बनमित्यौपनिषदपक्ष एव श्रेया-
नित्यर्थः। एतदुपपादनायेतरवादिमतानि निराकरिष्यन्
प्रथमं देहात्मवादं निराकरोति—न भूमिर्न तोयं न ते-
जो न वायुर्न खमिति । अत्राहमिति सर्वत्र(१) नञा
सम्बध्यते। या भूमिः सोऽहं न भवामि योऽहं सा भू-
मिर्न भवतीति च परस्परतादात्म्याभावो द्रष्टव्यः। य-
द्यपि वादिना प्रत्येकं भूम्यादिरात्मत्वेन(२) नाभ्युपेयते
संघातस्यैव तदभ्युपगमात्, तथापि तन्मते अवय-

न्यायरत्नावली।

देन सजातीयस्य अद्वितीयपदेन विजातीयस्य एवकारेण धर्मस्य
ब्रह्मणि निषेधः, एवं च एकपदेन सजातीयविजातीययोः केव-
लपदेन धर्माणां निषेध इति न तयोः पौनरुक्त्यमिति भावः।
औपनिषदपक्षः—श्रीमच्छङ्कराचार्यमतम्। श्रेयान् सर्वमतेभ्य उ-
त्कृष्टम्। आत्मनि देहादेः देहादौ चात्मनः तादात्म्याध्यासेन दे-
ह एवात्मेति भ्रमोदयात् तन्निवृत्त्यर्थं परस्परतादात्म्याभावः प्रकृ-
ते विवक्षित इत्याह—या भूमिरित्यादि। संघातस्य—मिलितभूत-
चतुष्टयस्य। तथापीत्यादि। तथापि तन्मते संघातो नोपपद्यत
इत्यभिप्रेत्य प्रत्येकभूतनिराकरणेन भौतिकदेहात्मवादो निराकृत

नारायणी।

आत्मा शुद्धोज्ज्वलः शान्तो निर्गुणः प्रकृतेः परः।
प्रवृद्धपचयौ नास्य एकस्य किल जन्तुषु॥

इत्यादिस्मृतेरिति भावः। उक्तिफलमाह—तेनेत्यादि। तेन—निरुक्तार्थ-
समर्पणेन, व्याख्यातप्रायं या भूमिरित्यादिना। उक्तस्य द्विविधोद्देश्यविधे-
यभावस्य फलमाह—परस्परेति। प्रत्येकोद्देश्यविधेयभावं पूर्वपक्षसिद्धान्ता-
भ्यां सफलयति—यद्यपीति। संघातस्यैव—देहाकारेण मिलितभूतचतुष्टय-
स्यैव, तदभ्युपगमात्—आत्मत्वाभ्युपगमात्। तथापीति। संघातो नोपपद्यत
इत्यत्रान्वयः। तत्र संघातोऽवयविभूतचतुष्टयमेलनं वा स्वरूपसम्बन्धेनै-

(१) सर्वत्र प्रत्येकं नञा इति खघपुस्तकयोः पाठः

(२) भूम्यादेरात्मत्वं नाभ्युपेयते इति खघपुस्तकयोः।

व्यनङ्गीकारात्पञ्चमतत्त्वाभ्युपगमप्रसङ्गेन च संयोगादि-सम्बन्धानभ्युपगमात् संहन्तुरभावाच्च संघातो नोपपद्यत

न्यायरत्नावली।

इति योजना। संघातोऽवयवी वा? संयुक्तचतुर्विधपरमाणवो वा? क्षणिकचतुर्विधपरमाणुपुञ्जस्वरूपो वा?। तत्राद्यस्यानुपपत्तौ हेतुमाह—अवयव्यनङ्गीकारादिति। कपालद्वयमेव घटः, कपालिकाद्वयमेव कपालम्, एवं त्रुटिपर्यन्तं विचारेण त्रुटेरन्यत् किमपि न प्रामाणिकम्, प्रामाणिकत्वे वा अवयवानामवयविनश्च द्विगुणगुरुत्वाद्युपलब्धिः स्यादित्यादियुक्तिभ्यः अवयव्यस्वीकारादित्यर्थः। द्वितीयस्यानुपपत्तौ हेतुमाह—पञ्चमेत्यादि। चत्वार्येव भूतात्मकानि तत्त्वानि। न च संयुक्तासंयुक्तस्वरूपवैलक्षण्याय संयोगादिकमवश्यं वक्तव्यमिति कथं चत्वार्येव तत्त्वानीति वाच्यम्। चतुर्विधपरमाणूनां क्षणिकत्वात् संयुक्तत्वेन पराभ्युपगतस्वरूपस्यासंयुक्तत्वेन पराभ्युपगतस्वरूपाद्भेदेन वैलक्षण्योपपत्त्या संयोगादिस्वीकारस्य व्यर्थत्वात्। घट इति उपलभ्यमानास्त्रुटय एव (१) हि घटस्वरूपाः। तदेवं वादिनश्चार्वाकस्य मते पञ्चमतत्त्वाभ्युपगमप्रसङ्गेन संयोगादिकं न स्वीक्रियत इति भावः। नन्वेवम् अहमित्याकारकधीविषयत्रुटिसंघात एवात्मास्तु इत्याशङ्क्योक्तत्रिविधसंघातानामनुपपत्तौ हेतुमाह—संहन्तुरभावादिति। शरी-

नारायणी।

रतयाऽवस्थितिर्वेति पक्षत्रयं न सम्भवतीत्यत्र क्रमेण हेतुमाह—अवयव्यनङ्गीकारादिति। द्विगुणगुरुत्वापत्तिभियाऽतिरिक्तावयव्यनङ्गीकारादित्यर्थः। द्वितीये बाधकमाह—पञ्चमेति। 'प्रमाणमेकं प्रत्यक्षं तत्त्वं भूतचतुष्टयम्(२)' इति वदतः चार्वाकस्य मते देहादिव्यवहाराय चतुर्विधपरमाणूनां (३)संयोगरूपमेलनाङ्गीकारे संयोगरूपपञ्चमतत्त्वस्वीकारापत्त्येत्यर्थः। संयोगादीत्यादिना समवायपरिग्रहः। पक्षत्रये बाधकमाह संहन्तुरभावाच्चेति। संघात-

(१) एव बहिर्घटस्वरूपा इति गपुस्तके।

(२) 'मोक्षश्च मरणान्नान्यः कामार्थौ हि पुरुषार्थौ' इति वदतः इति पाठः खपुस्तके।

(३) संयोगरूपपञ्चमतत्त्वस्वीकारापत्तेरित्यर्थ इति खपुस्तके।

इत्यभिप्रेत्य प्रत्येकभूतनिराकरणेन भौतिकदेहात्मवादो निराकृतः। यद्यपि भूतचतुष्टयनस्त्ववादिनो मते आवर-

न्यायरत्नावली।

रोत्पत्तेः पूर्वमात्मनोऽभावात् (१)न चेतनस्य व्यापाराच्छरीरोत्पत्तिः। न च प्रलयास्वीकारेणानादिमातापितृपरम्पराव्यापारेण शरीररूपसंघातोत्पत्तिरिति वाच्यम्। शरीरवैचित्र्ये हि नियामकमदृष्टं दृष्टं वा वाच्यम्?। नाद्यः। प्रत्यक्षमात्रप्रमाणस्वीकारात् परलोकस्वीकारप्रसङ्गाच्च। नान्त्यः। एकजातीयेन मातापितृव्यापारेण उत्पन्नयोः यमलयोः वैलक्षण्यस्य अदृष्टं विनानुपपत्तेः, कारणान्तरस्यापि प्रत्यक्षप्रमाणेनासिद्धत्वाच्च। तथा च क्षणिकत्रुटिसमुदायस्य दृष्टादृष्टद्वारा संघातयितृरूपो यस्संहन्ता तदभावात् संघातस्योत्पत्त्यसम्भव इति भावः। निराकरणेन—आत्मत्वनिराकरणेन। भौतिकेति—भूतसमुदायरूपेत्यर्थः। निराकृत इति। समुदायस्य प्रत्येकानतिरेकादिति शेषः। यद्यपीत्यादि। चार्वाकादिनास्तिकानां मते भूतचतुष्टयमेव तत्त्वं तदपि क्षणिकम्, 'यत सत् तत् क्षणिकमि'ति नियमात्। कथमुक्तनियम इति चेदुच्यते। यत्र यस्य सामर्थ्यं तस्य तत्साधने विलम्बो नास्ति, विलम्बोऽस्ति चेत् सामर्थ्यमेव न स्यात्, तथा च यावत्सु कार्येषु सामर्थ्यं यस्य, तावतां द्वितीयक्षणवृत्तिनां प्रथमक्षणस्थितेन तेन सिद्धिरिति द्वितीयक्षणस्थितेन तेन न कस्यचित् तृतीयादिक्षणवृत्तिनस्सिद्धिः, अतो द्वितीयादिक्षणे सत्त्वं वस्तुनो नास्ति, कार्यकारित्वमेव हि वस्तुनः सत्त्वम्, तस्मात् (२)सत्यं

नारायणी।

कर्तुरभावाच्चेत्यर्थः। चेतनाद्रष्टादिकं विना पुञ्जकादाचित्कवैचित्र्याद्यनुपपत्तेरिति भावः। प्रत्येकेति। प्रत्येकभूतानामात्मत्वनिराकरणेन। भौतिकेति—भौतिकदेहस्यात्मत्ववादः। न खमित्युक्तमुपपादयितुमाह—यद्यपीति। आवरणाभावत्वेनेत—पक्ष्यादिगतिप्रतिबन्धकाभावत्वेनाभिमतस्येत्यर्थः।

(१)—अभावात् कस्य चेतनस्य० इति पाठो घपुस्तके।

(२) सत्यमिति गपुस्तके नास्ति।

णाभावत्वेनाभिमतस्य स्थिरस्यासत आकाशस्य देहानुपादानत्वम्, तथापि सिद्धान्ते तस्य भावत्वम्(१)। देहोपादानत्वाद्यङ्गीकारात्। तत्राप्यात्मत्वप्रसक्त्या तन्निराकृतम्। अथवा न वायुरित्यन्तमेव देहात्मवादस्य निराकरणम्, न खमिति तु शून्यवादस्य, खशब्दस्य शून्य-

न्यायरत्नावली।

सर्वं क्षणिकम्। यत्तु अलीकं तस्य कार्यकारित्वाभावेन सत्त्वाभावात् नोक्तरीत्या क्षणिकत्वमिति स्थिरत्वमिति प्रमाणागोचरत्वेऽपि विकल्पधीविषयत्वेन व्यवहारः तस्य, तथा च आवरणाभावरूपाकाशस्याभावत्वेनालीकत्वादसत्त्वस्थिरत्वावश्यकत्वात् देहं प्रत्युपादानत्वाभाव इति भावः। सिद्धान्ते-औपनिषदमते। आत्मत्वप्रसक्त्येति। अवयविखण्डनयुक्तिभिराकाशादिस्वरूप एव देहो वाच्यः, तथा च आकाशादिप्रत्येकस्यापि आत्मत्वप्रसक्तिरिति भावः। तन्निराकृतम्-आकाशस्यात्मत्वं निराकृतम्। प्रसिद्धमतनिराकरणप्रस्तावे आधुनिकपक्षनिराकरणस्यासङ्गतत्वादाह—अथवेति। शून्यवादस्य-क्षणिकज्ञानरूपात्मा मिथ्येति वादस्य। खशब्दस्य शून्यवाचकत्वात्-शून्यपदसमानार्थकत्वात्। तथा च खं नात्मेत्यस्य मिथ्याभूतविज्ञानं नात्मेत्यर्थः, खपदस्य सत्यत्वशून्या-

नारायणी।

फलितमाह-स्थिरस्येत्यादिना। स्थिरस्य-बहुकालस्थायिनः। अत एव असतः-विलम्बसहिष्णुत्वेनार्थक्रियाकारिताशून्यस्य, आकाशस्य—आकाशपदवाच्यस्य, सिद्धान्ते-वेदान्तसिद्धान्ते, तस्य-आकाशस्य। भावत्वेति। शब्दादिगुणाश्रयत्वेन भावत्वस्यावकाशप्रदत्वेनोपादानत्वस्य निमित्तत्वस्य चाङ्गीकारादित्यर्थः। तत्रापि-आकाशेपि, आत्मत्वप्रसक्त्या-भूम्यादेरिवात्मत्वप्रसक्त्या, तन्निराकृतम्-आत्मत्वं निराकृतम्। स्वसिद्धान्तानुसारेणात्मत्वमापाद्य तन्मतनिराकरणमयुक्तमित्यभिप्रेत्यार्थान्तरमाह-अथवेति। शून्यवादस्य-क्षणिकज्ञानस्वरूप आत्मा मिथ्येति वादस्य। शून्यवाचकत्वात्-खपदस्य पदार्थरहितछिद्रबोधकत्वेन प्रकृते सत्यत्वादिधर्मशून्यमिथ्याज्ञान-

(१)—भावत्वदेहोपादानत्वाद्यङ्गीकारादिति खघपुस्तकयोः।

वाचकत्वात्। नेन्द्रियमिति प्रत्येकमिन्द्रियाणामात्मत्वनिरासः। न तेषां समूह इति मिलितानां भूतानां देहावयव्याकारेण परिणतानामिन्द्रियाणां च मिलितानां निरासः। पूर्वं संघातमनभ्युपगम्य प्रत्येकं भूतानि निराकृतानि, अधुना तु संघातमभ्युपगम्यापि निराकृतानीति भेदः। भूतनिराकरणेन भौतिकयोः प्राणमनसो-

न्यायरत्नावली।

त्मकमिथ्याविज्ञानबोधकत्वात्। प्रत्येकमिति। इन्द्रियपदस्येन्द्रियत्वरूपेण सर्वेन्द्रियबोधकत्वात् सर्वेन्द्रियेषु प्रत्येकमात्मत्वनिराकरणमिति भावः। मिलितानां भूतानां-संहतानां पार्थिवादिपरमाणूनामात्मत्वेन चार्वाकस्वीकृतानाम्। परिणतानामिति। यद्यपि चार्वाकेणावयवी न स्वीक्रियते तथाप्यन्यैस्तत्स्वीकारात्तत्रापि प्रसक्तमात्मत्वं निरस्तम्, अवयवावयविनोस्तादात्म्यमते अवयविनः अवयवसमूहात्मकत्वात् समूहपदेन निर्देश इति भावः। अनभ्युपगम्य-उपपद्यते इत्यस्वीकृत्य। उपगम्य-उपपद्यत इति स्वीकृत्य। भूतनिराकरणेनेति। न तेषां समूह इति वाक्येनेत्यर्थः। प्राणमनसोरिति। अपिशब्दश्शेषः। मनोनिराकरणेनेत्यादि। मनोनिराकरणेन क्षणिकविज्ञानस्य कर्तृत्वभोक्तृत्वादिविशिष्टस्य च निरास इत्यन्वयः। ननु मनोनिरासेन कुत-

नारायणी।

बोधकत्वात्। तथाच खं नात्मेत्यस्य सत्यत्वादिधर्मशून्यं मिथ्याज्ञानं नात्मेत्यर्थः।प्रत्येकमिति। नेन्द्रियमित्यत्र इन्द्रियपदस्येन्द्रियत्वेनेन्द्रियसामान्यबोधकत्वात् प्रत्येकं सर्वेन्द्रियाणामात्मत्वनिरास इति भावः। मिलितानां-संयुक्तानाम्। देहेति। अतिरिक्तपुञ्जात्मकदेहावयविरूपेण विकृतानामित्यर्थः। संघातं-संयोगेन तेषां पुञ्जम्, अनभ्युपगम्य--अस्वीकृत्य। अभ्युपगम्यापि-स्वीकृत्यापि। भूतनिराकरणेन—प्रत्येकस्य पुञ्जरूपविकारिणो वा पृथिव्यादिचतुर्विधपरमाणुरूपस्य भूतस्यात्मत्वनिराकरणेन, भौतिकयोः-'अन्नमयं हि सौम्य मनः आपोमयः प्राण' इति श्रुत्या भूतकार्यत्वेनाङ्गीकृतयोः, प्राणमनसोः—क्रियाशक्तिज्ञानशक्तिप्रधानयोः अपीति शेषः। मनोनि-

र्निरासः । मनोनिराकरणेन मनोवृत्तेः क्षणिकविज्ञानस्य देहातिरिक्तस्य कर्तृत्वभोक्तृत्वादिविशिष्टस्य च निरासः । सिद्धान्ते ज्ञानेच्छासुखादीनामन्तःकरणाश्रयत्वाभ्युपगमात् । कामसङ्कल्पादीन्प्रकृत्य 'एतत्सर्वं मन एवे'-

न्यायरत्नावली ।

स्तयोर्निरासः, 'विज्ञानमेव सर्व'मिति योगाचारमते मनस एवास्वीकारात्तार्किकादिमते कर्तृत्वादिविशिष्टस्य मनोभिन्नत्वादित्याशङ्क्य तयोर्हेतुगर्भं विशेषणमाह—मनोवृत्तेरिति । मनःपरिणामत्वेनास्मत्सम्मतस्येत्यर्थः । देहातिरिक्तस्य-देहमनआदिभिन्नत्वेन तार्किकादिस्वीकृतस्यापि । तथा च तेषां समूह इत्यस्य भौतिकत्वेनास्मत्सम्मत इत्यर्थकत्वात् योगाचारादिस्वीकृतक्षणिकविज्ञानस्य तार्किकादिस्वीकृतकर्तृत्वादिविशिष्टस्य च मन्मते मनःपरिणामत्वात् भौतिकत्वेनास्मत्सम्मतत्वात् तयोरात्मत्वनिरास इति भावः । कर्तृत्वादिविशिष्टस्य भौतिकत्वमस्मत्सम्मतं श्रुतिसिद्धत्वादित्याह—ज्ञानत्यादि । मन एवेति । यमधर्मिणोस्तादात्म्य

नारायणी ।

राकरणेन-मनस आत्मत्वनिराकरणेन । मनोवृत्तेः-वस्तुगत्या मनःपरिणामरूपस्य क्षणिकविज्ञानस्य द्वितीयक्षणवृत्तिध्वंसप्रतियोगिनः देहातिरिक्तस्य स्थूलदेहाद्भिन्नस्य कर्तृत्वभोक्तृत्वविशिष्टस्य ज्ञानेच्छाप्रयत्नादिमत्त्वरूपकर्तृत्वसुखदुःखाद्याश्रयत्वरूपभोक्तृत्वाभ्यां विशिष्टस्य च तार्किकमतसिद्धस्यात्मनः निरासः आत्मत्वनिरासः तादृशस्य वस्तुगत्या भौतिकलिङ्गशरीरात्मकत्वादिति भावः ।

ननु क्षणिकविज्ञानवादिना मनस एवानङ्गीकारात्तार्किकेण चाभौतिकस्यैव मनोभिन्नस्यात्मत्वस्वीकारात्कथं मनोनिराकरणेन क्षणिकविज्ञानस्य तार्किकाभिमतस्य चात्मत्वनिरास इत्याशङ्क्य मनःपरिणामरूपवृत्तिभिन्नस्य ज्ञानत्वमेवासिद्धम्, औपनिषदसिद्धान्तविरोधात् अतः क्षणिकज्ञानादेर्निरास इत्यभिप्रेत्याह—सिद्धान्ते चेति । औपनिषदसिद्धान्ते इत्यर्थः । अन्तःकरणाश्रयत्वाभ्युपगमात्-अन्तःकरणाश्रितत्वाभ्युपगमात् । अभ्युपगमे श्रुतिमाह-कामेति । 'कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृति-

ति श्रुतेः। तेन देहमारभ्य केवलभोक्तृपर्यन्तानां तत्त-द्व्यभ्युपगतानामनात्मत्वं प्रतिज्ञातं भवति। तत्र हेतु-माह—अनेकान्तिकत्वादिति। व्यभिचारित्वात् विना-

न्यायरत्नावली।

मेव सम्बन्ध इति कामादिमनोधर्माणाम्मनस्तादात्म्योक्तिः। तेने ति। भूतनिराकरणेनेत्याद्युक्तव्याख्यानेनेत्यर्थः। केवलभोक्तृ-पर्यन्तानामिति। भोक्तैव आत्मा न तु कर्ता इति साङ्ख्यमते भोक्तृत्वमात्मनः नानुभवस्वरूपत्वमात्रम्, मोक्षेपि भोक्तृत्वापत्तेः; किन्तु सुखदुःखसंसृष्टानुभवरूपत्वम्, तथा च भौतिकमनःपरिणाम-सुखादिसंसृष्टरूपेण (१)भौतिकस्यात्मनोप्यनात्मत्वं प्रतिज्ञातं 'न तेषां समूह' इत्यनेन सम्भवतीति भावः। तत्रेति। देहादिष्व-नात्मत्वप्रतिज्ञायामित्यर्थः। व्यभिचारित्वादिति। सर्वेषु दे-शकालवस्तुषु सम्बध्य वर्तत एवेति नियमरहितत्वादित्यर्थः। क-चिद्देशे काले वस्तुनि वर्तमानो यः अभावः,(२)तत्प्रतियोगित्वरूपे पर्य-वसितहेतौ वर्तमानपर्यन्तवैयर्थ्यादाह—विनाशित्वादिति। विविधो देशकालवस्तुगतः नाशः अदर्शनं यतः स विनाशः, संसर्गाभावता-दात्म्याभावयोरन्यतरः तद्विशिष्टत्वात् तत्प्रतियोगित्वात्,

नारायणी।

रधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवे' ति(३)संग्राहकश्रुतेरित्यर्थः। तेनेति। भूतनिराकरणेनेत्याद्युक्तव्याख्यानेनेत्यर्थः। देहमारभ्येति। न कर्तेत्यन्तानां वास्तवभोक्तृत्वविशिष्टस्य लिङ्गेऽन्तर्भावात्परिणामरूपयोः सुखदुःखयोस्त-त्रैवान्तर्भावादिति भावः। तत्र-देहादेरनात्मत्वप्रतिज्ञायाम्, व्यभिचरित-त्वात्-सर्वत्र सदाऽविद्यमानत्वात्। सर्वत्र सदेत्यंशस्यानतिप्रयोजनकत्वा-दाह-विनाशित्वादिति। विविधो देशकालवस्तुगतो नाशोऽदर्शनं यतः स वि-

(१) भौतिकस्याप्यात्मनोऽनात्मत्वमिति गपुस्तके।

(२) तत्प्रतियोगित्वरूपपर्यवसितहेतौ वर्तमानपर्यन्तं वैयर्थ्यादाहेति पाठो गपुस्तके।

(३)—इति मनोधर्मविधायकश्रुतेरित्यर्थः। न च मन एवेत्यस्य मनःकरणकमित्यर्थ इति। इतिपाठः खपुस्तके।

शित्वादिति यावत् । आत्मनो देशकालापरिच्छिन्नत्वात्तत्परिच्छिन्नानां घटादिवदनात्मत्वात् (१)ध्वंसप्रागभाव

न्यायरत्नावली ।

अभावप्रतियोगित्वादिति यावत् । अभावप्रतियोगित्वादिति हेतुकरणे अभावपदवैयर्थ्यात् अभावस्यैव प्रतियोगितासम्बन्धेन हेतुतेति बोध्यम् । यथाश्रुतं तु विनाशित्वादित्यसङ्गतम्, आत्मन इत्यादयुत्तरग्रन्थेनाभावप्रतियोगित्वस्यात्मभिन्नत्वं(२) प्रत्यव्यभिचारित्वप्रतिपादनवैयर्थ्यात् । अथवा अभावप्रतियोगितात्वरूपसामान्यधर्मविशिष्टस्याव्यभिचारत्वप्रतिपादने ध्वंसप्रतियोगितात्वरूपधर्मविशिष्टस्य सुतरां तद् भवतीत्याशयेनात्मन इत्यादेरुक्तत्वात् यथाश्रुतमेव विनाशित्वादिति रम्यम् । ननु विनाशित्वस्यात्मान्यत्वं प्रति व्याप्यताग्रहो न सम्भवति तर्काभावादित्याशङ्क्यानात्मत्वस्य विनाशहेतुत्वकथनद्वारा तादृशव्याप्यताग्राहकं तर्कं सूचयति—आत्मन इति । तथा च विनाशित्वात् अनात्मेत्यनेनोक्ते अनात्मनिष्ठे विनाशित्वहेतुकत्वे हेतुः—देशकालपरिच्छिन्नानां घटादिवदनात्मत्वादिति, तत्र हेतुः—आत्मनो देशकालेत्यादि । आत्मन इति आत्मत्वावच्छेदेनेति भावः । देशकालापरिच्छिन्नत्वात्-देशकालवृत्त्यभावप्रतियोगिभिन्नत्वग्रहात्, तत्परिच्छिन्नानां—देशकालवृत्त्यभावप्रतियोगिनां तादृशावच्छेदेनेति शेषः । अनात्मत्वात्—अनात्मत्वग्रहात् । तथा च आ-

नारायणी ।

नाशः संसर्गान्योन्याभावयोरन्यतरस्तत्प्रतियोगित्वादित्यर्थः । विनाशित्वहेतोरनात्मत्वसाधकतां तर्कप्रदर्शनेन दृढयति—आत्मन इति । अनात्मनामधिष्ठानस्येत्यर्थः । देशकालापरिच्छिन्नत्वात्—देशकालवृत्त्यत्यन्ताभावाप्रतियोगित्वात् । ज्ञानज्ञाप्यत्वं पञ्चम्यर्थोऽनात्मत्वेऽन्वेति । तत्परिच्छिन्नानां देशकालवृत्त्यत्यन्ताभावप्रतियोगिनाम्, घटादिवदनात्मत्वात्-आत्मभिन्नत्वात्, अत्रापि ज्ञानज्ञाप्यत्वं पञ्चम्यर्थः, अयं च विनाशित्वहेतुकानात्मत्वे हेतुः,

(१) अत्र तद्ध्वंसेत्यादिः पाठः नारायणीसम्मतः ।

(२) आत्मभिन्नं प्रतीति गपुस्तके ।

योश्च ग्रहीतुमशक्यत्वात् अनात्मनां जडत्वात् स्वभिन्न-

न्यायरत्नावली।

त्मत्वव्यापकमपरिच्छिन्नत्वमिति ग्रहात् परिच्छिन्नत्वरूपविनाशित्व-मनात्मत्वव्याप्यतया गृह्यते, परिच्छिन्नत्वं यद्यनात्मत्वव्याप्यं न स्यात् तदाऽऽत्मत्वव्यापकस्यापरिच्छिन्नत्वस्याभावो न स्यात्, भवति तु तादृशाभावरूपम्, तस्मात् अनात्मत्वव्याप्यमिति तर्क-पर्यवसानसम्भवादिति भावः। नन्वपरिच्छिन्नत्वस्याभावाप्रतियो गित्वरूपस्यात्मत्वव्यापकतानिश्चये सति उक्ततर्कपर्यवसानं वाच्यम्, स एव न सम्भवति तर्काभावादित्याशङ्क्य तन्निश्चायकं तर्कं ज्ञापयितुमात्मनि ध्वंसप्रागभावाप्रतियोगित्वं तद्धेतूपन्यासपूर्वक-माह—न तस्य ध्वंसप्रागभावाविति यन्तेन ग्रन्थेन ध्वंसप्रागभाव-योरित्यादिना। चकारेणात्मन इत्यनुषज्यते। आत्मनो ध्वंस-प्रागभावयोः गृहीतुमशक्यत्वात् न तस्य ध्वंसप्रागभावाविति यग्रे अन्वयः। अशक्यत्वे हेतुमाह—अनात्मनां जडत्वादिति। आत्मभिन्नानां ज्ञानरूपत्वाभावात् आत्मभिन्नेनात्मध्वंसप्रागभावौ विषयीकर्तुं न शक्येते इत्यर्थः। नन्वेकस्या आत्मव्यक्तेः ध्वंसप्रा-गभावौ अन्यदीयात्मव्यक्त्या गृह्येयाताम्, तत्राह—स्वभिन्नस्या-त्मत्वाभावादिति। यदात्मव्यक्तेः ध्वंसप्रागभावौ ग्राह्यौ, तद्भि-न्नस्यात्मत्वाभावादित्यर्थः। नन्वात्मनो नानात्वमवश्यं वाच्यम्,

नारायणी।

तथाच परिच्छिन्नत्वाभावस्यात्मत्वव्यापकत्वात् तादृशाभावप्रतियोगिनः परिच्छिन्नत्वस्यात्मभिन्नत्वं प्रति व्याप्यताग्राहको यदि परिच्छिन्नत्वमनात्म-त्वव्याप्यं न स्यात्तदा तादृशाभावप्रतियोगि न स्यादिति तर्कलाभ इति भावः। आत्मनोऽपरिच्छिन्नत्वमेव कथं लभ्यं तत्राह तद्ध्वंसेति। आत्मध्वंसप्रा-गभावयोः। अशक्यत्वे हेतुमाह—अनात्मनामिति। अविद्यातत्कार्याणामित्यर्थः। जडत्वात्-ज्ञानव्यक्तिभिन्नत्वात्। ननु मास्त्वनात्मनो ग्राहकत्वम्, आत्मा-न्तरस्य तु स्यादेव तत्राह-स्वभिन्नस्येति। यदात्मव्यक्तेर्ध्वंसप्रागभावौ ग्राह्यौ तद्भिन्नस्यात्मत्वाभावात् आत्मन एकत्वादिति भावः। ननु तर्हि प्रत्या-

स्य चात्मत्वाभावात् आत्मन एकत्वेऽपि सुखदुःखाद्याश्रयाणामन्तःकरणानां भेदाभ्युपगमाद्व्यवस्थोपपत्तेः। स्व

न्यायरत्नावली।

अन्यथा यदा चैत्रस्सुखी तदा मैत्रोऽपि अवश्यं सुखी स्यात्। न च यदा चैत्रशरीरे चन्दनादियोगः, तदा मैत्रशरीरे तस्यानियमात् सुखानियम इति वाच्यम्। व्यञ्जकचन्दनादियोगं प्रति त्वेकात्मनिष्ठादृष्टस्यैव नियामकत्वात् सर्वशरीरेषु युगपच्चन्दनादियोगोत्पत्त्यापत्तेः। न च शरीरविशेषे चन्दनादियोगं प्रति अदृष्टविशेषस्य हेतुत्वान्नोक्तापत्तिरिति वाच्यम्। तदापि एकस्य तत्त्वदर्शने सति कुत्रापि संसारो नोपलभ्येतेति आत्मनानात्वावश्यकत्वात् तत्राह—आत्मन एकत्वेऽपीति। व्यवस्थोपपत्तेरिति। यस्मिन् मनसि चन्दनादियोगहेत्वदृष्टमस्ति तत्रैवोक्तयोगोत्पत्तिः, मनस एव जीवविभाजकोपाधित्वं यस्य मनसो ज्ञानेनोच्छेदः तदुपलक्षितजीवस्यैव मुक्तिः, अविद्याया जीवविभाजकोपाधित्वेऽपि यत्र मनसि तत्त्वदर्शनं तदुपादानभूताया एव तेनोच्छेद इति व्यवस्थोपपत्तेः। न च मनसि प्रमाणाभाव इति वाच्यम्, 'मम मन इदानीं प्रसन्नम्, इदानीं विक्षिप्त'मिति साक्ष्यनुभवात्, 'अन्यत्र मना अभूवं नादर्शम्' 'एतत्सर्वं मन एवे'त्यादिश्रुतेश्च तत्र मानत्वादिति भावः। नन्वात्मनैव स्वध्वंसप्रागभावौ गृह्येयाताम् तत्राह—स्वेनेति। ग्रहणे—विषयीकरणे। ननु भिन्नकालीनयोरपि विषयविषयिभावसम्भवात् आत्मनः स्वध्वंसादिविषयकत्वं न विरुद्धं

नारायणी।

त्मनि नियतसुखदुःखादिव्यवस्था तत्राह—आत्मन एकत्वेऽपि। वस्तुत एकत्वेऽपीत्यर्थः। व्यवस्थोपपत्तेः—चैत्रशरीरे स्रक्चन्दनादिसंयोगे चैत्र एव सुखी न मैत्र इत्यादिव्यवस्थाया उपपत्तेरित्यर्थः। यः आत्मा स न सुखदुःखाद्याश्रयः भासकरूपत्वात्, यस्तु सुखाद्याश्रयः स तु भिन्न एव परिणामित्वादिति न काचिदनुपपत्तिरिति भावः। मास्तु स्वभिन्नो ग्राहकः स्वयं तु स्यात्, तत्राह—स्वेनेति। स्वेनैव—तद्व्यवत्यैव

नैव स्वाभावग्रहणं विरोधात् ग्राह्यकाले ग्राहकासत्त्वात् (१)ग्राहकसत्त्वे ग्राह्याभावात् कृतहान्यकृताभ्यागमप्रस

न्यायरत्नावली ।

तत्राह—ग्राह्येति । ग्राह्ययोः—विषययोः आत्मध्वंसप्रागभावयोः काले ग्राहकस्य-विषयिणः आत्मनोऽभावात् ग्राहकस्य विषयिणः आत्मनः सत्त्वे ग्राह्ययोस्तयोरसत्त्वादित्यर्थः । आत्मनो विषयग्राहकत्वं नाम तादात्म्येन (२)विषयसम्बद्धत्वम् । तथा च भिन्नकालीनविषये तादात्म्यासम्भवेनात्मनो ग्राहकत्वासम्भव इति भावः । आत्मनो ध्वंसप्रागभावाप्रतियोगित्वे गृहीतुमशक्यत्वादिति हेतुं सोपपत्तिकमुक्त्वा हेत्वन्तरमप्याह—कृतेत्यादि । आत्मनो नाशस्वीकारे कृतस्य यागादिजन्यादृष्टस्य फलाजनकत्वरूपा हानिः स्यात्, उपादानीभूतस्यात्मनो नाशे तदुपादेयस्यादृष्टस्य नाशावश्यकत्वात्, तथा च कर्तुः फलप्राप्त्यभावेन प्रवृत्त्यनुपपत्तिः । आत्मनः प्रागभावस्वीकारे उत्पद्यमानस्यात्मनः पूर्वं सञ्चितादृष्टाभावेन तदकृतेनादृष्टेन भोगाभ्यागमो वाच्यः, स न सम्भवति, पित्रादिकृतेनादृष्टेन पुत्रादेर्भोगजनने मानाभावात्, (३)कल्पनापेक्षया लाघवात् आत्मनोऽनादित्वकल्पनाया एवोचितत्वादिति

नारायणी ।

स्वाभावग्रहणे—स्वस्यात्मनोऽभावग्रहणे विषयीकरणे, विरोधात्-भिन्नकालीनत्वेन विषयविषयिभावासंभवरूपविरोधात् । एतदेव दर्शयति—ग्राह्येति । ग्राह्यकाले—ध्वंसप्रागभावकाले, ग्राहकाभावात्—ग्राहकस्यात्मनोऽभावात् । ग्राहकसत्त्वे—ग्राहकस्यात्मनः सत्त्वे, ग्राह्याभावात्—ध्वंसप्रागभावाभावात् । तथाच ग्राह्यग्राहकयोरसमानकालीनत्वान्न विषयविषयीभावः सम्भवतीति भावः । नन्वतीतानागतघटादिनेव विभिन्नकालीनस्वाभावेनापि सह विषयविषयिभाव आत्मनोस्तु तत्राह—कृतहानेति । कृतस्य-यागादिजन्यापूर्वस्य, हानिः-नाशः,

(१) ग्राहकत्वे इति घपुस्तके । (२) विषयसम्बन्धित्वमिति घपुस्तके ।
(३) तत्कल्पनापेक्षया इति घपुस्तके ।

ङ्गाच्च न तस्य ध्वंसप्रागभावौ। सद्रूपस्यात्मनः सर्वत्रानुगमाच्च नात्यन्ताभावसम्भवः। द्वैतस्य मि-

न्यायरत्नावली।

भावः। नन्वेतावतापि नात्यन्ताभावाप्रतियोगित्वसाधकतर्कलाभः तत्राह—सद्रूपस्येति। सर्वत्रानुगमादिति। घटस्सन् पटस्सन्नित्यादिप्रत्ययेन दृश्यमात्रे सद्रूपसम्बन्धविषयीकरणादित्यर्थः। ननु सद्रूपस्य तादात्म्यमेव दृश्ये भाति, तस्य च न सद्रूपात्यन्ताभावविरोधित्वम्, अतः कथमुक्तप्रत्ययेनात्यन्ताभावानिरास इति चेदुच्यते, यथा 'इदं रजत'मित्यादिभ्रमस्थले रजतादाविदन्त्वादिसंसर्गोऽपि भासते न त्विदमादितादात्म्यमात्रम्, अधिष्ठानस्य हि तादात्म्यमिव तद्वृत्तिधर्मसंसर्गोप्यारोपेऽध्यस्यते, तथा च सद्रूपस्याधिष्ठानस्य तादात्म्यमिव तद्वृत्तिधर्मसंसर्गोऽपि घटादावुक्तप्रत्ययेन भ्रमरूपेण विषयीक्रियते। तद्वृत्तिधर्मश्च सद्रूपात्मकसत्यनित्यादिकमेव, स्वस्यैव स्वस्मिन् कल्पितधर्मत्वस्वीकारात्। तथा च सद्रूपसत्त्वाद्याधारत्वस्य सद्रूपेऽपि सत्त्वादुक्तप्रत्ययविषयतया दृश्यमात्रेऽपि सत्त्वाच्च सद्रूपस्य सर्वधर्मत्वेन न कुत्राप्यत्यन्ताभाव इति भावः। नन्वेतावतापि नान्योन्याभावाप्रतियोगित्वसाधकतर्कलाभः तत्राह—द्वैतस्येत्यादि। द्वैतस्य तत्तादात्म्याभावानुपप-

नारायणी।

आत्मनो नाशे तद्गुणस्य धर्मादेर्नाशावश्यंभावात्, तथा अकृतस्य असञ्चितस्यापूर्वस्य अभ्यागमः कालान्तरे भोगाय स्वीकारस्तयोः प्रसङ्गादित्यर्थः। इत्थं च विहितगोचरा प्रवृत्तिर्बाध्येतेति भावः। परलोकवार्तामङ्गीकार्येदम्। अत्यन्ताभावाप्रतियोगित्वं साधयति—सद्रूपस्येति। तत्स्वरूपस्य नित्यस्येति यावत्। आत्मनः—अनात्मनामधिष्ठानभूतस्य सर्वत्र—दृश्यमात्रे, अनुगमात्—सन् घटः सन्पटः इत्यादिधिया सत्त्वसम्बन्धविषयीकरणात्। नात्यन्ताभावसम्भवः—न सद्व्यक्ति(१)स्वरूपात्यन्ताभावः, सत्त्ववति न सत्त्वात्मकसदत्यन्ताभावः कालत्रयेऽपि वक्तुं शक्य इति भावः। अन्योन्याभावाऽप्रतियोगित्वं साधयति—द्वैतस्येति। अविद्यातत्का-

(१) न सद्व्यक्तिस्वरूपसत्त्वात्यन्ताभावसम्भव इति खपुस्तके।

ध्यात्वे(१)नाधिष्ठानसत्तादात्म्यापन्नतयैव सिद्धत्वात्

न्यायरत्नावली।

त्तिरिति योजना। तादात्म्येनाभावस्तादात्म्याभावः भेद इति यावत्। (२)*ननु तादात्म्यस्य मिथ्यात्वेन तद्वत्यपि दृश्ये तदभावः सिद्धान्तेऽपि स्वीक्रियत एवेति कथं तदनुपपत्तिरिति चेन्न। तादात्म्याभावपदस्य भेदार्थकत्वात्*। ननु तादात्म्यबलादेव दृग्दृश्ययोर्भेदोऽपि वाच्य एव अत्यन्ताभिन्नयोरसिद्धान्ते तादात्म्यास्वीकारात् तत्राह—सत्तादात्म्यापन्नतयैव सिद्धत्वादिति। घटस्सन्नित्यादिव्यावहारिकप्रमया व्यावहारिकसत्तादात्म्यविशिष्टतयैव द्वैतस्य प्रमितत्वादित्यर्थः। एवकारेण व्यावहारिकप्रमया दृग्दृश्ययोर्व्यावहारिकभेदग्रहणं नास्तीत्युक्तम्, तथा च व्यावहारिकतादात्म्यान्यथानुपपत्त्या कल्प्योऽपि भेदः प्रातीतिक एव, कार्यकारणभावादिकाल एव तदन्यथानुपपत्त्या भेदप्रत्ययात्। न च प्रातीतिकेन भेदेनोपपाद्यं कार्यकारणभावादिकमपि प्रातीतिकं स्यात्, कल्पितधूमान्यथानुपपत्त्या कल्प्यमानवह्नेर्ज्ञान(३)प्रातीतिकत्वदर्शनादिति वाच्यम्। पर्वते धूमादर्शनेऽपि धूलीपटलादिकल्पितधूमान्यथानुपपत्त्या कल्पितवह्नेः व्यावहारिकत्वदर्शनेन तथा नियमाभावात्। भेदोपपाद्यतादात्म्यादेः (४)प्रातीतिकत्वादर्शनेन समसत्तयोः तयोर्विरोधेन व्यावहारिकत्वावश्यकत्वात्, कपालघटयो(५)र्व्यावहारिकस्य प्रातीतिकत्वे क्षतिविरहाच्च। अत एवारम्भणाधिकरणे भाष्यम्-'न हि कार्यकारणभावादिकं वेदा-

(१)-मिथ्यात्वेन शुक्तिरजतादिवत् अध्यस्तस्याधिष्ठानभूततादात्म्यापन्नतयैव सिद्धत्वा तत्तादात्म्याभावानुपपत्तिः इति पाठः खघपुस्तकयोः।

(२) * * एतच्चिन्हद्वयमध्यवर्ती पाठो घपुस्तके नास्ति।

(३) ज्ञानशब्दो नास्ति घपुस्तके।

(४)—प्रातीतिकत्वे सति समसत्तयोः इति पाठो घपुस्तके।

(५) कपालघटयोः कार्यकारणत्वस्य प्रातीतिकत्वे इति घपुस्तके।

न्यायरत्नावली।

न्तिभिः स्वीक्रियत' इति। यद्यपि तादात्म्यप्रत्ययमात्रे भेदसमानाधिकरणतादात्म्यत्वेन तादात्म्यस्य संसर्गतया भानमिति सयुक्तिकमुक्तं चन्द्रिकायां भेदाभेदवादप्रस्तावे प्रथमभिथ्यात्वलक्षणविचारे, तथापि कार्यकारणभावाद्यज्ञानदशायां तादात्म्यप्रत्ययेनात्यन्ताभेदज्ञानात् न भेदज्ञानम्, (१)तथाहि-कपालद्वय घट इत्यादिप्रत्यये विषयः न घटत्वादिकं जातिः, किन्तु कपालद्वयत्वादिकमिति ज्ञायते। तथा चात्यन्ताभेदे सति संसर्गाभावा(२)दभदोऽपि न संसर्गः उक्तप्रकारः। न चैवं 'घटो घटः''तद्घटस्तद्घटवानि'त्यादाविव 'घटो नील' इत्याद्यावपि भ्रमत्वव्यवहारः स्यादिति वाच्यम्, साम्याभावात्। 'घटो नील' इत्यादौ घटे औपाधिको भेदो भाति, घटत्वे नीलत्वस्य यो भेदस्तस्यैव घटानुयोगिकत्वनीलप्रतियोगिकत्वाभ्यां प्रातीतिकाभ्यां ज्ञानात्। (३)व्यावहारिकोऽपि भेदः ताभ्यां विशिष्टेन रूपेण प्रातीतिक इति विवेका(४)दभेदविषयके 'घटो नील' इत्यादौ भ्रमत्वव्यवहारः। उक्तविवेकाभावे तूक्तभेदस्य व्यावहारिकत्वग्रहान्नोक्तज्ञाने भ्रमत्वव्यवहारः। 'तद्घटस्तद्घट' इत्यादौ तु भेदस्य प्रातीतिकत्वग्रहे नोक्तविवेकापेक्षा, औपाधिकत्वाभावादिति तत्र तत्काले सदैव भ्रमत्वग्रहः, तथा च 'घटो नील' इत्यादौ भ्रमत्वव्यवहार इष्ट एव, स च 'तद्घटस्तद्वानि'त्यादिस्थलीयभ्रमत्वव्यवहारेण न तुल्यः, 'विशिष्टसत्ता सत्ते'त्यादावपि विशिष्टसत्तात्वस्य यो भेदः, तस्मिन् शुद्धसत्त्वानुयोगिकत्वेन व्यावहारिकेण विशिष्टसत्तात्वप्रतियोगिकत्वं प्रातीतिकं कल्पितम्। घटाकाशपटाकाशयोस्तु औपाधिको-

(१) तदाहि इति घपुस्तके।

(२)—अत्यन्ताभेदोपि न संसर्गः किन्तु प्रकारः इति पाठो घपुस्तके।

(३) तथाच व्यावहारिकोपीति घपुस्तके।

(४)—विवेकादुक्तभेदविषयके इत्यादिः घपुस्तके।

शुक्तिरजतादिवदध्यस्तस्य तत्तादात्म्याभावानुप

न्यायरत्नावली ।

ऽपि भेदो व्यावहारिकः । घटपटयोस्तादात्म्याभावेन व्यावहारिकयोस्तादात्म्यभेदयोः विरोधस्य दूषणस्याभावात् । न च तादात्म्यं भेदो वा व्यावहारिक इति विनिगमकशून्यमिति वाच्यम् । तादात्म्यान्यथानुपपत्त्या भेदस्य कल्पनीयतया तादात्म्यादेरुपजीव्यत्वेन प्राबल्यस्यैव व्यावहारिकत्वे प्रयोजकत्वात् । एवं च 'घटस्सन्नि'त्यादिप्रतीतेस्तादात्म्यांशे प्रमात्वेऽपि भेदांशे भ्रमत्वं तद्व्यवहारश्च । वस्तुतो विशेषणाभिन्नतया ज्ञायमाने विशिष्टे तादात्म्येन विशेषणप्रकारकज्ञानत्वं विशेषणांशे तादात्म्येन प्रमात्वम्, न तु विशेषणभेदसमानाधिकरणतादात्म्यसंसर्गकत्वघटितम् । तथा च विशेषणविशेष्ययोर्भेदाग्रहकाले न तादात्म्यप्रमा, तस्याभेदविषयकत्वानियमेन भ्रमत्वानियमश्च, ज्ञानान्तरेण भेदग्रहेऽपि तादात्म्यप्रमासम्भवादिति ध्येयम् । प्रातीतिकभेदप्रतियोगित्वं च न परिच्छिन्नत्वम्, प्रातीतिकध्वंसप्रतियोगित्वस्यापि तत्त्वापत्तेरिति भावः । ननु 'घटस्सन्नि'त्यादिप्रत्यये सत्ताजातेः समवायो भाति, न तु सद्रूपतादात्म्यम्, अतो दृश्यमात्रे सद्रूपभेदस्य व्यावहारिकत्वमेवेत्यतोऽधिष्ठानेत्यन्तमुक्तम् । द्वैतस्य-दृश्यस्य, मिथ्यात्वेन-सद्रूपज्ञाननिवर्त्यत्वेन । रजतादिवत्-रजतादेरिव । अध्यस्तस्य-सद्रूपाज्ञानमूलकभ्रमविषयस्य । अधिष्ठानेति । कारणीभूताज्ञानाश्रयेत्यर्थः । यथा शुक्तिरजतादेः शुक्तिज्ञाननिवर्त्यत्वरूपामिथ्या

नारायणी ।

र्यस्येत्यर्थः, मिथ्यात्वेन-अधिष्ठानज्ञाननाश्यत्वेन, शुक्तिरजतादिवत्-शुक्तिरजतादेरिव, अध्यस्तस्य-अधिष्ठानाज्ञानकृतभ्रमविषयस्य, घटः सन्नित्यादिप्रतीत्या सद्व्यक्तितादात्म्यविशिष्टतयैव प्रमितत्वात् । तत्तादात्म्याभावानुपपत्तिः-तादात्म्येनाभावो भेदस्तस्यानुपपत्तिः वस्तुतोऽसंभव इति यावत्, तथा च वस्तुतः शुक्तिरजतादेरसत्त्वेपि नेदं रजतमिति भेद-

न्यायरत्नावली

त्वेन शुक्त्यवाच्छन्नसद्रूपाज्ञानकल्पितत्वेन उक्ताज्ञानाश्रयस्यदमवच्छिन्नसद्रूपस्य तादात्म्येन भानम्, 'रजतमिदं सदि'ति प्रतीतेः, तथा दृश्यमात्रस्य ब्रह्मज्ञाननिवर्त्यत्वरूपमिथ्यात्वेन सद्रूपाज्ञानकल्पितत्वात् सद्रूपतादात्म्येन भानम्, 'घटस्सन्नि'त्यादिप्रतीतिरज्ञानस्य स्वाश्रयतादात्म्यवैशिष्ट्येनैव दृश्यरूपेण परिणामकल्पनात्, अन्यथा सत्ताजात्या द्रव्यगुणकर्ममात्रवृत्त्या 'ध्वंसस्सान्ने'त्यादिप्रत्ययानिर्वाहात्, अनादिदृश्यानामपि अनादिसत्तादात्म्यावांशष्टतयैव प्रत्ययात् । तथा च सर्वत्र सत्तादात्म्यावांशष्टतया भासमानदृश्ये सद्भेदस्य व्यावहारिकस्यासम्भवः । सद्रूपेऽपि सद्रूपात्मकसत्ताधारत्वोपपादनाय कल्प्योऽपि सद्रूपभेदो न व्यावहारिकः, विचारदशायामेव प्रतीतेरिति भावः । ननु अनुमित्यादिरूपे गुरुत्वादिप्रत्यये सत्तादात्म्यभानानियमात्सत्तादात्म्याविषयानुमित्यादिसिद्धगुरुत्वादौ व्यावहारिकसद्भेदसत्त्वे बाधकाभाव इति चेन्न । द्वैतस्येत्यादिना सिद्धत्वादित्यन्तेन 'सर्वं व्यावहारिकद्वैतज्ञानं स्वविषयीभूतद्वैतमात्रसत्तादात्म्यविषयम्, भ्रमत्वात्, प्रातीतिकभ्रमवदि'त्यस्य सूचितत्वात् । न चेदमनुपपन्नम् । ज्ञानजनकसामग्रीमात्रं सत्तादात्म्यविशेषितमेव ज्ञापयतीति नियमस्यानुभवबलेन कल्पनात् । अत एव सर्वोऽपि विषयः कालसम्बन्धित्वरूपसत्त्वेन भातीति भट्टाः । ज्ञानसम्बन्धित्वरूपसत्त्वेनेति प्राभाकराः । अत एव सद्रूपाधारत्वस्यापि पूर्वोक्तरीत्या सर्वदृश्येषु प्रतीतिसिद्धत्वात्सद्रूपात्यन्ताभावो न कुत्राप्यस्ति । न चोक्ताधारत्वस्य कल्पितत्वात् तद्वृत्तितदत्यन्ताभाव इव सद्रूपात्यन्ताभावोऽप्यास्तामिति वाच्यम् । शुद्धस्य सद्रूपस्यात्यन्ताभावो हि न प्रत्यक्षेण गृह्यते किंञ्चिद्धर्मविशिष्टप्रतियोगिकाभावस्यैव तेन ग्रहणात् । नाप्यनुमानादिना, व्याप्तिग्राहकतर्काद्यभावात् । प्रत्युत

पत्तेः । तेन आत्मा नाभावप्रतियोगी । अभाव-प्रतियोगिनश्च देहेन्द्रियादयः । (१)तेनाऽमी नात्मानः ।

न्यायरत्नावली ।

'सत्यस्य सत्य'मित्यादिश्रुतिपीडनात् सद्रूपसम्बन्धिनि तदत्यन्ताभावस्वीकारे सद्रूपं मिथ्या स्यात् । येन हि सम्बन्धेन यत् यद्विशिष्टं तत्सम्बन्धावच्छिन्नं तस्य तन्निष्ठात्यन्ताभावप्रतियोगित्वं मिथ्यात्वम् । तथा च सद्रूपस्याधारे आधारत्वसम्बन्धेनाभावस्वीकारेण मिथ्यात्वापत्त्या उक्तश्रुतिः पीड्येत, आधारत्वादेस्तु दृश्यत्वादिना मिथ्यात्वानुमानमुक्तश्रुत्या अनुगृह्यते इति ध्येयम् । ध्वंसप्रागभावयोरित्यादिना आत्मन अभावाप्रतियोगित्वं (२)स्वीकृत्य आत्मन इत्यादिना तत्पूर्ववाक्येन उक्तमर्थमुपसंहरति-तेनेत्यादिना । तेन आत्मनः अभावाप्रतियोगित्वग्राहकमानसत्त्वेन । आत्मा नाभावप्रतियोगी-आत्मत्वावच्छेदेन आत्माभावप्रतियोगित्वेन न गृह्यते । तेनेति । आत्मत्वव्यापकतया गृहीतं यदभावाप्रतियोगित्वं तदभावत्वेन हेतुनाऽभावप्रतियोगित्वेऽनात्मत्वव्याप्यताग्रहात् अनात्मरूपपक्षे वृत्तित्वग्रहाच्चानुभितिसम्भवेनेत्यर्थः । नात्मानः-आत्मस्वरूपत्वाभाववन्तः । यथाश्रुते आत्मभेदस्य साध्यत्वे तस्य प्रातीतिकस्यैव वाच्यत्वेन देहाद्यात्मवादिनं प्रति उपन्यासानौचित्येन असङ्गतेः । आत्मस्वरूपत्वं चात्ममात्रविषयकधीविषयत्वम् । ननु द्वैतस्य पूर्वोक्तमिथ्यात्वे दृश्यत्वादिकमेव हेतुः,

नारायणी ।

प्रतीतिवत् प्रपञ्चभेदप्रतीतिरपि काल्पनिकप्रपञ्चप्रतियोगिककाल्पनिकभेदपरतया नेयेति भावः । उक्तार्थमुपसंहरति-तेनेति । आत्मनोऽभावाऽप्रतियोगित्वग्राहकमानसत्त्वेनेत्यर्थः । नाभावप्रतियोगी-नाभावसामान्यप्रतीयोगी । तावता किं तत्राह-अभावेति । तेनेति । अभावसामान्यप्रतियोगित्वेन, अमी-देहेन्द्रियादयः, नात्मान-आत्मस्वरूपाभाववन्तः । यदि नात्मस्वरू-

(१) तेन तेऽमी नात्मान इति ग पुस्तके।

(२) स्थिरीकृत्य तद्धेतुकम् आत्मन इति घपुस्तके पाठः ।

किन्तु स्वप्रकाशबोधरूपाख्ये आत्मनि अद्वैतेऽप्यनाद्य-

न्यायरत्नावली ।

दृश्यत्वादिकं च दृक्तादात्म्यादिरूपम् , तस्य कथं मिथ्यात्वव्याप्यता(१)प्रयोजकत्वमिति चेन्न । मिथ्यात्वव्याप्यत्वं न स्याच्चेत् तर्हि दृश्यत्वं न स्यादिति तर्कसम्भवात् । अथ दृग्दृश्ययोस्तादात्म्यमनुपपन्नम् , तस्य दृग्दृश्याभ्यां सम्बन्धान्तर(२)काले तस्यापि सम्बन्धान्तरम् एवं तस्यापीति अनवस्थानात् । तस्य ताभ्यां सम्बन्धान्तरास्वीकारे ताभ्यामसम्बद्धस्य तस्य कथं तदुभयं प्रति सम्बन्धता, तथा च तत्तादात्म्यमनुपपद्यमानं सत् स्वमिव स्वप्रतियोगित्वानुयोगित्वोपहितत्वरूपेण दृग्दृश्यावपि मिथ्यात्वेन ज्ञापयतीति चेत् , एवमपि तत्तादात्म्योपहितरूपेणैव दृश इव दृश्यस्य मिथ्यात्वं स्यात् , न तदनुपहितरूपेणापि दृश्यस्य । अथानुपपद्यमानदृक्समबन्धाधीनासिद्धिकत्वात् दृश्यमात्रस्य मिथ्यात्वम् , तर्हि वेदान्तवाक्यजज्ञानीयानुपपद्यमानसम्बन्धाधीनसिद्धिकत्वात् आत्मापि मिथ्या स्यात् अत आह–किन्तु स्वप्रकाशेत्यादि । स्वप्रकाशबोधरूपे कल्पिता अनिर्वचनीया एवेति योजना । स्वप्रकाशतादात्म्यवर्जितस्यानुपपन्नत्वेन कल्पितत्वमेवेत्यर्थः । अनुपपद्यमानस्सम्बन्धः स्वोपहितमेव मिथ्यात्वेन ज्ञापयतीति वेदान्तवाक्यजवृत्तिज्ञानोपहितस्य मिथ्यात्वेऽपि न शुद्धब्रह्मणो मिथ्यात्वम् । न हि यत्र यत्रानुपपद्यमानमस्ति तन्मिथ्येति नियमे मानमास्ति । मिथ्योपहितं तु मिथ्यैव, मिथ्याघटितत्वात् । दृक्तादात्म्यानुपहितमपि सर्वं दृश्यरूपं मिथ्या । उक्तरीत्याऽनुपपद्यमानेन

नारायणी ।

पास्तर्हि व्यवहारक्षमास्ते कीदृग्विधा इत्याशङ्क्य स्वरूपमाह–किन्त्विति । स्वप्रकाशरूपे अनिर्वचनीया एवेति योजना । सदसद्भिन्नरूपाऽनिर्वाच्यत्वे

(१) मिथ्यात्वव्याप्यतां अप्रयोजकत्वादिसम्भवात् । अथ दृग्दृश्ययोस्तादात्म्यम् इत्यादिः घपुस्तके । (२) सम्बन्धान्तरस्वीकारे इति घपुस्तके ।

निर्वचनीयाविद्याकल्पिता अनिर्वचनीया एवेति सिद्धान्तरहस्यम्। ननु बोधरूप आत्मेति तवाभ्युपगमात्सु-

न्यायरत्नावली।

घटत्वादिसम्बन्धेनोपहितत्वात्। न हि दृश इव दृश्यस्य अनुपहितं रूपमस्ति, दृश्यग्राहकप्रमाणमात्रस्य सम्बन्धोपहितदृश्यग्राहकत्वात् निर्विकल्पकप्रत्यक्षस्याप्रामाणिकत्वात्। प्रामाणिकत्वेऽपि सम्बन्धमगृह्णतोऽपि तस्य (१)सम्बन्धोपहितस्य स्वरूपग्राहकत्वेन चरितार्थत्वात्। अनुपहितरूपग्राहकत्वकल्पने गौरवात्। वेदान्तजन्यधीविषयस्तु अनुपहितमेव, तात्पर्यानुरोधात्। तच्च स्वप्रकाशचिदानन्दस्वरूपम्, अन्यथा स्वतःपुरुषार्थरूपमोक्षरूपत्वानुपपत्तेः। तथा च अनात्मानः केनापि स्वरूपेण निर्वक्तुमशक्यत्वात् अनिर्वचनीयाः, उपहितैः स्वीयसर्वरूपैः अनुपपन्नत्वात् विचारासहत्वात् मिथ्याभूता इति भावः। ननु तर्हि स्वप्रकाशे शुद्धात्मनि न दृश्यारोपस्सम्भवति, अप्रकाशमान एव शुक्त्यादौ रूप्याद्यारोपदर्शनात्; अथ अज्ञानसम्बन्धात् तत्सम्बन्ध इति चेन्न, तस्यापि तत्रासम्भवात् अत आह-**अनाद्यनिर्वचनीयेत्यादि**। इदमाद्याकारमनोवृत्तिनिर्गमनात् शुक्त्यादौ साक्षिरूपप्रकाशसम्बन्धे सति (२)अज्ञानसम्बन्धेन रूप्याद्यारोपात् प्रकाशमानेऽप्यात्मनि अज्ञानात् दृश्यारोपसम्भवः। न च दृष्टान्तेऽप्यसम्भवः, अज्ञानस्यानादित्वात् अनिर्वचनीयत्वाच्च। प्रमाणजन्यज्ञानरूपेणैव प्रकाशेनाज्ञानस्य विरोधः, न तु चित्प्रकाशेन। मन्ददीपान्धतमसयोरिव

नारायणी।

हेतुमाह-**अविद्याकल्पिता इति**। **ननु स्वप्रकाशे अज्ञानसम्बन्ध एव कथं?** तत्राह-**अनाद्यनिर्वचनीयेति**। **अनिर्वचनीयत्वाद्भिन्नसत्ताकाऽविद्यासम्बन्धो घटत एव लोकेपि समसत्ताकप्रकाशाप्रकाशयोरेव विरोधदर्शनादिति भावः। आत्मनो बोधरूपत्वमिति पक्षेऽव्यभिचारित्वं प्रतिक्षिपति-ननिवति। सुप्तोत्थितस्य-स्वापानन्तरमुत्थितस्य जाग्रतः पुरुषस्य मूढोहमा-**

(१) सम्बन्धोपहितदृश्यग्राहकत्वेनेति घपुस्तके। (२) सत्यपीपि घपुस्तके।

षुप्तौ च बोधाभावात् गाढं मूढोऽहमासं न किञ्चिदवेदिषमिति सुप्तोत्थितस्य परामर्शात् कथमव्यभिचारिता तस्येत्याशङ्क्याह–सुषुप्त्येकसिद्ध इति । अयमर्थः । आत्मनः सुषुप्तिसाक्षित्वान्न तत्र तदभावः । अन्यथा मूढो

न्यायरत्नावली ।

तयोः स्वीयसर्वकालेषु मिथः संसृष्टतयैवोपलम्भात् । अथापि तयोर्विरोधः स्यात् यद्यज्ञानमुत्पद्येत । न ह्यन्धतमसमपि कृतमन्ददीपे गृहे उत्पद्यते । अथापि महालोकतमसोरिव समसत्ताकत्वे विरोधः स्यात्, अज्ञानं तु विचारासहत्वेन मिथ्याभूतं न परमार्थचित्प्रकाशसमसत्ताकमिति भावः । **सुप्तोत्थितस्य** सुषुप्त्युत्तरं जाग्रतः पुरुषस्य अवेदिषमिति परामर्शादिति योजना । परामर्शात्–स्मरणात् । अव्यभिचारिता–अभावाप्रतियोगिता । **सुषुप्तीति** । मनाऽवच्छिन्नजीवस्य ब्रह्मणो वा स्वप्राध्यासापादानत्व मनोलयसहितं तद्विषयकमवस्थाज्ञानं सुषुप्तिः, शुद्धब्रह्मण एव तदुपादानत्वे(१) तद्विषयकमूलाज्ञानमेव मनोलयसहितं सा । तत्र पक्षद्वयेऽपि (२)गाढमूढोऽहमिति मूलाज्ञानस्योल्लेखः । आद्यपक्षे न किञ्चिदवेदिषमित्यनेन स्वप्नोपादानाज्ञानस्य मनोऽवच्छिन्नचिदज्ञानस्येव व्यावहारिकप्रपञ्चविषयकत्वस्वीकारादिति । अन्यथा

नारायणी ।

समिति प्रत्ययस्याज्ञानपरतानिरासायाह–न किञ्चिदवेदिषमिति । **न किञ्चिज्ज्ञातवानित्यर्थः** । धात्वर्थज्ञानस्य नञर्थेऽभावेऽन्वयात् ज्ञानाभाव एव प्रतीतेर्विषय उचित इति भावः । **परामर्शात्–अनुमितेः** ।(३)जन्यज्ञानसामग्र्यभावादिरूपहेतोरिति शेषः । अव्यभिचारिता–अविनाशिता । अयमर्थ इति । **सुषुप्तेन स्वापात्मकेन एकेन मुख्येन असाधारणप्रमाणभूतेन सिद्धो निश्चित इति मूलार्थः** । सुषुप्तीति । **सुषुप्तिविषयकानुभवरूपत्वादित्यर्थः** ।

(१) तदुपादानत्वे तु इति घपुस्तके ।

(२) गाढं मूढोहमित्यनेन मूलाज्ञानस्योल्लेखः इति घपुस्तके ।

(३)—अनुमितेः अनुमितिजन्यज्ञानेत्यादिपाठः खपुस्तके युक्तश्च ।

ऽहमासमिति परामर्शानुपपत्तेः । मातृमानमितिमेयानां

न्यायरत्नावली ।

न किञ्चिदवेदिषमिति सर्वव्यावहारिकविषयकाज्ञानस्मृतेरनुपपत्तेः । वस्तुतो घटादिव्यावहारिकपदार्थानां सुषुप्तौ जागरकालीनेन अज्ञानान्तरावृतत्वेन प्रकाशाप्रसक्तेः स्वप्नहेत्वज्ञानविषयत्वास्वीकारेऽपि जीवेशचिदज्ञानसम्बन्धादौ जागरे सदा भानेन प्रकाशप्रसक्तेः स्वप्नहेत्वज्ञानविषयत्वावश्यकत्वात्, वार्तिकमते जीवस्यानावृतसाक्षितादात्म्येनेशस्य साक्षित्वेन च तयोर्भेदस्य च अनावृतत्वेन साक्षिभास्यत्वप्रसक्तेः 'न किञ्चिदवेदिष'मित्यनेनोक्तभेदादिविषयकतया मनोऽवच्छिन्नचिदज्ञानस्योल्लेखः, न तु घटादिविषयकतयापि । द्वितीयपक्षे (१)तु मूढोऽहमासमित्याकारं मूलाज्ञानविषयकस्मरणम् । न किञ्चिदवेदिषमित्याकारकं तु उक्तभेदादिविषयकस्य सुषुप्तावनुभूयमानस्य स्वप्नानुपादानस्यापि अज्ञानावस्थाविशेषस्य स्मरणमिति ध्येयम् । अन्यथेति । सुषुप्तिरूपाज्ञानविषयकसाक्षिणः सुषुप्तिकालेऽनङ्गीकार इत्यर्थः । ननु सुषुप्त्याकाराया अविद्यावृत्तेरेव तादृशस्मृतिहेतुत्वसम्भवेन किं सुषुप्तिकालीनसाक्षिस्वीकारेण तत्राह—मातृमानमितिमेयानामिति । ज्ञातृज्ञानकरणज्ञानज्ञेयव्यक्तीनां-व्यभिचारित्वेऽपि-साक्षिसम्बन्धे

नारायणी ।

तत्र-सुषुप्तौ तदभावः-ज्ञानसामान्याभावः । यत्किञ्चिद्व्यक्तेः सामान्याभावविघटकत्वात् तथात्र निरुक्तानुमाने बाध इति भावः । तत्र ज्ञाने प्रमाणमाह—अन्यथेति । सुषुप्तावनुभवानङ्गीकार इत्यर्थः । परामर्शानुपपत्तेः (२)स्मृतिं प्रत्यनुभवस्य हेतुत्वात्तदानीमनुभवं विनोत्थितस्य स्मृत्यसम्भवादिति यावत् । तदानीं क्लृप्तप्रमाणादिसामग्र्यभावात्कथनुभवस्तत्राह-मातृमानेति । ज्ञानाश्रयज्ञानकरणवृत्तिज्ञेयव्यक्तीनां (३)व्यभिचारित्वेऽपि

(१) 'न किञ्चिदवेदिष'मित्याकारस्योक्तभेदादिविषयकस्य सुषुप्तावनुभूयमानस्य इति घपुस्तके । (२) परामर्शानुपपत्तेः स्मरणानुपपत्तेः स्मृतिं प्रतीत्यादिपाठः खपुस्तके ।

(३)—व्यक्तीनामित्यर्थः । व्यभिचारित्वेऽपि—तदा विद्यमानाभावप्रतियोगित्वेऽपि तद्भावाभावसाक्षिणः ज्ञानादिभावाभावयोर्भासकस्य इति खपुस्तके पाठः युक्तश्चासौ ।

व्यभिचारित्वेऽपि तद्भावाभावसाक्षिणः कालत्रयेऽप्य-

न्यायरत्नावली ।

क्वचित्काले अभावेऽपि कालत्रये—ज्ञात्रादेः पूर्वकालस्थितिकालना-शकालेषु । कालत्रयाव्यभिचारित्वे (१)हेतुमाह—तद्भावाभावसा-क्षिण इति । ज्ञात्रादिस्वरूपतदभावभासकस्येत्यर्थः । यथा प्रति-कर्मव्यवस्थायां वक्ष्यमाणरीत्या देहस्थविषयस्थतदन्येषां मनोवृत्ति-भागावच्छिन्न(२)प्रमातृप्रमाणरूपत्वम्, तथा सुषुप्तौ मनोवृत्त्यभावेन प्रमाणाद्यभावेऽपि अविद्याविशिष्टा चित् ज्ञात्री, अविद्यावृत्त्यव-च्छिन्ना ज्ञानं तत्करणावच्छिन्ना ज्ञानकरणं विषयोपहिता ज्ञेयेति ज्ञात्रादिसाधकोऽनुभवोऽवश्यं वाच्यः । न ह्यविद्यावृत्तिरनुभवः येन तयैव (३)स्ववृत्तिर्वाच्या, अस्वप्रकाशरूपत्वेन स्वयं सन्दिग्ध-त्वेन सुषुप्त्याद्यर्थासाधकत्वात् । तदुक्तम्—

अप्रत्यक्षप्रकाशस्य नार्थदृष्टिः प्रसिध्यति । इति ।

अस्वप्रकाशज्ञानवादिनोऽर्थप्रकाशो नोपपद्यत इत्यर्थः । ज्ञा-नस्य स्वप्रकाशत्व च ज्ञानाविषयत्व चैवैव सशयादाविष-यत्वायोग्यविद्यमानस्वरूपकत्वम् । अत एवोक्तं तार्किकादि-भिरपि 'न हि जानन्नेव जानामि न वेत्याद्यनुभवति' । इयां-स्तु विशेषः—यत्तार्किकादिमते ज्ञानस्य स्वाभाववत्त्वज्ञाने प्रतिबन्ध-कत्वात् संशयाद्यविषयत्वं मन्मते त्वनावृतत्वादिति । अत एव तन्म-तं तादृशप्रतिबन्धककल्पना(४)द्धेयम् । संशयादिकं प्रति मन्मते

नारायणी ।

तद्भावाभावसाक्षिणः—ज्ञात्रादिरूपभावतदभावभासकस्य, कालत्रये—जागराद्यवस्थात्रये, अव्यभिचारात्—अविनाशात् । तथाच लाघवात्स-र्वावभासकतयाङ्गीकृतस्य साक्षिणस्तदानीं सत्त्वान्न सामग्र्यभावेपि

(१) हेतुं विशेषणमाह इति घपुस्तके ।

(२) मनोवृत्तिभागावच्छिन्नचैतन्यानां प्रमातृप्रमितिप्रमाणरूपत्वमिति घपुस्तके ।

(३) स्मृतिर्वाच्येति घपुस्तके । (४) कल्पनागौरवाद्धेयमिति घपुस्तके ।

व्यभिचारात् । ननु प्रमाश्रयः प्रमाता स एव कर्ता भो-

न्यायरत्नावली ।

आवरणस्य हेतुत्वं तन्मते विशेषादर्शने(१) हेतुत्वस्य स्थाने इति न गौरवकरम् , प्रत्युत विशेषादर्शनं व्याप्यतया ज्ञातस्य निश्चयाभावः । तच्च चाज्ञानत्वजातिरूपादावरणत्वाद् गुरुतरम् । गृहीताप्रामाण्यकस्याहार्यस्याव्याप्यवृत्तिविषयकत्वेन गृहीतस्य च निश्चयस्याप्रतिबन्धकत्वात्तदन्यत्वेन निश्चयो विशेषणीयः । ज्ञानस्य स्वरूपसतः प्रतिबन्धकत्वेऽपि तादृशनिश्चयस्य प्रतिबन्धकत्वमावश्यकम् । घटादौ तादृशनिश्चयसत्त्वे 'घटज्ञानवान्न वे'ति तादृशसंशयानुदयात् । आवरणं तु तादृशनिश्चयविषयेऽप्यस्तीति तत्र संशयादिकं स्यादेवेति केवलरूपेण हेतुरिति मे लाघवम् । ज्ञानस्य ज्ञानान्तरेण स्वेन वा प्रकाश्यत्वे तु अनवस्थाऽऽत्माश्रयगौरवादिकम् । 'साक्षात्करोमि जानामि अनुभवामी'त्यनुगताकारबुद्धौ एकस्यैवानुभवस्य भानात् वृत्त्यविषये सुखादौ 'सुखं जानामी'त्यादिप्रतीतेश्च(२) न वृत्तीनामनुभवत्वम् । तस्मादेकस्य भानस्य तादात्म्यात् तदन्येषु सर्वेषु भातीतिव्यवहारः । तस्य चानुभवस्य अनुभवाविषयत्वेऽपि नालीकत्वापत्तिः, वेदान्तवाक्यजन्यप्रमावृत्तिविषयत्वात् कालादिसम्बन्धाच्च । तस्मिन्नुक्तव्यवहारस्तु (३)स्वरूपेणैव, न त्वनुभवान्तरापेक्षः । घटाद्यभावे तद्व्यवहार इव तदन्याभावानपेक्षः । तथा च विषयतासम्बन्धेन उक्तव्यवहारं प्रति अनुभवव्यक्तेः तादात्म्येन हेतुत्वमुक्तव्यवहारपूर्वकालीनत्वाविशिष्टायां

नारायणी ।

काचिदनुपपत्तिरिति भावः । मातृभिन्न सर्वसाक्षिणं तार्किकप्रभाकरौ

(१) विशेषादर्शनहेतुत्वस्य स्थाने इति गौरवकरं प्रत्युत विशेषादर्शनं ज्ञानस्य निश्चयाभावः इति घपुस्तके ।

(२)—प्रतीतेश्च वृत्तीनामननुभवत्वं च इति घपुस्तके ।

(३)—तत्स्वरूपेणैव इति घपुस्तके ।

क्ता प्रदीपवत्स्वपरमाधारणसर्वभासकश्चेति न घटादिवत्साक्षिसापेक्ष इति चेन्न। विकारित्वेन स्वविकारसा-

न्यायरत्नावली।

तद्व्यक्तौ तद्व्यक्तेस्तादात्म्यसत्त्वात् कार्यवति स्वस्मिन्नपि कारणस्य सत्त्वम्। सर्वस्यैव हि कारणस्य कार्यप्राक्कालीन एव कार्योपलक्षिते सत्त्वमपेक्ष्यते। कार्यप्राक्कालीनत्वावच्छेदेन हि यत्र यद्वर्तते, तत्कार्यप्राक्कालीन एव तत्र वर्तत इति नियमादिति भावः। प्राभाकरमतमाशङ्कते-नन्वित्यादि। प्रमाश्रयः—ज्ञानाश्रयः। प्रमाता—ज्ञाता। प्रदीपवदिति। यथा दीपः स्वस्य स्वप्रभासंयुक्तस्य च व्यवहारजननरूपावभासने नान्यापेक्षः, विषयतासम्बन्धेन घटादाविव समवायेन ज्ञातरि तादात्म्येन स्वस्मिंश्च(१) घटज्ञानस्य सम्बद्धतया तेषु व्यवहारस्य तत एवोत्पत्तिसम्भवात्। तथा च सुषुप्तौ (२)अविद्यासुखवृत्तिरूपज्ञानस्वीकारेऽपि तत्साक्षिस्वीकारो निर्युक्तिकः। 'जानामी'त्यनुगताकारधीस्तु विप्रतिपन्ना। न ह्यनुगताकारबु(३)द्ध्यर्थमेकं वस्तु स्वीक्रियते, अतिप्रसङ्गादिति भावः। विकारित्वेन-परिणामित्वेन। स्वविकारसाक्षित्वानुपपत्तेः-स्वपरिणामविषयकज्ञानवत्त्वानुपपत्तेः। सुखादिरूपेण परिणतस्य प्र-

नारायणी।

प्रतिक्षिपतः—नन्विति। प्रमाश्रयः-प्रमाणजन्यज्ञानाश्रयः। ज्ञानवत एव कर्तृत्वसम्भवादाह-स एवेति। कर्तृत्वभोक्तृत्वयोः सामानाधिकरण्यमुचितमित्यभिप्रेत्याह—कर्ता भोक्तेति। स्वपरेति। स्वस्य आश्रयस्य परस्य ज्ञानघटादेश्च वृत्तिद्वारा व्यवहारजनक इत्यर्थः। न साक्षिसापेक्षो-न स्वभिन्नानुगताभासकव्यक्त्यन्तरसापेक्षः। भासकत्वेनान्यव्यक्तिसापेक्षत्वाभावे दीपो दृष्टान्तः व्यतिरेकेण घट इति विवेकः। तथाच न (४)सुषुप्तावनुभवः प्रामाणिक इति भावः। समाधत्ते—विकारित्वेनेति। तार्किकप्रभाकरोभयमते कर्तृत्वादिरूपधर्मवत्त्वेनेत्यर्थः। स्वविकारेति।

(१) स्वस्मिंश्च स्वघटकज्ञानस्येति घपुस्तके। (२) अविद्यावृत्तिरूपेति घपुस्तके।
(३)—बुद्ध्यर्थमेव वस्तु स्वीक्रियते अतिप्रसङ्गापत्तेरिति भावः इति घपुस्तके।
(४) खपुस्तके न इति नास्ति।

क्षित्वानुपपत्तेः दृश्यस्य द्रष्टृत्वाभावात्(१)प्रमातुश्च प-

न्यायरत्नावली ।

मातुः सुखादिरूपापत्त्या पूर्वरूपोच्छेदेन पूर्वरूपस्य न सुखादिप्रमातृत्वसम्भव इति भावः । अथवा विकारित्वेनेत्यादि-भिन्नकालीनसुखादिरूपनानापरिणामित्वरूपापन्नत्वेन तादृशपरिणामान् प्रति द्रष्टृत्वानुपपत्तेः एकस्य भिन्नकालीन(२)परिणामद्रष्टृत्वं प्रत्यभिज्ञायते 'योऽहं पूर्वं सुखमन्वभूवं सोऽहमिदानीं दुःखमनुभवामि'इत्यादिप्रत्यया(३)च्च पूर्वापरकालीनमेकं द्रष्टारं विनाऽनुपपन्नम्-त्वन्मते च न द्रष्टुरेकत्वं सम्भवति, विकारित्वेन नानारूपापन्नत्वादिति भावः । ननु प्रमातुरेकदेश एव सुखादिरूपमापद्यते, तथा च तदीयपूर्वरूपस्यापि विद्यमानत्वेन द्रष्टृत्वोपपत्तिः, अत एवाक्तप्रत्यभिज्ञाप्युपपद्यते तत्राह-दृश्यस्य द्रष्टृत्वानुपपत्तेरिति । दृश्यस्यानुभवविषयत्वेन भासमानस्यानुभवाश्रयत्वमात्रानुपपत्तेः । ननु 'अहं सुखमनुभवामी' तिधिया प्रमाश्रयत्वेनैवाहमर्थो भाति न प्रमेयतया तत्राह-प्रमातुश्च परिणामित्वेन द-

नारायणी ।

स्वाश्रितकर्तृत्वादिधर्मानुसन्धातृत्वासम्भवात् । घटत्वाद्यनाश्रयस्यैव घटत्वादिविशिष्टानुसन्धातृत्ववत् कर्तृत्वादिरहितस्यैव कर्तृत्वाद्यनुसन्धातृत्वसम्भवादिति भावः । ननु स्वस्वव्याप्यभिन्नं प्रत्येव भासकत्वे भास्यधर्मानाश्रयत्वनियमः अन्यथा दीपस्य स्वीयरूपादिभासकत्वानुपपत्तिरत आह—दृश्यस्येति । दृग्विषयस्य ज्ञानभिन्नस्य जडस्येति यावत् । द्रष्टृत्वाभावात्—सविषयकभानाश्रयत्वाभावात् । तथाचाहमर्थो न द्रष्टा दृश्यत्वाद्घटवदित्यनु(४)मानाद् द्रष्टृत्वाभावसिद्धे दीपादावपि ग्राहकज्ञानाश्रयस्य तृतीयत्वेन तद्दृष्टान्तादभिमतासिद्धेश्च नाहमर्थस्यैव द्रष्टृतेति भावः । नन्वहमर्थस्य अहं जानामीत्याश्रयत्वेन भानात् दृष्टिकर्मत्वरूपं दृश्यत्वमेवालीकम्, अतः कथं तेन घटादेरिव द्रष्टृत्वाभावसिद्धिस्तत्राह—प्रमातुश्चेति । अहमर्थस्येत्यर्थः । परिणामित्वेन—प्रमाणजन्यवृत्त्याश्रयत्वेन

(१)—द्रष्टृत्वानुपपत्तेरिति गपुस्तके । (२)—भिन्नकालीननानापरिणामेत्यादिः घपुस्तके । (३)—प्रत्ययात् । तच्च पूर्वेत्यादिः घपुस्तके । (४)—इति प्रत्यनुमानात् इति खपुस्तके ।

रिणामित्वेन दृश्यत्वात् एकस्य(१)कूटस्थस्यैव सर्वसाक्षि-

न्यायरत्नावली ।

दृश्यत्वादिति । प्रमातुरपि बीजादिवत् नानाविधभिन्नकालीनपरिणामाश्रयतयाऽनुभवविषयत्वस्वीकारादित्यर्थः । 'अहं सुखी'त्याद्यनुभवस्य सुखादिविशिष्टप्रमातृविषयत्वात् प्रमाश्रयत्वमात्रमहमर्थस्येति वक्तुमशक्यम् । किं च प्रमाविषयत्वमेव तत्र वाच्यम् , न त्वाश्रयत्वम् , उक्तप्रत्यभिज्ञाया (२)विकारिण्यनुपपत्तेः पूर्वरूपस्य उत्तररूपतादात्म्यात्तदुत्पत्तिविनाशाभ्यां तदुत्पत्तिविनाशप्राप्तेरिति भावः । ननु प्रमाता न परिणामी, आरम्भवादस्यैव स्वीकारेण निर्विकारस्यापि प्रमासुखादिसमवायित्वस्वीकारादित्याशङ्क्य धर्मधर्मिणोस्तादात्म्यानुभवात् धर्मस्योत्पत्तिविनाशाभ्यां धर्मिणस्तावश्यं वाच्यौ, तदुक्तम्—

उपयन्नपयन् धर्मो विकरोति हि धर्मिणम् । इति ।

उपयन् जायमानः अपयन् विनश्यन् विकरोति उत्पत्तिविनाशभाजं करोतीत्याशयेन उपसंहरति—एकस्येत्यादि । एकस्य—स-

नारायणी ।

दृश्यत्वात्—स्वातिरिक्तस्वप्रकाशसंविद्विषयत्वात् । प्रमाणजन्यज्ञानसापेक्षस्य स्वप्रकाशत्वायोगात् अवेद्यत्वे च शशशृङ्गादिवदलीकत्वापत्तेः, स्वव्यवहारायाहमर्थस्य स्वातिरिक्तस्वप्रकाशसंविद्विषयत्वमावश्यकमिति भावः । ननु तथापि न तवेष्टसिद्धिः स्वाश्रितज्ञानस्यैव स्वप्रकाशसंविद्रूपत्वाङ्गीकारात् तेन दृश्यत्वद्रष्टृत्वयोरुभयोरपि समावेशो बाधकाभावादित्यत आह—एकस्यैवेति । सजातीयभेदरहितस्यैवेत्यर्थः । कूटस्थस्य—कूटे प्रपञ्चेऽधिष्ठानतया स्थितस्य । सर्वसाक्षित्वात्—सर्वपदार्थविषयकभानरूपत्वात् । अहमर्थवृत्तेर्जडकार्यत्वेन घटादेरिव स्वतः स्फूर्त्तिमत्त्वस्य कर्तृकर्मविरोधेन सविषयकत्वस्यानवस्थानात् । वृत्त्यन्तरवेद्यत्वस्य चाऽयोगात् । लाघवात्सर्वभ्रमाधिष्ठानतया कल्पितस्यैकस्यैवाविकरिणः (३)प्रमात्रादिसाधारणसर्वसाक्षित्वकल्पनमुचितमिति भावः ।

(१) एकस्यैव कूटस्थस्येति नारायणीसम्मतः पाठः ।

(२) विकारिणोऽनुपपत्तेरिति घपुस्तके ।

(३)—अविकारिणः सर्वसाक्षित्वकल्पनमिति खपुस्तके पाठः ।

न्यायरत्नावली ।

र्वदृश्यानुस्यूतस्य । तत्र हेतुः-कूटस्थस्येति । स्वसमसत्ताकं रूपान्तरमापद्यते यः तदन्यस्येत्यर्थः । एवकारात् प्रमाता सुखादिरूपं स्वसमसत्ताकपरिणाममापद्यमानो न साक्षीत्यर्थः । ननु गुणादिधर्मस्य धर्मिणि तादात्म्यमेव सम्बन्धः न तु समवायाख्यः तदन्य इत्यत्र का युक्तिरिति चेदत्रोच्यते । यत्र यत्र समवायः प्राभाकराद्यैरुच्यते तत्र तत्र तादात्म्यमेव युक्तम् । तथा हि-संयोगविशेषयुक्तं कपालद्वयं घटः, शाखादिसमुदाय एव सन्निवेशविशेषयुक्तो वृक्ष इत्यनुभवात् तादात्म्यान्यसम्बन्धो न लौकिकानुभवविषयः । 'इह कपाले घट' इत्यादिधीस्तु न लोकानां स्वाभाविकी किन्तु (१)तार्किककल्पनामात्रम्, न ततोऽर्थसिद्धिः अतिप्रसङ्गात् । किञ्च (२)नीलादिगुणस्य घटादौ तादात्म्यस्वीकारे 'घटो नील' इत्यादिसर्वज्ञाने घटादौ नीलादिगुणस्य तादात्म्यसम्बन्धेन विशेषणता, न तु समवायेन; तस्यैवासिद्धत्वात् । तथा च 'घटो न नील' इत्यादिज्ञाने नीलादिगुणभेदस्यैव विषयत्वम्, न तु नीलादिसमवायिप्रतियोगिकभेदस्येति नीलादिगुणतादात्म्यधीतद्भेदधियोः 'घटो नीलगुणात्मकः, घटो न नीलगुणात्मक' इत्याकारकयोरेव विरोधित्वं कल्प्यते, सर्वैरेव स्वीकारात् ; न तु नीलसमवायितादात्म्यधीनीलसमवायिभेदधियोः, (३)अलीकत्वात् । तथा च लाघवम् । अपि च नीलादेस्तादात्म्यसम्बन्धेन घटादौ विशिष्टबुद्धिं प्रति घटादौ नीलादिगुणभेदविशिष्टबुद्धेर्विरोधित्वं त्वया मया च कल्प्यम्, त्वया तु समवायेन तत्र तद्विशिष्टबुद्धौ समवायेन यो नीलादिगुणात्यन्ताभावः तद्विशिष्टबुद्धेर्विरोधित्वं वाच्यमिति समवा-

(१) तान्त्रिककल्पनामात्रम् । न च ततोर्थासिद्धिरिति घपुस्तके ।
(२) नीलादिघटादाविति गपुस्तके तत्र गुणस्येत्यावश्यकम् ।
(३)—भेदधियोस्तयोरलीकत्वादिति घपुस्तके ।

त्वात् । ननु(१)एकः कूटस्थो निर्धर्मकः साक्षी नाद्रियते

न्यायरत्नावली ।

यतद(२)त्यन्ताभावतद्ज्ञानतद्विरोधित्वादिकल्पने तु तव महागौरवम् , तस्मात् कपालघटादिसम्बन्धेषु तादात्म्यत्वरूपोऽखण्डधर्म एव कल्प्यते । 'द्रव्यं घट' इत्यादिधीस्थले सम्बन्धनिष्ठतया क्लृप्तत्वात् । न तु समवायत्वरूपः, क्वाप्यक्लृप्तत्वात् । 'अहं सुखी'त्यादावपि तादात्म्यादिसम्बन्धः सुखादेर्वृत्तिनियामकः क्वचित् संयोग इव । तथा 'घटे रूपमि'त्यादिधीस्तु लोकानां वर्तत एव, तत्रापि तादात्म्यं रूपादेः वृत्तिनियामकमिति दिक् । ननु प्रमाश्रयस्यैव लोके साक्षित्वेन व्यवहारात् एकरूपकूटस्थस्य साक्षित्वं न युक्तम् । न च प्रमाश्रयस्य प्रमेयत्वे विरोधः, गमने गन्तुरिव प्रमायां प्रमातुः कर्मत्वासम्भवादिति वाच्यम् । प्रमोपाहितप्रमात्वविशिष्टरूपेण(३) एकस्यापि प्रमातृत्वप्रमेयत्वोभयोपपत्तेः । अत एव प्रमाया अपि प्रमेयत्वम्, अयन्ताभेदे सम्बन्धास्वीकारेऽपि प्रमात्वोपहितप्रमात्वाविशिष्टरूपभेदेन विषयत्वोपपत्तेः । न च विकारिणि प्रमातरि नानारूपे उक्तप्रत्यभिज्ञानुपपत्तिरिति वाच्यम् । सुखादिपरिणामात्मकतया नानात्वेऽपि स्वरूपेण प्रमातुरेकत्वात् । एवं च स्वविषयकजन्यप्रमया धर्मव्यवहारोपपत्तौ तदन्यनित्यज्ञानरूपे साक्षिणि मानाभाव इति शङ्कते-एक इत्यादि । निर्धर्मकः-प्रमादिधर्मशून्यः । एकादिपदं श्लिष्टम् । एको न साक्षी किन्तु

नारायणी ।

साक्षित्वविरुद्धैकत्वकूटस्थत्ववतः साक्षित्वं न युक्तिसहं नवा (४)शास्त्रसिद्धमित्याशङ्कते--एक इति । एकः अद्वितीयः भानसामग्र्या रहित इति यावत् , कूटस्थोऽपरिणामी निर्धर्मकः साक्षित्वादिधर्मरहितः । अप्रामाणिकत्वात्--युक्तिशास्त्राद्यगोचरत्वात् । अप्रामाणिकतोक्तिः श्रुत्यपरिज्ञान-

(१) नन्विति खघपुस्तकयोर्नास्ति ।

(२)—समवायतदवच्छिन्नात्यन्तेत्यादिः घपुस्तके ।

(३) रूपभेदेनेति घपुस्तके । (४)—युक्तिसहशास्त्रसिद्धमिति कपुस्तके पाठः ।

अप्रामाणिकत्वादिति चेन्न । 'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति, न दृष्टेर्द्रष्टारं पश्येः अदृष्टो द्रष्टा, नान्योऽतोऽस्ति द्रष्टे'त्यादि वदता वेदान्त-

न्यायरत्नावली ।

द्वौ त्रयो वा । कूटे कपटे साक्षित्वे यस्तिष्ठति, यो वा धर्मशून्यः, स न साक्षी, धर्मशास्त्रे तथोक्तत्वात् इति श्लेषः । भान्तम्-अपरोक्षव्यवहारविषयम्, अनु-आश्रित्य । किं दृग्दृश्ययोरभेदापरोक्षतामात्रं विवक्षितं तत्राह-तस्य भासेति । तदभिन्नभाने नेत्यर्थः । विभाति-अपरोक्षव्यवहारविषयः । दृष्टेः-चाक्षुषादिवृत्तिज्ञानस्य, द्रष्टारम्-अनुभवरूपम्, पश्येः-चाक्षुषादिवृत्तिविषयीकुर्याः । अदृष्टः-वृत्तिभिन्नानुभवस्यापि अविषयः । तर्हि नित्यचिद्रूपसाक्षिण एव वास्तवं नानात्वमस्तु तत्राह-नान्योऽतोऽस्ति द्रष्टेति । यो द्रष्टा सोऽन्तर्यामिस्वरूपादन्यः सन् कुत्रापि नास्ति मिथ्येत्यर्थः । शुद्धेनान्तर्यामिरूपेण द्रष्टा सन् न तु तदन्यरूपेणेति द्रष्टुर्नानात्वं मिथ्येति भावः । तस्य कूटस्थचिद्रूपस्य सर्वसाक्षित्वेन-

नारायणी ।

मूलेति दर्शयितुं श्रुतिमादौ उदाहरति-तमेवेति । तमेव-'एको वशी सर्वभूता-

त्यादि भाति । फलितमाह—तस्य भासेति । तदभिन्नभानेनेत्यर्थः । आस्तां सर्वभासकत्वं भास्यत्वसामानाधिकरण्यं तु कुतस्तत्राह-न दृष्टेरिति । दृष्टेः-प्रमाणजन्यवृत्तेः द्रष्टारं-भासकं न पश्येः-न पश्यसि तद् ब्रह्मेति शेषः । तथाच भासकत्वभास्यत्वयोरसामानाधिकरण्यं श्रुतावेव स्पष्टमिति भावः । श्रुत्यन्तरमाह-'अद्रष्टा द्रष्टेति' अद्रष्टः-सर्वप्रमाणागोचरः द्रष्टा-सर्वावभासकः । नन्वस्तु द्रष्टृत्वदृश्यत्वयोरसामानाधिकरण्यं द्रष्टुरेकत्वं तु कुतस्तत्राह-नान्योतोस्तीति । अतः--पृथिव्यादिविज्ञानान्तर्यामिणः सकाशात्, अन्यः-व्यावृत्तः प्रपञ्चान्तर्गतः कोप्यहमर्थादिरूपो द्रष्टा नास्तीत्यर्थः । आदिना 'नान्योऽतोस्ति श्रोते'त्यादिपरिग्रहः । अनेन (१)सर्वप्र-

(१) अनेन प्रमाणजन्येति खपुस्तके ।

प्रमाणराजेन तस्यैव सर्वसाक्षित्वेनाभिषिक्तत्वात्। ननु महदेतादिन्द्रजालम्, प्रमाश्रयानकूटस्थान्विहाय कूटस्थमप्रमाश्रयमेव प्रमाणराजः सर्वसाक्षिणं करोतीति। बाढम्। इन्द्रजालमेवैतत्स्वप्नवदविद्याविलसितत्वात्।

न्यायरत्नावली।

स्वभिन्नं सर्वं प्रत्यनुभवरूपतया अभिषिक्तत्वात्—लाघवतर्कगङ्गाजलेन संशोध्य सर्वान् प्रति ज्ञापितत्वात्। तथा च लाघवतर्कसहकृतयोक्तश्रुत्या स्वभिन्नसर्वविषयकम् अन्याविषयीभूतमेकं नित्यचिद्रूपं ज्ञानं कल्प्यते। चक्षुरादिजन्यप्रमा तु ज्ञानव्यञ्जिका, न तु ज्ञानम्; सुखादौ चित एव ज्ञानत्वस्य कल्पितत्वात्। तत्र जन्यज्ञानतत्सामग्र्यादिकल्पने तु महागौरवम्। यद्यपि यथा प्रमितवक्तरि प्रमातर्येव साक्षिशब्दस्य लोके रूढिः कल्पिता, तथापि 'साक्षी चेता' 'सर्वस्य साक्षी'त्यादिश्रुत्या गौण्या वृत्त्या चैतन्येऽपि तत्प्रयोगः। प्रमाता रागद्वेषादिविकारवतामनेकेषाम् अन्येषु दुष्टादुष्टत्वव्यवहारं जनयति, चैतन्यमपि सर्वेषां विकारवतां व्यवहारं प्रमातृषु जनयतीति सादृश्यादिति भावः। कूटस्थमप्रमाश्रयमिति। अप्रमाश्रयस्य साक्षिता लोकाविरुद्धा युक्तिविरुद्धा च। सा हि सर्वविकारितादात्म्यरूपा वाच्या। न च कूटस्थस्य विकारितादात्म्यं सम्भवतीति इन्द्रजालवत् सेति भावः। एतत्—कूटस्थस्य साक्षित्वम्,

नारायणी।

माणजन्यवृत्तिमात्रस्यैव ज्ञानरूपता नास्तीति ज्ञापितम्, सर्वसाक्षित्वेन सर्वावभासकत्वेन अभिषिक्तत्वात्—दर्शितयुक्तिभिः संशोध्य सर्वान्प्रति ज्ञापितत्वात्। निरुक्तयुक्तिविरोधसत्त्वेपि श्रुतेः साक्षित्वप्रतिपादनं महामायेत्याशङ्क्ते—नन्विति। इन्द्रजालं—माया। इन्द्रजालत्वमेव समर्थयति—(१)*प्रमाश्रयानिति। तत्र हेतुः अकूटस्थानिति परिणममानानित्यर्थः। प्रमातुर्द्रष्टृत्वसंभवमुपपाद्यातिरिक्तस्यासंभवमाह*—कूटस्थमिति। कूटवद्विद्यमानं निर्विकारमिति यावत्। अत एवाप्रमाश्रयमित्यर्थः। इष्टमापादितमित्याह—बाढमिति। एतत्—कूटस्थस्य साक्षित्वम्, अविद्याविसलितत्वात्—

(१) *.....*चिह्नद्वयवर्ती पाठः खपुस्तके नास्ति।

तथापि दृश्यस्य घटादिवज्जडत्वेन कथं प्रमाश्रयत्वमिति

न्यायरत्नावली ।

विलसितत्वात्-प्रयुक्तत्वात् । तथापि-अविद्याप्रयुक्तत्वेन मिथ्यात्वात् कूटस्थाकूटस्थतादात्म्यस्यासम्भवपरिहारेऽपि । दृश्यस्य-साक्षिभास्यमनसः । जडत्वेन-साक्षिचिदन्यत्वेन साक्षिचिदाश्रयत्वाभावेन च । कथं प्रमाश्रयत्वमिति । प्रमा हि अज्ञाताविषयकस्वप्रकाशकज्ञानम् , स्मृतेः प्रमात्वाभावात् स्वप्रकाशत्वाभावे स्वयं सान्दिग्धत्वेन विषयभासकत्वाभावात् । तथा चाज्ञातं घटादिकं ज्ञात्वा तत्प्रमाजननाय चक्षुर्व्यापारादौ यदा मनः प्रवर्तते, तदा तस्याज्ञातघटादिज्ञातृत्वमनुपपन्नम् , साक्षिण एव तत्सम्भवात् । तदुक्तं विवरणे-'अज्ञाततया ज्ञाततया च सर्वं साक्षिभास्य'मिति । एवं मनसोऽपि घटादिविषयकस्वप्रकाशज्ञानाश्रयत्वमनुपपन्नम् । तथा चाज्ञातघटादिज्ञानाश्रयत्वेनापि मनसः (१)प्रमातृत्वानुपपत्तिः । 'प्रमिणोमी'ति धीविषयस्य ज्ञानाश्रयत्वस्य चानुपपत्तिः । न च चिद्रूपे ब्रह्मणि घटादेरिव मनसोऽपि तादात्म्येनाध्यासात् घटाद्याकारानिर्गतमनसो वृत्त्या घटादिचैतन्यस्य मनोऽवच्छिन्नत्वसम्पत्त्या घटादिविषयकस्वप्रकाशकचिदाश्रयत्वं मनसः सम्भवतीति वाच्यम् । मनसो ज्ञानतादात्म्येऽपि ज्ञानाश्रयत्वासम्भवात् । न ह्यधिष्ठानाश्रयत्वमारोप्ये क्वापि दृष्टम् । (२)+ईशस्य जीवस्य वा जगदुपादानत्वे-

नारायणी ।

अविद्याप्रयुक्तत्वात् । अविद्याकृतप्रपञ्चविषयकत्वरूपावभासकताप्यविद्याकृतैवेतीन्द्रजालरूपैवेति भावः । ननु यद्यतिरिक्तः साक्ष्येव प्रमा तदाऽन्तःकरणस्य प्रमातृत्वमनुपपन्नं तस्य सर्वाधिष्ठानसाक्ष्याश्रयत्वानुपपत्तेरित्याशङ्कते--तथापीति । अतिरिक्तसाक्ष्यङ्गीकारेपीत्यर्थः । दृश्यस्य--साक्षिभास्यस्य, जडत्वेन—चिद्भिन्नत्वेन चिदाश्रयत्वाभावेन च कथं प्रमाया आश्रयत्वरूपं प्रमातृत्वं तद्वृत्तेः प्रमात्वानङ्गीकारात्साक्षि-

(१) प्रवृत्त्युपपत्तिर्न सम्भवति प्रमिणोमीत्यादिः घपुस्तके ।

(२)+ ··· + चिह्नितः पाठो नास्ति घपुस्तके ।

चेन्न। दर्पणादिवत्स्वच्छत्वेन चित्प्रतिबिम्बग्राहकत्वा-
च्चित्तादात्म्याध्यासाद्वा। ननु नीरूपस्य निरवयवस्य

न्यायरत्नावली।

ऽप्येवमिति भावः+। स्वच्छत्वेन—प्रतिबिम्बसम्बन्धयोग्यत्वेन, चित्प्रतिबिम्बग्राहकत्वात्—साक्षिप्रतिबिम्बवत्त्वात्। तथा च साक्षिरूपज्ञानाधारत्वं मनस उपपन्नम्। प्रतिबिम्बत्वं हि मुखादेर्दर्पणादौ(१) अन्तराश्रितत्वम्, दर्पणस्यान्तर्मुखमस्तीत्यनुभवात्। तद्दृष्टान्तेन साक्षिणा मनस्यन्तराश्रितत्वम्, विशिष्टरूपेणाध्यासकल्पनात्। नन्वन्तराश्रितत्वसम्बन्धमात्रेण साक्षी मनोभासको न स्यात्, तादात्म्यस्यैव घटादौ साक्षिभास्यतानियामकत्वेन कल्पनत्वात्। (२) *अपि च साक्षितादात्म्यं विना अज्ञातघटादिप्रमार्थं मनसः प्रवृत्त्यनुपपत्तेरित्युक्तम्*। 'अहमि'ति प्रत्यये साक्षिमनसोस्तादात्म्यस्य भानं सर्वानुभाविकं च तत्राह—चित्तादात्म्याध्यासादिति। साक्षितादात्म्याध्यासादित्यर्थः। 'अविद्योपहितेऽहङ्कारोऽध्यस्यते, तदुपहिते कामादयः, तद्विशिष्टे स्थूलशरीर'मित्यादेः वक्ष्यमाणत्वात् अविद्योपहितसाक्षिणः (३)विशेषरूपेणाधारत्वेन भ्रमे स्फुरणम्, 'अज्ञोऽहमि'ति प्रत्ययात्। शुद्धचित्तु सर्वदृश्यानधिष्ठानमेव नाधार इति न विरोधः। 'इदं रजत'मित्यादिभ्रमे हि इदमादेराधारत्वेन रजतताद्यात्म्येन स्फुरणे-

नारायणी।

णश्च तद्गुणत्वाभावादिति भावः। स्वतोऽसंभवेपि प्रतिबिम्बवैशिष्ट्येन संभवत्येवेत्याह—दर्पणेति। स्वच्छत्वेन—प्रतिबिम्बसम्बन्धयोग्यत्वेन, चिद्बिम्बेति—साक्षिप्रतिबिम्बवत्त्वादित्यर्थः। प्रतिबिम्बवत्त्वेप्यहं जानामीत्येकत्वेन कथं प्रत्ययस्तत्राह—चित्तादात्म्येति। प्रतिबिम्बात्मकचित्तादात्म्यभ्रमादित्यर्थः। नन्वात्मनः प्रतिबिम्ब एव कथं क्लृप्तसामग्र्यभावात्, तथाहि स्वाभिमुखोपाध्यभिहतैश्चक्षूरश्मिभिः परावृत्तैश्चाक्षुषद्वारा ग्री-

(१) दर्पणादाविव इति घपुस्तके। (२)*.....* चिह्नितः पाठो नास्ति घपुस्तके।
(३) विशेष्यत्वरूपेणाधारत्वेनेति घपुस्तके।

कथं प्रतिबिम्ब इति चेत्, कात्रानुपपत्तिः ? विभ्रमहेतूनां विचित्रत्वात्। जपाकुसुमरूपस्य (१)नीरूपस्यापि स्फ

न्यायरत्नावली।

ऽपि शुक्तित्वादिविशिष्टस्याधिष्ठानस्य यथा अस्फुरणं तथा प्रकृतेऽपि। जीवेशयोर्मनोऽविद्याप्रतिबिम्बत्वपक्षे बिम्बचिदेव साक्षी, ईशस्य बिम्बत्वं जीवस्याविद्यायां प्रतिबिम्बत्वमिति पक्षे तु शुद्धचित्, वार्तिकमते तु अविद्याचिदाभासरूप (२)ईशस्साक्षीति पक्षत्रयं मूले वक्ष्यते। (३)तथाप्यविद्यायां तद्वृत्तौ वा प्रतिबिम्बितः जीवः साक्षीति पक्षान्तरमद्वैतसिद्धावुक्तम्। सर्वथापि साक्षिण एव ज्ञानत्वात्तस्यैव मनसि प्रतिबिम्बितत्वेन मनसो ज्ञानाश्रयत्वम्, तत्र मनस्तादात्म्याध्यासेन मनोभासकत्वं च बोध्यम्। उक्तानां त्रयाणां पक्षाणां मध्ये आद्ये असाक्षिणो जगदुपादानत्वे साक्षिणस्तद्वारा मनस्तादात्म्यम्। द्वितीये साक्षिण एव जगदुपादानत्वे(४) साक्षादेव तत्, अन्यथा तूपादानद्वारा। तृतीये तु साक्षिण एव जगदुपादानत्वात् साक्षादेव तत्। वस्तुतस्तु यत्पक्षे यस्साक्षी तदेवोपादानम्, अधिष्ठानस्यैवाध्यासिकतादात्म्येन भासकत्वात् अतस्साक्षादेव तादात्म्यम्। निरवयवस्येति। साक्षिण इति शेषः। विचित्रत्वात्—एकविधत्वाभावात्। सरूपस्येव नीरूपस्यापि प्रति-

नारायणी।

वास्थत्वाद्यग्रहादिदोषे सति बिम्बेऽभिमुखोपाध्यन्तर्गतत्वारोपरूपो 'मम मुखं दर्पणान्तर्गत'मित्यात्मकः प्रतिबिम्बभ्रमो जन्यते, तत्र बिम्बचाक्षुषं रूपाधीनम्, उपाधेराभिमुख्यं च सावयवत्त्वाधीनम्, अतः कथमात्मनः प्रतिबिम्बः रूपाभावादवयवाभावाच्चेत्याशङ्क्य ते—नन्विति। सरूपसावयवस्येव निरूपनिरवयवस्यापि प्रतिबिम्बदर्शनेन सामग्रीभेदस्यावश्यवक्तव्यत्वान्नात्मनः प्रतिबिम्बेऽनुपपत्तिलेशोपीत्याह काक्षा—कात्रेति। न कापीत्यर्थः। हेतुमाह-विभ्रमेति। विचित्रत्वान्नानाविधत्वात्। नानाविधत्वं समर्थयत्

(१) नीरूपस्य निरवयवस्यापीति घपुस्तके। (२)—चिदाभासरूपम्, ईशः इति गपुस्तके।
(३) तथापीति नास्ति घपुस्तके। (४) जगदुपादानत्वादिति गपुस्तके।

टिकादौ प्रतिबिम्बदर्शनाच्छब्दस्यापि प्रतिशब्दाख्य-
प्रतिबिम्बोपलम्भात्तयोः सम्प्रतिपन्नप्रतिबिम्बवैलक्ष-

न्यायरत्नावली।

बिम्बभ्रमरूपकार्योपलम्भात् सरूपस्थलीयकारणाद्विलक्षणं कारणं नीरूपस्थले कल्प्यत इति भावः। (१)ननु प्रतिबिम्बस्य सरूपसावयवत्त्वेन प्रतीतिः रूपावयवाविशिष्टस्यैव हि मुखादेर्दर्पणाद्युपाध्यन्तर्गतत्वमारोपितं प्रतिबिम्बशब्देन व्यवह्रियते, तथा च कथं नीरूपादेः प्रतिबिम्बोक्तिस्तत्राह-जपाकुसुमेत्यादि। प्रतिशब्दाख्यप्रतिबिम्बेति। मठमध्यस्थपुरुषक(२)र्णावच्छिन्नत्वेन उपलभ्यमानशब्दस्य मठान्तरुपरिभागावच्छिन्नाकाशरूपोपाध्यन्तर्गतत्वेन प्रतीयमानत्वात् प्रतिबिम्बत्वमस्तीति प्रतिबिम्बीभूतशब्दबोधिका प्रतिशब्द इत्याख्या यस्येत्यर्थः। तथा च प्रतिबिम्बस्य सरूपसावयवत्त्वेनैव धीरिति न नियमः, किन्तूपाध्यन्तर्गतत्वरूपप्रतिबिम्बत्वेनैवेति भावः। सम्प्रतिपन्नप्रतिबिम्बेति। प्रति-

नारायणी।

रूपादिघटितसामग्र्या व्यभिचारमाह-जपेति। निरूपस्य-गुणानां गुणशून्यत्वेन रूपरहितस्य, निरवयवस्य-द्रव्यत्वाभावाप्रयोज्यावयवरहितस्य। प्रतिबिम्बदर्शनात्-उपाध्यन्तर्गतत्वारोपरूपप्रतिबिम्बदर्शनात्। तथा च स्फटिक एव तत्र व्यभिचार इति भावः। ननु साक्षात्परम्परासाधारणसम्बन्धेन रूपं हेतुः, रूपे च परम्परया धर्मिगतरूपादिकमस्ति अतो न व्यभिचार इत्यत आह-शब्दस्यापि इति। प्रतिशब्देति-बिम्बोपाधिका प्रतिशब्देत्याख्या यस्येत्यर्थः। प्रतिबिम्बोपलम्भादिति। मठमध्यस्थपुरुषकण्ठावच्छिन्नस्य मठोपरिभागावच्छिन्नत्वेन प्रतीत्येति भावः। नन्वरुणः स्फटिक इति भ्रमः पीतः शङ्ख इत्यनेन समानः, शब्दस्थले तु प्रतिध्वनिरूपं शब्दान्तरमेव जायते ऽतः कथं तदनुसारेण सामग्रीभेदकल्पनं तत्राह-तयोरिति। रूपशब्दप्रतिबिम्बयोरित्यर्थः। सम्प्रतिपन्नेति। प्रतिबिम्बत्वेन सर्वसम्मतमुखादिप्रतिबिम्बवैलक्षण्यप्रतीतेरित्यर्थः। उपाध्यन्तर्गतत्वरूपारोपितधर्मवि-

(१) न तु इति पाठः प्रामादिको गपुस्तके। ननु प्रतिबिम्बस्य सरूपसावयवत्त्वेनैव प्रतीतिः इति घपुस्तके। (२)—पुरुषकण्ठावच्छिन्नत्वेन इति घपुस्तके।

ण्यानिरूपणात्। तथापीन्द्रियग्राह्यस्यैव प्रतिबिम्ब इति चेन्न। व्यभिचारात्। अनिन्द्रियग्राह्यस्य साक्षिप्रत्यक्ष-

न्यायरत्नावली।

बिम्बत्वेन सर्वसम्मतमुखादिप्रतिबिम्बेत्यर्थः। दर्पणाद्यन्तर्गतत्वेन भ्रमो यावद्दर्पण(१)सन्निधानं तदनुवृत्तिश्च मुखादिप्रतिबिम्बेऽस्ति, जपारूपादावपि स्फटिकाद्युपाध्यन्तर्गतत्वभ्रमो यावत् स्फटिकादुपाधिसान्निधानं तदनुवृत्तिश्चेति स्फटिकादौ प्रतीयमानजपाकुसुमरूपादेः (२)मुखादिना साम्यमेव, न तु तस्य ततो वैलक्षण्यं निरूपयितुं शक्यमिति भावः। शङ्कते—तथापीति। नीरूपादेः प्रतिबिम्बस्वीकारेऽपीत्यर्थः। प्रत्यक्षस्येति—साक्षिभास्यस्येत्यर्थः। ननु नभसः मुखादिवत् साक्षिभास्यत्वे अन्धस्यापि नभस्साक्षात्करोमीति व्यवहारः स्यादिति चेत्, स्यादेव। जाग्रत्स्वप्नयोर्हि भासमानमूर्तावच्छिन्नतया नभो भासत एव। ननूर्ध्वं व्यापृतचक्षुषो यावति नभोभागे संयोगो जायते तावानेव स भासते तस्मात् नभश्चाक्षुषमिति प्राभाकरमतं न युक्तम्। किञ्च घटादौ भासमाने तदवच्छिन्नमेव नभो भातीति कुतस्सम्पूर्णमेव नभो भायात्। नभसश्चाक्षुषत्वे तु घटादाविव नभस्यपि यावति भागे चक्षुषस्संयोगः तावानेव स भासत

नारायणी।

शिष्टबिम्ब एव प्रतिबिम्बः, तादृशं च मुखमिव जपाकुसुमरूपशब्दादिकमपि प्रतीयत एवेति न तयोः प्रतिबिम्बत्वे सङ्कोचतेति भावः। ननु चक्षुर्योग्यत्वस्य व्यभिचरितत्वेऽपि बहिरिन्द्रिययोग्यत्वस्याव्यभिचरितत्वात्कथं बहिरिन्द्रियायोग्यस्यात्मनः प्रतिबिम्ब इत्यभिप्रेत्याशङ्कते—तथापीति। रूपादीनामनपेक्षायामपीत्यर्थः। अयमपि नियमो न युक्तो व्यभिचारादित्याह—नेति। व्यभिचारस्थलमाह—अनिन्द्रियेति। इन्द्रियाग्राह्यस्येत्यर्थः। साक्षिप्रत्यक्षस्य—साक्ष्येव प्रत्यक्षं यस्येति, साक्षिभास्यस्ये-

(१) दर्पणोपाधिसन्निधानं तदनुवृत्तिश्चेति स्फुटं मुखादीत्यादिः घपुस्तके।

(२) दर्पणादौ प्रतीयमानमुखादिना इति घपुस्तके।

स्याकाशस्यापि जलादौ प्रतिबिम्बोपलम्भात् । अन्यथा

न्यायरत्नावली ।

इति युक्तमिति चेन्न । यथा हि कालस्य साक्षिबोध्यत्वेऽपि भासमानघटाद्यधिकरणरू(१)पकाल एव तदा घटाद्याकारवृत्तेर्घटाद्यधिकरणक्षणावरणविरोधित्वस्वीकारेण तस्यैवानावृतसाक्षिसम्बन्धात्, तद्भानेनैव 'इदानीं घटः, इदानीं पट' इत्यादिप्रत्ययोपपत्तेश्च । (२)परोक्षज्ञानत्वे तु अतीतानागतक्षणानां वृत्तिविषयत्वस्वीकारादेव सर्वप्रत्ययेषु (३)विषयाधिकरणस्वक्षणविषयत्वनियमोपपत्तेश्च, तथा नभसस्साक्षिबोध्यत्वेपि भासमानघटाद्यवच्छिन्नस्यैव तस्य तद्घटाद्याकारवृत्तेरेव घटाद्यवच्छिन्नाकाशावरणविरोधित्वेन तस्यैवानावृतसाक्षिसम्बन्धात्तावतैव (४)घटाकाशः पटाकाश इत्यादिप्रत्ययोपपत्तेश्च । ऊर्ध्वं व्यापृतेन तु चक्षुषा यावानेवालोकभागो गृह्यते तावदवच्छिन्नाकाशं साक्षिणा गृह्यते । अन्धेनापि त्वचा गृह्यमाण एव घटादौ तदवच्छिन्नं नभः साक्षिणैव गृह्यते । यदि च तेन तमो गृह्यते, तदा तदवच्छिन्नं नभोऽपि । एवं मनसि गृह्यमाणे तदवच्छिन्नं नभोऽपि, शरीरस्यान्तर्बहिराकाशस्य प्रतीतेः । यदि च तमआद्यवच्छिन्नं नभो न प्रतीयत इत्यनुभवः तदा घटाद्याकारेन्द्रियजन्यमनोवृत्त्यभिव्यक्तसाक्षिभास्यं तदास्ताम् । नन्वाच्छादितमुखे घटादौ गृह्यमाणे तदन्तराकाशं साक्षिणा गृह्यतामिति चेन्न । अन्तर्भागस्येन्द्रियाद्यसंयुक्तत्वेन तत्र साक्षिणोऽनभिव्यक्ततया तदवच्छिन्नाकाशस्याभिव्यक्तसाक्षिसम्बन्धाभावात् । तस्मा-

नारायणी ।

त्यर्थः । बहिरिन्द्रियग्राह्यस्येति वक्तव्ये इन्द्रियग्राह्यस्येति सामान्योक्तिर्मनस इन्द्रियत्वाभावमभिप्रेत्य । प्रतिबिम्बानङ्गीकारेऽनिष्टमाह-अन्यथेति ।

(१)—करणक्षणरूपः काल एव तथा, घटाद्याकारवृत्तेरित्यादिः घपुस्तके ।
(२) परोक्षज्ञानेप्यतीतेत्यादिः घपुस्तके । (३) विषयाधिकरणकालविषयत्वेत्यादिः गपुस्तके ।
(४) घटाद्याकाशं पटाद्याकाशमित्यादीत्यादिः गपुस्तके ।

(१) जानुमात्रेऽप्युदके अतिगम्भीरप्रतीतिर्न स्यात् ।
(२) आकाशप्रतिबिम्बस्य साक्षिभास्यत्वेपि अधिष्ठान-

न्यायरत्नावली ।

दाकाशाकारमनोवृत्तिं विनापि यदेशावच्छेदेन साक्ष्यभिव्यक्तस्त-देशावच्छिन्ननभसस्तद्ग्राह्यतेति भावः । जानुमात्रेऽप्युदकेऽति-गम्भीरप्रतीतिरिति । जानुमात्रपरिमाणापेक्षयाऽधिकपरिमा-णविशिष्टस्याकाशभागस्य जानुमात्रोदकान्तर्गतत्वेन प्रतीतिरि-त्यर्थः । जानुद्वयादिपरिमिते जले अन्तर्गततया यावत आकाश-भागस्य धीस्तावतो जानुमात्रजलेऽपीति तदन्यथानुपपत्त्या तत्रो-परिस्थितस्य तावत आकाशस्य प्रतिबिम्बत्वमवश्यं वाच्यमिति भावः । ननूक्तव्यभिचारोक्तिर्न युक्ता, नभसोऽपि चाक्षुषत्वात् । चक्षुषा हि जलाभिहतेन नभो गृहीत्वा तत्र जलान्तर्गतत्वमारो-प्यते, अन्यथा 'जानुद्वयादिपरिमितमाकाशमस्मिन्नुदकेऽन्तर्गत'-मिति भ्रमे चक्षुस्संयोगापेक्षा न स्यात्, उक्तभ्रमे आकाशस्य अधिष्ठानत्वेन अधिष्ठानज्ञानार्थं चक्षुरपेक्षेत्यस्य वक्तुमशक्यत्वात् । तथा च निमीलितचक्षुषोऽपि पुंसः स स्यात् तत्राह—प्रतिबिम्ब-स्येत्यादि । अधिष्ठानग्रहणार्थमिति । (३)अधिष्ठानसामा-

नारायणी ।

अतिगम्भीरेति । जानुमात्रपरिमाणापेक्षयाऽधिकपरिमाणविशिष्टस्याकाशस्य जानुमात्रोदकान्तर्गतत्वेन प्रतीतिरित्यर्थः । परिमितापेक्षयाऽधिकबुद्धि-रधिकस्यान्तर्गतत्वारोपं विना बाधितैवेति भावः । तथाच तादृशस्यापि नियमस्यात्रव व्यभिचार इति भावः । ननु यदि बिम्बस्य नेन्द्रियग्राह्य-त्वमपेक्षितं किन्तु यथाकथंचित् ज्ञानमात्रं तदाऽन्धादेरपि प्रतिबिम्बभ्रमा-पत्तिस्तत्राह–प्रतिबिम्बस्येति । उपाध्यन्तर्गतत्वरूपारोपितधर्मविशिष्टस्या-काशादेरित्यर्थः । अधिष्ठानग्रहणार्थम्–अधिष्ठानसामान्यांशज्ञाना-

(१) जानुदघ्नेप्युदके इति खपुस्तके ।

(२) प्रतिबिम्बस्य साक्षीत्यादिः खपुस्तके । आकाशप्रतिबिम्बस्य साक्षिभास्यत्वेपि सालोकस्य साभ्रस्य प्रतिबिम्बितत्वात् तद्ग्रहणार्थम् अधिष्ठानग्रहणार्थमित्यादिः गपुस्तके ।

(३) अधिष्ठानसामान्यांशस्य चाक्षुषार्थमित्यर्थः इति घपुस्तके ।

ग्रहणार्थं चक्षुषोऽपेक्षणात्। एतेन नीलं नभ इत्यादिविभ्रमेऽपि चक्षुरन्वयव्यतिरेकौ व्याख्यातौ। तत्र सालोकस्याकाशस्याधिष्ठानत्वात्। तस्माच्चाक्षुषबिम्बमेव रू-

न्यायरत्नावली।

न्यांशरूपस्य जलस्य चाक्षुषार्थमित्यर्थः। आकाशभागविशेषशून्यजलस्योक्तभ्रममूलीभूताज्ञानविषयत्वरूपमधिष्ठानत्वम्, अतस्तत्सामान्यांशरूपजलज्ञानस्योक्तभ्रमहेतुत्वात्तादृशज्ञानार्थं चक्षुरपेक्षणेऽपि नभसश्चाक्षुषत्वासिद्ध्योक्तव्यभिचारोक्तिर्युक्तैवेति भावः। नन्वेवमपि 'नीलं नभ' इत्यादिभ्रमे नभस एवाधिष्ठानत्वात्तच्चाक्षुषार्थतया चक्षुरपेक्षणं वाच्यम्, तथा च नभसस्साक्षिमात्रवेद्यत्वहानिः; उक्तभ्रमे चक्षुरनपेक्षणे तु निमीलितचक्षुषोऽपि स स्यात्तत्राह—एतेनेति। अधिष्ठानसामान्यांशभिन्नस्य साक्षिमात्रवेद्यत्वेऽप्युक्तांशज्ञानरूपस्य भ्रमकारणस्य निष्पत्तये चक्षुरपेक्षणमिति वचनेनेत्यर्थः। व्याख्यातौ—चक्षुषो भ्रमोपयोगिताग्राहकत्वेन सूचितौ। 'नीलं नभ' इति भ्रमश्चक्षुस्संयोगे सति भवति, असति च न भवतीत्यन्वयव्यतिरेकाभ्यां तादृशभ्रमकारणेऽधिष्ठानसामान्यज्ञाने चक्षुरपेक्षेति निर्णीयत इति भावः। ननु तथापि नभसश्चाक्षुषत्वमेवागतं तत्राह—तत्रेति। 'नीलं नभ' इति वाक्येन कथ्यमाने भ्रम इत्यर्थः। सालोकस्य—सालोकस्यैव। अधिष्ठानत्वात्—अधिष्ठानसामान्यांशरूपत्वात्। तथा च नभश्शब्देन सालोकं नभ

नारायणी।

र्थम्। तथा च बिम्बांशे ज्ञानमात्रमधिष्ठानांशे इन्द्रियजन्यमपेक्षितं तावतैवातिप्रसङ्गनिरासादिति दिक्। ननु कथं ताह 'नीलं नभ' इति विभ्रमोपपत्तिः भ्रमाधिष्ठानस्य नभसश्चक्षुरयोग्यत्वात् तत्राह-एतेनेति। अधिष्ठानसामान्यांशज्ञानार्थं चक्षुषोऽपेक्षेति वचनेनेत्यर्थः। चक्षुरिति। चक्षुःसंयोगे भ्रमस्तदभावे भ्रमाभाव इत्यन्वयव्यतिरेकौ व्याख्यातौ भ्रमोपयोगिताग्राहकत्वेन सूचितौ। कथं तत्राह-तत्रेति। 'नीलं नभ' इति वाक्येन कथ्यमाने भ्रम इत्यर्थः। सालोकस्य-आलोकविशिष्टस्य भ्रमकारणीभूताज्ञानविष-

पसापेक्षं नान्यदित्यवधेयम्। तथाप्यात्मनः प्रतिबिम्बे किं प्रमाणमिति चेत्, शृणु। 'रूपं रूपं प्रतिरूपो बभूव,

न्यायरत्नावली।

एव कथ्यत इति भावः। नन्वेवं सालोकाकाशस्यैव जले प्रतिबिम्ब इति वक्तुं शक्यत्वादिन्द्रियग्राह्यस्यैव प्रतिबिम्ब इति नियमे कथं व्यभिचार उक्तः? इति चेन्न। चक्षुरपेक्षणान्यथानुपपत्त्या नभोनैल्यभ्रमे सालोकाकाशस्यैव भानम्, जले आकाशप्रतिबिम्बभ्रमे तु सालोकनभसो नियमेन भाने मानाभावः तत्र चक्षुरपेक्षणस्य जलरूपाधिष्ठानग्रहणार्थत्वेनैवोपपन्नत्वादिति भावः। ननु यत्र यत्र प्रतिबिम्बभ्रमस्तत्र तत्रोपाधिना संयुक्तास्तेनाभिहताश्चक्षूरश्मयो बिम्बेन सह पश्चात्संयुज्य बिम्बे चाक्षुषमुत्पादयन्ति, पश्चाद् बिम्बे उपाध्यन्तर्गतत्वमारोप्यत इति क्रमनियमः, तथा च रूपं विना बिम्बभूतद्रव्यचाक्षुषाभावात्कथं नभसः प्रतिबिम्बत्वमुक्तं तत्राह-तस्मादिति। इन्द्रियग्राह्यस्यैव प्रतिबिम्ब इति नियमाभावादित्यर्थः। चाक्षुषप्रतिबिम्बं-चाक्षुषद्रव्यस्य प्रतिबिम्बम्। रूपसापेक्षम्-उक्तरीत्याऽपेक्षितबिम्बचाक्षुषजनकरूपमापेक्षम्। तथा च सर्वत्र प्रतिबिम्बभ्रमे नोक्तक्रमनियम इति नभःप्रतिबिम्बे (१)बाधकाभाव इति भावः। किं प्रमाणमिति। ननूक्तरीत्या प्रमाश्रयत्वान्यथानुपप-

नारायणी।

यत्वात्, तथाच नभःशब्देन सालोकं नभः कथ्यते, तत्र च आलोकांशः सामान्यांशस्तस्य चक्षुषा ज्ञानं सम्भावितमेवेति न तत्र व्यभिचार इति भावः। उपसंहरति-तस्मादिति। सर्वत्र भ्रमे रूपादीनां कारणत्वे व्यभिचारादित्यर्थः। चाक्षुषप्रतिबिम्बं-चाक्षुषपदार्थस्य प्रतिबिम्बं रूपसापेक्षं-साक्षात्परम्परया वा रूपसापेक्षं नान्यत्-न प्रतिबिम्बान्तरम्। अस्तु नीरूपनिरवयवस्यात्मनः प्रतिबिम्बे बाधकाभावस्तथापि साधकं तु किमिति पृच्छति शिष्यः-तथापीति। निरूपनिरवयवस्य प्रतिबिम्बोपपादने इत्यर्थः। किं मानम्? आकाशादीनामिवावश्यकं प्रमाणम्। रूपमिति। रूप्यतेऽहमिति

(१) बाधकाभावादिति गपुस्तके।

न्यायरत्नावली।

त्तिर्मनस आत्मप्रतिबिम्बवत्त्वे मानमित्यस्योक्तत्वात्कथं पुनर्मानप्रश्न इति चेत्, उच्यते। प्रमिणोमीत्यादिप्रत्यये प्रमातादात्म्यमेव भाति, न तु प्रमाश्रयत्वम्। भातु वा तदेव, तथापि प्रमाया अज्ञातविषयकज्ञानरूपत्वात् ज्ञानस्य चासत्त्वापादकाज्ञानविषयत्वाभावप्रयोजकविशिष्टचिद्रूपत्वात्तादृशचिद्रूपस्यैव ब्रह्मणीव मनस्यप्याश्रयत्वं कल्पितं स्वीक्रियते। अत एव 'आनन्दो विषयानुभवः नित्यत्वं चेति सन्ति धर्मा अपृथक्त्वेऽपि चैतन्यात्पृथगिवावभासन्त' इत्यादिपञ्चपादीयुक्त्या निर्धर्मकब्रह्मणो धर्मो देहादौ कथमध्यस्यत इति पूर्वपक्षस्समाहितः। तथा च तत एव 'ब्रह्मणि ज्ञान'मितिवत् 'मयि ज्ञानम्, अहं ज्ञानवा'नितिव्यवहारः। न च अहं जानामीतिवद्घटो जानाती'ति व्यवहारः स्यादिति वाच्यम्। (१)उक्ताज्ञानविरोधिविशिष्टचिद्रूपज्ञानस्य ब्रह्मधर्मस्य देहमनसोरेव संसर्गाध्यासात् पूर्वपूर्वतदध्यासंस्काररूपकारणस्य तयोरेव सम्भवेन तयोरेव तदध्यासस्वीकारादुक्तज्ञानसमानाधिकरणतदनुकूलव्यापारविशेषस्यैवोक्तव्यवहारविषयत्वेन तस्य घटादावसत्त्वात्। तथा (२)चासत्त्वापादकाज्ञानविरोधिविशिष्टरूपेण चितो मनआश्रितत्वस्वीकारेऽपि साक्षिणो मनस्यन्तर्गतत्वरूपप्रतिबिम्बितत्वे न मानम्। अत एव वाचस्पतिमते तन्न स्वीक्रियत इति श्रुतेरेव तत्र मानतां वक्तुं किं प्रमाणमिति प्रश्नोपन्यासः। रूपामिति। रूप्यते अहमिति धिया व्यवह्रियते आत्मा येन मनसा तत् (३)रूपम्, रूपं रूपं प्रति प्रतिरूपः। प्रतिबिम्बशब्दस्येव बिम्बस्वरूपार्थकरूपपदान्तकस्य प्रतिरूपशब्दस्यापि प्रतिबिम्बार्थकत्वात्। 'स पक्षी भूत्वा पुरः पुरुष आविशदि'ति पूर्ववाक्येन मनोरूपासु पूर्षु तदन्तर्गतत्वरूपस्य प्रवेशस्योक्तत्वात्तदुक्त-

(१) उक्तरूपज्ञानस्य ब्रह्मधर्मस्य देहमनसोरेव संसर्गाध्यासात् संस्काररूपकारणस्यानयोरेव सम्भवेन इत्यादिः घपुस्तके। (२) तथाचोक्तज्ञानत्वविशिष्टरूपेणेति घपुस्तके।

(३)—तत् रूपं रूपं प्रतिरूपः इति सर्वत्र सङ्कुचितः पाठः युक्तत्वादत्र वर्धितोऽस्माभिः।

तदस्य रूपं प्रतिचक्षणाय, मायाभासेन जीवेशौ करोती'-त्यादिश्रुतिः 'एकधा बहुधा चैव दृश्यते जलचन्द्रवदि'ति

न्यायरत्नावली ।

रेण 'तदेतदृषिः पश्यन्नवोचद् रूपं रूपं प्रतिरूपो बभूवे'तिवाक्येनोक्तप्रवेशस्यैवोक्तेर्युक्तत्वात्। तादिति । प्रतिबिम्बात्मकमित्यर्थः । प्रतिचक्षणाय—अहमित्यादिव्यवहाराय । माया—अविद्या, आभासेन—स्वगतप्रतिबिम्बेन, जीवेशौ—प्रतिबिम्बबिम्बरूपौ, करोति—सर्वान्प्रति व्यवहारयति । जीवविषयकव्यवहारस्याभासप्रयुक्तत्वं स्फुटमेव । ईशविषयकस्यापि व्यवहारस्य तदस्त्येव । (१)जीवत्वोपहिताचिद्रूपस्य आभासप्रयुक्तत्वेन ईशप्रयुक्तस्येशविषयकव्यवहारस्येशद्वारा आभासप्रयुक्तत्वसम्भवात् । इत्यादिश्रुतिरित्यादिपदेन—

यथा ह्येको ज्योतिरात्मा विवस्वा-
नपो भिन्ना बहुधैकोऽनुगच्छन् ।
उपाधिना क्रियते भेदरूपो
देवः क्षेत्रेष्वेवमजोऽयमात्मा ॥

इत्यादिश्रुतयो ग्राह्याः । एकधेत्यादि । परमार्थत एकरूप एवात्मा, तथाप्युपाधिप्रतिबिम्बितबहुप्रकारैर्दृश्यते प्रतीयते, जलप्रतिबिम्बितनानाप्रकारैश्चन्द्र इवेत्यर्थः ।

नारायणी ।

धिया व्यवह्रियते येनान्तःकरणेन तद्रूपम्, रूपं रूपं प्रत्यन्तःकरणं प्रतिरूपः प्रतिबिम्बरूपः, तद्रूपं प्रतिबिम्बात्मकम् अस्य परमात्मनः प्रतिचक्षणाय अहमिति व्यवहाराय । श्रुत्यन्तरम्—जीवेशाविति । आभासेन-स्वगतप्रतिबिम्बेन, करोति-सर्वान्प्रति व्यवहारयति । इत्यादिश्रुतिः-साक्षात्प्रतिबिम्बार्थकश्रुतिः । आदिना—

यथा ह्येको ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन् ।
उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेव मजोयमात्मा ॥

इत्यादिपरिग्रहः । एकधा-एकप्रकारः, बहुधा-बहुप्रकारः, दृश्यते-

(१) बिम्बत्वोपहितचिद्रूपस्येशस्याभासेत्यादिः घपुस्तके

स्मृतिः । 'स एष इह प्रविष्ट आनखाग्रेभ्यः' स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत, तत्सृष्ट्वा तदेवानुप्राविश'दित्यादिप्रवेशश्रुत्यर्थापत्तिः, 'आभास एव च, अत एव

न्यायरत्नावली ।

एक एव तु भूतात्मा भूते भूते व्यवस्थितः ।

इति पूर्वार्धम् । तदित्यादि । तत् जगत् सृष्ट्वा ब्रह्म तदेव जगत् अनुप्राविशदित्यर्थः । यद्यप्यविद्यायां मनसि च प्रतिबिम्बरूपः प्रवेशः, न तु शरीरघटादौ;(१) तथाप्यविद्यामनस्तद्वृत्तिद्वारा सर्वत्र दृश्ये प्रवेशः । अतीन्द्रियार्थेष्वपीश्वरीयमायाद्वृत्तिविशिष्टरूपेषु प्रतिबिम्बत्वरूपप्रवेश इति बोध्यम् । न चैवमीश्वरीयमायाद्वृत्तिद्वारैव सर्वत्र प्रवेशसम्भवात् मनस्तद्वृत्तिषु प्रवेशस्य प्रकृतश्रुतिबोध्यत्वे मानाभाव इति वाच्यम् । 'रूपं रूप' मित्यादिश्रुत्या–

पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः ।
पुरः स पक्षी भूत्वा पुरः पुरुष आविशत् ॥

इत्यादिपूर्विकया मनःप्रवेशस्यैव प्रतीतेः । 'स एष इह प्रविष्ट आनखाग्रेभ्य' इत्यादिपूर्विकया 'प्राणश्चेव प्राणो नाम भवति वदन्वाग्गि' त्यादिश्रुत्या च तथैव प्रतीतेः । श्रुत्यर्थापत्तिः–श्रुतेर-

नारायणी ।

प्रतीयते । उपाधौ प्रतिबिम्बितः सन्निति शेषः । दृष्टान्तमाह–जलचन्द्रवदिति । यथा वस्तुत एक एव चन्द्र उपाधौ प्रतिबिम्बितः सन्नानाकार उपलभ्यते । 'एक एव तु भूतात्मा भूते भूते व्यवस्थित' इति पूर्वार्धम् । श्रुत्यन्तरमाह–स एष इति । स एषः परमात्मा इह–ब्रह्मादिस्तम्बपर्यन्तेषु देहेषु प्रविष्टः–प्रतिबिम्बीभूतः । स एष इति सामानाधिकरण्याज्जीवात्मना प्रविष्ट इति लभ्यते । आनखाग्रेभ्यः–नखाग्रं मर्यादीकृत्य । सकलदेहावच्छेदेनैवाहमित्यभिमानादित्थमुक्तम् । श्रुत्यन्तरमाह–तदिति । तदाकाशादिकार्यम्, सृष्ट्वा–उत्पाद्य, तदेव–आकाशादिकार्यमेव, अनुप्राविशत्–तदन्तर्गतत्वेनाभिव्यक्तो बभूव । प्रवेशश्रुत्यर्थापत्तिः––प्रवेशश्रुतेरन्यथानुपपन्नत्वधीः । साव-

(१) न तु शरीरघटादाविति । तेषां स्वच्छत्वाभावेनेति भावः ।

चोपमा सूर्यकादिव'दित्यादिसूत्राणि च तत्र तत्र मा-

न्यायरत्नावली।

न्यथानुपपन्नत्वधीः। प्रवेशबोधनमात्रेण न मनसि प्रतिबिम्बलाभः, अधिष्ठानतयापि प्रवेशसम्भवात्; परन्तु घटादावप्यधिष्ठानतया प्रवेशसम्भवान्नखाग्रपर्यन्तप्रवेशस्य मनस्येवोक्तेः प्रतिबिम्बत्वरूप-मनोन्तर्गतत्वरूपप्रवेशविशेषतात्पर्यकत्वं विनाऽनुपपन्नत्वग्रहालक्षण-या तादृशप्रवेशबोधनमिति भावः। 'आभास एव चे'त्यस्य द्वितीयाध्यायतृतीयपादस्थसूत्रस्यायमर्थो भाष्योक्तः-'आभास एव च एष जीवः परस्यात्मनो जलसूर्यकादिवत्प्रतिपत्तव्यः न स एव साक्षात्। नापि वस्त्वन्तरम्। ततश्च यथा नैकस्मिन् जलसूर्यके कम्पमाने जलसूर्यकान्तरं कम्पते एवमेकैकस्मिन् जीवे कर्मफलसम्बन्धिनि जीवान्तरस्य न तत्फलसम्बन्ध' इति। 'अत एव चोपमा सूर्यकादिवदि'ति तृतीयाध्यायद्वितीयपादस्थसूत्रस्यायं भाष्योक्तार्थः-'यत एकोयमात्मा निर्विशेषचिद्रूपो 'नेति नेती'त्यादिश्रुतिप्रमितः, अत एवापारमार्थिकीं विशेषवत्तामभिप्रेत्य जलप्रतिबिम्बितसूर्यवदित्युपमोपादीयते 'यथा ह्येको ज्योतिरात्मा विवस्वानि'त्यादिवाक्येष्विति। इत्यादीत्यादिपदेन 'अम्बुवदग्रहणा-

नारायणी।

काशद्रव्यान्तर्नयनरूपस्य प्रवेशशब्दार्थस्य निरवयवेऽसम्भवात्। प्रवेशपदस्य प्रतिबिम्बपरत्वमेवाद्रियत इति भावः।नायं श्रुत्यर्थः स्वकल्पितः किन्तु भगवद्बादरायणसंमत इति ज्ञापयितुं सूत्राण्युदाहरति-आभास एव चेत्यादि। अयमर्थः। आभास एवायं जीवः परमात्मनोऽवगन्तव्यो न स एव नापि वस्त्वन्तरम्, यथा जलसूर्यः-सूर्यप्रतिबिम्बः। सूत्रान्तरमुदाहरति-अत एवेति। यतोयमात्मा निर्विशेषः श्रुतिषु प्रमितः-अतएव सूर्यकादिवत्-सूर्यप्रतिबिम्ववत्, उपमा 'यथा ज्योतिरात्मे'त्याद्युपमा भवतीत्यर्थः। तत्रेवात्रापि बिम्बप्रतिबिम्बयोरभेद इति भावः। नन्वात्मनः प्रतिबिम्बः सत्यो मिथ्या वा? नाद्यः। प्रतिबिम्बस्य सत्यत्वानुपपत्तेः। नान्त्यः। मोक्षभागित्वानुपपत्तेरित्याशङ्क्य सिद्धान्ते मोक्षभागितायाः शुद्ध एव व्यवस्थापयिष्यमाणत्वा-

नानि। तस्य च प्रतिबिम्बस्य सत्यत्वमेवेति प्रतिबिम्ब-

न्यायरत्नावली।

त्तु न तथात्वम्, वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्, दर्शनाच्चे' ति सूत्राणि गृह्यन्ते। मूर्तसूर्यदेशापेक्षया दूरदेशस्थत्वं सूर्यप्रतिबिम्बोपाधेरम्बुनो गृहीतम्, तथा (१)मूर्तात्मदेशापेक्षया दूरदेशस्थत्वं च मनसो न दृष्टम्। अतो नात्मनो मनसि प्रतिबिम्बोदयः। उपमावाक्यं तु वृद्धिह्रासभाक्त्वं यथा जलगतसूर्यके प्रतीयते, तथा मनोगतमात्मनीति बोधयति, (२)न तु यथा जले सूर्यस्यान्तर्भावः सूर्यप्रतिबिम्बत्वम्, तथा मनस्यात्मन इत्याद्यसूत्रार्थः। 'अहं सुखी दुःखी'त्यादिप्रत्ययेष्वात्मनोऽन्तर्भावरूपं प्रतिबिम्बत्वमादायैव वृद्धिह्रासभाक्त्वमेव पूर्वोक्तोपमावाक्येन बोध्यते, न त्वन्तर्भावं त्यक्त्वा, उभयोर्विप्रकृष्टमूर्तप्रतिबिम्बस्य सन्निकृष्टामूर्तप्रतिबिम्बस्य च सामञ्जस्यादुपपन्नत्वात्, सन्निकृष्टामूर्ताकाशादेर्जलादाविव तादृशात्मनोऽपि अहङ्कारप्रत्ययेन मनस्यन्तर्भावसिद्धिः भ्रमहेतूनां नानाविधानामनुभवबलेन कल्पनादिति द्वितीयसूत्रार्थः। 'स पक्षी भूत्वा पुरः पुरुष आविश'दित्यादिश्रुत्या आत्मनो मनोन्तर्भावोक्तिदर्शनाच्चोक्तार्थः प्रामाणिक इति तृतीयसूत्रार्थः। ननु (३)'प्रतिबिम्बस्योपाध्यन्तर्गतत्वाविशेषाबिम्बरूपत्व'मिति विवरणकारादिमते मनःप्रतिबिम्बस्वरूपस्य चिद्रूपत्वादहमित्याकारधीविषयत्वं युक्तम्, 'तद्धियश्चेतनविषयकत्वात्प्रतिबिम्बस्वरूपमुपाध्यन्तर्गतमारोपितं मिथ्ये'ति वार्तिककारादिमते तु तस्य कथमहमित्याकारधीविषयत्वं तत्राह—तस्येत्यादि।

नारायणी।

[त्प्रकृते तच्चिन्तनमनतिप्रयोजनकमित्यभिप्रायेणोपेक्षते—तस्येति। प्रतिबिम्ब-

(१) तथा मूर्तत्वमात्मनः आत्मदेशापेक्षयेत्यादिः घपुस्तके।

(२) न तथात्वं यथा जले सूर्यस्यान्तर्भावरूपप्रतिबिम्बत्वमित्यादिः घपुस्तके।

(३) 'प्रतिबिम्बरूपं सत्यमिति' इति घपुस्तके।

वादिनः । मिथ्यात्वमेवेत्याभासवादिनः । स्वरूपे तु न विवाद एवेत्यन्यदेतत्।अचेतनाविलक्षणत्वन्तु श्रुतिसिद्धम् अनुभवसिद्धं च तस्मात्सिद्धमन्तःकरणस्य प्रतिबिम्बाध्यासद्वारा प्रमातृत्वम् । ननु अध्यासोऽपि नोपपद्यते ।

न्यायरत्नावली ।

श्रुतिसिद्धमिति । 'तदस्य रूपं प्रतिचक्षणाय' इत्यादिश्रुतिसिद्धमित्यर्थः । मिथ्यात्वपक्षेऽपि तस्याधिष्ठानीभूतचित्तादात्म्याध्यासाच्चेतनत्वमिति भावः । अनुभवसिद्धम्—अहं चेतन इत्याद्यनुभवसिद्धम् । एवं च मनसि चित्प्रतिबिम्बे श्रुत्यादिसिद्धे तत एव प्रमाश्रयत्वं तत्रोपपादनीयम् । प्रेमास्पदत्वनित्यत्वादेर्ब्रह्मधर्मस्य दृश्यमात्रे संसर्गाध्यासस्वीकारेऽपि देहमनसोरेव ज्ञानरूपब्रह्मधर्मसंसर्गाध्यास इति कल्पने मानाभावात् । वाचस्पतिमते त्वमूर्तस्य प्रतिबिम्बास्वीकारेऽपि स प्रामाणिक इत्याशयेनाह—तस्मादिति । चित्प्रतिबिम्बस्य प्रामाणिकत्वादित्यर्थः । प्रतिबिम्बेति । अविद्योपहितचित्प्रतिबिम्बेत्यर्थः । प्रमातृत्वं—प्रमाश्रयत्वम् । नन्वध्यासोऽपीत्यादि । मनसः प्रमातृत्वानुपपत्तेश्चि-

नारायणी ।

•स्य सत्यत्वं-बिम्बात्मतामादायाबाधितत्वम्, अनिर्वचनीयख्यात्यनुरोधेनातिरेक्यमादाय शुक्तिरजतादिवत्कल्पितत्वम्। अन्यदेतत्-विचारान्तरम्, प्रकृतविचारानर्हं तत्र शङ्काया अग्रे व्यवस्थापयिष्यमाणत्वादिति भावः । सत्यत्वमिथ्यात्वयोर्यदि न निर्णयस्तदेदंरूपात्सम्प्रतिपन्नप्रतिबिम्बाद्वैलक्षण्यसिद्धिः कथं ? तत्राह—अचेतनेति । अचेतनात् इदंरूपात् सुखादिप्रतिबिम्बात् विलक्षणत्वं-चित्स्वरूपत्वं श्रुतिसिद्धं-'योयं विज्ञानमय'इत्यादिश्रुतिसिद्धम् । श्रुतेस्तत्परत्वे विवदमानं प्रत्याह—अनुभवेति । अहं चेतन इति प्रतीतिसिद्धमित्यर्थः । उपसंहरति—तस्मादिति । चित्प्रतिबिम्बस्य चेतनत्वादिना प्रामाणिकत्वादित्यर्थः । प्रतिबिम्बाध्यासद्वारा—प्रतिबिम्बतादात्म्याध्यासद्वारा, प्रमातृत्वं-प्रमातृरूपता । अध्यासमूलकं प्रमातृत्वमुक्तम्, अध्यास एव तु कथं क्लृप्तसामग्र्यभावादित्यभिप्रेत्याक्षिपति—नन्विति । अपिशब्दादध्यासमूलकप्रमातृत्वासम्भवं समर्थयिष्यन्नादौ विकल्पयति—

तथा हि—आत्मनि वाऽनात्मा अध्यस्यते अनात्मनि वा आत्मा ? नाद्यः । तस्य निस्सामान्यविशेषत्वेन सर्वदा भासमानत्वेन सादृश्यादिरहितत्वेन चाधिष्ठानत्वासम्भवात् । नापि द्वितीयः । तस्य मिथ्यात्वाभ्युपगमात् ।

न्यायरत्नावली ।

त्प्रतिबिम्बाध्यासेन निरासो न युक्तः, अध्यासस्याप्यनुपपत्तेरित्यर्थः । निस्सामान्येत्यादि । आत्मनः स्वप्रकाशत्वेन सदा भानात्सादृश्यादिदोषहीनत्वाच्च नाधिष्ठानता । अज्ञातं हि दोषसंसृष्टमधिष्ठानं भवति । ननु चिद्रूपेणात्मा स्वप्रकाशः न तु पूर्णानन्दरूपेण, तथा चेदन्त्वेन ज्ञातापि शुक्तित्वेनाज्ञाता शुक्तिरिव सोऽधिष्ठानं स्यात् अत उक्तं-निस्सामान्यविशेषत्वेनेति । चिद्रूपः सामान्यांशः धर्मिणि भासमानत्वात् । पूर्णानन्दस्तु विशेषांश इति विभागस्याप्यध्यासत्वेन अध्यासमामान्यमप्रति न तस्योपपादकतेति भावः । तस्य—अनात्मनः । मिथ्यात्वाभ्यु-

नारायणी ।

तथाहीति । अध्यासे ज्ञातसामान्यधर्मवत्त्वम्-अज्ञातविशेषवत्त्वम् अधिष्ठानावरणम् आरोप्याधिष्ठानयोः सादृश्यम्, अधिष्ठानारोप्ययोर्भेदाग्रहश्च (१)दोषसामग्रो, न चैते निर्धर्मके आत्मनि सन्ति अतो नाध्यासस्सम्भव इत्याशयेनाह--निःसामान्येति । अधिष्ठानत्वासम्भवादित्यन्वेति । निर्गतौ सामान्यविशेषौ यस्मात्स निःसामान्यविशेषस्तस्य भावस्तत्त्वम्, सत्त्वपरिपूर्णानन्दत्वादिसामान्यविशेषधर्मरहितत्वं तेनेत्यर्थः । सत्त्वं--सामान्यधर्मः, परिपूर्णानन्दत्वं--विशेषधर्म इत्यादि सामान्यविशेषभावस्याप्याध्यासिकत्वादिति भावः । सर्वदा भासमानत्वेनवृत्तितदभावकालेऽपि स्वतः स्फूर्तिमत्त्वेन, निर्धर्मकत्वमेव सादृश्याभावे आदिपदोक्तदोषाभावे च हेतुर्बोध्यः, अधिष्ठानत्वासम्भवात्-अध्यासकारणीभूताज्ञानविषयत्वासम्भवात् । तस्य—अनात्मनः । मिथ्या-

(१) सादृश्यादीति मूलस्थेनादिपदेनोपात्तेषु अध्याससामग्रीघटकेषु दोषसामग्रीत्वमुक्तं टीकाकृता तन्मन्दम् । अपि तु दोषोऽप्यध्याससामग्रीत्वेनैव निर्वाच्यः तथैव सर्वत्र स्वीकारादिति ।

मिथ्यावस्तुनोऽधिष्ठानत्वे शून्यवादप्रसङ्गात्। तस्य च सत्यत्वे तदनिवृत्तेरनिर्मोक्षप्रसङ्गाच्च। न हि सत्यं क्वचिन्निवर्तते निवर्त्यमानं वा ज्ञानेन। श्रुतयश्च-'भिद्यते हृद-

न्यायरत्नावली।

पगमात्-सिद्धान्तिना स्वरूपतो मिथ्यात्वस्वीकारात्। मिथ्यावस्तुनः—मिथ्यास्वरूपस्य। शून्यवादप्रसङ्गात्-शून्यवादिनं प्रत्यापादितदोषप्रसङ्गात्+(१)सर्वस्य मिथ्यात्वे हि ज्ञानानां बाध्यबाधकत्वव्यवस्था न स्यात्+प्रमयैव भ्रमो बाध्यते। शून्यवादे च सर्वस्य मिथ्यात्वात् न प्रमास्तीति बाध्यबाधकभावो न कापीति दोष आपादितः। तस्य-अनात्मनः। अनिर्मोक्षेति। निःशेषसंसारोच्छेदाभावेत्यर्थः। निवर्तते-उच्छिन्नं भवति। ननु प्रपञ्चसत्यतामते घटादिकं दण्डादिप्रहारेणोच्छिद्यत एव तत्राह-निवर्त्यमानामिति। उच्छिद्यमानमित्यर्थः। सत्यमित्यनुषज्यते। तथा च सत्यं यत् तत् ज्ञानोच्छेद्यं न भवतीत्यर्थः। ननु सेतुदर्शना-

नारायणी।

त्वेति। स्वरूपतो बाधितत्वरूपमिथ्यात्वस्वीकारादित्यर्थः। ननु वस्तुगत्या बाधितस्यैव शुक्त्यादिवदधिष्ठानत्वमस्तु तत्राह--मिथ्यावस्तुन इति। बाधितवस्तुन इत्यर्थः। अधिष्ठानत्वे च-आत्माध्यासाधिष्ठानत्वे तु, शून्यवादप्रसङ्गात्-सर्वमिथ्यात्ववादप्रसङ्गात्। अध्यस्ताधिष्ठानयोर्द्वयोरपि मिथ्यात्वप्राप्तेरिति भावः। ननु मिथ्यात्वमनात्मनोऽसम्प्रतिपन्नमतो न दोषस्तत्राह--तस्येति। तस्य-अनात्मनः। चस्त्वर्थो विभिन्नक्रमः सत्यत्वे त्वित्यर्थः। तदनिवृत्तेः-तस्य अनात्मनः अनिवृत्तेः--अबाधात्, अनिर्मोक्षप्रसङ्गात्--परिपूर्णानन्दस्वरूपात्मनाऽनवस्थितिप्रसङ्गात्। मिथ्यावस्त्वेव बाध्यमित्यत्र युक्तिमाह--नहीति। सत्यं-परमार्थसद्रूपं त्रिकालाबाध्यम्, निवर्तते--बाधितं भवति। अबाध्यस्य बाध्यत्वायोगादिति भावः। ननु वर्तमानकालेऽबाधात्त्रकालिकबाधविधुरत्वे घटादेर्मुद्गरप्रहारादिना पापादेः प्रायश्चित्तज्ञानादिना नाशदर्शनात् कथं सत्यं न निवर्तते—तत्राह निवर्त्यमानं वेति। नश्यमानं चेत्यर्थः। ज्ञानेन—अधिष्ठानसा-

(१)+ ··· + चिह्नद्वयमध्यगः पाठो घपुस्तके नास्ति।

यग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि त-

न्यायरत्नावली।

दिना पापादिकं सत्यमुच्छिद्यत एव परमत इति चेन्न। ज्ञानशब्दस्य स्वप्रयोजकाज्ञानसमानविषयकज्ञानार्थकत्वात्। तथा च यदसत्यं तत् स्वप्रयोजकाज्ञानसमानविषयकज्ञानेनोच्छिद्यत इत्यर्थः। स्वपदं ज्ञानपरम्। तादृशश्च ब्रह्मज्ञानमेव। भिद्यत इत्यादि। हृदयस्याहङ्कारचित्तादात्म्याध्यासस्य ग्रन्थिरिव मूलीभूतमज्ञानम् भिद्यते विदार्यते आवरणशक्तिमुच्छिद्य भोगसमाप्तिपर्यन्तं विक्षेपशक्तिमात्रविशिष्टं स्थाप्यते। शक्तिद्वयानङ्गीकारे अज्ञानस्वरूपमुच्छिद्य तत्कार्यसंस्कारदेहादिमात्रं स्थाप्यत इत्यर्थः। सर्वसंशयाः—आत्मा कर्ता न वा? अकर्तापि भोक्ता न वा? अभोक्तापि ब्रह्म न वेत्यादिसंशयाः। छिद्यन्ते—भिद्यतेआवरणशक्तिरूपमूलोच्छेदादुत्पत्त्ययोग्याः क्रियन्त इति यावत्। कर्माणि—अभुज्यमानानि पूर्वसञ्चितपापपुण्यानि। क्षीयन्ते(१) *उपादानीभूतविक्षेपशक्तिविशिष्टाज्ञानसत्त्वपर्यन्तं विद्यमानान्यपि* स्वाश्रये मनसि सुखादिकं न जनयन्ति। 'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः

नारायणी।

क्षात्कारेण, सत्यं दृष्टमिति शेषः। शुक्त्याद्यात्मकाधिष्ठानसाक्षात्कारनाश्यस्य शुक्तिरजतादेस्त्रैकालिकाभावप्रतियोगित्वरूपमिथ्यात्वदर्शनात्। ब्रह्मसाक्षात्कारनाश्यस्यानात्मनोऽपि त्रैकालिकबाधप्रतियोगित्वरूपमिथ्यात्वमावश्यकमिति भावः। यथा च त्रिकालबाध्यत्वेऽपि सत्यादिव्यवहारोपपत्तिस्तथोपरिष्टाद्व्यक्तीभविष्यति। मिथ्यात्वेन सह गृहीतव्याप्तिकस्य ज्ञाननाश्यत्वहेतोरनात्मजातवृत्तित्वज्ञानसंपत्तये श्रुतिमुदाहरति—भिद्यत इत्यादि। हृदयग्रन्थिः—हृदयस्यान्तःकरणस्य ग्रन्थिरिव ग्रन्थिः, हृदयवृत्तिवासनामूलमज्ञानम्, भिद्यते—भेदं विनाशमायाति। सर्वसंशयाः—अहं भोक्तृकर्तृस्वरूपो न वेत्यादिसन्देहाः। छिद्यन्ते—उच्छिद्यन्ते,-तत्कारणीभूतावरणनाशात्। अस्य—निवृत्ताविद्यस्य, कर्माणि—सञ्चि-

(१)* *चिह्नद्वयमध्यस्थपाठो घपुस्तके नास्ति।

स्मिन् दृष्टे परावरे ॥' 'तमेव विदित्वातिमृत्युमेति, नान्यः पन्था विद्यते अयनाय ।' 'तरति शोकमात्मवि'दि(१)त्याद्याः ज्ञानात्सर्वसंसारनिवृत्तिं दर्शयन्त्यः तस्य च मिथ्यात्वं सूचयन्ति। 'एकमेवाद्वितीयम्' 'अतोऽन्यदा-

न्यायरत्नावली।

पापकृत्याम्' इति श्रुत्या ज्ञानिनः पुण्यादिना तदीयसुहृदादौ फलजननोक्तेः । (२)=उक्तप्राप्त्यस्वीकारे तु नश्यन्तीत्यर्थः=। अस्य-दृष्टतत्त्वस्य । हृदयग्रन्थ्यादिषु त्रिषु तदन्वयः । तस्मिन्—प्रत्यगात्मनि, दृष्टे-साक्षात्कृते, परावरे-परः ईशोऽपि अवरः अध्यस्तत्वेनापकृष्टः यस्माच्छुद्धब्रह्मणः तदभिन्ने। तमेव-आत्मानमेव, अतिमृत्युमेति-अज्ञानमतिक्रामति, नाशयतीति यावत्, अन्यः-तन्मात्रज्ञानादन्यः, पन्थाः—उपायः, अयनाय—स्वरूपप्राप्तये । तरति-नाशयति, शोकम्-अज्ञानम् । सर्वसंसारेति । सर्वप्रपञ्चमूलाज्ञानेत्यर्थः । तस्य-सर्वप्रपञ्चस्य । सूचयन्तीति । अज्ञानादेर्ज्ञाननिवर्त्यत्वरूपमिथ्यात्वोक्त्या तन्मूलकसर्वप्रपञ्चस्य मिथ्यात्वं सूचितम्, अज्ञानोच्छेदकस्याज्ञानमूलकदृश्योच्छेदकत्वानियमादित्यर्थः । एकं-

नारायणी।

तानागतानि, क्षीयन्ते—विनश्यन्ति, तस्मिन्परमात्मनि, परावरे—पर ईश एवावरो यस्मादित्यखण्डार्थे, दृष्टे—साक्षात्कृते सतीत्यर्थः। तमेव—परमात्मानमेव, विदित्वा-साक्षात्कृत्य, मृत्युं—प्रमादरूपमज्ञानम्, अत्येति—अतिक्रामति, नाशयतीति यावत् । साधनान्तरसमुच्चयनिरासायाह—नान्य इति । अन्यः—आत्मज्ञानादन्यः, पन्थाः—उपायः, अयनाय स्वरूपप्राप्तये, नास्तीत्यर्थः । श्रुत्यन्तरं—तरतीत्यादि । शोकम्—अज्ञानम्, तरति-नाशयति । ज्ञानहेतुकतरणस्य नाशपदार्थत्वात् । तस्य-प्रपञ्चस्य, मिथ्यात्वम्-सर्वदेशयित्रैकालिकाभावप्रतियोगित्वम्, सूचयति-अधिष्ठानसाक्षात्कारनाश्यत्वहेतोः पक्षवृत्तिताबोधसम्पादनेन ज्ञापयति । साक्षान्मिथ्यात्वप्रतिपादिकां श्रुतिमुदाहरति—एकमिति । 'सदेव सौम्ये-

(१) 'ब्रह्मविदाप्नोति परम्' ब्रह्म वेद ब्रह्मैव भवतीत्याद्याः इत्यधिकः पाठो घपुस्तके ।

(२)=···=एतच्चिह्नद्वयमध्यगः पाठो नास्ति घपुस्तके ।

न्यायरत्नावली।

सजातीयद्वितीयरहितम् । एव-स्वगतधर्मरूपद्वितीयरहितम् । अद्वितीयं-विजातीयद्वितीयशून्यम् । 'सदेव सोम्येदमग्र आसी'दिति पूर्ववाक्यम् । ननु नानेन वाक्येन सर्वदृश्यमिथ्यात्वं बोध्यते, सृष्टिपूर्वकालावच्छेदेन ब्रह्मणो दृश्याभावबोधनादिति चेन्न । दृश्याभावे अग्रकालावच्छिन्नत्वानन्वयात् । इदं हि वाक्यं सद्रूपं जगत्कारणमनभ्युपगच्छतां सौगतानामद्वितीयजगत्कारणमनभ्युपच्छतां तार्किकादीनां च मतनिराकरणाय । तथा च यदग्रे सृष्टेः पूर्वमासीत् तत् सत् अद्वितीयञ्चेति बोध्यते । तत्र निषेधस्य प्राप्तिपूर्वकत्वात् येन सम्बन्धेन यदेशकालावच्छेदेन यस्य दृश्यस्य सद्रूपवैशिष्ट्यं प्राप्तम्, तेन सम्बन्धेन तदवच्छेदेन तदभावसम्बन्धस्य तत्र बोधनात् सर्वदृश्यस्य मिथ्यात्वं सिध्यत्येव। 'सदेव सोम्येद'मित्यत्र इदंशब्देन प्रपञ्चात्मकब्रह्मणि द्वितीयसामान्याभावबोधनात्, इदन्तादात्म्यस्य उद्देश्यतावच्छेदकत्वेन उद्देश्यतावच्छेदकप्रपञ्चतादात्म्यकालावच्छेदेनैव द्वैताभाववत्त्वलाभेन मिथ्यात्वलाभात् । यद्यपि प्रतियोगिसत्त्वकालावच्छेदेनाभावस्य बोधः, तथापि स नाहार्यः । प्रतियोगिन इदन्त्वरूपदृश्यत्वेन भानात्, आत्माभिन्नत्वरूपद्वितीयत्वावच्छिन्नाभावत्वेनाभावस्य भानात् । 'नेह नानास्ती'त्यादौ तु इहपदेन प्रपञ्चवतो बोधनादुद्देश्यतावच्छेदकप्रपञ्चसत्त्वकालावच्छेदेन द्वैताभाववत्त्वधीः, अतो नानेत्यादिवाक्यान्यपि व्याख्यातानि । अतोऽन्यदार्तामिति । अतः-आत्मनः,

नारायणी।

दमग्र आसीदिति पूर्ववाक्यम् । इदं-नामरूपात्मकम् । अग्रे-सृष्टेः पूर्वम् । सदेवासीत्--कालत्रयाबाधितस्वरूपं ब्रह्मैवासीत्, न नामरूपात्मकम्, एतेन ब्रह्मव्यतिरेकेण जगन्नास्तीति ज्ञापितम्, तदेव समर्थयति एकं-सजातीयद्वितीयरहितम्, एव--स्वगतद्वैतरहितम्। अद्वितीयं—न विद्यते द्वितीयं यस्मिन्निति विजातीयद्वितीयरहितम्, तथा च प्रतीयमानस्य जगतो ब्रह्मवृत्त्यत्यन्ताभावप्रतियोगित्वलाभान्मिथ्यात्वसिद्धिः। श्रुत्यन्तरं-

र्तम्' 'नेह नानास्ति किं चन' 'अथात आदेशो नेति नेती'-त्याद्याः श्रुतयः साक्षादेव मिथ्यात्वं प्रतिपादयन्ति । दृश्यत्वेन शुक्तिरजतादिवन्मिथ्यात्वानुमानाच्च ।

न्यायरत्नावली ।

अन्यत् आर्तं-पीडितम् । येन सम्बन्धेन यदवच्छेदेन यत् यत्र तिष्ठति, तत्तदवच्छेदेन तत्र वर्तमानाभावस्य तत्सम्बन्धावच्छिन्नप्रतियोगितावि शिष्टमित्यर्थः । एतस्यापि निषेधवाक्यत्वेन प्राप्त्यनुसारेण निषेधबोधकत्वात् । दृश्यत्वेनेत्यादि । 'ब्रह्मान्यत् मिथ्या दृश्यत्वात् शुक्तिरूप्यव'दित्यनुमानादित्यर्थः । पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वात् शुक्तिरूप्यादौ न सिद्धसाधनम् । ब्रह्मणि बाधवारणाय ब्रह्मान्यदित्येव पक्षः । दृश्यत्वञ्च-दृग्विषयत्वम् । मिथ्यात्वञ्च-सत्स्वरूपान्यत्वम् । ननु सत्स्वरूपस्य ब्रह्मणो भेदे साध्ये सिद्धसाधनम् , सत्त्वावच्छिन्नप्रतियोगि-

नारायणी ।

नेहेति । इह ब्रह्मणि किञ्चन किमपि नाना भिन्नवस्तु नास्तीत्यर्थः । श्रुत्यन्तरम्—अत इति । अतः-आत्मनः सकाशात् , अन्यत् मायातत्कार्यम्, आर्त्तं-पीडितम्, आत्मतत्त्वसाक्षात्कारेण हतमिति यावत् । श्रुत्यन्तर माह-'अथात आदेश इति । अथ-सोपाधिकस्वरूपोक्त्यनन्तरम् अतः-ब्रह्मण एवाविशेषात्, आदेशः-निर्देशः, (आकाशादिप्रपञ्चारोपः) । नेति नेति निषेधदार्ढ्यायाभ्यासः । 'द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं च' इत्यादिना प्रतिपादितं सर्वं सोपाधिकं नास्तीत्यर्थः । एतदभिप्रायको 'न ह्येतस्मादिति, नेत्यन्यत्परमस्ती'ति भागः । हि यस्मादेतस्माद् ब्रह्मणः अन्यन्नास्ति इति हेतोः 'नेति नेति' इति निर्देशो न पुनर्ब्रह्म नास्तीत्यभिप्रायेण, कुतः अन्यत्परमस्ति यतो निरस्तात् प्रपञ्चादन्यत् सर्वावभासकं ब्रह्मास्ति सर्वबाधावधित्वेन तस्यावश्यकत्वात् तथा च स्फुटमेव प्रपञ्चस्य मिथ्यात्वमिति भावः । इत्याद्या इत्यनेन 'इन्द्रजालमिव मायामयं स्वप्न इव मिथ्यादर्शनम्' इत्यादि मैत्रायणीयादिवाक्यपरिग्रहः । श्रुतिप्रमितं मिथ्यात्वं नानित्यत्वमात्रं किन्तु शुक्तिरजतादेरिव त्रिकालाबाध्यत्वमिति ज्ञापयितुमनुमानमाह—दृश्यत्वेनेति । प्रपञ्चो मिथ्या दृश्य-

न्यायरत्नावली ।

ताकभेदे साध्ये, किमिदं सत्त्वं ? ज्ञाननिवर्त्यत्वादिरूपमिथ्यात्वशून्यत्वं चेत् ? तर्हि तादृशमिथ्यात्वमेव साध्यमस्तु । किञ्च तादृशमिथ्यात्वशून्यं सिद्धान्ते ब्रह्मैव, तथा च ब्रह्मत्वापेक्षयोक्तशून्यत्वस्य गुरुत्वेन प्रतियोगितानवच्छेदकत्वात् साध्याप्रसिद्धिरिति चेन्न । परमते उक्तशून्यत्वस्य ब्रह्मभिन्नेऽपि स्वीकारेण पररीत्या परान्प्रत्युक्तसाध्योपन्यासस्सम्भवात् , गुरुरूपस्यापि नव्यैः प्रतियोगितावच्छेदकत्वस्वीकारात् , ज्ञाननिवर्त्यं सर्वं ज्ञेयमित्याकारकयत्किञ्चिद्धीविषयत्वावच्छिन्नप्रतियोगिताकभेदस्य साध्यत्वसम्भवात् , प्रपञ्चसत्यत्ववादिना उक्तधीविषयत्वस्य ब्रह्मणीव प्रपञ्चेऽपि स्वीकारात् न सिद्धसाधनम् । उक्तधीविषयताव्यक्तेः शुद्धाया एवावच्छेदकतया निवेशान्नावच्छेदकगौरवानिबन्धनसाध्याप्रसिद्धिः । अलीकवादिनं प्रत्यनुमानोपन्यासे अलीकभेदोऽपि पक्षे विशेषणं वाच्यम् , अन्यथा अलीके भागासिद्ध्यापत्तेः । अनुकूलतर्कस्तु 'दृश्यं यदि मिथ्या न स्यात् अनुपपद्यमानसम्बन्धकं न स्यात्' इत्यादि पूर्वमेव दर्शितम् । ज्ञाननिवर्त्यत्वं वा साध्यम् , तच्च स्वप्रयोजकाज्ञानाधिकरणकालपूर्वत्वशून्यवृत्तिज्ञानकालिकत्वरूपं ज्ञानोच्छेद्यत्वम् । तत्त्वज्ञानरूपस्य वृत्तिज्ञानस्य कालोपहितत्वात् प्रयोजकाज्ञानाधिकरणकालपूर्वत्वशून्येत्युक्तम् । स्वपदं यत्र ज्ञाननिवर्त्यत्वं स्थाप्यं तत्परम् , शुक्तिरूप्यादावपि ब्रह्मज्ञानमादायैव साध्यसत्त्वम् , अज्ञानाधिकरणकालपूर्वत्वस्थले लाघवादज्ञानकालत्वमेव निवेश्यम् । ननु जीवेशभेदादेरनादित्वेन स्वप्रयोजकाप्रसिद्ध्या तत्र लक्षणासङ्गतिरिति चेन्न । स्वप्रयोजकपदेन स्वकाले वर्तमानमात्रस्योक्तत्वात् , तथा च जीवेशभेदकाले अज्ञानं वर्तत इति तत्र लक्षणान्वयः, (१)अत एवाज्ञान-

(१) अतएवाज्ञाने ऽपि सः इति पाठः घपुस्तके ऽधिकः ।

न्यायरत्नावली ।

स्याज्ञानकाले सत्त्वादेतस्य साध्यस्य मिथ्यात्वलक्षणत्वे वृत्तिज्ञानं स्वाविषयकं निवेश्यम् , तेन ब्रह्मणि नातिव्याप्तिः । अथवा येन सम्बन्धेन येन रूपेण यदवच्छेदेन यत्र यदस्ति तदवच्छेदेन तत्र विद्यमानाभावस्य तदवच्छिन्नतद्रूपावच्छिन्नप्रतियोगित्वं साध्यम् , कपालादौ समवायादिसम्बन्धेन घटत्वादिरूपेण यदवच्छेदेन घटादिकमस्ति,तदवच्छेदेन कपालादिनिष्ठस्यात्यन्ताभावस्य समवायादिसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रतियोगित्वस्य व्यधिकरणधर्मावच्छिन्नाभावमते घटादौ स्वीकारात् । तत्सम्बन्धावच्छिन्नायास्तादृशाभावप्रतियोगितायाः अवच्छेदकत्वं वा तद्रूपे साध्यते, तेन न साध्याप्रसिद्धिः । ननु व्याप्यवृत्तिपदार्थेषु नैतादृशसाध्यसम्भवः, तदवच्छेदकाप्रसिद्धेः । किञ्च सिद्धान्ते अभावानां सर्वदेशकालवृत्तित्वेन किञ्चिद्देशकालावच्छिन्नत्वे मानाभावः, तथा च उक्तसाध्यं सिद्धान्ते अप्रसिद्धमिति चेत् , तर्हि यदवच्छेदतदवच्छेदावनिवेश्यावच्छिन्नवृत्तिकत्वशून्याभाव एव निवेश्यः । न चैवं घटादेस्सर्वदेशकालनिष्ठाभावप्रतियोगित्वस्वीकारेऽलीकत्वमेव स्यादिति वाच्यम् । घटादेस्सत्तादात्म्यवत्त्वेन प्रतीयमानत्वेनालीकवैलक्षण्यात् , अलीकं तु न तथा प्रतीयते, अलीकं सत् इति बुद्धेः बौद्धेनाप्यस्वीकारात् , सत्तादात्म्यविनाशवत्त्वादिमत्त्वेनैव घटादेरलीकवैलक्षण्यसम्भवाच्च । तथा च 'सर्वदेशकालनिष्ठात्यन्ताभावप्रतियोगित्वे सति सत्तादात्म्यशून्यत्वम्' 'अविनाशित्वं' वा अलीकलक्षणम् । बौद्धमतेऽपि यद्यत् सत् तत् क्षणिकमिति नियमात् प्रपञ्चस्य क्षणिकत्वेन विनाशित्वम् , अलीकस्य स्थिरत्वेनाविनाशित्वमिति स्वीक्रियत एवेति ध्येयम् । आदेशः-उपदेशः-ज्ञापनम्(१) । नेति नेतीति । प्रत्यक्षादिप्रमाणैर्यद्यत् प्राप्तं तत्

(१) अज्ञातार्थज्ञापनम्' इति घपुस्तके पाठः ।

न्यायरत्नावली ।

इतिशब्दद्वयेन उच्यते, तथा च कपालादौ घटादिकं समवायसम्बन्धेन कालविशेषावच्छेदेन वर्तत इति यत्, तत् नेत्यर्थः-तत्र

नारायणी ।

त्वात् शुक्तिरजतादिवदित्यनुमानादित्यर्थः । (१)*दृश्यत्वं साक्षिभास्यत्वम्, मिथ्यात्वं स्वाश्रयनिष्ठत्रैकालिकात्यन्ताभावप्रतियोगित्वम्* । तदेवमना-

(१) *दृश्यत्व सप्रकारकवृत्तिविषयत्वम्, साक्षिण्यनिर्वाच्यतादात्म्येनाध्यस्तस्वरूपं साक्षिरूपदृग्विषयत्वम् । मिथ्यात्वं च अवच्छिन्नवृत्तिकत्वशून्याभावप्रतियोगित्वम् । न चालोकसाम्यम्, सत्त्वेन प्रतीत्यर्हत्वात् । अत एव न ततोपि व्यवहारानुपपत्तिरपीत्यग्रे स्फुटीभाविष्यति । न च दृष्टान्तासिद्धिः । तस्यार्थापत्तिमानादिभिरग्रे व्यवस्थापयिष्यमाणत्वात् । न च स्वबाधकाभिमताबाध्यदोषाऽजन्यत्वेन सत्यत्वसाधकेन सत्प्रतिपक्ष इति वाच्यम् । अप्रयोजकत्वात् । मम त्वस्ति 'द्वैतं यदि मिथ्या न स्यात् तर्हि अनुपपद्यमानसाधकं न स्यादि'त्यनुकूलस्तर्कः । न च तथापि लाघवात् वृत्तिविषयत्वरूपदृश्यत्वेन ब्रह्मणि गृहीतव्याप्तिकेन सत्यत्वसाधकेन सत्प्रतिपक्ष इति वाच्यम् । दोषाजन्यत्वस्य उपाधित्वात् । नापि सत्त्वावगाहिना 'सन् घट' इत्यादिना प्रत्यक्षेण बाधः । स्वप्रकाशाद्वितीयचैतन्यरूपसत्तायाः परमात्मन्येव क्लृप्तत्वेन जगति बाधात् 'सन् घट' इति प्रत्यक्षेण घटादावग्रहात् । न च सार्वदेशिकत्रैकालिकात्यन्ताभावप्रतियोगित्वं तुच्छत्वम्, तदभावः सत्त्वम्, तच्च घटादावप्यस्ति, सर्वदेशकालमध्ये स्वदेशकालस्यापि प्रवेशात्, तत्र च स्वस्य विद्यमानतया स्वविरोधिनो निषेधस्यापि बाधेन सर्वदेशकालिकनिषेधप्रतियोगित्वस्यापि बाधादिति वाच्यम् । परिच्छिन्नत्वादिहेतुभिरेव शुक्तौ रजततदभावयोरिव भिन्नसत्ताकयोः स्वस्वाभावयोरविरोधेन स्वदेशकालेपि समावेशात्, तादृशाभावप्रतियोगित्वरूपमिथ्यात्वस्यैव सत्त्वेन तदभावरूपत्वस्य घटादौ बाधितमिथ्यात्वानुमाने प्रात्यक्षिकबाधत्वायोगात्, सार्वदेशिकत्वसार्वकालिकत्वयोः प्रत्यक्षायोग्यत्वेन तादृशनिषेधप्रतियोगित्वाभावस्य सुतरां प्रत्यक्षायोग्यत्वाच्च । ननु मास्तु बाधादिस्तथापि 'ब्रह्म मिथ्या व्यावहारिकत्वात् शुक्तिरजतादिवदि'त्याभाससाम्यं दुष्परिहरमिति चेन्न । तादृशानुमानस्य शून्यवादापत्तिरूपप्रतिकूलतर्कपराहतत्वेन अप्रयोजकत्वात् । ननूक्तमिथ्यात्वं मिथ्या न वा ? अन्त्ये कथं ब्रह्मभिन्नसर्वमिथ्यात्वम्, प्रपञ्चधर्मस्य मिथ्यात्वस्य सत्यत्वस्वीकारात्, तद्वदेव प्रपञ्चसत्यत्वापत्तेश्च । आद्येपि कथं प्रपञ्चसत्यत्वम्, मिथ्यात्वस्य स्वाश्रयजगन्निष्ठाभावप्रतियोगित्वस्वरूपमिथ्यात्वलाभे तदाश्रयस्य जगतो मिथ्यात्वाभावरूपसत्त्वलाभात् । तथाचोभयथाप्यद्वैतभङ्ग एवेति चेत्, भ्रान्तोसि । पृथिवीत्वधर्मं धर्मितावच्छेदकीकृत्य गन्धवत्त्वादिहेतुभिरनुमेयस्य इतरभेदादेः पृथिवीत्वव्याप्यधर्मावच्छिन्ने घटादाविव द्वैतत्वावच्छेदेन दृश्यत्वादिहेतुभिरनुमेयस्य मिथ्यात्वस्य द्वैतत्वव्याप्यधर्माव-

आत्माध्यस्ततयैवानात्मनि सिद्धेः तत्रात्माध्यासः ।

न्यायरत्नावली ।

तेन सम्बन्धेन तदवच्छेदेन तत् नास्तीति यावत् । घटादौ तु घटत्वादिकं समवायादिसम्बन्धेन अवच्छेदकमनपेक्ष्यैव प्राप्तं तथैव निषिध्यते—सात्त्वादेवेति । आर्तपदेन पीडितोक्त्याऽबोधपीडितत्वलाभेन ज्ञाननिवर्त्यत्वरूपमिथ्यात्वविशिष्टं बोध्यते, अद्वितीयमित्यादौ तु नञ्पदेन प्रतियोग्यवच्छेदकावच्छिन्नाभाववति व्याप्यवृत्त्यभाववति वा लक्षणया । 'नेह नानास्ती'त्यादौ तु नञ्पदेन तादृशाभावो लक्षणया बोध्यते, यत्किञ्चिदवच्छेदेन वर्तमानस्यावच्छेदकाविशेषितस्य वा द्वितीयाभावस्य ब्रह्मणि प्रत्यक्षादिप्राप्ततया उक्ताभावबोधने उक्तवाक्यावैयर्थ्यात् । उक्ताभावघटितमिथ्यात्वस्यानुमानव्याख्याने व्युत्पादितत्वेन तदुत्तरमथात इति ग्रन्थो व्याख्यातः। तदेवमनात्मनो मिथ्यात्वेन श्रुतिसिद्धत्वात्तस्यात्मसंसर्गाध्यासम्प्रति अधिष्ठानत्वानुपपत्तिमुक्त्वाऽऽत्माश्रयादिदोषादपि तामाह—आत्माध्यस्ततयेत्यादि । आत्माध्यस्ततया—आत्मसंसृष्टत्वेनैव प्रतीयमानतया, आत्माध्यासः—आत्मसंसर्गाध्यासः, सिद्धान्ते आत्मनोऽनध्यासात् । तथा च आत्मनो घटस्सान्निति

नारायणी ।

त्मनो मिथ्यात्वेनाधिष्ठानत्वासंभवमुक्त्वा आत्माश्रयादिदोषेभ्योऽपि तमाह—आत्माध्यस्ततयेति । सन् घट इत्यात्मनि कल्पितत्वेनैवेत्यर्थः। अनात्मनि-नामरूपात्मके देहादौ, सिद्धे-वस्तुत्वेन सिद्धे, तत्र-अनात्मनि, आत्माध्यासः-आत्मन इदमंशस्येव संसृष्टरूपेण अध्यासो वाच्य इति शेषः ।

च्छिन्ने मिथ्यात्वेपि व्यापकधर्मपुरस्कारेणैवासति बाधके सिद्धत्वात्, पूर्वपक्षस्यैवानवकाशात् । साध्यसिद्धेः पूर्वं व्याप्यधर्मावच्छिन्ने बाधाग्रहाच्च । न च 'द्रव्यं क्रियावत् गुणवत्त्वा'दित्याभाससाम्यम् । तत्राकाशादौ क्रियावत्त्वबाधस्य प्रागेव ग्रहणात्, इह तु दृश्यत्वादिहेतुना मिथ्यात्वसाधारणद्वैतत्वावच्छेदेन मिथ्यात्वसिद्धेः पूर्वं न मिथ्यात्वे मिथ्यात्वबाधग्रहः तस्यैवाप्रमितेः । स्वसाधारण्येन प्रमिते च तस्मिन्सुतरां न तद्ग्रहः इत्याद्यन्यत्र विस्तरः ।*

* अयमधिकः पाठः खपुस्तके । तदेवमनात्मनो मिथ्यात्वेन इत्यादि सममग्रे ।

अनात्माध्यासेन चात्मनो दोषसादृश्यादिसम्भवात्। तत्र चानात्माध्यास इत्यात्माश्रयादिदोषप्रसङ्गाच्च । एतेना-

न्यायरत्नावली ।

तत्तादात्म्येनैव प्रत्ययादनात्माध्यासस्य आत्मसंसर्गघटितस्यात्मसंसर्गस्यापेक्षणीयत्वादात्माश्रयः, आत्मसंसर्गापेक्षोऽनात्मा तत्सापेक्ष आत्मसंसर्ग इत्यन्योन्याश्रयश्चेति भावः । सादृश्यादीति । सासादृश्यादिज्ञानेनेत्यर्थः । अध्यासकारणसंस्कारोद्बोधकतया सादृश्यादिज्ञानापेक्षयेति भावः । आत्माश्रयादीति । अनात्मव्यक्तीनां मध्ये स्वस्य स्वं प्रति दोषविधया कारणत्वे आत्माश्रयः, द्वयोः परस्परं प्रति तत्स्वीकारे अन्योन्याश्रयः, स्वकारणकारणं प्रति स्वस्य तत्स्वीकारे चक्रकम्, एकं प्रत्यन्यस्येत्यादिस्वीकारे अनवस्थेत्यर्थः । एतेनेति । अव्यवहितपूर्वोक्तात्माश्रयादिना व्यवहितपूर्वोक्तेनानिर्मोक्षप्रसङ्गश्रुतिविरोधप्रसङ्गाभ्यामनात्मनः सत्यत्वासम्भवेन चेत्यर्थः । आत्मानात्माध्यासस्य—व्यावहारिकयोरात्मसंसर्गानात्माध्यासयोः, अविद्यात्मकत्वात्—अविद्यारूपदोषमूलकत्वात् । व्यावहारिकाध्यासे यद्यपि=कामकर्मणोरपि दोषत्वम्, 'आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा । कामरूपेण' त्यादिगीतोक्तेः । अज्ञानं-भ्रमाधिष्ठानचैतन्यम्, तथा चाधिष्ठानावारकत्वेनैव दोषत्वलाभात्,

नारायणी ।

इत्थं च भवत्यात्माश्रयादिदोष इत्याह--अनात्माध्यासेन चेति । अज्ञानान्तःकरणादेरध्यासेन चेत्यर्थः । तत्र—आत्मनि, अनात्माध्यासः-आत्माध्यासाधिष्ठानस्यानात्मनः साधकोऽनात्माध्यासः । अध्यासमूलकत्वादनात्मनः, अध्यासस्य च सादृश्यादिमूलकत्वात्, सादृश्यादेश्चानात्माध्यासमूलकत्वादिति स्वाध्यासे स्वस्यापेक्षया आत्माश्रयः, अन्यकल्पने परस्परापेक्षाऽतोऽन्योन्याश्रयः, तदन्यकल्पने त्रयाणां परस्परापेक्षा अतश्चक्रकम्, तत्राप्यन्यकल्पने अनवस्थेति भावः । एतेनेति । आत्माश्रयादिदोषप्रसङ्गेन अपास्तमित्यन्वयः । आत्मानात्माध्यासस्य-आत्मानात्मनोः

त्मानात्माध्यासस्याविद्यात्मकत्वान्न विकल्पावसर इ-
त्यपास्तम् , स्वप्रकाशात्मनि अविद्याया अप्यनुपपत्तेः ।
तथाहि साप्यध्यस्ता, अनध्यस्ता वा? तत्राद्ये कथं नात्मा-

न्यायरत्नावली ।

'कर्मक्षये ज्ञानमपास्तदोष'मित्यादि
मही घटत्वं घटतः कपालः कपालिका चूर्णरजस्ततोऽणुः ।
जनै(१)स्स्वकर्मास्तिमितात्मनिश्चयैरालक्ष्यते--
इत्यादिविष्णुपुराणोक्तेश्च ।=[]तथापि पूर्वपूर्वकामकर्म-
णोरुत्तरोत्तरतद्धेतुत्वेनानवस्थादोषे प्राप्ते प्रवाहरूपेण बीजाङ्कु-
रादिवत् अनादित्वेन तत्परिहारो वाच्यः । अविद्याया दोष-
विधया हेतुत्वे तु नानवस्थादोष इत्याशयेन तदेव सिद्धान्ति-
नोक्तम् । विकल्पावसरः-आत्माश्रयादिविकल्पावसरः, अवि-
द्याया अनादित्वेन तत्रान्यदोषानपेक्षेति भावः । स्वप्रकाशेति । स्व-
प्रकाशस्य सत्यत्वात् तदप्रकाशरूपाविद्या मिथ्यैव, तथा च वक्ष्यमा-
णदोषापत्तेस्तदनुपपत्तिरिति भावः । आत्माश्रयादीति । अविद्या
रूपदोषस्य उत्पत्तौ तस्यैव हेतुत्वे आत्माश्रयः, तत्कार्यस्य हेतुत्वेऽ-

नारायणी ।

परस्पराध्यासस्य, आविद्यकत्वात्--दोषविधयाऽनाद्यविद्याप्रयुक्तत्वात्,
न विकल्पावसरः--आत्मनि अनात्माऽध्यस्येत? अनात्मनि वात्मेति
विकल्पस्यावकाशो नास्ति, द्वयोरप्यध्याससम्भवेन विकल्पवैयर्थ्यादिति
भावः । स्वप्रकाशेति । न जानामीत्यज्ञानस्याप्यवभासकतया सिद्धे स्वतः-
स्फूर्तिमतीत्यर्थः । अविद्याया आवरणात्मिकाया अपिशब्दाद्दोषान्तरस्य
च अनुपपत्तेःतमःप्रकाशवद्विरोधेनासम्भवात् । असम्भवं प्रकटयति--
तथाहीति । आत्माश्रयादीति । दोषसादृश्यादिकं विनाऽऽत्मन्यविद्याध्यासा-

(१) स्वकर्मभिः स्तिमितः प्रतिबद्धः आत्मनिश्चयो येषान्ते । अयं पाठः मूले एव [] चिह्नितस्थले आसीत् परन्तु--"व्यावहारिकाध्यासे यद्यपि कामकर्मणोरपि दोषत्वं" तथापि"'अनवस्थादोषे प्राप्ते"'तत्परिहारो वाच्यः" इत्यस्मिन्वाक्ये सम्बन्ध-विच्छेदकरत्वात् टिप्पणीस्थ एव मूले पतित इत्यालोक्य टिप्पण्यामेव निवेशितः ।

श्रयादिदोषप्रसङ्गः । अन्त्ये तस्यानुच्छेदादनिर्मोक्ष-प्रसङ्गः । सर्वस्याध्यासमूलत्वे भ्रमप्रमादिव्यवस्था च न स्यात् । एकस्यैवात्मनः प्रमाणप्रमेयप्रमितिप्रमातृरूपता च विरुद्धा । अविरोधाभ्युपगमे वा सौगतमताप-

न्यायरत्नावली ।

न्योन्याश्रयः, अविद्यान्तरस्य हेतुत्वे तत्रापि अविद्यान्तरस्येत्यादिस्वीकारे त्वनवस्थादिकम् । अकार्यत्वन्तु नाविद्यारूपाध्यासस्य सम्भवति प्रातीतिकाध्यासे तददर्शनादिति भावः । सर्वस्य—व्यावहारिकप्रातीतिकरूपस्य, अध्यासमूलत्वे—भ्रममात्रविषयत्वे। भ्रमप्रमादिव्यवस्था—'इदं रजत' मित्यादिधीर्भ्रमः, 'इयं शुक्तिरिति'त्यादिधीः प्रमा, आद्या बाध्या, द्वितीया बाधिकेत्यादिव्यवहारः । एकस्येत्यादि । चित एव प्रमाणत्वादिकं सिद्धान्ते स्वीक्रियते, तद्विरुद्धमित्यर्थः । ननु अध्यासोपाधिभेदेन एकस्यापि प्रमाणादिरूपत्वं न विरुद्धम्, तत्राह—अविरोधेत्यादि । सौगतेति ।

नारायणी ।

सम्भवात्तदर्थमपेक्षितविद्याध्यासस्य स्वापेक्षात आत्माश्रयोऽविद्यान्तराध्यासाद्यपेक्षातोऽन्योन्याश्रय इत्यादिपूर्वोक्तः प्रकारः स्फुट इति भावः । तस्या अविद्यायाः अनुच्छेदात्—आत्मन इव नाशायोगात् । अनिर्मोक्षप्रसङ्गः—अज्ञाननिवृत्त्युपलक्षितस्वरूपावस्थिरूपमोक्षाभावप्रसङ्गः । नन्वज्ञानाध्यासस्याप्यनादित्वान्नोक्तदोष इत्यतो दूषणान्तरमाह—सर्वस्येति । द्वैतज्ञानस्येत्यर्थः । अध्यासमूलत्वे—भ्रममात्रसिद्धत्वे, 'शुक्तिज्ञानं प्रमा रजतज्ञानं भ्रम' इति व्यवस्था न स्यादित्यर्थः । तयोर्बाध्यबाधकभावो न स्यादिति भावः । तेषां भ्रममात्रशरीरत्वेऽपि चितः प्रमाणादिकमङ्गीक्रियतेऽतो नाव्यवस्था तत्राह—एकस्यैवेति । अद्वितीयस्येत्यर्थः । प्रमाणत्वाद्युपपादकधर्मादिना रहितस्येति यावत् । विरुद्धा—अन्यतरसत्त्वेनासम्भाविता । प्रमां प्रति करणत्वेऽङ्गीकृते प्रमाया विषयत्वमनुपपन्नं विषयत्वे तु विषयिप्रमारूपताऽनुपपन्ना तथात्वे तदाश्रयत्वमनुपपन्नम्, एवं परस्परमपीति संक्षेपः । ननु स्वतो विरुद्धाप्यध्यासिकोपाधिभेदेनाविरुद्धाऽत आह—अविरोधेति । अध्यस्ताहंत्वाद्याकारभेदेन ज्ञानमेव प्रमात्रादिरूपमिति सौगतमतादविशेषापत्तिरित्यर्थः । नन्वध्यासोऽपि नो-

त्तिरिति। अत्रोच्यते। अहं मनुष्यः कर्ता भोक्तेत्यादि प्रतीतिस्तावत्सर्वजनसिद्धा। सा च न स्मृतिरपरोक्षावभासत्वाद्भेदाग्रह(१)पूर्वकत्वाच्च। नापि प्रमा, श्रुतियु-

न्यायरत्नावली।

(२)अध्यस्तकारणभेदेन ज्ञानमेव प्रमात्रादिरूपमिति सौगतमतादविशेषापत्तिरित्यर्थः। ननु अध्यासोऽपीत्यादिना सौगतमतापत्तिरित्यन्तेन उक्तान् सर्वपूर्वपक्षान् समाधातुं प्रतिजानीते—अत्रोच्यते इति। न स्मृतिरिति। यद्यपि नाबाधितार्थकस्मृतिरित्येव वक्तुमुचितम्, भ्रमत्वमात्रस्यैव प्रकृते वाच्यत्वात्, तथापि ग्रहणस्मरणोभयरूपत्वेन यो भ्रमत्वनिषेधः सांख्यादिसम्मतः तन्निराकरणाय स्मृतित्वनिषेधः। अपरोक्षावभासत्वात्—प्रत्यक्षरूपतया प्रतीयमानत्वात्। ननु अहमित्यंशे प्रत्यक्षम्, मनुष्य इत्यंशे तु स्मृतिः, तयोस्तद्विषययोश्च भेदाग्रहादेकत्वव्यवहारः, अथवा 'अहं मनुष्य' इत्यत्र मनुष्यदेहस्वामी आत्मा विषयः, एवम् 'अहं कर्ते'त्यत्र कर्तृमनस्स्वामी,(३) 'अहं भोक्ते'त्यत्र सुखाद्याश्रयमनस्स्वामी, तथा च स्वामित्वतत्संसर्गयोस्स्मृतिरूपमपि विशेष्ये प्रत्यक्षमेकं सम्भवति तत्राह—भेदाग्रहपूर्वकत्वादिति। भेदाग्र-

नारायणी।

पपद्यत इत्यादिना सौगतमतापत्तिरित्यन्तेनोक्तान्सर्वान् पूर्वपक्षान् समाधातुं प्रतिजानीते—अत्रेति। प्रतीत्यन्यथानुपपत्त्या भ्रमसामग्रीं व्यवस्थापयिष्यन् प्रथमतः प्रतीतिं शोधयति—अहं मनुष्य इत्यादि। सूचीकटाहन्यायेन प्रथममख्यातिवादं निराचष्टे—सा चेति। अपरोक्षेति। 'मनुष्यं मां जानामी'ति प्रत्यक्षरूपतया प्रतीयमानत्वादित्यर्थः। ननु मनुष्योहमित्यादिप्रतीतिर्मनुष्यदेहस्वाम्यात्मविषयापि देहाद्यंशे स्मृतिरूपा आत्मांशे प्रत्यक्षरूपेति तथा प्रतीयत इत्यत आह—भेदेति। भेदाग्रहजन्यविशिष्ट-

(१)—भेदाग्रहः अपूर्वकत्वाच्च इति पाठो गपुस्तके प्रामादिकः।
(२) अध्यस्ताकारभेदेनेति, घपुस्तके,
(३) आत्माविषयः इत्यनुषङ्गः एवमग्रेपि।

क्रियाधितत्वात् । तथा च श्रुतयः-'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः, अयमात्मा ब्रह्म, सत्यं ज्ञानमनन्तं ब्रह्म, विज्ञानमानन्दं ब्रह्म, य

न्यायरत्नावली ।

हजन्यविशिष्टबुद्धित्वादित्यर्थः । उपस्थितविशेष्यविशेषणयोर्भेदाग्रहत्वेन विशिष्टविषयकप्रवृत्त्यादिहेतुत्वे गौरवात्, विशेष्यविशेषणविशिष्टविषयकधीत्वेनैव तदुचितमिति भ्रमत्वबाधितत्वौशिष्ट्यज्ञानत्वरूपं न तूपस्थितयोर्भेदाग्रहत्वम्, आत्मनि शरीरादिस्वामित्वविषयकम्, तस्यात्मनि शरीरादेर्भेदग्रहपूर्वकत्वनियमादिति भावः । श्रुतय इति । ब्रह्मस्वरूपतां दर्शयन्तीत्यग्रे अन्वयः । विज्ञानमयः-'विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च' इति श्रुत्युक्तकर्तृरूपविज्ञानशब्दितबुद्ध्यभिमानी 'स्त्रीमयोऽयं जालम' इतिवत्तदभिमानित्वोक्त्या तद्भेदलाभः, एवं प्राणेषु प्राणाभिमानी, हृदि मनस्यभिमानसम्बन्धेन विद्यमानम्, अन्तर्जन्यज्ञानरूपबाहिर्ज्योतिर्भिन्नम् ,ज्योतिः-स्वप्रकाशचैतन्यम्, पुरुषः-पुरुषु दृश्येषु अनुस्यूत इत्यनेनापि सर्वदृश्यभिन्नचिद्रूपलाभात् अकर्तृभोक्तृत्वलाभः, । अत एव 'ध्यायतीव लेलायतीवे'त्याद्युत्तरवाक्येन परमार्थतो ध्यानादिशून्यत्वमुक्तम्, । विज्ञानं-स्वप्रकाशचित्स्वरूपम्, आनन्दम्-

नारायणी ।

बुद्धित्वादित्यर्थः । देहादिस्वामित्वविषयत्वे भेदग्रहपूर्वकत्वं स्याद्भेदग्रहं विना स्वस्वामिभावभावनायोगादिति भावः । विशिष्टप्रमारूपतां निराकरोति—नापि प्रमेति । श्रुतय इति । अकर्तृभोक्तृरूपतामात्मनो दर्शयन्ति इत्यनेनान्वेति । विज्ञानमयः-बुद्ध्यभिमानी, प्राणेषु हृदि अभिमानसम्बन्धेन विद्यमानः प्राणाभिमानी मनोऽभिमानी चेत्यर्थः । अन्तर्ज्योतिः-जन्यज्ञानरूपबहिर्ज्योतिर्भिन्नः स्वप्रकाशः, पुरुषः-सर्वदृश्यानुस्यूतः, अनेन कर्तृभोक्तृविज्ञानभेदलाभादकर्तृभोक्तृरूपता सिद्धिः । अयमात्मा जीवः ब्रह्म परमात्मा समानस्वभावत्वादिति भावः । अभेदोक्त्याऽत्राकर्तृभोक्तृरूपतासिद्धिः । सत्यमिति । अत्रानन्तमित्यनेनापरिच्छिन्नत्वोक्त्या अभेदलाभात् [तथार्थलाभः] । विज्ञानमिति । स्वप्रकाशचिद्रूपत्वोक्त्याऽत्रापि

आत्मा अपहतपाप्मा, यत्साक्षादपरोक्षात् ब्रह्म, य आत्मा सर्वान्तरः, योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्ये-

न्यायरत्नावली ।

आनन्दस्वरूपम्, न तु मत्वर्थप्रत्ययलोपात् आनन्दयुक्तम्, 'आनन्दो ब्रह्म, एष एव परमः आनन्दः, एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती'त्यादिश्रुतिभ्यः । अन्यानि-औपाधिकभेदेन एतस्मात् भिन्नानि, भूतानि-जीवाः, मात्रां-विषयसुखरूपमंशम्, उपजीवन्ति-भुञ्जते, अनन्तम्-अभावाप्रतियोगि, ब्रह्म शुद्धत्वाद्यतिशयवत् । अपहतो निर्गतः पाप्मा यस्मात् सोऽपहतपाप्मा । साक्षादपरोक्षात्-अपरोक्षचिद्रूपम्, न तत्तादात्म्येन घटादिवदपरोक्षः । सर्वान्तरः-सर्वदृश्याधिष्ठानम् । अशनायापिपासे प्राणस्य, शोकमोहौ मनसः, जरामृत्यू देहस्य-धर्मौ । अत्येति-तेषामनाधारः । स यत्तत्रेत्यादिवाक्यं जाग्रदाद्यवस्थाबोधकवाक्यानामेकैकोत्तरमस्ति, तथा च (१)जागरितत्तद्वाक्योत्तरवाक्यस्थस्य तत्रेत्यस्य जाग्रदवस्थायामित्यर्थः । एवं स्वप्नसुषुप्तिवाक्योत्तरस्थस्य स्वप्ने

नारायणी ।

तथार्थलाभः । कर्त्रादिस्वरूपत्वे परिच्छिन्नत्वापत्त्या भासकत्वानुपपत्तेः । य आत्मेति । अपहतः पाप्मा कर्माशयो यस्मादित्यकर्तृभोक्तृरूप इत्यर्थः । यत्साक्षादिति । साक्षात्-अगौणम्, अपरोक्षात्-अपरोक्षम्, स्वत एवापरोक्षं न घटादिवत्सत्तादात्म्येनापरोक्षमित्यर्थः । अयमिति । सर्वान्तरः-सर्वस्य कार्यजातस्यान्तरे स्थितः, अधिष्ठानतयेति भावः । तथा च सर्वदृश्याधिष्ठानतया सर्वावभासकत्वसूचनादकर्तृभोक्तृतासिद्धिः, अन्यथा भासकत्वानुपपत्तेरिति भावः । साक्षादेवाकर्तृत्वादिप्रतिपादिकां श्रुतिमुदाहरति-योऽशनायेति । अशितुमिच्छाऽशनाया पातुमिच्छा पिपासा ते प्राणाधर्मौ, शोकम्-अज्ञानम्, मोहः-प्रमादः तौ मनसः । जरा-अङ्गजीर्णता मृत्युः-प्राणवियोगः, तौ स्थूलदेहस्य धर्मौ । अत्येति-

(१) जाग्रद्वाक्योत्तरेत्यादिः घपुस्तके ।

ति,स यत्तत्र किं चित्पश्यत्यनन्वागतस्तेन भवति,असङ्गो ह्ययं पुरुष' इत्याद्या अकर्तृभोक्तृपरमानन्दब्रह्मरूपतामात्मनो दर्शयन्ति। युक्तयश्च-विकारिणः परिच्छि-

न्यायरत्नावली।

सुषुप्तावित्यर्थः। स-जीवो, यदिति ज्ञेये ज्ञानक्रियायाश्च विशेषणम्, पश्यति-जानाति, अनन्वागतः-असंसृष्टः, तेन-ज्ञेयेन ज्ञानेन च, अपरोक्षविषयस्यापि सर्वानुस्यूतसद्रूपचिदात्मके जीवे तादात्म्यप्राप्त्या निषेधो न व्यर्थः। असङ्गः-सम्बन्धसामान्यशून्यः, हि शब्दोऽसङ्गत्वहेतुतां द्योतयति। अयं-दृग्रूपः, पुरुषः-सर्वदृश्येषु आधिष्ठानत्वनानुस्यूतः, तथा च दृग्दृश्ययोस्सम्बन्धानुपपत्तेः सर्वदृश्यानां दृशि कल्पितत्वात्। असङ्गत्वहेतुर्नासिद्ध इति भावः। इत्यादिपदेन 'सलिल एको द्रष्टाऽद्वैतो भवती'त्यादिश्रुतिसङ्ग्रहः। ब्रह्मरूपताम्-अद्वितीयेशरूपताम्। श्रुतिबाधितत्वं प्रदर्श्य युक्तिबाधितत्वंप्रदर्शयति-युक्तयश्चेति इत्याद्याः। इत्यग्रेऽन्वयः। युक्तयोनुमानं तदनुकूलतर्काश्च तत्र निर्धर्मकनित्यस्वप्रकाशसुखात्मक एक एवात्मेति अनेन वक्ष्यमाणवाक्येन 'आत्मा निर्धर्मकः नित्यत्वात्; नित्यः स्वप्रकाशसुखरूपत्वाद्, इत्यनुमानद्वयं विवक्षितम्। (१)(स्वप्रकाशसुखरूपतयोः स्वप्रकाशानभ्युपगमे इत्यादिनानुमानद्वयं विवक्षितम्) विकारिण इत्यादिना च तर्का विवक्षिताः, तत्र

नारायणी।

अतिक्रामति, तद्रहित इत्यर्थः। श्रुत्यन्तरं—स यदिति। सः-अवस्थात्रयसाक्षी, यत्किञ्चिद् दृश्यम्, तत्र-जाग्रत्स्वप्नसुषुप्तिषु, पश्यति-साक्षात्करोति, तेन-दृश्येन, अनन्वागतः-असंस्पृष्टो भवति। हि-यस्मात्, अयम्-अहमिति धिया व्यवह्रियमाणः, असङ्गः-सङ्गसामान्यरहितः। भासकस्य भास्येन समं धर्मधर्मिभावप्रयोजकसम्बन्धाभावादित्यन्यत्र विस्तरः। आद्यशब्देन 'अमूढो मूढवद् भुङ्क्ते मायया वे'त्यादिश्रुतिसंग्रहः। श्रुतिबाधितत्वं प्रदर्श्य युक्तिबाधितत्वं प्रदर्शयति—युक्तय इति। इत्याद्या इत्यग्रेतनेना-

(१) (...) एतच्चिन्हान्तर्गतपाठो घपुस्तके नास्ति पुनरुक्तिदुष्टश्च।

न्नत्वेन अनात्मत्वापत्तेः, स्वेनैव स्वस्य ग्रहणे कर्तृकर्म-

न्यायरत्नावली ।

निर्धर्मकत्वं-परमार्थत्वरूपेण धर्माभावः। तेन धर्माभावरूपधर्मस्य साध्यस्य व्यावहारिकत्वे स्वव्याघातः, प्रातीतिकत्वे अनुपानस्याभासत्वम्, पारमार्थिकत्वे अद्वैतश्रुतिविरोधः, धर्माभावस्वरूपत्वे साध्ये सधर्मकत्वाप्रतिक्षेपापत्तिरित्यादि परास्तम्। वस्तुतो व्यावहारिको धर्माभावो न स्वव्याघातकः, धर्मतदभावयोर्व्यावहारिकयोः स्वाप्नयोर्गजतदभावयोरिवाविरोधात्। अत्र गज इति स्वाप्नज्ञानोत्तरं कदापि नात्र गजोऽस्तीति स्वाप्नज्ञानस्येव इहात्मनि धर्मोऽस्तीति ज्ञानोत्तरमात्मा निर्धर्मक इत्यनुमितेः प्रतियोगिसमसत्ताकाभावविषयकत्वसम्भवात्। विस्तृतश्चैतच्चन्द्रिकायाम्। ननु यदि निर्धर्मको न स्यात् तदा नित्यो न स्यात् धर्मधर्मिणोस्तादात्म्येन धर्मोत्पत्तिनाशाभ्यां धर्मिण उत्पत्तिनाशरूपविकारापत्तिरिति तर्को वाच्यः, तत्र इष्टापत्तिरेवेत्यत आह—विकारिण इत्यादि। आत्मनो विकारस्वीकारे अभावप्रतियोगित्वरूपपरिच्छेदा(१)दात्मत्वस्याभावापत्तिरित्यर्थः। आत्मा यदि कर्तृत्वादिमान् स्यात्तदा द्रष्टा न स्यादित्य-

नारायणी ।

न्वेति। युक्तयोऽनुमानानि तदनुकूलतर्काश्च। तत्र निर्धर्मकनित्यस्वप्रकाशसुखात्मक एवात्मेत्यनेन वक्ष्यमाणवाक्येन आत्मा निर्धर्मकः नित्यत्वात्, आत्मा नित्यः स्वप्रकाशसुखात्मकत्वादिति विवक्षितानुमानद्वयेऽनुकूलतर्कानाह—विकारिण इत्यादिना। कर्तृत्वभोक्तृत्वरूपविकारवतः आत्मनः। परिच्छिन्नत्वेन—विभुत्वे भोगसाङ्कर्यात् अणुत्वे सर्वदेहव्यापिसुखाद्यनुपलब्धेरवश्यवाच्यमध्यमपरिमाणवत्त्वेन। अनात्मत्वापत्तेः घटादेरिवात्मस्वरूपताभावापत्तेः। मध्यमपरिमाणवतो विनाशिन आत्मत्वायोगादिति भावः। तथा च यद्यात्मा सधर्मकः स्यात् तदाऽनात्मैव स्यादिति तर्कः पर्यवसितः। तत्रात्मा यदि कर्तृत्वादिधर्मवान्स्यात्तदाऽहं कर्त्तेति द्रष्टा न स्याज्जडस्य मनआदेर्द्रष्टृत्वायोगात्कर्तृकर्मविरोधेन स्वेनैव स्वस्य

(१)—परिच्छेदापत्त्या परिच्छेदाऽभावव्याप्यात्मत्वस्येत्यादिः घपुस्तके पाठः।

विरोधात्, दृग्दृश्यसम्बधानुपपत्तेर्भेदेनाभेदेन वा धर्मध-

न्यायरत्नावली।

भेदे दृष्टृदृश्यभावानुपपत्तिरिति तर्कमाह—स्वेनेत्यादि। स्वेन-आत्मना, स्वस्य-कर्तृत्वादिमदात्मनो, ग्रहणे-विषयीकरणे, कर्त्ता साक्षी विषयी व्यवहर्तृत्वात्, स एव कर्म-विषयः व्यवहार्यत्वात् तत्र विरोधः-एकत्वे सम्बन्धासम्भवेन विषयिविषयभावसम्पादकतादात्म्यसम्बन्धानुपपत्तिरित्यर्थः। कर्तृत्वं ज्ञानं चिद्रूपं प्रत्यपि सम्भवति, जन्यविषयतावच्छिन्नं ज्ञानमपि क्षेमसाधारणजन्यतावदिति वा, तथा च कर्तृकर्मत्वयोर्व्यवहाराक्रियापेक्षत्वेऽपि न क्षतिः। (१)ननु तादात्म्यं प्रत्यनुयोगित्वं विषयत्वं प्रतियोगित्वं विषयित्वम्, तत्राद्यं कर्तृत्वादिविशिष्टरूपेण द्वितीयं शुद्धरूपेणैकस्यात्मनस्सम्भवत्येव तत्राह—दृग्दृश्येत्यादि। दृग्दृश्ययोस्सम्बन्धनिर्वचनस्य पूर्वोक्तरीत्या असम्भवात्, दृगात्मनि विषयिणि विषयरूपं सर्वं मिथ्येति निर्धर्मकत्वमात्मन इति भावः। आत्मा यदि पारमार्थिक-

नारायणी।

ग्रहणायोगाच्चेति तर्कान्तरमाह—स्वेनेति। स्वेनात्मना स्वस्य-कर्तृत्वादिमदात्मनः, ग्रहणे-विषयीकरणे। कर्ता द्रष्टा विषयी व्यवहर्तृत्वात्, कर्म दृश्यं विषयः व्यवहार्यत्वात्, तत्र विरोधः-द्रष्टृत्वे दृश्यत्वस्य दृश्यत्वे द्रष्टृत्वस्यानुपपत्तिः, तयोरेकत्रासमावेशस्य साधनादिति भावः। यद्यात्मा सधर्मकः स्यात्तदा निरूपणार्हतत्सम्बन्धवानपि स्यादिति तर्कान्तरमाह—दृग्दृश्येति। दृगात्मा भासकः, दृश्यं कर्तृत्वादिकम्(२) तयोः सम्बन्धस्य तादात्म्यस्य समवायस्य वा अनुपपत्तेः-असम्भवात्। तथाहि-न तादात्म्यं सम्बन्धः, आत्मनो विनाशित्वापत्तेः, तदभिन्नधर्मनाशे तस्यापि नाशावश्यम्भावात्, कूटस्थनित्यताभङ्गप्रसङ्गाच्च। धर्माणामप्यनाशे त्वनिर्मोक्षप्रसङ्गः, अशेषविशेषगुणवियोगस्यैव पुमर्थत्वोक्तेः। नापि समवायः, तस्य सम्बन्धत्वासम्भवात्। तथाहि-सम्बन्धिभ्यां भिन्नत्वे सति सम्बन्धिनि सम्ब-

(१) ननु तादात्म्यं प्रति प्रतियोगित्वं विषयत्वम् तादात्म्यं प्रत्यनुयोगित्वम् विषयित्वम् इति घपुस्तके पाठः, युक्तश्च।

(२) दृश्यं घटादिकं तयोः सम्बन्धस्य विषयविषयिभावस्य अनुपपत्तिरपि बोध्या।

र्मिभावानुपपत्तेश्च, ज्ञाननित्यत्वपक्षे तत्तद्व्यक्तिभेद-

न्यायरत्नावली।

धर्मवान् स्यात्तदा निरूपणार्हधर्मसम्बन्धवान् स्यादिति तर्कमाह—भेदेनेति। तादात्म्यान्यसम्बन्धेनेत्यर्थः, अभेदेन तादात्म्यसम्बन्धेनानुपपन्नेनेति शेषः। अनुपपत्तेरिति। तादात्म्येन तदन्येन वा सम्बन्धेन सम्बद्धयोर्धर्मधर्मिता वाच्या, तादात्म्यादिसम्बन्ध एव तु न सम्भवति सम्बन्धान्तरेणासम्बद्धस्य तस्य सम्बन्धस्य सम्बन्धत्वासम्भवेन सम्बन्धान्तरं वाच्यम्, एवं तस्यापि सम्बन्धान्तरमिति अनवस्थापत्तेः। न च सम्बन्धस्य सम्बन्धान्तरेण न सम्बन्धता किन्तु स्वेनैव सम्बन्धेनेति वाच्यम्। स्वस्य स्वप्रतियोगिकसम्बन्धत्वासम्भवात्, स्वं न स्वीयमित्यनुभवात्, अन्यथा धर्मधर्मिणोरपि स्वेन सम्बन्धतापत्त्या सम्बन्धमात्रलोपापत्तेः। अथ तयोस्सम्बन्धान्तरं प्रतीयते, तस्य तु न प्रतीयत इति

नारायणी।

द्धः सम्बन्धः, तत्र समवायो न स्वेन सम्बद्धः, स्वेन स्वं वर्तत इति प्रतीत्यभावात्, नापि सम्बन्धान्तरेण, तस्य तस्यापि सम्बन्धान्तरापेक्षायामनवस्थापत्तेरिति संक्षेपः। यद्यात्मा वस्तुतः कर्तृत्वादिमान्स्यात्तदा तैः सह धर्मधर्मिभावो निर्वचनार्हः स्यादिति तर्कान्तरमाह—भेदेनाभेदेनेति। भेदेन आत्यन्तिकभेदेन, अभेदेन-भेदसहिष्णुनाऽभेदेन ऐक्येन वा, धर्मधर्मिभावानुपपत्तेः-कर्तृत्वादीनां धर्मत्वस्य आत्मनो धर्मित्वस्यासम्भवात्। अत्यन्तभेदनिबन्धनस्तादात्म्यैक्यनिबन्धनो वा धर्मधर्मिभावो न सम्भवतीति यावत्। तथाहि-तौ यद्यत्यन्तं भिन्नौ तदा हिमवद्विन्ध्ययोरिव धर्मधर्मिभावो दूरापास्तः, यदि भिन्नाभिन्नौ तदाऽऽत्मनः कूटस्थत्वव्याघातः, परिणामपरिणामिनोरेव तत्सम्भवात्; यद्यैक्यं तदा 'घटो घट' इतिवद्धर्मधर्मिभावेन न व्यपदेशार्हौ ऐक्ये तदसम्भवात्। न च राहोः शिर इतिवद्भविष्यतीति वाच्यम्। अनिर्मोक्षप्रसङ्गस्योक्तत्वादिति संक्षेपः। एतेन सम्बन्धानिरूपणे घटो नील इत्यादिवदहं कर्तेत्यादि प्रमोपपत्तेर्भ्रमवार्ता न युक्तेति निरस्तम्। अविकारित्वेनात्मनस्तद्वैषम्यात्। आत्मा यदि कर्तृत्वादिधर्मवान्स्यात् तदा कालत्रयाव्यभिचारितद्भासकज्ञानस्वरूपो न स्यादिति मूलीभूतान्वयव्यतिरेकनिश्चयसाधनायाह—

ध्वंसप्रागभावसमवायज्ञानत्वजात्याद्यभ्युपगमे गौरवात्, एकत्वाभ्युपगमे चातिलाघवात्, घटज्ञानं पट-

न्यायरत्नावली ।

चेत्, सत्यम्, प्रतीयमानमनुपपन्नं मिथ्यैवेति भावः । 'आत्मा यदि कर्तृत्वादिधर्मकस्स्यात् तदा कर्तृत्वादिधर्मविशिष्टस्य तस्य ज्ञानरूपत्वन्न स्यादि'ति तर्के 'आत्मा ज्ञानरूपो न भवत्येव तस्य नित्यत्वेनोत्पत्तिनाशवत्त्वेनानुभूयमानज्ञानरूपत्वासम्भवात्' इतीष्टापत्तिं निरस्यति—ज्ञानेत्यादि । अनित्यत्वपक्षे—अनित्यत्ववादितार्किकादिमते । तत्तद्व्यक्तीत्यादि । तत्तज्ज्ञानव्यक्तयस्तासां भेदध्वंसप्रागभावाः, समवायः, ज्ञानत्वजातिः, आदिपदेन तज्ज्ञानतद्ध्वंसेषु अनन्तकारणानीत्येतेषामनन्तानां स्वीकारे गौरवादित्यर्थः । एकत्वाभ्युपगमे—एकैव ज्ञानव्यक्तिः सर्वज्ञेयविषयिकेति स्वीकारे, अतिलाघवात्—आत्मन एव ज्ञानस्वरूपत्वसम्भवेन ज्ञानस्वरूपस्याप्यकल्पनीयत्वेनातिलाघवात् । ननु घटज्ञानं न पटज्ञानमिति भेदप्रतीतेः कथमेकं ज्ञानं सर्वस्येत्यत आह—घटज्ञानमित्यादि ।

नारायणी ।

ज्ञानेति । ज्ञानानित्यत्वपक्षे—आत्ममनःसंयोगादिना ज्ञानमुत्पद्यते तच्च क्षणिकमिति पक्षे । तत्तद्व्यक्तीति । तत्तज्ज्ञानव्यक्तयः तासां भेदाः ध्वंसाः प्रागभावाः समवायः ज्ञानत्वजातिः आदिपदेन ज्ञानकरणतत्सम्बन्धादिकं चेत्येतेषां स्वीकारे गौरवादित्यर्थः । एकत्वाभ्युपगमे-सर्वपदार्थगोचरैकैव ज्ञानव्यक्तिरिति स्वीकारे । अतिलाघवात्-तस्या एवात्मत्वाङ्गीकारेण धर्म्यन्तरकल्पनातोऽतिलाघवात् । ननु यदि सर्वविषयमेकमेव ज्ञानं का गतिस्तर्हि घटज्ञानं पटज्ञानाद्भिन्नमिति ज्ञानभेदप्रतीतेस्तत्राह—घटज्ञानमिति । घटज्ञानं पटज्ञानमित्यादौ य उपाधिभेदः अवच्छेदकवृत्तिविशेषः तत्पुरस्कारेण तद्वैशिष्ट्येन ज्ञानभेदप्रतीतेः—घटज्ञानं पटज्ञानाद्भिन्नमिति घटमठादिनाऽऽकाशस्येव स्वरूपज्ञानस्य भेदप्रतीतेः । तथा च वस्तुतस्तत्र प्रमाणजन्यवृत्तीनां धात्वर्थरूपाणामेव भेदो विषयो न स्वरूपज्ञानस्य अनुव्यवसायस्थानीयस्य तस्य लाघवादेकत्वाभावः ।

ज्ञानमित्युपाधिभेदपुरस्कारेणैव ज्ञानभेदप्रतीतेः, स्वतस्तु ज्ञानं ज्ञानमित्येकस्वरूपावगमात्, तदुत्पत्तिविनाशप्रतीत्योश्चावश्यकल्प्यविषयसम्बन्धविषयतयाप्युपप-

न्यायरत्नावली।

इत्युपाधिभेदपुरस्कारेणेति । धर्मिप्रतियोगिरूपोपाध्योरित्थंभूतौ घटविषयकत्वपटविषयकत्वरूपौ यौ भेदौ विशेषौ तत्पुरस्कारेण तदुल्लेखेनेत्यर्थः । एवकारार्थं स्फुटयति—स्वत इति । उपाधिपुरस्कारं विनेत्यर्थः । ज्ञानं ज्ञानमित्येकरूपावगमात् ज्ञानमित्याकारकसर्वप्रत्ययैरेकस्यैव ज्ञानस्वरूपस्य विषयीकरणात्, तुशब्देन तज्ज्ञानव्यक्तिरेतज्ज्ञा(१)नव्यक्तिभिन्नेत्युपाध्यपुरस्कृतप्रत्ययो नास्तीत्युक्तम् । ननु ज्ञानस्य उत्पत्तिनाशप्रत्ययात् कथमात्मरूपता तत्राह—तदुत्पत्तीत्यादि । विषयसम्बन्धेति । विषयज्ञानोभयसम्बन्धेत्यर्थः । विषयज्ञानयोस्सम्बन्धमविषयीकृत्य 'ज्ञानमुत्पन्नन्नष्टमि'ति प्रत्ययस्यानुदयात् ज्ञानोत्पत्त्यादिप्रत्यये ज्ञानाविषयसम्बन्धविषयकत्वमवश्यं कल्प्यम्, तथा च 'घटज्ञानमुत्पन्नन्नष्टमि'ति

नारायणी।

एवकारार्थमाह—स्वत इति । उपाधिपुरस्कारं विनेत्यर्थः । एकरूपावगमात्-एकाकारेणावभासमानत्वात् । तथा चात्रायं प्रयोगः 'घटज्ञानं पटज्ञानात्स्वतो न भिद्यते उपाधिपरामर्शमन्तरेणागृह्यमाणभेदवत्त्वाद्गगनवत्, एकस्या एव संविदो गगनस्येवोपाधिभेदेन भिन्नव्यवहारोपपत्तौ स्वतस्तद्भेदकल्पनायां गौरवमिति दिक् । (२)+ज्ञानव्यक्तेरेकत्वादेव+भेदप्रतीतिवदुत्पत्तिविनाशप्रतीतिरप्यन्यथासिद्धैवेत्याह—तदुत्पत्तीति। ज्ञानमुत्पन्नं नष्टमिति ज्ञानोत्पत्तिविनाशप्रतीत्योस्त्वित्यर्थः। अवश्यकल्प्येति । अवश्यकल्प्यो यो विषयस्य ज्ञानेन सह सम्बन्धः विषयविषयिभावप्रयोजकः साक्षिणि विषयाकारवृत्तिप्रतिबिम्बितत्वरूपः विषये प्रतिबिम्बाश्रयवृत्तिवैशिष्ट्यरूपस्तद्विषयतया विनाशित्वेन तद्विषयकत्वेन उपपत्तेः—चरितार्थत्वात् । तादृशसम्बन्धसत्त्व एव 'साक्षात्करो-

(१)—रेकज्ञानेति पाठः प्रामादिको गपुस्तके ।

+···+(२) चिह्नितः पाठो नास्ति खपुस्तके

न्यायरत्नावली ।

धीरुपपद्यते, 'अयमिदानीं शिखी जातः, अयं शिखी नष्ट' इति धीवत् विशेषणोत्पत्तिनाशविषयकत्वात् । तथा हि प्रत्यक्षज्ञानस्थले यावन्मनोऽवच्छिन्नचिता घटादेस्सम्बन्धस्तिष्ठति तावदेव 'घटमहं साक्षात्करोमी'ति व्यवहारात्, तादृशसम्बन्धोत्पत्तिनाशावेव 'घटप्रत्यक्षमुत्पन्नन्नष्टमि'ति धीविषयौ। स च सम्बन्धो वृत्तेः चिदुपरागार्थत्वपक्षे मनोऽवच्छिन्नचिति घटादेः स्वावच्छिन्नवृत्तिप्रतिबिम्बितत्वम् । आवरणनाशार्थत्वपक्षे स्वनिष्ठस्याज्ञानविषयत्वस्य प्रयोजकं यत् स्वावच्छिन्नवृत्त्यादिकन्ताद्विशिष्टत्वम्(१) । 'अर्थविवेचनज्ञानामी'तिधीस्थले घटादिविषयकस्यासत्त्वापादकाज्ञानस्य आश्रयत्वाभावः । यावन्मनोऽवच्छिन्नचितिः तावदेव घटादि जानामीति व्यवहारात् तादृशाभावरूपस्य घटादिसम्बन्धस्य उत्पत्तिनाशावेवोक्तधीविषयौ, असत्त्वापादकाज्ञानाश्रयत्वाभावविशिष्टचितः स्वाकारवृत्तिप्रतिबिम्बिताचतस्तादृशाज्ञानाविषयकत्वप्रयोजकविशिष्टचितो वा जानात्यर्थत्वेनोक्तव्यवहारे उक्ताभावस्य विशेषणत्वात् । ननूक्ताभावोऽत्यन्ताभाव एव, अज्ञाननाशो हि न ज्ञानेन जन्यते, किन्तु ज्ञानम् अज्ञानतत्कार्यविरोधीत्युक्तम् तथा च कथं तस्योत्पत्तिविनाशाविति चेत्, सत्यम् । तथापि तत्तत्कालस्योत्पत्तिविनाशसम्भवेन तत्तत्कालाविशिष्टाधिकरणात्मकविशेषणतासम्बन्धविशिष्टरूपेण उक्ताभावस्य उत्पत्तिनाशसम्भवात् तदतिरिक्तनित्यविशेषणतादेरभावीयसम्बन्धत्वपक्षे तत्तत्कालावच्छिन्नरूपेण तस्य तत्सम्भवात्। स हि सम्बन्धो नित्योऽपि प्रतियोगिमति देशे प्रतियोगिसम्बन्धानवच्छेदककालावच्छिन्न एव, तथा च घटाद्याकारमनोवृत्तिकाल एव घटाद्यज्ञानाभावसम्बन्धस्य प्रमातरि

(१)—इति विवेचनमिष्यते इदं जानाति साक्षात्करोति इत्यर्थविवचने जानामि इति घपुस्तके पाठाधिक्यम् ।

न्यायरत्नावली ।

स्वीकारात्, तत्कालावच्छिन्नरूपेण तदुत्पत्त्यादिसम्भवः । सुखादेरपि विद्यमानत्वदशायामेव प्रमातर्यज्ञानाभावस्वीकारात् तत्कालावच्छिन्नस्य तदभावस्य उत्पत्त्यादिसम्भवः । घटादिकार्यं प्रति जीवस्योपादानत्वपक्षे घटादौ विद्यमाने जीवतादात्म्यस्य तदा सदा सत्त्वात् 'सदैव घटादिकं जानामी'ति प्रत्ययापत्तिः, विद्यमानसुखादाविव भासकतानियामकतादात्म्यरूपस्य जीवोपरागस्य सत्त्वात्, अतोऽसत्त्वापादकाज्ञानं तादृशप्रत्ययविरोधिघटाद्यवच्छेदेन स्वीक्रियते । तथा चोक्ताज्ञानाविषयत्वघटित एव जानात्यर्थः, न तु घटादितादात्म्यापन्नजीवचित् अतो नोक्तानुपपत्तिः । यदा तु ब्रह्मैव घटाद्युपादानं तदा उक्ततादात्म्यास्वीकारात् असत्त्वापादकाज्ञाने मानाभावात् तदविषयत्वघटितो जानात्यर्थो न सम्भवतीति घटाद्याकारवृत्तिप्रतिबिम्बितश्चैतन्यं घटादिज्ञानम्, सुखादिप्रतिबिम्बितं सुखादिज्ञानम् । न च जीवस्य जगदुपादानत्वपक्षेऽप्युक्ताज्ञाने मानाभावः, घटाद्याकारवृत्तिप्रतिबिम्बिता चित् घटादिज्ञानमित्यादेर्वक्तुं शक्यत्वात् इति वाच्यम्(१)। जीवोपादानस्य वाचस्पतिसम्मतत्वेन सिद्धान्तविन्दावुक्तत्वात् । वाचस्पतिमते च वृत्त्यादौ चित्प्रतिबिम्बास्वीकारात् आवरणभङ्गार्थत्वमेव वृत्तेस्स्वीक्रियते, न तु प्रतिबिम्बघटितापरागार्थत्वम् । यदि च वाचस्पतिमतेऽपि चिदुपरागो वृत्तेः प्रयोजनम् अन्यथा तन्मते पल्लवाज्ञानस्वीकारे त्वावरणभङ्गस्य प्रयोजनत्वसम्भवेऽपि तदस्वीकारपक्षे प्रयोजनाभावात्, तदा विषयावच्छिन्नचिति जीवचितोर्भेदनाश एव प्रयोजनम् वृत्तेरिति वाच्यम्, सोऽयं वृत्तेरभेदाभिव्यक्त्यर्थत्वपक्षः । असत्त्वापादकाज्ञानास्वीकारपक्षे जीवचैतन्यस्य घटादिना तादात्म्यस्वीकारपक्षे च घटाद्याकारवृत्तिप्र-

(१) अत्र 'इति वाच्यम्' इति पाठस्त्रुटितो गपुस्तके ।

त्तेः, उपाधिपरामर्शमन्तरेण स्वत एव घटात् घटान्तरस्य भेदप्रतीतेः, तत्प्रतिबन्दिग्रहासम्भवात्, आका-

न्यायरत्नावली।

तावच्छिन्नरूपेण सुखादिप्रतिबिम्बितरूपेण च चित उत्पत्त्यादिसम्भवात्। चित्प्रतिबिम्बानङ्गीकर्तुर्वाचस्पतिमते तु वृत्तिविशिष्टरूपेण सुखादिविशिष्टरूपेण च चित (१)उत्पत्त्यादिव्यवहार इति भावः। ननूपाधिविशिष्टरूपेण भेदमादाय भेदबुद्धिमुपपाद्यैकत्वसमर्थने घटादावप्येकत्वं स्यात्तत्राह—उपाधीति। तत्तद्देशकालावीशिष्टत्वरूपोपाधीत्यर्थः। परामर्शमुल्लेखमन्तरेण (२)विना। स्वतः-तत्तद्घटव्यक्तित्वाभ्याम्, तत्प्रतिबन्दिग्रहासम्भवात्—घटादेरप्येकत्वमस्तु भेदधीस्त्वौपाधिकभेदेन उपपादनीयेति प्रतिबन्दिन उपादानासम्भवात्। ननु तथापि पुरुषभेदेन ज्ञानं वाच्यम् चैत्रीयं ज्ञानं न मैत्रेऽस्तीत्यादिप्रत्ययात्तत्राह—आकाशेत्यादि। 'घटाकाशं पटे नास्ति,

नारायणी।

मी'त्यादिप्रतीतेः, असत्त्वे चाप्रतीतेस्तादृशसम्बन्धनाश एव लाघवात्तादृशप्रतीत्योर्विषय इति भावः। अपिना वृत्तिनाशसमुच्चयः। नन्वेवं घटादेरपि 'स घट एतद्घटाद्भिन्न' इति तत्तेदन्तोपाधिपरामर्शेणैव भेदप्रतीतेः स्वरूपत एकत्वमस्तु तत्राह—उपाधीति। तत्तद्व्यक्तिस्वरूपतत्तादेर्वक्ष्यमाणरीत्या स्वरूपत्वात्तदतिरिक्ततत्तद्देशकालविशिष्टत्वरूपोपाध्युल्लेखं विनेत्यर्थः। स्वत एव—तत्तद्व्यक्तित्वाभ्यां, भेदप्रतीतेः—भेदप्रत्यक्षात्। तत्प्रतिबन्दिग्रहासम्भवात्—ज्ञानैकत्वप्रतिबन्दिनो घटादेरेकत्वस्य ग्रहासम्भवात्, घटादीनां भेदप्रतीतेरुपाधिपरामर्शविषयकत्वं विनाप्युपपत्तेर्ज्ञानभेदप्रतीतिसमकक्षत्वाभावादिति संक्षेपः। स्वमते प्रतिबन्दिशङ्कामपाकृत्य परमते तामाह—आकाशेति। घटमठाद्युपाधिपुरस्कारेणैव भिन्नतया प्रतीयमानस्य वस्तुतः स्वतो भेदाङ्गीकारे घटाकाशो

(१)—चितः उत्पत्त्यादिसंभवाच्च घटसुखादिज्ञानस्य उत्पत्त्यादि० इत्यधिको घपुस्तके पाठः।

(२) अन्तरेण नाना इति गपुस्तके पाठः प्रामादिकः। घपुस्तके तु परामर्शमुल्लेखं स्वतस्तु इत्यादिः पाठः।

शकालदिशामपि नानात्वापत्तेश्च, कर्तृत्वादेर्वास्तवत्वे-

न्यायरत्नावली।

तद्घटकाल एतद्घटकालो न, प्राची न प्रतीची'इत्यादिप्रत्ययैराकाशादिस्वरूपभेदो विषयीक्रियताम् । अथ तत्र घटकालोपाधिदिगुपाधिविशेषविशिष्टरूपेण भेदो विषयस्तर्हि प्रकृतेऽपि चैत्रीयत्वादिविशिष्टरूपेणाभावो विषय इति न ज्ञानं नानेति भावः । ननु 'न हि घ्रातुर्घ्रातेर्विपरिलोपो विद्यतेऽविनाशित्वा' दित्यादिश्रुत्या घ्राणजमनोवृत्त्यादिसामर्थ्यरूपघ्रात्यादेरविनाशोक्तेः आत्मनः कृत्यादिजननशक्तिरूपकर्तृत्वादेर्ज्ञानानुच्छेद्यतया सत्यत्वेन कथमात्मनः पारमार्थिकत्वेन धर्माभाववत्त्वम् तत्राह—कर्तृत्वादेरित्यादि । अनिर्मोक्षेति । 'विद्वान्नामरूपाद्विमुक्तः' इत्यादिश्रुत्या सर्वनामरूपोच्छेदस्य ज्ञानाधीनतया बोधितस्य त्यागेत्यर्थः । तथा च न हीत्यादि(१)श्रुतिर्घ्राणेन्द्रियाद्यभिव्यक्तचित्स्वरूपानाशबोधिका, अत एव 'न तु तद्द्वितीयमस्ति ततोन्यद्विभक्तं यज्जिघ्रे'दित्याद्युत्तरवाक्येन चिदन्यस्य विषयतदाकारवृत्तितत्साधनेन्द्रियाभावेन घ्राणजप्रत्यक्षाभावो न तु चिदभावादिति उक्तमिति भावः । अथवा कर्तृत्वादिधर्मोत्पत्तिनाशाभ्यामात्मन उत्पत्त्याद्यावश्यकत्वे कथं नित्यज्ञानरूपता तत्राह—कर्तृत्वादेरिति । तथा च मिथ्याधर्मोत्पत्त्या-

नारायणी।

मठाकाशाद्भिन्नः, पूर्वकालो नोत्तरकालः, प्राची न प्रतीचीत्यादिप्रत्ययैराकाशकालदिशामपि स्वरूपतो नानात्वापत्तेरित्यर्थः । ज्ञानैकत्वनित्यत्वे प्रसाध्य निर्धर्मकत्वसाधकं 'यदि वस्तुतः कर्तृत्वादिरूपधर्मवान्स्यात्तदा प्रागभावासहवृत्तियावद्गुणनाशस्य धर्मिनाशनान्तरीयकत्वात्कर्तृत्वादेरनिवृत्त्या अशेषगुणनिवृत्तिरूपमोक्षभागी न स्यादि'ति तर्कान्तरमाह—कर्तृत्वादेरिति । कृतिमत्त्वादेरित्यर्थः। आदिपदेन प्रमातृत्वभोक्तृत्वादेः परिग्रहः । अनिर्मोक्षेति । अशेषविशेषगुणनिवृत्तिरूपमोक्षस्यासम्भवप्रसङ्गात् । स्वप्रकाशसुखरूपत्वान्नित्य इत्युक्तम्, तत्र हेतुतावच्छेदकं स्वप्रकाशत्वं

(१)—श्रुतिः प्राणेन्द्रियादि० इत्यादिः पाठः घपुस्तके ।

ऽनिर्मोक्षप्रसङ्गात्, स्वप्रकाशानभ्युपगमे च जगदान्ध्यप्रसङ्गात्, परमप्रेमास्पदत्वेन च तस्यानन्दरूपत्वात्,

न्यायरत्नावली।

दिना नात्मन उत्पत्त्यादीति भावः। ननु स्वप्रकाशसुखरूपत्वेन नित्यत्वं साधनीयं तत्र 'स्वप्रकाशसुखरूप आत्मा यदि नित्यो न स्यात् तदा मोक्षरूपपरमपुरुषार्थो न स्यादि'ति तर्कोऽनुकूलो वाच्यः, स्वप्रकाशत्वे तु किं साधकम्? तत्राह—स्वप्रकाशेत्यादि। चकारस्तुशब्दार्थे। सुखरूपस्यात्मनो यदि स्वप्रकाशत्वं न स्वीक्रियते, तदा जगतः श्रवणाद्यधिकारिमात्रस्य मोक्षबोधरूपपरमपुरुषार्थादर्शनरूपान्ध्यप्रसङ्गः, द्वितीयाभावेन मोक्षरूपात्मसुखस्य परप्रकाश्यत्वासम्भवात्। अप्रकाशमानसुखस्यापुरुषार्थत्वात्। अथवाऽऽत्मनः स्वप्रकाशत्वास्वीकारे जगत्सु सर्वदृश्येष्वान्ध्यस्याप्रकाशनस्य प्रसङ्गः। अप्रकाशेनात्मचैतन्येन दृश्यप्रकाशनासम्भवात्, प्रकाशान्तराणां कल्पने अनवस्थानादित्यर्थः। आस्तां स्वप्रकाशत्वं सुखरूपत्वे को हेतुः? तत्राह—परमप्रेमास्पदत्वेनेति। चकारस्तुशब्दार्थे, माभूवमिति न, किन्तु भूयासं सदेतिच्छा प्रेमा, सा परमा अन्येच्छानधीना, तद्विषयत्वेनात्मनः सुखरूपतासिद्धेः। असुखे हीच्छा सुखरूपफलेच्छाधीनैव न तदनधीना। यद्यपि सुखरूप आत्मा सिद्धः, तथाप्युत्तरकालसम्बन्धविशिष्टरूपेण तस्य भावित्वेनैवेच्छाविषयत्वम्। ननु सुख इव

नारायणी।

साधयति—स्वप्रकाशेति। आत्मनः स्वप्रकाशत्वानङ्गीकारे जगतो-दृश्यजातस्य आन्ध्यप्रसङ्गात्-व्यवहारानुपपत्तेरित्यर्थः। सर्वस्यापि जगतो मायिकत्वेन जडस्य (१)प्रकाशकत्वासम्भवात्, आत्मनोप्यस्वप्रकाशकत्वेन प्रकाशान्तरसापेक्षस्य प्रकाशकत्वायोगाज्जगद्व्यवहारलोपप्रसङ्गात्। दृश्यजातव्यवहारजनकः स्वतः स्फूर्त्तिमानात्मेति यावत्। हेतुं साधयति—परमेति। स्वत इच्छाविषयत्वेनेत्यर्थः। तस्य-आत्मनः, स्वत-

(१) स्वप्रकाशत्वासंभवादिति खपुस्तके

निर्धर्मकनित्यस्वप्रकाशसुखात्मक एवात्मा-इत्याद्याः। तस्मात् परिशेषात् भ्रान्तिरियमिति स्थिते तत्कारणमपि

न्यायरत्नावली।

दुःखाभावेऽपि परमप्रेमदर्शनात् दुःखाभाव एव आत्मा किं न स्यादिति चेन्न । सुखत्वेन ज्ञातत्वमेवोक्तप्रेम्णः प्रयोजकम्, न तु दुःखाभावत्वेन ज्ञातत्वम्, गौरवात्। तथा च सुखाभिव्यक्तिसाधनत्वज्ञानेनैव दुःखाभावे प्रेमेति सुखाभिव्यक्तीच्छाधीनोऽयं परमप्रेमविषय इति परमप्रेमाविषयत्वेन दुःखाभावरूपत्वानुमानासम्भव इति भावः। अत्रेदं पर्यवसितम्। (१)धर्मधर्मिभावानुपपत्तेश्चेत्यन्तं निर्धर्मकेत्यत्र तर्काणां हेतुत्वबोधकम्, नानात्वापत्तेश्चेत्यन्तं तु नित्येत्यत्र, अनिर्मोक्षप्रसङ्गादित्यन्तं तदुभयत्र, परिशिष्टं स्वप्रकाशसुखरूपत्वे हेतुपरम्। तस्मात्-आत्मनः निर्धर्मकत्वेनात्मनि प्रतीयमानस्य मनुष्यादितादात्म्यकर्तृत्वादेर्मिथ्यात्वात्। इयम्-अहं मनुष्यः कर्त्ता भोक्तेत्यादिधीः, तत्कारणं-सविषयकभ्रमस्य परि-

नारायणी।

स्त्वम्-अन्यविषयकेच्छानधीनत्वम्। तथा चायं प्रयोगः।'आत्मा सुखस्वरूपः अन्यविषयकेच्छानधीनेच्छाविषयत्वात्, यन्नैवं तन्नैवम्, यथा पुत्रादयः' तदिच्छायाः स्वीयसुखेच्छाधीनत्वात्, आत्मनि तु स्वत इच्छाविषयत्वं 'माभूवं न किन्तु भूयास'मिति स्वानुभवसिद्धमिति सुखरूपतासिद्धिरिति संक्षेपः। फलितमाह —निर्धर्मकेति। उपसंहरति—तस्मादिति। श्रुतियुक्तिभिरकर्तृभोक्तृरूपतालाभादित्यर्थः। परिशेषात्—(२) स्मृतित्वप्रमातृत्वयोर्बाधात्। इयम्-अहं कर्ता मनुष्य इत्यादिधीः। तत्कारणमपि—भ्रान्तेः कारणमपि, योग्यं—भ्रमत्वनिर्वाहकं परिणामितासमर्थं च किञ्चिद्भावरूपं कल्पनीयम्-अनुमेयम् 'अहं मनुष्य इत्यादिभ्रमः सोपादानकः कार्यत्वाद्घटवदि'त्याद्यनुमानेनानुमेयमिति भावः। नन्वनुमानप्रमाणसिद्धस्य तस्य प्रामाणिकत्वेन सत्यत्वापत्तेर-

(१) धर्मधर्मिभावापत्तेश्चेति सर्वत्र पाठः स प्रामादिक एव मूले धर्मधर्मिभावानुपपत्तेश्चेत्यस्यैव सत्त्वात् तथैव ग्रन्थसङ्गतेश्चेति।

(२)—स्मृतित्वप्रमात्वयोर्बाधात् इति खपुस्तके पाठः युक्तश्च।

योग्यं किञ्चित्कल्पनीयम्। कल्प्यमानं च तदद्वितीयात्मनि अध्यस्ततयैव धर्मिग्राहकमानेन सिद्ध्यतीति 'न जानामी'ति साक्षिप्रतीतिसिद्धमनिर्वाच्यमज्ञानमेव तत्। न

न्यायरत्नावली।

णामिकारणम्, योग्यं-परिणामितायोग्यम्। ननु तस्य कल्पनारूपमानविषयत्वेन सत्त्वादद्वैतश्रुतिविरोधः तत्राह—कल्प्येत्यादि। यतो अद्वितीयत्वेन श्रुत्यनुमानसिद्ध आत्मनि कल्प्यमानम् अतत्स्वरूपात्मकधर्मिग्राहकमानेन कल्पनारूपेण तदध्यस्तं मिथ्याभूतमेव कल्प्यं भवतीत्यर्थः। इति न जानामीत्यादि। यतः कल्पनया मिथ्यात्वेन सिध्यति, अतोऽनिर्वाच्यं तद्वस्तु अहमात्मानं न जानामीत्याकारसाक्षिसिद्धाज्ञानाभिन्नमेवेत्यर्थः। तस्य साक्षिसिद्धाज्ञानैक्योक्तेः फलमाह—न चेत्यादि। इदम्-उक्तसा-

नारायणी।

द्वैतानुपपत्तिस्तत्राह—कल्प्यमानमिति। श्रुतियुक्तिसिद्धाद्वैतान्यथानुपपत्त्या द्वैतभ्रमकारणतया कल्प्यमानमित्यर्थः। अद्वितीयात्मनि—द्वितीयसामान्याभाववति, धर्मिग्राहकमानेन—अद्वितीयत्वान्यथानुपपत्तिगर्भिततत्कल्पनिकानुमानेन, अध्यस्तमेव—प्रतीतिमात्रशरीरमेव, सिध्यति—अनुमितिविषयो भवति। अध्यस्ततयैवेति पाठे तु कल्पितत्वेनैव सिध्यति, कल्पितत्वप्रकारकानुमितिविषयो भवतीति यावत्। अद्वैतश्रुत्या सत्यत्वबाधादिति भावः। न केवलमानुमानिकं किन्तु प्रत्यक्षसिद्धमपीत्याह—न जानामीति। भ्रममात्रशरीरत्वात् जानामीत्याकारसाक्षिरूपप्रतीतिविषयसदसद्भिन्ना(१)ज्ञानमेव तत्कल्प्यमानम्, तथाच प्रत्यक्षानुमानयोः एकविषयकत्वे लाघवान्न जानामीति पदम् अधर्मादिपदवद्भावपरमेव नाभावपरमिति भावः। ज्ञानाभावसमनियतस्य ज्ञानाभावरूपतायामपि लाघवमस्तीत्याशङ्क्य प्रत्यक्षप्रतीतेरभावपरत्वं कण्ठतो वारयति—नचेदमिति। इदम्-उक्तप्रतीतिसिद्धमज्ञानम्, अभावरूपम्-ज्ञानाभावरूपम्, ज्ञानस्य-ज्ञानत्वेन प्रतिपादितसाक्षिव्यक्तेः, नित्यत्वेन-ध्वंसप्रागभावाप्रतियोगित्वेन, तदभावानुपपत्तेः-स्वरूपज्ञानाभावस्यासम्भवात्।

(१) सदसद्भिन्नाज्ञानाभिन्नमेव तत्कल्प्यमानमित्यर्थः

चेदमभावरूपम् । ज्ञानस्य नित्यत्वेन तदभावानुपपत्तेरित्युक्तत्वात् । धर्मिप्रतियोगिज्ञानाज्ञानाभ्याञ्च व्याघा-

न्यायरत्नावली।

क्षिसिद्धम् अज्ञानम्—अभावरूपम्-आत्मज्ञानाभावरूपम् । ज्ञानस्य-आत्मव्यवहारप्रयोजकसाक्षिरूपस्य । (१)तदभाव इति । आत्मव्यवहारप्रयोजकज्ञानाभावेत्यर्थः । नन्वात्मविषयकज्ञानाभावरूपं तत्, साक्षिज्ञानन्तु न तथा तत्राह—धर्मीत्यादि । 'आत्मानमहं न जानामीति' प्रत्यये आत्मज्ञानाभावस्याहमर्थे धर्मिणि विषयीकरणे अभावबुद्धौ धर्मिप्रतियोगिज्ञानयोर्हेतुत्वात् पूर्वं तयोस्सत्त्वे अहमर्थे आत्मज्ञानाभावस्यासत्त्वादुक्तप्रत्ययस्याप्रमात्वापत्तिः । पूर्वं तयोरसत्त्वे कारणाभावादुक्तप्रत्यय एव नोत्पद्यते । अथ तयोर्नाशोत्पत्तिक्षणे उक्तप्रत्ययोत्पत्तौ नोक्तदोष इति चेन्न । तादृशज्ञानयोस्स्वरूपसतोरेवाभावधत्वधीप्रतिबन्धकत्वेन उक्तक्षणेऽपि तदनुपपत्तेः । तदुक्तं—'न हि जानन्नेव न जानामीति प्रत्येती'ति । उक्तप्रत्ययस्य धर्मिप्रतियोगिविषयकत्वतदभावाभ्यां व्याघातस्यापरिहाराच्च । यथा ह्युक्तप्रत्ययस्य उत्पत्तिक्षणे पूर्वोत्पन्नयोस्तयो-

नारायणी ।

अस्तु तर्हि वृत्तिज्ञानाभाव एव तद्विषयस्तत्राह-धर्मीति । धर्मी अहमर्थः प्रतियोगिज्ञानं तयोर्ज्ञानसत्त्वे ज्ञानसामान्याभावस्यासिद्धतया तादृशप्रत्ययस्याप्रमात्वप्रसङ्गो व्याघातः । ज्ञानासत्त्वे तु न जानामीतिज्ञानाभावप्रमाया अनुत्पत्तिप्रसङ्गो व्याघातः । धर्मिप्रतियोगिनोर्ज्ञानस्याभावबुद्धिकरणत्वात् तयोर्ज्ञानं विना तादृशप्रमोत्पत्तेरसम्भवादित्यर्थः । ननु सामान्यतो न 'जानामीत्यहमज्ञ' इत्यादिप्रतीतिर्नास्त्येव किं'न्त्वहमात्मानं न जानामी'त्याद्याकारिकैव, तस्याश्चात्मादिज्ञानप्रागभाव एव विषयो लाघवादिति नाज्ञानसिद्धिरिति चेन्न । यथाकथंचित्यत्किञ्चिदात्मज्ञानव्यक्तिसत्त्वे सामान्यतो ज्ञानप्रागभावविषयकत्वस्य वक्तुमशक्यत्वात् ।

(१) ज्ञानाभाव इति प्रतीकः सर्वत्र दृश्यते, मूलेऽत्रैतादृशं पदं न विद्यते अतःतदभावानुपपत्तेरिति पदघटकस्य तदभाव इत्यस्य ज्ञानाभाव इति प्रतीको बोध्यः ।

तापत्तेः । नापि भ्रमसंशयतत्संस्कारपरम्परारूपम् । अपरोक्षत्वात्, अतीतानागतभ्रमसंशयतत्संस्काराणा(१)-

न्यायरत्नावली ।

स्सत्त्वे तयोरात्मविषयकत्वेन व्याघातः, तथोक्तप्रत्ययस्यैव धर्मिप्रतियोगिनोरात्मघटितत्वेनात्मविषयत्वात् वर्तमानमात्मज्ञानाभावं गृह्णतः उक्तप्रत्ययस्यानुपपत्तिरिति भावः। ननु निर्विकल्पकात्मज्ञानाभावरूपत्वे नोक्तदोष इति चेन्न । तादृशस्य आपातात्मज्ञानस्य सत्त्वेप्यात्माज्ञानप्रत्ययोदयात् । न च मुक्त्युपधायकज्ञानाभावरूपत्वे न दोष इति वाच्यम् । मुक्त्युपधायकत्वमविषयीकुर्वतोऽपि तादृशप्रत्ययस्योत्पत्तेः । नापीति । इदमित्यनुषज्यते । भ्रममात्रं नाज्ञानम्, दिनद्वयादिवर्तिन एकाज्ञानस्य प्रत्यभिज्ञानात्, अतो भ्रमादिपरम्परारूपं वाच्यम्, तथा च नापरोक्षत्वसम्भव इत्याशयेनाह-- अतीतेत्यादि । ननु सति भात्यपि आत्मनि 'नास्ति न भाती'त्यादिव्यवहारोत्पादकत्व'मस्ति भाती'तिव्यवहाराभावप्रयोजकत्वञ्चावरणात्मकत्वम्, तच्च भ्रमादेरपि सम्भवति, अपरोक्षं तु अतीतानागतांशे न स्वीक्रियते, किन्तु वर्तमानभ्रमाद्यंशे अत आह--

नारायणी ।

विशेषज्ञानत्वग्रहं विनापि तादृशप्रतीतेर्विशेषव्यक्तिप्रागभावविषयकत्वस्याप्ययोगादित्यन्यत्र विस्तरः । साङ्ख्यमतं निराकरोति नापीति । इदमित्यनुषज्यते । भ्रममात्रं नाज्ञानं दिनद्वयादिवर्त्तिन एकाज्ञानस्य प्रत्यभिज्ञानात् अतो भ्रमादिपरम्परारूपं वाच्यं तथाच नापरोक्षतया प्रतीयत इत्याशयेनाह—अतीतेति । ज्ञातुमशक्यत्वात्—न जानामीत्यपरोक्षतया ग्रहीतुमशक्यत्वात् । ननु 'सुरभि चन्दनम् 'इत्यादौ सौरभांशे परोक्षमपि चन्दनांशे ऽपरोक्षं यथा तथा न जानामीत्यादिकमप्यतीतादयंशे परोक्षमपि वर्तमानाद्यंशेऽपरोक्षमतो ज्ञानस्य भ्रमाद्यात्मकत्वे न कि-

(१) परोक्षत्वेनेति कुखपुस्तकयोः पाठः तथात्वे पूर्वेणान्वयः, अपरोक्षत्वेनेति पाठ उत्तरपदे इति द्वयोः पाठयोः साधुत्वम् ।

श्चापरोक्षत्वेन ज्ञातुमक्यत्वात् । आवरणात्मकत्वात् भ्रमाद्युपादानत्वाच्च आत्मनो निर्विकारत्वात् । अन्तः-

न्यायरत्नावली ।

भ्रमाद्युपादानत्वादिति । नन्वात्मैवोपादानमास्ताम् तत्राह—आत्मन इति । निर्विकारत्वादपरिणामित्वात् । तथा च परिणामिकारणमनात्मैवेति भावः । तज्जन्यत्वादिति । तथा च प्राथमिककार्यादिसर्वकार्येषु एकमेव परिणामिकारणं कल्प्यते, (१)ईश्वरस्यैककर्तृवत् । न च प्रतिसर्गं प्राथमिककार्येषु निमित्तकारणतया कल्प्तानां संस्काराणामेव परिणामित्वसम्भवादतिरिक्तैककारणकल्पने गौरवमिति वाच्यम् । वीक्षणरूपाद्यकार्ये वीक्षणसंस्कारो वा परिणामिकारणम् ईश्वरप्रसाद(२)रूपमदृष्टं वेत्यत्र विनिगमकाभावात् । ननु वीक्षणत्वावच्छिन्नं प्रति निमित्ततया नादृष्टं कल्प्तम् ,किन्तु ईक्षणाकाशादिसाधारणरूपावच्छिन्नं प्रति, तथा च तादृशरूपविशिष्टे अदृष्टस्य परिणामित्वमस्तु, वीक्षणत्वावच्छिन्नं प्रति निमि-

नारायणी ।

मपि बाधकमित्यत आह—आवरणेति । 'अज्ञानेनावृतं ज्ञान'मित्यादिना प्रतीयमानावरणशक्त्यात्मकत्वादित्यर्थः । अनेकभ्रमादिव्यक्तीनामावरणात्मकल्पनाऽपेक्षयाऽऽवरणात्मकत्वेनैकव्यक्तिकल्पनाया एव लघीयस्त्वादिति भावः । ननु कल्प्यापेक्षया कल्प्तभ्रमवृत्तीनामेव विरुद्धव्यवहारजनकत्वरूपावरणात्मत्वमुचितं धर्मिकल्पनातो धर्मकल्पनाया एव लघुत्वादित्यत आह—भ्रमेति । भ्रमादेः कार्यत्वेन सोपादानत्वावश्यकत्वात् तदुपादानभूतैकव्यक्तिरेवाज्ञानपदवाच्या लाघवात् इति भावः । नन्वात्मैवास्तूपादानं तत्राह—अतमन इति ।। अनात्मनामधिष्ठानभूतेत्यर्थः । निर्विकारत्वात्--अपरिणामित्वात् । तर्ह्यन्तःकरणमेवोपादानमस्तु भ्रमाश्रयतया तस्य कल्प्तत्वादिति तत्राह--अन्तः करणादेरिति । आदिपदेन प्राथमिकवीक्षणरूपकार्यपरिग्रहः । जन्यत्वात्--कार्यत्वात् । तथाच प्राथमिककार्येष्वपि वीक्षणान्तःकरणादिषु सर्वेषु परिणामिकारणतयाऽवश्यकल्पनीयाज्ञानस्य भ्रमादिष्वपि परिणामित्वं कल्प्यते लाघ-

(१)—एककर्तृकत्ववत् इति धपुस्तके । (२)—प्रसादकोपरूपमित्यादिः घपुस्तके ।

करणादेश्च (१)तज्जन्यत्वात् 'देवात्मशक्तिं स्वगुणैर्निगूढा'-

न्यायरत्नावली ।

त्तया नियतपूर्ववृत्तित्वेन कल्पितस्य ईक्षणसंस्कारस्यैव परिणामितयाऽनन्यथासिद्धत्वं लाघवात् कल्पयितुं युक्तमिति चेन्न । गुणत्रयात्मकमज्ञानं सृष्टिकाले वीक्षणरूपेणाकाशादिरूपेण विष(२)यभूतगुणत्रयात्मकेन परिणतं प्रलयकाले समीभूतगुणत्रयात्मकेन ईक्षणाकाशादिसूक्ष्मावस्थारूपेण परिणमते । तथा चावस्थाभेदेऽप्यवस्थावतोऽनुगतरूपस्य न भेदोऽस्ति । पूर्वं तादृशमिदानीमीदृशं जातमिति प्रत्यभिज्ञानात्, 'तद्धेदं तर्ह्यव्याकृतमासीत्' 'भूतग्राम स्स एवायं भूत्वा भूत्वा प्रलीयते' इति श्रुतिस्मृतिभ्याञ्च । ततश्च नानासर्गीयक्षणेषु यदनुगतं सत्त्वगुणस्वरूपं, तस्यैव तेषु सात्त्विककार्यान्तरेषूपादानत्वं युक्तम् । तज्जातीयकार्यं प्रति अनुगतत्वस्यैव तदुपादानत्वव्यवस्थापकत्वात् । एवं राजसतामसकार्येषु रजस्तमोरूपयोरुपादानत्वं युक्तम् । अत एव गुणत्रयस्वीकारे गौरवात् एकगुणोऽस्तूपादानमित्यपास्तम् । एकगुणस्य सर्वकार्येषु दृक्स्वरूपेण एकेनानुगत्यभावेन विलक्षणगुणत्रयविशिष्टेषु तादृशगुणानामुपादानत्वावश्यकत्वात् । यत्तु प्रतिसर्गीयवीक्षणादिषु अननुगतं वीक्षणादिसंस्काररूपं तस्य वीक्षणसंस्कारत्वाद्यनुगतरूपेण निमित्तत्वमेव, तस्मात् गुणत्रयरूपमज्ञानमेव सर्वकार्योपादानमिति भावः । उक्तन्यायानुग्राह्यां श्रुतिमाह—देवात्मशक्तिमिति । देवस्य-सृष्ट्यादिक्रीडावतो ब्रह्मणः, स्वाश्रयां—स्वविष-

नारायणी ।

वादिति भावः । बीजाङ्कुरन्यायेनान्तःकरणोत्संकारणामेव कारणत्वसंभवान्नैकमज्ञानं प्रामाणिकमत आह—देवेति । देवस्य स्वप्रकाशस्य ब्रह्मणः

(१) जन्यत्वात् इति कखपुस्तकयोः ।

(२) विषमीभूतगुणेत्यादि अत्र साधु लक्ष्यते, अग्रे प्रलयकाले समीभूतेत्यादिना तथैव ग्रन्थसङ्गतेः । पाठस्तु सर्वत्र विषयभूतेत्यादिरेव ।

मिति गुणवत्त्वश्रुतेश्च 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्, इन्द्रो मायाभिः पुरुरूप ईयते, अजामेकां

न्यायरत्नावली।

यिकाम्, शक्ति-कार्यजननसामर्थ्यरूपां मायाम्, स्वगुणैः-स्वात्मसत्त्वादिगुणैः, निगूढां-घटिताम्। अथवा स्वधर्मैर्वीक्षणाकाशादिसंस्कारैर्विशिष्टाम्। गुणवत्त्वश्रुतेः-गुणत्रयरूपत्वश्रुतेः। अथवेत्यादिव्याख्याने संस्कारवत्त्वश्रुतेः पूर्वं 'किं कारण'मित्यादिप्रश्नमुपन्यस्यते। 'ते ध्यानयोगानुगता अपश्यन्नि'त्यादिवाक्यस्योक्तत्वात्। कार्यजननोद्यतस्य ब्रह्मणः सामर्थ्यरूपा या माया सर्वकार्येषु कारणम्, सा च त्रिगुणीरूपेत्युक्तम्। अथवेत्यादिव्याख्याने संस्काराश्रयत्वोक्त्या संस्काराणां नोपादानत्वमित्यपि ज्ञापितम्। प्रकृतिं-सङ्कोचकाभावात् सर्वकार्योपादानम्। इन्द्रः-अपरिच्छिन्नत्वेन सर्वोपाधिसम्बन्धात् नानारूपप्राप्तौ प्रभुरात्मा, मायाभिः-अविद्याभिर्हेतुभिः, पुरुरूपः—नानारूप इत्यर्थः, ईयते-ज्ञायते। एकाविद्यापक्षे अदृष्टा-

नारायणी।

आत्मशक्तिं निजशक्तिं स्वगुणैः स्वावयवात्मकगुणैः सत्त्वरजस्तमोरूपैः निगूढां व्याप्ताम्, अत्र पूर्वार्धं 'किं कारणं ब्रह्मे'त्युक्त्वा 'ते ध्यानयोगानुगता अपश्यन्नि'ति। तथाच मायाया एव सकलकारणत्वलाभान्न केवलं कार्याणामेवान्योन्यबीजाङ्कुरन्यायेन कारणतेति संक्षेपः। ननु सा शक्तिरीश्वरज्ञानादिरूपैवास्तु तत्राह--गुणवत्त्वेति। स्वगुणैर्निगूढामिति गुणवत्त्वश्रुत्या न ज्ञानादिरूपा (१)गुणवत्त्वाभावादिति भावः। ननु स्वगुणैरित्यस्य स्वस्य जन्यैर्गुणैर्जीवादृष्टादिभिर्विशिष्टामित्यर्थः, तथाच नाभीप्सितार्थसिद्धिरित्यतः श्रुत्यन्तरमाह—मायामिति। अजामेकामिति श्रुतिप्रदिपादितसत्त्वरजस्तमोगुणात्मिकां मायाम्, प्रकर्षेण करोतीति प्रकृतिः कारणम्, मायिनं मायाश्रयं मायाविषयं वा। नन्वत्रापि मयू ज्ञान इति धात्वनुसारात् ज्ञानात्मिकैव शक्तिरस्त्वित्यतः श्रुत्यन्तरमाह—इन्द्र इति। इन्द्रः परमेश्वरो निरुपाधिः, मायाभिः--सत्त्व-

(१) गुणवत्त्वाभावादिति। ज्ञानस्य परमते गुणत्वेन गुणवत्त्वं न भवति गुणे गुणानङ्गीरादिति भावः।

हि प्रत्यूढाः, नीहारेण प्रावृताः, भूयश्चान्ते विहवमाया-

न्यायरत्नावली।

दिसहकारिकारणानां नानात्वात् तद्घटितरूपेणाविद्याया नानात्वं बोध्यम्। 'प्रजा अहरहर्ब्रह्म गच्छन्त्यो न विन्दन्ति अनृतेन हि प्रत्यूढा' इत्यत्र अहरहस्सुषुप्तौ गच्छन्त्योऽपि स्थूलसूक्ष्मोपाधिलयेन तदभिमानकृतब्रह्मभेदशून्या अपि ब्रह्म न जानन्ति, हि—यस्मात्, अनृतेन—मिथ्याभूताज्ञानेन, प्रत्यूढाः—आच्छादितस्वरूपका इति व्याख्यातम्। 'न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव। नीहारेण प्रावृता' इत्यत्र तमात्मानं न यूयं विदाथ, य आत्मा इमाः प्रजाः जनयामास, कुतो न विद्मः तत्राह—अन्यदित्यादि। अन्यत्—आत्मनो विलक्षणमसद्रूपम्, अन्तरम्—आवारकं व्यवधायकम्—आत्मनि भात्यपि स न भातीति व्यवहारजनकं स भातीति व्यवहारप्रतिबन्धकञ्च, बभूव—अनादिकालं व्याप्यास्ति। ननु तस्यानादित्वमिवाविनाशित्वमपि स्यात् तथा च अस्मान् प्रति तदुपदेशो व्यर्थस्तत्राह—नीहारेणेति। तस्माद्यूयं नीहारसदृशेन

नारायणी।

रजस्तमोरूपाभिः शक्तिभिः, पुररूपः—बहुरूपः, ईयते—गम्यते ज्ञायत इति यावत्। 'अजामेका'मित्यादिना गुणत्रयात्मिकायाः शक्तेरेवोपक्रमात्। ननूक्तमजामेकामित्यत्र लोहितशुक्लकृष्णशब्दानामिच्छाज्ञानकृतिपरत्वमत आह श्रुत्यन्तरम्—अनृतेति। 'तद्यथा हिरण्यनिधिं विहितमक्षेत्रज्ञा उपर्य्युपरि सञ्चरन्तो न विन्देयुरेवमेवेमाः सर्वाः प्रजा अहरहर्ब्रह्म गच्छन्त्यो न तं विन्दन्ती'ति पूर्वार्धम्। अयमर्थः। प्रजाः जीवाः अहरहः सर्वदा सुषुप्तौ ब्रह्म गच्छन्त्योऽपि स्थूलसूक्ष्मोपाधिलयेन तदभिमानकृतब्रह्मभेदशून्या अपि ब्रह्म न जानन्ति हि यस्मात् अनृतेन मिथ्याभूतेनाज्ञानेन प्रत्यूढाः आच्छादितस्वरूपकाः। 'ऋतं ब्रह्म, सत्यं ज्ञान'मिति श्रुतेः। तद्विन्नमज्ञानमनृतम् 'अज्ञानेनावृतं ज्ञानमि'ति भगवदुक्तेरिति भावः। ननु ऋतशब्दस्य 'ऋतं सत्त्वं तथा धर्मः' इति धर्मशास्त्रे धर्मेऽपि प्रयोगादनृतपदेन तद्विन्नं दुष्कृतमेव ग्राह्यं तथाच तेनाच्छादिताः प्रतिबद्धाः ब्रह्म न जानन्तीति तत्रार्थोऽतः कथमज्ञानसिद्धिस्तत्र श्रुत्यन्तरमाह—

न्यायरत्नावली ।

तेनान्तरेणाच्छादिताः, तथा च नीहारवदेव तस्य विनाशित्वपावारकत्वादिति व्याख्या । 'तस्याभिध्यानाद्योजनात्तत्त्वभावात् भूयश्चान्ते विश्वमायानिवृत्ति'रित्यत्र तस्य—आत्मनः अभिध्यानात्—तत्त्वमस्यादिवाक्यतात्पर्यविषयत्वेन (१)तदनुकूलतर्केण च चिन्तनात् श्रवणमननाभ्यामिति यावत् . योजनात्-योगात् निदिध्यासनादिति यावत् , तत्त्वभावात्-साक्षात्काररूपतत्त्वप्राप्तेश्च, विश्वमायायाः-असत्त्वापादकाभानापादकरूपानेकाज्ञानस्य निवृत्तेः, अन्ते-प्रारब्धभोगान्ते, भूयः-पुनः, देहादिकार्यरूपविश्वमायानिवृत्तिरिति

नारायणा ।

नीहारेणेति । 'न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूवे'ति पूर्वार्धम् । 'जल्प्या चासुतृप उक्थशासश्चरन्ती'त्युत्तरार्धम् । अयमर्थः । तमात्मानं यूयं न विदाथ न वेत्थ य इमाः प्रजाः जजान जनयामास, कुतो न विद्मस्तत्राह—अन्यदन्तरं परमात्मनोऽन्यदावरकं बभूव अस्ति, कथं स्वप्रकाशस्यावरकमस्ति--नीहारेणेति । तुषारेणेव सूर्यवदाच्छादिता इत्यर्थः । (२)प्रकाशमपि प्रकाशकस्य वस्तुमाहात्म्यादाच्छादकं भवत्येव अनुभवसिद्धे तर्कानवकाशादित्यर्थः । न केवलमज्ञानेनाच्छादिताः किन्तु अन्येनापीत्याह—जल्प्येति । जल्पनं जल्पिः कुतर्कस्तेनेत्यर्थः । न केवलं तैरेवाच्छादिताः किन्तु कर्मवासनयापीत्याह—उक्थेति । उक्थं कर्म शंसन्तीत्युक्थशासः कर्मकुर्वाणाः सन्तः चरन्ति भ्रमन्ति । अतो बहिर्मुखत्वादात्मस्वरूपं न जानन्तीत्यर्थः । ननु मिथ्याज्ञानवासनैव प्रतिबन्धकत्वेन तत्रार्थोस्त्वित्यतः श्रुत्यन्तरमाह—भूय इति । 'तस्याभिध्यानाद्योजनात्तत्त्वभावादि'ति पूर्वार्धम् । तस्य आत्मनः अभिध्यानात् चिन्तनात् श्रवणमननाभ्यामिति यावत्, योजनात् यागात् निदिध्यासनात्, तत्त्वभावात् साक्षात्काररूपतत्त्वप्राप्तेः, विश्वस्य हेतुभूताया आवरणात्मिकाया मायाया निवृत्तिः । अन्ते प्रारब्धभोगान्ते भूयश्च-

(१) तदनुसारियुक्तिविषयत्वेनेति पाठान्तरं घपुस्तके ।

(२) प्रकाशकस्य=स्वस्याज्ञानादेः प्रकाशकस्य ब्रह्मणः=प्रकाशमपि अज्ञानम् (अज्ञानमिति कर्तृपदाध्याहारः) आच्छादकं भवत्येव 'अहमज्ञ' इति प्रकाशमान एव आत्मनि अज्ञानानुभवात् 'नहि दृष्टेऽनुपपन्नं नामे'ति न्यायादित्याशयः ।

निवृत्तिः' इत्यादिश्रुतिभ्यश्च मायाऽविद्या अनिर्वाच्यमनृतं तत्त्वज्ञाननिवर्त्यश्च अज्ञानमेव स्वपराध्यासे कार-

न्यायरत्नावली।

व्याख्या। आदिपदेन 'अमूढो मूढ इव व्यवहरन् आस्ते मायय्यैव, अविद्यायामन्तरे वर्तमाना' इत्यादिश्रुतिसङ्ग्रहः। मायाविद्येत्यादि। मायादिरूपमेवाज्ञानं स्वपराध्यासकारणम्। श्रुतिभ्यश्चेति चकारात् पूर्वोक्तकल्पनाया लाघवज्ञानसाक्षिप्रत्यक्षसनाथायाः समुच्चयः। तत्र मायाशब्देन सदसद्विलक्षणत्वरूपानिर्वाच्यत्वस्य निरूपणानर्हविचित्रकार्यजनकत्वस्य लाभः, अनृतादि(१)शब्देना-

नारायणी।

पुनरपि (२)विक्षेपरूपाया निवृत्तिरित्यर्थः। तथाच ज्ञानादज्ञाननाशद्वारा जगन्नाशोक्तेरनाद्यज्ञानमेवावरकं जगदुपादानं सिध्यति उपादाननाशेनैवोपादेयनाशसम्भवादिति भावः। ननु निवृत्तिपदेन तरणमात्रं लभ्यते न नाशः 'मायामेतान्तरन्ती'ति भगवदुक्तेः 'तरति शोकमात्मवि'दिति श्रुतेश्च, तरणं वा सम्बन्धमात्रमतो न ज्ञाननाश्यमज्ञानं तत्र सिद्ध्यतीत्यत आह—आदीति। (एवमेवैषा माया स्वाव्यतिरिक्तानि परिपूर्णानि क्षेत्राणि दर्शयित्वा) 'जीवेशाभासेन करोति माया चाविद्या च स्वयमेव भवती'त्यादिश्रुतिपरिग्रहः। श्रुतिभ्यश्चेति चकारात् 'ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः' इत्यादिस्मृतेरज्ञानं विना जीवस्यानवच्छिन्नानन्दाऽप्रकाशानुपपत्तिरूपार्थापत्तेश्च परिग्रहः। तथाच माया न ज्ञानादिरूपा किन्तु ज्ञाननाश्याऽविद्यैव, श्रुत्यैव मायाविद्ययोरेकत्वसमर्थनादिति भावः। तस्मात्तत्तन्मतबाधेन वेदान्तमतसिद्धा मायैव जगदुपादानत्वेन श्रुतिसिद्धेत्याह—मायेत्यादि। सत्त्वादिगुणात्मिका न ज्ञानात्मिका किन्तु अविद्या विद्यानाश्या अतो न सा साङ्ख्याभिमता प्रकृतिः किन्त्वनिर्वाच्यमज्ञानमेवेत्यन्वयः। तदपि न मिथ्याज्ञानवासनारूपं किन्तु अनृतं सद्भिन्नम्। तदपि न दुष्कृतं किन्तु तत्त्वज्ञाननिवर्त्यं साक्षादधिष्ठानसाक्षात्कारनाश्यमित्यर्थः। कार्यादिकं च नैतादृशं परेषा-

(१) प्रावृतादिशब्देनेत्यादि—गपुस्तके पाठान्तरम्।

(२) विशेषरूपया इति कपुस्तके शोधितोपि पाठः अशुद्ध एव।

णम् । न चात्माश्रयादिदोषप्रसङ्गः । अनादित्वेन (१) तन्निरासात्, अनादित्वेनोत्पत्त्यभावात्, स्वप्रकाशात्मन

न्यायरत्नावली ।

च्छादकत्वरूपाविद्यात्वस्येति भावः । अनादित्वेनेति । आवरणविक्षेपरूपकार्ययोः प्रवाहरूपेणानादित्वात् तत्कारणस्याकार्यत्वरूपमनादित्वं युक्तमिति भावः । ननु तथाप्यज्ञानस्य ज्ञानरूपाध्यासे दोषादिकारणापेक्षणात् आत्माश्रयादिः स्यादेव तत्राह—स्वप्रकाशात्मन इत्यादि । उत्पत्तौ ज्ञप्तौ वा आत्माश्रयादिकं सम्भाव्यते, तत्र ज्ञप्तेरनादित्वेन नाद्यम् । ज्ञप्तेरनादित्वेऽपि यदि स्वप्रकाशत्वं न स्यात् तदा तस्यैव तज्ज्ञप्तिरूपत्वे आत्माश्रयः, तयोः परस्परज्ञप्तिरूपत्वे अन्योन्याश्रयः, ज्ञानान्तरापेक्षायामनवस्था स्यात्; स्वप्रकाशत्वे तु न तदिति भावः । एवञ्च स्वपराध्यासे कारणमित्यस्य स्वपराध्यासे स्वान्यपरिणामिकारणानपेक्षमित्यर्थ इति ध्येयम् । चित्प्रतिबिम्बाध्यासद्वारा मनसः प्रमातृत्वमिति यदुक्तं तत्र 'ननु अध्यासोऽपि नोपपद्यत' इत्यादिनोद्भावितदोषाणां निरसनं कृत्वा इदानीं तदेव प्रमातृत्वं विस्तरेणोपसंहरति—

नारायणी ।

मिति भावः । पूर्वोक्तात्माश्रयादिदोषं परिहरिष्यन्नाह—न चेति । अनादीति । स्वरूपस्य ज्ञप्तेश्चानादित्वादुभयत्रापि नात्माश्रयादिप्रसक्तिरित्याह—अनादित्वेनेति । अज्ञानस्यानादित्वेनैवेत्यर्थः । तन्निरासात्—आत्माश्रयादिनिरासात् । एतेनोत्पत्तौ तन्निरासः ज्ञप्तावप्याह—स्वप्रकाशेति । स्वप्रकाशसाक्षिण एव तज्ज्ञप्तिरूपत्वात्—अज्ञानाध्यासरूपत्वात् । तथाच तस्याप्यनादित्वान्न तत्राप्यात्माश्रयादिदोषः उभयत्र कारणस्यानपेक्षणादिति भावः । ननु तर्हि न कल्पितत्वमज्ञानस्य जन्यस्यैव रजतादेः कल्पितत्वदर्शनात्, जन्यत्वे चानादित्वभङ्ग इति चेन्न । बाधितत्वरूपकल्पितत्वस्यैव तत्राङ्गीकारात् कल्पितशब्दस्योत्प्रेक्षामात्रपरत्वादित्यन्यत्र विस्तरः। चित्प्रतिबिम्बाध्यासद्वारा मनसः प्रमा-

(१) अनादित्वेनैवेति कखपुस्तकयोः

एव तज्ज्ञप्तिरूपत्वात् । तेनाज्ञानाध्यासविशिष्टचैतन्येऽहङ्काराध्यासः । तद्विशिष्टे कामसङ्कल्पादीनामहङ्कारधर्माणामिन्द्रियधर्माणाञ्च काणत्वबधिरत्वक्लीबत्वादीनामध्यासः । इन्द्रियाणां तु परोक्षत्वान्नापरोक्षधर्म्यध्यास

न्यायरत्नावली ।

तेनाज्ञानेत्यादि। तेन–अध्यासस्य निर्दोषत्वसमर्थनेन, अज्ञानाध्यासविशिष्टे–अज्ञानप्रतिबिम्बितत्वविशिष्टे, अहङ्काराध्यासः–मनोध्यासः। तद्विशिष्टे–मनोविशिष्टे । इन्द्रियधर्माणामिति । चक्षुषः काणत्वं रूपाद्यग्राहकत्वम् , श्रोत्रस्य बधिरत्वं शब्दाद्यग्राहकत्वम्, उपस्थस्य क्लीबत्वं रत्यसामर्थ्यम् । आदिपदात् दूरग्राहकपाटवादिसङ्ग्रहः । न च काणत्वादिकमदृष्टविशेष इति वाच्यम् । मनः काणमित्यादिव्यवहारापत्तेः । ननु इन्द्रियाध्यासमनुक्त्वा तद्धर्माध्यासः कथमुक्तः तत्राह—इन्द्रियाणामित्यादि । धर्म्यध्यासः–धर्मिणि तादात्म्येन अध्यासः । ननु परोक्षतयैव इन्द्रियमपरो

नारायणी ।

त्वमुक्तम्, तत्र 'नन्वध्यासोऽपि नोपपद्यत' इत्यादिना दत्तदोषानुक्तप्रकारेण निरस्येदानीं तदेव प्रमातृत्वं विस्तरेणोपसंहरति—तेनेति । अध्यासस्य निर्दुष्टत्वसमर्थनेन । अज्ञानेति । अज्ञानप्रतिबम्बितत्वविशिष्टेऽहङ्कारस्यान्तःकरणस्याज्ञोहमित्यात्मक अध्यासः । तद्विशिष्टे–अज्ञोहमस्म्यहं स्फुराम्यहमात्मेत्याद्यहंकाराध्यासविशिष्टे । कामेति । 'कामः सङ्कल्पो विचिकित्से'त्यादिश्रुत्युक्तानामहङ्कारधर्माणाम् । इन्द्रियधर्माणामित्यनेनादृष्टविशेषरूपाः काणत्वादयो मनोधर्मा वेति मतनिरासः, तथासति मनः काणमित्यादि व्यवहारापत्तेः । नन्विन्द्रियाध्यासमनुक्त्वा कथं तद्धर्माध्यास उक्तस्तत्राह—इन्द्रियेति। परोक्षत्वात्–अतीन्द्रियत्वात् । अपरोक्षधर्म्यध्यासः–अपरोक्षे धर्मिण्यहङ्कारविशिष्टे चैतन्ये तादात्म्येनाध्यासः । अहं चक्षुः श्रोत्रमित्याद्यप्रतीतेः । इतिसिद्धान्त इत्यनेन धर्माध्यासेनैव तद्व्यवहारोपपत्तौ=काण इत्यादिव्यवहारोपपत्तौ=तद्रूपेण धर्म्यध्यासकल्पनमप्रामाणिकमनतिप्रयोजनकमिति

इति सिद्धान्तः। तद्विशिष्टे स्थूलदेहाध्यासो धर्मपुर-

न्यायरत्नावली।

क्षधर्मिणि मनोविशिष्टचैतन्ये अध्यस्यताम् तत्राह-इति सिद्धान्त इति। सयुक्तिका मूलोक्तिरित्थमित्यर्थः। तत्र युक्तिरुच्यते अज्ञोहमिति प्रतीतिबलात् अज्ञानविशिष्टे मनोध्यासः स्वीक्रियते। अज्ञश्चक्षुः इत्यस्य अहं चक्षुरित्यस्य वा परोक्षाया अपरोक्षाया अपि प्रतीतेरभावात् अज्ञानादिविशिष्टे चक्षुरादेः तादात्म्येन नाध्यासः। अहं चक्षुष्मानित्यादिधीस्तु शरीरस्य इन्द्रियसंयुक्तत्वात् नानुपपन्ना। अत एव 'अयं गुरुत्वाविशिष्टः, अहमदृष्टवानि'त्यादिपरोक्षप्रतीतिबलात् अपरोक्ष एव धर्मिणि परोक्षस्याध्यासः स्वीक्रियते, अत एव 'देहेन्द्रियादिष्वहंममाभिमानहीनस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्ते'रित्यत्र भाष्ये इन्द्रियेषु ममाभिमान एव पञ्चपादिकादावुक्तः। ननु धर्म्यध्यासं विना कथं धर्माध्यासः? न च स्फटिकादौ जपापुष्पस्यानध्यासेऽपि तद्धर्मलौहित्याध्यासदर्शनात् न दोष इति वाच्यम्। अप्रतिबिम्बरूपेण धर्माध्यासस्य धर्म्यध्यासव्याप्यत्वादिति चेन्न। धर्माध्यासाधिष्ठाने अवश्यं धर्म्यध्यासः, न तु धर्माध्यासाधारे, तथा सति कामादिधर्मस्य अध्यासाधारे मनोविशिष्टचैतन्ये मनसोऽध्यासाभावेन व्यभिचारापत्तेः। तथा च अविद्यामनोविशिष्टचैतन्यस्य काणत्वादीन् प्रति अध्यासाधारत्वात्, तदध्यासाधिष्ठानस्य च ब्रह्मचैतन्यस्य इन्द्रियाध्यासेप्यधिष्ठानत्वात् धर्माध्यासाधिष्ठाने धर्म्यध्यासाधिष्ठानत्वमवश्यमिति नियमो न व्याहतः। अथ धर्म्यध्यासविशिष्टस्यैवाप्रतिबिम्बरूपधर्माध्यासाधारत्वमिति नियम इति चेन्न। अप्रतिबिम्बरूपत्वस्येव नित्यपरोक्षधर्म्यवृत्तित्वस्यापि धर्मविशेषणत्वमादायैवोक्तनियमस्वीकारात्। (१)(मनोवच्छिन्नचिति काणत्वादिविशिष्टरूपेणैव चक्षुरादेस्तादा-

(१) (……) एतच्चिन्हान्तर्गतपाठो घपुस्तके नास्ति।

स्कारेणैवाहं मनुष्य इत्याद्याकारः न तु स्वरूपतः (१)अहं देह इत्यध्यासः। तथा प्रतीत्यभावात्। तद्विशिष्टे च (२)स्थौल्यादीनां देहधर्माणामध्यासः। तद्विशिष्टे बाह्यानां पुत्रभार्यादीनां साकल्यवैकल्यादिधर्माध्यासः। एवं चै-

न्यायरत्नावली।

त्म्येनाध्यासः न तु चक्षुष्ट्वादिधर्मरूपेणेति स्वीकार एव यथाश्रुतोक्तनियमेऽपि क्षत्रभावाच्च)। धर्मपुरस्कारेण-मनुष्यत्वादिगौरत्वाद्यवान्तरधर्मविशिष्टरूपेण, स्वरूपतः-देहत्वादिसामान्यधर्मविशिष्टरूपेण। प्रतीत्यभावादिति। अहं मनुष्य इत्यादिपूर्वपूर्वधीजन्यसंस्कारस्याहं मनुष्य इत्याद्यध्यासहेतुत्वकल्पनात् तादृशाध्यास उत्पद्यते। अहं देह इत्यादेस्तु प्रत्ययस्यैवाप्रसिद्ध्या तज्जन्यसंस्कारस्याप्रसिद्धेः न तस्य तादृशाध्यासहेतुत्वमिति भावः। भार्यादीनामिति। स्वामित्वाद्यध्यासपूर्वकमिति शेषः। साकल्यं विनयादिगुणभूषणादिमत्त्वरूपं पूर्णत्वम्, तदभावो वैकल्यम्। तथा च स्थौल्यादिविशिष्टे पुत्रादिस्वामित्वमध्यस्य पुत्रादिगतसाकल्यवैकल्ये अध्यस्येते। ननु 'स्थूलोऽहं सकल'इत्यत्र सकलस्वामित्वमेव प्रतीयत इति चेन्न। पुत्रादौ पूजिते पूजितोहमित्यभिमानात्।

नारायणी।

युक्तिसिद्धमेवाचार्यमतमिति ज्ञापितम्। तद्विशिष्टे च—दर्शितसूक्ष्माध्यासविशिष्टे च स्थूलदेहस्य तादात्म्येनाध्यासः। धर्मपुरस्कारेण मनुष्यत्वादिधर्मविशिष्टरूपेण, न स्वरूपतः—न देहत्वादिधर्मविशिष्टरूपेण। कुतः? प्रतीत्यभावात्-संस्कारमूलभूततादृशप्रत्ययस्यालीकत्वात्। तद्विशिष्टे—देहाध्यासविशिष्टे। स्थौल्यादीनां—स्थूलत्वकृशत्वादीनां देहधर्माणाम्, तद्विशिष्टे—स्थौल्याद्यध्यासविशिष्टे। पुत्रेति। पुत्रभार्यादीनां ये साकल्यवैकल्यादयो धर्मास्तेषामध्यास इत्यर्थः। स्वामित्वाध्यासपूर्वकमिति शेषः। साकल्यं विनयादिगुणवत्त्वं तदभावो वैकल्यं स्थौल्या-

(१) अहं देह इति प्रतीत्यभावात् तद्विशिष्टे च इत्यादिः कखपुस्तकयोः।

(२)—स्थौल्यादीनां च तद्विशिष्टे इत्यादिः गघपुस्तकयोः पाठः।

अत्रेदं बोध्यम्। 'तन्वभावे सन्ध्यवदुपपत्तेः' 'भावे जाग्रद्वदि'ति सूत्रयोः तन्वभावे इन्द्रियस्थूलदेहाभावेऽपि सन्ध्यवत् स्वप्नवत् ब्रह्मलोके सगुणब्रह्मोपासकस्य भोग उक्तः, देहस्य भावे तु जाग्रद्वत् जाग्रत्कालीनभोगवदित्यर्थकयोः । सेन्द्रियस्थूलशरीराभिमानेऽपि मनोविशिष्टजीवे स्वप्नब्रह्मलोकयोः । भोगोक्त्याऽज्ञानविशिष्ट एव मनोध्यासः न स्थूलविशिष्टे । नापीन्द्रियधर्मविशिष्टे । अदृष्टादिविशिष्टमनोविशिष्टेनैव जीवेन काणत्वादिविशिष्टस्थूलदेहग्रहणात् तत्रैव तदध्यासः । स्थूलदेहविशिष्टस्यैव पुत्रादिस्वामित्वप्रतीतेः तत्रैव तदध्यासः । पुत्रस्वामित्वादिविशिष्टजीवेन तादृशे स्वस्मिन् उपयोगितया वित्तादिस्वीकारात् तत्रैव तदध्यासः। (१)अत एव पुत्राद्यपेक्षयाऽप्रियस्य देवताराधनाद्यर्थतया यस्य वित्तादेर्ग्रहणम्, न तु पुत्राद्यर्थम् तत्स्वामित्वस्य स्थूलदेहविशिष्टेऽध्यासः, न तु पुत्रादिस्वामिनि। अत एव तद्वित्तापेक्षया देवतादिरेव प्रियः, तत्प्रयोजकत्वात् । तदेव 'मज्ञोऽहम्, अहं कामी, कामी, काणः, काणो मनुष्यः मनुष्यः सकल' (२)इत्यादिप्रतीतिबलात् अज्ञानादिविशिष्टे मनआदिकमध्यस्यते। अज्ञानादिविशिष्टचिदवच्छेदेन शुद्धिचिति मनआदेरुत्पत्त्या तादात्म्यस्वीकारेण उक्तप्रतीतिनिर्वाह इति यावत्। उक्ताचितोऽवच्छेदकत्वेऽपि उक्ताचितः शुद्धचिन्निष्ठसम्बन्धोऽप्यवच्छेदकः, स च विशेष्यतारूपः, अवच्छेदकीभूतस्य ज्ञानज्ञेयसम्बन्धस्यैव विशेष्यतात्वात्। 'इदं रजत'मित्याकारकभ्रमे इदञ्चित्सम्बन्धस्य विशेष्यतात्वेन वक्तृत्वात्। एवमवच्छेद्य(३)ज्ञेयसम्बन्ध एव प्रकारता,

(१) अत एव पुत्राद्यपेक्षया प्रियस्य देवताराधनाद्यर्थतया वित्तादेर्ग्रहणम्, इति पाठः। तथा च मूलग्रन्थविरोधः, 'वित्तात्पुत्रः प्रिय' इत्युक्तेः । तस्मादुपरि निर्दिष्टं परिवर्तनं कृतमस्माभिरिति ।

(२) मनुष्य इति सकलं इत्यादिप्रतीति सत्त्वात् इति गपुस्तके पाठः अशुद्ध एवायम् ।

(३)—अवच्छेद्यो ज्ञानज्ञेयसम्बन्धेति घपुस्तके ।

तन्यस्याप्यहङ्कारादिषु देहपर्यन्तेष्वध्यासः संसर्गतः ।

न्यायरत्नावली ।

तादृशभ्रमे रजताचित्सम्बन्धस्य तथा कल्पनत्वात् । एवं विशेष्यतात्वादिकमतिरिक्तं न कल्प्यते, गौरवात् । तथा चाज्ञानविशिष्टविशेष्यतावच्छिन्नमनःप्रकारताकप्रत्ययस्य निर्वाह इत्युक्तम् । इदानीमुक्तप्रत्ययवत 'अहमज्ञः, काम्यहम् मनुष्यः कामी, सकलो मनुष्य' इत्यादिप्रत्ययस्यापि सत्त्वात्, मनआद्यवच्छेदेन शुद्धचिति अज्ञानादिविशिष्टचितोन्तर्गतत्वरूपप्रतिबि(१)म्बत्वरूपससंर्गोऽध्यस्तो जायते, तथा च उक्तप्रत्ययस्यापि निर्वाहः तन्नान्तरीयकतया मनसः प्रातावम्बाध्यासाधीनप्रमातृत्वस्यापि पूर्वोक्तस्य साद्धारत्याशयेनाह—एवञ्चैतन्यस्येत्यादि । चैतन्यस्य अज्ञानादिविशिष्टचैतन्यस्य अहङ्काराद्याधारस्य, अहङ्कारादिषु—मनआद्यवच्छेदकेषु, देहपर्यन्तेषु—साकल्यादिविशिष्टदेहपर्यन्तेषु, संसर्गतः—प्रतिबिम्बत्वरूपेण । 'स एष इह प्रविष्ट आनखाग्रेभ्य' इति श्रुतेः । जलयुक्तपाषाणादेरिव मनोयुक्तदेहादेरपि प्रतिबिम्बाधारत्वसम्भवात् प्रतिबिम्बाधारत्वयोग्यतारूपस्वच्छत्वं बोध्यम् । ननु मनआदीनां सर्वेषामानन्दरूपात्मनि तादात्म्याध्यासेन तेषु जायमानस्य प्रेम्णः

नारायणी ।

दिविशिष्टे पुत्रस्वामित्वमध्यस्य पुत्रादिगतसाकल्यवैकल्ये अध्यास्ते, पुत्रादौ पूजितेऽहमेव पूजित इत्यादिप्रतीतिदर्शनादिति फलितार्थः । न केवलमात्मन एवाध्यास आत्मनि किन्तु 'गौरोहं चेतनश्चेतनोहं गौर' इति प्रतीतेः, 'इदं रजतं रजतमिदमि'त्यादौ रजतेदमंशयोः परस्पराध्यासवदात्मनोप्यनात्मन्यध्यासो युक्त एवेत्यभिप्रेत्याह—एवमिति । अज्ञानविशिष्टचैतन्यस्याहङ्काराद्याधाररूपस्य । अहङ्कारादिषु—मनआद्यवच्छेदेन, देहपर्यन्तेषु—साकल्याद्यध्यासविशिष्टदेहपर्यन्तेषु, संसर्गतः—रजतेदमंशस्येव संसृष्टत्वरूपेण । एतेन शून्यवादाशङ्का निराकृता, स्वरूपतोऽध्यस्तस्यैव विशेषदर्शनबाध्यत्वाङ्गीकारादित्यन्यत्र विस्तरः ।

(१)—प्रतिबिम्बितत्वरूप इति घपुस्तके युक्तभेदम् ।

अध्यासव्यवधानतारतम्याच्च प्रेमतारतम्यम् । तदुक्तं वार्तिकामृते—

वित्तात्पुत्रः प्रियः पुत्रात्
पिण्डः पिण्डात्तथेन्द्रियम् ।

न्यायरत्नावली ।

उत्कटानुत्कटत्वरूपं वैषम्यं कुतस्तत्राह—अध्यासव्यवधानेत्यादि । अध्यासैरानन्दस्य व्यवधानाधिक्ये प्रेम्णोऽनुत्कटत्वं तन्न्यूनत्वे प्रेम्ण उत्कटत्वम्, सुषुप्तौ कार्यप्रपञ्चलयेनानन्दाभिव्यक्तिदर्शनेन स्वप्नजाग्रतोश्च तदपेक्षयाऽऽनन्दाल्पत्वदर्शनेनाध्यासाधिक्यस्य आनन्दापकर्षप्रयोजकत्वेन क्लृप्तत्वादिति भावः । वित्तादिति । अनेन पुत्रादिस्वामित्वविशिष्टचिति वित्तादिस्वामित्वाध्यास इति अनुक्तमपि सूचितम् । 'पिण्डात्तथेन्द्रियम् । इन्द्रियेभ्यः प्रियः प्राण' इत्यनेन पङ्गुत्वकाणत्वादिविशिष्टरूपेण चक्षुरादीनां मनोविशिष्टचिति अध्यास इति सूचितम्, अन्यथा ब्रह्मणि तादात्म्येनाध्यस्तत्वमात्रेण मनोपेक्षया अनुत्कटप्रेम्णः चक्षुरादावसम्भवात् । न च पुत्रादाविव ममताध्यासेनापि चक्षुरादावुक्तप्रेमसम्भव इति वाच्यम् । काणत्वादिरूपेण तादात्म्याध्यासः ममताध्यासो वेत्यत्र विनिगम-

नारायणी ।

ननु मनआदीनां सर्वेषां परिपूर्णानन्दे तादात्म्येनाध्यासात् तेषु जायमानप्रेम्ण उत्कटाऽनुत्कटत्वे कुतस्तत्राह— अध्यासैरिति । अध्यासैरानन्दस्य व्यवधानाधिक्यन्यूनत्वत इत्यर्थः । स्थूलाधिकदृष्टित आनन्दव्यवधानाधिक्यात्प्रेम्णोऽनुत्कटत्वं सूक्ष्माधिकदृष्टित आनन्दव्यवधानन्यूनत्वात्प्रेम्ण उत्कटत्वम्, प्रेमा सर्वत्रानन्द एव, स च यदाऽहङ्काराद्याधिक्यादिना संक्रान्तस्तत्र प्रेमा तथा नोदेति, अहङ्कारादिन्यूनतायां तु व्यवधानबाहुल्याभावात्सूक्ष्मदृष्टित उदेति प्रेमेति यावत् । एवंविधकल्पनायामनुभवरूपं वार्तिकाचार्यवाक्यं प्रमाणयति—तदुक्तमिति । वित्तादीति । प्रियः सुखसाधने(१)च्छाविषयः । अनेन प्रायः पुत्रादि स्वामित्वविशिष्टे वित्ता-

(१) सुखसाधनत्वेनेच्छाविषय इति खपुस्तके ।

इन्द्रियेभ्यः प्रियः प्राणः
प्राणादात्मा परः प्रियः ॥ इति ।

पिण्डः स्थूलशरीरम् । प्राणः अन्तःकरणम् । देहापेक्षया चेन्द्रियाणां प्रियत्वं शस्त्रवृष्ट्यादिधारापाते चक्षुरादीनां मीलनदर्शनात् अनुभवसिद्धम् । तेनान्यो-

न्यायरत्नावली ।

काभावात् । अन्यथा मनुष्यत्वगौर(१)त्वादिधर्मविशिष्टेऽपि ममताध्यास एव कल्प्येत । अथ धर्मितादात्म्याध्यासस्य धर्मसंसर्गाध्यासव्यापकत्वात् सोऽप्यावश्यक इति इति चेत्, तर्हि इन्द्रियतादात्म्याध्यासोऽपि तथा । आत्मा- अज्ञानविशिष्टचित्तदपेक्षया शुद्धात्मा उत्कटप्रेमविषय इति बोध्यम् । 'प्रेयोन्यस्मात् सर्वस्मादन्तरतरं यदयमात्मे'ति श्रुतेः । अनुभवसिद्धमिति । पूर्णानन्दांशस्यावृतत्वेऽपि अविद्याद्यवच्छिन्नानन्दांशानामनावृतत्वम्, 'अज्ञोऽहं सदा भूयासमिति' प्रेम्णोऽन्यथानुपपत्तेः, तथा च उत्कर्षापकर्षवत्तयापि तदनुभवसम्भव इति भावः । 'अज्ञोऽहमि'त्यादिवत् 'सन्नाकाशस्सन् वायुरि'त्यादावपि परस्पराध्यासः, 'आकाशः सन् वायुस्सन्नि'त्यादिप्रतीतिसत्त्वादित्याह—तेनेति । 'अज्ञोऽहमि'त्यादिस्थले परस्पराध्यासस्वीकारेणेत्यर्थः । अन्योन्याध्यासात्-पर-

नारायणी ।

दिस्वामित्वाध्यास इत्यनुक्तमपि सूचितम् । 'पिण्डात्तथेन्द्रियम्। इन्द्रियेभ्यः प्रियः प्राण' इत्यनेन पटुत्वकाणत्वादिना चक्षुरादीनां मनोविशिष्टेऽध्यास इति ज्ञापितम् । तथाचैकैकाध्यासविशिष्ट एवापराध्यासो न साक्षात्सर्वेषाम्। यस्य प्रथमतोऽध्यासस्तत्र प्रेमाधिक्यान्यत्र न्यून इति संक्षेपः । पिण्डशब्दस्यान्नग्रासपरतानिरासायाह— पिण्ड इति । प्राणशब्दस्य केवलवायुपरताशङ्कानिरासायाह—प्राण इति । इन्द्रियप्रियत्वं स्फुटयति— देहापेक्षयेति । तेनेति । परास्पराध्यासकृतकार्योपलब्ध्येत्यर्थः ।

(१) मनुष्यत्वकार्यत्वादीत्यादिः गपुस्तके ।

न्याध्यासात् चिदचिद्ग्रन्थिरूपोध्यासः एकतरस्याध्या-

न्यायरत्नावली ।

स्पराध्यासप्रत्ययात्, अध्यासः-अध्यासमात्रम्, चिदचिद्ग्रन्थि-रूपः-शुद्धचिद्रूपेऽधिष्ठानेऽचितोरधिष्ठानाभिन्नयोः ग्रन्थी परस्परा-वच्छेदेन परस्परसम्बन्धौ रूपे यस्य तादृशः । 'इदं रजतमि'त्यादौ सर्वत्र भ्रमे ह्याकारतादर्शनादिदमादिसम्बन्धावच्छेदेन रजतादिस-म्बन्धस्य च प्रत्ययेन तदुभयमध्यस्तम्, तत्र रजतादेस्सम्बन्ध इव स्वरूपमप्यध्यस्तम्,'इदं रजतं ने'त्यादिप्रत्ययेन विनिगमकाभावात् । द्वयोरपि बाध्यमानत्वात् । इदमादेस्तु सम्बन्ध एवाध्यस्तः न स्वरूपम्, 'रजतमिदं ने'त्यादिबाधेन संसर्गस्यैव बाध्यमानत्वात् तादृशबाधोत्तरमपि हि 'एतत्संसृष्टतया रजतं ज्ञात'मिति अङ्गुल्या निर्दिश्यमानत्वात् । किं'त्वेदं रजतमिति यज्ज्ञानं तन्मिथ्ये'ति प्रत्यये-नाकारद्वयसहितधीमिथ्यात्वा(१)वगमात् आकारद्वयघटकसम्बन्धद्व-यमवश्यं मिथ्येति वाच्यम् । इदमादेरपि संसृष्टरूपेण भ्रमविषयत्वात् मिथ्यात्वसम्भवाच्च मिथ्यात्वम् । एवं 'सदाकाशमि'त्यादावपि सतः संसृष्टरूपेणा(२)काशादेस्स्वरूपेण मिथ्यात्वम् । 'सदाकाशमिति यज् ज्ञानं तन्मिथ्येति प्रत्ययात्, 'सदाकाशं न, आकाशस्सन्ने'ति द्विविध-बाधकसत्त्वाच्च । तस्मात्सविकल्पकप्रत्ययमात्रे विशेष्यविशेषणसंसर्गा-णां त्रयाणां युगपदुत्पत्तिः । प्रातीतिकस्थले आगन्तुकदोषघटिता व्यावहारिकस्थले त्वविद्याघटिता (३)कारणसामग्री,तदेतदाह-एक-

नारायणी ।

अन्योन्याध्यासात्—परस्परमध्यासाङ्गीकारात् । चिदचिद्ग्रन्थिरूपः--चिदचितोः परस्परावच्छेदेन परस्परसम्बन्धरूपः ।'घटः सन्सन्घट'इत्या-दिप्रतीतेरिति भावः । नन्वेकतराध्यासेनैव द्विविधप्रत्ययोपपत्तेरलं पर-स्पराध्यासेनेति तत्राह—एकतरस्येति । विशेषणस्य विशेष्यस्य वा,

(१)—मिथ्यात्वावगाहनात् इति घपुस्तके ।

(२)—णाकाशादेः संसृष्टरूपेण स्वरूपेण च मिथ्यात्वम् इति घपुस्तके ।

(३) कारणेति गपुस्तके नास्ति ।

साङ्गीकारेऽन्यतरस्याभानप्रसङ्गात् अध्यस्तस्यैव भ्रमे भाननियमात् 'इमे रङ्गरजते' इति समूहालम्बन(१)वदवश्यमितरेतराध्यासः । सर्वबाधावधिभूतचैतन्यपरिशे-

न्यायरत्नावली ।

तरस्येति । विशेषणस्य विशेष्यसंसर्गस्य वा, अन्यतरस्य—विशेष्यसंसर्गस्य विशेषणस्य वा, अभानप्रसङ्गात्—भ्रमाविषयतापत्तेः । अध्यस्तस्यैवेति । उक्तबाधकप्रत्ययबाध्यत्वेनेति शेषः । भ्रमे भानेति । भ्रमविषयत्वेत्यर्थः । न'न्विदं रजत'मित्यादौ एक एवाकार उल्लिख्यते अथ कथं द्व्याकारत्वानियमः तत्राह—इमे इति । रजतरङ्गे इत्यर्थः । अवश्यमित्यनेन परस्पराध्यासस्य भाष्यासुक्तत्वं सूचितम् । तदुक्तं भाष्ये—'अन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्ये'ति । ननु रजतादाविदन्त्वादेरिदमादौ रजतत्वादेश्च संसृष्टतयाध्यासोऽन्योन्यधर्माध्यासः, तत्र च मानाभावः, प्रतीत्योरन्योन्यतादात्म्याध्यासाभ्यामुपपत्तेरिति चेन्न । द्व्याकारप्रतीत्योर्धर्मयोस्संसर्गाध्यासाभ्यां धर्मिणोस्तादात्म्याध्यासाभ्यां

नारायणी ।

अन्यतरस्य—विशेष्यस्य विशेषणस्य वा, अभानप्रसङ्गात्—भ्रमाविषयत्वापत्तेः । कुतस्तत्राह—अध्यस्तस्यैवेति । स्वाश्रयनिष्ठाभावप्रतियोगिन एवेत्यर्थः । विशेषदर्शनबाध्यत्वेनेति शेषः । भ्रमे मानेति । भ्रमविषयत्वमित्यर्थः । अन्यथा शुक्तित्वादीनामपि भानं स्यादित्यन्यत्र विस्तरः । ननु 'रजतमिदमि'ति भ्रमे इदमंशस्य कारणत्वाद्भानं शुक्तित्वादेस्तु विरोधादेवाभानं न(२)त्वनध्यासादभानम् इदमंशस्याध्यासाद्भानम् तथा च कथमध्यस्तस्यैव भाननियममङ्गीकृत्य परस्पराध्याससमर्थनं तत्राह—इमे इति । इदंशब्दवाच्ययोरेव रङ्गरजतयोः 'रजतरङ्गे' इति भ्रमे परस्परमधिष्ठानारोप्याध्यासिकत्वमिति 'इदंरजतमि'ति विशिष्टभ्रमेऽपि भ्रमत्वाविशेषात् विशेषणविशेष्यसंसर्गत्वमङ्गीक्रियत इत्यर्थः । अवश्यमित्युक्त्याऽत्र परस्पराध्यासस्यापरिहारयुक्तित्वं ध्वनितम् । इतरेतराध्यासः । परस्परं तादात्म्या-

(१)—समूहालम्बनभ्रमवदवश्यमित्यादिः कखपुस्तकयोः ।

(२) ननु शुक्तित्वादेरनध्यासादभानमित्यर्थः ।

न्यायरत्नावली ।

वोपपत्तेरित्यत्र विनिगमकाभावात् । सङ्क्षेपशारीरकेप्युक्तम्-

इदमर्थवस्त्वपि भवेद्रजते परिकल्पितं रजतवास्त्विदमि ।
रजतभ्रमेऽस्य च परिस्फुरणात् न यदि स्फुरेन्न खलु शुक्तिरिव ॥

इति । अस्य इदमर्थस्य 'न यदीदमर्थः कल्पितः तदा भ्रमे न स्फुरत्, शुक्तौरिव शुक्तित्वविशिष्टवत् । शुक्तित्वावाशष्टस्यव संसर्गोपहित इदमादेरकल्पितत्वेन उक्तबाधकाबाध्यत्वेन भ्रमाविषयत्वापत्तिरिति भावः । पञ्चपाद्यामुक्तं 'यदि युष्मदर्थस्यैव प्रत्यगात्मनि अध्यासः स्यात् प्रत्यगात्मा न प्रकाशेत । न हि शुक्तौ रजताध्यासे शुक्तिः प्रकाशत । प्रकाशते च इह चैतन्यमहङ्कारादा'विति । युष्मदर्थस्यानात्मनः । किञ्च अवश्यमित्यनेन सर्वभ्रमाणां ख्याकारता तार्किकादेरपि सम्मतेति सूचितम् । तथा हि-सविकल्पकधीमात्रे भ्रमत्वेनाभ्युपगम्यते विशेष्यतावच्छिन्नं प्रकारत्वं प्रकारतावच्छिन्नं विशेष्यत्वं वेत्याकारद्वयं सप्रकारकधीमात्रानिष्ठं (१) तार्किकादिभिस्स्वीक्रियते, तादृशाकारद्वयं च 'रजततादात्म्येनेदं साक्षात्करोमि, इदन्तादात्म्येन रजतं साक्षात्करोमि, इदं रजतं साक्षात्करोमी'-ति सार्वलौकिकधीभिः गृह्यते । रजतप्रकारत्वमिदंविशेष्यत्वञ्च परस्परानवच्छिन्नमित्यादितान्त्रिकवाक्यरचनामात्रेण अर्थासिद्धेः । तथा चेदंविषयतायां रजतविषयतावच्छेदकत्वञ्च रजतविषयतायाम् इदं विषयतावच्छेदकत्वञ्च उक्तधीषु भाति । 'मूलविशिष्टः संयोगी'त्यादौ संयोगित्वरूपे विधेये उद्देश्यतावच्छेदकीभूतमूलवैशिष्ट्यस्यावच्छेदकत्वभानवत्(२) 'रजतमिदमि'त्यादौ रजतविषयकसाक्षात्कारे इदंतादात्म्यविषयकत्वस्य विधेयत्वेन इदंतादात्म्यविषयकत्वस्य रजतविषयतावच्छिन्नत्वलाभात् । 'रजततादात्म्येन इदमि'त्यादौ

(१)—निष्ठमस्ति अनुव्यवसायादिना तद्ग्रहणात् इति तार्किकादिभिः इत्यधिकं घपुस्तके पाठः ।

(२)—वत् इदंतादात्म्येन रजतमित्यादौ० इति पाठभेदो घपुस्तके ।

न्यायरत्नावली।

त्विदंविषयकसाक्षात्कारे रजततादात्म्यविषयकत्वस्य विधेयत्वेन तत्र इदंविषयतावच्छिन्नत्वलाभात्। एकविषयतावच्छेदकापरविषयतात्वस्यैव विशेष्यतात्वरूपस्य वक्ष्यमाणत्वात्। उक्तलौकिकधीभिः उभयोः परस्परविशेष्यविशेषणकत्वघटिताकारयोः सिद्धिरिति नास्माकमेव तत्स्वीकारेण गौरवाद्यापत्तिः। मन्मते तु विशेष्यतात्वादेरतिरिक्तस्याखण्डधर्मरूपस्यास्वीकारात् महदेव लाघवम्। तथा हि—चिच्चेत्यसम्बन्धो विषयता, विषयतात्वमखण्डधर्मस्तस्यां स्वीक्रियते, एकविषयताविशिष्टापरविषयतायाम् अवच्छेदकविषयताविशेष्यता तादृशविशेष्यतायामवच्छेदकविषयता(१) विशेष्यतावच्छेदकताशब्देन व्यवह्रियते, तदाश्रयस्य इदन्त्वादेरपि विशेष्यतावच्छेदकत्वात्। एवं च यस्याः (२)(तादात्म्यादिनिष्ठसांसर्गिक) विषयतायाः अवच्छेदकत्वं विशेष्यतानिष्ठम् सा तत्रावच्छेदकत्वे निरूपिका (३)तन्निष्ठनिरूपकतायाः अवच्छेदिकापि विषयिता सांसर्गिकविषयितावच्छेदकताशब्देनोच्यते। तदाश्रयतादात्म्यत्वादेरपि निरूपकतावच्छेदकत्वात्। सांसर्गिकविषयता यया विषयतया विशिष्टा सती तादृशावच्छेदकतानिरूपिका या सा प्रकारता। तथा च (४)तादृशप्रकारतावच्छेदिका या विषयता सा (५)प्रकारतावच्छेदकताशब्देनोच्यते, तदाश्रयस्य 'रजतत्वादेरपि तादृशप्रकारतावच्छेदकत्वसत्त्वात्। तदिदंविशेष्यतादौ प्रकारतासांसर्गिकविषयतावच्छेदकत्वादिकं तार्किकादिभिरपि स्वी

(१) विशेष्यतावच्छेदिकापि—इति घपुस्तके अधिकः पाठः।

(२)—(....) एतच्चिह्नान्तर्गतपाठो घपुस्तके नास्ति।

(३) तादात्म्यादिनिष्ठा विषयता सांसर्गिकविषयता, तन्निष्ठेति पाठाधिक्यं घपुस्तके।

(४)—तादृशावच्छेदकताया निरूपिका सती निरूपकतावच्छेदिका विषयता प्रकारतानिरूपकविशेषणत्वेन तस्या अपि निरूपकत्वात् तादृश० इत्यधिकः पाठो घपुस्तके।

(५) प्रकारतात्वविशिष्टविषयतावच्छेदिकाऽपि प्रकारता० इत्यधिकः पाठो घपुस्तके।

न्यायरत्नावली ।

क्रियते 'रजतत्वेनेदं जानामि,रजतत्वसमवायेन इदं जानामि,रजतता-दात्म्येनेदं जानामी'त्यनुभवेन प्रकारतासंसर्गविषयतावच्छेदकत्वेन विशेष्यत्वावगाहनात् । तथा च तेनैवाखिलव्यवहारनिर्वाहे विशेष्यतात्वप्रकारतात्वसांसर्गिकविषयतात्वविशेष्यताप्रकारतावच्छेदकतात्वानाम् अखण्डधर्माणां स्वीकारः न तेषां युक्तः । इदंविषयतावच्छिन्ना या रजतविषयता तद्विशिष्टा या तादात्म्यविषयता तच्छालिप्रत्यक्षत्वेन 'इदं रजतमि'त्याकारकप्रत्यक्षस्य प्रवृत्तिहेतुत्वसम्भवात् । तदयं निष्कर्षः । इदंविषयता तादात्म्यविषयताविशिष्टायां रजतविषयतायाम् अवच्छेदिका, मूलादिकमिव संयोगादिविशिष्टे विहगादौ । तादृशावच्छेदकत्वे इदन्त्वविषयता अवच्छेदिका, मूलादिनिष्ठावच्छेदकत्वे मूलत्वादिकमिव । एवम् इदंविषयतानिष्ठावच्छेदकत्वे निरूपकत्वं यत् तादात्म्यादिविषयतानिष्ठं तदवच्छेदकत्वं तादात्म्यत्वादिविषयतासु स्वीक्रियते, संयोगत्वादाविव मूलादिनिष्ठावच्छेदकतानिरूपकतावच्छेदकत्वम् । इयांस्तु विशेषः-यन्मूलत्वादेस्समवायेन मूलादिसम्बन्धत्वात् उक्तावच्छेदकत्वम्, इदन्त्वादिविषयतानां तु चिद्घटितेन सामानाधिकरण्येन इदमादि(१)-विषयसम्बन्धत्वात् उक्तावच्छेदकत्वम्, इदमादिविषयतानिष्ठमनवच्छिन्नमेव तादृशावच्छेदकतानिरूपकत्वम् इदन्त्वादिविषयतावच्छिन्नमित्यादि बोध्यम् । तस्मात् सांसर्गिकविषयतात्वस्यैव अखण्डधर्मत्वनियमः, न तु विशेष्यतात्वस्य प्रकारतात्वस्य वा । ननु 'घटस्सन् पटस्सन्नि'त्यादौ सत्तादात्म्यस्य एकस्यैव भानसम्भवात् विशेषणविशेष्यसंसर्गाणां युगपदुत्पत्तिरिति पूर्वमुक्तमयुक्तमिति चेन्न । घटपटाद्यवच्छिन्नतादात्म्यानाम् ऐक्यानुपपत्तेः, अव-

(१) इदमादिविषयतासु सम्बद्धत्वादुक्तावच्छेदकत्वम् । इदन्त्वादिसम्बन्धविषयतावच्छेदकत्वम्—इति भिन्नः पाठो घपुस्तके ।

न्यायरत्नावली ।

च्छेदकभेदेन परमते विषयतादीनामिव तादात्म्यानां भेदस्यावश्यकत्वात् । ननु वृत्तिज्ञानीयसम्बन्धानां विषयनिष्ठानां विशेष्यतादिरूपत्वस्य अवश्यं वाच्यतया तैरेव विषयताव्यवहारनिर्वाहे चित्त्वेत्यसम्बन्धानां विषयतात्वकल्पने मानाभाव इति चेन्न। 'अहं सुखी'त्यादौ वृत्तिज्ञानीयसम्बन्धेन सुखादौ विषयताव्यवहारासम्भवात्, सुखादौ साक्षिमात्रभास्यत्वेन वृत्त्यस्वीकारात्, तत्र सुखादिचित्सम्बन्धस्यैव सुखादिविषयतात्वेन कल्पनत्वेन चित्सम्बन्धस्यैव सर्वत्र विषयतात्वस्वीकारात्, ज्ञानज्ञेयसम्बन्धस्यैव विषयताव्यवहारविषयत्वात्, वृत्तेः ज्ञानव्यञ्जकत्वेऽपि ज्ञानत्वाभावात्, ज्ञानव्यञ्जकत्वानुरोधेनैव वृत्तेः ज्ञानावरणरूपाज्ञानसमानविषयकत्वात् चिन्मात्रविषयकत्वम्, अज्ञानस्येव वृत्तेः विषयतायां विशेष्यविशेषणयोः संसर्गः व्यक्तिमात्रञ्चावच्छेदकम्, नास्त्येव वावच्छेदकम्, यथा पर्वते वह्नेः संसर्गावच्छिन्नचिद्विषयकानुमितिरूपवृत्तेः, सोऽयमित्यादिवाक्यजन्यवृत्तेर्वा, तत्त्वमस्यादिवाक्यजन्यवृत्तेर्वा, तथा चावच्छिन्नानवच्छिन्नरूपेण चिदेव वृत्तेर्विषयः, न घटादयः तादृशविषयतावन्तः; तेषु तु वक्ष्यमाणरीत्या सांसर्गिकविषयतावच्छेदकत्वरूपं विषयत्वम्। अवच्छेदकीभूतसंसर्गस्य प्रतियोगित्वानुयोगित्वरूपे विशेषणविशेष्यत्वे वा न मुख्ये,तथा चैतन्यनिष्ठमपि वृत्त्यज्ञानयोर्विषयत्वं न मुख्यविषयत्वं ज्ञानीयत्वाभावात्, किन्त्वाकाराख्यसम्बन्धविशेषः। उक्तं यनाचार्यादिभिरपि बौद्धाधिकारादौ 'प्रकाशस्य सतस्तदीयतामात्रनिबन्धनः स्वभावविशेषः विषयते'त्यादिना प्रकाशशब्दितज्ञानीयसम्बन्धस्यैव विषयतात्वमुक्तम्। उक्तञ्च तट्टीकासु वर्धमानाद्यैः 'इच्छादीनां विषयता तज्जनकज्ञानीया याचितमण्डनन्यायेन न तु स्वाभाविकी' इति । न च प्रतियोगित्वानुयोगित्वमात्रस्य तादृशविशेषणत्वादिरूपत्वे अनुमित्यादिवृत्तेः 'विशेष्ये विशेषणमि'त्यादिरूपाया विशिष्टस्य वैशिष्ट्यमित्यादिरूपायाश्च विषयताया भेदः

कुतस्त्य इति वाच्यम् । प्रतियोगितानुयोगितयोरेव नानाविधानुभूयमानविशेषाणां स्वीकारात्, वह्न्यादिप्रकारकानुमितिस्थले वह्नित्वाद्यवच्छिन्नप्रतियोगिकसंयोगात्तादात्म्यविशिष्टचैतन्यनिष्ठसांसर्गिकविषयतास्वीकारात्, विशेषणीभूतसंयोगतत्प्रतियोगित्वयोरपि मिथो निरूप्यनिरूपकभावापन्नाः सांसर्गिकविषयताः सिद्धान्तेऽपि स्वीक्रियन्ते । सर्वो हि विषयः सद्रूपचित्तादात्म्यविशिष्टतयैव विशिष्टज्ञानमात्रे भासते, तथा च विशेषणविशेष्ययोरिव संयोगादिसंसर्गस्यापि चित्तादात्म्यविशिष्टतया भानात् तत्तादात्म्यविशिष्टतया चितोऽपि भानम् । संयोगनिष्ठोक्तविषयतानिरूपिता या प्रतियोगित्वनिष्ठविषयता सापि सांसर्गिकविषयतैव, तादृशविषयतावती प्रतियोगितैव प्रकारतेत्युच्यते, तदन्यप्रकारत्वे मानाभावात् । एवं संयोगादिविषयतानिरूपितविषयतावदनुयोगितैव विशेष्यता । अत एव भासमानवैशिष्ट्यप्रतियोगित्वानुयोगित्वे प्रकारताविशेष्यते इति तार्किकादयो वदन्ति । भासमानवैशिष्ट्यस्य भासमाने प्रतियोगित्वानुयोगित्वे इति तदर्थः,(१) *विशिष्टविषयतानिरूपितप्रकारतात्वं वह्नित्वावच्छिन्नप्रकारतायां एव स्वीक्रियते* लाघवात्। एवं पर्वतत्वाद्यवच्छिन्नानुयोगितायां एव तादृशविशेष्यतात्वम् । एवं च पूर्वकल्पे वह्नित्वाद्यवच्छिन्नप्रतियोगितात्वेन प्रतियोगितायाः विषयता यत्र तत्र वह्नित्वविशिष्टनिरूपितवैशिष्ट्यधीः, पर्वतत्वाद्यवच्छिन्नानुयोगितात्वेनानुयोगिताभाने पर्वतत्वविशिष्टाधिकरणकवैशिष्ट्यधीः, यत्र तु प्रतियोगितानुयोगितयोः न तथा भानं किन्तु वह्नित्वाद्युपहितनिष्ठतया तत्र विशेष्ये विशेषणमित्यादिधीः । द्वितीयकल्पे तु वह्नित्वादेः प्रकारतावच्छेदकत्वादिरूपे प्रकारत्वे

(१) *वैशिष्ट्यविषयतानिरूपितविषयतावती तथेति यावत्,तेन समूहालम्बनस्य न प्रकारतादिकम्,अथवा संयोगादिविषयतानिरूपितप्रकारतात्वं वह्नित्वाद्यवच्छिन्नप्रतियोगितायां एव स्वीक्रियते* लाघवादिति पाठभेदश्च घपुस्तके ।

षेण च न शून्यवादापत्तिः । सत्यानृतसम्भेदावभास-

न्यायरत्नावली ।

विशिष्टवैशिष्ट्यम्, केवलप्रकारत्वे विशेष्ये विशेषणमिश्रादिरूपत्वम् । आद्य एव तु कल्पो युक्तः, विषयवैलक्षण्यं विना विषयतामात्रभेदेन ज्ञानानां वैलक्षण्यापादने साकारवादापत्तेः । ननु 'इदं रजतमि'त्याकारकज्ञाने इदंचित्सम्बन्ध एवावच्छेदकतया भाति, न तु रजतचित्सम्बन्ध इत्यत्र किं व्यवस्थापकम् ? इति चेत् अनुभव एव । अन्यथा 'मूलविशिष्टः कदम्बः कृष्णसंयोगी'त्यत्र प्रत्यक्षे मूलस्यैवावच्छेदकतया भानं न तु कृष्णसंयोगस्येत्यत्राप्यनुभवान्यव्यवस्थापकान्वषणापत्तेः । तथा चानुभवेनैव अवच्छेदकत्वं व्यवस्थापिते तन्निर्वाहाय मूलादेर्मूलाद्यवच्छिन्नसंयोगादिहेतुत्ववदज्ञानादारिदमाद्यवच्छिन्नरजतादिहेतुत्वं कल्प्यत । स्वावषयतावच्छेदकविषयतावत्त्वादिसम्बन्धेन रजतादिकं प्रति स्वाश्रयतावच्छेदकत्वसम्बन्धेनाज्ञानादेर्हेतुत्वम् । विवेचितश्चैतत् चन्द्रिकायामस्माभिः । तस्माद् ब्याकारानुभवात् 'इदमादिकं यदि भ्रमकालेऽध्यस्तं न स्यात् तदा भ्रमविषयो न स्यात्, शुक्तित्वविशिष्टवदि'ति तर्कात्, 'इदमादिकं भ्रमकालेऽध्यस्तं न स्यात् भ्रमविषयत्वात् रजतादिवदि'त्यनुमितेश्च परस्पराध्यास आवश्यकः । तदुक्तं संक्षेपशारीरके—

अनुभूतियुक्त्यनुमितित्रितयादितरेतराध्यसनसिद्धिरतः । इति ।

ननु 'सदिदंरजतमि'त्यादिभ्रमे सद्रूपचितोऽपि विषयत्वात् साप्यध्यस्ता स्यात् तत्राह—सर्वबाधेत्यादि । साक्षिरूपत्वेन चितो बाधासम्भवात् चैतन्यं सर्वबाध्यज्ञानानामविषयरूपोऽवधिः, अतः तस्य परिशेषात् मिथ्यात्वास्वीकारात् । शून्यवा-

नारायणी ।

ध्यासः तयोः संसर्गाध्यासश्च । ननु विशेषणविशेष्योर्द्वययोरप्यध्यस्तत्वे बाधात्सर्वशून्यतैव तत्राह—सर्वेति । सर्वबाधकधीविषयचैतन्यस्य परिशेषेण-मिथ्यात्वास्वीकारेण, न शून्यवादापत्तिः-न सर्वमिथ्यात्ववादस्य

त्वादध्यासस्य । तस्मात्पूर्वपूर्वाध्याससमूल एवायमुत्तरोत्तरोऽहङ्काराध्यासः बीजाङ्कुरवदनादिः । अविद्याध्यासश्च

न्यायरत्नावली ।

दस्य—सर्वमिथ्यात्ववादस्य आपत्तिरिति भावः । तथा च संसृष्टरूपेणैव सद्रूपस्य भ्रमविषयत्वं मिथ्यात्वञ्च, न तु शुद्धरूपेणेति भावः । सत्यानृतसम्भेदावभासत्वात्—वस्तुगत्या सत्यनिष्ठो योऽनृतसम्बन्धः तद्विषयकत्वात् । सत्यविषयकत्वं विनाधिष्ठानज्ञानस्य बाधकत्वासम्भवेन आरोपितस्य अनृतत्वासिद्धेरधिष्ठानं सत्यमेवेति भावः । ननु मनुष्यत्वादिविशिष्टरूपेणैव देहादेरध्यासः न तु देहत्वादिविशिष्टरूपेण, एवमज्ञानादिविशिष्ट एव चैतन्ये अहङ्काराद्यध्यासः न तु आकाशादिविशिष्ट इत्यत्र किं मानम् ? तत्राह—तस्मादिति । प्रतीतिरूपकार्यानुसारेण तत्कारणकल्पनामित्यस्य धर्मपुरस्कारेणेत्यादिनोक्तत्वादित्यर्थः । अध्याससमूलः—अध्यासजन्यसंस्कारजन्यः, अहङ्काराध्यासः—अहङ्कारादिरूपः तद्धीरूपश्चाध्यासः । अर्थाध्यासे अर्थस्य ज्ञानाध्यासे ज्ञानस्य सूक्ष्मावस्थारूपः संस्कारो हेतुरिति भावः । संस्कारजन्यत्वेऽपि भाष्योक्तमनादित्वं समर्थयते—बीजाङ्कुरादिवदनादिरिति ।

नारायणी ।

प्रसङ्ग इत्यर्थः । आधारांशस्यैवाविद्योपहितस्य सत इदमंशस्येवाध्यस्तेऽध्यासो नाधिष्ठानस्य परिपूर्णानन्दस्य शुक्त्यंशादेरिव, अत आधाराध्यस्तयोर्द्वयोर्बाधेऽप्यधिष्ठानस्य बाधाभावान्न शून्यताप्रसङ्गगन्धोपीत्यन्यत्र विस्तरः । उपपादयति—सत्येति । वस्तुगत्या सत्यवस्तुनिष्ठो योऽनृतस्य सम्भेदः सम्बन्धस्तादात्म्यरूपः तद्विषयकत्वाद् भ्रमस्येत्यर्थः । सत्यविषयकत्वं विनाऽधिष्ठानज्ञानस्य बाधकत्वायोगादधिष्ठानं सत्यमेवेति भावः । देहादेर्मनुष्यत्वप्रकारेणैवाध्यासो नान्यथेत्यत्र हेतुं समर्थयन्नुपसंहरति—तस्मादिति । प्रतीत्यनुसारेणैवाध्यासकल्पनादिति भावः । अध्यासमूल एव—संस्कारद्वाराध्यासकारणक एव, अहङ्कारादेः—अहङ्कारेन्द्रियदेहतद्धर्माणामध्यासः स्वरूपतो ज्ञानतश्च । अत्रानवस्थादिको बीजा-

एक एवानादिः । (१)नन्वध्यासस्यानादित्वे 'स्मृतिरूपः

न्यायरत्नावली ।

एकजातीयस्य स्वसृष्ट्यवधिप्रलयपर्यन्तसर्वकाले सत्त्वमनादित्वमिति भावः । ननु अज्ञानाध्यासस्य उत्पत्त्यभावः 'न चात्माश्रयादी'त्यादिनोक्तः, स च न युक्तः, अहङ्कारस्य कार्यत्वेन तदवच्छेदेन संसृष्टतया घटाद्यवच्छेदेन कपालादाविव कारणस्य अज्ञानस्याप्युत्पत्तिसम्भवात् तत्राह—अविद्येत्यादि । एक एव—अहङ्कारानवच्छिन्न एव, अविद्याध्यासः—चिन्निष्ठाविद्यासम्बन्धः, अनादिः—अनुत्पन्नः । अहङ्काराध्यासकाले अहङ्कारावच्छेदेन अविद्यासंसर्गाध्यासेऽपि अविद्याविशिष्टचैतन्यस्य तत्पूर्वकाले सत्त्वमवश्यं वाच्यम्, अन्यथा चिदसम्बन्धेन अज्ञानेन (२)चित्सम्बन्धाहङ्कारजननासम्भवादित्यहङ्काराद्यनवच्छिन्नस्याप्यनुत्पन्नस्य अज्ञानचित्सम्बन्धस्य आवश्यकत्वात् तद्विशिष्टरूपेण अनुत्पन्नत्वम् अज्ञानाध्यासस्याविरुद्धमिति भावः । वस्तुतस्तु अहङ्कारोत्पत्तेः पूर्वमपि नानुत्पन्नोऽविद्यासम्बन्धः किन्तु उत्पन्नः, पूर्वोत्पन्नस्य अहङ्कारावच्छिन्नस्य अज्ञानचितोः तादात्म्यस्य संस्कारः, पूर्वोत्पन्नः अहङ्कारसंस्कारेणावच्छिन्नस्तेन सम्बन्धेन चिति सम्बन्धस्याज्ञानस्याहङ्कारजनकत्वम् , तस्यावश्यकत्वेन तदन्यसम्बन्धे मानाभावादिति ध्ये-

नारायणी ।

ङ्कुरादाविव प्रामाणिकत्वान्न दोष इत्याह—बीजेति । बीजादङ्कुरम् 'अङ्कुराच्च बीजान्तरं तत अङ्कुरान्तरमिति यथा तथा पूर्वाध्यासात्संस्कारः ततोध्यासः ततः संस्कार इत्येवमेकजातीययोः कार्यकारणयोः स्वसृष्टिप्रभृतिस्वप्रलयपर्यन्तं घटीयन्त्रवदावृत्तेरनादित्वमित्यर्थः । संस्कारसाधारणकार्यपरिणामभयाङ्गीकृताया अविद्याया अध्यासस्तु स्वरूपतोऽनादिरित्याह—अविद्येति । अविद्यायाः कारणभूतायाः अध्यासः एक एव न धारान्तःपातितयाऽनेकः अतः स्वरूपतोनादिः उत्पत्तिरहितः तस्योत्प-

(१) नन्वविद्याध्यासस्येति कखपुस्तकयोः। (२) अत्र यद्यपि चित्सम्बन्धात्तङ्कारेति सर्वत्र पाठ उपलभ्यते तथापि चित्सम्बद्धे त्याद्येव युक्तम्।

परत्र पूर्वदृष्टावभासोऽध्यास' इति वदता भाष्यकारेण स्मृतिरूपत्वेन संस्कारजन्यत्वमुक्तं विरुध्येतेति चेन्न । कार्याध्यासाभिप्रायत्वात्तस्य । 'परत्र परावभास' इत्येतावन्मात्रस्यैव उभयानुगतस्य लक्षणत्वात् ।

न्यायरत्नावली ।

यम् । अध्यासस्य—अज्ञानाध्यासस्य, अनादित्वे-अनुत्पन्नत्वे, **स्मृतिरूपः**—स्मृतिसदृशः । **स्मृतिरूपत्वेन**—स्मृतिरूपत्वोक्त्या । **परत्र परावभास इति** । अवमतो भासो ज्ञानं ज्ञेयं वाऽवभासः । तथा चावमतत्वं ज्ञानार्थाध्यासयोर्लक्षणम् । तच्च येन रूपेण येन सम्बन्धेन च यदवच्छेदेन यत्र यत्प्रतीयते तदवच्छेदेन तत्र वर्तमानाभावस्य तद्रूपसम्बन्धाभ्यामवच्छिन्नप्रतियोगित्वं तन्निष्ठमित्यर्थाध्यासस्य, तादृशप्रतियोगित्वाश्रयविषयकज्ञानत्वं ज्ञानाध्यासस्ये-

नारायणी ।

त्तिकल्पने तु तस्य तस्यापि कारणान्तरापेक्षायामनवस्थाप्रसङ्गादिति भावः । अध्यासस्य—अज्ञानाध्यासस्य, अनादित्वे-अजन्यत्वे, स्मृतिरूपः-संस्कारजन्यत्वेन स्मृतिसदृशः, परत्र-तदभाववति, पूर्वदृष्टावभासः-ज्ञानपक्षे अवभासनमवभासः पूर्वदृष्टस्यावभासः पूर्वदृष्टजातीयस्यावभास इति यावत्, अन्यथाऽन्यथाख्यात्यापत्तेः, पूर्वदृष्टस्य नैयायिकैरपि भानाङ्गीकारात् ; अर्थपक्षे तु अवभासत इत्यवभासः अवभासमानः पदार्थः, पूर्वदृष्टश्चासावभासश्चेति पूर्वदृष्टावभास इत्यर्थः । तथाच स्वाधिकरणवृत्त्यत्यन्ताभावप्रतियोगित्वमर्थाध्यासस्य, तादृशार्थविषयकत्वं ज्ञानाध्यासस्य लक्षणमिति निष्कर्षः । स्मृतिरूपत्वेन-स्मृतिसदृशत्वेन । कार्येति । अहङ्कारायध्यासाभिप्रायकत्वात् । 'अहमिदं ममेदमि'ति भाष्येण तस्यैवोपक्रमात् इति भावः । ननु तर्हि भाष्ये (१)कारणाध्यासानुक्त्या न्यूनता तत्राह—परत्रेति । पूर्वदृष्टपदमारोप्यार्थपरं तथाच परत्र स्वाभाववति परस्य पदार्थस्य योऽवभासः अवभासमानो वा परः सोऽध्यासो भ्रम इति यावत् । उभयेति । कार्यकारणोभयाध्यासलक्षणत्वादित्यर्थः । अस्मि-

(१) कारणाध्यासस्य लक्षणानुक्त्येत्यर्थोऽत्र ज्ञेयः, अन्यथा कारणाध्यासस्योक्तत्वाद्व्याघातः स्यादिति भावः ।

यद्वा 'सत्यानृते मिथुनीकृत्ये'ति भाष्यवचनात् सत्यमिथ्यावस्तुसम्भेदावभासोऽध्यास इत्येव सिद्धान्तलक्षणम्। तेन कारणाध्यासेऽपि न लक्षणाव्याप्तिः । कार्याध्यासस्य च प्रवाहरूपेण बीजाङ्कुरवदनादित्वाभिधानान्न कोऽपि दोषः । एवमध्यासे सिद्धे एकस्यात्मनो जीवेश्वरादिव्यवस्था मानमेयादिप्रतिकर्मव्यवस्था चोपपद्यते । त-

न्यायरत्नावली ।

ति भावः । अत्र यथाश्रुतवाक्यस्य लक्षणाबोधकत्वादाह-यद्वेत्यादि । अनृतत्वमेव लक्षणम् । तदाश्रयस्य सदसद्व्यावृत्तिज्ञापनाय सत्यसम्भेदेत्युक्तम् , सत्यतादात्म्येत्यर्थः । सत्यं हि न सत्यसम्भिन्नं सत्यपोरभावात् । नाप्यलीकं तथा, सदसतोस्सम्बन्धाभावादिति भावः । अथवा सत्यसम्भिन्नत्वं लक्षणान्तरमथवा सत्यस्य चैतन्यज्ञानरूपत्वेन सम्बन्धोक्त्याऽनृतज्ञानत्वं ज्ञानाध्यासलक्षणमुक्तम् । अध्यासे—अज्ञानाहङ्काराध्यासे । उपपद्यत इति । तथा च तदुपपादनार्थमेव प्रथमोत्पन्नमप्याकाशाध्यासमनुक्त्वाऽहङ्काराध्यास उक्त इति भावः ।

नारायणी ।

लक्षणे भाष्यकारपङ्क्तिस्थस्मृतिरूपपदस्वारस्यभङ्ग इत्यतो लक्षणान्तरमाह—यद्वेति । सम्भेदः तादात्म्यम् । तेनेति । प्रकृतलक्षणकरणेनेत्यर्थः। अव्याप्तिः-कारणाध्यासासङ्ग्रहः । ननु कारणाध्यासस्यानादित्वसमर्थनेऽ-'हमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहार' इति भाष्यकारेणोक्तम्, कार्याहङ्काराद्यध्यासस्याप्यनादित्वमुक्तं विरुध्येत तत्राह—कार्येति । अध्यासनिरूपणस्य फलपर्यवसानमाह—एवमिति । निरुक्तप्रकारेणेत्यर्थः । अध्यासे-आत्मानात्मनोरितरेतराध्यासे । जीवेश्वरादीत्यादिना ब्रह्मविष्णुरुद्रादेर्विश्वादेश्च परिग्रहः । मानेति । मानमेयादीनां प्रतिविषयव्यवस्था कदाचित्कुत्रचित्केनचिदेव विषयो गृह्यत इत्यात्मिका एतस्या जीवेशविभागपूर्वकत्वात् जीवेशविभागमेवादौ दर्शयति—तथाहीति । तत्र

कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः ।

इतिश्रुतेः कार्यकोटिस्त्वंपदार्थस्य, कारणकोटिस्तत्पदार्थस्य । तत्रा-

नारायणी ।

पि कार्यकारणयोर्विशेषणत्वम् उपाधित्वमुपलक्षणत्वं चादाय तत्त्वंपदार्थावपि विशिष्टावुपहितावुपलक्षिताविति त्रिविधौ भवतः । तत्रान्तःकरणविशिष्टस्त्वंपदार्थो जीवः, 'तद्यथा महामत्स्य'इत्यादिश्रुतिप्रमितावस्थात्रयवान् । अन्तःकरणोपहितो जीवः साक्षी,'त्रिषु धामसु यद्भोग्य'-(१)मिति श्रुतिप्रमितः । अहंत्वपुरस्कारेणैव जीवस्य द्रष्टृत्वप्रतीतेः । अन्तःकरणोपलक्षितः शुद्धस्त्वंपदार्थः, 'अविजिघित्सोयमात्मे'ति श्रुतेः । प्रपञ्चनिरूप्यसाक्षित्वादिधर्मातीतः केवलः सच्चिदानन्दमात्रः । एवं तत्पदार्थोऽपि अज्ञानविशिष्ट ईश्वरः, 'मायिनन्तु महेश्वरम्' इति श्रुतेः । मायोपहित ईशः साक्षी, 'एको देवः सर्वभूतेष्वि'ति श्रुतिप्रमितः । मायोपहितस्यैव मायातत्कार्यद्रष्टृत्वसम्भवात् । मायोपलक्षितः शुद्धः 'केवलो निर्गुणश्चे'त्यादिपदैरेव तथा प्रतिपादितो वस्तुतः शुद्धत्वंपदार्थाभिन्नः । तत्र यद्यपि साक्षाद्व्यावर्तकत्वं विशेषणत्वं सप्रकारकधीजनकमात्रत्वरूपम्, उपरञ्जकपदाभिधेयमुपाधित्वं परम्परया व्यावर्तकत्वरूपम्, परिचायकपदार्थाभिधेयमुपलक्षणत्वं नैयायिकाभिमतमेकस्यैकपदाभिधेये न सम्भवति विरोधात्, अत एकैकपदाभिधेययो(२)रुक्तरीत्या त्रैविध्यं दुर्घटम्, तथापि स्वसिद्धम्, सिद्धान्ते तन्मतपरिभाषाया अनङ्गीकारात् । किन्तु विशेष्यवृत्तिधर्माश्रयत्वे सति व्यावर्तकं विशेषणम्, यथा 'घटोस्ती'त्यत्र घटे घटत्वं नीलादिश्च, विशेष्यघटवृत्तिविधेयसत्ताश्रयत्वे सति घटत्वस्य पटादिभ्यो नीलादेश्च पीतादिभ्यो व्यावर्तकत्वात् । उपाधिश्च विशेष्यवृत्तिधर्मानाश्रयत्वे सति साक्षाद्व्यावर्त्तकः, यथा 'श्रोत्रमस्ती'त्यादौ केवलनभःपदार्थे श्रोत्रे कर्णशष्कुली । तामादायैव नभसोस्तीत्यादिनियमाभावात् । तस्यास्तत्र विशेष्यनभोवृत्तिसत्त्वाद्यनाश्रयत्वे सति भेर्याकाशादिभ्यो व्यावर्तकत्वात् । उपलक्षणं तु विशेष्यवृत्तिधर्मानाश्रयत्वे सति परम्परया व्यावर्तकम्, यथा 'यत्र शाखाग्रं तत्र चन्द्र' इत्यादौ चन्द्रे शाखादिः । देशविशेषोपस्थापनद्वारैव तस्य व्यावर्तकत्वात् । दाष्टान्तिके च प्रकृतेऽन्तःकरणगताभासवृत्तिबन्धाश्रयत्वाद्भवति तत्रान्तःकरणं विशेषणम् साक्षिणि चोपाधिः । तद्वृत्तिभासकत्वरूपसाक्षितायाः अस्मिन्बाधात् । शुद्धे चोपलक्षणं विशिष्टोपस्थापनद्वारा

(१) त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् । तेभ्यो विलक्षणः साक्षी चिन्मात्रोहं सदाशिवः । इति श्रुत्या प्रमितः ।

(२)—भिधेययोस्तत्त्वमर्थयोरुक्तरीत्येत्यादि खपुस्तके ।

थाहि—अज्ञानोपहित आत्मा अज्ञानतादात्म्यापन्नः स्वचिदाभासविवेकादन्तर्यामी साक्षी जगत्कारणमिति च

न्यायरत्नावली ।

अज्ञानोपहितेत्यादि । अज्ञानोपाधौ प्रतिबिम्बभावापन्नत्वात् अन्तर्गततादात्म्यापन्नो यः अज्ञानोपहितात्मन(१) आभासः प्रतिबिम्बः सोऽज्ञानोपहितः,आत्मा—विविक्तः बिम्बप्रतिबिम्बयोरभेदस्य यावदुपाधिसत्त्वं भानात् सोऽन्तर्यामिरूपः । तस्य च स्वरूपतो मिथ्यात्वेऽप्यात्माविवेकाच्चेतनत्वसाक्षित्वादीति ज्ञापयितुम् आत्मा विशेष्यत्वेनोक्तः न तु तथा विवक्षितमत्र, अथवेत्यादिना तादृशपक्षस्य वक्ष्यमाणत्वात् । अन्तर्यामी—सर्वेषां प्रेरकः, साक्षी—सर्वव्यवहारहेतुज्ञानस्वरूपः, तेनैव ज्ञानेन सर्वेषां जीवानां व्यवहार इति भावः । **जगत्कारणमिति**। न च जगत्कारणत्वरूपेणेशस्य जीवान् प्रति आवृतत्वात् साक्षिरूपेणावृतत्वापत्त्या साक्षित्वानुपपत्तिरिति वाच्यम्। अज्ञानप्रतिबिम्बत्वरूपसाक्षित्वाविशिष्टेऽहङ्काराध्यासस्य विवरणादिमत इव वार्तिकमतेऽपि स्वीकारात् जीवान्प्रति सा-

नारायणी ।

विशिष्य तज्ज्ञापनात् । एवमज्ञानस्यापि तत्पदाभिधेये त्रयं सम्भवति, तद्वृत्तिकर्तृकत्वाश्रयत्वात् , साक्षित्वबाधात् , विशिष्टोपस्थापनद्वारा विशिष्य तज्ज्ञापनाच्चेत्यादिपरिभाषयैव जीवेशसाक्षिशुद्धविभागव्यवस्थाया उपपादनान्न काप्यनुपपत्तिः । अविद्यायास्तत्कार्यस्य जीवस्य तद्भोक्तुः कर्तुरीशस्य द्रष्टुः साक्षिणश्च स्वप्नत्वप्रतिपादकायाः वक्ष्यमाणश्रुतेः स्वारस्यमस्मिन्नेव पक्षे उपपद्यत इत्यभिप्रेत्य वार्त्तिककारैरङ्गीकृतमिमं पक्षमवतारयति—अज्ञानोपहितात्मेति । अज्ञानोपहितस्यात्मा—प्रतिबिम्बत्वेन स्वरूपम् । तस्य जगत्कारणत्वेन निर्देशे हेतुगर्भं विशेषणमाह—अज्ञानेति । अज्ञानतादात्म्यविशिष्टतया प्रमित इत्यर्थः । प्रतिबिम्बस्य मिथ्याभूतस्य कथमन्तर्यामित्वादिकं तत्राह—स्वचिदाभासेति । स्वस्मिन्नज्ञाने यश्चिदाभासस्तस्य बिम्बेनाविवेकात् । तथाच बिम्बाभेदमादाय तत्रान्तर्यामित्वादिव्यपदेशः । अन्तर्यामी सर्वेषां प्रेरकः, साक्षी स-

(१) अज्ञानोपहित आत्मन इति गपुस्तके । तदसंलग्नम् ।

कथ्यते, बुद्ध्युपहितश्च(१) तत्तादात्म्यापन्नः स्वचिदाभासाविवेकाज्जीवः कर्ता भोक्ता प्रमातेति च कथ्यते—इति वार्तिककारपादाः। प्रतिदेहं बुद्धीनां च भिन्नत्वात् तद्गतचिदाभासभेदेन तदविविक्तं चैतन्यमपि भिन्नमिव प्रतीयते। अज्ञानस्य तु सर्वत्राभिन्नत्वात्तद्गताचिदाभासभेदाभावात् तदविविक्तसाक्षिचैतन्यस्य न कदाचिदपि

न्यायरत्नावली।

क्षिणोऽनावृतत्वात्। तत्र प्रमाणवृत्त्यभावकालेऽप्यहमज्ञ इति प्रत्ययात् अहङ्कारविशिष्टस्यैव सुखदुःखादिसाक्षित्वेनाज्ञानसाक्षिणीश्वरत्वस्वीकारादिति भावः। बुद्ध्युपहित इति। अहङ्कारोपहित इत्यर्थः। पूर्ववदहङ्कारोपाहितात्मन(२) आभासः तदविविक्ताहङ्कारोपाध्यन्तर्गतप्रतिबिम्बरूपः जीवादिरूपः सुषुप्तावपि संस्काररूपेणाहङ्कारसत्त्वाज्जीवसत्त्वम्। बुद्धीनाम्—अहङ्काराणाम्। सर्वत्र—सर्वकालेषु। साक्षिचैतन्यस्येति। 'कर्माध्यक्षः सर्वभूताधिवासः। साक्षी'त्यादिश्रुतिः ईशस्य सर्वसाक्षित्वे मानम्। ननु उपाधितादात्म्या-

नारायणी।

र्वव्यवहारहेतुज्ञानस्वरूपः, जगत्कारणम्-जगदुपादानम्। बुद्धीति। बुद्ध्युपहितस्यात्मा प्रतिबिम्बत्वेन स्वरूपः। तस्य कर्तृत्वे हेतुगर्भं विशेषणमाह-तत्तादात्म्यापन्नः। बुद्धितादात्म्यदिशिष्टतया प्रतीयमानः। ननु मिथ्याभूतस्य कथं चेतनत्वादिकं तत्राह—स्वेति। स्वस्मिन्नहङ्कारे यश्चिदाभासस्तस्य बिम्बेनाविवेकात्। अत्रापि बिम्बाभेदमादायैव सर्वचेतनत्वादिकमिति भावः। ननु जीवसाक्षिणः प्रतिबिम्बभेदोऽवभासते। ईशसाक्षिणस्तु नेति भेदः किं निबन्धनस्तत्राह—प्रतिदेहमिति। बुद्धिगतचित्प्रतिबिम्बभेदेन तदविविक्तं चैतन्यमपि-प्रतिबिम्बाभिन्नतया प्रमितं जीवसाक्षिचैतन्यमपि भिन्नमिव-प्रातीतिकभेदविशिष्टं प्रतीयते। सर्वत्र-सर्वेषु कार्येषु अभिन्नत्वात्-एकत्वात्। तद्गतेति। अज्ञानगतेश्वररूपप्रतिबिम्बभेदाभावात्। तदविविक्तेति—तदभिन्नेत्यर्थः। भेदभानम्-औपा-

(१) बुद्ध्युपहितात्मा तत्तादात्म्यापन्न इति कखपुस्तकयोः।

(२) अहङ्कारोपहित आत्मन इति गपुस्तके।

भेदभानमिति । अस्मिंश्च पक्षे तत्त्वमादिपदे जहल्लक्षणैव । साभासस्योपाधेर्वाच्यार्थस्य हानात् । आभासस्यापि जडाजडविलक्षणत्वेनानिर्वचनीयत्वात् । तदुक्तं संक्षेपशारीरके--

साभासाज्ञानवाची यदि
भवति पुनर्ब्रह्मशब्दस्तदाहं-

न्यायरत्नावली ।

पन्नाभासोऽपि विनिगमनाभावात्तत्त्वमादिपदवाच्यः । आभासश्च उपाध्यन्तर्गत(१)स्वरूपोऽपि तद्धर्मविशिष्टचिदेव । तथा च जहदजहल्लक्षणैव तत्राह—आभासस्येति । सोपाध्याभासस्येत्यर्थः । वाच्यार्थस्येत्यनुषज्यते । अनिर्वचनीयत्वात्-वार्तिकमते मिथ्यास्वरूपत्वस्वीकारात् । साभासाज्ञानवाची साज्ञानाभासवाची(२)

नारायणी ।

धिकप्रातीतिकभेदभानम् । अस्मिंश्च पक्षे-जीवेशयोः कार्यकारणोपाध्यन्तर्गताभासरूपतापक्षे । तत्त्वमस्यादिपदे-'तत्वमसी'ति वाक्यघटकीभूततत्त्वमादिपदे । आदिपदा'दहं ब्रह्मास्मी'त्यादिपरिग्रहः । जहल्लक्षणैव-जहति पदानि स्वार्थं यस्यां वृत्ताविति वाच्यार्थस्य सर्वांशपरित्यागेनाशक्यवृत्तिरूपैव । तत्र बीजमाह--साभासस्येति । आभाससहितस्योपाधेरित्यर्थः । वाच्यार्थस्य हानात्-त्यागात् अभेदान्वयित्वासम्भवादिति भावः । ननु विनिगमकाभावादुपाधिविशिष्टाभासोऽपि तत्त्वमादिपदवाच्यः, आभासश्चोपाध्यन्तर्गतत्वरूपारोपितधर्मविशिष्टा बिम्बचिदेव तथाच जहदजहल्लक्षणैव तत्राह--आभासस्येति । सोपाध्याभासस्यापि । जडेति । 'अहं चेतन' इत्यादिप्रतीतेरहङ्कारादिरूपजडविलक्षणत्वेन । आभासत्वादेव साक्षिरूपाजडविलक्षणत्वेनेत्यर्थः । अनिर्वचनीयत्वात्-स्वरूपतो मिथ्यात्वात् । प्रमाणं चात्र जीवेशादीन्प्रकृत्य 'तदेतत्त्रयं स्वप्नं मायामा मि'त्यादिश्रुतिः, चिदाभासो मिथ्या आभासत्वान्मुखाभासवदि'त्यनुमानं च । साभासाज्ञानवाची साज्ञानाभासवाची वा । अहङ्कारवाची

(१)—र्गतत्वरूपारोपितधर्मविशिष्टचिदेव इति घपुस्तके ।

(२) वा अहङ्कारवाची साभासाहङ्कारस्य साहङ्काराज्ञानस्य वा वाचकः इति घपुस्तके ।

शब्दोऽहङ्कारवाची भवति
तु जहती लक्षणा तत्र पक्षे । इति ।
न चाभासस्यैव बद्धत्वात् केवलचैतन्यस्य मुक्तत्वात् बन्धमोक्षयोर्वैयधिकरण्यं स्वनाशार्थं प्रवृत्त्यनुपपत्तिश्चेति वाच्यम् । केवलचैतन्यस्यैवाभासद्वारा बद्धत्वाभ्युपगमात् । तदुक्तं वार्त्तिककारपादैः--

न्यायरत्नावली ।

साभासाहङ्कारस्य साहङ्काराभासस्य वाचकः । बद्धत्वात्—कर्तृत्वादिसंसारवत्त्वात् , मुक्तत्वात्-तत्त्वज्ञानाभिव्यक्तपूर्णानन्दस्वरू-

नारायणी ।

साभासाहङ्कारस्य साहङ्काराभासस्य वा वाचकः । तत्र पक्षे-मिथ्याभासाङ्गीकारपक्षे । जहती-विशेषेण स्वशक्त्यार्थे परित्यजन्ती । आभासवादे बन्धमोक्षयोर्वैयधिकरण्यापत्तिरूपं दोषमपरिहार्यतयेन पराभिप्रेतं परिहरिष्यन्नाशङ्कते-नचेति । आभासस्यैव-बुद्धिगतानिर्वचनीयचित्प्रतिबिम्बस्यैव न कूटस्थस्यावभासकस्य, बद्धत्वात्-'अहङ्करोमि, मे दुःखमि'त्यादिप्रतीतिसिद्धकर्तृत्वादिरूपसंसारबद्धत्वात् । केवलचैतन्यस्य तु सत्यस्य मुक्त्यन्वययोग्यस्य, मुक्तत्वात्-अविद्यानिवृत्युपलक्षितपरिपूर्णानन्दरूपत्वात् । बन्धमोक्षयोः-अविद्याप्रयुक्तकर्तृत्वतत्त्वज्ञानप्रयुक्ताविद्यानिवृत्त्योः, वैयधिकरण्यं-भिन्नाधिकरणनिष्ठत्वम्, तथाच मुक्त्यर्थं बद्धजीवस्य प्रवृत्तेरयुक्तेः प्रवृत्तस्य मिथ्यात्वेन फलकालेऽसत्त्वेन फलालाभादिति भावः। आभासवादे दूषणान्तरमाह--स्वेति । बन्धस्येव आभासस्यापि मिथ्यात्वात् तदीयतत्त्वज्ञानेन बन्धस्येवाभासस्यापि नाशोऽवश्यमङ्गीकर्तव्यः । नचैतद्युक्तम् , स्वनाशार्थं प्रवृत्त्यदर्शनादिति भावः । मत्तापरिज्ञानाद् दूषणमिति ज्ञापयिष्यन्स्वमतप्रदर्शनेन दूषणं परिहरति--केवलेति । साक्षिचैतन्यस्यैव नाभासस्येत्यर्थः । आभासद्वारा-स्वानिर्वचनीयप्रतिबिम्बद्वारा । बद्धत्वाङ्गीकारात्-कर्तृत्वादिभानरूपसम्बन्धाङ्गीकारात् । प्रतिबिम्बभावानन्तरं कर्तृत्वग्रहणं बन्धः स च साक्षिण एव तन्निवृत्तिरूपो मोक्षोऽपि तस्यैवेति न बन्धमोक्षयोर्वैयधिकरण्यगन्धोपीति यावत् । अपसिद्धान्तशङ्कां वारयति--तदुक्तमिति । वार्त्तिककारैरिति शेषः ।

अय मेव हि नोऽनर्थो यत्संसार्यात्मदर्शनम्। इति। तेन शुद्धचैतन्यस्याभास एव बन्धः। तन्निवृत्तिश्च मोक्ष इति न किञ्चिदसमञ्जसम्। अथवाऽऽभासा-

न्यायरत्नावली।

पत्वात्। (१)नः—अधिष्ठानीभूतचिन्मात्रस्वरूपकाणाम्, आभासानामित्यर्थः। दर्शनं—भासकत्वयोग्यशुद्धचिन्निष्ठम् आभासतादात्म्यमिति यावत्। तन्निवृत्तिरिति। तथा च स्वीयवास्तवमुख्य(२)स्वरूपप्राप्तये स्वस्य बद्धस्य नाशार्थमपि प्रवृत्तिः न दोषाय। सर्वमतेष्वपि मुक्तस्य स्वीयरूपस्य प्राप्त्यर्थं (३)बद्धस्वरूपस्य नाशार्थं बद्धे प्रवृत्तिस्वीकारात्। मनोदेहादिविशिष्टरूपं हि बद्धम् तन्नाशद्वारा तदुपलक्षितमुक्तरूपप्राप्त्यर्थं तत्र प्रवृत्तेः स्वीकारात्। अत्र अज्ञानमेव शुद्धचिन्निष्ठं बन्धः तन्नाशो मोक्ष इति युक्तम्।

'अविद्यास्तमयो मोक्षः सा च बन्ध उदाहृतः।

इति वार्तिकोक्तेः। आभासस्याप्यज्ञानजन्यत्वात्। तथाप्याभासस्य सुखदुःखाद्याश्रयत्वेन स्फुटबन्धवत्त्वेन प्रत्ययात् स एव बन्ध उक्तः। अत एव संसार्यात्मदर्शनमित्यनेनाभासस्य दुःखादिसंसारवत्त्वमुक्तम्। नन्वेवं यत्र बन्धस्तदेव जीवस्य स्वरूपं स्यात्तत्राह—अथवेत्यादि। चैतन्यमपीति। यदा चिदविविक्ताभासो

नारायणी।

नः अस्माकं भासकचिद्रूपाणां अनर्थः बन्धः संसार्यात्मदर्शनं संसार्यात्मना संसारिरूपेणाभासतादात्म्यविशिष्टतया दर्शनं प्रतीतिः। दोषसमाधानस्य फलितार्थमाह—तेनेति। स्पष्टम्। जहल्लक्षणावादो न भाष्यकाराणामभिमत इत्यतस्तदनुसारेणाभासवादे तत्त्वंपदार्थावाह—अथवेति। आभासादविविक्तचैतन्यम्। अज्ञानगताभासतादात्म्यविशिष्टतया प्रतीयमानं जीवसाक्षिचैतन्यं तत्पदवाच्यं बुद्धिगताभासतादात्म्यविशिष्टतया

(१) यद्यप्यत्र 'न अधिष्ठानीभूत' इत्यादिः पाठः, तथापि लेखकदोषादिति बोध्यम्। परन्तु 'अयमेव हि नोऽनर्थो' इत्यस्याः कारिकायाः न इति पदस्यार्थ एषः।

(२)—मुक्तरूपेति घपुस्तके। (३) बद्धस्य स्वीयरूपस्येति घपुस्तके।

विविक्तचैतन्यमपि तत्त्वमसिपदवाच्यम् । तेन वाच्यैकदेशस्यात्यागादस्मिन्पक्षे जहदजहल्लक्षणैवेति न कोऽपि दोषः । अयमेव पक्षः आभासवाद इति गीयते ।

न्यायरत्नावली।

वाच्यः, तदा विनिगमकाभावात् आभासाविविक्तं चैतन्यमपि वाच्यम् । वाच्यार्थस्य चिद्रूपतया भानस्य उभयथापि निर्वाहादिति भावः । एकदेशस्येति । यद्यपि चिदविविक्ताभासस्य वाच्यत्वेऽपि चितो वाच्यविशेषणत्वेन वाच्यत्वमस्ति, तथापि चित्स्वरूपलक्षणा न जहदजहल्लक्षणोच्यते, शक्तिमुख्यविशेष्यलक्षणाया एव तथात्वात् । शक्तिस्वाभाव्येन विशेष्यतयैव भानं चितः स्यात् । जहदजहल्लक्षणा हि शक्यैकदेशशक्तिरेव । यथा बलवदनिष्टाजनकत्वविशिष्टेष्टसाधनत्वज्ञानशक्तविधिप्रत्यये 'श्येनेनाभिचरन् यजेत' इत्यादौ केवलेष्टसाधनत्वबोधोपधयिकातादृशशक्तिरित्युक्तं शब्दमणौ । तथा च विशेषणतया शक्यस्याविशेषणतया च शाब्दधीर्यदि शक्त्या स्यात्, तदा 'गौर्नित्या, पशुरपशुरि'त्यादावपि स्यात् । किञ्च विशेषणस्यावाच्यतापक्षे चिदाविविक्तस्य वाच्यत्वेऽपि चितो वाच्यत्वाभावेन वाच्यैकदेशत्वाभावे बोधो लक्षणयैवेति भावः । आभासवाद इति । स्वरूपतो मिथ्याभूतं प्रति-

नारायणी ।

प्रतीयमानं जीवसाक्षिचैतन्यं त्वंपदवाच्यमित्यर्थः । अपिना विनिगमकाभावादाभासाविविक्तचैतन्यस्य चतन्याविविक्ताभासस्य च द्वयोरेव तत्त्वमादिपदवाच्यत्वं वक्तुं शक्यमिति ज्ञापितम् । प्रकृतोक्तेः फलमाह-तेनेति । आभासाविविक्तचैतन्यस्य वाच्यत्वाङ्गीकारेणेत्यर्थः । वाच्यैकदेशस्य-वाच्यार्थैकदेशस्य साक्षिणः, अत्यागात्-अन्वयितया ग्रहणात् । अस्मिन्नपि पक्षे-आभासस्य मिथ्यात्वमिति पक्षे, जहदजहल्लक्षणैव जहति न जहति च पदानि स्वार्थं यस्यां वृत्तौ सैव, शक्यैकदेशपरित्यागेन शक्यैकदेशवृत्तिरूपैवेति यावत् । एवकारादु 'वृत्त्यन्तरव्यवच्छेदः । न कोपि दोषः । नाचार्योक्तिविरोधरूपो दोषः । अयमेव पक्ष इति । जीवेशौ वि-

अज्ञानोपाहितं बिम्बचैतन्यमीश्वरः। अन्तःकरणतत्संस्कारावच्छिन्नाज्ञानप्रतिबिम्बितं चैतन्यं जीवः इति विवरणकाराः। अज्ञानप्रतिबिम्बितं चैतन्यमीश्वरः।

न्यायरत्नावली।

बिम्बमिति वादः आभासवादः। स्वरूपतः सत्यं प्रतिबिम्बत्वरूपेण मिथ्याभूतं बिम्बमेव प्रतिबिम्बमिति वादस्य विवरणोक्तस्य वक्ष्यमाणस्य प्रतिबिम्बवादत्वमिति भावः। बिम्बचैतन्यम्—अज्ञानोपाध्यनन्तर्गतचैतन्यम्। शुद्धाद्यावर्तयति—अज्ञानोपहितमिति। अन्तःकरणेत्यादि। अन्तःकरणं स्थूलावस्थं मनः, तत्संस्कारः सूक्ष्मावस्थं मनः, तयोरन्यतरविशिष्टं यदज्ञानं तत्प्रतिबिम्बितमिति, उक्तान्यतररूपे अज्ञाने च प्रतिबिम्बितमिति यावत्। मनस्त्वेन निवेशे मनस्संस्कारस्य असङ्ग्रहः, तत्र मनस्त्वसत्त्वे मानाभावात्। न हि घटसंस्कारे घटत्वमस्ति, अतस्संस्कारोऽपि पृथगुक्तः। उपाधेः प्रतिबिम्बपक्षपातित्वेन 'पूर्णानन्दो नास्ति न भाती'ति व्यवहाररूपकार्यमविद्या प्रतिबिम्ब एव जन-

नारायणी।

म्बादतिरिक्तौ चिदाभासावेवेति पक्षः। आभासवादः। स्वरूपतो मिथ्याभूतः प्रतिबिम्ब इति वादः। बिम्बस्यैव प्रतिबिम्बव्यवहारतत्क्लृप्तकार्यसम्भवान्नातिरिक्ताभासकल्पनं युक्तं गौरवादित्यभिप्रायकं विवरणमतमाह—अज्ञानेति। अज्ञानरूपोपाधिना परिचायकेन परिचितं कर्णशष्कुल्यादिना श्रोत्रादिवत्। एतेन महाकाशमिव शुद्धमिति लब्धम्। तथाचेश्वरचैतन्यं ग्रीवास्थमुखवदुपाध्यनन्तर्गतमिति फलितम्। उपाध्यादिलक्षणं प्रागेवोक्तम्। अन्तःकरणं स्थूलावस्थाबुद्धिः, संस्कारः सूक्ष्मावस्थाबुद्धिः, तयोरन्यतरविशिष्टं यदज्ञानं तत्र प्रतिबिम्बितं तदन्तर्गतत्वरूपारोपितधर्मविशिष्टं चैतन्यं बिम्बात्मकमेव जीवः जीवपदाभिधेय आत्मा, तथाच बिम्बप्रतिबिम्बयोः स्वरूपत एकत्वं भेदस्तु कल्पितः अतः स्वरूपेण जीवस्य सत्त्वाद् बन्धमोक्षयोः सामानाधिकरण्यादिकमपि स्वरसत उपपद्यत इति संक्षेपः। नेयं कल्पना युक्ता 'कार्योपाधिरयं जीवः कारणोपाधिरीश्वर' इति श्रुतिविरोधात्, किन्तु कार्यकारणगतप्रतिबिम्बावेव ताविति संक्षेपशारीरकाचार्यमतमाह—अज्ञानेति। 'अज्ञानान्तर्ग

बुद्धिप्रतिबिम्बितं चैतन्यं जीवः। अज्ञानोपहितं बिम्बचैतन्यं शुद्धमिति सङ्क्षेपशारीरककाराः। अनयोः पक्षयोः बुद्धिभेदाज्जीवनानात्वम्। प्रतिबिम्बस्य (१)पारमार्थिकत्वात् जहदजहल्लक्षणैव तत्त्वमादिपदेषु। इममेव च

न्यायरत्नावली।

यति, न तु बिम्बे; दर्पणादेः स्वगतमालिन्यादिसंसर्गस्य प्रतिबिम्बीभूतमुखादौ जनकत्वदर्शनात्। अतो जीवस्यैव प्रतिबिम्बत्वमुक्तं नेशस्येति बोध्यम्। शुद्धं-जीवेशानुस्यूतं साक्षिरूपम्। नानात्वमिति। मनोवच्छिन्नस्यैव संसाराश्रयत्वप्रतीत्या मनस उपाधित्वमावश्यकम्, तथा च जीवनानात्वमिति भावः।(२)प्रतिबिम्बस्य-प्रतिबिम्बस्वरूपचितः। प्रतिबिम्बत्वविशिष्टरूपेण कल्पितत्वेऽपि प्रतिबिम्बस्य स्वरूपचैतन्यमकल्पितमिति भावः। 'रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय' इत्यादिश्रुतयोऽनेकमनोरूपे प्रतिबिम्बितानां जीवत्वे मानानि। ईशस्य प्रतिबिम्बितत्वेऽपि तत्र

नारायणी।

तत्त्वरूपारोपितधर्मविशिष्टं चैतन्यमित्यर्थः। बुद्धीति। बुद्ध्यन्तर्गतत्वरूपारोपितधर्मविशिष्टं चतन्यमित्यर्थः। अतो न वार्तिककारमतादविशेषस्तन्मतेऽतिरिक्तस्यैवाभासस्याङ्गीकारात्। शुद्धमाह--अज्ञानेति। अज्ञानोपलक्षितमित्यर्थः। शुद्धं-जीवेशयोरनुस्यूतसाक्षिरूपम्। अत एवोपहितशब्देन निर्देशः। भास्यभासकभावरूपस्याज्ञानकृतसम्बन्धस्य च व्यवहारकाले सत्त्वात्। अनयोः-बिम्बप्रतिबिम्बावीशजीवौ कार्यकारणौपाधिकौ जीवेशाविति युक्तयोः। नानात्वमिति। बुद्ध्यवच्छिन्नस्यैव संसाराश्रयत्वप्रतीतेः बुद्धेरुपाधित्वमाश्रयतया अत्रच्छेदकतया चावश्यं तथाच जीवनानात्वमिति भावः। आभासवादाद्वैलक्षण्यं कल्पनायाः फलमाह--प्रतिबिम्बस्येति। प्रतिबिम्बस्वरूपचितः। सत्यत्वात्--प्रतिबिम्बत्वरूपधर्मविशिष्टतया मिथ्यात्वेऽपि प्रतिबिम्बस्वोपलक्षितं स्वरूपचैतन्यं त्रिकालाबाध्यमेवेति भवः। जहदजहल्लक्षणैव-प्रतिबिम्बत्वाद्यंशपरित्यागेन

(१) सत्यत्वादिति कखपुस्तकयोः नारयण्यां च।

(२) प्रतिबिम्बस्य इति गपुस्तके नास्ति।

प्रतिबिम्बवादमाचक्षते । अज्ञानविषयीकृतं चैतन्यमीश्वरः । अज्ञानाश्रयीभूतं च जीव इति वाचस्पतिमिश्राः । अ-

न्यायरत्नावली ।

विद्या 'पूर्णानन्दो नास्ती'त्यादिव्यवहारं न जनयति, सार्वज्ञ्यश्रुतेः । अज्ञानविषयीत्यादि । 'ब्रह्म नास्ती'त्यादिव्यवहारो यदाश्रितः अज्ञानमपि तदाश्रितम् । कार्यकारणयोः एकाश्रितत्वस्य युक्तत्वात् । स च जीवाश्रित इत्यज्ञानमपि तदाश्रितम् । न च अज्ञानाश्रयस्यैव जीवस्वरूपत्वात् आत्माश्रय इति वाच्यम् । अज्ञानोपहितस्यैव जीवत्वेन जीवाश्रितस्याज्ञानस्य स्वाश्रितत्वाभावात् । न हि दण्डत्वोपहितस्य घटकारणत्वे दण्डत्वस्यापि तत् । एवं च 'अज्ञानाश्रयो नास्ति न भाती'त्यव्यवहाराभावात् अज्ञानानाश्रयीभूतस्यैव अज्ञानविषयत्वात् तदुपहितचिदेव ईश

नारायणी ।

वाच्यार्थैकदेशरूपशुद्धचिद्बोधोपयिका वृत्तिर्भागाख्या लक्षणैव । इमामेव । एकैव कूटस्थचिदुपाध्यन्तर्गतत्वादिना जीवेशादिव्यपदेशभाक् न तु भिद्यतेऽस्याभासेनेति पक्षम् । प्रतिबिम्बवादं-स्वरूपतः सत्यः प्रतिबिम्ब इति वादं आचक्षते तत्त्वविद इति शेषः । ईशे अज्ञानकल्पनं न युक्तं भ्रमकारणतया कल्पनीयस्य तस्य भ्रमाश्रये जीव एवौचित्यात् , कार्यकारणयोरेकाश्रितत्वनियमात् , अन्यथाऽतिप्रसङ्गात्, तस्मात्-

तस्यैव नित्यतृप्तस्य सदानन्दमयात्मनः ।
अविच्छिन्नस्य जीवस्य संसृतिः कथ्यते बुधैः ॥

इत्यादिस्मृतेरविद्यावच्छिन्नत्वावच्छिन्नावेव जीवेशावित्यभिप्रायकं वाचस्पतिमतमवतारयति---अज्ञानेति । 'ब्रह्म नास्ती न भाती'ति जीवनिष्ठभ्रमकारणीभूताज्ञानविषयीभूतं नत्वविद्याश्रयमभ्रान्तत्वादित्यर्थः । 'ज्ञाज्ञौद्वावजावीशानीशा'विति श्रुतेश्चाज्ञानाश्रयो जीव एवेत्याह—अज्ञानेति । आश्रयतासम्बन्धेनाज्ञानविशिष्टमित्यर्थः । न चाज्ञानाश्रयस्यैव जीवत्वादात्माश्रय इति वाच्यम् । अज्ञानोपहितस्यैव जीवत्वेन जीवाश्रितस्याज्ञानस्य स्वाश्रितत्वाभावात् दण्डत्वस्येव दण्डोपहितवृत्तित्वेपीत्यन्यत्र विस्तरः । अस्मिंश्च पक्षे-अवच्छेदवादपक्षे । (१)[यथा दण्डत्वोप

(१) [...] चिह्नितः पाठो नास्ति खपुस्तके

स्मिंश्च पक्षे अज्ञाननानात्वात् जीवनानात्वम् । प्रति-
जीवं च प्रपञ्चभेदः । जीवस्यैव (१)स्वाज्ञानोपहिततया-

न्यायरत्नावली ।

इति भावः । अज्ञाननानात्वादिति । कस्मिंश्चि(२)ज्जीवन्मु-
क्तेऽपि कस्यचित् बन्धोपलब्धेः जीवभेदप्रयोजकं जीवोपाध्यज्ञान-
नानात्वं कल्प्यते । प्रपञ्चभेदः-ईशाकाशादिप्रपञ्चनानात्वम् ।
एकाज्ञाननाशेऽपि अज्ञानतद्विषयेशतत्कार्याकाशादीनां सत्त्वात्
नानात्वमिति भावः । ननु सृष्ट्यारम्भकाले सर्वैरज्ञानैः एक एव
प्रपञ्चो जन्यताम्, अज्ञानभेदेन प्रपञ्चभेदकल्पने गौरवात् । एका-
ज्ञानस्य उच्छेदक्षणे प्रपञ्चस्य उच्छेदे(३) तत्तद्वितीयक्षणे विद्यमा-
नाज्ञानानां परिणामः प्रपञ्चान्तरं जायते । एवञ्च एकस्मिन् प्रप-
ञ्चोच्छेदक्षणे केनापि प्रपञ्चो नोपलभ्यते इति स्वीक्रियते उक्त-
लाघवानुरोधात् । न च भवन्मतेऽपि तत्तदज्ञानव्यक्तिभिः क्रमेण
नानाप्रपञ्चोत्पत्तिस्वीकारेण न लाघवमिति वाच्यम् । शतादिसं-

नारायणी ।

हितस्य घटकारणत्वेन दण्डाश्रितस्य कारणत्वस्य दण्डत्ववृत्तिता यथा
वा दण्डत्वोपहितस्यैव दण्डत्ववत्त्वेन दण्डाश्रितस्य दण्डत्वस्य स्वाश्रित-
त्वम्] अज्ञाननानात्वादिति । कस्मिंश्चिज्जीवे मुक्तेऽपि कस्यचिद्बन्धोपल-
म्भाज्जीवभेदप्रयोजकं जीवोपाध्यज्ञाननानात्वं कल्प्यते इत्यर्थः । अन्यथा
'तद्यो यो देवानां प्रत्यबुद्ध्यत स एव तदभवदि'त्यादिश्रुतिविरोधाप-
त्तेरिति भावः । जीवाज्ञानकार्यत्वात् स्वप्नवत् प्रपञ्चोऽपि प्रतिजीवं भिन्न
एव परिणामिविवर्तोपादानयार्भेदादित्याह--प्रतिजीवमिति । युगपद-
नेकपुरुषीयभ्रमसिद्ध्यानेकप्रातीतिकपदार्थवदपेक्षाबुद्धिजन्यानेकपुरुषीय-
द्वित्वादिवच्च जीवभेदेन विपदादिप्रपञ्चनानात्वमित्यर्थः । एकाज्ञाननाशे
ऽप्यन्याज्ञानकार्याकाशादीनां दर्शनात्प्रपञ्चनानात्वमिति भावः । वस्तुतस्तु
सकलजीवाविद्याभिरेक एव प्रपञ्चो जन्यते, एकस्मिन्मुक्ते च महापटनाशे
खण्डपट इव महाप्रपञ्च नाशे खण्डप्रपञ्च इति प्रपञ्चभेद इत्यन्यत्र विस्तरः ।

(१)—अज्ञानोपहितत्वात् जगदुपादानत्वमिति कपुस्तके ।

(२) जीवे मुक्तेपि इति घपुस्तके । (३) उच्छेदेन द्वितीयक्षणे इति घपुस्तके ।

न्यायरत्नावली ।

ख्यपुरुषाणां युगपत् मुक्तिस्थले शताद्यज्ञानव्यक्तीनां युगपन्नाशेन तावदज्ञानभेदेऽपि प्रपञ्चभेदाभावात् । युगपन्नानाप्रपञ्चस्वीकारे युगपदुत्पन्ननानाऽऽकाशादिषु नानापुरुषैः युगपदनुभूयमानानन्तसंयोगादिव्यक्तिकल्पने गौरवाच्चेति चेन्न । सृष्टिप्रलयवाक्यैस्तावत् परिमितप्रलयकालोत्तरमाकाशादीनां क्रमेण सृष्टिबोधनात् । युगपदेवाकाशादिसर्वप्रपञ्चोत्पत्तौ मानाभावात् । तत्तदसाधारणकारणसमवधानं विना उक्तद्वितीयक्षणे उपलभ्यमानसर्वकार्योत्पत्त्यसम्भवात् । (१)तत्तदसाधारणकारणानां हेतुहेतुमद्भावापन्नानामपेक्षणे चानेकक्षणेषु तत्तत्कार्योपलम्भापलापापत्तेः । न हि क्रियोत्पत्तिद्वितीयक्षणे प्रपञ्चोच्छेदे विभागाद्युत्पत्तिस्सम्भवति । किञ्च जीवस्य जगदुपादानत्वबोधिका—

पुरत्रये क्रीडति यस्तु जीवस्ततस्तु जातं सकलं विचित्रम् ।

इत्यादिश्रुतिः, अज्ञानस्य तद्बोधिका 'मायां तु प्रकृतिं विद्यात्' (सृष्ट्वा प्रविश्य) 'अमूढो मूढ इव व्यवहरन्नास्ते मायय्यैवे'ति श्रुतिश्च । एकवचनान्तानां जीवमायामूढपदानां स्वारस्यात् एकैकजीवस्याज्ञानस्य च जीवाज्ञानान्तरनिरपेक्षोपादानत्वं बोधयति । स्वत्पक्षे तु तद्वा-

नारायणी ।

नन्वविद्या यदि जीवाश्रिता तदा ब्रह्म कथं प्रपञ्चोपादानं परिणममानाऽविद्याश्रयत्वाभावादित्यादिशङ्क्यानावृतत्वेन जडशक्तययोगान्न ब्रह्मण उपादानत्वं किन्तु'पुरत्रये क्रीडति यश्च जीवस्ततस्तु जातं सकलं विचित्रमि'ति श्रुतेर्जीवस्यैवेत्याह—जीवस्यैवेति । नन्वज्ञानाश्रयस्याज्ञानप्रेरकत्वाद्ययोगात्कथं कर्तृत्वादिकं तत्राह—अज्ञानेति । अज्ञानरूपोपाधिना परिचितत्वादित्यर्थः । तथा चाज्ञानस्योपाधित्वेन जीवत्वानाश्रयत्वाज्जीवशरीरेऽप्रवेशाद्ज्ञानोपहितस्य कर्तृत्वादिकं सम्भवत्येवेति भावः । उपहितरूपेण जीवचैतन्यं सृष्टिस्थितिसंहारे कारणं विशिष्टरूपेण भ्रान्तमिति नि-

(१) तत्तदसाधारणानामिति गपुस्तके ।

जगदुपादानत्वात् । प्रत्यभिज्ञा चापि सादृश्यात् ।

न्यायरत्नावली ।

धस्स्यात् । तथा च साधूक्तं-'प्रतिजीवं प्रपञ्चभेद' इति । पुरत्रये-विराट्हिरण्यगर्भाव्याकृतरूपे । नन्वेवं 'यो घटो मया दृष्टः स एव त्वये'ति प्रत्यभिज्ञा न स्यात् तत्राह—प्रत्यभिज्ञेति । सादृश्यादिति । (१)दृष्टृत्वरूपसाधारणधर्मविषयकात् त्वद्दृष्टो मद्दृष्ट इत्याकारकेत्यर्थः।त्वद्दृष्टृव्यक्तित्यभेदस्य मद्दृष्टृव्यक्तावभावेऽपि मदीयप्रपञ्चान्तर्गतस्य मया कल्पितस्य व्यावहारिकस्य मद्दृष्टृव्यक्तिनिष्ठस्य त्वद्दृष्टृत्वस्य उक्तप्रत्यभिज्ञाविषयता । यद्यपि मद्दृष्टृत्वं तादृशं मद्दृष्टृव्यक्तावेव वर्तते, न तु त्वद्दृष्टे, तथापि त्वद्दृष्टृतात्वस्य त्वद्दृष्टृत्वे त्वत्कल्पिते सत्त्वात् एकजातीयस्य त्वद्दृष्टृत्वस्य सादृश्यत्वसम्भवः । न हि घटादिरिव घटत्वादिरपि जीवभेदेन भिन्नम्, येन त्वद्दृष्टृतात्वमपि तथा स्यात् । सादृश्यप्रत्ययबलेन हि जातिमात्रं सर्वजीवज्ञेयमेकमेव स्वीक्रियते । तथा च त्वद्दृष्टृतायाः त्वद्दृष्टृवृत्तिरूपादिस्वरूपत्वेन तद्वृत्तिजातिविशेषस्यैव त्वद्दृष्टृतास्वरूपत्वेन तद्घटितं सादृश्यम् । न च तथापि 'त्वदीयत्वद्दृष्टृवृत्तिरूपादिजातीयरूपवान् मद्दृष्ट' इति ज्ञानासम्भवः, अन्यदृष्टस्य अन्येन ज्ञातुमशक्यत्वादिति वाच्यम् । तथाऽपि वस्तुगत्या त्वद्दृष्टृरूपवृत्तिजातिविषयाकारस्य ज्ञानस्य सम्भवेन तस्यैव प्रकृते प्रत्यभिज्ञापदार्थत्वात् । एवञ्च तत्त्वज्ञानं स्वाश्रयजीवमात्रदृश्यस्यैवो-

नारायणी ।

पक्रमः । ननु यदि जीव एवोपादानं प्रतिजीवं च प्रपञ्चभेदस्तर्हि कथं 'यो घटस्त्वया दृष्टः स एव मये'ति प्रत्यभिज्ञा तत्राह—प्रत्यभिज्ञा चेति । 'त्वया दृष्टो मया दृश्यत' इत्याद्याकारिकेत्यर्थः। सादृश्यादिति । युगपद्भ्रमासिद्धानेकसर्षपादाविव तदेवेदमौषधमित्यादाविव च तद्वृत्त्यसाधारणधर्मवत्त्वादित्यर्थः । धर्मिणां प्रतिजीवं भेदेऽपि धर्माणामभेदात्प्रत्यभिज्ञोपपद्यत

(१) स्वरूपासाधारणधर्मविषयकादिति घपुस्तके ।

न्यायरत्नावली ।

च्छेदकं न तु जातेः । अथवा—

येयं गङ्गा नरैस्सेव्या सेव्यते सा सुरादिभिः ।
सर्वेषां पावनी सैका प्रयच्छति परं पदम् ॥

इत्यादिपुराणादिवाक्यमूलार्षप्रत्यभिज्ञैवात्र प्रत्यभिज्ञापदार्थः । आर्षज्ञानस्य देवनरादिदृष्टगङ्गादिरूपवतीयं गङ्गेत्याकारकस्य (१)सर्वजीवप्रपञ्चग्राहकत्वात् । वस्तुतस्तु सर्वजीवाज्ञानजन्यनानागङ्गादीनां सर्वजीवग्राह्यत्वेऽपि न क्षतिः । एकस्य तत्त्वज्ञानेनापरस्य प्रपञ्चानुच्छेद इत्येतदर्थमेव प्रपञ्चभेदस्वीकारात् । तथा च त्वदृष्टस्यापि मम ग्रहणात् ऐक्यप्रत्यभिज्ञा सम्भवत्येव । प्रत्यभिज्ञा चेत्यादिमूलं तु 'पूर्वदिने मुक्तो यः पुरुषः तदृष्टो घट इदानीं मया दृष्ट' इत्यादिधियः सादृश्यविषयकत्वपरम् । तत्र तदृष्टस्य इदानीमभावेन मदृष्टे तदैक्यविषयत्वासम्भवात् । यद्यपि=जीवनिष्ठाज्ञानविषयब्रह्मोपादानकं जगत् , अविद्या तु प्रमातृदोषविधया जगतो निमित्तकारणम् , न तूपादानम् , ब्रह्मनिष्ठजगतो व्यधिकरणत्वात् , न हि शरावादिनिष्ठदुग्धादेः घटादिनिष्ठदध्यादिरूपपरिणामस्सम्भवतीति कल्पतर्वादौ वाचस्पत्याशयो वर्णितः=तथापि मायोपादानत्वज्ञापिकायाः 'त्रयमप्येतत् सुषुप्तं स्वप्नं मायामात्रम् , मायां तु प्रकृति'मित्यादिश्रुतेः स्वारस्यात् , जीवोपादानत्वपरतयापि वाचस्पतिवाक्यानां नेतुं शक्यत्वात् जीवोपादानत्वश्रुतेश्च जीवोपादानत्वमुक्तम् । एवञ्चाज्ञानविषयस्यापि जीवस्य परिणामिकारणाज्ञानाश्रयत्वादेव उपादानत्वं न विरुद्धम् । ब्रह्मणश्चानुपादानत्वेऽपि तज्ज्ञानमेवाज्ञाननिवर्तकम् , समानविषययोरेव ज्ञानाज्ञानयोः नाश्यनाशकभावस्य कल्पत्वात् । 'इदं रजत'मित्यादिभ्रमस्थलेऽपि पल्लवाविद्यापरिणामरजताद्युपादा-

(१) सर्वजीवीयप्रपञ्चेति घपुस्तके ।

ईश्वरस्य च सप्रपञ्चजीवाविद्याधिष्ठानत्वेन कारणत्वोपचारादिति । अयमेव चावच्छेदवादः । अज्ञानोपाहितं

न्यायरत्नावली ।

नत्वमुक्ताविद्याश्रयत्वात् जीव एव । तस्यैव शुक्त्याद्युपादानत्वात् शुक्त्याद्यवच्छेदेन जीवगतरजतादिप्रतीतिरुक्ताविद्यायाः शुक्त्याद्यवच्छिन्नचिद्विषयकत्वात् तादृशज्ञाननाश्यत्वम् । ईश्वरस्येत्यादि । जीवो न जगदुपादानम् किन्तु ईश्वर इत्यादिशास्त्रीयवाक्येषु उपादानपदमुपादानभूतजीवनिष्ठाविद्याविषयपरमित्यर्थः । 'यतो वा इमानि भूतानि जायन्ते' इत्यादिश्रुतिस्तु ब्रह्मणः जगत्कारणत्वं (१)बोधयती जीवब्रह्माभेदपरा इति बोध्यम् । अवच्छेदवाद इति ।

घटसंवृतमाकाशं नीयमाने घटे यथा ।
घटो नीयेत नाकाशं तद्वज्जीवो नभोपमः ॥

नारायणी ।

इति भावः । ननु जीव एव जगदुपादानं तर्हि 'यतो वा इमानि भूतानि जायन्त' इति श्रुतिविरोधः, तत्रेश्वरस्यैव जगत्कर्तृत्वप्रतिपादनादित्यत आह-ईश्वरस्य चेति । **मायाविषयस्येत्यर्थः** । सप्रपञ्चेति । **प्रपञ्चसहिताया जीवोपाधिभूताऽविद्या तदधिष्ठानत्वेन-तद्विषयत्वेन (२)गौणकारणताव्यवहारात्** । अभिन्ननिमित्तोपादानकत्ववादिनां वेदान्तिनां मते यत्र कर्तृत्ववादिना निमित्तत्वं तत्रैवोपादानत्वं मुख्यं वाच्यं तदुभयं च स्वप्नं प्रतीव प्रपञ्चं प्रत्यपि जीवस्यैवाविद्याश्रयत्वेन सम्भवति न ब्रह्मणः, अतः शुक्त्यादेरिवाविद्याविषयत्वेनैवोपादानत्वं भाक्तं न मुख्यमिति भावः । ननु तर्हि मायोपाधिकानां रामकृष्णादीनामनुपास्यत्वं स्यादिति चेत् । भ्रान्तोसि । जीवाज्ञानविषयस्य ब्रह्मण एव भक्त्यादिवशाद्रामकृष्णादिना प्रादुर्भावस्य भक्तिकृतफलसद्भावादेश्चाङ्गीकारात्, रजताद्यात्मना दोषवशात् शुक्त्यादेरिवेत्यन्यत्र विस्तरः । अयमेव-अविद्यावच्छिन्नानवच्छिन्नावेव जीवेशाविति पक्षः । **अवच्छेदवादः-महाकाशस्य घटाकाशादिरिव जीवः शुद्ध-**

(१) बोधयति जीवब्रह्माभेदपरेति पाठस्तु सर्वत्रोपलब्धोपि प्रामादिक एव ।

(२) कारणत्वोपचारात्-इति प्रतीको भ्रष्टोत्र लेखकदोषादिति ।

बिम्बचैतन्यमीश्वरः, अज्ञानप्रतिबिम्बचैतन्यं जीव इति वा, अज्ञानानुपहितं शुद्धचैतन्यमीश्वरः, अज्ञानो-

न्यायरत्नावली।

इत्यादिश्रुतयो जीवस्यावच्छिन्नरूपत्वबोधिकाः। अज्ञानोपहितमित्यादि। जीवोपाधौ मनो न निवेश्यते, हस्तपादाद्यवच्छिन्नानामिव मनोवच्छिन्नानां भेदेऽपि जीवभेदास्वीकारात्। परन्तु अज्ञानमेवोपाधिः। तस्य चैकत्वमेव, लाघवात्। 'मायान्तु प्रकृति'मजामेका'मित्यादिश्रुतिसिद्धैकवचनादिति भावः। अज्ञानानुपहितमिति। अज्ञानोपहितात् भिन्नमित्यर्थः। नन्वीश्वरस्याज्ञानानुपहितत्वे प्रपञ्चमध्ये अवस्थानं न स्यात्, तथा च 'यः पृथिव्यां तिष्ठन्नि'तिश्रुतिविरोधस्स्यादिति बिम्बप्रतिबिम्बरूपेश्वरजीववादिभिः विवरणकारैरवच्छेदवादे दूषणमुक्तम्, तत्राह—शुद्धमिति। तथा चोपहिते जीवचैतन्ये अधिष्ठानतया केवलचैतन्यस्य तादात्म्यमवश्यं वाच्यमिति प्रपञ्चमध्ये तदवस्थाने न कोपि दोष

नारायणी।

स्य परमात्मनोऽश इति वादः। शब्दार्थस्तु अवच्छिद्यते 'अयमयं न भवति, अयमेतादृशगुणक' इति परिच्छेदः प्राप्यते इत्यवच्छेद इति। एतन्मतनिष्कर्षस्त्वस्मत्कृतसिद्धान्तबिन्दु(१)गुरुटीकायां द्रष्टव्यः। प्रपञ्चभेदे जीवभेदे च गौरवान्नावच्छेदवादो युक्तः किन्तूपहितावेव जीवेशाविति दृष्टिसृष्टिपक्षमाह—अज्ञानेति। अज्ञानोपहिताद्भिन्नमित्यर्थः। शुद्धं-सर्वज्ञत्वादिधर्मातीतं सच्चिदानन्दमात्रस्वरूपम्। न च तस्य 'यः पृथिव्यां तिष्ठन्नि'त्याद्यन्तर्यामित्वबोधकश्रुतिविरोधः, निरुपाधिकस्य तस्य प्रपञ्चेऽवस्थानायोगादन्तर्यामित्वाद्यसम्भवादिति वाच्यम्। स्वतोऽवस्थानायोगेऽपि जीवचैतन्याधिष्ठानस्य जीवद्वाराऽवस्थानसम्भवान्न कोऽपि दोषः। 'अजो ह्येको जुषमाणोऽनुशेते' इत्यादिश्रुत्या जीवस्याज्ञानोपाधिकत्वश्रवणात्। अज्ञानोपाधिकं चैतन्यं जीवः। अज्ञानोपाधिकत्वेऽपि न विशिष्टो न वाऽज्ञानप्रतिबिम्बितः किन्तूपहित एवेत्याह—अज्ञानेति। अज्ञानोपाधिना जी-

(१)—सिद्धान्तबिन्दुविवरणे द्रष्टव्य इति खपुस्तके। कपुस्तके तु गुरुटीकायामिति पाठः।

पहिनं जीव इति वा मुख्यो वेदान्तसिद्धान्तः एकजीववादाख्यः। इममेव दृष्टिसृष्टिवादमाचक्षते। अस्मिंश्च

न्यायरत्नावली।

इति भावः। ईश्वरस्य जगदुपादानत्वे स्रष्टव्यालोचनं कल्प्यमवश्यमधिष्ठानाद्यभिज्ञकर्तृकं कार्यं प्रति कर्तव्यत्वेन तदालोचनस्य हेतुत्वात्, मायाविकर्तृकेन्द्रजालादौ तथा दृष्टत्वात्। जीवस्य जगदुपादानत्वे तु तन्न कल्प्यम्, स्वापादिरूपकार्यं प्रति तदहेतुत्वस्य दृष्टत्वात्, तथा च लाघवात् जीवस्यैव जगदुपादानत्वमित्याशयेनाह-अस्मिंश्चेत्यादि। स्वाज्ञानवशात्-स्वं प्रति आवारकं यद-

नारायणी।

वत्वेन ज्ञापितं न त्वज्ञानविशिष्टत्वेन जीव इत्यर्थः। नाज्ञानवैशिष्ट्यान्मनोवैशिष्ट्याद्वा जीवानां भेद उचितः। तथा च सति हस्ताद्यवच्छिन्नत्वादिनापि प्रातीतिकानन्तभेदापत्तेरिति गौरवम् अतोऽज्ञानमेकं तदुपाधिको जीवोप्येक एवेति वादोऽतिप्राचीनाभिमतो युक्त इत्यभिप्रेत्य प्रकृतवादमुररीकरोति-मुख्येति। मुख्यत्वं च 'तदेतत्त्रयं स्वप्नमायामात्रमि'त्यादिश्रुत्या स्वप्नसमर्थनेन स्वप्नदृष्टान्तसलिलधारया समस्तशङ्कामलप्रक्षालनात्। एकजीववादाख्यः-एक एव स्वप्नदृष्टेव सजीवजीवः (१)अन्ये स्वप्नकल्पिता निर्जीवजीवा इत्येकजीववादाख्यः।अथवा सर्वत्र समष्टिजीवो हिरण्यगर्भाख्यो मुख्योऽज्ञानोपहिता अन्येऽन्तःकरणावच्छिन्ना व्यष्टिभूता जीवाभासा इति सविशेषानेकशरीरैकजीववादः। यद्वा कायव्यूहादाविवैकेनैव जीवेन सर्वशरीरेष्वहमित्यादिव्यवहार इत्येकजीवेन सर्वशरीरसजीववादः।इममेव। मतभेदेन त्रिविधमपि एकाज्ञानोपाधिकमेकजीववादम्, दृष्टिरेव जगतः सृष्टिः न त्वीशसृष्टस्य प्रमाणादिना जीवस्य दृष्टिरिति वादम्,आचक्षते-कथयन्ति। प्राचीना इति शेषः। अस्मिन्पक्षे-दृष्टिसृष्टिपक्षे, स्वाज्ञानवशात्-स्वं प्रत्यावरकं यदज्ञानं तद्वशात्, जगदुपादानं-स्वस्मिन्स्वप्नवत्सर्वकार्यकल्पके स्वाविद्यया स्वप्नवद्विषयाकारेण विवर्तमानमिति यावत्।निमित्तं च कर्ता, कर्तृत्वं च कार्यानुकूलज्ञानवत्त्वमात्रं (२)(न तु स्रष्टव्यालोचनवत्त्वम् रजतादिभ्रमे तस्य हेतुत्वात् वियदादिभ्रमे तदनपेक्षणात्। कार्यानुकूलं

(१) अन्ये स्वप्न इव कल्पिताः निर्जीवा जीवा इति खपुस्तके।

(२) (.....) अयं पाठः खपुस्तके नास्ति।

पक्षे जीव एव स्वाज्ञानवशात् जगदुपादानं निमित्तं च । दृश्यं सर्वं प्रातीतिकम् । देहभेदाच्च जीवभेदभ्रान्तिः ।

न्यायरत्नावली ।

ज्ञानं तद्वशात् । जीव एव उपादानं निमित्तं कर्ता च, नेशः; उक्तरीत्या कार्यालोचनकल्पने गौरवादिति भावः । दृश्यमज्ञानतत्प्रयुक्तं प्रातीतिकं यदा यदा विद्यते, तदाऽवश्यं ज्ञायते । साक्षिस्वरूपेण जीवेन स्वनिष्ठं सर्वं विद्यमानतादशायां प्रकाश्यते, न तु तत्रावरणं तद्भञ्जकमनोवृत्तिर्वा कल्प्यते, गौरवादिति भावः । देहभेदादित्यादि । देहावच्छिन्नानां भेदेऽपि अविद्यावच्छिन्नरूपेण

नारायणी ।

त्राधिष्ठानज्ञानम्, तच्च जीवस्यैव अन्यथा भ्रमानुपपत्तेः । तथा च यथा स्वप्नभ्रमे आलोचनाभावेऽपि स्वात्मकाधिष्ठानप्रकाशेन स्वस्य जगदात्मना विवर्तमानत्वेनोपादानत्वं तदनुकूलज्ञानवत्त्वेन निमित्तत्वं च, एवं प्रपञ्चेऽपि । ईशस्य च तदुपादानत्वकल्पने तु मायाविकर्तृकेन्द्रजालादाविव आलोचनमपि कल्पनीयम् । न च तयुक्तं गौरवात्) तथा च स्वप्न इव स्वाविद्यया जगदादिरूपेण विवर्तमानत्वादुपादानत्वं तदनुकूलज्ञानवत्त्वाच्च निमित्तत्वमिति यावत् । ननु कथमावृतस्य जीवस्य तदनुकूलज्ञानवत्त्वम् सर्वज्ञस्यैव तत्सम्भवादित्यत आह–दृश्यं चेति । अज्ञानतत्कार्यजातम् । प्रातीतिकं–प्रतीतिमात्रकालिकम्, तथा च यद्यनादिमायया साक्षिभास्यया जगदुत्थाप्यते तदावश्यं साक्षिरूपेण जीवेन स्वस्मिन्कल्पितं कार्यं स्वप्नवत्प्रकाश्यत एव न तत्रावरणं तद्भञ्जकमनोवृत्तिर्वा कल्प्यते गौरवात् । इन्द्रियान्वयव्यतिरेकौ स्वप्न इव नेयौ तथा च प्रमाणमन्तरेणैव स्वसन्निहितसर्वावभासकत्वाज्जीवस्यापि सर्वज्ञत्वेन स्रष्टृत्वोपपत्तिरिति भावः । नन्वेकजीववादपक्षे चैत्रो न मैत्र इत्यादिभेदप्रत्यक्षविरोधस्तत्राह––देहेति । देहावच्छिन्नानां प्रातीतिकभेदेऽप्यविद्यावच्छिन्नरूपेणैक्यं न विरुद्धमिति भावः । अत एव चैत्रसुखादीनां मैत्रेणाननुसन्धानमपि देहावच्छिन्नानामिव अन्तःकरणावच्छिन्नानामपि प्रातीतिकभेदाङ्गीकारात् । अविद्यावच्छिन्नस्य चैतन्यस्य सर्वानुसन्धातृतायामिष्टापत्तेरित्यादि महदुद्याख्याने प्रपञ्चितमस्माभिः । नन्वेकजीववादे वस्तुत उपदेष्टव्यादन्यस्योपदेष्टुरभावात्सर्वज्ञस्याऽसर्वज्ञस्य वा शास्त्राभा-

एकस्यैव च स्वकल्पितगुरुशास्त्राद्युपबृंहितश्रवणमननादिदार्ढ्यादात्मसाक्षात्कारे सति मोक्षः । शुकादीनां च मोक्षश्रवणं त्वर्थवादः । महावाक्ये च तत्पदमनन्तसत्यादिपदवदज्ञानानुपहितचैतन्यस्य लक्षणयोपस्थापक-

न्यायरत्नावली ।

जीवैक्यं न विरुद्धमिति भावः । अर्थवादः-श्रवणादेर्विधेयस्य स्तुतिः । ननु 'तत्त्वमसी' ति वाक्ये तत्पदं न प्रक्रान्तेशपरम् , 'तत्तेजोऽसृजते'त्यादिपूर्ववाक्येन जगत्कारणजीवस्यैव प्रक्रान्तत्वेनाभङ्गतेः, तथा च श्रुतिविरुद्धोऽयं पक्षः तत्राह-सत्यादिपदवदिति । यथा सत्यादिपदं जगत्कारणत्वादिप्रक्रान्तरूपमनुपस्थाप्य लक्षणया शुद्धोपस्थापकं तथा तत्पदमपि द्वारम् , (१)न तु सत्यादिपदेषु सत्यत्वादिविशिष्टोपस्थितिः, तत्पदे युगपत् सर्वज्ञरूपप्रसिद्धार्थोपस्थितिरिति भावः । ननु 'यस्सर्वज्ञस्सर्ववित्यस्य ज्ञानमयं तपस्तस्मादेतद्ब्रह्म नाम रूपमन्नञ्च जायत' इति श्रुत्या जगत्कारणे

नारायणी ।

वाच्च कथमुपदेशसाक्षात्कारादिकं तत्राह-एकस्यैवेति । स्वप्न इव तत्त्वमस्यादिवाक्यवक्तृत्वादिना कल्पितगुरुशास्त्रादेरुपदेष्टृत्वकरणत्वादिसम्भवान्न साक्षात्कारानुपपत्तिरित्यर्थः । नन्वेकजीवपक्षे कथमस्माकमिदानीमप्यनिर्मोक्षः, शुकादीनां मोक्षेणास्माकमपि मोक्षौचित्यात्, तेषामनिर्मोक्षे तु तन्मुक्तिप्रतिपादकशास्त्रविरोधोऽस्मदादीनामनाश्वासप्रसङ्गश्चेत्यत आह--शुकेति । अर्थवादः--विधेयस्य श्रवणादेः स्तुतिः । अयं भावः । स्वप्नन्यायेन कल्पिततद्भेदतत्तन्मुक्तानुवादकानां तत्परत्वाभावात् ज्ञानतत्साधकश्रवणादिस्तुतिमात्रपरत्वं नात्मभेदमुक्त्यादिमात्रपरत्वम् , तथाऽस्मदादीनां शास्त्रप्रामाण्यादेव प्रवृत्त्युपपत्तेश्चेति न कोपि दोष इत्यन्यत्र विस्तरः । ननु यदि जगदुपादानं जीव एव तदा तत्पदस्येशपरामर्शकत्वानुपपत्तिः, 'तत्तेजोऽसृजते'त्यादिना भवन्मते जीवस्यैव प्रक्रान्तत्वात्तत्राह-महावाक्येति ।तत्त्वमस्यादिमहावाक्ये चेत्यर्थः। सत्यादिपदवत् । यथा 'सत्यं ज्ञानमनन्तमि'तिवाक्ये सत्यादिपदम् 'तस्मा-

(१) द्वारन्तु सत्यादिपदेति घपुस्तके ।

मित्याद्या अवान्तरभेदाः स्वयमूहनीयाः । ननु वस्तुनि विकल्पासम्भवात् कथं परस्परविरुद्धमतप्रामाण्यम् ,

न्यायरत्नावली ।

जीवे सर्वज्ञत्वबोधानुपपत्तिः तत्राह—इत्यादीति । उक्तश्रुतौ सर्वविषयकज्ञानवत्त्वमात्रं विवक्षितम् , न तु युगपत् सर्वज्ञानवत्त्वम् , तथा च जीवस्यापि क्रमेण तत्सम्भवान्न दोषः । अथवा युगपत्सर्वज्ञा(१)भेदो जीवे उक्तश्रुत्या बोध्यते, 'यतो वे'त्यादिश्रुतिवदिति भावः । वस्तुनि—पुरुषप्रयत्नानिष्पाद्ये, विकल्पासम्भवात्—विरुद्धपक्षद्वयबोधकवाक्ययोः प्रामाण्यासम्भवात् । प्रयत्नसाध्ये विरुद्धनानापक्षबोधकयोरनुष्ठानपरत्वसम्भवेन कालभेदेन तद्बोधनात् प्रामाण्यसम्भवः न तथाभूतवाक्ययोरिति भावः । अतथाभूतवाक्ययोः प्रामाण्यासम्भवेऽपि विचित्ररुचिनानापुरुषीयनानाविधक-

नारायणी ।

द्वा एतस्मादात्मन आकाशः सम्भूत' इत्यादिना जगत्कारणत्वेन प्रतिपद्यमानमप्यपरामृश्य सत्यत्वाद्युपस्थितिद्वारा लक्षणयाऽबाधितं सद्व्यक्तिमात्रं बोधयति । यथा तत्पदमपि सर्वज्ञत्वाद्यारोपितधर्मोपस्थितिद्वाराऽनुपहितं चिन्मात्रं बोधयति तत्रैव तात्पर्यादिति न कोपि दोषः । ननु तान्त्रिकानुभवविरुद्धेयं व्युत्पत्तिस्तत्राह —इत्यादीति । 'तत्तेजोऽसृजते-' त्यादिना प्रतिपादितं तत्सत्यमित्यत्र तत्पदेनानूद्य सत्यमित्यनेन परमात्मत्वं प्रसाध्य पुनः स आत्मेति व्यतिहारेणाभेदं प्रदर्श्य सिद्धमभेदं 'तत्त्वमसि' इत्यनेन दृढीकरोति । तत्र त्वंपदं लाक्षणिकं तत्पदन्त्वाकाशादिपदवद्धर्मिमात्रस्य शक्त्या बोधजनकमित्यवान्तरभेदा इति भावः । मतनिष्कर्षस्त्वस्मदीयमहद्व्याख्यानेऽनुसन्धेयः । नन्वेकरूपे प्रयत्ननिष्पाद्ये वस्तुनि कथं परस्परविरुद्धमतानि कथं वा तेषां प्रामाण्यमित्याशङ्कते—नन्विति । वस्तुनि—पुरुषप्रयत्ननिष्पाद्ये, विकल्पासम्भवात्—विरुद्धानेकपक्षसमावेशासम्भवात् । प्रयत्नसाध्ये कर्मणि कालविषयभेदादिना षोडशिग्रहणादीनां व्यवस्था सम्भवति न तथाभूते विरुद्धपक्षाणामिति भावः । किं प्रयत्ननिष्पाद्ये विरुद्धकोटिरेव न सम्भवति ? आ-

(१) सर्वज्ञेशाभेदं इति घपुस्तके

तस्मात् किमत्र हेयं किमुपादेयमिति चेन्न । क एवमाह ? वस्तुनि विकल्पो न सम्भवतीति । स्थाणुर्वा पुरुषो वा राक्षसो वेत्यादिविकल्पस्य वस्तुन्यपि दर्शनात् । अतात्त्विकी सा कल्पना पुरुषबुद्धिप्रभवा इयं तु शास्त्रीया जीवेश्वरविभागादिव्यवस्थेति चेत् । नूनमतिमेधावी भवान् । अद्वितीयात्मतत्त्वं हि प्रधानं फलवत्त्वादज्ञातत्वाच्च प्रमेयं शास्त्रस्य । जीवेश्वरविभागादिकल्पनास्तु

न्यायरत्नावली ।

ल्पनानुवादकत्वमिति सिद्धान्तयितुं दृष्टान्तमाह-क एवमाहेत्यादि । शास्त्रीया-तत्त्ववेदकशास्त्रतात्पर्याधीना । प्रधानम्-इतरप्र-

नारायणी ।

होस्विद्विरुद्धकोटिमत्त्वादप्रमाण्यात्फलवत्त्वं न सम्भवतीत्यभिप्रायः ? तत्राद्ये व्याघातः । द्वितीये साक्षात्फलवत्त्वाभावे इष्टापत्तिरेवेत्यभिप्रायेण सिद्धान्तयितुमुपक्रमते—क एवमिति । विकल्पमात्रेण न तवेष्टसिद्धिः, प्रकृते शास्त्रीयविकल्पव्यवस्थाया आवश्यकत्वात् । तव च सा कठिनेत्यभिप्रायेणाशङ्कते--अतात्त्विकीति । परम्परयापि फलवत्त्वशून्या सा कल्पना--संशयात्मिका धीः । पुरुषबुद्धिमात्रप्रभवा--कोटिद्वयोपस्थितिजन्या । मात्रपदं तात्पर्यप्रयुक्तत्वं वारयति । शास्त्रीया--शास्त्रतात्पर्याधीना । तथाचैकतरप्रामाण्यनिश्चय आवश्यक इति भावः । अनुवादकस्याप्यनूद्यांशे तात्पर्यं वदन्भवान्न पण्डितः किन्तु केवलं श्रुतिभारवाहक एवेत्युपहसन्समाधत्ते—नूनमिति । स्वाभिप्रायं विशदयति—अद्वितीयेति । जीवपरमात्मनोरभेदरूपात्मतत्त्वं हीत्यर्थः । प्रधानम्—इतरप्रधानोपकार्यप्रतिपत्तिकं, फलवत्त्वात्—ज्ञानद्वारा साक्षान्मुक्तिरूपफलवत्त्वात्, अज्ञातत्वाच्च—मानान्तरानधिगतत्वरूपापूर्वत्वाच्च । प्रमेयं—तात्पर्यविषयः ।

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥

इतिश्रुत्या प्रकृतलिङ्गषट्कोपेत एव श्रुतीनां तात्पर्योक्तेः । अस्ति च छान्दोग्यषष्ठादावद्वैते(१) 'एकमेवाद्वितीयमि'त्युपक्रमः । 'ऐतदात्म्यमिदं

(१) अस्ति च छान्दोग्येऽद्वैते एव फलवत्त्वमिति तत्रैव तात्पर्यं नान्यत्रेत्यन्वयः ।

पुरुषबुद्धिप्रभवा अपि शास्त्रेणानूद्यन्ते, तत्त्वज्ञानोपयोगित्वात्, 'फलवत्सन्निधावफलं तदङ्गमिति न्यायात्, भ्रमसिद्धस्यापि श्रुत्यानुवादसम्भवात्। एतेन द्वैतज्ञाने-

न्यायरत्नावली।

तिपादनोपकार्यप्रतिपत्तिकम्। तदङ्गं—तदुपकारकम्। भ्रमसिद्धस्य—स्वाप्नप्रपञ्चस्य। श्रुत्या—स्वप्नबोधकश्रुत्या। एतेन—अद्वैतज्ञा-

नारायणी।

सर्व'मित्युपसंहारः। 'तत्त्वमसी'ति नवकृत्वोऽभ्यासः। 'आचार्यवान्पुरुषो वेदे'त्यपूर्वत्वम्। 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य' इति—फलवत्त्वम्। 'येनाश्रुतं श्रुतं भवती'त्येकविज्ञानेन सर्वविज्ञानमर्थवादः। 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयम्' इत्याद्युपपत्तिश्चेति तत्रैव शास्त्रतात्पर्यं (१)नान्यत्रेत्यन्यत्र विस्तरः। मूले चात्र फलवत्त्वाज्ञातत्वयोर्द्वयोरेव प्रदर्शनं प्रमाशरीरे तावन्मात्रप्रवेशादिति संक्षेपः। जीवेश्वरकल्पनाया अपूर्वत्वं प्रतिक्षिपन् तात्पर्यविषयत्वं प्रतिक्षिपति—जीवेति। जीवेश्वरविभागस्त्वित्यर्थः। पुरुषेति। भिन्नभिन्नपुरुषीयानेकप्रतिभातिमात्रजन्या अपि। शास्त्रेण—दर्शितश्रुत्या। पुरुषबुद्धिमात्रकल्पितत्वेऽपि तेषामेवानुवादे बीजमाह—तत्त्वज्ञानेति। लक्षणया शुद्धचिद्बोधानुकूलविशिष्टोपस्थितिविषयत्वादित्यर्थः। तत्त्वज्ञानोपयोगित्वं शरीरादेरप्यस्तीत्यत आह—फलवत्सन्निधाविति। स्वातन्त्र्येण फलजनकसन्निधौ पठ्यमानम्, अफलम्—स्वातन्त्र्येण फलाजनकम्, तदङ्गं—प्रधानाङ्गं प्रधानोपकारकमिति यावत्। यथा दर्शपूर्णमासादेः प्रयाजादिकम्। भ्रमेति। भ्रममात्रशरीरजाग्रत्स्वप्नसुषुप्त्याद्युपाधिकत्वेन भ्रमसिद्धस्यापि विश्वतेश्वनरादेः, श्रुत्या—'सोऽयमात्मा चतुष्पा'दित्यादि श्रुत्या। श्रुतीनामद्वैतपरत्वं 'सन् घट' इत्यादिप्रत्यक्षादिविरोधान्न सम्भवति, न च द्वैतश्रुतिविरोधेन प्रत्यक्षादेरेव प्रामाण्यमिति वाच्यम्, प्रत्यक्षस्यैव सर्वप्रमाणापजीव्यत्वेन बलवत्त्वाद्विनिगमकाभावाच्चेति जल्पितमतिदेशेन निराकरोति—एतेनेति। अद्वैतस्य फलवत्त्वापूर्वत्वादिनो वास्तवत्वेनेत्यर्थः। द्वैतज्ञानेन—'सन् घट' इत्यादिद्वैतप्रत्यक्षेण, अद्वैतज्ञानस्य—'नेह नानास्ति किञ्चने'त्यादिश्रुतिबोधिताद्वैतज्ञानस्य, सर्वमिथ्यात्वेन शुद्धाखण्डा-

(१) नान्यत्रेत्यन्यत्र विस्तर इति कपुस्तके नास्ति।

नाद्वैतज्ञानस्य बाधो निरस्तः। घटादिद्वैतज्ञानस्यापि अद्वैतसन्मात्रांशे अज्ञाते प्रामाण्याभ्युपगमाच्च ज्ञाना-

न्यायरत्नावली ।

नस्य परमपुरुषार्थसाधनत्वाज्ञातविषयकत्वादिरूपबलवत्त्वसम्भवेन। ननु प्रत्यक्षादिप्रमाणानां सन्मात्रांश इव घटाद्यंशेऽपि प्रामाण्यं स्यात्, तथा च कथमद्वैतज्ञानं बलवत्तत्राह-घटादीत्यादि। सन्मात्रांशे न तु घटाद्यंशे। ननु घटादेरज्ञातत्वाभावेऽपि घटं पश्यामीत्यादिप्रतीत्या चाक्षुषादिविषयत्वसम्भवात्तदंशे प्रामाण्यं सम्भ-

नारायणी ।

र्थबोधस्य, बाधः-अवगतार्थत्वपरित्यागः। न केवलमद्वैतस्य बलवत्त्वात्प्रत्यक्षाद्यबाध्यत्वं किन्तु प्रत्यक्षादेः स्वार्थे प्रामाण्याभावादपीत्याह—द्वैतेति। **सन्मात्रांशे**—केवलशुद्धे न तु घटाद्यंशे। **अज्ञाते**—अज्ञातविषयतावति, **प्रामाण्याच्च**-अबाधितार्थविषयकत्वरूपप्रामाण्याच्च। **चः** पूर्वहेतुसमुच्चायकः। *(१) ननु कथं चक्षुरादिजन्यद्वैतज्ञानस्यापि सदंशे ब्रह्मण्येव प्रामाण्यं रूपादिहीनतया ब्रह्मणश्चक्षुराद्ययोग्यत्वात्। न च स्वरूपतोऽयोग्यत्वेऽपि चन्द्रावच्छिन्नत्वेन राहोरिव घटाद्यवच्छिन्नत्वेन योग्यतेति वाच्यम्। शब्दाद्यवच्छिन्नत्वेन गगनादेरपि योग्यताप्रसङ्गात्। राहोस्तु नीलस्य स्वतो योग्यस्य दूरदेशविशेषेणायोग्यस्य शुक्लभास्वरचन्द्रसम्बन्धाच्चाक्षुषत्वमिति विशेषत्वात्। न च-

न सोऽस्ति प्रत्ययो लोके यत्र कालो न भासते ।

इतिमीमांसकोक्तरीत्या कालस्येव ब्रह्मणो भविष्यतीति वाच्यम्। (२)तस्यापि अत एवानङ्गीकारात्। न चानुभवविरोधः। 'परमाणुवानयं देश इत्याद्यनुमानरूपज्ञानलक्षणयाप्युपपत्तेरिति चेत्। न।'इदानीं घट' इति स्वाधिकरणक्षणावच्छिन्नत्वेनानुभवस्य सार्वजनीनस्यापलापापत्तेः। न च रूपादिसामग्रीबाधात्कथमनुभवः स्यादिति वाच्यम्। प्रतिनियतेन्द्रियग्राह्यप्रत्यक्षत्वावच्छिन्नं प्रत्येव रूपादेर्हेतुत्वकल्पनात्। सर्वेन्द्रियग्राह्यं तु ब्रह्म कालश्च अतो न रूपादिहीनत्वेऽपि चाक्षुषत्वानुपपत्तिः। वस्तुतस्तु द्रव्यप्रत्यक्षं प्रत्येव रूपादेः कारणत्वात् न ब्रह्मणः कालस्य

(१) *...* एतच्चिन्हमध्यगः पाठो नास्ति खपुस्तके।

(२) तस्यापि कालस्यापि अत एव रूपाद्यभावादेव अनङ्गीकारात् चाक्षुषत्वानङ्गीकारात् इत्यर्थः।

ज्ञानयोस्समानाश्रयविषयत्वनियमात् । जडे च प्रमाण-
प्रयोजनाभावेनाज्ञानानभ्युपगमात् (१)+तदवच्छिन्नचैत-

न्यायरत्नावली ।

वति तत्राह–ज्ञानेत्यादि । तथा च चाक्षुषादिवृत्तेः समानविष-
यकाज्ञाननिवर्तकत्वानुरोधेनाज्ञातचिद्विषयत्वेऽपि घटादिविषयकत्वे
मानाभावः । घटं पश्यामीति साक्षिधीस्तु घटावच्छिन्नचिद्विषयक-
चाक्षुषादि विषयीकुर्वन्ती चाक्षुषादिवृत्तेः विषयतावच्छेदकत्वेन
घटादिकं भासयतीति भावः । ननु 'घटं न जानामी'ति साक्षि-
धिया घटादेरप्यज्ञानविषयत्वावगाहनात् चाक्षुषादिवृत्तिविषयत्वेनै-
व घटादिकं गृह्यते साक्षिणा, न त्ववच्छेदकत्वेन तत्राह–जडे चे-
त्यादि । अज्ञानेति । अज्ञानविषयत्वेत्यर्थः । घटाद्यवच्छेदेन

नारायणी ।

वा प्रत्यक्षानुपपत्तिः तयोः सिद्धान्तेऽद्रव्यत्वात् । ब्रह्मणः स्वप्रकाश-
सच्चिदानन्दस्य स्वतन्त्रपदार्थत्वात्कालस्याविद्यात्मकत्वादिति संक्षेपः* ।
(२)ननु 'घटं पश्यामी'त्यादिना घटादिज्ञानानां घटाद्यंशेऽपि प्रामाण्यग्रहात्
कुतः सन्मात्रांश एव प्रामाण्यं तत्राह–ज्ञानेति । ज्ञानाज्ञानयोरेकाश्रयविषयक-
त्वनियमात् चिन्मात्राश्रिताज्ञाननाशायोत्पन्ना प्रमाणजन्या वृत्तिः चिन्तामेव
विषयीकरोति न घटादिकं मानाभावात् । 'घटं पश्यामी'त्यादिधीस्तु चा-
क्षुषादिवृत्तिविषयतावच्छेदकत्वेनैव घटादिकं भासयति न मुख्यविषय-
त्वेन अतो न तत्र प्रामाण्यमिति भावः । नन्वज्ञातत्वं विना यदि प्रामाण्यं
दुर्घटं तदा तादृशप्रतीतिप्रामाण्यान्यथानुपपत्त्याऽज्ञातत्वमप्यस्तु
घटादौ प्रतीयतेऽपि 'घटं न जानामी' त्यादिना तत्राह—जडेति । अज्ञान-
तत्कार्यादावस्वप्रकाशे इत्यर्थः । प्रमाणेति । 'आत्मा वारे द्रष्टव्य' इत्यादिना
ऽऽत्मनो दर्शनार्हत्वोक्त्याऽज्ञातत्वेन प्रमेयत्वलाभवदनात्मनोऽज्ञातत्वसूचक-
प्रमाणस्य जडत्वादेवास्वप्रकाशे स्वप्रकाशत्वकृतभानावरणरूपप्रयोजन-
स्य चाभावेन । अज्ञानेति । विषयतयाऽज्ञानास्वीकारात् घटाद्यवच्छेदेन चित

(१) +··· + चिह्नितः पाठो नास्ति कखपुस्तकयोः ।

(२) अत्र रूपाद्यभावेपि ब्रह्मणो नीरूपकालादेरिव सर्वेन्द्रियायोग्यस्य न चक्षुर्वेद्य-
त्वानुपपत्तिः तत्तदिन्द्रिययोग्यप्रत्यक्षं प्रत्येव तद्गुणानां कारणत्वस्य व्यवस्थापनात् । 'घटं
पश्यामी'त्यादिनेत्यादिः पाठः खपुस्तके ।

न्यायरत्नावली।

चितस्स्फुरणवारणाय घटाद्यवच्छेदेन चित्यज्ञानविषयताऽवश्यङ्कल्प्या, अतस्तदवच्छेदकत्वेनैव घटादीनामस्फुरणोपपत्तौ तेष्वज्ञानविषयतान्तरकल्पने गौरवम्। न च घटाद्युपहितचैतन्यानि केवलचितो भिन्नानि न वा? आद्ये तेष्वज्ञानविषयत्वानि घटादिषु तदवच्छेदकत्वानि कल्पनीयानीति तदपेक्षया घटादिष्वज्ञानविषयत्वानां कल्पनैव लघीयसी, द्वितीये घटाद्यवच्छेदेन स्फुरणं घटादिविशेषितचिद्रूपे संशयाद्यभावः, (१)तद्वारणं च तस्मिन्नज्ञानविषयत्वास्वीकारेऽपि घटादावज्ञानविषयत्वानां स्वीकारेण निर्वहतीति वाच्यम्। आद्ये घटादावच्छेदकत्वानामकल्पनादज्ञातचैतन्यादात्म्यादेव तत्राज्ञातत्वव्यवहारात्। न च विनिगमकाभावः घटादावज्ञातत्वस्वीकारेऽपि अज्ञातघटादितादात्म्येन तदुपहितचिन्नज्ञातत्वव्यवहारसम्भवादिति वाच्यम्। चित्यज्ञातत्वस्वीकारे हि अज्ञातत्वशून्यचिद्रूपमपरोक्षत्वं वाच्यम्, घटादौ तत्स्वीकारे तु नापरोक्षत्वं तथा, घटाद्याकारवृत्त्यभावकालेऽपि घटादेरपरोक्षत्वापत्तेः; किन्तु अज्ञातत्वशून्योपहितत्वविशिष्टचिद्रूपम्, तथा च गौरवम्। न चाज्ञातत्वशून्यत्वमेव तादिति वाच्यम्। अलीकस्यापि तदापत्तेः। न चाभानापादकाज्ञातत्वम् अलीके सदास्त्येवेति वाच्यम्। साक्ष्यसम्बन्धादेव तत्राभानोपपत्तौ अज्ञातत्वास्वीकारात्। न च अज्ञातत्वशून्यं यत् घटादि तत्तत्स्वरूपमेव तदिति वाच्यम्। 'घटोऽपरोक्षः पटोऽपरोक्ष' इति प्रतीतेः एकापरोक्षतात्वव्यक्तिविषयत्वात्। अज्ञातत्वशून्यचित्त्वस्यैव तादृशव्यक्तित्वात्, घटाद्युपादानकमृत्त्वादौ घटाद्यपरोक्षतानां तेन रूपेणैककारणत्वस्य मन्मते सम्भवाच्च। एवं पूर्वोक्तयुक्तेः द्वितीयपक्षेऽपि न घटादावज्ञानविषयत्वम्। नन्वज्ञातत्वशून्यचैतन्यं द्वितीयपक्षे ब्रह्मज्ञानोत्तरमपि असिद्धम्, त-

(१) तदावरणं च तस्मिन्नज्ञानविषयतापि घटादावित्यादिः गपुस्तके।

न्यायरत्नावली ।

दापि घटं न जानमीति प्रत्ययेन चितः अज्ञातत्वशून्यत्वाभावात्, तथा च तदापि घटाद्याकारवृत्तिकाले घटं साक्षात्करोमीति व्यवहारो न स्यादिति चेन्न । द्वितीयपक्षे 'घटं साक्षात्करोमी'त्यादौ 'घटाद्यवच्छिन्नेनाज्ञानाविषयत्वेन शून्यं चैतन्यं साक्षात्करोमी'ति व्यवह्रियते । तथा च घटाद्याकारवृत्तिकाले घटाद्यवच्छिन्नस्याज्ञानविषयत्वस्यापसरणात् 'घटं साक्षात्करोमी'ति व्यवहारः । एवं च आद्यपक्षे अज्ञातत्वशून्यचिति तादात्म्यस्य द्वितीयार्थस्यान्वयः, द्वितीयपक्षे तु अज्ञातत्वे अनवच्छिन्नत्वस्य द्वितीयार्थस्येति विवेकः । आख्यातस्य तदनुकूलव्यापारोऽर्थः । ननु द्वितीयपक्षो नोपपद्यते, अज्ञातत्वसामान्याभाववच्चितः साक्षात्करोत्यर्थत्वेन घटाद्यवच्छिन्नाज्ञातत्वाभाववच्चितस्साक्षात्करोतिना बोधासम्भवात् । एवम् 'इदं सुखं साक्षात्करोमी'ति धीर्न स्यात्, एतत्सुखावच्छिन्नस्याज्ञानविषयत्वस्याप्रसिद्ध्या तदभाववच्चितोऽप्यप्रसिद्धेः । न च घटाद्यवच्छिन्नाज्ञानविषयत्वीयविशेषणतासम्बन्धेनाज्ञानविषयत्वस्याभावो बुध्यते, यदर्थबोधकपदोत्तरं द्वितीयासमभिव्याहृतः साक्षात्करोतिः तदवच्छिन्नविषयत्वीयविशेषणतासम्बन्धभानस्य व्युत्पत्तिसिद्धत्वादिति वाच्यम् । पदार्थयोस्संसर्गविधया भासमान एव समभिव्याहारस्य नियामकत्वेनापदार्थबोधे तस्यानियामकत्वादिति चेत् । अत्रोच्यते । द्वितीयपक्षे अज्ञातत्वे अभावे चिति च साक्षात्करोतेश्शक्तित्रयस्वीकारात्(१), अज्ञातत्वे च घटाद्यवच्छिन्नत्वस्यान्वयेन घटाद्यवच्छिन्नाज्ञातत्वस्यैवाभावेऽन्वयेन तादृशाभावस्य च चित्यन्वयेन विशिष्टचिद्बोधसम्भवः । चितस्तु तद्व्यक्तित्वेनैव शक्यता (२)+ शाब्दधीविशेष्यता च + तेन शाब्दधीविशेष्यतायाः

(१)—स्वीकारेणाज्ञातत्वे घटाद्यवच्छिन्नाज्ञातत्वस्यैवाभावेऽन्वयेन तादृशाभावस्येति पाठभेदो घपुस्तके युक्तश्च । (२) +···+ एतच्चिन्हान्तर्गतपाठो घपुस्तके नास्ति ।

किञ्चिदवच्छिन्नत्वनियमेऽपि न दोषः । अथवा चिन्निष्ठविशेष्यता-सम्बन्धेनाभाववदेव द्वितीयं शक्यम् । तृतीयं तु नाभ्युपेयते । अभावस्य तु पदार्थैकदेशत्वेऽपि ससम्बन्धिकत्वात् तत्राज्ञातत्वान्वयेऽपि न दोषः । 'एतत्सुखं साक्षात्करोमी'त्यादौ तु नाप्रसिद्धिः । सुखमात्रे नित्यत्वादिभ्रमहेत्वज्ञानाविषयत्वस्य सर्वसुखावच्छिन्नस्य प्रसिद्धत्वात् । 'ब्रह्म साक्षात्करोमि' इत्यादौ तु न ब्रह्मावच्छिन्नत्वस्याज्ञानविषयस्याभानम् , अप्रसिद्धत्वात् । नाप्याधेयत्वस्य द्वितीयार्थतया ब्रह्मवृत्त्यज्ञातत्वशून्यचितो भानम् । ब्रह्मज्ञानोत्तरमपि घटाद्यवच्छिन्नस्य ज्ञातत्वस्य ब्रह्मचिदसत्त्वेन तादृशचितोऽप्रसिद्धेः । किन्तु ब्रह्मवृत्त्यज्ञातत्वानवच्छिन्नविषयत्वीयविशेषणतासम्बन्धेन योऽभावस्तद्भानम् । आधेयत्वं तु द्वितीयया लभ्यते । ब्रह्मपदसमभिव्याहारस्य च तत्सम्बन्धभाननियामकत्वात् । 'घटं साक्षात्करोमि' इत्यादौ तु (१)घटत्वाद्यवच्छिन्नाज्ञातत्वस्यैव नोक्तसम्बन्धेनाभावभानम् । दृश्यवाचकपदसमभिव्याहृतद्वितीयाया एवावच्छिन्नार्थकतया न 'ब्रह्म साक्षात्करोमी'त्यादौ द्वितीययावच्छिन्नत्वबोधः । वस्तुतस्तु साक्षात्करोतेस्स(२)कर्तृकत्वात् प्रयोजकेऽपि शक्तिः । तथा च 'घटं साक्षात्करोमी'त्यादौ घटत्वाद्यवच्छिन्नोऽज्ञातत्वस्य योऽभावः, तत्प्रयोजकविशिष्टचिद्बोधः(३) । अवच्छिन्नत्वं च अवच्छेदकतासम्बन्धेनाधेयत्वम्, 'ग्रामं गच्छती'त्यादौ द्वितीययाऽऽधेयत्वबोधात् । अथवाऽज्ञातत्वाभावप्रयोजकत्वविशिष्टचित्येकैव शक्तिः । न चैवं ब्रह्मसाक्षात्कारपूर्वमपि 'ब्रह्म साक्षात्करोमी' ति धीस्स्यात्, घटाद्याकारवृत्तिकाले घटाद्यवच्छेदेन ब्रह्मवृत्तेरज्ञातत्वाभावस्यानुभ-

(१) द्वितीययाऽवच्छिन्नज्ञानानुकूलसम्बन्धेनाऽभावज्ञानम्-इति पाठान्तरं घपुस्तके ।

(१) सकर्मकत्वात् इति पाठभेदो घपुस्तके ।

(३) 'ब्रह्म साक्षात्करोमी'त्यादौ तु ब्रह्मवृत्तिरज्ञातत्वस्योक्तसम्बन्धेन योऽभावस्तत्प्रयोजकविशिष्टचिद्बोधः । इति पाठाधिक्यं घपुस्तके ।

वात् । एकशक्तिपक्षे हि नानवच्छिन्नविषयत्वीयविशेषणतासम्बन्धेनाज्ञानविषयत्वस्याभावो बुध्यते, येन तस्य व्याप्यवृत्तितया घटाद्यवच्छिन्नता न स्यादिति वाच्यम् । अनवच्छिन्नस्याज्ञानविषयस्य ब्रह्मणि व्याप्यवृत्तितया तत्सत्त्वे तादृशाभावस्यासम्भवात् । न चैवं 'घटं साक्षात्करोमी'त्यादौ अज्ञातत्वाभावस्य ब्रह्मज्ञानपूर्वं घटाद्यवच्छिन्नतया धीर्न स्यादिति वाच्यम् । तादृशबुद्धेरेतत्कल्पेऽनुपपन्नत्वेऽपि 'घटं साक्षात्करोमी'त्यादौ अज्ञानाविषयतावच्छेदकत्वाभावविशिष्टचिति शक्त्यन्तरस्वीकारेण तद्धीसम्भवात् 'ब्रह्म साक्षात्करोमी'त्यादावेव विषयतामात्रसम्बन्धेनाभावघटितशक्यार्थसम्भवात् । न च ब्रह्मज्ञानपूर्वं घटाद्याकारवृत्तिकाले घटाद्यवच्छेदेनाज्ञानविषयताभावस्य ब्रह्मणि सत्त्वात् 'ब्रह्म साक्षात्करोमी'ति धीस्स्यादिति वाच्यम् । अनवच्छिन्नस्याज्ञातत्वस्य ब्रह्मणि सत्त्वे घटाद्यवच्छेदेनाज्ञातत्वसामान्याभावो नास्तीत्यस्य पूर्वमेवावेदितत्वात् । अवच्छिन्नचितां केवलचिदन्यत्वपक्षे त्वज्ञाततताभावश्चिद्वृत्तिर्निवेश्यः, चिति तादात्म्येन ब्रह्मघटादेरन्वयः, घटाद्यवच्छिन्नचिति घटादेरिव वृत्तिविषयत्वोपहितब्रह्मचिति ब्रह्मणस्तादात्म्यसत्त्वात् । अत एव फलवत्त्वेन बुध्यमाना चिदेव ज्ञानकर्मतत्तादात्म्यात् घटादिकं तथा व्यवह्रियते, जानात्यर्थे तु असत्त्वापादकमेवाज्ञानं निवेश्यम्, अधिकं त्वग्रे वक्ष्यते।तस्मात् घटावच्छिन्नचितां केवलाचिदनन्यत्वेऽपि न काप्यनुपपत्तिः । अज्ञानस्य पूर्णानन्दनिष्ठविषयतान्या या विषयता तदवच्छेदकत्वानां घटादौ स्वीकारे तेषामेव घटाद्याकारवृत्तिनाश्यत्वम् । तथा च वृत्तिकाले घटादीनामज्ञानाविषयतानवच्छेदकत्वात् उक्तरीत्या 'घटं साक्षात्करोमी'ति धीसम्भवः । यदि तु सम्बन्धिनाशे सम्बन्धस्य सत्त्वासम्भवात् ब्रह्मज्ञानोत्तरं ब्रह्मनिष्ठस्याज्ञानस्य तद्विषयत्वस्य च नाशे तदवच्छेदकत्वानामपि नाशात् घटादौ वृत्त्यभा-

न्याज्ञानादेव तत्राप्यज्ञानव्यवहारोपपत्तेः+। सर्वप्रमाणा-

न्यायरत्नावली।

वकाले साक्षात्करोमीत्यादिव्यवहारापत्तेः, उक्तावच्छेदकत्वानामावरणरूपत्वासम्भवादिति चिन्त्यते, तदाप्यज्ञानस्य पूर्णानन्दनिष्ठानवच्छिन्नविषयत्वमेव ब्रह्मज्ञाननाश्यम्। अज्ञानं तु चरमेणैव ब्रह्मज्ञानेन नाश्यम्, न तु प्रारब्धभोगकालीनेनेति स्वीक्रियते। अथवा अज्ञाननानात्वपक्षमवलम्ब्याज्ञानानामेव वृत्तिनाश्यता स्वीक्रियते। तस्मादेकाज्ञानपक्षे घटाद्यवच्छिन्नचितां केवलचिदन्यत्वे तासु पूर्णानन्दे च अनवच्छिन्नान्येवाज्ञानविषयत्वानि। तासां तदनन्यत्वे तु एकस्यैवाज्ञानस्य एकविषयता पूर्णानन्दनिष्ठा स्वीक्रियते, अन्यासां तु विषयतानां घटादावच्छेदकत्वानि। नानाज्ञानपक्षे पुनरज्ञानानां विषयतावच्छेदकत्वानि घटादिषु स्वीक्रियन्ते, न तु विषयत्वम्, प्रमाणाभावात्। चिन्निष्ठेनैवाज्ञानविषयत्वेन तेषु न भातीति व्यवहारसम्भवेन प्रयोजनाभावाच्चेति भावः। नन्वास्तां चित एवाज्ञातत्वम्, प्रमेयत्वं तु घटादेरेव, घटादिविषयिकयैव प्रमया घटाद्यवच्छिन्नचिद्विषयकाज्ञाननाशस्य सम्भवात् तत्राह—सर्वेति। स्मृतिप्रामाण्यवारणायाज्ञातविषयकत्वघटितं प्रामाण्यमिति भावः। ननु कथमज्ञातज्ञापकत्वेन स्मृतेर्वारणम्, तज्जनकसंस्कारस्यानुद्बोधकत्वे स्मृतिपूर्वं तद्विषयेऽपि अज्ञातत्वसम्भवात्, अज्ञातत्वाभावे तत्र भ्रमस्यानुभवसिद्धस्यानुपपत्तेरिति चेन्न। स्वकरणस्य यो व्यापारः तदुत्पत्त्यव्यवहितपूर्वक्षणे वा स्वकरणाधिकरणक्षणे यदज्ञातं

नारायणी।

स्फुरणवारणाय घटाद्यवच्छेदेन चिति स्वप्रकाशेऽज्ञानविषयताऽवश्यं कल्प्या ततस्तदवच्छेदकत्वेनैव घटादीनां अभानोपपत्तौ तेष्वज्ञानान्तरकल्पने गौरवादिति भावः। ननु मास्त्वज्ञातत्वं तथापि प्रामाण्ये किमागतं तद्विशेष्यकत्वविशिष्टतत्प्रकारकत्वरूपप्रामाण्यस्य घटादावव्याहतेस्तत्राह—सर्वेति। सर्वप्रतीतीनामज्ञानविषयतावच्छिन्नविषयकत्वेनैव प्रमात्वादित्यर्थः।

न्यायरत्नावली ।

व्यवहारकाले चाबाधितं तद्विषयकाज्ञानत्वस्यैव प्रमात्वरूपत्वात्, स्मृतौ तदभावात्, समानविषयकनिश्चयरूपस्य तत्करणस्याधिकरणक्षणे तद्व्यापाररूपसंस्कारस्य उत्पत्त्यव्यवहितपूर्वक्षणे वा तद्विषयस्याज्ञातत्वासम्भवात् । अथ ज्ञानान्तरेण योऽर्थो यस्मिन् क्षणे गृहीतः, तदव्यवहितोत्तरक्षणोत्पन्नस्य तदर्थज्ञानस्य तदर्थव्यवस्थापकत्वं न स्यात् । तदर्थविपरीतबुद्ध्युत्पादप्रयोजकत्वरूपस्य तदर्थव्यवस्थापकत्वस्य तदर्थविपरीतबुद्ध्युत्पादकाज्ञाननिवर्तकज्ञानेष्वेव सत्त्वात्, ज्ञानान्तरगृहीते चाज्ञानाभावेन तद्विषयकोक्तज्ञानस्याज्ञाननिवर्तकत्वात् । तथा चोक्तज्ञानस्य प्रमात्ववारणाय स्वोत्पत्त्यव्यवहितपूर्वक्षणे यदज्ञातं तद्घटितमेव प्रमात्वम्, न तु स्वकरणादिघटितमिति चेन्न । स्मृतौ प्रमात्वस्यावश्यवारणीयत्वेन स्वकरणादिघटितत्वस्यापि आवश्यकत्वात् । स्मृतिर्हि सर्वाऽप्यविद्यावृत्तित्वेन भ्रम इति वेदान्तसिद्धान्तः । ननु कथमेतदुपपद्यते?, उच्यते । 'गृहीतग्रहणस्वभावा स्मृतिरि'त्यध्यासलक्षणे वाचस्पत्युक्तेः स्मृतिमात्रस्य ज्ञातत्वविशिष्टविषयकत्वात् ज्ञातत्वस्य प्रकृते पूर्वगृहीतप्रमाविषयत्वभ्रमविषयत्वान्यतररूपस्य स्वविषयस्मृत्या ग्रहणात्, भ्रमविषयत्वेन मिथ्यात्वपर्यवसितेन स्वविषयग्राहिण्याः स्मृतेर्भ्रमत्वावश्यकत्वात् । न च प्रमाविषयत्वेन स्वविषयग्राहिण्याः स्मृतेर्भ्रमत्वे मानाभावेन न स्मृतिसामान्यस्य भ्रमत्वं युक्तम्, युक्तत्वेऽनुमित्यादावपि क्वचित् भ्रमविषयत्वेन स्वविषयग्राहकत्वसम्भवेनानुमित्यादिसामान्यस्य भ्रमत्वं स्यादिति वाच्यम् । अनुमित्यादिसामान्यस्य भ्रमत्वे लाघवात् परामर्शादेरेव तत्र दोषविधया हेतुत्वापत्त्या दोषजन्यत्वनिश्चयेन न तत्प्रामाण्यं साक्षिणा लिङ्गादिना वा गृह्यते, न हि दोषजन्यत्वेन निश्चिते भ्रमादौ तद्ग्रह इति वक्ष्यते । तथा च प्रवृत्त्यादेस्ततो जायमानस्यापलापापत्तिः । स्मृ-

न्यायरत्नावली।

तिसामान्यस्य भ्रमत्वे तु संस्कारत्वेन स्मृतिरूपभ्रमहेतुत्वसिद्ध्या संस्काररूपदोषजन्यत्वस्य निश्चयेऽपि प्रमितविषयकत्वेन लिङ्गेन प्रमात्वानुमानसम्भवः। न च दोषजन्यस्य प्रमात्वतद्विषयत्वे च प्रमितत्वं न सम्भवतीति वाच्यम्। अविद्यावृत्तित्वेन दोषजन्यत्वेऽपि तद्विषये मिथ्यात्वानिश्चयेन वक्ष्यमाणस्य प्रवृत्त्युपयुक्तत्वस्य दोषजन्याविद्यावृत्तौ बाधानवतारदशायां सम्भवात्। न च प्रवृत्त्युपधायकानुमित्यादौ प्रमितविषयकत्वं नियमेन गृह्यते, स्मृतौ तु साक्षिणैव तद्गृह्यते। स्मृतिजनकज्ञानं हि पूर्वं प्रमात्वेन साक्षिणा भ्रमत्वेन लिङ्गादिना च गृह्यते। तथा च तद्विषयत्वस्य प्रमितत्वेन मिथ्यात्वेन वा निश्चितत्वात् स्मृतेरपि तादृशविशिष्टविषयकत्वात् तद्ग्राहकेण तथैव तद्ग्रहणम्। ज्ञानस्यावश्यवेद्यत्वमते स्मृतेर्गृहीतग्रहणं सुतरामुपपद्यते। तस्मात् स्मृतिसामान्यस्य गृहीतग्रहणस्वभावत्वेन उक्तरीत्या भ्रमत्वजातिविशिष्टरूपाविद्यावृत्तित्वात् मनोवृत्तिमात्रनिष्ठस्य प्रमात्वस्य न तत्र सम्भवः। ननूक्तरूपं प्रमात्वं न युक्तम् दोषाभावे। सति ज्ञानग्राहकमात्रग्राह्यत्वरूपस्य ज्ञप्तौ स्वतस्त्वस्य तत्राभावात्। न हि उक्तक्षणस्याबाधितत्वस्य च ज्ञानग्राहकसाक्षिणा प्रमाणनिरपेक्षेण ग्रहणसम्भव इति चेन्न। इदं हि प्रमात्वं न स्वतो ग्राह्यम्, किन्तु सर्वप्रमानुगतत्वात् अप्रमाव्यावृत्तत्वाच्च प्रमाणलक्षणम्। यत्तु प्रमात्वं प्रवृत्तिप्रयोजकं बाधानवतारकालीनभ्रमे स्मृतौ चानुवर्तते तत् स्वतोग्राह्यम्। आवश्यकं च तस्य स्वतोग्राह्यत्वम्, तद्वत्तया गृहीतस्य स्वोत्पत्तिद्वितीयक्षण एव प्रवृत्त्युपधायकत्वात्। तच्च मिथ्यात्वरूपेण यदज्ञातं तद्विषयकत्वम्, भ्रमस्यापि बाधाभावकाले मिथ्याविषयकत्वेनानिश्चयात्, मिथ्यात्वविशिष्टविषयकाज्ञानस्य साक्षिणा ग्रहणसम्भवाच्च भ्रमात् प्रवृत्त्युपपत्तिः। न च ज्ञानाज्ञानादेः स्वविशिष्टस्यावरणशून्यस्य साक्षिणा मानानपेक्षेण ग्रहणस-

म्भवेऽपि मिथ्यात्वविशिष्टस्य कथं तद्ग्राह्यतेति वाच्यम्। 'ज्ञाततयाऽज्ञाततया वा सर्वं साक्षिभास्य'मिति विवरणकारोक्तेः स्वगृह्यमाणज्ञानाज्ञानयोर्विषये ग्राहकत्वस्य साक्षिणि सिद्धान्ते स्वीकारात्। न च घटादौ मिथ्यात्वग्रहे मिथ्यात्वेनाज्ञातत्वस्य गृहीतुमशक्यतया घटादिज्ञानात् प्रवृत्त्यनुपपत्तिरिति वाच्यम्। विशेषणतावच्छेदकप्रकारकनिश्चयादेर्विशिष्टवैशिष्ट्यविषयताशालिजन्यधीहेतुत्वस्वीकारेऽपि साक्षिणस्तादृशस्य नित्यत्वेन तत्र तस्याहेतुत्वात्। 'मिथ्यात्वविशिष्टावच्छिन्नविषयताकाऽज्ञानाश्रयावच्छेदकघटविषयकमिदं ज्ञानम्' इत्याकारकज्ञाने घटमिथ्यात्वस्याप्रकारत्वेन 'घटो मिथ्ये'ति ज्ञानस्य तत्रानुपयोगात्। 'इयं न शुक्ति'रिति ज्ञानकालेऽपि 'इमां शुक्तिं न जानामीत्यस्यैव 'घटो न मिथ्ये'ति ज्ञानकालेऽपि 'घटं मिथ्याभूतं न जानामी'त्यस्य ज्ञानस्यानुभूयमानत्वाच्च। उक्तप्रमात्वस्येच्छादौ निश्चयेऽपि न ततः प्रवृत्त्यादिकम्, प्रमात्वेन निश्चीयमाननिश्चयत्वेनैव प्रवृत्त्यादिहेतुत्वात्। अत एव संशयादपि प्रवृत्तिस्स्यात्। 'अयं स्थाणुर्नवे'ति धीकालेऽपि 'मिथ्यात्वेनेदं न जानामी'त्यनुभवात् संशयस्यापि प्रमात्वेन निश्चयसम्भवादिति परास्तम्। ननु भ्रमस्मृत्योरपि प्रमात्वे प्रमापदमुख्यार्थत्वापत्तिरिति चेन्न। लक्षणात्मकपूर्वोक्तप्रमात्वविशिष्टस्यैव (१)प्रकृष्टज्ञानरूपस्य प्रमापदमुख्यार्थत्वात् सुखादिज्ञानस्य तदभावेऽपि न क्षतिः, प्रमाणाजन्यत्वात्। ज्ञानत्वं त्वसत्त्वापादकत्वरूपजातिविशेषाश्रयाज्ञानविषयत्वाभावप्रयोजकविशिष्टचित्त्वम्। तादृशप्रयोजकत्वं च घटादिज्ञानस्थले घटाद्याकारवृत्तिः, विद्यमानसुखादिज्ञानस्थले तु वृत्त्यस्वीकारपक्षे सुखादिजनकसामग्र्येव। सूक्ष्मा-

(१) प्रकृष्टज्ञानत्वप्रमारूपस्य प्रमेत्यादिपाठान्तरं घपुस्तके।

न्यायरत्नावली ।

वस्थाभावितादशायां सुखादौ तन्न जानामीत्यनुभवात् तद-ज्ञातं भ्रमविषयत्वादित्यनुमानाच्चाज्ञानसत्त्वात् तद्विषयत्वाभावस्य विद्यमानतादशायां तत्र सत्त्वात् तत्प्रयोजकेन चन्दनादिसंयोगे-न विशिष्टायाश्चितस्तद्ज्ञानत्वसम्भवः । वस्तुतस्तु घटादिज्ञानस्थ लेऽपि घटाद्याकारकवृत्त्युपधायकस्यैव अज्ञानविषयकत्वाभावप्रयो-जकत्वम् , अन्यथोक्तवृत्तेः स्वोत्पत्तिकालीने अज्ञातत्वाभावे प्रयो-जकत्वासम्भवात् उक्तवृत्त्युत्पत्तिकाले अज्ञातत्वस्य स्वीकारे ज्ञात-त्वेन सह तस्य विरोधापत्तेः उक्तवृत्त्युत्पत्तिकाले उक्तज्ञानतद्विष-यत्वाभावसत्त्वेऽपि उक्ताज्ञानकार्यसत्त्वं स्वीक्रियते । द्वितीयक्षण एव तदुच्छेदात् । ब्रह्माकारवृत्तिस्थले तथा दर्शनात् । प्रयोजकत्वं च अखण्डचिद्धर्मः । कार्योत्पत्त्यादिनिष्ठप्रयोज्यत्वादिवत् क्षेमसा-धारणजनकत्वमेव वा । उक्तप्रयोजकवैशिष्ट्यं च उक्तप्रयोजक-जन्यप्रतिबिम्बितत्व ग्राह्यम् , तन वृत्तिसुखादिकाले तदुपधायक-रूपप्रयोजकस्यासत्त्वेऽपि न क्षतिः । तादृशप्रयोजकजन्ये वृत्तिज्ञाने सुखादौ वा प्रतिबिम्बितत्वस्य तत्काले चिति सत्त्वात् । अविद्या-दिज्ञानस्थले तु अविद्यादिकमेव तादृशप्रयोजकम् । तत्सत्त्वेऽग्रिम-क्षणे अविद्यादिनिष्ठस्योक्ताभावस्य तदभावे तत्क्षणे तादृशाभा-वाभावस्य च सत्त्वात् । तज्जन्यत्वमपि क्षेमसाधारणम् , चित्प्रति-बिम्बो हि नाविद्यादावस्तीति तत्प्रतिबिम्बत्वं चितो बोध्यम् । तादृशप्रयोजकजन्योपहितचिदेव जानात्यर्थः । प्रयोजकत्वजन्य-त्वयोः तदवच्छेदकभेदात् भिन्नत्वेऽपि जानातेर्नानार्थकत्वात् घट-मित्यादिपदप्रयोगस्य वृत्तिसामग्र्यादिनिष्ठप्रयोजकत्वादिबोधे नियामकत्वाच्च न दोषः । वस्तुतस्तु तादृशाभावप्रयोजकविशि-ष्टचिदेव जानात्यर्थः । प्रयोजकत्वं च समानकालीनत्वे सति का-रणत्वम् । तेन वृत्त्यभावकाले तादृशाभावस्वरूपयोग्यचैतन्यमादाय

न्यायरत्नावली।

घटादौ न ज्ञातत्वव्यवहारः। कारणत्वमधिष्ठानविधया जगदुपादानस्य चितोऽविद्याया वा ग्राह्यम्। तद्विशिष्टत्वं तत्तादात्म्यमेव। तच्च मनउपहितचित्यस्तीति तद्रूपेण जीवो ज्ञाता। न च पुरुषान्तरीयज्ञानमादायातिप्रसङ्गः। स्वनिरूपिताज्ञानस्य निवेशात्। स्वं (१)विशिष्टान्तबोध्यं मनोवच्छिन्नचैतन्यम्। एवं च उक्तज्ञानवाचकजानातेः सकर्मकत्वमुपपद्यते। फलावच्छिन्नव्यापारबोधकस्य स्वबोध्यव्यापारव्यधिकरणफलबोधकस्य वा सकर्मकत्वादुक्ताभावरूपफलप्रयोजकविशिष्टचिद्वाचकस्य तदुपपत्तेः। यत्तु जानातेस्सकर्मकत्वं न युक्तम्, 'जानातेश्च सकर्मकत्वं फलापेक्षया न तु कर्मकारकापेक्षये'ति विवरणकारोक्तेरिति, तन्न। तदुक्तेरस्मदनुकूलत्वात्। तथा हि—भाविभूतस्य विषयस्य स्वरूपेण ज्ञानक्रियानिमित्तत्वरूपस्य कारकत्वस्याभावेपि ज्ञानक्रियाजनकसामग्र्युपहितसूक्ष्मावस्थारूपेण ज्ञानक्रियानिमित्तत्वादसत्त्वापादकाज्ञानविषयत्वाभावरूपफलवत्त्वाच्च कर्मत्वमित्यभिप्रायकविवरणोक्तिरस्मदर्थानुकूला। न च फलापेक्षयेत्यस्य वृत्तिगतं साक्षिचित्प्रतिबिम्बरूपफलमपेक्ष्येत्यर्थ इति वाच्यम्। तथासति वृत्तिं जानामीत्येव स्यात् न तु घटं जानामीति। अथ प्रतिबिम्बोपहितरूपेण वृत्तेरपि फलत्वाद्विषयतासम्बन्धेन तद्वतो घटादेः कर्मतासम्भव इति चेन्न। तथासति प्रत्यक्षधीस्थलेऽपि उक्तवृत्तेरेव फलत्वसम्भवेन आवरणभङ्गस्य तत्रैव फलत्वं न तु परोक्षधीस्थल इत्यत्र विनिगमकाभावात्। तस्मात् वृत्तेश्चिदुपरागार्थत्वपक्षे प्रतिबिम्बमेव फलम्। आवरणभङ्गार्थत्वपक्षे त्वज्ञानाविषयत्वमिति परोक्षापरोक्षसाधारणं वाच्यम्। तत्राद्यपक्षे घटादिज्ञानं घटाद्याकारवृत्तिप्रतिबिम्बिता चित्, सुखादिज्ञानं तु सुखादिप्रतिबिम्बिता चिदेव जानात्यर्थः।

(१) स्वं विशिष्टान्तं मनोवच्छिन्नं चैतन्यं बोध्यमिति घपुस्तके युक्तश्चेदम्।

न्यायरत्नावली ।

प्रतिबिम्बितत्वं (१)प्रतिबिम्बप्रयोजकप्रयोज्यप्रतिबिम्बविशिष्टत्वम् । तेन फलविशिष्टवाचकत्वेन जानातेस्सकर्मकत्वम् । तादृशप्रयोजकं च घटादिज्ञानस्थले वृत्तिसामग्री । सुखादिज्ञानस्थले तु सुखादिसामग्री । तादृशप्रयोज्यमपि वृत्तिसुखादिकम् । अविद्यादिज्ञानस्थले अविद्यादिनिष्ठप्रतिबिम्बस्यानादित्वेऽपि क्षेमसाधारणं तत्प्रयोजकत्वमविद्यादावस्त्येव । (२)*तादृशप्रतिबिम्बस्य स्वबिम्बत्वसम्बन्धेन स्वाश्रयोपहितत्वसम्बन्धेन वा वैशिष्ट्यं निवेश्यम्* वस्तुतस्तु(३) तत्प्रयोज्यमपि प्रतिबिम्बविशिष्टाविद्यात्मकं मनोवच्छिन्नचैतन्यं जानात्यर्थः । मनोवच्छिन्नचितो घटाद्याकारवृत्तिसुखाविद्यादौ प्रतिबिम्बसम्भवात्तदादाय यथाक्रमं घटादिज्ञानं निर्वाह्यम् , चैत्रीयघटाद्याकारवृत्तिनिष्ठप्रतिबिम्बप्रयोजकशुद्धचितमादाय मैत्रीयज्ञानस्य व्यवहारापत्तेः । उक्तवृत्तौ च चैत्रीयमनोवच्छिन्नचित एव प्रतिबिम्बोदयात् तस्याश्च चैत्रजीव एव सत्त्वान्नोक्तदोषः । न च चैत्रमनोवच्छिन्नचितः स्वकर्तृकालोकसंयोगाधीनमैत्रीयघटादिवृत्तिजननद्वारा तद्गतप्रतिबिम्बप्रयोजकत्वात् तादृशप्रतिबिम्बमादाय चैत्रज्ञानव्यवहारापत्तिः । विविधविधया प्रयोजकत्वस्योक्तत्वात् । 'सुखं जानाति घटं जानाती'त्यादौ स्वाश्रितत्वं स्वाकारवृत्तिनिष्ठत्वादिकं चेत्यन्यतमसम्बन्धेन जानात्यर्थैकदेशे प्रतिबिम्बरूपे सुखघटादेरन्वयः सुखत्वं जानामी'त्यादौ वृत्तेः प्रतिबिम्बस्यास्वीकारेऽपि स्वाश्रयसुखादिनिष्ठत्वादिसम्बन्धेन सुखत्वादेरन्वयः । घटं न जानामीत्यादौ च तादृशज्ञानाद्यभावबोधः । घटाद्यवच्छि-

(१) प्रतिबिम्बप्रयोज्यविशिष्टत्वमिति घपुस्तके ।

(२) तत्प्रयोज्यमपि प्रतिबिम्बविशिष्टाऽविद्यादिकम् तद्विशिष्टत्वं मनोवच्छिन्नचिति बोध्यम् इति पाठभेदो घपुस्तके ।

(३) वस्तुतस्तु प्रतिबिम्बप्रयोजकं मनोऽवच्छिन्नचैतन्यं जानात्यर्थ इति पाठान्तरं घपुस्तके ।

नां चाज्ञातज्ञापकत्वेनैव प्रामाण्यात्। अन्यथा स्मृतेरपि

न्यायरत्नावली।

श्चिति भावरूपाज्ञानस्वीकारेण तद्बोधासम्भवात् मूलाज्ञानस्यैव परिणामः शुक्तिरूप्यादीति ब्रह्मज्ञानं विना न तस्य बाधः, किन्तु निवृत्तिमात्रम्। यदि तु 'घटं न जानामी'त्यादौ भावरूपाज्ञानं भातीत्याग्रहस्तदा वृत्तावषयत्वाभावसमानाधिकरणमेव विषयत्वं तत्र द्वितीयार्थः। तथा च घटादिनिष्ठतादृशविषयताकस्य मूलाज्ञानस्यैव तत्र भानात् घटाद्याकारवृत्तिकाले न 'घटं न जानामी'ति धीः। सुखादौ वृत्तिस्वीकारे तु स्वाकारवृत्तिनिष्ठत्वसम्बन्धेनैव प्रतिबिम्बे सुखादेरन्वयः। साक्षात्कारस्तु विषयविशिष्टं यत्प्रतिबिम्बं तत्प्रयोजकप्रयोज्यविशिष्टचिदेव। (१)स्वावच्छिन्नवृत्तिनिष्ठत्वं स्वनिष्ठत्वं चेत्याद्यन्यतमसम्बन्धेन विषयविशिष्टत्वं बोध्यम्। वस्तुतस्तु वृत्युपरक्तघटादावेव प्रतिबिम्बोत्पत्तेः प्रतिकर्मव्यवस्थायां वाच्यत्वात् सुखत्वादावपि तस्यास्सम्भवाच्च विषयनिष्ठप्रतिबिम्बमेव निवेश्यम्। सैव चित् साक्षात्करोत्यर्थः। न च जानात्यर्थ एव साक्षात्करोत्यर्थोऽस्तु (२)किमुक्तान्यतमसम्बन्धेन, घटादेः प्रतिबिम्बे अन्वयात् परोक्षधीस्थले 'घटं साक्षात्करोमी'ति न व्यवहार इति वाच्यम्। 'जानामि साक्षात्करोमि' इत्येतयोर्भिन्नार्थत्वानुभवात्। 'घटं साक्षात्करोमी'त्यादौ तदेकदेशे विषये तादात्म्येन घटादेरन्वयः।

नारायणी।

एतदनङ्गीकारेऽनिष्टमाह—अन्यथेति। अनधिगन्तृत्वं विनापि प्रामाण्याङ्गीकारे इत्यर्थः। तदापत्तिः—प्रामाण्यापत्तिः। तद्विशेष्यकत्वविशिष्टतत्प्रकारकत्वस्य तव मते स्मृतावपि सत्त्वात्। न चानुभवत्वविशेषणेन तन्मते स्मृतेः प्रमात्ववारणमिति वाच्यम्। याथार्थ्यविशेषणेऽप्यनुभवत्वविशेषणेन तद्वारणस्य निर्बीजत्वात्। गृहीतग्राहित्वरूपापराध एव तद्वारणे बीजमिति चेत्। तर्हि 'तद्धेतोरेवास्त्वि'ति न्यायेनागृहीतग्राहित्वमेव प्रमालक्षणमुचितमिति

(१) स्वावच्छिन्नवृत्तिनिष्ठत्वस्वनिष्ठचैतन्याद्यन्यतमसम्बन्धेनेति गपुस्तके।

(२) किमितिपदं नास्ति खपुस्तके।

न्यायरत्नावली ।

'घटं न साक्षात्करोमी'त्यादौ तादृशसाक्षात्काराभावबोधः, पूर्ववत् वृत्तेरावरणभङ्गार्थत्वरूपे द्वितीयपक्षे अज्ञानाविषयत्वप्रयोजकविशिष्टचिदेव साक्षात्करोत्यर्थः। तस्मात् यथोक्तज्ञानत्वघटितप्रमात्वं नानुपपन्नम्। भ्रमवारणाय व्यवहारकालाबाधितत्वं विशेषणम् ।(१)तत्प्रमात्वनिरूपितमूलाज्ञानकालावच्छिन्नं मिथ्यात्वनिश्चयाविषयत्वम्। घटादौ चोक्तकाले मिथ्यात्वानिश्चयात् तद्ज्ञाने प्रमात्वमक्षतम्। विषयभेदेनेव प्रमातृभेदेनापि प्रमात्वभेदेऽपि न क्षतिः। न च भ्रमविषयस्य प्रातिभासिकत्वेन अज्ञातत्वाभावादेव न भ्रमे अतिव्याप्तिरिति वाच्यम्। तस्य विद्यमानकालेऽज्ञातत्वाऽभावेऽपि भाविकाले अज्ञातत्वासम्भवात् शङ्खे कदाप्यनुत्पन्नपीतत्वभ्रमस्य पुंसः 'मम भावी यः शङ्खे पीतत्वभ्रमस्तद्विषयं पीतत्वं न जानामी'ति प्रत्ययात् एतत् हरिद्रापीतत्वजातीयं स्वर्णपीतत्वजातीयं वेति संशयाच्च। तस्मात् स्वोत्पत्त्यव्यवहितपूर्वक्षणे स्वकरणक्षणे च यदज्ञातमुक्तकालावच्छेदेन अबाधितं च तद्विषयकज्ञानत्वं प्रमात्वमिति सिद्धम्। किञ्च स्मृतौ प्रमात्वमुक्तरीत्या प्रमितविषयकत्वरूपालिङ्गेनैवानुमीयते इत्यनुभवानुरोधेन संस्कारजन्यत्वस्य प्रमात्वनिष्ठसाक्षिग्राह्यताविरोधिदोषताकल्पनात् स्वतःप्रमात्वग्रहणरूपां प्रमासामान्यमर्यादामतिक्रान्तस्य स्मृतिसामान्यस्य प्रमालक्षणसङ्ग्रहो न युक्त इत्यतोऽपि तद्व्यावृत्तं प्रमालक्षणम्। ननूक्तलिङ्गेनैव स्मृतौ प्रमात्वमनुमीयते न तु साक्षिणा गृह्यते इति कथं निर्णीतम् ? उच्यते। स्मृत्या नाव्यवहितोत्तरक्षणे प्रवृत्तिनियमः किन्तु द्वितीयक्षणे तत्प्रमात्वेऽनुमिते सत्येव प्रवृत्तिः। तत्समानविषयत्वेनानुमीयमानप्रमा(२)त्वकात् स्मृत्यन्तराद्वा सेति सर्वानुभविकम्। अत एव या स्मृतिः स्वसमानविषयकभ्रममूलकत्वेन गृह्यते, तस्याः भ्रमत्वेनैव

(१) तच्च तत्प्रमातृनिरूपितेत्यादिः घपुस्तके। (२) प्रमातृकादिति गपुस्तके।

तदापत्तिरिति । एवं वेदान्तेषु सर्वत्रैवंविधविरोधे अयमेव परिहारः । तदाहुर्वार्तिककारपादाः—

न्यायरत्नावली ।

निश्चयात् न ततः प्रवृत्तिः । तथा च संस्कारजन्यत्वरूपदोषसहितत्वेन स्मृतिगतप्रमात्वस्यावृततत्वस्वीकारेणानावृतसाक्षितादात्म्यरूपस्य साक्षिभास्यत्वस्य तत्राभावात् न स्मृत्युत्पत्तिद्वितीयक्षणादौ प्रवृत्तिः । उक्तलिङ्गकानुमितौ तादृशावृततत्वाविरोधिन्यां सत्यां तत्क्षणे तादृशसाक्षिभास्यत्वविशिष्टप्रमा(१)त्मकया स्मृत्या स्वोत्पत्तितृतीयक्षणे स्मृत्यन्तरोत्पत्तिद्वितीयक्षणे वा प्रवृत्तिरुत्पद्यते । ननु जीवेश्वरादिबोधकवाक्ये पौरुषनानाविधकल्पनानुवादकत्वमास्ताम् 'यस्मिन पञ्च पञ्चजना' इत्यादिब्रह्मबोधकवाक्ये भाष्यकारैरेव शारीरकभाष्ये प्राणचक्षुश्श्रोत्रान्नमनोरूपपञ्चकम् , उपनिषद्भाष्ये तु ब्राह्मणक्षत्रियवैश्यशूद्रनिषादरूपजातिपञ्चकं पञ्चजनशब्दार्थत्वेनोक्तम् , तत्त्वमस्यादिवाक्येऽपि जहदजहल्लक्षणादिकं मतभेदेनोक्तम् , तत्कथम् ? तत्राह—एवं वेदान्तेष्विति । एवंविधविरोधे—परमतात्पर्यविषयीभूतब्रह्मप्रतिपादनार्थमुच्यमानांशे विरोधे । अस्माभिर्मादृशैराचार्यैः । जीवेशादिव्यवस्थामुक्ता-

नारायणी ।

भावः । प्रासङ्गिकं परिसमाप्य प्रकृतमाह-वेदान्तेषु । 'जीवेशावाभासेन करोति' रूपं रूपं प्रतिरूपो बभूव,ज्ञाज्ञौ द्वावजावीशानीशौ, अजो ह्येको जुषमाणोऽनुशेते'इत्यादिश्रुतिषु सर्वत्र तत्तद्वादाभिप्रायपरासु अनन्तशाखास्थासु,एवंविधविरोधे—परस्परविरोधेनाप्रामाण्यलक्षणादिविरोधे, अयमेव—अबाधिताज्ञातफलवदर्थ एव प्रामाण्यं नान्यत्रेति । एतादृशपरिहारे वार्तिकाचार्यसम्मतिमाह—तदाहुरिति । यया यया—प्रक्रियया आभासप्रतिबिम्बावच्छेददृष्टिसृष्टिवादान्यतमरूपया, पुंसां—जीवानां, प्रत्यगात्मनि-प्रति जड़ादि प्रातिकूल्येनाञ्चति प्रकाशत इति प्रत्यगात्मा जीवेशजगद्व्यावृत्तोऽखण्डैकरसरूपस्तस्मिन् । व्युत्पत्तिः-दृढबुद्धिः,प्रक्रिया—प्रक्रियते व्युत्पाद्यतेऽनयेत्यभेदसाधनसम्पत् जीवेशविभागादिव्यवस्था,

(१) प्रमातृकयेति गपुस्तके ।

यया यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि ।
सा सैव प्रक्रिया ज्ञेया साध्वी सा चानवस्थिता ॥

इति । श्रुतितात्पर्यविषयीभूतार्थविरुद्धं च हेयमेवेति शतश उद्घोषितमस्माभिः । तस्मान्न किञ्चिदेतत् । तदेवं जीवस्योपाधिनाभिभूतत्वात्संसारोपलब्धिः। परमेश्वरस्य तूपाधिवशित्वात् सर्वज्ञत्वादिकमिति सम्यगुपप-

न्यायरत्नावली ।

मुपसंहरति—तदेवमिति । उपाधिनाभिभूतत्वात्—यं प्रत्यज्ञानाद्युपाधिनिमित्तप्रयुक्तं स्वरूपावरणं तत्त्वात् । संसारोपलब्धिः—सत्यत्वेन प्रपञ्चोपलब्धिः । उपाधिवशित्वात्—श्रुत्यादिसिद्धेनोक्ताभिभूतत्वाभावेन विशिष्टत्वात् । सर्वज्ञत्वादिकमित्यादिपदेन मिथ्यात्वेन प्रपञ्चोपलम्भादिग्रहणम् । ननु न प्रतिबिम्बस्य जीवत्वं युक्तम्' सन्निहितस्यैव चैतन्यस्य उपाधौ प्रतिबिम्बितत्वेन सन्निहितरूपबिम्बभेदेन प्रतिबिम्बभेदापत्त्या इहलोकगतजीवात् कर्तुः परलोकगतजीवस्य भोक्तुर्भेदेन कृतहान्यकृताभ्यागमयोरापत्तेः।(१)+ना-

नारायणी ।

साध्वी—तदंशे सोपपत्तिकदृष्टिपुरुषं प्रति प्रामाणिकी,(२)सा च प्रक्रिया अनवस्थिता—अप्रतिष्ठिता । स्वांशे प्रामाण्यरहितेति यावत् । साक्षात्फलवत्त्वाज्ञानत्वादेरभावादिति भावः । नन्वनूद्यत्वेऽपि यदि जीवेशविभागकल्पनाऽवान्तरतात्पर्यमादाय साध्वी तदा 'द्वा सुपर्णे'ति मन्त्रोक्तभेदांशोपि साधुः स्यात्तत्राह-श्रुतीति । श्रुतीनां तात्पर्यस्याद्वैत एव प्रदर्शनात्तद्विरुद्धभेदांशो न साधुरिति भावः । शतशः-अद्वैतसिद्धिवेदान्तकल्पलतिकाऽद्वैतरत्नादौ । तस्मात्-अद्वितीयात्मन्येव सकलप्रमाणसमन्वयसमर्थनात्, एतत्-भेदांशादेः प्रामाणिकत्वाप्रमाणिकत्वकथा, नकिञ्चित्-न किमपि वृथेति यावत् । जीवेशादिव्यवस्थामुपसंहरति—तदेवमिति । अभिभूतत्वात्-अनाद्यज्ञानेनावृतत्वात्।संसारोपलब्धिः-सत्यत्वेन प्रपञ्चोपलम्भः। उपाधिवशित्वात्-वशीकृतमायत्वात्। सर्वज्ञत्वादिकमित्यादिना

(१) +…+ एतच्चिह्नान्तर्गतः पाठो नास्ति घपुस्तके ।

(२) तर्हि शास्त्रतात्पर्यविषयत्वमागतमेवेत्यत आह सा चानवस्थितेति पाठः खपुस्तके।

यते व्यवस्था। ननु भवत्वविद्यावशाज्जीवेश्वरविभागव्यवस्था। मानमेयादिप्रतिकर्मव्यवस्था तु कथमि-

न्यायरत्नावली।

नाप्यवच्छिन्नस्य तद्युक्तम्। उपाध्यधिकरण+गृहादिप्रवेशभेदेनावच्छिन्नानाम् आकाशादीनामिव इहलोकपरलोकगतमनोवच्छिन्नचितामपि भेदेनोक्तदोषापत्तेरिति चेन्न। 'रूपं रूपं प्रतिरूपः, स एष इह प्रविष्ट' इत्यादिश्रुतिषु ब्रह्मचित एव प्रतिबिम्बभावोक्त्या उपाधिसन्निहितभागस्य बिम्बत्वे मानाभावात्। यथा च उपाधेर्मनआदेस्तत्तद्देशसम्बन्धरूपावस्थाभेदेऽपि स्वरूपैक्यम्, 'तद्धेदं तर्ह्यव्याकृत'मित्यादिश्रुतेः, 'तदापीतेः संसारव्यपदेशादि'ति न्यायाच्च, तथा तदवच्छिन्नचितां तदवस्थाभेदेन भेदेऽपि तदवच्छिन्नचिद्रूपैक्यम्। अत एव एककनकपरिणामानां क्रमोत्पन्नानां कटककुण्डलादीनां कटकादीनां कटकत्वरूपैर्भेदेऽपि तत्कनकरूपेणैक्यम्। किञ्च गृहप्राङ्गणादिभेदेऽपि एकघटावच्छिन्नमाकाशमेकमेव, देशभेदेन तस्य नाशकोत्पादककल्पने गौरवात्। उपाध्युत्पादकनाशकयोरेवोपहितोत्पादकनाशकत्वकल्पनात्। भेदप्रतीतेरुपाध्याश्रयोपाधिभेदप्रयुक्तत्वात्। अन्यथा घटादिव्यक्तिभेदेन घटत्वादेरपि स्वाभाविकभेदापत्तेः। तस्मात् मतिमान्द्यादेर्दृग्दूषणोद्भावकत्वम्। मेयादीति। मेयादिघटितेत्यर्थः। प्रतिकर्मेत्यादि। कदाचिदेव केनचिदेव किञ्चिदेव प्रमीयत इति कालविशे-

नारायणी।

सर्वान्तर्यामित्वपरिग्रहः। सम्यगुपपद्यते साहङ्कारनिरहङ्कारत्वाभ्यामिति भावः। प्रतिकर्मव्यवस्थामुपपादयिष्यन्नाशङ्कते—नन्विति। मानमेयादीत्यादिना मातृमितिफलानां परिग्रहः। (१ *प्रतिकर्म ज्ञानविषयः व्यवस्था* कदाचिदेव क्वचिदेव केनचिदेव ग्रहणमिति कालदेशसहकारिविशेषादिना विषयविशेषार्थग्राहिता। दृष्टिसृष्टिपक्षे प्रतिकर्मव्यवस्थाया

(१) अत्रायं पाठभेदः खपुस्तके—* प्रतिकर्मव्यवस्थेति। कर्म ज्ञानविषयः। कर्म कर्म प्रति वर्तते इति प्रतिकर्म ज्ञानादिसाधनं तस्य व्यवस्था *कदाचिदेवेत्यादिः समोग्रे।

ति चेत्, उच्यते। दृश्यत्वाज्जडत्वाद्भेनांशत्वाच्च परिच्छिन्ना(१)प्यविद्या अनिर्वचनीयत्वेन विचारासहा आवरणविक्षेपशक्तिद्वयवती सर्वगतं चिदात्मानमावृणोति अङ्गुलिरिव नयनसन्निहिता सूर्यमण्डलम्। तत्र चक्षुष एवावरणे अङ्गुलेरप्यभानप्रसङ्गात् अधिष्ठानाव-

न्यायरत्नावली।

षादिप्रतिनियतस्य ज्ञानकर्मणो व्यवस्था नियामकोक्तिरित्यर्थः। परिच्छिन्ना-असर्वगता। जीवेशभेदाद्यनादिपदार्थेषु चित्तादात्म्यवत्स्वपि तादात्म्येन असम्बन्धेति यावत्। आवरणेत्यादि। आवरणं नास्ति न भातीतिव्यवहारः। विक्षेपश्चाकाशादिकार्यं तयोरनुकूलशक्तिद्वयवतीत्यर्थः। तथा च असर्वगतस्यापि सर्वगतावरणोत्पादकत्वं तदनुकूलशक्तिमत्त्वादिति भावः। नन्वावारकस्यावरणीयापेक्षया परिच्छिन्नत्वेऽङ्गुलिर्न दृष्टान्तः, तदावरणीयस्य चक्षुर्निर्गमद्वारस्य तदपेक्षया परिच्छिन्नत्वात् तत्राह-चक्षुष इति। चक्षुर्निर्गमद्वारस्येत्यर्थः। अभानेति। गोलकादनिर्गतस्य चक्षुषो न ग्राहकत्वं ग्राह्यासम्बद्धादिति भावः। सर्वगतमावृणोतीत्य-

नारायणी।

अनपेक्षायामपि सृष्टिदृष्टिपक्षानुसारेण सिद्धान्तयितुमुपक्रमते—उच्यत इति। परिच्छिन्ना-सर्वदेशकालवृत्त्यत्यन्ताभावप्रतियोगिनी, असर्वगता-स्वकल्पितैकदेशे विद्यमाना, अविद्या-अघटितघटनापटीयसी, अनिर्वचनीयत्वेन-सदसद्भिन्नत्वेन, विचारासहा-धर्मिभिन्नत्वाभिन्नत्वाभ्यां निरूपणानर्हा। आवरणं-सतो नास्तीति धीः अस्तीति व्यवहारप्रतिबन्धश्चेत्यादिः, विक्षेपः-आकाशादिप्रपञ्चः, तदनुकूलशक्तिद्वयवती। तथाचासर्वगताया अपि सर्वगतावरकत्वं तदनुकूलशक्तिमत्त्वादिति भावः। परिच्छिन्नस्य स्वापेक्षयाऽतिव्यापकावरकत्वे दृष्टान्तमाह—अङ्गुलिरिवेति। न स्वापेक्षयाऽङ्गुलिर्व्यापकमावृणेति किन्तु स्वापेक्षया परिच्छिन्नमेव तथाचासिद्धो दृष्टान्त इत्याशङ्कां परिहरति-तत्रेति। तत्र दृष्टान्ते, चक्षुषः-चक्षुरिन्द्रियस्य, आवरणे-निर्गमप्रतिबन्धे। अभानेति। गोलकादनिर्गतस्य

(१) असर्वगतेत्याधिकं कखपुस्तकयोः नारायण्यां च।

रणमन्तरेण विक्षेपानुपपत्तेश्च । ततः(१) सा पूर्वपूर्वसंस्कारजीवकर्मप्रयुक्ता सती निखिलजगदाकारेण परिणमते । सा च स्वगताचिदाभासद्वारा चित्तादात्म्यापन्नेति तत्कार्यमपि सर्वमाभासद्वारा चिदनुस्यूतमेव । तथा च चैतन्यस्य दीपवत्स्वसम्बद्धसर्वभासकत्वात्

न्यायरत्नावली ।

त्र हेत्वन्तरमाह--अधिष्ठानेति । अनुपपत्तेः-अनुपलब्धेः । संस्कारेति । सकलकार्यसूक्ष्मावस्थेत्यर्थः । प्रयुक्ता—सहकृता । चिदाभासद्वारा चित्तादात्म्येति । चित्तादात्म्यवत् आभासतादात्म्यवतीत्यर्थः । वार्तिकमते पक्षद्वयम् । तत्र चिदाभासस्यैव जगदधिष्ठानत्वपक्षे (२)*तस्यैव साक्षित्वेनाविद्यादिभासकत्वम् । तच्च चिदाभासस्य मिथ्यात्वेपि चित्तादात्म्यादुपपद्यते । आभासाविविक्तचित एव जगदधिष्ठानत्वपक्षे* तस्या एव सर्वभासकत्वेन अविद्यातादात्म्यस्य वाच्यत्वात् । चिदाभासद्वारेत्यादेः चिदाभासतादात्म्यवत्त्वात् चित्तादात्म्यवतीत्यर्थः । तत्कार्य—कार्यरूपापन्ना सा । सर्वभासकत्वात्—सर्व-

नारायणी ।

चक्षुषो न ग्राहकत्वं ग्राह्यासम्बन्धादिति भावः । सर्वगतमावृणोतीत्यत्र हेतुमाह—अधिष्ठानेति । शुक्त्यंशस्येव परिपूर्णानन्दरूपाश्रयविशेषस्याभानं विना कार्यासम्भवादित्यर्थः । अधिष्ठानभाने भ्रमानुत्पत्तेरिति भावः । सृष्टौ क्रमवैचित्र्यं ज्ञापयिष्यन् विशेषसामग्रीसहकृताविद्यातो जगदुत्पत्तिमाह—ततश्चेति । सर्वगतावरणाच्चेत्यर्थः । संस्कारेति । कार्यसूक्ष्मावस्थेत्यर्थः । अनेन वैचित्र्योपपत्तिः सूचिता । जीवकर्मेति । जीवादृष्टेत्यर्थः । अनेन पौर्वापर्यक्रमस्योपपत्तिः सूचिता । प्रयुक्ता-सहकृता । सृष्टिकथनस्य प्रयोजनमाह—सा चेत्यादि । सा च अविद्या चिदाभासद्वारा चित्तादात्म्यापन्ना-चिदाभासतादात्म्यवत्त्वादाभासतादात्म्यापन्नचित्तादात्म्यवतीत्यर्थः । चिदनुस्यूतं-भासकचित्सम्बद्धम् । सर्वावभासकत्वात्-अस्ति-

(१) ततश्च सेति कखपुस्तकयोः नारायण्यां च ।

(२) *···*चिह्नितः पाठः प्रमादभ्रष्टो गपुस्तके ।

जगदुपादानचैतन्यं प्रमाणापेक्षामन्तरेणैव सर्वदा सर्वं भासयत् सर्वज्ञं भवति। तेन तत्र न मानमेयादिव्यवस्था किन्तु जीवे। तस्य बुद्ध्यवच्छिन्नत्वेन परिच्छिन्नत्वात्। तेन चिदभिव्यक्तियोग्येन (१)येनान्तः-

न्यायरत्नावली।

स्मिन्नस्ति भातीति प्रयोजकत्वात्। भासयदुक्तव्यवहारविषययोग्यं कुर्वत्। तथा च जीवस्य सुखादाविव ईश्वरस्य दृश्यमात्रे आभासरूपप्रतिबिम्बद्वारा साक्षात्कारः। अनादिष्वपि दृश्येषु सर्वेष्वाभासस्वीकारात्। विवरणकारमते तु विद्यमानेषु प्रत्यक्षरूपा, भाविषु अनुमितिरूपा, अतीतेषु स्मृतिरूपा मायावृत्तिः स्वीक्रियत इति ताभिरेव ईश्वरस्य सर्वज्ञत्वं सदेति तत्रोक्तम्। वाचस्पतिमते तु प्रतिबिम्बमायावृत्त्योरीश्वरस्यास्वीकारेऽपि वक्ष्यमाणं वृत्तेरभिव्यक्त्यर्थपक्षमनुसृत्य तदनुसारिसर्वज्ञत्वं सर्वदृश्याच्चदभिन्नचिद्रूपत्वं बोध्यम्। सुखादौ जीवस्यैव, सर्वदृश्येषु ईशस्या-

नारायणी।

भातीति सर्वव्यवहारजनकत्वात्। भासयन्निरुक्तरूपेण प्रकाशयत्। सर्वज्ञं-सर्वविषयकेक्षणरूपमायावृत्तिमत्। तेन-चिदाभासद्वारासर्वसम्बन्धस्य प्रमाणद्वारकसम्बन्धापेक्षाया अभावेन, तत्र-ईशचैतन्ये, (२)(न मानमेयादिव्यवस्था)-न मानमेयादिकृतप्रतिकर्मव्यवस्था। ननु जीवेऽपि कथं व्यवस्था? तस्यानावृतचितोऽभेदात्तत्राह—तस्येति। जीवस्येत्यर्थः। बुद्ध्यवच्छिन्नत्वेन-अन्तःकरणावच्छिन्नत्वेन, परिच्छिन्नत्वात्-सर्वासम्बद्धत्वात्। (३)* तथाच ग्राहकचिदभेदेऽपि ग्राहकतदीयोपरागाभावान्नास्य सर्वावभासोऽतो मानमेयाद्यपेक्षेत्यादौ* सामान्यतः प्रतिकर्मव्यवस्थां दर्शयति—तेनेति। तेन-जीवस्योपाधिकृताऽसर्वसम्बन्धेन, चिदभिव्यक्तिः-चित्प्रतिबिम्बसम्बन्धः, सत्त्वप्राधान्याच्चिदुपाधिता वा। येन येन-चैत्रमै-

(१) येन येनेति कखपुस्तयोः नारायण्यां च।

(२) अन्यचिह्नरहित एतच्चिह्न()द्वयमध्यगतः पाठः केषुचित्पुस्तकेष्वनुपलब्धोपि आवश्यकत्वात् वर्धितोऽस्माभिरिति बोध्यम्। एवमग्रेपि।

(३) *...* चिन्हान्तर्गतः पाठो नास्ति खपुस्तके।

करणेन यदा यत्सम्बद्धं भवति, तदेव तदा तदवच्छिन्नो जीवोऽनुभवतीति न साङ्कर्यप्रसङ्गः। एवमत्र प्रक्रिया। शरीरमध्ये स्थितः सर्वशरीरव्यापकः सत्त्वप्रा-

न्यायरत्नावली।

ज्ञानाविषयत्वघटितं वा तद्वाच्यम्(१)।+तत्पक्षे तस्यैव साक्षित्वेन अविद्यादिभासकत्वम्। तच्च चिदाभासस्य मिथ्यात्वेऽपि चित्तादात्म्यादुपपद्यते। आभासाविविक्तचित एव जगदधिष्ठानत्वपक्षे तस्या एव सर्वभासकत्वेन अविद्यादितादात्म्यस्य वाच्यत्वात् चिदाभासद्वारेत्यादेरिति भावः+। ननु चिदभिव्यक्तियोग्यत्वादिकं कीदृशम्? तत्राह—एवमित्यादि। (२)शरीरमध्यस्थसुखादिरूपेण परिणममानत्वात् शरीरमध्यस्थः युगपद्धस्तपादाद्यवच्छिन्नसुखदुःखादिरूपेण परिणममानत्वात् शरीरावयवेषु सर्वेषु व्यापकः। सात्त्विकज्ञानसुखादिपरिणामवत्त्वादाह—सत्त्वप्राधान्ये-

नारायणी।

त्रीयेण, यदा-तत्तदाकारसाक्षात्कारादिवृत्तिजनकासाधारणप्रमाणसमवधानदशायाम्, यत्-किञ्चिदविद्यातत्कार्यजातम्, सम्बद्धम्-अन्वितम्, तदेव-तत्प्रमाणव्यापारेणान्तःकरणान्वितं वस्तु, तदा-तत्तत्प्रमाणवृत्तिदशायाम्,तदवच्छिन्नो जीवः-अन्तःकरणावच्छिन्नः प्रमाता,न साङ्कर्यप्रसङ्गः-न युगपत्सर्वार्थग्राहकत्वप्रसङ्गः। न वा पश्यामि, जिघ्रामि, स्पृशामि, स्वादयामि, शृणोमि, जानामि, अनुमिनोमि, उपमिनोमि, शाब्दयामि, इत्यादिप्रतीतिसिद्धचाक्षुषत्वादिविजातीयधर्मानवच्छिन्नतया ईशस्येव ग्रहप्रसङ्गः। प्रतिकर्मव्यवस्थायाः परिच्छिन्नत्वेनापेक्षोक्तेरिति भावः। विशदयितुमाह-एवमिति। शरीरमध्यस्थः-सुखादिरूपेण परिणममानत्वात् शरीरमध्ये स्थितः। सर्वशरीरव्यापकः-सर्वशरीरावयवेषु व्यापकः। युगपद्धस्तपादाद्यवच्छिन्नसुखदुःखादिरूपेण परिणममानत्वात्। ज्ञानाकारवृत्तेरेवाधिकपरिणामदर्शनदाह-सत्त्वेति। अनेन रजस्तमोन्वयो-

(१) वाच्यमिति भावः। ननुचिदभिव्यक्तीत्यादिः घपुस्तके पाठः। अर्थात् + ··· + चिह्नद्वयमध्यस्थः पाठो नास्तीति।

(२) शरीरमध्यस्थः इति पाठो गपुस्तके।

धान्येन सूक्ष्मपञ्चभूतारब्धः अन्तःकरणाख्यः अविद्याविवर्तो दर्पणादिवदतिस्वच्छः नेत्रादिद्वारा निर्गत्य योग्यान् घटादीन् विषयान् व्याप्य तत्तदाकारो भवति

न्यायरत्नावली ।

नेति । उत्क्रमणसमये गतिविघाताभावादाह—सूक्ष्मेति । पञ्चभूतगुणानां ग्राहकत्वादाह—पञ्चभूतेति । आरब्धेति । परिणामेत्यर्थः । सत्त्वांशाधिक्ययुक्तापञ्चीकृतपञ्चमहाभूतपरिणाम इति समुदायार्थः । विवर्तः—परिणामः । भूतानां विशेषपरिणामित्वेऽपि सामान्यपरिणामित्वविवक्षेत्यर्थः । अतिस्वच्छः—स्वसम्बन्धिनः प्रतिबिम्बोत्पत्तियोग्यः । नेत्रादीति । नेत्रादिद्वारा बहिरिन्द्रियेण संयुक्तो भूत्वा तेनैव रूपेण घटादिभिस्संयुक्तो भूत्वा घटादिविषयकचाक्षुषादिरूपेण परिणमत इत्यर्थः । मनस्संयुक्तेन्द्रियविषयसन्निकर्षस्य चाक्षुषादिहेतुत्वज्ञापनाय व्याप्य तत्तदाकारो भवतीत्युक्तम्।मनसि इन्द्रियमिश्रितत्वेन मनोव्याप्तिकथनेनैव इन्द्रियव्याप्तिलाभात् । तावता च चाक्षुषादिमनोवृत्तेः घटादिस्वविषयसंयुक्तत्वमावश्यकम् । मनसश्चक्षुरादीन्द्रियसंयोगकाले चाक्षुषानुत्पत्तावपि चक्षुरादिमनोयोगचक्षुरादिविषयसंयोगयोः न पार्थक्ये कारणत्वं किन्तु शक्तिविशेषरूपेण एकमेव कारणत्वम् । मनोसंयुक्तचक्षुर्विषयसंयोगे तादृशशक्तिविशेषास्वीकारेणातिप्रसङ्गभङ्गादित्यपि ज्ञा-

नारायणी ।

ऽपि ज्ञापितः कामनिद्रादिवृत्तीनामुपलम्भात् । उत्क्रमणसमये गतिविविघाताभावादाह-सूक्ष्मेति । पञ्चभूतानां गुणग्राहकत्वादाह-पञ्चेति । आरब्धः-परिणामः सत्त्वांशाधिक्ययुक्ताऽपञ्चीकृतपञ्चभूतपरिणाम इति समुदायार्थः । विवर्तः-परिणामः । भूतानां विशेषपरिणामित्वेऽपि सामान्यपरिणामित्यविवक्षेत्यर्थः । अतिस्वच्छः-सान्निध्यमात्रेण प्रतिबिम्बग्रहसमर्थः, सत्त्वप्रधानत्वात्प्रमातृभावादियोग्यो वा । नेत्रादिद्वारा-नेत्रस्थानादिच्छिद्रमार्गेण, योग्यान्महत्त्वोद्भूतरूपवदालोकादिसंयोगविशिष्टान्, व्याप्य तत्तदाकारा भवति-पृथुबुध्नाद्याकारताशालिचाक्षुषादिवृत्तिरूपेण

द्रुततताम्रादिवत् । तस्य च सौरालोकादिवद् झटित्येव

न्यायरत्नावली ।

पितम् । द्रुततताम्रादिवदिति । यथा द्रवीभूततताम्रादि मूषापात्रादौ क्षिप्तं पश्चाद्वाय्वाद्यपसारिततेजोभागं सत् कठिनीभवति, तथा मनो घटादिसन्निकृष्टेन्द्रियसंयुक्तं तदाकाराख्यविषयतासम्बन्धेन घटादिसम्बद्धं चाक्षुषादिरूपं भवतीत्यर्थः । ननु कथमतिशीघ्रमेव मनसस्सूर्यमण्डलादिसंयोगः तत्राह–तस्येति । ननु मनस इन्द्रियसंयुक्तत्वेऽपि घटादिसंयोगे मानाभावः, घटादिसंयुक्तभागावच्छेदेनैव इन्द्रिये तत्संयोगसम्भवात् । न च विषये मनस्संयोगं विना विषयचैतन्याभिन्नप्रमातृचैतन्यरूपस्य विषयसाक्षात्कारस्यानुपपत्तिरिति वाच्यम् ।(१)*विषयाकारायाअनिर्गतायाअपि इन्द्रियजन्यायाया मनोवृत्तेर्विषयसाक्षात्कारसम्भवात् आत्मसुखादौ मनःकरणकस्यैव साक्षात्कारस्य वाचस्पतिमते स्वीकारात्*। अथ विनिगमकाभावादिन्द्रियघटादिसंयुक्तभागावच्छेदेनापि मनस्सं-

नारायणी ।

परिणमते इत्यर्थः । विषयेन्द्रियसन्निकर्षस्येव विषयमनोयोगस्यापि हेतुत्वज्ञापनाय व्याप्य तत्तदाकारो भवतीत्युक्तम् , अत्र दृष्टान्तः–द्रुतेति । यथा द्रवीभूतताम्रं मूषापात्रे निक्षिप्तं वाय्वाद्यपसारिततेजोभागं सत्कठिनं भवति, तथा मनो विषयसंयुक्तं सदाकाराख्यविषयतासम्बन्धेन घटादिसंबद्धचाक्षुषादिरूपं भवतीत्यर्थः । निर्गत्य–निःसृत्य । देशान्तरे गतस्य विषयाकारतायां तु दृष्टान्तस्तडागोदकमिति । 'तद्यथा तडागोदकं छिद्रान्निःसृत्य कुल्यात्मना केदारेषु प्रविश्य केदाराकारं भवती'त्यादि स्पष्टम् । ननु कथमतिशीघ्रमेव मनसः सूर्यमण्डलादिसंयोगस्तत्राह–तस्येति । (२)स्पष्टम्। ननु 'युगपज्ज्ञानानुपपत्तिर्मनसो लिङ्गमि'ति सूत्रयता भगवताऽक्षपादेन मनसोऽणुत्वसमर्थनात्तस्य चाणोर्बहिर्निर्गमने सद्योमरणा-

(१) *साक्षात्कारत्वजातिस्वीकारेणैव तदुपपत्तेः चाक्षुषत्वादिजात्यैव पश्यामीत्यादिप्रत्ययस्य त्वयाप्युपपादनीयत्वात्* । चिन्हमध्यगः पाठो भिन्नो घपुस्तके ।

(२) स्पष्टमिति । सौरप्रभा यथा मेघाद्यावरणे सति सङ्कुचिता भवति मेघाद्यपगमे च झटित्येव जगद् व्याप्नोति तद्वदित्यर्थः ।

सङ्कोचविकासावुपपद्येते । स च सावयवत्वात्

न्यायरत्नावली ।

युज्यते। (१)+सावयवत्वाच्च युगपत्पादहस्ताद्यवच्छिन्नसुखादिपरिणामवत्+। किञ्च इन्द्रियसन्निकर्षं प्रति चाक्षुषादेः घटादिनिष्ठेन विषयतासम्बन्धेनेवावच्छेदकतासम्बन्धेनापि विनिगमकाभावेन कार्यतासम्भवात्, चाक्षुषादिमनोवृत्तेस्स्वविषयावच्छिन्नत्वसिद्ध्या बहिर्निर्गमस्यावश्यवाच्यत्वेन घटादिसंयोगस्यापि सम्भवः। न च (२)चक्षुरादेर्घटादिनिष्ठविषयताकत्वसिद्धौ विषयतासम्बन्धेनेन्द्रियसन्निकर्षकार्यत्वस्यावश्यकतया सैव तत्र विनिगमिकेति वाच्यम्। विशिष्टविषयकबुद्धित्वेन बाधाभावादिकार्यत्वस्यावश्यकतया तत एवोक्तसिद्धिसम्भवात् उक्तकार्यस्यानावश्यकत्वात्। न च निर्विकल्पकप्रत्यक्षस्य उक्तसिद्ध्यै तादृशमिन्द्रियसन्निकर्षकार्यत्वमावश्यकमिति वाच्यम्। उक्तप्रत्यक्षे मानाभावात्। न च 'जातिमान घट' इत्यादौ शुद्धघटत्वादिप्रकारताप्रयोजकत्वेन घटत्वादिनिर्विकल्पकसिद्धिरिति वाच्यम्। विजातीयसन्निकर्षत्वेनैव उक्तविषयताकधीहेतुत्व(३)सम्भवात्। अनन्तकोटिनिर्विकल्पककल्पने गौरवादिति चेन्न। तथापि(४) घटादिसंस्पृष्टस्य मनसश्शरीरसंसर्गे मानाभावेन शरीरावच्छिन्नमनोभागावच्छिन्नचित्प्रत्यक्षादिकालेऽपि प्रमातृत्वसिद्धान्तानुपपत्तेः, तत्राह—स चेत्यादि । अवच्छिन्नः—शरी-

नारायणी ।

पत्तेर्विषयसन्निकर्षव्याप्तिरयुक्तेत्यत आह—स चेति। (५)अविद्याविवर्तश्चेत्यर्थः। सावयवत्वात्—भूतसूक्ष्मांशरूपावयवत्वात्। 'अन्नमयं हि सौम्य मन' इत्यादिश्रुत्या भूतकार्यत्वोक्त्या सावयवत्वज्ञापनादिति भावः। अतो

(१) + तत्सम्भवात् तस्य सावयवत्वात्। सावयवत्वं च युगपद्पादहस्ताद्यवच्छिन्नसुखादिपरिणामवत्त्वात्+। इति पाठो भिन्नो घपुस्तके।

(२) चाक्षुषादेर्घटादिनिष्ठविषयताकत्वसिद्ध्यै इति घपुस्तके पाठः युक्तश्च।

(३) हेतुत्वकल्पनादिति घपुस्तके। (४) तथाहीति गपुस्तके।

(५) अन्तःकरणाख्यः अविद्याविवर्तश्चेति खपुस्तके।

परिणममानो देहाभ्यन्तरे घटादौ च सम्यग्व्याप्य देहघटयोर्मध्येऽपि चक्षुर्वदविच्छिन्नोऽप्यवतिष्ठते । तत्र(१) देहेऽन्तःकरणभागोऽहङ्काराख्यः कर्तेत्युच्यते । (२)देहविषयमध्यवृत्तिदण्डायमानस्तद्भागः वृत्तिज्ञानाख्यः क्रियेत्युच्यते । विषयव्यापकस्तद्भागो विषयस्य ज्ञानकर्मत्वसम्पादकमभिव्यक्तियोग्यत्वमित्युच्यते । तस्य च

न्यायरत्नावली ।

रघटादितदन्तरालदेशेषु युगपत्संयुक्तः । तत्र हेतुगर्भं विशेषणमाह—चक्षुर्वदिति । चक्षुरादीन्द्रियस्य यथा जीवनदशायां न शरीरत्यागः, जीवनादृष्टस्य तत्र प्रतिबन्धकत्वात् तथा मनसोऽपीत्यर्थः। कर्तेति । क्रियानुकूलेन्द्रियसंयोगादिव्यापारवत्त्वादिति शेषः । ज्ञानकर्मत्वसम्पादकम्-आवरणनिवृत्त्यादिरूपस्य ज्ञानाक्रियाजन्यफलस्य सम्पादकम् । तत्र हेतुः—अभिव्यक्तियोग्यत्व-

नारायणी ।

युगपन्नानावृत्त्याकारपरिणामोऽपि युज्यत एवेत्यभिप्रायेणाह–परिणममान इति । तस्मादेवाभ्यन्तरे बहिश्च स्थितिरपि युज्यत इत्याह–देहेति । देहघटयोर्मध्येपीत्यपिना मध्येऽन्तराले सम्यग् व्याप्त्यभावः सूचितः, मध्ये व्याप्तिफलस्य प्रमादैरनुपलम्भादित्यन्यत्र विस्तरः । अविच्छिन्नः–शरीरघटान्तरालदेशेषु युगपत्संयुक्तः । तत्र दृष्टान्तः–चक्षुर्वदिति । यथा चक्षुरदृष्टवशाज्जीवदशायां शरीरं न त्यजति अन्धत्वप्रङ्गात् , नापि मध्ये व्यवच्छेदः खण्डितत्वप्रसङ्गात् , मनःसंयुक्तेन्द्रियस्य विषयेन सह संगोगाभावेनाग्राहकत्वप्रसङ्गाच्च एवं मनसोपीति भावः । अन्तःकरणस्य सर्वत्रावस्थितिप्रयोजनमाह–तत्रेति। तत्र–तेषु भागेषु मध्ये । कर्ता–कार्यानुकूलकृतिमान् । चेतनावृत्तिमत्त्वादिति भावः । ज्ञानकर्मत्वेति । आवरणनिवृत्त्यादिरूपस्य ज्ञानरूपक्रियाजन्यफलस्य संपादकं तत्र हेतुः–अभिव्यक्तीति । आवरणनिवृत्तिरूपाभिव्यक्ति प्रति कारणीभूताया वृत्तिज्ञानरूपक्रियाया योग्यतारूपमित्यर्थः। विषयसंसृष्टस्वभागावच्छिन्नक्रिया विषयाभिव्यक्तिजननयोग्या भवतीति भावः । अन्तःकरणविभागकथनस्य प्रयोजनमाह -तस्येति ।

(१) देहावच्छिन्नान्तःकरणेत्यादिः कपुस्तके ।

(२) देहघटयोर्मध्यवर्ती दण्डायमानेत्यादिः कखपुस्तकयोः ।

त्रिभागस्यान्तःकरणस्यातिस्वच्छत्वात् चैतन्यं तत्राभिव्यज्यते। तस्य चाभिव्यक्तस्य चैतन्यस्य एकत्वेऽप्यभिव्यञ्जकान्तःकरणभागभेदात् त्रिधा व्यपदेशो भवति। कर्तृभागावच्छिन्नचिदंशः प्रमाता। क्रियाभागावच्छिन्नचिदंशः प्रमाणम्। विषयगतोऽभिव्यक्तियोग्यत्वभागावच्छिन्नचिदंशः प्रमितिरिति। प्रमेयं तु विषयगतं

न्यायरत्नावली।

मिति। आवरणनिवृत्त्यादिरूपाभिव्यक्तिं प्रति कारणीभूताया वृत्तिज्ञानरूपक्रियाया योग्यतारूपमित्यर्थः। विषयसंसृष्टस्वभागावच्छिन्नक्रिया विषयनिष्ठाभिव्यक्तिजननयोग्या भवतीति भावः। प्रमातेति। प्रमानुकूलव्यापारवत्त्वादिति शेषः। प्रमाणमिति। विषयसंसृष्टभागरूपप्रमासिद्ध्यर्थं प्रमातृव्यापाराविशिष्टत्वात् तादृशप्रमां प्रति अयोगव्यवच्छेदेन कारणत्वाच्चेति शेषः। प्रमात्रा व्याप्ता हि वृत्तिर्विषयेण संसृज्यते, विषयसंसृष्टभागाऽयोगशून्या चेति भावः। प्रमितिरिति। अज्ञातविषयभागत्वादिति शेषः। तदव्यवधानेन अज्ञातविषयाभिव्यक्तिरूपफलदर्शने तस्यैवाज्ञात-

नारायणी।

अतिस्वच्छत्वात्-प्रतिबिम्बासम्बन्धयोग्यत्वात्। तत्र-त्रिभागेऽन्तःकरणे,अभिव्यज्यते-प्रतिबिम्बितं भवति। अस्तु प्रतिबिम्बस्तथापि तस्यैकस्य प्रमात्रादिव्यवस्था कथं तत्राह-तस्येति। स्पष्टम्। त्रिधाव्यपदेशमेव स्पष्टयति-कर्तृभागेति। शरीरसम्बद्धान्तःकरणभागावच्छिन्नेत्यर्थः। प्रमाता-धात्वर्थज्ञानानुकूलव्यापारवत्त्वादिति शेषः। क्रियाभागेति। अन्तरालदेशावच्छिन्नान्तःकरणभागावच्छिन्नेत्यर्थः। प्रमाणं-विषयसंसृष्टभागरूपप्रमाया अयोगव्यवच्छेदेन सम्बन्धि,फलायोगव्यवच्छिन्नकारणस्यैव करणत्वाङ्गीकारात्। इन्द्रियादीनां तु प्रयोजकत्वेन करणत्वव्यपदेशो भाक्त इति भावः। विषयेति। घटादिरूपविषयगतो यः प्रमाणवृत्तेर्योग्यतारूपो भागः विषयसंसृष्टभागावच्छिन्नत्वेनैव प्रमावृत्तेरभिव्यक्तिकारणतावच्छेदकीभूतो भाग इति यावत्, तदवच्छिन्नचितिप्रतिबिम्बः प्रमितिरित्यर्थः। अज्ञातविषयकभागत्वादिति शेषः। तदनन्तरमेवाज्ञातविषया-

ब्रह्मचैतन्यमेव अज्ञातम्। तदेव च ज्ञातं सत् फलम्।

न्यायरत्नावली।

विषयकत्वमिति भावः। **ब्रह्मेति**। जीवचैतन्यस्य स्वत एवाभिव्यक्तत्वात् प्रमयाऽभिव्यज्यमानं ब्रह्मचैतन्यमेव प्रमेयमिति भावः। वस्तुतो ब्रह्म बृहत् जगदुपादानमिति यावत्, तथा च जीवस्य जगदुपादानत्वपक्षे विषयावच्छिन्नस्यैव प्रमेयत्वमिति ध्येयम्। **ज्ञातम्**—अभिव्यक्तम्। ननु चक्षुरादीनामपि प्रमाणत्वसम्भवात् दर्शनान्तरेषु उक्तत्वाच्च तदनूक्त्या न्यूनत्वमिति चेन्न। वृत्तिज्ञानस्य चक्षुरादिमिश्रितत्वेन तत्प्रमाणत्वोक्त्या चक्षुरादेरपि तल्लाभात्, प्रमासामान्यं प्रति करणस्य प्रकृते वाच्यत्वात्, मनसः प्रमासामान्यकरणत्वस्य दर्शनान्तरेष्वप्युक्तत्वाच्च, तदुक्तेरेव प्रकृते युक्तत्वाच्च। अत्र मनसोऽचेतनत्वेन स्वेतरसकलकारकप्रयोक्तृत्वरूपस्वातन्त्र्यात्मककर्तृत्वासम्भवात् मनोवच्छिन्नचितः प्रमातृत्वमुक्तम्। 'जानामि घटं जानामि पट'मित्याद्यनुगताकारधीषु चिद्रूपस्यैकज्ञानस्य विषयत्वात् सुखादौ वृत्त्यस्वीकारेण तदवच्छिन्नचित एव तज्ज्ञानत्वाच्च विषयसंसृष्टवृत्तिभागस्य ज्ञानत्वाभावेन प्रमितित्वस्याप्यसम्भवात् तदवच्छिन्नचितः तदुक्तम्। सा च वृत्त्यवच्छिन्नचितः विषयसंसृष्टात्मकं विशिष्टरूपमिति विशि-

नारायणी।

भिव्यक्तिरूपफलदर्शनेन तस्यैवाज्ञातविषयकत्वादिति भावः। एकत्वेऽपि त्रिधा व्यपदेशो भवतीत्यनेन ग्रन्थेनान्तःकरणगत एक एव प्रतिबिम्बोऽन्तःकरणाभिन्नवृत्तीनां प्रमितित्वादिसम्पादको न तु तत्र प्रतिबिम्बान्तरमपि युक्तं प्रमाणाभावाद् गौरवाच्चेति ध्वनितम्। प्रमेयस्य सर्वसाधारणत्वात्प्रमेयं पृथगाह—प्रमेयन्त्विति। **निरुक्तप्रमायां** विषयस्त्वित्यर्थः। **ब्रह्मेति**। **जीवचैतन्यस्य स्वत एवाभिव्यक्तत्वात्प्रमयाऽभिव्यज्यमानं ब्रह्मचैतन्यमेव** विषय इति भावः। विषये घटादौ स्फूर्त्यर्थं विषयाकारवृत्तौ चित्प्रतिबिम्ब एव फलमिति मतनिरासायाह—तदेवेति। **ब्रह्मचैतन्यमेव** प्रमेयात्मकमेवेत्यर्थः। **ज्ञातम्**—अभिव्यक्तं निवृत्तावरणमिति यावत्। वृ-

अत्र च यस्मिन्पक्षे अन्तःकरणावच्छिन्नो जीवः यस्मिंश्च

न्यायरत्नावली ।

ष्टरूपे केवलरूपस्य हेतुत्वात् , वृत्त्यवच्छिन्नचिदेव प्रमाण(१)मुक्तम् । तथा च विषयसंसृष्टवृत्त्यवच्छिन्नरूपेण प्रमात्वम् । प्रमाणत्वं तु विषयासंसृष्टवृत्त्यवच्छिन्नरूपेणैव शरीरासंसृष्टवृत्त्यवच्छिन्नरूपेणापि । शरीरसंसृष्टवृत्त्यवच्छिन्नचिद्रूपप्रमातुः प्रयत्नेन हि शरीरासंसृष्टवृत्त्यवच्छिन्नं व्याप्रियते प्रमानिष्पत्तये । अत एव शरीरसंसृष्टवृत्त्यवच्छिन्नचिद्रूपस्यैव प्रमातृत्वमुक्तम् । ननु कथं प्रमेयचितः प्रमाधीनाऽभिव्यक्तिः ? न तावत् प्रमातृचिदभेदः । अविद्यावच्छिन्नचिद्रूपजीवस्य जगदुपादानत्वपक्षे घटाद्यवच्छिन्नायाः प्रमेयचितः अविद्यावच्छिन्नजीवचिद्रूपत्वेन जीवं प्रति घटादेः भानसम्भवेन घटादिचितः प्रमात्रभेदस्य व्यर्थत्वात् । न हि सुषुप्तौ प्रमात्रभावेऽपि अविद्यादिकं जीवं प्रति न भाति । न वा तेन भानेन जागरे न स्मर्यते । नाप्यावरणभङ्गः । मनोवच्छिन्नचितः जगदुपादानस्य अविद्याप्रतिबिम्बितचैतन्यस्य वा जीवत्वपक्षे तत्तादात्म्याभावादेव घटादीनाम् अभानसिद्धौ घटाद्याकारवृत्त्यभावकाले घटाद्यवच्छिन्नचित्यावरणस्वीकारस्य व्यर्थत्वात् , तद्भङ्गस्य प्रमाफलत्वासम्भवात् , तत्राह—अत्र चेत्यादि । अत्र प्रमात्रादिषु त्रिषु मध्ये । अन्तःकरणवृत्तिः प्रमा उभयत्रापि प्रमातृचिदुपरागार्थावरणभङ्गार्था चेति योजना । सर्वगतः—सर्वकार्यतादात्म्यवदवि-

नारायणी ।

त्याऽऽवरणे निवृत्ते ब्रह्मणैव स्वतःस्फूर्तिमता घटादेः स्फूर्तिसम्भवात्तदर्थं घटाकारवृत्तौ प्रतिबिम्बकल्पनमप्रामाणिकमिति भावः । ब्रह्मणैव यदि विषयप्रकाशस्तदा वृत्तेः कोपयोगस्तत्राह-अत्र चेति । अत्र-प्रमात्रादिमध्ये । अन्तःकरणवृत्तिः प्रमारूपा उभयत्रापि प्रमातृचिदुपरागार्था विषयगतचैतन्यावरणभङ्गार्था चेति योजना । सर्वगतः-सर्वकार्यतादात्म्याप-

(१) प्रमाणमुक्ता इति घपुस्तके । युक्तश्चेदम् , सा चेत्यनुसारात् ।

पक्षे सर्वगतोऽसङ्गोऽविद्याप्रतिबिम्बो जीवः, तत्रोभयत्रापि प्रमातृचैतन्योपरागार्था विषयगतचैतन्यावरणभङ्गार्था

न्यायरत्नावली।

द्योपाधिकः। असङ्ग इति। घटादितादात्म्यशून्य इत्यर्थः। जीवान्यचित एव जगदुपादानत्वात् जीवस्य तदभावेन घटादितादात्म्यशून्यो जीवः शुद्धचित् अविद्याबिम्बत्वोपाहितचिद्वा जगदुपादानमिति विवरणे उक्तम्। अविद्यागताभासाविविक्तचिद्रूपईशस्तथेति वार्तिके उक्तम्। तत्र आद्याया अविद्याप्रतिबिम्बरूपविवरणोक्तजीवेशानुस्यूतत्वेन, द्वितीयाया अविद्यामनःप्रतिबिम्बरूपसंक्षेपशारीरकोक्तेशजीवानुस्यूतत्वेन,तृतीयायाः स्वास्मिन् स्वोपधेये मनोगतचिदाभासरूपे वार्तिकोक्तजीवेशानुस्यूतत्वेन सर्वदृश्येषु भासकत्वरूपसाक्षित्वसत्त्वात् तदधिष्ठानत्वप्रयोजकं तादात्म्यमावश्यकम्। अनादिदृश्येष्वपि तासामधिष्ठानत्वात्। जीवस्य तु न तेषु कथमपि तादात्म्यमिति भावः। प्रमातृचैतन्येति। जीवेश्वरार्थः। स्वप्नेऽप्यविद्यावृत्तेः स्वाग्रविषयजीवयोरुपरागार्थत्वात्, स्वाग्रगजादेरस्वच्छत्वेन तत्र प्रतिबिम्बघटितोपरागस्य तत्साक्षात्कारार्थशुक्तिरूप्यादाविव आवश्यकत्वात्, स्वप्ने प्रमात्रभावस्य प्रमाणवृत्त्यभावप्रयुक्तस्य मूल एवाग्रे 'वृत्तिकान्तःकरणावच्छिन्नचैतन्यस्यैव प्रमातृत्वादि'त्यादिना वक्ष्यमाणत्वात्। 'अहं घटं साक्षात्करोमी'ति व्यवहारार्थं तु प्रमात्रुपरागोऽपेक्ष्यत एव। घटादिसाक्षात्कारस्य मनोवृत्तिघटितत्वेन तत्र प्रमात्रुपरागस्य आवश्यकत्वात्। उपरागेति। (१)प्रतिबिम्बाश्रयप्रमावच्छेदकत्वं घटादिनिष्ठं

नारायणी।

न्नाविद्योपाधिकः। असङ्गः-घटादितादात्म्यशून्यः। जीवान्यचित एव जजगदुपादानत्वात् जीवस्य घटादितादात्म्यशून्यतेति भावः। तथाचोपादानस्य ब्रह्मण एव विषयेण सह साक्षात्सम्बन्धाद्भासकत्वं सम्भवति न

(१) प्रमातृचितो घटादिनिष्ठप्रतिबिम्बा० इत्यादिः पाठः घपुस्तके।

न्यायरत्नावली।

प्रत्यक्षस्थले सम्बन्धः। तेनैव 'घटं साक्षात्करोमि' इति व्यवहारसम्भवात्। प्रतिबिम्बाश्रयप्रमाविषयत्वं परोक्षस्थले। तेनैव 'घटमनुमिनोमि घटं जानामी'त्यादिव्यवहारसम्भवात्। ननु सुखादिषु जीवस्य तादात्म्यसम्बन्ध एव साक्षात्कारव्यवहारे नियामकः, घटादिषु तूक्तरूपवैरूप्यमिति चेन्न। ब्रह्मण एव जगदुपादानत्वपक्षे जीवस्य मनःसुखादौ प्रतिबिम्बद्वारैव सम्बन्धस्य वाच्यत्वेन मनस्सुखाद्यवच्छिन्नचिद्रूपस्य मनआदिसाक्षत्कारस्यापि (जीवप्रतिबिम्बाश्रयत्वेन जीवस्य)प्रतिबिम्बाश्रयसाक्षात्कारावच्छेदकत्वरूपसम्बन्धस्यैव मनस्सुखादिसाक्षात्कारनियामकत्वेन वैरूप्यात्।न च मनोऽवच्छिन्नचितः जीवत्वे मनोऽवच्छिन्नरूपेणैकेन बिम्बत्वं प्रतिबिम्बाधारत्वं च अनुपपन्नमिति वाच्यम्। मनोविशिष्टरूपेण द्वितीयस्य मनउपहितरूपेण आद्यस्य स्वीकारात्। मनसोऽपि स्वच्छत्वेन प्रतिबिम्बाधारत्वे विशेषणत्वम्। भोक्तृत्वरूपजीवकोटौ निवेशासम्भवेन जीवोपाधित्वेन तन्निष्ठे बिम्बत्वे उपाधित्वमेव। न च मनोविशिष्टचिद्रूपप्रतिबिम्बाश्रयं प्रति मनसो ऽवच्छेदकत्वे मानाभाव इति वाच्यम्। चिति जायमानं प्रतिबिम्बं प्रति मनसोऽवच्छेदकत्वेन प्रतिबिम्बविशिष्टं प्रत्यवच्छेदकत्वात्। विशेषणं प्रत्यवच्छेदकस्य विशिष्टे प्रत्यवच्छेदकत्वनियमात्। एवं सुखादेरवच्छेदकत्वं बोध्यम्। तस्मात् स्वप्रतिबिम्बाश्रयसाक्षात्कारावच्छेदकत्वमेव सर्वत्र विषये जीवस्य सम्बन्धः। वस्तुतस्तु स्वप्रतिबिम्बाश्रयावच्छेदकत्वं सर्वत्र सम्बन्धः। तत्र घटादौ प्रतिबिम्बाश्रयवृत्त्यवच्छेदकत्वमिन्द्रियसन्निकर्षनियम्यम्। मनस्सुखादौ प्रतिबिम्बाश्रयमनस्सुखावच्छेदकत्वं प्रतिबिम्बोत्पादकसामग्रीनि-

न्यायरत्नावली।

जीवस्येति। 'घटमहं जानामी'ति जीवव्यवहारप्रयोजको वृत्तिघटितविषयसम्बन्ध आवश्यक इत्यभिप्रेत्याह–प्रमात्रिति। प्रमातृचैतन्यस्य जीवस्य

न्यायरत्नावली।

यम्यं मनस्सुखाद्युत्पादकसामग्रीनियम्यं वा। केवलमनस्सुखाद्यवच्छेदेन चिति प्रतिबिम्बविशिष्टमनस्सुखादेरध्यासादिति भावः। ननु जीवोपरागार्था वृत्तिरिति न युक्तम्। साक्षिचैतन्यं हि विषयभासकम्। तस्य च पूर्वोक्तत्रिविधस्यापि जगदुपादानत्वात् विषयोपरागो वृत्तिं विनापीति चेन्न। साक्षिणि जीवस्य तादात्म्यादिसम्बन्धान्तरसत्त्वेऽपि वृत्तिं विना घटादेर्जीवं प्रत्यभानेन घटाद्यवच्छिन्नवृत्तिविशिष्टजीवात्मकत्वरूपस्य साक्षिणि जीवोपरागस्य चावश्यकत्वात्। अत एवाद्वैतसिद्धावुक्तम्—'अधिष्ठानचिदेव प्रकाशमाना वृत्तिद्वारा जीवोपरक्ता जीवं प्रति विषयप्रकाशिके'ति। ननु ब्रह्मण्युक्तावच्छेदकत्वे मानाभावः, न हि सर्वव्यापकं वस्तु कस्यचिदवच्छेदकम्, न चावच्छेदकत्वे नियामकमिन्द्रियसन्निकर्षादिकं ब्रह्मण्यस्ति, तथा च 'ब्रह्मसाक्षात्करोमी'ति व्यवहारानुपपत्तिः तत्राह—विषयगतेत्यादि। विषयसंसृष्टं यत् प्रमातृचैतन्यं प्रत्यावरणं तद्भङ्गार्थेत्यर्थः। तथा च ब्रह्मविषयकाज्ञानशून्यसाक्षिविषयकोक्तव्यवहारः। न चैवम् 'घटं साक्षात्करोमी'त्यादेरुक्तावच्छेदकत्वविषयकत्वेन वैरूप्यमिति वाच्यम्। वक्ष्यमाणपक्षेऽप्येतादृशवैरूप्यसत्त्वात्। तत्र हि 'घटं साक्षात्करोमी'त्यादौ घटादिनिष्ठो योऽज्ञानविषयतावच्छेदकत्वाभावस्तत्प्रयोजकविशिष्टचैतन्यरूपस्साक्षात्कारो विषय इति 'ब्रह्म साक्षात्करोमी'

नारायणी।

उपरागः विषयेण सह सम्बन्धः तदर्था तत्फलिकेत्यर्थः। प्रत्यक्षस्थले प्रतिबिम्बाश्रयप्रमावच्छेदकत्वरूपस्य, परोक्षस्थले प्रतिबिम्बाश्रयप्रमाविषयत्वरूपस्य वृत्तिं विनाऽभावात् वृत्तिनिर्वाह्यत्वेन वृत्तिफलत्वमिति भावः। ननु चिदुपरागार्था वृत्तिस्तदा ब्रह्माकारावृत्तिर्व्यर्था अधिष्ठानब्रह्मणा साक्षादेव जीवस्य (सम्बन्ध)सम्भवात् तत्राह—विषयेति। विषयसंसृष्टं यत्प्रमातृचैतन्यं प्रत्यावरणं तद्भङ्गार्थेत्यर्थः। तथाच सर्वत्र ब्रह्मसाधारणविषयनिष्ठाज्ञानावरणाभावप्रयोजकतयाप्यन्तःकरणवृतिरिति भावः। सर्वग-

चान्तःकरणवृत्तिः । यस्मिंश्च पक्षेऽविद्यावच्छिन्नः सर्वगतो जीवः आवृतः, तस्मिन्पक्षे जीवस्यैव जगदुपादानत्वेन सर्वसम्बद्धत्वात् आवरणभङ्गार्था वृत्तिरिति

न्यायरत्नावली ।

त्यत्र(१) ब्रह्मविषयकाज्ञानशून्यसाक्षात्कारो विषय इत्येव वाच्यमिति भावः । सर्वगतः—सता तादात्म्येन सर्वदृश्यसम्बद्धः । आवृत इति । घटाद्यवच्छेदेनाज्ञानविषयतावान् । ननु सर्वगतत्वे आवृतत्वे वा मानाभावात् कथं तत्पक्षे आवरणभङ्गार्था वृत्तिः तत्राह—जीवस्येत्यादि । सर्वसम्बद्धत्वादिति । आवृतत्वेनेति शेषः । घटाद्याकारवृत्तिं विनापि घटाद्याकारसाक्षात्कारव्यवहारापत्त्या ब्रह्मणीव घटाद्यवच्छिन्न(२)*जीवचैतन्येऽप्यज्ञानविषयत्वं स्वीक्रियत इति भावः । भङ्गेति । भङ्गमात्रेत्यर्थः । घटादौ जीवरूपाया अविद्यावच्छिन्न*चितस्तादात्म्यस्य स्वाभाविकत्वेन तस्यैव भासकतानियामकत्वसम्भवेन च न पूर्वोक्तोपरागार्थत्वं वृत्तेरिति भावः । ननु जीवस्य आवृतत्वं यदुक्तं तदयुक्तम् । सर्वदृश्यभासकं हि चैतन्यं साक्षी, वाचस्पतिमते जीवेशानुस्यूतशुद्धचिदेव तथा वाच्यम्। तथा च तस्यैवावृतत्वं युक्तमिति चेन्न । यथा हि वार्तिकमते ईशस्य स्वं जीवं च प्रति सर्वदृश्यभासकत्वम् सर्वदृश्याधिष्ठानत्वात्,तथा वाचस्पतिमते जीवस्यैव तत एव(३) स्वमीशञ्च प्रति तत् । जगत्कामनाकृत्योरपि जीवाधिष्ठानकत्वमेव जीवाश्रिताविद्यापरिणामत्वात् । 'सोऽका-

नारायणी ।

तः-सर्वदृश्येषु तादात्म्येन सम्बद्धः । आवृतः-घटाद्यवच्छेदेनाज्ञानावरणविषयः 'घटं न जानामी'त्यादिप्रतीतेः । नोपरागार्था वृत्तिरिति ज्ञापनायाह—जीवस्येति । आवरणभङ्गार्थेति । आवरणभङ्गार्थैव । आवरणनिवृत्त्या स्वतः सम्बद्धजीवेनैव भानोपपत्तेर्नोपरागार्था वृत्तिरस्मिन्पक्षे युक्तेति

(१) ब्रह्मनिष्ठाऽज्ञानविषयत्वाभावस्तत्प्रयोजकविशिष्टचैतन्यरूपः साक्षात्कारो विषय इति पाठो घपुस्तके । (२) *...* चिह्नितो भागः प्रमादभ्रष्टो गपुस्तके ।

(३) तत एव—सर्वदृश्याधिष्ठानत्वादेव इत्यर्थः ।

विवेकः। ननु चिदुपरागार्था वृत्तिरिति पक्षे स्वतोऽन्तः-करणसम्बद्धानां धर्माधर्मादीनां ब्रह्मणश्च वृत्तिमन्तरेणैव सर्वदा भानं स्यात्। न स्यात्। चैतन्यस्य तत्तदाकारत्वा-

न्यायरत्नावली।

मयते'त्यादिश्रुतिस्तु ब्रह्मणो जगदुपादानत्वश्रुतिवत् परिणाम्य-विद्याविषयबोधिका। यथा च वार्तिकमते जीवः ईशतादात्म्यवान् तदुपादानकत्वात्, तथा वाचस्पतिमते ईशविषयकाविद्यावान् द्रव्य-तादात्म्यवान् घट इव ईशतादात्म्यवान्वेति। (१)तस्य तं प्रति भासकत्वसम्भवः। यथा च तन्मते सुखादिभासकत्वेन ईशस्य वृत्त्यपेक्षा, तथा वाचस्पतिमते जीवस्येशं प्रति, सर्वभासकत्वे तं प्रति विषयाणामनावृतत्वात्। स्वत इति। वृत्तिं विनापीत्यर्थः। अन्तःकरणसम्बद्धानां-जीवप्रतिबिम्बाश्रयमनोऽवच्छिन्नत्वादिसम्बन्धवताम्। ईशप्रसादकोपरूपधर्माधर्मयोरीशोपाधिमायापरिणामयोरपि तत्कारणयागादिक्रियावत् मनोऽवच्छिन्नत्वं स्वीक्रियते। तादृशमनोगतसुखादिजनकत्वादिति भावः। अधर्मादीनामित्यादिपदेन शुक्तिरूप्यादिसङ्ग्रहः। भानं स्यादिति। तथा च प्रतिबिम्बाश्रयमनस्तादात्म्यादिसम्बन्धेन सुखादिसम्बद्धजीवस्य 'सुखं साक्षात्करोमी'त्यादौ विषयत्वात् वृत्तिं विनापि ब्रह्मणि(इव) धर्मादावपि तथासम्बद्धजीवेन तत्तत्साक्षात्कारव्यवहारः स्यात्। शुक्तिरूप्यादावपि इदमाकारवृत्तिनिर्गमेन तादृशमनोऽवच्छिन्नचित्तादात्म्यमेव भासकतानियामकः सम्बन्धोऽस्तीति तत्राविद्यावृत्तिस्वीकारः सिद्धान्ते वृथेति भावः। स्वप्रतिबिम्बाश्रयावच्छेदकत्वसम्बन्धन सुखादिसम्बद्धो जीवः, तत्साक्षात्कारो धर्मादौ तु

नारायणी।

भावः। स्वतः इति—वृत्तिं विनेत्यर्थः। धर्मादीत्यादिपदात् शुक्तिरूप्यादिपरिग्रहः। भानं स्यादिति। प्रतिबिम्बाश्रयमनस्तादात्म्येन सुखा-

(१) तस्य तु प्रतिभासकत्वसम्भव इति गपुस्तके।

भावात्। तदभावश्च स्वच्छेऽपि ब्रह्मचैतन्य आवरणात्।

न्यायरत्नावली।

प्रतिबिम्बाभावेन न जीवस्य तत्सम्बन्धेन धर्मादिसम्बद्धतेत्याशयेनाह--न स्यादित्यादि। चैतन्यस्य--जीवस्य। तत्तदाकारत्वाभावात्--स्वप्रतिबिम्बेत्यादिसम्बन्धेन धर्मादिसम्बद्धत्वाभावात्। ननु घटाद्याकारायामिव ब्रह्माकारायामपि श्रवणमननादिपूर्वकालीनवृत्तौ जीवस्य (१)प्रतिबिम्बसम्भवात् घटादाविव ब्रह्मण्युक्तरूपप्रतिबिम्बाश्रयावच्छेदकत्वसम्भवात् कथं ब्रह्माद्याकारत्वाभावः। एवमविद्यावृत्त्यभावेऽपि शुक्तिरूप्यादौ वृत्तिसामान्याभावेऽपि सुखादाविव धर्मादौ तत्प्रतिबिम्बसम्भवात् कथं तदाकारत्वाभावः तत्राह—तदभावश्चेति। स्वच्छे—जीवप्रतिबिम्बयोग्यापातज्ञानरूपवृत्तिविषये। आवरणात्—आवरणयोग्यापरिच्छिन्नानन्दरूपत्वात्। तथा च परिच्छिन्नत्वेन ब्रह्मणो न प्रतिबिम्बाश्रयवृत्तावच्छेदकत्वसम्भव इति भावः। यथाश्रुतं तु स्वच्छादिपदं न सङ्गच्छते, अनावृतेऽपि ब्रह्मणि प्रतिबिम्बाधारतावच्छेकत्वाभावेनावरणस्य तत्र प्रयोजकत्वात्। अथवा स्वच्छावरणपदयोः यथाश्रुत एवास्तामर्थः। ब्रह्मणि स्वच्छेऽप्यावृततत्वात् न जीवप्रतिबिम्बवत्त्वम्। चरमवृत्तौ सत्यां त्वावरणनाशेन तद्वत्त्वसम्भवाद्ब्रह्माकारता। तथा च घटादौ भासकतया कल्पितस्य प्रतिबिम्बाश्रयावच्छेदकत्वस्याभावेऽपि ब्रह्मणस्सुखादौ प्रति-

नारायणी।

दीनामिव धर्माधर्मादीनामपि साक्षात्कारः स्यादित्यर्थः। ब्रह्मणस्तु स्वाधिष्ठानभूतस्याभेदरूपः सम्बन्धः स्फुट एवेति संक्षेपः। न यथाकथञ्चित्सम्बन्धमात्रं पदार्थभानप्रयोजकं किन्तु स्वप्रतिबिम्बाश्रयप्रमावच्छेदकत्वमेव, तच्च तेषु नास्त्येवेति न तेषां भानसम्भव इत्याशयेनाह—न स्यादिति। चैतन्यस्य—प्रमातृचैतन्यस्य, तत्तदाकारत्वाभावात्—निरुक्तसम्बन्धेन सम्बद्धत्वाभावात्। एतदेव समर्थयति—तदभावेति। सम्बन्धाभावश्च।

(१) प्रतिबिम्बाभावे। ननु जीवस्येति गपुस्तक पाठेः।

न्यायरत्नावली ।

बिम्बवत्त्वमेव भासकतानियामकस्सम्बन्धः । यथा च ब्रह्मण्यज्ञानविषयत्वमावरणम्,घटादौ तु तदवच्छेदकत्वमज्ञानविषयचित्तादात्म्यं तथा ब्रह्ममनआदौ साक्षात्कारो जीवप्रतिबिम्बवत्त्वम् , घटादौ तु तदवच्छेदकत्वं तद्वृत्त्यवच्छेदकत्वं वा । एवं च 'साक्षात्करोमी'त्याकारकसर्वप्रत्ययेषु प्रतिबिम्बघटितविषयकत्वेनैकरूप्यम् । वस्तुतस्तु प्रतिबिम्बवत्त्वमेव सर्वत्र(१) सम्बन्धः । घटादावपि वृत्त्यवच्छेदककाले तत्सम्भवात् । अनुभूयते च जलाद्युपरक्ते मृदादिपात्रे सूर्यादेः प्रतिबिम्बम् । ननु प्रतिबि(२)म्बवत्त्वसम्बन्धेन स्वावच्छिन्नमनोवृत्त्यादिप्रतिबिम्बितत्वसम्बन्धेन वा घटादिविशिष्टस्य जीवस्य 'घटं साक्षात्करोमी'त्यादिप्रत्यये विषयत्वं पूर्वोक्तमयुक्तम् । साक्षात्करोत्यर्थ एव हि तत्र विषयः । स च विषयविशिष्टप्रतिबिम्बस्य प्रयोजकं मनोऽवच्छिन्नं चैतन्यम् । अन्यथा फलघटितार्थावाचकत्वेन साक्षात्करोतेरकर्मकत्वं स्यादित्युक्तं जानातिसाक्षात्करोत्यर्थविषयविवेचनप्रस्तावे । घटादिविशेषितस्य तदर्थत्वे च तस्य नानार्थत्वापत्तिरिति चेन्न । वस्तुगत्या घटादिविशिष्टं मनोऽवच्छिन्नं चैतन्यं तद्विषय इत्युक्तम्, न तु घटादिविशिष्टमनोऽवच्छिन्नचित्त्वेन चितो विषयत्वम् । तच्च विषयविशिष्टप्रतिबिम्बप्रयोजकमनोऽवच्छिन्नत्वेन घटादिविशिष्टचेतेः विषयत्वेऽपि न क्षतम् । मनोवच्छिन्नचित्तादात्म्यं च सुषुप्तजीवेऽप्यस्त्येव । मनस्त्वाश्रयस्य हि तादात्म्यं साक्षात्कारघटकम् , न तु तद्विशिष्टस्य । तथा च सौषुप्तमनोऽवस्थायां मनोजात्यभावेऽपि सकलमनोवस्थानुगतव्यक्तौ जागरस्वप्नकालयोः मनस्त्वसत्त्वेन तद्व्यक्तेरेव सौषुप्तमनोऽवस्थानुगतत्वात् सुषुप्तावपि मनस्त्वाश्रयोपहितचिदक्षता । ननु उक्तचिदपि न साक्षात्करोत्यर्थः । ज्ञानविशेषो हि सः । ज्ञानं च साक्ष्येव, तस्यैव सर्वदृश्यानुगतत्वेन ज्ञानत्वात् । न हि ज्ञानं सि-

(१) सर्वत्रेति गपुस्तके नास्ति । आवश्यकञ्च । (२) प्रतिबिम्बितत्वेति घपुस्तके ।

न्यायरत्नावली ।

द्धान्ते प्रतिज्ञेयं भिन्नम् । उक्तं हि मूल एव=विषयविशेषोपरक्ततया ज्ञानं नाना स्वतस्तु (ज्ञानं) ज्ञानमित्येकं प्रतीयते=इति चेन्न । अधिष्ठानीभूतसाक्षिण(१) एव मनोऽवच्छिन्नत्वरूपेण ज्ञानत्वात् । तदुक्तमद्वैतसिद्धौ—'यत्र दृश्याध्यासस्तत्र ज्ञानत्वम्, न तु ज्ञानत्वविशिष्टेऽध्यास' इति । अत एव प्रतिकर्मव्यवस्थायामद्वैतसिद्धावुक्तम्—'अविद्योपहितचिद्रूपस्य जीवस्य जगदुपादानत्वपक्षे घटाद्यववच्छेदेन आवृतत्वादावरणभङ्गार्था वृत्तिः । जगदनुपादानत्वपक्षे तु जीवस्य विषयेषु सम्बन्धस्याभावात् तदर्थापत्तिः । पक्षद्वयेऽपि जीवस्यैव विषयावभासकत्वम् । मनोऽवच्छिन्नचितेः जीवत्वे तु जीवस्य जगदुपादानब्रह्मचिदभेदाभिव्यक्त्याऽर्थापत्तिः । ब्रह्मचिदेव विषयावभासिकेति चरमपक्षे अभेदाभिव्यक्त्यर्थत्वस्य जीवोपरागार्थत्वे पर्यवसानात् अत्र मूले तथोक्तमिति ध्येयम् । यदि च साक्षिरूपस्य ज्ञानत्वमित्याग्रहः, तदा तादृशमनोवच्छिन्नचित्तादात्म्यविशिष्टसाक्ष्येव साक्षात्करोत्यर्थोऽस्तु । (नचोक्त) प्रतिबिम्बप्रयोजकसाक्ष्येव सोऽस्त्विति वाच्यम् । चैत्रीयमनोवृत्तिमादाय मैत्रस्यापि 'घटं साक्षात्करोमी' ति व्यवहारापत्तेः । प्रयोजकत्वंहि बिम्बविधया प्रकृते निवेशितम् । तथा च घटावच्छिन्नचैत्रियमनोवृत्तिप्रतिबिम्बितसाक्षिणो मैत्रीयमनोवच्छिन्नचिद्रूपे अहमर्थेऽपि सत्त्वादुक्तापत्तिः स्यादेव । मनोवच्छिन्नचितेः निवेशे तु तादृशवृत्तिनिष्ठप्रतिबिम्बप्रयोजकचैत्रमनोऽवच्छिन्नचितः मैत्रीयाहमर्थे तादात्म्याभावेन नोक्तापत्तिः । उक्तमनोऽवच्छिन्नचित्तो हि साक्षिणि विशेषणतया भानस्वीकारात् साक्षिविशेषेऽपि तादात्म्येन प्रकारत्वम् । यदि च विषयसाक्षात्कारशरीरे भासमाने साक्षात्कारे विषयस्या(२)

(१) साक्षिण्येवेति पाठ उपलब्धोपि न युक्तः । ज्ञानत्वादित्यस्य ज्ञानत्वस्वीकारादित्यर्थकत्वे क्लिष्टकल्पनमवधार्य शोधितोऽस्माभिरिति ।

(२) विषयस्य द्वारीकृतस्य तादात्म्येति घपुस्तके ।

न्यायरत्नावली ।

ध्यासिकस्य तादात्म्यस्य भानमावश्यकम् । तस्य भासकतानियामकत्वात्, तदा 'घटं साक्षात्करोमी'त्यादौ साक्षात्कारैकदेशे विषय इव साक्षिण्यपि घटादेस्तादात्म्यं द्वितीयाविभक्त्युपस्थापितं विशेषणतया भातीति स्वीक्रियताम् । एवं जानात्यर्थोऽपि पूर्वोक्तरीत्या प्रतिबिम्बप्रयोजकमनोऽवच्छिन्नचित्तादात्म्यविशिष्टः साक्ष्येवोच्यताम्, उच्यतां च 'घटं जानामी'त्यादौ जानात्येकदेशे प्रतिबिम्बे स्वाकारवृत्तिनिष्ठत्वाद्यन्यतमसम्बन्धाद्यवच्छिन्नं घटादेराधेयत्वमिव साक्षिणि घटादेस्तादात्म्यमपि द्वितीयाविभक्त्युपस्थापितं विशेषणमिति । एवं वृत्तेरावरणभङ्गार्थत्वपक्षे अज्ञानाविषयत्वप्रयोजकमनोऽवच्छिन्नचिद्विशिष्टसाक्षी साक्षात्करोतेरसत्त्वापादकाज्ञानाविषयत्वप्रयोजकमनोऽवच्छिन्नचिद्विशिष्टसाक्षी जानातेरर्थः । तदाप्युक्तरीत्या घटादेरज्ञानाविषयत्वे आधेयत्वस्यैव साक्षिणि तादात्म्यस्य द्वितीयाविभक्त्यर्थस्य विशेषणत्वम् । मनोऽवच्छिन्नचिति तादृशप्रयोजकत्वं च स्वनिरूपितं यदज्ञानं तद्विषयत्वाभावस्य समानकालीनं कारणं या अविद्या तत्तादात्म्यम् । कारणत्वं क्षेमसाधारणं प्रयोजकत्वरूपोऽखण्डधर्मो वा तत्स्थाने वाच्य इत्यादि साक्षात्करोत्यर्थविवरणे पूर्वोक्तं बोध्यम् । यदि च चिदुपरागार्थत्वपक्षात् वृत्तेर्जीवचितो विषयावच्छिन्नचिदभेदाभिव्यक्त्यर्थत्वपक्षो भिन्नो वाच्यः, तदा विषयत्वाभावान्तरस्थले स्वप्रतियोगिकभेदस्य चिन्निष्ठो योऽभावः तस्यैव निवेशेन साक्षात्करोत्यर्थो वाच्यः । तदेकदेशे (१)साक्षिणि घटाद्यन्वितस्य तादात्म्यस्य द्वितीयाविभक्त्यर्थस्यान्वयः । स्वपदार्थोऽत्र पूर्वत्र च मनोऽवच्छिन्नचिदेव । जानात्यर्थस्तु पूर्ववदेव । वृत्तिसुखादौ प्रतिबिम्बास्वीकारादेवाभेदाभिव्यक्त्यर्थपक्षे इति

(१) चिति साक्षिणीति घपुस्तके ।

अनावृतेऽपि शुक्तिरजतादावस्वच्छत्वात्। धर्माधर्मादौ

न्यायरत्नावली।

स्वीकारे तु स्वतादात्म्यप्रयोजकत्वमेव मनोऽवच्छिन्नचिति विशेषणं वाच्यम्। तादात्म्ये च घटाद्याकारवृत्तिप्रतियोगिकत्वं 'घटं जानामी'त्यादौ सुखादिनिष्ठत्वं 'सुखं जानामी'त्यादौ द्वितीयया बोध्यते। यद्वा स्वीयाकाराख्यविषयता स्वतादात्म्यं स्वतादात्म्याश्रयतादात्म्यं चेत्याद्यन्यतमप्रयोजकं यन्मनः तद्विशिष्टसाक्ष्येव तत्पक्षे जानात्यर्थः। (१)इच्छाद्वेषादिपरिणामस्यापि मनस्त्वात्तदीयविषयत्वमपि मनोविषयत्वम्। द्वेषादिकमादाय घटादौ ज्ञानव्यवहार इष्ट एव। इदं तु बोध्यम्। ज्ञाने साक्षात्कारे च पूर्वोक्ते सर्वत्र मनसो न मनस्त्वेनैव निवेशः। 'ईशो जानाती'त्यादावीशस्य जगदनुपादानत्वपक्षे मनोविशिष्टतादात्म्यबाधात्। किन्त्वीशोपाधिमनोन्यतरत्वादिना निवेशः, ईशो मनोऽवच्छिन्नचिच्चेत्यन्यतराविशिष्टसाक्षिणो वेति। नन्वेवं वृत्तेश्चिदुपरागार्थत्वपक्षेऽपि ब्रह्मणि चिदुपरागावरणभङ्गोभयार्थकत्वात् केवलचिदुपरागार्थकत्वमद्वैतसिद्ध्युक्तमयुक्तमिति चेन्न। तस्य घटादिब्रह्मसाधारणं चिदुपरागमात्रं वृत्तेः प्रयोजन(२)मित्यर्थकत्वात् मुख्यफलं चिदुपराग एवेत्यर्थकत्वाद्वा। यत्तु द्रव्ये प्रतिबि-

नारायणी।

स्वच्छेऽपि-प्रतिबिम्बसम्बन्धयोग्येऽपि। ब्रह्मचैतन्ये-अधिष्ठानचैतन्ये,आवरणात्-श्रवणादिजन्यवृत्तेः पूर्वं 'ब्रह्म नास्ति न भाती'ति च विरुद्धव्यवहारजनकाज्ञानात्। तथाच श्रवणादिजन्यैव वृत्तिरज्ञाननाशिका न सामान्यवृत्तिरतो भासकसम्बन्धाभावान्न सदा तद्भानमिति भावः। शुक्तिरजतभानापत्तिं वारयति-अनावृत इति। प्रतीतिमात्रशरीरत्वेनाज्ञानसत्त्वाभावेन अज्ञानविषयतावच्छेदकत्वेऽपि। अस्वच्छत्वात्-तमःप्रधानाज्ञानपरिणामत्वात् प्रतिबिम्बावच्छेदकत्वायोग्यत्वात्। अनावृतत्वेऽपि तमःकार्यस्य तस्योत्पन्नमात्रस्य भानं विना वृत्तिमसम्भावितमिति चिदुपरागार्थं

(१) धीच्छेत्यादि घपुस्तके। (२) प्रयोजकमिति पाठो गपुस्तके।

तु अस्वच्छत्वादावृतत्वाद्वा । तेन स्वच्छेऽप्यावृते प्रमाणवृत्त्या तदाकारता । अनावृतेऽप्यस्वच्छे शुक्तिरजतादौ अविद्यावृत्त्या तदाकारता । अनावृते स्वच्छे

न्यायरत्नावली ।

म्बवद्वृत्तिसंयोगः गुणादौ तु तस्यास्संयुक्तसमवायादिरिति, तदद्वैतसिद्ध्यादावुक्तमपि अननुगतत्वादुपेक्षितम् । अस्वच्छत्वात्–प्रतिबिम्बायोग्यत्वात् । नन्वीश्वरप्रसादकोपयोः सिद्धान्ते धर्माधर्मत्वस्वीकारात् जीवप्रसादकोपयोरिव तयोस्स्वच्छत्वमेव तत्राह— आवृतत्वाद्वेति । ईशं प्रति तयोरनावृतत्वेऽपि जीवं प्रत्यावृतत्वमिति भावः । तेन–स्वाभाविकेन ब्रह्माद्याकारत्वाभावेन, स्वच्छेऽप्यावृत इति पूर्ववदर्थः । ब्रह्मणीति शेषः । प्रमाणवृत्त्या–श्रवणाद्युत्तरं ब्रह्मास्मीति वृत्त्या । स्वच्छावृतब्रह्मविषयकतादृशवृत्त्येति समुदायार्थः । तदाकारता–साक्षिणो ब्रह्मविषयकाज्ञानशून्यता । अथवेत्यादिव्याख्यानपक्षे ब्रह्मप्रतिबिम्बिततेत्यर्थः । अनावृते—प्रातीतिकत्वात् अज्ञानविषयतानवच्छेदके, अविद्यावृत्त्या तदाकारता-शुक्तिरूप्याद्यवच्छिन्नाविद्यावृत्तिप्रतिबिम्बितत्वरूपसाक्षिणः शुक्तिरूप्याद्याकारता । ननु यद्यपि विवरणादौ शुक्तिरूप्याद्याकाराविद्यावृत्तिरुक्ता, तथापि न युक्ता । प्रातीतिकरूप्यादेस्स्वच्छत्वसम्भवादिति चेन्न । व्यावहारिकरजतादेः चित्प्रतिबिम्बयोग्यत्व-

नारायणी ।

त्रापि वृत्तिरावश्यकीति भावः । दोषद्वयमेवेदं यद्यपि धर्मादावप्यस्ति तथाप्यन्यतरत्वेनैव तयोस्तत्र सम्बन्धव्यावर्तकता न मिलितस्य व्यावर्तकतेत्यभिप्रेत्य विकल्पमाह–अस्वच्छत्वात्–स्वभावविशेषकृतायोग्यत्वात् । आवृतत्वात्–फलसंस्काररूपाणां सूक्ष्मत्वेन जीवाज्ञानविषयत्वात् । तेन–स्वाभाविकेन, तत्तदाकारत्वाभावेन स्वच्छेप्यावृते इति पूर्ववत् । ब्रह्मणीति शेषः । प्रमाणवृत्त्या–वेदान्तप्रमाणजन्याखण्डाकारकवृत्त्या, तदाकारता–तत्सम्बन्धत्वमिति यावत् । अनावृते–प्रतीतिमात्रशरीरत्वेनाज्ञानविषयतावच्छिदनवच्छेदके । अविद्यावृत्त्या–ज्ञानाकारसत्त्वपरि-

तु सुखदुःखादौ स्वत इति नान्तःकरणसम्बन्धमात्रेण भ.-

न्यायरत्नावली ।

रूपस्वच्छत्वादर्शनेन तज्जातीयप्रातीतिकरूप्यादेः तदसम्भवात् । सत्त्वांशाधिकभूतपरिणामस्य मनआदेरेव स्वच्छत्वसम्भवेन तमोंशाधिकाविद्याया व्यावहारिकसाधारणरजतत्वाविशिष्टहेतुतया क्लृप्तायाः परिणामस्य प्रातीतिकव्यवहारादेः स्वच्छत्वासम्भवाच्च । सत्त्वांशाधिकाविद्यापरिणामस्य तदाकारवृत्तिज्ञानस्य चिन्निष्ठतदाकारतासम्पादकत्वेनावश्यकत्वात् । तमोंशाधिकाविद्याकार्यतावच्छेदके प्रातीतिकान्यत्वनिवेशे तु गौरवम् । आवश्यकी च प्रातीतिकाविद्यावृत्तिः, तत्तांशस्यैव संस्कारत्वात् । अनुमित्यादिवृत्तिनाशस्य रजताद्याकारत्वेन स्मृतिहेतुतायाः क्लृप्तत्वात् । रजताद्यवच्छिन्नचैतन्यनाशस्य (१)+रजतादितादात्म्यसम्भवेऽपि+ रजतादिसम्बन्ध्याकारारूयविषयत्वाभावात् । विद्यमानसुखादौ त्वगत्या तदवच्छिन्नचैतन्यनाशस्यैव संस्कारत्वं कल्प्यते । अन्यथा मनःपरिणामे वृत्तिकल्पने वृत्तावपि तत्कल्पनापत्तेः । अतोऽनावृतस्य मनःपरिणामस्य स्मृतौ तदवच्छिन्नस्य चिन्नाशस्य तत्तादात्म्यापन्नचिन्नाशत्वेनैव हेतुत्वं कल्प्यते । अनावृतत्वं च स्वकाले बोध्यम् । तेन सुखादेः स्वनाशकाले आवृतत्वेऽपि न क्षतिः । अविद्यातत्सम्बद्धशुद्धचिज्जीवादेः स्मृतौ व्यभिचारात् मनःपरिणामत्वनिवेशः । अनावृते-साक्षिमात्रभास्यत्वात् अज्ञानविषयत्वानवच्छेदके । स्वच्छे-स्वच्छमनःपरिणामत्वेन स्वच्छे । सम्ब-

नारायणी ।

णामरूपवृत्त्या,तदाकारता-निरुक्तसम्बन्धेन सम्बद्धता । ननु यदि वृत्तिद्वारक एव सर्वत्र सम्बन्धस्तर्हि साक्षिमात्रभास्यानां सुखादीनां कथं भानं तत्राह—स्वच्छे त्विति । प्रतिबिम्बसम्बन्धयोग्ये त्वित्यर्थः । स्वतः-(२)

(१) +...+एतच्चिह्नद्वयमध्यगः पाठो घपुस्तके नास्ति ।

(२) यद्यपि सर्वत्र 'वित्तिं विना' इति पाठमुपलभ्य तथैव रक्षितोऽस्माभिस्तथापि 'वृत्तिं बिना' इत्येवार्थः कार्यः ।

नप्रसङ्गः। ननु ब्रह्मणः कथमावरणम्? निरवद्यस्वप्रकाशत्वेन सर्वज्ञत्वात्। सत्यम्। स्वसम्बद्धसर्वभासकतया सर्वज्ञमपि अन्तःकरणावच्छिन्नजीवाज्ञानविषयतया आवृ-

न्यायरत्नावली।

न्धमात्रेणेति। मनसो ब्रह्मणि तादात्म्यं शुक्तिरूप्यादौ सामानाधिकरण्यम्। (१)ईशप्रसादधर्माधर्मादौ स्वावच्छिन्नत्वसम्बन्धो यत्र हि मनसि यागादिप्रयत्नः, तदवच्छेदेन ईश्वरोपाधिः प्रसादरूपेण परिणमते। तथा च नानाविधानां मनस्सम्बन्धानां विषयसाक्षात्कारघटकत्वेनाननुगमोऽपीति भावः। स्वं प्रत्यनावृतत्वेऽपि जीवं प्रत्यावृतं ब्रह्मेत्याशयेन समाधत्ते—सत्यमिति। अन्तःकरणावच्छिन्नेत्यनेन मनोऽवच्छिन्नचित् अविद्याप्रतिबिम्बो

नारायणी।

वित्तिं विना, भानप्रसङ्गः-अपरोक्षभानप्रसङ्गः,स्वतःसम्बद्धानां धर्माधर्मादीनामिति शेषः। अयमत्र निष्कर्षः। घटाद्यवच्छिन्नान्तःकरणवृत्तौ चैतन्यस्य प्रतिबिम्बात् प्रतिबिम्बाश्रयवृत्त्यवच्छेदकत्वेन घटादौ सुखाद्यवच्छेदेन ब्रह्मचैतन्यं प्रतिबिम्बात्प्रतिबिम्बाश्रयब्रह्मचिदवच्छेदेन सुखादौ ब्रह्मचैतन्यावच्छेदेन ब्रह्माकारकवृत्तौ प्रतिबिम्बाश्रयवृत्त्यवच्छेदकत्वेन ब्रह्मणि प्रातिभासिकरजताद्यवच्छेदेन रजताकारायामविद्यावृत्तौ प्रतिबिम्बात् प्रतिविम्बाश्रयवृत्त्यवच्छेदकत्वेन सम्बन्धेन प्रातिभासिके सम्बन्धत्वाज्जीवस्य घटसुखब्रह्मरजतादिभानं न धर्मादेः। धर्माद्यवच्छेदेन धर्मानुस्यूतचैतन्ये प्रतिबिम्बाभावात् कल्पनाहेतोरभावात् फलानुसारित्वात्कल्पनाया इति दिक्। ननु विषयावभासकमधिष्ठानं ब्रह्मचैतन्यमावृतमित्युक्तं तन्न युक्तम्, तस्यावृतत्वे जगदान्ध्यप्रसङ्गादिति भ्रान्तः शङ्कते—नन्विति। ब्रह्मणः-अधिष्ठानभूतचैतन्यस्य। निरवद्येति-अविद्यातीतेत्यर्थः। सर्वज्ञत्वात्-वशीकृतमायत्वेन सर्वविषयकेक्षणादिसमर्थत्वात्। अन्यथान्याविशिष्टत्वेन तस्य जगदध्यासाधिष्ठानत्वानुपपत्तेः, अविद्याविशिष्टस्याप्याध्यासिकत्वादिति भावः। स्वं प्रत्यावृतत्वमेव सार्वज्ञाद्यभावप्रयोजकं न तु जीवं प्रत्यपि, ब्रह्मणश्च जीवं प्रत्येवावृतत्वमित्यभिप्रेत्य समाधत्ते-सत्यमिति। स्वसम्बद्धसर्वावभासकतया-स्वाध्यस्तजग-

(१) ईशप्रसादादिरूपधर्मादाविति घपुस्तके।

तामिति व्यपदेशात् । तस्मात् ब्रह्म जगदुपादानमिति पक्षे चिदुपरागार्था आवरणभङ्गार्था च वृत्तिः । (१)+

न्यायरत्नावली ।

वा जीव इत्यादि सर्वपक्षेषु मनोवृत्तिसापेक्षं घटादिकिञ्चिज्ज्ञत्वमेव जीवस्येति सूचितम् । जीवाज्ञानविषयतया-जीवं प्रत्यावारकं यदज्ञानं तद्विषयतया । तस्मात्-ब्रह्मण्यावृततत्वसम्भवात् । ननु घटाद्यवच्छिन्नमनोवृत्तेरुत्पत्तिक्षणे तत्र प्रतिबिम्बोत्पत्तिः तदुत्तरक्षणे वा ? । आद्ये प्रतिबिम्बघटितचिदुपरागस्य उक्तवृत्तिफलत्वासम्भवः । ब्रह्माकारवृत्तौ तदुत्पत्तिक्षणद्वितीयक्षण एव ब्रह्मण्यावरणोच्छेदकत्वेन प्रतिबिम्बसम्पादकतया वैरूप्यापातश्च । द्वितीये मनस्सुखादावपि तदुत्पत्तिक्षणे प्रतिबिम्बाभावस्य तुल्यत्वेन भानाभावापत्तिः । न चेष्टापत्तिः । साक्षिमात्रवेद्यस्याभासमानतया विद्यमान(२)त्वास्वीकारात् । दर्पणाद्युपाधेः सुखादिसन्निधानस्य प्रतिबिम्बोत्पत्तिहेतुत्वेन तदुत्पत्तिद्वितीयक्षण एव तत्स्वीकारेऽपि सप्रतिबिम्बस्य मनसः परिणामे सुखादौ वृत्तिज्ञाने च सप्रतिबिम्बत्वस्य स्वाभाविकत्वेन तदुत्पत्तिक्षण एव सम्भवादिति चेत् । अत्रोच्यते । आद्यपक्ष एव युक्तः। 'अज्ञातं चैतन्यं प्रमेयं ज्ञातं फलमि'त्यनेन मूलेन हि चिदुपरागक्षणे फलत्वं तत्पूर्वं प्रमेयत्वं चोक्तम् । तत्र घटादौ वृत्तेरुपरागघटकत्वमेव उपरागफलकत्वम् । ब्रह्मणि तु आवरणभङ्गक्षणे प्रतिबिम्बोत्पादकत्वेन तद्घटितोपरागफलकत्वं मुख्यमेव । वृत्तेरावरणभङ्गार्थत्वं तु आवरणविरोधित्वं वृत्त्यधिकरणक्षणत्वम् आवरणकालपूर्वत्वाभावव्याप्यमिति यावत् । वस्तुतस्तु

नारायणी ।

त्प्रकाशकतया जीवाज्ञानविषयतया जीवं प्रत्येवावरकं 'नास्ति न भाती'तिव्यवहारजनकं यदज्ञानं तद्विषयतया । उपसंहरति-तस्मादिति । विच्चि

(१) +... + अयं चिह्नितः पाठः कपुस्तके नास्ति ।

(२) विद्यमानभानत्वेति घपुस्तके ।

जीवोपादानत्वपक्षे तु आवरणभङ्गार्थैवेति+। नन्वेकेनै-

न्यायरत्नावली ।

वृत्त्युत्पत्तिक्षणे (१)एवावरणनाशस्य युक्तत्वात् आवरणकालपूर्वत्वा-नधिकरणक्षणाव्यवहितोत्तरत्वमेवावरणविरोधित्वम् । एवं च ब्र-ह्मण्यपि वृत्तेरुपरागफलकत्वं न मुख्यम् । एवं चोपरागसम्पादक-सामग्रीविशिष्टमज्ञानशब्देनोच्यते । प्रमोत्पत्तियोग्यमेव प्रमेयशब्दे-नोच्यते । प्रमाविषयत्वं तु प्रमाकाल एव । यत्तु वृत्तेश्चिदुपरागा-र्थत्वपक्षेऽपि घटाद्यवच्छिन्ने ब्रह्मचैतन्ये अज्ञानविषयत्वं स्वीक्रियते । तद्विशिष्टमज्ञातशब्देनोच्यते । तथा च (२)प्रमातृत्या ज्ञानविषयत्व-मेव प्रमेयत्वम् । एवं च घटाद्यवच्छिन्नचैतन्येऽपि आवरणोच्छेद-क्षणे प्रतिबिम्बोत्पादिका वृत्तिः । अन्यथा ब्रह्मचैतन्येऽपि आव-रणस्वीकारस्य वैयर्थ्यापत्तेः । अत एव स्वच्छेऽप्यावृते प्रमातृत्या तदाकारतेऽत्र मूले ब्रह्मणीति विशेष्यवचनं नोक्तम् । तस्मात् सर्व-स्याः प्रमाणवृत्तेरावरणोच्छेदक्षणे प्रतिबिम्बोत्पादकत्वमित्यापा-ततः प्रतिभाति । तन्न रम्यम् । श्रवणादिपूर्वकालीनवृत्तिगतप्रति-बिम्बेन 'ब्रह्म साक्षात्करोमी' ति व्यवहाराभावेन ब्रह्मण्यावरण-स्वीकारेऽपि घटाद्यवच्छिन्नब्रह्मचैतन्ये तत्स्वीकारे मानाभावात् । अथानभ्यासदशोत्पन्ने घटाद्याकारवृत्तिज्ञाने सत्प्रतिबिम्बे सत्यपि 'घटं साक्षात्करोमी'त्यादेरभावः तत्रापि तत्स्वीकारे मानमिति चे-न्न । तावताप्यभ्यासदशोत्पन्नवृत्तेः पूर्वं तद्विषये आवरणे मानाभा-वेन सर्वस्या घटाकारवृत्तेर्घटाद्यवच्छिन्नचैतन्यनिष्ठावरण(३)भङ्गा-

नारायणी ।

विनाऽऽवृतानावृतादौ प्रमातृचैतन्यस्य भासकसम्बन्धाभावात् चिदुपरा-गार्था-प्रमातृचैतन्यसम्बन्धफलिका। आवरणेति-अज्ञाननाशफलिकेत्यर्थः।

(१)—क्षणे नाशस्य इति गपुस्तके खण्डितः पाठः ।

(२) प्रमानिवर्त्याज्ञानविषयत्वमेव प्रमेयत्वमिति रम्यम् ।

(३)—भङ्गाभावात् इति घपुस्तके।

व घटादिज्ञानेनावरणस्य भङ्गे सद्या साक्षप्रसङ्गः, अज्ञानस्यैकत्वात् । नानाज्ञानपक्षेऽप्येकस्य जीवस्यैकाज्ञानोपाधित्वात् । न । उत्तेजकेन मणेरिव वृत्त्या आवरणस्याभिभवाङ्गीकारात् । तथा च प्रमाणजन्यान्तःकरणवृत्त्यभावसहकृतमज्ञानं सति भात्यपि वस्तुनि नास्ति न भातीति प्रतीतिजननसमर्थमावरणमित्युच्यते । वृत्तौ जातायां तु अवच्छेदकाभावाद्विद्यमानमप्यविद्य-

न्यायरत्नावली ।

र्थत्वे मानाभावात् । तस्माच्छुक्तिरूप्याकारायां इव घटाद्याकारायां अपि अनभ्यासदशानुत्पन्नवृत्तेः प्रतिबिम्बाश्रयत्वेनैव चिदुपरागार्थकत्वम् । न तु चैतन्यावरणनिवृत्त्यधीनचैतन्यनिष्ठप्रतिबिम्बोत्पादनद्वारा गौरवादिति ध्येयम् । वृत्तेरावरणभङ्गमात्रत्वपक्षे तु प्रमोत्पत्तिक्षणे चैतन्यमा(१)वरणविशिष्टम् आवरणोच्छेदविशिष्टं वा प्रमाविषयत्वादेव प्रमेयमित्युच्यते । तदुत्तरक्षणे तु फलीभूतस्य साक्षात्करोमीति व्यवहारस्य सम्भवात् फलमित्युच्यते इति दिक् । आवरणस्याज्ञानस्य । नानाज्ञानपक्षे—जीवभेदेनाज्ञानभेदपक्षे । अभिभवं प्रकटयति—तथा चेत्यादि । सहकृतं—विशिष्टम् । जननेति । 'अस्ति भाती'तिव्यवहाराभावप्रयोजकमित्यपि बोध्यम् । अवच्छेदकाभावात्-जनकताप्रतिबन्धकतयोरवच्छेदकस्य वृत्त्यभावस्याभावात्(२) ।

नारायणी ।

आवरणस्य-अज्ञानस्य । नानाऽज्ञानपक्षे जीवभेदेनाज्ञानभेदपक्षे । उत्तेजकेन-प्रतिबन्धकशक्तिविघटकेन मणिमन्त्रमहौषध्यन्यतमेन । वृत्त्या-'अयं घट'इत्यादिविषयकज्ञानेन, आवरणस्य-'घटमहं न जानामी'त्याद्यज्ञानस्य, अभिभवेति-स्वकार्याक्षमत्वेत्यर्थः । एतदेव स्पष्टयति-तथाचेति । सहकृतं विशिष्टम् । जननेति । 'अस्ति भाती'तिव्यवहाराभावप्रयोजकमित्यपि बोध्यम् । अवच्छेदकाभावात्-जनकताप्रतिबन्धकतयोरवच्छेदस्य वृत्त्यभावस्या-

(१) चैतन्यं नावरणविशिष्टमिति गपुस्तके ।

(२) वृत्त्यभावादित्येव गपुस्तके विरुद्धभेदम् ।

मानसममेवेति न स्वकार्यसमर्थमज्ञानं तेनाभिभूतमि-

न्यायरत्नावली।

स्वकार्येति। 'अस्ती'त्यादिव्यवहाराभावस्य क्षेमसाधारणकार्यत्वाश्रयस्य 'नास्ती'त्यादिव्यवहाररूपकार्यस्य जननसमर्थमित्यर्थः। तथा चोत्तेजकीभूतमन्त्रविशेषाद्यभावविशिष्टमणित्वेन दाहाभावं प्रति कारणता यथा, तथा वृत्त्यभावविशिष्टाज्ञानत्वेन 'अस्ती'त्यादिव्यवहाराभावं 'नास्ति न भाती'ति व्यवहारं च प्रति कारणता। तत्रापि प्रमाविषयत्वसमानाधिकरणमज्ञानविषयत्व'मस्ती'तिव्यवहाराभावे 'नास्ती'ति व्यवहारे च कारणम्। प्रमावच्छेदकत्वाभावसमानाधिकरणमज्ञानविषयत्वं 'भाती'ति व्यवहाराभावे 'न भाती'ति व्यवहारे च कारणम्। साक्षात्कारप्रमाया अवच्छेदकत्वस्य सद्विषये स्वीकारात् तस्यावच्छेदकत्वस्य घटादौ पूर्वं सत्त्वेन उक्ताकारोत्पत्तिः। ब्रह्मणि तु विश्वव्यापकत्वेनावच्छेदकत्वस्य सर्वदा भावेऽपि श्रवणाद्युत्तरसाक्षात्कारस्य सत्त्वे अज्ञानविषयत्वाभावसत्त्वात् विशेष्याभावादेव तादृशाज्ञानविषयत्वाभावरूपस्य (१)सत्त्वान्नोक्तकार्योत्पत्तिः। वस्तुतस्तु 'विदेहकैवल्यपर्यन्तमज्ञानविषयत्वं न निवर्तत' इति वक्ष्यमाणपक्षे श्रवणाद्युत्तरस्यात्मसाक्षात्कारस्य मत्त्वेन 'भाती'तिव्यवहारसिद्धये लौकिकविषयत्वमेवावच्छेदकस्थाने

नारायणी।

भावात्। न स्वकार्येति। यथोत्तेजकाभावविशिष्ट एव मणिर्दाहप्रतिबन्धकः प्रतिबन्धकतावच्छेदकश्चोत्तेजकाभाव इत्युत्तेजकसत्त्वप्रतिबन्धकतावच्छेदकस्याभावान्न प्रतिबन्धकः तथा चक्षुरादिप्रमाणजन्या या अन्तःकरणवृत्तिस्तदभावविशिष्टमेकज्ञानविरुद्धव्यवहारजनकमुचितव्यवहारप्रतिबन्धकं चेति कारणतावच्छेदकः प्रतिबन्धकतावच्छेकश्च वृत्त्यभाव इति वृत्तिसत्त्वे तदुभयरूपस्याभावात् न स्वकार्ये विरुद्धव्यवहारे उचितव्यवहारप्रतिबन्धे च शक्तमित्यर्थः। तत्सत्त्वेप्युत्तेजकेन मणेरिव तस्य शक्तेर्नाशादिति भावः। तेन-असमर्थहेतुना। एवं सति-घटादिज्ञानस्या-

(१) विशिष्टाभावस्यं सत्त्वादित्यादिः घपुस्तके।

न्यायरत्नावली ।

वाच्यम् । लौकिकेन्द्रियसन्निकर्षादीनामिव विद्यमानसुखात्मादि-विषयाणामपि तादात्म्येन प्रयोजकत्वे(१) तद्विषयकशाब्दधीवृत्ती-नामपि तन्निष्ठलौकिकविषयताकत्वसिद्धिः । आस्तां वक्ष्यमाणाया अविद्यावृत्तेः विद्यमानसुखादिष्विव(२) *तत्रापि तत्काले 'भाती'-त्यादिव्यवहारः । स्वीक्रियतां वा ब्रह्मणोऽपि शरीराद्यवच्छिन्न-मवच्छेदकत्वम् । न हि शाखादेरवच्छेदकत्वमनवच्छिन्नम् , किन्तु अग्राद्यवयवावच्छिन्नम् । प्रयोजकं तु तत्र पूर्ववल्लौकिकसन्निक-र्षादिकम्। घटादौ तूक्ताज्ञानविषयत्वाश्रयचित्तादात्म्यान्नोक्ताका-रोत्पत्तिः । प्रमावच्छेदकेत्यत्र प्रमापदेनापरोक्षत्वेन प्रमात्वेन च निश्चीयमाना वृत्तिर्बोध्यते । तेनानभ्यासदशापन्ने घटादिज्ञाने आ-पातब्रह्मज्ञाने च सत्यपि तादृशाकारोत्पत्तिः । प्रमाविषयेत्यादौ तु प्रमात्वेन निश्चीयमाना वृत्तिर्बोध्या । तेनातादृशे परोक्षज्ञाने सत्यपि उक्ताकारोत्पत्तिः । अत्रेदं बोध्यम् । सुखादौ (३)वृत्त्यस्वी-कारे तस्मिन् विद्यमानेऽपि 'नास्ति न भाती'ति व्यवहारापत्तिः । अज्ञानविषयचित्तादात्म्यस्य तत्र सत्त्वात् । न च सुखाद्यवच्छिन्न-चिद्भिन्नमनवच्छिन्नं घटाद्यवच्छिन्नं च चैतन्यमज्ञानविषय इति वा-च्यम् । अज्ञानविषयत्वस्यावच्छिन्नानवच्छिन्न(४)निष्ठस्य एकत्वे, ब्रह्मणि साक्षात्कृते घटादौ 'नास्ती'त्यादिव्यवहारानुपपत्तेः । नाना-त्वेऽपि ब्रह्माज्ञाने नष्टे तद्विषयत्वसत्त्वानुपपत्त्या तद्दोषतादवस्थ्यात् । अनवच्छिन्नचिन्निष्ठविषयत्वं प्रथमेन तत्त्वज्ञानेन नश्यति, अज्ञानं तु चरमेणैवेति स्वीकारे जीवन्मुक्तस्याज्ञाननाशानुप(५)पत्तिः । अथ

(१) प्रयोजकत्वात्तद्विषयकशाब्दादिवृत्तीनामपीत्यादिः घपुस्तके पाठः ।

(२) अयमत्राधिकः पाठः घपुस्तके ।—सुखादिष्विव* श्रवणाद्युत्तरमनोवृत्तिवि-षयताकालावच्छेदेनात्मन्यपि विषयता, तथाच तेष्विव*तत्रापि इत्यादिः समोऽग्रे ।

(३) वृत्त्यस्वीकारादिति घपुस्तके । (४)—नवच्छिन्नचिन्निष्ठस्येत्यादिः घपुस्तके ।

(५)—नाशानुभवानुपपत्तिरिति घपुस्तके ।

त्युच्यते । नन्वेवं सति ब्रह्मज्ञानेनाप्यविद्याया अनिवृ-

न्यायरत्नावली ।

'ब्रह्माज्ञानं नष्ट'मित्यनुभवस्य (१)किमुक्तकल्पनागौरवेण । तस्मात् ब्रह्मसाक्षात्कारोत्तरं घटादौ 'नास्ती'तिव्यहारानुपपत्तिवारणाय विदेहकैवल्यपर्यन्तमज्ञानविषयत्वं न निवर्तते । एकाज्ञानपक्ष इत्येव वाच्यम् । तथा च घटाद्यवच्छिन्नचैतन्येप्यज्ञानविषयत्वस्वीकारे मानाभावात् शुद्धचिन्निष्ठेनैवाज्ञानविषयत्वेन 'घटादिकं नास्ती'त्यादिव्यवहारादिकम् । तथा च सुखादावपि तदापत्तिर्दुर्वारा । तस्मात् घटाद्याकारवृत्तीनामिव मनस्त्वस्य मनोधर्मत्वस्य च उत्तेजकत्वं वा मनस्सुखादिषु विद्यमानेष्वेकैवा(२)विद्यावृत्तिर्वा स्वीक्रियते । सृष्ट्यारम्भकालोत्पन्नाविद्यावृत्तौ मनस्सुखादीनामवच्छिन्नत्वसम्बन्धेन विषयत्वसम्बन्धेन चोत्पत्तिः स्वीक्रियते । तथा च धीत्वज्ञा-(३)नरूपेण वृत्तित्वेनोत्तेजकत्वस्वीकारान्नानुपपत्तिः । अत एव शुक्तिरूप्यादेरपि तद्वृत्तिविषयत्वमेव स्वीक्रियते, न तु वृत्त्यन्तरविषयत्वम् । प्रतिभासव्याप्यास्थितिकत्वरूपेण विषयतासम्बन्धेनोत्पत्तिं प्रति तद्वृत्तिव्यक्तेर्हेतुत्वस्वीकारात् । एवं च तद्वृत्तेः सृष्टिकाले नाशाभावेऽपि प्रतिभासव्याप्यसुखशुक्तिरूप्यादेः स्मृतौ तदवच्छिन्नचिन्नाशस्यैव संस्कारविधया हेतुत्वमिति दिक् । एवं सति—घटाद्याकारवृत्तेरज्ञानानुच्छेदकत्वे सति । अनिवृत्तेरिति । 'या या प्रमा सा सा स्वसमान-

नारायणी ।

ज्ञानानाशकत्वे सति । अनिवृत्तेः-अनाशात् । अनिर्मोक्षप्रसङ्गः-तन्नाशे स्वरूपप्राप्तिलक्षणमोक्षस्यासम्भवप्रसङ्गः । तयोर्नाश्यनाशकभावदर्शनं

(१)—नानुपपत्तिः, ब्रह्मनिष्ठविषयताया नष्टत्वेन तद्विशिष्टरूपेणाज्ञानस्य नष्टत्वादिति चेत्तर्हि वृत्त्यभावविशिष्टस्याज्ञानविषयत्वस्यात्यन्ताभाव एव उक्तानुभवविषयोस्तु किमुक्तकल्पनागौरवेणेति घपुस्तके पाठः । युक्तश्चायम् ।

(२)—एकैकाविद्येति गपुस्तके । (३) धीत्वजातिरूपेणेति घपुस्तके ।

त्तेरनिर्मोक्षप्रसङ्गः। न। तत्त्वमस्यादिवाक्यार्थज्ञानादविद्यानिवृत्त्यभ्युपगमात्। स्वविषयविषयकप्रमात्वेनैव अविद्यानिवर्तकत्वाभ्युपगमात्। महावाक्यार्थज्ञानस्यैव अबा-

न्यायरत्नावली।

विषयकाज्ञानतत्प्रयुक्तोच्छेदिके'ति व्याप्तिग्रहात् ब्रह्मप्रमाया अज्ञानोच्छेदकत्वं स्वीक्रियते। उक्तव्याप्तिश्च घटादिप्रमायां साध्यसाधनयोः सहचारदर्शनेन ग्राह्या। तच्च न सम्भवतीति भावः। अविद्यानिवृत्त्यभ्युपगमात्—नानाविद्योच्छेदाभ्युपगमात्। अयं च निवर्तकत्वादित्यत्र हेतुः। स्वविषयविषयकप्रमात्वेनैवाविद्यानिवर्तकत्वादिति। 'या अज्ञानविषयाविषयिका प्रमा सा तदज्ञानतत्प्रयुक्तोच्छेदिके'ति व्याप्तेः पुरुषान्तरीयब्रह्मज्ञानेषु(१) सहचारदर्शनेन ग्रहादज्ञानसमानविषयकप्रमात्वव्यापकमज्ञानतत्प्रयुक्तोच्छेदकत्वमित्यस्य नियमस्य सम्भवादित्यर्थः। प्रमात्वम् 'असम्भावनादिप्रयुक्तापामाण्यबुद्ध्यविषयत्वे सत्यबाधितविषयकत्वम्'। तदनुक्तावापातब्रह्मज्ञाने घटादिज्ञाने च व्यभिचारः, अतो विशिष्टरूपेण व्याप्यता। प्रमात्वात्—उक्तविशिष्टप्रमात्वात्। तथा चाज्ञानसमानविषयकत्वं ब्रह्मज्ञानस्यैवेति तत्रैव सहचारस्य वाच्यतया घटादिज्ञाने तदभावेऽपि न क्षतिरिति भावः। ननु तर्हि घटादिज्ञानस्य प्रमात्वव्यव-

नारायणी।

विना ब्रह्मज्ञानादज्ञाननिवृत्त्या मुक्तिरिति निर्णयस्यासम्भवादिति भावः। नानाऽज्ञानवादिवाचस्पतिमिश्रमते समाधानमाह—तत्त्वमिति। अविद्येति। नानाऽविद्याच्छेदाभ्युपगमात्। तथाच पुरुषान्तरे शुकादौ च जीवन्मुक्तयोर्नाश्यनाशकभावग्रहान्नानिर्णय इति भावः। ननु घटादिज्ञानान्नाज्ञाननिवृत्तिः किन्तु तत्त्वमस्यादिवाक्यादेवेत्यत्र किं विनिगमकम्? तत्राह—स्वविषयेति। अज्ञानविषयविषयकप्रमात्वेनेत्यर्थः। प्रमात्वं चाबाधितविषयत्वं तच्च तत्त्वमस्यादिजन्यज्ञानस्यैव नान्यस्येत्याह—महावाक्येति। तत्त्वम्पदार्थभेदज्ञानस्येत्यर्थः। अबाधितेति-कालत्रयाबाधितविषयतया प्रमा-

(१)—ज्ञानेष्युक्तसहचारेति घपुस्तके।

धितविषयतया प्रमात्वात्। प्रत्यक्षादीनां तु बाधितविषयतया भ्रमत्वेऽपि व्यवहारसामर्थ्येन प्रामाण्याभिमानात्। ज्ञानादज्ञाननिवृत्तेरन्यत्रादर्शनञ्चाकिञ्चित्करम्, स्वानुभवसिद्धत्वादन्यथानुपपत्तेश्च (१)सर्वतो बलवत्त्वात्। (२) तदुक्तम्—

अन्यथानुपपत्तिश्चेदस्ति वस्तुप्रसाधिका।
पिनष्ट्यदृष्टिवैमत्यं सैव सर्वबलाधिका॥

न्यायरत्नावली।

हारः कथम्? तत्राह—प्रत्यक्षेत्यादि। नन्वेकजीववादे कथमुक्तव्याप्तिग्रहः तत्राह—ज्ञानादिति। अन्यथानुपपत्तेः—'विद्वान्नामरूपाद्विमुक्त' इत्यादिश्रुत्यन्यथानुपपत्तेः। अदृष्टिवैमत्यम्—अन्य-

नारायणी।

त्वात् तथाचानधिगताबाधितविषयकं यज्ज्ञानं तदेवाज्ञाननाशकम्, तच्च तत्त्वमस्यादिजन्यमेव, शुद्धचित एवानधिगताबाधितरूपत्वात्, अतो बाधितविषयात् घटादिज्ञानात्तदनिवृत्तावपि न हानिरिति भावः। ननु यदि तत्त्वमस्यादिजन्यं ज्ञानमेव प्रमा तदा कथं शुक्तिज्ञानं प्रमा रजतज्ञानं भ्रम इति व्यवहारस्तत्राह—प्रत्यक्षेति। शुक्त्यादिप्रत्यक्षप्रतीतीनां बाधितविषयतया—अदृष्टदुष्टत्वस्वभावत्वेन वर्तमानकालेऽपि वस्तुतो बाधितवस्तुग्राहित्वेन, भ्रमत्वेऽपि—शुक्तिरजतादिज्ञानवद् भ्रमव्यक्तित्वेऽपि, व्यवहारसामर्थ्येन—व्यवहारकालाबाधितार्थविषयकत्वेन, प्रामाण्याभिमानात्—प्रमात्वव्यवहारात्। एकजीववादे समाधानमाह—ज्ञानादिति। स्वानुभवेति। शास्त्रप्रमाणैकसमधिगम्यफलस्य भावितदनुभववेद्यत्वादित्यर्थः। यद्यन्यत्रादर्शनमेव तर्ह्यस्मदादीनां का प्रत्याशा तत्राह—अन्यथेति। मुक्त्यर्थं प्रवृत्तस्य मुक्तिं विना शास्त्रप्रामाण्याद्यनुपपत्तेरित्यर्थः। अपसिद्धान्तशङ्कां निराकरोति—तदुक्तमिति। चेत्—यदि अन्यथानुपपत्तिः—'तरति शोकमात्मवि'दित्यादिश्रुतेर्मुक्तिं विना प्रामाण्यानुपपत्तिः वस्तुप्रसाधिका ज्ञानाज्ञानयोर्नाश्यनाशकभावज्ञापिकाऽस्ति तदा सैव अन्यथानुपपत्तिरेव अदृष्टिवैमत्यं दृष्टान्तादर्शनेन विवादं पिनष्टि निवारयति, तत्र हेतुगर्भं विशेषणं—सर्वेति।

(१) सर्वतः प्रत्यक्षादिसर्वप्रमाणेभ्यो बलवत्त्वात् इतरप्रमाणविरोधोपमर्दनपूर्वकं स्वार्थसाधकत्वादित्यर्थः। (२) तदुक्तं खण्डनकारैरिति शेषः।

हीति। अथवा मूलाज्ञानस्यैवावस्थाज्ञानानि घटादिविषयावरणानि। अज्ञानस्य ज्ञानप्रागभावस्थानीयत्वेन यावन्ति ज्ञानानि तावन्त्यज्ञानानीत्यभ्युपगमात् एकेन ज्ञानेन एकाज्ञानस्यैव नाशात् घटादिज्ञानेन आवरणनाशे न काचिदनुपपत्तिः। नन्वनुमानादिभिरावरणं निवर्तते न वा? । आद्ये साक्षात्कारिभ्रमस्यापि शङ्खपीतत्वादेर्दिङ्मोहादेश्च श्वेतत्वाद्यनुमानादिना निवृत्तिप्रसङ्गः। अधिष्ठानाज्ञानोपादानकत्वे भ्रमस्य तन्निवृत्तौ

न्यायरत्नावली।

त्रादर्शनेन विवादम्। विषयावरणानि-विषयावच्छिन्नचिदावरणानि। एकाज्ञानस्येति। (१)तद्ज्ञानाव्यवहितपूर्वतद्ज्ञानविषयावारकं यदज्ञानं तस्यैव तज्ज्ञानमुच्छेदकम्। सर्वज्ञाज्ञानं न सर्वदा आवृणोतीति भावः। अनुमानादिभिः-अनुमित्यादिभिः। तन्निवृत्तौ-अधिष्ठानाज्ञा-

नारायणी।

सर्वप्रमाणाधिकेत्यर्थः । प्रमाणान्तरविरोधोपमर्दनेन स्वार्थसाधिकेति यावत्। मुक्तिप्रतिपादकशास्त्रान्यथानुपपत्त्यैव ज्ञानाज्ञानयोर्नाश्यनाशकभावसिद्धिरिति संक्षेपः। सर्वेषामेकमेवाज्ञानमिति पक्षे जीवभेदेनाज्ञानभेदपक्षेऽपि बाह्यविषयज्ञानमज्ञानस्याभिभावकमात्रं न तु नाशकं सकलविषयकाज्ञानस्यैकत्वादेकज्ञानेन तन्नाशे सर्वाज्ञाननाशापत्तेरित्युक्तम्, तन्न सम्यक्। मूलाज्ञानैकत्वेऽपि तूलाज्ञानानां भेदेन तत्रापि नाश्यनाशकभावोपपत्तेः। न च गौरवम् ,प्रागभावस्थानीयत्वेन गौरवाभावादित्यभिप्रेत्याह—अथवेति। अवस्थाज्ञानानि-शुक्तिरूप्याज्ञानानि, विषयावरणानि-विषयावच्छिन्नचिदावरणानि । गौरवं निराकरोति-अज्ञानस्येति। स्थानीयत्वेनेति। 'घटं न जानामी'त्यादिप्रतीतेरुक्तरीत्या प्रागभावेनानिर्वाहादज्ञानमेवावश्यकमिति प्रागभावाङ्गीकार एव गौरवादनुचित इति ज्ञापितम्। एकाज्ञानस्येति। यज्ज्ञानाव्यवहितपूर्वं यज्ज्ञानविषयावरकं यदज्ञानं तस्यव ज्ञानमुच्छेदकं सर्वं चाज्ञानं न सर्वदाऽऽवृणोतीति भावः। अनुमानादिभिः—अनुमित्यादिभिः । साक्षात्कारीति—अपरोक्षेत्यर्थः । पीत-

(१) तज्ज्ञानाव्यवहितपूर्वतज्ज्ञानेत्यादिः घपुस्तके।

निवृत्तेः । यौक्तिकज्ञानेन च ब्रह्मणः अविद्यानिवृत्तेः साक्षात्कारार्थं श्रवणमननापेक्षा न स्यात् । द्वितीये च वह्न्यादिव्यवहारो न स्यात्, प्रतिबन्धकस्य विद्यमानत्वात् । उच्यते । द्विविधमावरणम् । एकमसत्त्वापादकमन्तःकरणावच्छिन्नसाक्षिनिष्ठम् । अन्यदभानापादकं विषयावच्छिन्नब्रह्मचैतन्यनिष्ठम् । 'घट-

न्यायरत्नावली ।

ननिवृत्तौ,यौक्तिकज्ञानेन-वाचस्पत्यभ्युपगतेन'अहं ब्रह्मास्मी'ति परोक्षज्ञानेन । एतेन विवरणादिमते श्रवणादिपूर्वज्ञानस्यापि अपरोक्षत्वादिदमयुक्तमित्यपास्तम् । अथवा यौक्तिकेति अपरोक्षत्वेनाज्ञायमानेत्यर्थः । आत्मविषयकशाब्दज्ञानस्य अपरोक्षस्यापि अपरोक्षत्वेनाज्ञायमानस्य नापरोक्षाध्यासमूलाज्ञानोच्छेदकत्वामिति भावः । वह्न्यादिव्यवहारः—'वह्निरस्ती'ति व्यवहारः । द्विविधं-परस्परासङ्कीर्णधर्मद्वयविशिष्टम् । असत्त्वापादकं—नास्तीति धीप्रयोजकतावच्छेदकाखण्डधर्मवत् । अन्तःकरणावच्छिन्नसाक्षिनिष्ठं-मनोवच्छिन्ना साक्षिनिष्ठाऽऽश्रयता यस्य तादृशम् । विषयावच्छिन्नब्रह्मचैतन्यनिष्ठं-घटाद्यवच्छिन्ना ब्रह्मनिष्ठाऽऽश्रयता यस्य ता-

नारायणी ।

त्वादेरित्यादिना दिङ्मोहादिपरिग्रहः। श्वेतत्वाद्यनुमानादिना-'अयं श्वेतः शङ्खत्वात् शङ्खान्तरवदित्यनुमानादिना । आदिपदादाप्तवाक्यजशाब्दबोधपरिग्रहः । नन्वपरोक्षप्रमां विना कथमपरोक्षभ्रमनिवृत्तिः स्यात्तत्राह—अधिष्ठानेति । तन्निवृत्तौ—(अधिष्ठानाज्ञाननिवृत्तौ)। कारणनाशे कार्यनाशावश्यंभावादिति भावः। यौक्तिकेति । द्वैतनिरासपूर्वकाद्वैतसाधकहेतुजन्यज्ञानेन, साक्षात्कारार्थम्—ऋतंभरा प्रज्ञेत्युक्तापरोक्षप्रमार्थम् । श्रवणेति । आचार्यवक्तृकश्रुतिकरणकश्रवणतत्पूर्वकमननिदिध्यासनानामपेक्षा न स्यात् तर्कमात्रेणैव फलसद्भावसम्भवादिति भावः। वह्न्यादीति । 'वह्निरस्ती'ति व्यवहारः । प्रतिबन्धकस्य व्यवहारकारणीभूताभावप्रतियोगिनोऽज्ञानस्य विद्यमानत्वात् अज्ञानस्य यौक्तिकज्ञानादनिवृत्तेरिति भावः । द्विविधं—परस्परासङ्कीर्णधर्मद्वयविशिष्टम्। असत्त्वापादकं-'ना-

महं न जानामी'त्युभयावच्छेदानुभवात् । तत्राद्यं परोक्षापरोक्षसाधारणप्रमाणज्ञानमात्रेण निवर्तते । अनुमितेऽपि वह्न्यादौ नास्तीति प्रतीत्यनुदयात् । द्वितीयं तु साक्षात्कारेणैव निवर्तते । यदाश्रयं यदाकारं ज्ञानं तदाश्रयं तदाकारमज्ञानं नाशयतीति नियमात् ।

न्यायरत्नावली ।

दृशम् । उभयावच्छेदानुभवात्—उभययोरेकैकावच्छिन्नाश्रयताकाज्ञानयोरुक्ताश्रयत्वानुभवात् । एकाज्ञानपक्षे अज्ञानस्य घटावच्छिन्ननानाविषयताकत्ववत् मनोघटाद्यवच्छिन्नाश्रयताकत्वं सम्भवत्येवेति तत्पक्षेऽपि 'घटं न जानामी'त्युभयावच्छेदेनानुभवोपपत्तिः । यदि च तत्पक्षे घटाद्यवच्छिन्नान्यज्ञानाविषयत्वानि न स्वीक्रियन्ते, 'घटज्ञानेन घटाज्ञानं नष्ट'मित्यादिप्रत्ययस्य उक्तविषयतानाशविषयकत्वानुरोधात् तत्स्वीकारः । तादृशप्रत्ययस्य नोक्तनाशो विषयः । अनन्तानामवच्छिन्नविषयतानां कल्पने गौरवात्, किन्तु वृत्त्यविषयत्वसमानाधिकरणं यत् घटाद्यात्मकाचिद्वृत्त्यज्ञानविषयत्वं तदत्यन्ताभावो विषय इति तत्स्वीकारो व्यर्थ इति चिन्त्यते, तदा पल्लवाज्ञानानामेवोक्ताश्रयताकत्वम् । एकाज्ञानपक्षे 'घटं न जानामी'ति धीस्तु घटात्मकचिद्वृत्तिवृत्त्यविषयत्वसमानाधिकरणविषयताकाज्ञानवानहमित्याकारेति भावः । यदाकारं—यादृशविषयताकम्, तन्निष्ठं—तन्मात्रनिष्ठमेव । आलोकतमसोस्तथानियमस्य दृष्टत्वात् ज्ञानाज्ञानयोरपि स कल्प्यते । आ-

नारायणी ।

स्ती'तिधीप्रयोजकतावच्छेदकाखण्डधर्मवत् । अन्तरिति—मनोवच्छिन्नसाक्षिणि निष्ठा वृत्तिर्यस्य तादृशम् । अभानापादकं—'न भाती'ति व्यवहारप्रयोजकतावच्छेदकाखण्डधर्मवत् । विषयेति । विषयानुस्यूतब्रह्मचैतन्ये निष्ठा वृत्तिर्यस्य तादृशम् । उभयेति । मनोघटाद्यवच्छेदेन चैतन्येऽज्ञानानुभवात् । प्रकृतभेदकल्पनाफलमाह—तत्रेति । यदाश्रयं—यदाश्रितम् । (यदाकारं—यद्विषयकम्) । तदाकारं—तद्विषयम् । नियमात्—प्रका-

परोक्षज्ञानस्य इन्द्रियविषयसन्निकर्षाभावेन ज्ञानस्यान्तः-करणमात्राश्रयत्वात् । अपरोक्षज्ञानस्यैव (१)विषयव्या-पारजन्यत्वेन विषयान्तःकरणोभयजन्यत्वेन तदुभय-निष्ठत्वात् । तदुक्तम्--

परोक्षज्ञानतो नश्येदसत्त्वावृत्तिहेतुता ।
अपरोक्षधिया नश्येदभानावृत्तिहेतुता ॥

इति । तेनानुमानादावसत्त्वावरणनाशात् तत्र त-द्व्यवहारः । अभानावरणनिवृत्त्या च सोपाधिकसाक्षा-

न्यायरत्नावली ।

लोकमनोवृत्त्यो'रास्ति भाती'तिव्यवहारप्रयोजकत्वरूपस्य प्रकाशत्व-रूपस्य तमोऽज्ञानयो'र्नास्ति न भाती'ति व्यवहारप्रयोजकत्वस्य चाविशिष्टत्वात् । असत्त्वावृत्तिहेतुता-'नास्ती'ति व्यवहारप्रयोजिकाऽ विद्या । अभानावृत्तिहेतुता-'न भाती'ति व्यवहारप्रयोजिकाविद्या । असत्त्वरूपायां सत्त्वविरोधिन्यां नास्तीति व्यवहाररूपायां वा वृत्तौ हेतुता यस्या इत्यादि व्युत्पत्तेः । व्यवहारः--'अस्ती'ति व्यवहारः । अत्रेदं विभावनीयम् । असत्त्वापादकाज्ञानस्यापि विष-यावच्छिन्नचिदाश्रयताकत्वम् । अन्यथा 'ह्रदो वह्निमानि'ति ज्ञानस्य ह्रदविशेष्यतावच्छिन्नवह्निप्रकारताकत्वं न स्यात् । ह्रदवह्निभ्यां ये चितस्तादात्म्ये तयोर्विशेष्यताप्रकारतारूपयोर्मिथोऽवच्छेद्यावच्छे

नारायणी ।

शतमसोस्तथादर्शनादिति भावः । प्रकृतनियमोक्तेः फलमाह—परोक्षेति । ज्ञानाकारकज्ञानस्येत्यर्थः । अन्तरिति—अन्तःकरणमात्राश्रितत्वात् । तथाच विषयावच्छिन्नाभावान्न विषयावच्छिन्नज्ञाननाशे समर्थमिति भावः । अपरोक्षस्य—ज्ञानाकरणकज्ञानस्य । तथा चेदमेव समानाश्रय-विषयकं विषयताज्ञाननाशे समर्थमिति भावः । असत्त्वेति । नास्तीति व्यवहारप्रयोजिकाऽविद्या, स्वार्थे भावप्रत्ययः । अभानेति-न भातीति व्यवहारप्रयोजिकाऽविद्या, तेन-द्विविधहेतुमद्भावेन, तद्व्यवहारः-विष-

(१) विषयेन्द्रियसन्निकर्षात्मकव्यापरजन्यत्वेनेति कपुस्तके ।

दकभावस्य वाच्यत्वेन हृदचित्तादात्म्यावच्छेदेन चिति तादात्म्ये वह्न्युत्पत्तेरावश्यकत्वात् । न च 'तद्घटध्वंसवानयमि'त्यादौ भिन्नकालीनानां तद्घटध्वंसयोः चित्तादात्म्यानां 'तद्घटात्यन्ताभाववदिदमि'त्यादौ तद्घट(१)तदत्यन्ताभावयोः चित्तादात्म्यानां भिन्नदेशावच्छिन्नानां चावच्छेद्यावच्छेदकभाववत् मनोवच्छिन्नवह्निचित्तादात्म्यस्य हृदचित्तादात्म्येन भिन्नदेशेनावच्छिन्नत्वमिति वाच्यम् । यद्यप्यनिर्वचनीयवादे प्रतीत्यनुरोधे क्वचित्किञ्चिदनुपपन्नं स्वीक्रियते, तार्किकादिमते भिन्नकालीनयोर्विषयविषयित्वादिवत्, घटाभावादौ तदाधारत्वादिवच्च, तथाऽपि तत्परिहारसम्भवे तत्स्वीकारस्यान्याय्यत्वात् । अत एव परोक्षभ्रमस्यान्यथाख्यातित्ववादिनो निरस्ताः । विशेष्यतावच्छिन्नप्रकारत्वासम्भवात् । तस्माद्विविधमप्यज्ञानमुभयावच्छिन्नाश्रयताकमेव वा । (२)यथा हि—

आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला ।

इत्यनेन मूलाज्ञानाश्रयतानवच्छिन्नत्वेनोक्ता तथापि 'ब्रह्म न जानामी'त्यत्र प्रमातृविशेषनिरूपितत्वेनाज्ञानं भाति, तथा प्रमातृविशेषानाश्रितमप्यज्ञानं प्रमातृविशेषनिरूपितत्वेन 'घटमहं न जानामी'त्यादौ भाति, तत्पुरुषीयब्रह्मप्रमया पुरुषान्तरीयब्रह्माज्ञाननिवृत्त्या प्रमातृनिरूपितत्वसम्बन्धस्य मूलाज्ञाने कल्पितत्वेन पल्लवाज्ञानेऽपि तस्यैव व्यवस्थापकतया कल्पनाया युक्तत्वात् । तथा चासत्त्वापादकाज्ञाननिवर्तकत्वं प्रमामात्रस्य तत्समाननविषयत्वेनैव अभानापादकाज्ञाननिवर्तकं तदवच्छेदकावच्छिन्नप्रमात्वेनेति । तादृशप्रमाया विषयावच्छिन्नत्वं विषयेन्द्रियसन्निकर्षाद्यधीनं स्वीक्रियते । तदवच्छेदकावच्छिन्नत्वं प्रमायां स्वानव-

(१) तद्घटिततदत्यन्ताभावेति घपुस्तके ।

(२) मेव वा तथाहि इत्यादि घपुस्तके ।

त्कारभ्रमनिवृत्तिरिति । तस्माच्चिर्धर्मकस्याप्यात्मनोऽवि-
द्ययान्तःकरणतादात्म्याध्यासात् तद्धर्मकर्तृत्वभोक्तृ-

न्यायरत्नावली ।

च्छेदकावच्छिन्नाज्ञानकत्वम् । तेन ब्रह्मज्ञाने स्वावच्छेदकाभावेऽ-
पि न क्षतिः । न'न्वास्ति भाती'ति व्यवहारप्रतिबन्धकत्वस्य
'नास्ति न भाती'ति व्यवहारजनकत्वस्य तदाश्रयानन्ताज्ञानानां
कल्पनामपेक्ष्य सुखादिसाधारण्येन (१)प्रमापरोक्ष एवा'स्ति भाती'-
तिव्यवहारनियामकत्वम् । तद्विषयत्वयोरास्तित्वभानत्वरूपत्वादिति
चेन्न । असत्त्वापादकाज्ञानशून्या चिदस्तित्वम् । अभानापादका-
ज्ञानशून्या चिद्भानम् । असत्त्वाभाने—तादृशाज्ञानाभ्यां विशिष्टचि-
तौ, तथा च प्रमाकाले विषयसत्त्वात् 'अस्ति भाती'ति व्यवहारेऽ-
पि तदन्यकाले विषयासत्त्वादेव तदभावः, विषयासत्त्वादेव च
'नास्ति न भाती'ति व्यवहार इति मन्मते नाज्ञानस्य प्रतिबन्धक-
त्वं जनकत्वं च स्वीक्रियते । व्यवहारविधया व्यवहारे परं भा-
नाभानसत्त्वासत्त्वानां प्रयोजकत्वम् । तच्च परैरपि वाच्यम् ।
अज्ञानाश्रयतायां देशेनेव कालेनाप्यवच्छिन्नत्वात् 'इदमिदानीमिह
नास्ती'त्यादिधीः(२)। 'इदमिदानीमिहास्ती'त्यत्राप्यस्तित्वघट(३)-
ककालज्ञाने कालाद्यवच्छिन्नाश्रयताकत्वधीः। अत्यन्ताभावस्येवा-
ज्ञानस्याप्यनादेरप्याश्रयतायाः कालाद्यवच्छिन्नत्वमिति दिक् । त-

नारायणी ।

यव्यवहारः, तस्मादध्यासे दोषाभावात् । उपपद्यते—धर्मितादात्म्याध्या-
सस्य धर्मसंसर्गाध्यासे कारणत्वादिति भावः । नन्वन्यगतानामेव कर्तृ-
त्वादीनामात्मवृत्तितया भानं किं वाऽऽत्मन्युत्पद्यमानानामपि ? आद्ये
अन्यथाख्यातिप्रसङ्गः, द्वितीये अन्तःकरणधर्माणामवभास इति सिद्धा-

(१) प्रमात्रपरोक्षप्रमयोरेवास्तीत्यादिः घपुस्तके ।

(२) सा चावच्छेदकतापरम्परया इदमादिरूपशुक्त्यादिनिष्ठा या चिद्वृत्त्याश्रयता तदवच्छेदकतेति यावत् । इत्यधिकः पाठो घपुस्तके ।

(३)—घटके अज्ञाने तदभावे वा कालाद्यवच्छिन्नेत्यादिः घपुस्तके ।

त्वाद्यध्यास उपपद्यते । ननु त्वन्मतेऽनिर्वचनीयरूपा-त्यभ्युपगमात् ये कर्तृत्वादयोऽन्तःकरणधर्मा आत्म-न्यध्यस्यन्ते ते अनिर्वचनीयास्तत्रोत्पद्यन्त इति वा-च्यम् । तथा च व्यावहारिकप्रातीतिकभेदेन कर्तृत्व-भोक्तृत्वादीनां द्वैधाऽवभासः स्यात् । न स्यात् । तादा-

न्यायरत्नावली ।

त्म्यात्—अध्यासे दोषासम्भवात् । व्यावहारिकेत्यादि । व्या-वहारिककर्तृत्वादेः मनसि स्वाभाविकधर्मत्वात् मनोनिष्ठं तद्व्याव-हारिकम् आत्मनि तस्यास्वाभाविकधर्मत्वात् गगननैल्यादिवत् प्रा-तीतिकमित्यर्थः । यद्यपि मनोनिष्ठस्यैव कर्तृत्वादेरात्मनि संसर्ग-मात्रमध्यस्यते न तु स्वरूपान्तरं तथाप्यात्ममनस्संसृष्टाभ्यामेक-स्यापि कर्तृत्वादेर्भेदस्वीकार इति मते समाधत्ते—न स्यादिति । ता-दात्म्याभिमानेन—आत्ममनसोर्भेदाग्रहेण । अविवेकात्—आत्मम-नोधर्मयोर्भेदाग्रहात् । उक्तरूपाभ्यामेकमेव कर्तृत्वादिकं भाति, न तु भिन्ने रूपे स्वीक्रियेते इति मतमाश्रित्य समाधत्ते—सकले-त्यादि । वस्तुतः प्रातीतिकस्यात्मनि कर्तृत्वादिसंसर्गस्योत्पत्त्यस्वी-कारान्न तद्विशिष्टरूपेण भेदप्रसक्तिः । परन्तु यदेव मनसस्तादात्म्यम् (आत्मनि) स्वीक्रियते तदेव कर्तृत्वादेरप्यात्मनि धर्मितानियाम-

नारायणी ।

न्तो भज्येत, अन्तःकरणे इव स्वास्मन्नपि उत्पत्तिस्वीकारात् । न च सम्बन्धकृतो विशेषः, समवायनिरासेन सर्वत्राविद्यकतादात्म्यस्यैव सम्बन्धत्वाङ्गीकारात् । व्यावहारिकप्रातीतिकभेदेन तयोर्विशेषोपपादने तु द्विविधयोस्तयोर्भानेऽपि भेदः स्यादित्याशयेनाशङ्कते—नन्विति । अनिर्वचनीयेति । अन्यथाऽन्यथाख्यात्यापत्तेरिति भावः । व्यावहारिकेति । स्वाभाविकत्वेन मनोनिष्ठं व्यावहारिकम्, अस्वाभाविकत्वेनात्मनिष्ठं तद्गगननैल्यादिवत्प्रातीतिकमिति तयोर्जपाकुसुमारुण्यस्फटिकारुण्ययो-रिव पृथगवभासः स्यादित्यर्थः । सोपाधिकाध्यासे तथाः, न चायं सो-पाधिकाध्यासः, अधिष्ठानाध्यस्तोपाधिकत्वादित्यभिप्रेत्य समाधत्ते—न स्यादिति । तादात्म्येति—आत्ममनसोरभेदाध्यासेन । अविवेकात्—

त्म्याभिमानेनाविवेकात्। सकलधर्मविशिष्टस्यैवान्तः-करणस्यात्मन्यध्यस्तत्वेन द्वयाभावाद्वा। तस्मादेक-स्यात्मन उपाधिभेदेन प्रमात्रादिव्यवस्थोपपत्तेर्न सौ-गतमतापत्तिर्न वा विरोधः। अन्या अपि व्यवस्थाः स्पष्टतरमुपरिष्टादुपपादयिष्यन्ते। तस्मात् ज्ञानरूप-स्यात्मनः सुषुप्तावव्यभिचारित्वादेहेन्द्रियादीनां च व्य-भिचारित्वात् दृश्यत्वाच्च तत्र तत्रात्मबुद्धिस्तेषां तेषां वादिनां भ्रान्तिरित्यौपनिषदं मतं प्रामाणिकमिति सिद्धम् ॥ १ ॥

न्यायरत्नावली।

कः सम्बन्धः। धर्मधर्मिणोरपि तादात्म्यस्यैकस्यैव स्वीकारात्। अथवा कर्तृत्वादेर्यदेव मनसि आधारत्वं तदेवात्मन्यपि, युगपदे-वोभयत्र प्रतीयमानत्वात् उभयोरैक्यापन्नत्वाच्च। इदन्त्वादेराधा-रत्वं तु रजतप्रतीतेः पूर्वमपि इदमादौ प्रतीयत इति इदमादिरजत-योर्नैकं तद्वक्तुं शक्यते। तस्य च तादात्म्यस्याधारत्वस्य वा व्या-वहारिकमात्रत्वादात्ममनोऽनुयोगिकविशिष्टरूपाभ्यां कर्तृत्वादेर्भेद-स्वीकारेऽपि तादात्म्याभिमानेनेत्यादिरीत्या न तदवभासः। प्रा-तीतिकरूपान्तरं तु कर्तृत्वादेर्न सम्भाव्यत इत्याशयेनाह—सकले-त्यादि। आत्मनीति। एकै(१)कतादात्म्येनाधारत्वेन वेति शेषः। द्वयाभावात्—कर्तृत्वादिव्यवहारिकप्रातीतिकभेदेन रूपद्वया-भावात्। सुषुप्त्येकसिद्ध इति पदव्याख्यानोपसंहारपूर्वकं श्लो-कव्याख्यामुपसंहरति—तस्मादित्यादि ॥ १ ॥

नारायणी।

आत्ममनोवृत्तितया पृथक्तया धर्मयोरग्रहात्। एकमेव कर्तृत्वादिकं न पृथगिति मते समाधत्ते—सकलेति। द्वयेति—व्यावहारिकप्रातिभासि-कभेदेन रूपद्वयाभावात्। श्लोकव्याख्यामुपसंहरति—तस्मादिति। अना-

(१) एकेन तादात्म्येत्यादिः घपुस्तके पाठः।

स्यादेतत्, आत्मनो निर्धर्मकत्वे प्रमात्रादिव्यवहारस्याध्यासमूलत्वेन 'ब्राह्मणो यजेते'त्येवमादीनां शास्त्राणामप्रामाण्यप्रसङ्गः, अकर्तुरभोक्तुश्चात्मनः प्रवृत्त्यनुपपत्तेः। वेदाप्रामाण्ये च कुतो ब्रह्मसिद्धिरपि। तस्य तन्मात्रगम्यत्वात्। शास्त्रयोनित्वादिति न्यायात्। तथा च वेदप्रामाण्यार्थं प्रमातृत्वादिव्यवहारस्य सत्यत्वमभ्युपेयमित्याशङ्क्य किं तत्त्वज्ञानात्पूर्वमप्रामाण्यमा-

न्यायरत्नावली।

द्वितीयं पद्यमवतारयति-स्यादेतादिति। यत् उक्तं तदास्तामित्यर्थः। प्रमात्रादीत्यादीपदेन ब्राह्मणादिसङ्ग्रहः। तस्य-ब्रह्मणः, तन्मात्रगम्यत्वात्-वेदमात्रगम्यत्वात्। ननु कार्यत्वहेतुकसकर्तृकत्वानुमानेन ब्रह्मसिद्धिस्सम्भवतीत्यत आह-शास्त्रेति। ब्रह्म विचार्यमाणवेदान्तैकगम्यम् वेदान्यमानगम्यत्वाभावात्-सकर्तृकत्वानुमानस्याप्रयोजकत्वात् सत्यज्ञानानन्दशुद्धरूपेणानुमानाद्यगम्यत्वा-

नारायणी।

द्यविद्याध्यासकृततत्कार्यप्रतिबिम्बादेः समर्थनादित्यर्थः। एकस्य-अद्वितीयस्य। उपाधिभेदेन—अन्तःकरणाद्युपाधिभेदेन। प्रमात्रादीत्यादिना सुखित्वादिपरिग्रहः। न सौगतेति। तेनानिर्वचनीयानाद्यविद्यानङ्गीकारात् इति भावः। न वा विरोध इति। केवलस्यैकस्य प्रमातृत्वाद्यनङ्गीकारादिति भावः। स्पष्टम् अन्यत् ॥ १ ॥

द्वितीयपद्यमवतारयति—स्यादित्यादि। (१)*एतत् वक्ष्यमाणं स्यात् अनिष्टमिति शेषः*। प्रमात्रादीत्यादिना ब्राह्मणादिपरिग्रहः। तस्य-ब्रह्मणः, तन्मात्रेति-वेदमात्रेत्यर्थः। कर्तृजन्यत्वव्याप्येन कार्यत्वादिहेतुनापीश्वरसिद्धिः सम्भवतीत्यत आह—शास्त्रेति। शास्त्रमेव योनिः प्रमाणं यत्र तस्य भावः शास्त्रैकसमधिगम्यत्वं तस्मादित्यर्थः। न्यायात् तत्र 'तं त्वौपनिषदं पुरुषं पृच्छामी'त्यादिश्रुतिबलेनोपनिषन्मात्रावगम्यत्वसा-

(१) यदुक्तं तदास्तामित्यर्थः इति खपुस्तके पाठभेदः*...* चिह्नद्वयमध्यवर्ती।

पाद्यते ऊर्ध्वं वा ? । तत्राद्ये सर्वेषां प्रमाणानामविद्यावद्विषयत्वेन तदृशायां बाधाभावान्निष्प्रत्यूहं प्रामाण्यम् । द्वितीये त्विष्टापत्तिरेवेत्याह—

न वर्णा न वर्णाश्रमाचारधर्मा
न मे धारणाध्यानयोगादयोऽपि ।
अनात्माश्रयाहंममाध्यासहाना-
त्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ २ ॥

न्यायरत्नावली ।

दिति सूत्रार्थः । अविद्यावद्विषयत्वेन—(१)अविद्याकालपरमार्थत्वेन गृह्यमाणप्रमेयकत्वेन, तदृशायां-प्रमाविषयाणामबाध्यत्वग्रहदशायाम् । निष्प्रत्यूहमिति दशायामित्यनेनानुषक्के नान्वितम् । प्रामाण्यम्-अबाध्यविषयकत्वम् । इष्टापत्तिरेवेत्यत्र पद्येनैव हेतुमाह—न वर्णा इत्यादि । योगादयोऽपीत्यपिशब्देन हेतुत्वमुच्यते । तथा च यतो मयि वर्णाद्यभावः, अतोऽद्वितीये इष्टापत्तिरित्यर्थः । वर्णाद्यभावे हानादित्यन्तं हेतुः । ननु वर्णाश्रमेत्यादौ वर्णाश्रमयोरा-

नारायणी ।

धनादिति भावः । अविद्येति । अविद्यावान् अध्यस्तो व्यवहारकालाबाध्यो विषयः प्रतिपाद्यो येषां तेऽविद्यावद्विषयास्तेषाम्, भावो व्यवहारकालाबाध्यविषयधीजनकत्वं तेन, तदृशायाम्-अविद्यादशायाम्,व्यवहारकाले-अबाध्यत्वग्रहकाले, बाधाभावात्-आत्मतत्त्वधीकरूपबाधकस्यासत्त्वात् अध्यस्तस्य सत्त्वेन विषयविसंवादाभावाद्वा,अविद्यावानात्मतत्त्वानभिज्ञो विषयोऽधिकारी यत्र तेऽविद्यावद्विषयास्तेषां भावोऽविद्यधिकारकत्वं तेन प्रामाण्यं फलकामनावत्तादृशपुरुषकर्तव्यताकार्थप्रतिपादकत्वादिरूपम्। इष्टापत्तिरेवेत्यत्र पद्येनैव हेतुमाह--न वर्ण इत्यादि । योगादयोपीत्यपिशब्देन हेतु(२)रुच्यते यतो मयि वर्णाद्यभावोऽतो द्वितीये इष्टापत्तिरित्यर्थः वर्णाद्यभावे हानादित्यन्तं हेतुः । ननुवर्णाश्रमेत्यादौ वर्णा-

(१) अविद्याकाले प्रमात्वेन गृह्यमाणप्रमाजनकत्वेन इति घपुस्तके ।

(२) हेतुत्वमुच्यते इत्यर्थः ।

वर्णाः ब्राह्मणत्वादयः । आश्रमाः ब्रह्मचर्यादयः । आचाराः स्नानशौचादयः । धर्माः ब्रह्मचर्यगुरुसेवादयः । अत्र द्वन्द्वद्वयगर्भषष्ठीतत्पुरुषेण वर्णानामाचारधर्माश्च आश्रमाणामप्याचारधर्माश्च लभ्यन्ते । धारणा

न्यायरत्नावली ।

चारधर्मनिषेधे आश्रमनिषेधो न लभ्यते तत्राह—द्वन्द्वेत्यादि । आश्रमाश्चाचारधर्माश्चेति द्वन्द्वोत्तरं षष्ठीतत्पुरुषेणेत्यर्थः । वर्णसम्बन्धिन आश्रमाचारादयो लभ्यन्ते तेषां मध्ये आश्रमपुरस्कारेण विहिता आचारधर्मा अपि लभ्यन्ते वर्णसम्बन्धित्वादित्याशयेनाह—**वर्णानामित्यादि** । आश्रमाणामपीत्यपि शब्दादाश्रमा अपि लभ्यन्ते इत्यर्थः । लभ्यन्ते निषेध्यत्वेन ज्ञायन्ते । द्वन्द्वद्वयेति पाठे तु धर्मपदेनैवाश्रमा ग्राह्याः, तेषामपि वर्णधर्मत्वसम्भवात् । धारणाध्यानशब्दयोर्बाह्यविषयसाधारण्येन धारणादिबोधकत्वसम्भवेऽपि प्रकृतपद्यस्य तत्त्वनिष्ठपुरुषक(१)र्तृकत्वेनात्मधारणाध्यानयोरेव उक्तपुरुषे प्रसक्तेः तत्पर(२)त्वमेवाह—धार-

नारायणी ।

श्रमयोराचारधर्मनिषेधे आश्रमानपेधो न लभ्यते तत्राह—द्वन्द्वेति । आश्रमाश्चाचाराश्च धर्माश्चेति द्वन्द्वोत्तरषष्ठीतत्पुरुषेणेत्यर्थः । वर्णसम्बन्धिन आश्रमाचारादयो लभ्यन्ते तेषां मध्ये आश्रमपुरस्कारेण विहिता आचारधर्मा लभ्यन्ते सम्बन्धित्वाविशेषादित्याशयेनाह—वर्णानामित्यादि । लभ्यन्ते निषेध्यत्वेन ज्ञायन्ते । द्वन्द्वद्वयेति पाठे तु धर्मपदेनैव आश्रमा अपि बोध्याः, आश्रमस्यापि वर्णधर्मत्वसम्भवात् । तथाच वर्णाश्चाश्रमाश्चेति वर्णाश्रमौ,आचाराश्च धर्माश्चाचारधर्माः वर्णाश्रमयोराचारधर्माविति विग्रहः।शास्त्रस्यात्मपरत्वात्तत्रोक्तधारणादिपदार्थमात्मपरत्वेन योजयति—धारणेत्यादि । स्थैर्यं स्थिरीकरणं यत्नपूर्वकपरमात्माकारप्रत्ययप्रवाह इति युवात् । बाह्यविषयपरित्यागेनेत्यंशेन प्रत्याहारपूर्वकत्वं धारणाया उक्तं बाह्यविषयासम्प्रयोगस्य योगसू-

(१)—पुरुषवक्तृकत्वेनेति घपुस्तके ।

(२) तत्पुरुषत्वमेवेति गपुस्तके ।

ब्रह्मणि बाह्यविषयत्यागेन मनसस्स्थैर्यम् । ध्यानं परमात्मचिन्तनम् । योगश्चित्तवृत्तिनिरोधः । आदिशब्देन श्रवणमननादयो गृह्यन्ते । सर्वेषां ज्ञानोत्तरकाले असत्त्वे हेतुमाह—अनात्माश्रयाहंममाध्यासहानादिति । अनात्मा आत्मविरोधिनी अविद्या तदाश्रयस्तदुपादानो योऽहङ्काराहंममकाराद्यध्यासस्तस्य मूलस्यापि तत्त्वज्ञानेन हानात् तत्प्रयुक्तवर्णाश्रमादिव्यवहारो नास्तीत्यर्थः ॥ २ ॥

वर्णाश्रमादिव्यवहारस्य मिथ्याज्ञानमूलत्वेन मिथ्यात्वं दृढयितुं तद्व्यतिरेके सुषुप्तौ तद्व्यतिरेकमाह—

न्यायरत्नावली ।

णेत्यादि । आत्मविरोधिनी—पूर्णानन्दोऽहमित्यादिव्यवहारविरोधिनी ॥ २ ॥

तृतीयपद्यमवतारयति—वर्णेत्यादि । व्यवहारस्याभिलाषप्रवृत्त्यादेः मिथ्याज्ञानमूलकत्वेन 'अहं ब्राह्मण' इत्यादिभ्रमनिमित्तकत्वेन । मिथ्यात्वं—मिथ्याविषयत्वम् । तद्व्यतिरेके—मिथ्याज्ञानव्यतिरेके सति । तद्व्यतिरेकं—वर्णाश्रमादिव्यवहारव्य-

नारायणी ।

त्रेषु प्रत्याहारत्वोक्तेरिति संक्षेपः । धारणासाध्यं ध्यानं लक्षयति—परमात्मेति । यत्नमनपेक्ष्यैव परमात्माकारप्रत्ययप्रवाह इत्यर्थः । ध्यानसाध्यं योगं लक्षयति—योग इति । चित्तस्य सत्त्वप्राधान्येन सूक्ष्मपञ्चभूतारब्धस्यान्तःकरणस्य या वृत्तयः विषययोगपरिणामरूपास्तासां निरोधः प्रतिलोमपरिणामेनोपशमः । अतिरोहितार्थमन्यत् ॥ २ ॥

तृतीयपद्यमवतारयति—वर्णेत्यादि । मिथ्येति । 'अहं ब्राह्मण' इत्यादिभ्रममात्रकारणकत्वेन, मिथ्यात्वं बाधितार्थत्वम् । तद्व्यतिरेके-मिथ्याज्ञानव्यतिरेके सति(१) (तद्व्यतिरेकम्-) वर्णाश्रमादिव्यवहारव्यति

(१)—सति वर्णाश्रमादिव्यवहारव्यतिरेके न मातेत्यादिः पाठ आसीत् तं संशोध्य प्रपूरितोऽस्माभिरिति ज्ञेयम् ।

न माता पिता वा न देवा न लोका
न वेदा न यज्ञा न तीर्थं ब्रुवन्ति ।
सुषुप्तौ निरस्तातिशून्यात्मकत्वा-
त्तदेकोऽवशिष्टः शिवः केवलोहम् ॥ ३ ॥

माता जनकस्त्री । पिता जनकः पुमान् । देवा इन्द्रादयः आराध्याः । लोकास्तदाराधनफलानि स्वर्गादीनि । वेदाः अलौकिकहिताहितसाधनताप्रतिपादकानि ब्रह्मप्रतिपादकानि च प्रमाणवाक्यानि । यज्ञाः स्वर्गादिसाधनीभूता ज्योतिष्टोमादयः । तीर्थं यज्ञसाधनीभूतः कुरुक्षेत्रादिदेशः । एवं पापकर्मसाधनान्यप्युपलक्षणीयानि । सर्वेषां देहाभिमानमूलकत्वात् तदभावे

न्यायरत्नावली ।

तिरेकम् । न मातेत्यादि । पूर्वपद्यात् मे इत्यस्यानुषङ्गात् , न मे मातेत्यादि सुषुप्तौ न ब्रुवन्ति तस्मादेकोऽहमित्यर्थः । ननु (१)देहादिव्यवहारस्य कथं देहाभिमानमूलकत्वम् तत्राह—सर्वेषामिति । मत्सेव्यत्वादिरूपममत्वाध्यासाविशिष्टानां सर्वेषामित्यर्थः । स्वतो-देहाभिमानं विना । सम्बन्धाभावात्--ममत्वाध्याससम्बन्धाभावात् । अविद्यमानता—ममत्वविशिष्टरूपेण व्यवहारस्य सामान्यस्याभावो युक्त इति भावः । वस्तुतस्तु वर्णाश्रमादिव्यवहारस्य मिथ्याज्ञानमूलकत्वेनेति विवरणादिव्यवहारस्य सर्वस्य मनोऽवच्छिन्नचिन्निष्ठत्वेन 'अहमि'तिमिथ्याज्ञानमूलत्वेनेत्यर्थः । एवं च मे इत्यस्याननुषङ्गेऽपि न क्षतिः । सर्वे-

नारायणी ।

रेकम् । न मातेत्यादौ पूर्वपद्यान्मे इत्यनुषङ्गः, मे मातेत्यादिसुषुप्तौ न ब्रुवन्ति तत्तस्मादेकोऽवशिष्टः अद्वितीयोहमित्यर्थः । सर्वेषामिति । मत्से-

(१) देवादिव्यवहारस्य इति घपुस्तके ।

स्वतस्सम्बन्धाभावादविद्यमानतत्यर्थः । तथा च सुषुप्तिं प्रकृत्य श्रुतिः-'अत्र पिताऽपिता भवति माताऽमाता देवा अदेवा वेदा अवेदा यज्ञा अयज्ञास्तेनोऽस्तेनो भवति भ्रूणहाऽभ्रूणहा चाण्डालोऽचाण्डालः पौल्कसोऽपौल्कसश्रमणोऽश्रमणस्तापसोऽतापसोऽनन्वागतं पुण्येन

न्यायरत्नावली ।

षामित्यादि । सर्वव्यवहाराणाम् अहङ्काराध्यासमूलकत्वादित्यर्थः । तदभावे—अहङ्काराध्यासाभावे, स्वतः अहङ्कारानवच्छिन्नचिति, सम्बन्धाभावात्-सर्वव्यवहारसम्बन्धाभावात् । अत्र-सुषुप्तौ । अपिता-ममत्वविशिष्टपितृत्वादिरूपेणाव्यवहार्यः । एवमग्रेऽपि । चाण्डालो-ब्राह्मण्यां शूद्रेणोत्पन्नः । पौल्कसः—क्षत्रियायां जातः । श्रमणः-परिव्राट् । पुण्यपापयोर्व्यवहारहेतूत्पादकत्वात् उपाधिप्रयुक्तभेदस्य मिथ्यात्वेन सच्छून्यत्वाद्व्यवहाराभाव इत्याह—अनन्वागतं पुण्येनेति । सुषुप्तौ पुण्येनानन्वा-

नारायणी ।

व्यत्वादिरूपममत्वाध्यासविशिष्टानां सर्वेषामित्यर्थः । स्वतः-देहाभिमानं विना, सम्बन्धाभावात्-ममत्वाध्यासवैशिष्ट्याभावात् । अविद्यमानसमताममत्वविशिष्टरूपेण व्यवहार्यत्वं तथाच ममत्वाध्यासं प्रति स्थूलदेहाध्यासस्य हेतुत्वात् तदभावे ममत्वविशिष्टरूपेण व्यवहारसामान्याभावो युक्त इति भावः । अथवा वर्णाश्रमादिव्यवहारस्य सर्वस्य मनोऽवच्छिन्नचिन्निष्ठत्वेनाहमिति मिथ्याज्ञानमूलकत्वेनेत्यर्थः । एवं च मे इत्यस्यानुषङ्गेऽपि न क्षतिः । सर्वेषामिति सर्वव्यवहाराणामहङ्काराध्यासमूलकत्वादित्यर्थः । तदभावे-अहङ्काराध्यासाभावे । स्वतः-अहङ्कारानवच्छिन्नचिति। सम्बन्धाभावात्-सर्वव्यवहारसम्बन्धाभावात्। अत्र-सुषुप्तौ, अपिता-ममत्वादिविशिष्टपितृत्वादिरूपेणाव्यवहार्यः । एवमग्रेऽपि। चाण्डालो ब्राह्मण्यां शूद्राज्जातः, पौल्कसः क्षत्रियायां निषादाज्जातः, निषादस्तु शूद्रायां ब्राह्मणाज्जातः, श्रमणः परिव्राट्, तापसः वानप्रस्थः, अनन्वागतम् असंस्पृष्टम्, पुण्येन शास्त्रविहितकर्मजादृष्टेन, पापेन विहिताकरणप्रतिषिद्धकरणजादृष्टेनः कुत इत्याकाङ्-

नानन्वागतं पापेन तीर्णो हि तदा सर्वाञ्छोकान् हृदयस्य भवती'त्याद्या अभिमानाभावे सर्वानर्थनिवृत्तिमनुवदन्ति। ननु सर्वव्यवहाराभावे शून्यतैव स्यात्। नेत्याह—निरस्तातिशून्यात्मकत्वादिति। निरस्तम् अतिशून्यात्मकत्वं यस्मात्तत्तथा। भावप्रधानो निर्देशः। तस्य सुषुप्तिसाधकत्वात्पुनरुत्थानानुपपत्तेश्च। 'अविनाशी वा अरे अयमात्माऽनुच्छित्तिधर्मा मात्रासंसर्गस्त्वस्य भवति, यद्वै तन्न पश्यति पश्यन्वै तन्न प-

न्यायरत्नावली।

गमः असम्बन्धो जीवेष्विसर्थ। अत्र हेतुमाह--तीर्णो हीत्यादि। तदा-सुषुप्तिकाले। शोकान्-व्यवहारविषयतत्साधनीभूतार्थान्, संस्कारान्यकार्यरूपार्थानिति यावत्। धर्मिणो हेतुत्वास्वीकारमते धर्मस्य हेतुत्वलाभायाह-भावप्रधान इति। शून्यात्मत्मकतानिरासे हेतुमाह—सुषुप्तीत्यादि। मात्रासंसर्गः-स्थूलकार्यासम्बन्धः। अस्य—सुषुप्तात्मनः। यद्वा इत्यादि। तत्

नारायणी।

क्षायामाह—तीर्णो हीति। यस्मात्तस्मात्सुषुप्तिकाले हृदयस्य हृदयस्थायाः बुद्धेः सम्बन्धिनः सर्वाञ्छोकान् पापपुण्यहेतुसंस्कारान् तीर्णः अतिक्रान्तो भवतीत्यर्थः। उद्बोधाभावादिति भावः। धर्मिणो हेतुत्वास्वीकारमते धर्मस्य हेतुतालाभायाह-भावेति। तथाच निरस्तातिशून्यात्मकत्वादित्यर्थः। कथमस्मादतिशून्यात्मकत्वनिरासस्तत्राह—तस्येत्यादि। तस्य ब्रह्मणः सुषुप्तिसाधकत्वात्। अन्यथोत्थितस्य स्मृत्यनुपपतेरित्युक्त्वादिति भावः। पुनरुत्थानेति। सुषुप्त्यनन्तरं जाग्रदमानित्वानुपपत्तेरित्यर्थः। उत्थातुरप्यनङ्गीकारादिति भावः। न केवलं युक्तिगम्यमेवात्मसत्त्वं तदानीमपि तु श्रुतिगम्यमपीत्यभिप्रेत्य श्रुतिमुदाहरति—अविनाशीति। अविनाशित्वे हेतुमाह--अनुच्छित्तिधर्मेति। न विद्यते उच्छित्तिर्विनाशो यस्य तादृशो धर्मः सच्चिदानन्दत्वादिरूपो यस्येत्यर्थः। मात्रेति। मीयन्ते इति मात्रा विषयास्तैरसम्बन्धः अस्य आत्मनः। श्रुत्यन्तरमाह—यद्वै इति। यत् किञ्चित् वै प्रसिद्धं तत्तत्र सुषुप्तौ न पश्यति न

इयति, न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वात् न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येदि'त्यादिश्रुतिभ्यश्चात्मचैतन्यस्य न सुषुप्तौ शून्यतेत्यर्थः। निराकृतमप्येतत्पुनरपि स्थूणानिखननन्यायेन निराक्रियते। यद्वा निरस्तमशनायाद्यतीतम्, अद्वितीयमति-

न्यायरत्नावली।

तदा सुषुप्तिकाले। पश्यति नेति। यद्वै प्रसिद्धं पश्यन् चाक्षुषवृत्त्युपलक्षितचिद्रूपेण प्रकाशमान एव(१) तादृशचाक्षुषवृत्त्यभाववान्। उक्तप्रकाशमानत्वे हेतुमाह—न हीत्यादि। उक्ताभावहेतुत्वे मानमाह—न तु तदित्यादि। ततश्चिद्रूपात् विभक्तं स्थूलरूपापत्तिप्रयुक्तभेदविशिष्टं तत् तदा न त्वास्ति। यदित्यव्ययम् येनेत्यर्थः उत्तरवाक्यस्थो यच्छब्दो न तच्छब्दापक्षः। स्व-

नारायणी।

साक्षात्करोति तत् स्वयंज्योतित्वाभावनिबन्धनं न। कुतः? 'पश्यन्व तन्न पश्यति' तत्तत्र पश्यन्स्वयंज्योतिःस्वरूप एव सन्न पश्यतीति वै प्रसिद्धं प्रमाणसामान्यव्यापाराभावात्। किं विनिगमकं? तत्राह—नहीति। द्रष्टुः कूटस्थस्य चिन्मात्रस्य स्वरूपभूता या दृष्टिस्तस्याः हि यस्मात् विपरिलोपो न विद्यते तत्र हेतुमाह—अविनाशित्वादिति। विविधो नाशो यस्मात्तद्विनाशि परिणामि, न विनाशि अविनाशि तस्य भावस्तस्मादपरिणामित्वात् इत्यर्थः। न पश्यतीत्यत्र हेतुमाह—नत्विति। तत्तदा सुषुप्तौ। तुशब्दो हेत्वर्थः। यस्मात्ततः कूटस्थचैतन्यात् द्वितीयं प्रमातृभावापन्नम् अन्यत् प्रमाणादिकं विभक्तं स्वरूपाद्विलक्षणं प्रमेयं तमः प्रधानं नास्ति यत्प्रमेयं प्रमाता जीवः करणेन पश्येदित्यर्थः। आशङ्कानिरासाभिप्रायेण हेतुव्याख्यानं शब्दस्वारस्यसिद्धं न भवतीत्यभिप्रेत्य न मातेत्यादिप्रतिज्ञातार्थोपपादनपरत्वेन हेतुं योजयति—यद्वेति। 'धार्मिकोयं कलहान्निरस्तः' इत्यादाविव निरस्तशब्दस्य राहि-

(१) प्रकाशमान एव न पश्यति चाक्षुषवृत्त्यवच्छिन्नचिद्रूपाभावात्'नाह दृष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत्' इति श्रुतिशेषः। अयं पाठो घपुस्तके न्यायरत्नावल्यां वर्तते। गपुस्तके तु सिद्धान्तबिन्दावेव पूर्णा श्रुतिरस्ति।

शून्यं यद्ब्रह्म तदात्मकत्वात्। तथा च श्रुतिः—'यदा वै पुरुषः स्वपितिनाम सता सोम्य तदा सम्पन्नो भवति तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तर'मिति। तेन जगत्कारणीभूतसर्वज्ञसर्वशक्तिपरिपूर्णानन्दबोधरूपेण ब्रह्मणा सहैकत्वादसंसार्येव जीव इति सिद्धम् ॥ ३ ॥

एवं तावत् त्रिभिः श्लोकैः वादिविप्रतिपत्तिनिराकरणपूर्वकं त्वम्पदार्थो निर्धारितः। सम्प्रति तत्पदार्थ-

न्यायरत्नावली।

पितिः—सुषुप्तः, सता—ब्रह्मणा, सम्पन्नः—एकीभूतः, मनआद्यभिमानप्रयुक्तभेदशून्य इति यावत्। प्राज्ञेन—ब्रह्मणा, सम्परिष्वक्तः—उक्तभेदशून्यः। एकत्वादुपाधिप्रयुक्तभेदस्य मिथ्यात्वेन तच्छून्यत्वात् ॥ ३ ॥

नारायणी।

त्यार्थत्वमाह—निरस्तेति। 'एकाक्ष्यमतिशून्य' इत्यादाविवातिशून्यशब्दस्य द्वितीयाभावार्थत्वमाह—अद्वितीयमिति। अति अतिशयेन शून्यं रहितं स्वद्वितीयसर्वशून्यमित्यर्थः। तदात्मकत्वात्-तदभिन्नत्वान्न ममत्वाध्यासपूर्वको मातृत्वादिबन्ध इति भावः। प्रमाणमाह—तथेति। यदा यस्मिन्समये स्वपितिनाम सुषुप्तः सता ब्रह्मणा तदा सुषुप्तौ सम्पन्नः एकीभूतः। एकीभावेनान्यद्वृष्टिरूपबन्धाभावे दृष्टान्तमाह—तद्यथेति। तत्तत्र व्यामिश्रीभावे यथा प्रियया मनोहरणसमर्थया स्त्रिया सम्परिष्वक्तः सम्यक् परिष्वक्तो व्यामिश्रीभावापन्नः कामुकः सम्भोगसुखमनुभवन् स्वस्माद्बाह्यं बहिर्भूतं किञ्चन किञ्चिदपि वस्तु न वेद न जानाति, यथाऽयं दृष्टान्तः एवमेवायं जलचन्द्रादिवत्कार्यकारणादिषु प्रविष्टः क्षेत्रज्ञः पुरुषः उपाधिविलयात् प्राज्ञेन अविद्यासाक्षिणाऽऽत्मना सम्परिष्वक्तोऽत्यन्तमेकीभूतः सन्सर्वात्मना बाह्याद्यभिमानाभावात् बाह्यं मेयादि आन्तरं प्रमातृप्रमितिरूपं न जानातीत्यर्थः। तेन-एकीभावदृष्टान्तादिना स्वतो निरभिमानित्वाद्युपपादनेन ॥ ३ ॥

चतुर्थपद्यमवतारयति—एवमिति। तथैवेति। तत्त्वमसीत्याद्युक्ताभेदस्य सिद्धये चार्वाकादिमतनिराकरणेन त्वंपदार्थो यथाऽकर्त्रभोक्तात्मना निर्धा-

स्तथैव निर्धारणीयः । (१)तत्र निराकार्या वादिविप्रतिपत्तयः प्रदर्श्यन्ते । ननु न ब्रह्मणा सह जीवस्यैक्यमुपपद्यते । तथा हि सच्छब्दवाच्यं जगत्कारणं ब्रह्म 'सदेव सोम्येदमग्र आसीदि'त्यादिवाक्येन प्रतिपादितम् । जगत्कारणं च प्रधानमचेतनमिति साङ्ख्याः । पशुपति-

न्यायरत्नावली ।

चतुर्थपद्यमवतारयति—ननु न ब्रह्मणेत्यादि । प्रधानं साम्यावस्थापन्नं सत्त्वादिगुणत्रयम् । पृथिव्यादिकार्यं सुखदुःखमोहात्मकम् , पुरुषविशेषान्प्रति तथा भासमानत्वात् । तथा च सुखादिपरिणामयोग्यं गुणत्रयं पृथिव्याद्युपादानं कल्प्यते न तु

नारायणी ।

रितस्तथा साङ्ख्यादिमतनिराकरणेन तत्पदार्थोऽपि विधेयभूतः केवलात्मना निर्धारणीय इत्यर्थः । वादिविप्रतिपत्तिमुत्थापयति—नन्विति । सद्भावस्यैव-सत्त्वस्यैव । कर्तृजन्यत्वव्याप्यः कार्यत्वहेतुर्न ब्रह्मणोऽनुमापकः सम्भवति, तत्र सकर्तृकत्वमात्रसाधनेऽदृष्टद्वारककृतिमादाय जीवेन सोपादानकत्वसाधने तु प्रधानेन सिद्धसाधनादर्थान्तराच्च, तस्मात् श्रुतिरेव ब्रह्मणि मानमिति वाच्यं तदपि नेत्याह—तथाहीति । 'सदेव सोम्येदमग्र आसीदि'त्यादिवाक्येन प्रतिपादितं सच्छब्दवाच्यं जगत्कारणं न ब्रह्मेत्यन्वयः । आदिना 'सन्मूलाः सोम्येमाः सर्वाः प्रजा' इत्यादिवाक्यपरिग्रहः । सच्छब्दवाच्यं सामान्यतः जगत्कारणं जगदुपादानं सदेवेति । अग्रे गुणत्रयसाम्यावस्थायाम् इदं नामरूपाभ्यां व्याकृतं सदेवासीत् परिणामिनित्यं प्रधानात्मनाऽऽसीदित्यर्थः । अत एव नीलोत्पलमित्यादिवत् इदं सदेवासीदिति सामानाधिकरण्यमप्युपपद्यते, जडयोरेव कार्यकारणयोरभेदसम्भवादिति संक्षेपः । प्रधानं साम्यावस्थोपलक्षितं गुणत्रयम् , अचेतनं जडमिति साङ्ख्यमतनिष्कर्षः । एतच्च न सम्यक् श्रुतियुक्तिविरोधात् । तथाहि जडस्य स्वतः प्रवृत्त्ययोगात्प्रवर्तकश्चेतनोऽसर्वज्ञजीवाद्भिन्न आवश्यकः, स च 'भूयः सृष्ट्वा पतयस्त्वथेशः सर्वाधिपत्यं कुरुते महात्मे'तिश्रुतेः पशुपतिरेवेति पाशुपतमतमवतारयति—पशुरेवेति ।

(१) तदर्थं निराकार्येति कपुस्तके ।

रेव जगत्कारणम्। स च चेतनोऽपि जीवाद्भिन्नस्स(१) उ-

नारायणी।

यदा तमस्तत्र दिवा न रात्रिर्न सन्न चासन् शिव एव केवलः।
तत्सवितुर्वरेण्यम्,
प्रज्ञा च तस्मात्प्रसृता पुराणी।
स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः।
इत्यादिश्रुतेरिति भावः।

चेतनस्तु द्विधा प्रोक्तो जीव आत्मेति च प्रभो।
जीवा ब्रह्मादयः प्रोक्ता आत्मैकस्तु जनार्दन॥

इत्यादिवाक्येन वैष्णवसाधितं जीवकोटिप्रवेशं वारयति—स चेति। पशूनां जीवानां पतिश्चेत्यर्थः। जीवाद्भिन्न इति। माण्डूक्यादौ 'एष सर्वेश्वर एष सर्वज्ञ एषोन्तर्यामी'त्यादिना जीवकोटिप्रवेशनिरासादिति भावः। न च तदन्यपरमेवेति वाच्यम्। 'शिवमद्वैतं चतुर्थं मन्यन्त' इत्युपसंहारविरोधात्। तत्र तत्र शिवपदस्य शोधितत्वंपदार्थपरत्वमत-निरासायाह—तदिति। जीवोपास्य इत्यर्थः। 'शिव एको ध्येय' इत्यादिश्रुत्या ध्येयत्वमात्रोक्तेः ध्यातृजीवाद्भिन्न एव शिवपदार्थ इति भावः।

(२)+उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम्।
ध्यात्वा मुनिर्गच्छति विश्वयोनिं समस्तसाक्षिं तमसः परस्तात्॥
इत्यादिकैवल्यश्रुतेः

यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः।
तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति॥

इति श्वेताश्वरश्रुतेश्च+। श्रुतिसमन्वयोऽपि तत्रैव। शिव एको ध्येयः शिवङ्करः सर्वमन्यत्परित्यज्य [समाप्ताथर्वशिखेति] श्रुतिसमाप्तौ शिव-परत्वेनोपसंहारात्। शिवपदप्रतिपाद्यस्तु हररुद्रेशानादिपदबोध्य एव, आनुशासनिके 'शिव एव भगवानीश' इत्युपक्रम्य--

सोसृजद्दक्षिणदङ्मुखाद्ब्रह्माणं लोकसम्भवम्।
वामपार्श्वात्तथा विष्णुं लोकरक्षार्थमीश्वरम्॥
युगान्ते चैव सम्प्राप्ते रुद्रं प्रभुरथासृजत्।

इत्यादिना मूर्त्तित्रयजनकत्वोक्तेः। तथाच वैष्णवोक्तवाक्यविषयो मू-

(१) जीवस्तदुपास्य इति कखपुस्तकयोः नारायण्यां च।
(२) +...+ अयं पाठश्चिह्नितो नास्ति खपुस्तके।

नारायणी।

त्रित्रयगतो रुद्र एवेति न कोऽपि विरोधः (१)इति शैवमतनिष्कर्षः। (२)*न चैतदन्यपरं वक्तुं शक्यम्।

तस्य साधारणी मूर्त्तिः साम्बा चन्द्रार्द्धशेखरा।
तमेव सततं विष्णुब्रह्माद्याश्च सुरेश्वराः॥
ध्यायन्ति बन्धनाशाय जनानां हितकाम्यया।

इत्यादिपुराणवाक्यैरुमापतेः पशुपतेरेव शिवादिपदैर्व्युत्पादनात्। अत एव सौरपुराणे—

ब्रह्माण्डमेतत्सकलं ब्रह्मणः क्षेत्रमुच्यते।
सहस्रकोट्यः सन्ति ब्रह्माण्डास्तिर्यगूर्ध्वगाः॥
ब्रह्माणो हरयो रुद्रास्तत्र तत्र व्यवस्थिताः।
आज्ञया देवदेवस्य महादेवस्य शूलिनः॥
ब्रह्माण्डानामसङ्ख्यानां ब्रह्मविष्णुहरात्मना।
उद्भवे प्रलये हेतुर्महादेव इति श्रुतिः॥

इति शैवमतनिष्कर्षः। तदेतत्पाञ्चरात्रत्वेन प्रसिद्धा वैष्णवा न सहन्ते। तथाहि संहारकातिरिक्तशिवे मानाभावात्*। संहारकश्च नारायणात्मजः। 'नारायण एवाग्र आसीदि'त्युपक्रम्य पुनरेव 'नारायणः सोन्यत्कामो मनसा ध्यायते तस्य ध्यानान्तरस्थस्य ललाटात् त्र्यक्षः शूलपाणिः पुरुषोऽजायत विभ्रच्छ्रियं सत्यं ब्रह्मचर्यं तपो वैराग्यं ज्ञानमैश्वर्यमि'ति महोपनिषदि,

ब्राह्मे रात्रिक्षये प्राप्ते विष्णोरमिततेजसः।
प्रसादात्प्रादुरासीत्तत् पद्मं पद्मनिभेक्षण॥
ततो ब्रह्मा समभवत् तस्यैव च प्रसादतः।
अहक्षये ललाटाच्च सुतो देवस्य वै तथा॥
क्रोधाविष्टस्य संजज्ञे रुद्रः संहारकारकः।
एतौ च विबुधश्रेष्ठौ प्रसादक्रोधजावुभौ॥
तदादेशितपन्थानौ सृष्टिसंहारकारकौ।
निमित्तमात्रं तावत्र सर्वप्राणिवरप्रदौ॥

इति महाभारते मोक्षधर्मेऽपि नारायणात्मजत्वोक्तेः। यश्च यदात्म इत्यादिवाक्यबोधितः स च नारायण एव, 'सर्वे वेदा यत्पदमामनन्ति' इत्यादिश्रुत्या,

(१) इति शैवमतनिष्कर्ष इति पाठो नास्ति कपुस्तके।

(२) *...*चिह्नितः पाठो नास्ति खपुस्तके।

पास्य एवेति पाशुपताः। भगवान्वासुदेव ईश्वरो जगत्कारणम्। तस्मादुत्पद्यते सङ्कर्षणाख्यो जीवः। तस्मान्मनः प्रद्युम्नः। ततोऽहङ्कारोऽनिरुद्धः। तेन कार्यत्वाज्जीवस्य तेन सह ब्रह्मणो वासुदेवस्यात्यन्तभेद

न्यायरत्नावली।

ब्रह्म, तस्यापरिणामित्वात्। एकस्वभावस्य त्रिविधस्वभावकार्यजनकत्वानुपपत्तेरिति भावः। जीवः-सर्वजीवाभिमानी। मनः-सर्वमनोऽभिमानी। अहङ्कारः—सर्वाहङ्काराभिमानी। तेन ब्रह्मणो जीवादिरूपजगत्कारणत्वेन नात्यन्ताभेद इति। भेदाभेदौ तु

नारायणी।

वेदे रामायणे चैव पुराणे भारते तथा।
आदावन्ते च मध्ये च हरिः सर्वत्र गीयते॥

इत्यादिमहाभारतवाक्यादिना सर्वोत्कर्षवत्प्रतिपादकानां शब्दानां विष्णुपरत्वसमर्थनात्। तस्माच्छ्रुतिस्मृतिप्रतिपाद्यं जगत्कारणं विष्णुरेव स च ब्रह्मनारायणहरिवासुदेवादिशब्दैः प्रतिपाद्य इति वैष्णवमत मवतारयति—भगवानिति।

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः।
वैराग्यस्याथ मोक्षस्य षण्णां भग इतीङ्गना॥

इत्युक्तषड्गुणपरिपूर्णः 'यस्माद्यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिनश्चेत्यादिश्रुतिप्रतिपादितः। वासुदेवः वसन्ति सर्वाणि भूतानि यस्मिन्निति वासुः, स्वसृज्यपरिपाल्यसंहार्यसर्वाधिष्ठानम्, दीव्यतीति देवः स्वप्रकाशरूपः स चासौ देवश्चेति वासुदेवः 'सर्वतः पश्यति सर्वतः शृणोती'त्युपक्रम्य 'यमप्येति भुवनमि'त्यादिनृसिंहतापिन्याद्युक्तः ईश्वरः सर्वभूतनियन्ता।

भीषास्माद्वातः पवते भीषोदेति सूर्यः
भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः॥

इतिश्रुतिप्रतिपादितः। जगत्कारणं जगदुपादानं निमित्तं च यस्मात् स्वमहिम्ना 'सर्वान्लोकान्सर्वान्देवान्सर्वानात्मनः सर्वाणिभूतानि विरामयत्यजः संसृजति वासयतो'तिश्रुतिभ्य इति भावः। जीवः सर्वजीवाभिमानी, मनः सर्वमनोभिमानी, अहङ्कारः सर्वाहङ्कारा-

इति पाञ्चरात्रिकाः । परिणामिनित्यः सर्वज्ञो भिन्ना-

न्यायरत्नावली ।

कालभेदेन स्तः । यदाहुः—

आमुक्तेर्भेद एव स्याज्जीवस्य च परस्य च ।
मुक्तस्य तु न भेदोऽस्ति भेदहेतोरभावतः ॥ इति ॥

परिणामिनित्यः—अन्यथान्यथा च परिणममानोऽपि अनुच्छिन्नस्वभावो जगतः ब्रह्मपरिणामत्वादेव सत्यत्वम् । कारणसमानसत्ताकं कार्यं तात्त्विकोऽन्यथाभावो वा परिणाम इति लक्षणात् । भिन्नाभिन्न इति । जीवेन जगता च सह तस्य भेदा-

नारायणी ।

भिमानी । तेन—ब्रह्मणो जगज्जीवादिकारणत्वेन । अत्यन्ताभेद इति । भेदाभेदौ कालाभेदेन स्त इति भावः । यदाहुः—

आमुक्तेर्भेद एव स्याज्जीवस्य च परस्य च ।
मुक्तस्य तु न भेदोस्ति भेदहेतोरभावतः ॥

इतिवैष्णवमतनिष्कर्षः । एतदपि जैना न सहन्ते । तथाहि शिवविष्ण्वादिशब्दानां शुद्धबुद्धसच्चिदानन्दैकमात्रपरत्वात् । तत्र पदार्थो द्विविधः, आत्माऽनात्मा च । तत्रानात्मा देहेन्द्रियादिः स्फुट एव । आत्मा तु त्रिविधः, परमात्मा अन्तरात्मा बहिरात्मा चेति । तत्र परमात्मा सच्चिदानन्दघनः शुद्धो बुद्धोऽबाह्यो ब्रह्म विष्णुशिवादिपदव्यपदेश्यो निर्गुणः । अन्तरात्मा तु परमानन्दानुभविता सर्वोप्याधिकारिकवर्गः आस्तिकनास्तिकग्रन्थेषु प्रसिद्धो व्यासः जिनादिः । बहिरात्मा तु देहाभिमानी कर्मवशगः शरीरपरिणामः सावयव इति । सोयमात्मभेदो जगच्च प्रलये ब्रह्मानन्यत्वं प्राप्य सर्गकाले ब्रह्मण एव प्रादुर्भवतीति ब्रह्मैव सर्वस्य परिणामीति जैनमतमवतारयति—परिणामीति । एतावन्मात्रमादाय मूले जैनत्रिदण्डिनोरैकमत्येन निर्देशः । समुद्रस्य तरङ्गादिवद्ब्रह्मण एव सर्वपरिणाम इति द्वाभ्यामपि प्रतिपादनादिति दिक् । परिणामिनित्यः जगज्जीवात्मना परिणममानोऽपि अनुच्छिन्नस्वरूपः, जगतो ब्रह्मपरिणामित्वादेव सत्यत्वं सदुपादानकस्य सत्यत्वनियमात् कारणसमसत्ताकोन्यथाभावः परिणाम इति लक्षणाच्चेति भावः । भिन्नाभिन्न इति । कार्यरूपेण भिन्नः कारणरूपेणाऽभिन्न इत्यर्थः तदुक्तम्—

भिन्न इति जैनाः त्रिदण्डिनश्च । नास्ति सर्वज्ञत्वाद्युपेतं ब्रह्म । आम्नायस्य क्रियार्थपरत्वेन तत्र तात्पर्याभावात् । किन्तु वाग्धेन्वादिवत्सर्वज्ञत्वादिदृष्ट्या जग

न्यायरत्नावली ।

भेदौ । तथा चाभेदमादाय 'तत्त्वमसि, इदं सर्वं यदयमात्मा' इत्यादिश्रुतयः भेदमादाय 'यो विज्ञाने तिष्ठन्, यः पृथिव्यां तिष्ठन्' इत्यादिश्रुतयः प्रवर्तन्ते । तत्त्वज्ञानकर्मभ्यां भेदस्य लिङ्गशरीरस्य च निवृत्तिर्मोक्ष इति भावः । सर्वज्ञत्वादीति । सर्वज्ञत्वजगत्कारणत्वादीत्यर्थः । आम्नायस्य—यतो वेत्यादिश्रुतेः । क्रियार्थपरत्वेन—उपासनाविधिपरत्वेन । तत्र—सर्वज्ञत्वादिमति । तात्पर्याभावात्—अवान्तरतात्पर्यस्याभावात् । वाग्धेन्वादिवत्—

नारायणी ।

कार्यरूपेण नानात्वमभेदः कारणात्मना ।
हेमात्मना यथा भेदः कुण्डलाद्यात्मना भिदा ॥

इति । तथाच जीवेन जगता च सह भेदाभेदयोः सत्त्वाद् भेदवादोऽपि तत्र तत्र परस्परमविरोधेनैव प्रमाणमिति तेषामभिप्रायः । परन्तु रामानुजेन मकारार्थस्य जीवकोटौ प्रवेशाङ्गीकाराज्जीवपरमात्मनोः पितापुत्रन्यायेनैवाभेदाङ्गीकाराच्च जैनादप्यपकर्षो ज्ञातव्यः । 'मकारेण परब्रह्मान्विच्छेदि'ति नृसिंहतापिन्यादिश्रुतिविरोधात् । अत एव मूले पञ्चादुक्तिः (१ एतदपि जैमिनीया न सहन्ते तथाहि-परमात्मनि मानाभावात्, अनुमानस्य साङ्ख्यादियुक्तरीत्या निरासात्, उपनिषदां चार्थवादत्वेन स्वार्थपरत्वाभावात् तत्राप्रमाणत्वात्, अतो जगदुपादानं प्रधानं वा परमाणवो वा निमित्तं च कर्मद्वारा जीव एवेत्यभिप्रायकं जैमिनिमतमवतारयति—नास्तीति । आदिपदाज्जगत्कारणत्वादिधर्मपरिग्रहः । आम्नायस्य-वेदस्य क्रियापरत्वेन-फलवद्विधेयार्थतात्पर्यकत्वेन । तत्र सिद्धार्थे ब्रह्मणि सर्वज्ञत्वादिनाभमते, तात्पर्याभावात्-तत्प्रमाशक्तत्वाभावात् । वाग्धेन्वादिवत्-धेन्वादिदृष्ट्या वागादिरिव । आदिपदा'न्मनो ब्रह्मे'त्यादिपरिग्रहः । जगत्कारणं-जगदुपादानं निमित्तं वा । परमाण्वादीत्यादिपदात्प्रधानादृष्टादिपरिग्रहः । तत्र ज्ञानं सर्वविषय-

(१)—दुक्तिस्तु प्रामाण्याभ्युपगन्तृत्वेनैव इति संक्षेपः इति पाठेधिकः खपुस्तके ।

त्कारणं परमाण्वादि जीवो वा उपास्य इति मीमांसकाः । अस्ति नित्यज्ञानादिमानीश्वरः सर्वज्ञः

न्यायरत्नावली ।

धेन्वादिदृष्ट्या वागादेरिव । जगत्कारणं-सर्वकार्यप्रयोजकम् । अथ परमाण्वादौ ज्ञानं तत्र सर्वविषयत्वमित्यारोपद्वये गौरवादाह-जीवो वेति । जगत्कारणमित्यनुषज्यते । अदृष्टजननद्वारा जगत्प्रयोजक इत्यर्थः । उपास्य इति । तथा च 'यतो वे'त्यादिश्रुतेः यतः परमाण्वदृष्टादेर्जीवाद्वा जगदुत्पत्त्यादिकं तत् सर्वज्ञत्वादिदृष्ट्या उपासीतेत्यर्थ इति भावः । अस्तीत्यादि । 'आद्यकार्यं स्वोपादानादिविषयकापरोक्षज्ञानेच्छाकृतिमज्जन्यम् कार्यत्वात् घटवत्' इत्यनुमानात् ज्ञानादेर्नित्यत्वे ज्ञानादिमत एकत्वनित्यत्वयोश्च लाघवमिति धीसहकृतादीश्वर-

नारायणी ।

कत्वं चेत्यारोपद्वये गौरवादाह—जीवो वेति । जगत्कारणमित्यनुषज्यते । उपास्य इति । तथाच 'यतो वे'त्यादिश्रुतेर्यतः प्रधानात्परमाणोरदृष्ट्या जीवाद्वा जगदुत्पत्तिस्तत् 'यः सर्वज्ञ' इति श्रुत्युक्तसर्वज्ञत्वदृष्ट्योपासीतेति तन्मताभिमतश्रुत्यर्थ इति संक्षेपः । तदेतत्तार्किका न सहन्ते । 'चैत्र पुत्रस्ते जातो मृत'इत्यादौ कार्यार्थबोधकपदं विनापि सिद्धार्थबोधदर्शनात्, वाक्यमात्रस्य कार्यान्वितार्थबोधकत्वानियमात्, उपक्रमादिषड्विधलिङ्गोपेतत्वादुपनिषदां ब्रह्मपरत्वसमर्थनाच्च । ब्रह्म च 'यः सर्वज्ञ'इत्यादिश्रुतेर्नित्यज्ञानादिमत् 'ज्ञाज्ञौ द्वा'वितिश्रुतेर्जीवाद्भिन्नमिति तार्किकमतमवतारयति—अस्तीति । नित्यज्ञानादिमान्-नित्यज्ञानेच्छाकृत्याश्रयः, 'स्वाभाविकी ज्ञानबलक्रिया चे'ति श्रुत्या ज्ञानेच्छाकृतीनां नित्यत्वलाभादिति भावः । ईश्वरः-सृष्टिस्थित्यन्तकर्ता । तदुपपादकं विशेषणमाह—सर्वज्ञ इति । सर्वविषयकविशेषज्ञानवानित्यर्थः । स इत्याश्रयप्रत्ययेन ज्ञानाश्रयत्वलाभान्न ज्ञानस्वरूप इति भावः । (१)*न च नित्यं विज्ञानमानन्दं ब्रह्मे'तिश्रुतिविरोध इति वाच्यम् । तत्र विजानातीति विज्ञानमिति कर्तरि ल्युडङ्गीकारेण नित्यज्ञानवत्त्वलाभात् । न च तावतापि

(१) *.....* चिह्नद्वयमध्यगः पाठो नास्ति खपुस्तके ।

(१)पृथिव्यादिकार्यलिङ्गानुमितः स च जीवाद्भिन्न एवेति तार्किकाः । क्षणिकस्सर्वज्ञ इति सौगताः । क्लेशकर्मवि-

न्यायरत्नावली ।

सिद्धिरित्यर्थः । जीवाद्भिन्न इति । जीवस्य परमाण्वादिप्रत्यक्षासम्भवेन तादृशज्ञानादेमतो न जीवत्वमिति भावः । क्षणिक

नारायणी ।

ज्ञाने कथं नित्यत्वलाभस्तत्र धर्मिण एव नित्यपदान्वयादिति वाच्यम् । विशिष्टान्वयिनोऽसति बाधके विशेषणेऽप्यन्वयात्* । उपनिषदां ब्रह्मपरत्वं व्यवस्थापयिष्यन् तर्कतस्तत्सिद्धिमाह—क्षित्यादीति । क्षितिः आदिर्यस्य कर्मधृत्यादेस्तत् क्षित्यादि, तदेव कार्यरूपं लिङ्गं तेनानुमितः तज्ज्ञानजन्यानुमितिविषयः। तथाहि—'क्षितिः सकर्तृका कार्यत्वाद्घटवत्' 'द्व्यणुकजन्यमाद्यं परमाणुकर्म प्रत्यत्नवज्जन्यं कर्मत्वात् सम्मतवत्' 'ब्रह्माण्डादिधृतिः प्रयत्नवज्जन्या धृतित्वाद्वियतिविहङ्गमधृतिवदि'त्याद्यनुमानैर्नित्यत्वैकत्वलाघवानुगृहीतैर्नित्यैकप्रयत्नवदीश्वरसिद्धिः। जन्यता च यत्र समवायेन कार्यं तत्र विषयतया ज्ञानादिरित्येवं प्रत्यासत्तिनियता घटादौ दृष्टा ग्राह्या । तेन नोक्तरीत्या जीवेन सिद्धसाधनमर्थान्तरं वा, जीवज्ञानकृत्यादिजन्यताया उक्तप्रत्यासत्त्यनालिङ्गितत्वात् समवायेन द्व्यणुकाधिकरणे विषयतया जीवज्ञानादेरभावादित्यन्यत्र विस्तरः । स च परमात्मा शिवहररुद्रेशानब्रह्महरिनारायणविष्णुशब्दादिबोध्यो हरिरुद्रादिमूर्त्यादिभिः क्रीडन्नपि वस्तुतो भिन्न एव'त्रीनेव विभक्तांस्त्रीनेवाविभक्तानि'त्यादिश्रुतेः इति भावः । तर्ह्येवं जीवादप्यभेदः स्याच्चत्राह—स चेति । स च परमात्मा जीवात् असर्वज्ञचेतनात् भिन्न एव कालत्रयाबाधितभेदवानित्यर्थः। एवेत्यनेन तत्त्वज्ञानादूर्ध्वमप्यभेदो नास्तीति ज्ञापितम्। चातुर्मास्यमध्यपर्वणो-'र्द्वयोः प्रणयन्ती'ति वाक्येन(२) चोदकप्राप्तप्रणयनविलक्षणाग्निप्रणयनस्थेव 'द्वा सुपर्णे'युपक्रम्य मध्ये 'अनश्नन्नन्यः' 'अन्यमीशमि'त्याद्यस्य 'निरञ्जनः परमं साम्यमुपैती'त्युपसंहारवाक्यैनैव प्रत्यक्षादिप्रमाणप्राप्तव्यावहारिकभेदविलक्षणत्रिकालाबाध्यापूर्वभेदस्य प्राप्तेरिति तार्किकमतनिष्कर्षः । तदेतद् बौद्धा न सहन्ते । तथाहि—वित्तिवेद्ययोः सहोपलम्भात् विज्ञानव्यतिरेकेण वस्तुनोऽभावात् न परमात्मा विज्ञानाश्रयो न वा जगत्कर्ता किन्तु सत्त्वेन प्रतिक्षणविनाशिनिरुपप्लवालयविज्ञानप्रवाह एव सकलप्रवृत्तिविज्ञानविषयकः परमात्मेति योगाचारमतमवतारयति—क्षणिक

(१)क्षित्यादीत्यादिः कस्यपुस्तकयोः नारायण्यां च पाठः। (२)चोदकप्राप्त्याश्रयेति खपुस्तके।

पाकाशयैरपरामृष्टो नित्यज्ञानरूपः प्रधानांशसत्त्वगुण-

न्यायरत्नावली ।

इत्यादि । जगत्सर्वं क्षणिकं दुःखं मिथ्यत्याकारकं रागद्वेषाद्य-नुपरक्तं सर्वविषयकं यत् क्षणिकं ज्ञानं तत्प्रवाहरूपमित्यर्थः । जीवात्मकज्ञानप्रवाहहेतुज्ञानं क्षणिकमपि न तादृशमिति भावः । क्लेशेत्यादि । अविद्याऽस्मितारागद्वेषाभिनिवेशाः क्लेशाः । अ-नित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या । दृग्द-र्शनशक्त्योरेकात्मतैवास्मिता । आत्मबुद्ध्योर्भेदाग्रहोऽस्मितेत्यर्थः । कर्म-पुण्यपापे । विपाकः—कर्मफलम् जन्मायुर्भोगाः । आशया वासनाः । अपरामृष्टः-अव्यवह्रियमाणः । जीवस्तु निर्लेपत्वेन तैश्शून्योऽपि तदाश्रयबुद्ध्या विवेकेनागृह्यमाणत्वात् तद्विशिष्टरूपे-ण व्यवह्रियमाणः । ज्ञानरूपः-नित्यचिद्रूपः । प्रधानांशसत्त्वगु-

नारायणी ।

इति । द्वितीयक्षणविनाशीत्यर्थः । अर्थक्रियाकारित्वात् चरम-शब्दवदिति भावः । सर्वज्ञः प्रवृत्तिविज्ञानरूपयावदर्थविषयकनिरुपप्लव-विज्ञानप्रवाहरूप इत्यर्थः । सर्वज्ञ इत्याश्रयतया निर्देशस्तु 'इह वने तिलका' इति वत्सन्तानसन्तानिनोर्भेदविवक्षयेति बोध्यम् । तथा च जीवो जग-त्सर्वं दुःखरूपमित्यजानन्सोपप्लवो भवति सर्वज्ञस्तु तथा जानन् रागद्वे-षादिना रहितो निरुपप्लव इति नित्यमुक्त इति तन्मतनिष्कर्षः । तदेतत्पो-तञ्जला न सहन्ते । तथाहि—विज्ञाननित्यत्वकल्पने गौरवान्मानाभावाच्च । अप्रयोजकत्वेन सत्त्वहेतोः क्षणिकत्वासाधकत्वात् सर्वज्ञस्यैव विज्ञा-नात्मत्वे च 'चैत्रमैत्रावि'त्यादिसमूहालम्बने चैत्रमैत्रादीनामैक्यापत्तेः । विज्ञानव्यतिरेकेण बाह्यवस्तुनोऽपि आवश्यकत्वाच्च । तस्मात्साक्षित्व-रूपोपष्टम्भकत्वमात्रेण जगतः कर्ता क्लेशादिभिरसंसृष्टो नित्यविज्ञानस्व-रूप एव परमात्मा 'विज्ञानमानन्दं ब्रह्मे'ति श्रुतेरिति पातञ्जलमतमव-तारयति—क्लेशेति । क्लेशाः अविद्यास्मितारागद्वेषाभिनिवेशाः कर्म धर्माधर्मौ विपाकः फलं सुखदुःखादि, आशया वासना एतैः अपरामृष्टः कालत्रयेप्यसंसृष्टः, पुरुषविशेषः नित्येश्वरः नित्यज्ञानस्वरूपः कालत्र-याबाधितज्ञानस्वरूपः । कथं तर्हि सर्वज्ञत्वं तत्राह—प्रधानेति । प्रधानं

प्रतिफलिततया सर्वज्ञः संसारिविलक्षण एवेति पातञ्जलाः । अद्वितीयपरमानन्द एव ब्रह्म । तच्च जीवस्य

न्यायरत्नावली ।

णप्रतिफलिततया—प्रधाने तदंशेषु तत्कार्येषु त्रिगुणात्मकेषु स-

नारायणी ।

त्त्वांशश्च प्रधानांशौ तयोः सत्त्वगुणः प्रधानांशसत्त्वगुणः, सर्वस्य त्रिगुणात्मकत्वात् अवयवभूतः तत्र प्रतिफलिततया—प्रतिबिम्बततया । तथा च प्रतिबिम्बद्वारकसम्बन्धमादाय तस्य सर्वज्ञत्वं जीवस्य तु प्रमाणवृत्तिसापेक्षप्रतिबिम्बद्वारकः सम्बन्ध इति न सार्वज्ञ्यमिति भावः । अत एव तस्माद् भेदमाह—संसारीति । जीवाद्भिन्न इत्यर्थः । येऽपि केचन व्यासादयः सर्वज्ञास्तेऽप्युपासनाबलादीश्वरा अतो जीवा एवेति नेश्वरेऽन्तर्भूता इति पातञ्जलमतनिष्कर्षः । तदेतदुपनिषत्प्रतिपाद्याद्वितीयात्मतत्त्वविरोधान्नातिरमणीयम् । (१)तथाहि—जीवपरमात्मनोर्भेदे मानाभावात् । 'न च नाहमीश्वर' इत्यादि प्रत्यक्षं तत्र मानम् । 'अहं गौर' इत्यादिवद् भ्रमत्वात् । नापि जीवो ब्रह्मणो भिन्न असर्वज्ञत्वादित्याद्यनुमानम्, व्यावहारिकभेदेन सिद्धसाधनात् । उपमानं त्वप्रसक्तमेव । नापि 'द्वा सुपर्णे'तिश्रुतिः अपूर्वार्थत्वाभावात् । न च निरुक्तरीत्या तथा । तत्त्वमस्यादिवाक्यविरोधेन विलक्षणभेदपरत्वायोगात् । न च किं विनिगमकमिति वाच्यम् । निरवकाशत्वस्यैव विनिगमकत्वात् । नाप्यर्थापत्तिः । वास्तवभेदं विनाऽनुपपत्तेरभावादित्यन्यत्र विस्तरः । तस्माच्छुद्धपरमात्मैव ब्रह्म, तच्च स्वशक्तितारतम्यात् जीवेशादिव्यपदेशभाग्भवति न तत्र भेदगन्धोपीति सकलमतमूर्द्धन्यमद्वैतमतमवतारयति—अद्वितीयेति । अद्वितीयः—सजातीयविजातीयस्वगतभेदशून्यः 'एकमेवाद्वितीयमि'ति श्रुतेः । परमानन्द एव—नित्यानन्द एव, नित्यं विज्ञानमानन्दं ब्रह्मे'ति श्रुतेः । (२)*न च 'विजानाती'ति व्युत्पत्त्या विज्ञानमस्येति व्युत्पत्त्या वा विज्ञानमिति कर्तरि ल्युडङ्गीकारेण नित्यज्ञानवत्त्वलाभः एवमानन्दोऽस्यास्तीति मत्वर्थीयाच्प्रत्ययेनानन्दवत्त्वलाभश्च, अन्यथा नपुंसकलिङ्गानापत्तेरिति वाच्यम् । लिङ्गव्यत्ययस्य छान्दसत्वेनाप्युपपत्तेः । गुणगुणिभावसम्पादकसमवायादिसम्बन्धस्य प्रथमश्लोकव्या-

(१) तथाहि नाहमीश्वर इत्यादिप्रत्यक्षमिति पाठः खपुस्तके ।

(२) *·····*अयं चिह्नितः पाठो नास्ति खपुस्तके ।

वास्तवं स्वरूपं मायया च सर्वज्ञत्वादिविशिष्टं जगत उपादानं निमित्तं चेति औपनिषदाः। एवं वादिविप्रतिपत्तिभिः सन्दिग्धे तत्पदार्थ औपनिषदपक्षस्य परिशेषेण तन्निर्णयायाह भगवान्—

न साङ्ख्यं न शैवं न तत्पाञ्चरात्रं
न जैनं न मीमांसकादेर्मतं वा।
विशिष्टानुभूत्या विशुद्धात्मकत्वा-
त्तदेकोऽवशिष्टश्शिवः केवलोऽहम् ॥ ४ ॥

आदिशब्देनानूक्तानां सङ्ग्रहः। न तावदचेतनं जगदुपादानम्। 'तदैक्षत बहु स्यां प्रजायेये'ति ईक्षणपूर्व-

नारायणी।

स्याने विस्तरेण निराकृतत्वाच्च। 'आनन्दो ब्रह्मेति व्यजानात्' 'केवलो निर्गुणश्च' चिद्रूप एवाऽविकारो ह्युपलब्धा नित्यः शुद्धो बुद्धः परः प्रत्यगेकरस' इत्यादिश्रुतिविरोधापत्तेः*। वास्तवमिति। उपाधिपरित्यागेन प्राप्यं रूपं 'ब्रह्मैव सन्ब्रह्माप्येती'त्यादिश्रुतेः। माययेति। मायाकृतसर्वज्ञत्वादिविशिष्टं 'तदेतत्स्वप्नं मायामात्रमि'ति श्रुतेः। जगदुपादानं रजतादात्मना शुक्त्यादिवज्जगदात्मना विवर्तमानं 'यतो वा इमानि भूतानो'ति श्रुतेः। निमित्तं च तदनुकूलेक्षणादिमत्त्वेन। निमित्तकारणं च 'एतद्धीदं सर्वं साधयती'ति श्रुतेः। औपनिषदाः—उपनिषत्प्रमाणमात्रप्रधाना वेदान्तिनः। सन्दिग्धे—जगत्कारणं प्रधानं ब्रह्म वा? ब्रह्म निर्गुणं सगुणं वा? निर्गुणमपि भिन्नमभिन्नं वा? इत्यादिविशेषतः सन्दिग्धे, परिशेषेण—इतरमतनिरासेनौपनिषदपक्षस्य निर्दुष्टत्वव्यवस्थापनेन, तन्निर्णयाय—तत्पदार्थनिश्चयाय, श्लोकतस्तन्निरासमाह—न तावदिति। अचेतनं जडं साङ्ख्यपातञ्जलाभ्यां परिकल्पितं स्वतन्त्रं साम्यावस्थोपलक्षितं गुणत्रयात्मकं जगदुपादानं जगत्परिणामिकारणम्, तत्र हेतुमाह—तदैक्षतेति। तद्ब्रह्म ऐक्षत ईक्षणं कृतवत् बहुस्यां प्रजायेय प्रजार्थं नानाविधः स्यामितीक्षणपूर्वकसृष्टिश्रवणात्, ईक्षणकर्तृकमेकसृष्टिश्रुतेः ईक्षणं 'कुलं पिपतिषती'त्यादाविव प्रकृते 'तत्तेज ऐक्षत' इत्या-

कसृष्टिश्रवणात्, 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणी'ति च जीवात्मत्वव्यपदेशात्' 'यस्मिन्विज्ञाते सर्वमिदं विज्ञातं भवती'ति चैकविज्ञानेन सर्वविज्ञानप्रतिज्ञानात्' प्रधानज्ञानेन च तदप्रकृतिकानां पुरुषाणां ज्ञातुमशक्यत्वात्, 'ऐतदात्म्यमिदं सर्वं तत्स-

न्यायरत्नावली।

त्वांशे प्रतिबिम्बिततया। व्याकरवाणीति चेति। ब्रह्मण इति शेषः। यस्मिन्विज्ञात इत्यादि। यस्मिन् ज्ञाते सर्वं ज्ञातं भवति, तद्ब्रह्मत्येव प्रतिज्ञानादित्यर्थः। सर्वेषां दृश्यानां ब्रह्मैव स्वरूपम्। तस्यैव हि अतात्त्विकोऽन्यथाभावः प्रपञ्चः। अतः तस्य ज्ञानं सर्वस्य स्वरूपज्ञानमिति भावः। ननु प्रधानस्य प्रपञ्चप्रकृतित्वेन प्रपञ्चाभिन्नत्वात् प्रधानज्ञानं प्रपञ्चाभिन्नस्वरूपज्ञानं तत्राह-प्रधानज्ञानेनेति। अशक्यत्वादिति। तथा

नारायणी।

दाविव च गौणं भविष्यतीत्यत आह—अनेनेति। अहमितिधीगोचरेण जीवेनात्मना कर्तृभोक्तृस्वरूपात्मना प्रविश्य तत्राविर्भूय। नामेति। इदं नामेदं रूपमिति व्यक्तीकरोमि। जीवात्मत्वेति-जीवाभेदकथनात् कारणस्येति शेषः। तथा च गौणमीक्षणं तत्कर्तुश्चेतनस्य व्यक्तत्वादिति भावः। ननु जीवेनात्मनेति तृतीया सहार्थिका अथवाऽऽत्मशब्दो'ममात्मा भद्रसेन' इतिवच्चेतनाचेतनवाची भविष्यति ज्योतिःशब्दस्य क्रतुज्वलनवाचित्ववत्तत्राह—यस्मिन्निति। यस्मिन्पदार्थे विशेषेण ज्ञाते सर्वमिदं परिदृश्यमानं तन्मात्रसत्ताकमिति विशेषतो ज्ञातं भवति तत्कारणमिति कारणविज्ञानेन सर्वविषयकज्ञानादित्यर्थः। स्यात्कारणविज्ञानेन कार्यस्य विज्ञानं प्रतिज्ञातं ब्रह्मसिद्धिस्तु कुतस्तत्राह—प्रधानेति। तदप्रकृतिकानां-प्रधानाकारणकानां चेतनात्मकप्रतिबिम्बानामचेतनकार्यत्वायोगादिति भावः। अशक्यत्वादिति। तथा च प्रधानकारणता पक्षे'सर्वमिदं विज्ञातं भवती'तिश्रुतिविरोधप्रसङ्ग इति भावः। सर्वविज्ञानप्रतिज्ञाया ब्रह्मपरतां दृढयिष्यन्नाह—ऐतदात्म्यमिति। ऐतदात्मस्वरूपं कारणात्मकमिदं सर्वं तत्कारणं सत्यं त्रिकालाबाध्यं स कारणपदार्थ एव आत्मा जगत्फलभोक्ता। स एव यदि भोक्ता तर्हि

त्यं स आत्मा तत्त्वमसी' ति च तदभेदस्य नवकृत्व उपदेशात्, 'तस्माद्वा एतस्मादात्मन आकाशस्सम्भूत' इति च श्रुत्यन्तरादचेतनस्य जगत्कारणत्वे विचित्ररचनानुपपत्तेः, प्रधानमहदादेरप्रामाणिकत्वाच्च, न सा-

न्यायरत्नावली।

च सर्वपदसङ्कोचापत्त्या नोक्तरूपश्रुत्यर्थ इति भावः। विचित्रेति। यद्यत् विचित्रकार्यं तच्चेतनकर्तृकम् यथा घटरथादिकम्। विचित्रत्वं प्रकृते सावयवत्वम्। वायुक्रियादेश्चेतनाकर्तृकत्वेन निश्चयात् तद्विशेषणम्। प्रधानमहदादेः—ईश्वरानधिष्ठितस्य साङ्ख्याभिमतप्रधानादेः। पुराणभारतादावुक्तं प्रधानादिकं त्वीश्वराधिष्ठितं मिथ्याभूतं श्रुत्यादिसिद्धत्वात् प्रामाणिकमेव। 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्, तदैक्षत बहुस्यां प्रजाययेति, सोऽकामयते'त्यादिश्रुत्युक्तमायेक्षणकामनानामीश्वरीयाणां प्रधानमहदहङ्कारशब्दैः पुराणादावुक्तत्वात्, अपञ्चीकृतभूतानामेव तन्मात्रत्वेनोक्तत्वाच्च। महदादेरित्यादिपदेन पृथिव्यादीनां

नारायणी।

जीवस्य का गतिस्तत्राह—तत्त्वमसीति। त्वं जीवस्तद्ब्रह्म कारणात्मना प्रतिपादितमित्यर्थः। असिपदं त्वत्र सामानाधिकरण्यमर्यादया प्राप्तस्य दार्ढ्यायेति न व्यर्थमिति दिक्। न केवलं छान्दोग्यश्रुतावेव ब्रह्म जगत्कारणत्वेन प्रतिपाद्यते किन्तु तैतिरीयेपीत्याह—तस्माद्वेति। वै निश्चयेन तस्मात्परमात्मनः एतस्माज्जीवात् आत्मनः अनात्मनामधिष्ठानभूतात् जीवपरमात्मनोरभेदरूपाखण्डार्थात्सच्चिदानन्दादिति यावत्, आकाशः शब्दगुणः सम्भूतः उत्पन्नः, वायुः शब्दस्पर्शगुणः, तेजः शब्दस्पर्शरूपगुणम्, आपः शब्दस्पर्शरूपरसवत्यः पृथिवी शब्दस्पर्शरूपरसगन्धवती। श्रुतिविरोधं प्रदर्श्य तर्कविरोधमाह—अचेतनस्येति। जडस्य प्रधानस्येत्यर्थः। विचित्रेति। गिरिनदीसमुद्रादिसंनिवेशकरणस्यानुपपत्तेः अचेतनस्य चेतनाधिष्ठानं विना स्वतः प्रवृत्त्ययोगादिति भावः। मास्तु निरीश्वरसाङ्ख्यं सेश्वरसाङ्ख्यं तु स्यादेव प्रवर्तकचेतनाङ्गीकारादित्यत आह—प्रधानेति। उभयसाङ्ख्योक्तप्रधानमहदादेरित्यर्थः। अप्रा-

ङ्गयमतं साधु । एवं पाशुपतमतं पाञ्चरात्रिकं जैनं (१)त्रैदण्डं च मतं श्रुतियुक्तिबाधितत्वादयुक्तम् । न च

न्यायरत्नावली ।

सुखाद्यात्मकत्वेन हेतुना सुखादिपरिणामयोग्यस्य त्रिगुणात्मक-कारणस्यानुमानमप्यप्रामाणिकम् , हेत्वसिद्धेः । आन्तरं हि सुखादिकं न पृथिव्यादिरूपम् । एवमित्यादि । पाशुपतमतं तत्त्वमस्यादिश्रुत्या औपाधिकभेदेन व्यवहारभेदसिद्धेः वास्त-वभेदो व्यर्थ इत्यादियुक्त्या च बाधितम् । पाञ्च-रात्रमतेऽपि जीवानां जन्मादिकं 'अजो नित्य' इत्यादि-श्रुत्या कृतहानाकृताभ्यागमप्रसङ्गादियुक्त्या च बाधितम् । जैनत्रि-दण्डिनोर्मतं 'कूटस्थमवलम्ब्य'एतद्वै तदक्षर'मित्यादिश्रुत्या परिणा-मित्वेन जन्मनाशाद्यापत्तियुक्त्या च बाधितमित्यर्थः । साङ्ख्यादिमते-षु श्रुत्यादिबाधितत्वोक्त्या मीमांसकमतेऽपि तदुक्तमेव, तथापि तत्राधिकांशमाशङ्क्य निषेधति—न चेत्यादि । तत्त्वमस्यादिश्रु-

नारायणी ।

माणिकत्वात्-प्रमाणागोचरत्वात् । न सांख्यमतं साधु-सर्वस्यापि कार्यस्य सुखदुःखात्मकतया प्रतीतेः, सुखादीनां च सत्त्वाद्यात्मकत्वात् सत्त्वा-दिगुणत्रयकार्यमेव सर्वमिति मतं न साधीयः । पृथिव्यादीनामान्तरसुखा-द्यात्मकत्वाऽयोगात्कल्पनाबीजाभावादिति भावः । 'अजामेकामि'त्यादि-श्रुतयस्तु परमात्माधिष्ठितानिर्वचनीयमायापरा इति न कोपि विरोध इति दिक् । एवमित्यादि । पाशुपतमतं तत्त्वमस्यादिश्रुत्या औपाधिकभेदे-नोपास्योपासकभावसिद्धेर्वास्तवभेदकल्पनं व्यर्थमिति युक्त्या च बा-धितम् । पांञ्चरात्रमतेऽपि जीवस्य जन्यत्वोक्तिः 'अजो नित्य' इत्यादिश्रु-त्या कृतहान्यकृताभ्यागमप्रसङ्गयुक्त्या च बाधिता । जैनत्रिदण्डिनोर्म-तमपि 'कूटस्थमचलं ध्रुवम्''एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्य-स्थूलमनण्वह्रस्वमि'त्यादिश्रुत्या, परिणामित्वे कृत्स्नतदेकदेशविकल्पा-दिप्रसङ्गयुक्त्या च बाधितमतोऽसम्यगेवेत्यर्थः । साङ्ख्यादिमतेषु श्रुतियुक्तिबाधितत्वोक्त्या मीमांसकमतेऽपि तदुक्तमेव तथापि तत्रान्य-

(१) अत्र गघपुस्तकयोः त्रैदण्डमिति नास्ति ।

विधिशेषत्वाच्छ्रुतिर्न ब्रह्म प्रतिपादयतीति मीमांसकमतं युक्तम्। असिद्धत्वाद्विधिशेषत्वस्य। न चार्थवादाधिकरणन्यायाद्विधिशेषत्वम्। वैषम्यात्। स्वतःप्रयोजनवदर्थाप्रतिपादकानां 'वायुर्वै क्षेपिष्ठा देवते'त्येवमादीनां स्वाध्यायविधिग्रहणान्यथानुपपत्त्या प्रयोजन-

न्यायरत्नावली।

तिः विहितक्रियाकर्तुस्स्तुतिपरत्वात् न ब्रह्मजीवैक्यपरेत्यर्थः। असिद्धत्वात्—तत्त्वमस्यादिश्रुत्यवृत्तित्वात्। विधिशेषत्वस्य—विहितक्रियाकर्तृस्तुतिपरत्वस्य। स्वतः—विधिवाक्यैकवाक्यतां विना। प्रयोजनवदर्थेति। पुरुषाभिलषितस्वर्गादिसंसृष्टार्थेत्यर्थः। स्वाध्यायविधिग्रहणेति। 'स्वाध्यायोऽध्येतव्य' इति प्रयोजनवदर्थज्ञानमुद्दिश्य स्ववेदाध्ययनस्य विधायकं यद्वाक्यं तद्विष-

नारायणी।

दाशङ्क्य निषेधति—न चेति। विधिशेषत्वात्—विहितक्रियाकर्तृस्तुतिपरत्वात्, श्रुतिः-तत्त्वमस्यादिश्रुतिः, न ब्रह्म प्रतिपादयति-न ब्रह्मगोचरप्रमां जनयति। तत्र तात्पर्याभावादिति भावः। असिद्धत्वात्—तत्त्वमस्यादिव्यावृत्तित्वात्, विधिशेषत्वस्य विहितक्रियाकर्तृस्तुतिपरत्वस्य। नन्वनुष्ठानोपयोग्यर्थावबोधभाङ्क'स्वाध्यायो ध्येतव्य' इति स्वाध्यायविधिविषयत्वान्यथानुपपत्त्या 'तत्त्व सो'त्यादिवाक्यानाँ 'वायुर्वै क्षेपिष्ठे'त्याद्यर्थवादानामिव विध्यपेक्षितप्राशस्त्यपरत्वेनैव प्रामाण्यमित्यभिप्रायकार्थवादाधिकरणन्यायेन विधिशेषत्वमाशङ्क्य निषेधति—न चेति। अर्थवादाधिकरणन्यायात्-'यजेत स्वर्गकाम'इत्यादिविधिर्विहितार्थे पुरुषं प्रवर्तयितुं प्राशस्त्यज्ञानमपेक्षते प्राशस्त्यज्ञानं च सिद्धार्थबोधकार्थवादादिभ्य इति विधेयार्थवादसाकाङ्क्षा अर्थवादा अपि सिद्धमर्थं वदन्तः स्वाध्यायविध्यापादितप्रयोजनवत्त्वलाभाय विधिसाकाङ्क्षा इति विध्यर्थवादयोर्वाक्यैकवाक्यत्वमित्यर्थवादाधिकरणन्यायात्। वैषम्यमुपादयति—स्वत इति। विध्येकवाक्यतां विना। प्रयोजनेति—पुरुषाभिलषितस्वर्गादिसंसृष्टार्थाप्रतिपादकानाम्। स्वाध्याय इति। स्वाध्यायोऽध्येतव्य इति प्रयोजनवदर्थज्ञानमुद्दिश्य स्वाध्यायाध्ययनस्य विधायकं यद्वाक्यं तद्विषयत्वस्य प्रयोजनवदर्थपरत्वं विनानुपप-

वदर्थपरत्वे कल्पनीये शब्दभावनेतिकर्तव्यतांशसाकाङ्क्षस्य विधेः सम्प्रदानभूतदेवतादिस्तुतिद्वारेण तदंशपूरकत्वान्नष्टाश्वदग्धरथन्यायेन तदुभयैकवाक्यतेत्यर्थवा-

न्यायरत्नावली ।

यत्वेत्यर्थः। शब्दभावनेतिकर्तव्यतांशसाकाङ्क्षस्येति। अंशत्रयविशिष्टार्थभावनारूपसाध्यस्य विधिपदे शब्दभावनावाचकत्वधीरूपस्य साधनस्य च लब्धत्वेन साध्यसाधननिराकाङ्क्षशब्दभावनाया इतिकर्तव्यतासाकाङ्क्षत्वात् (१)अबोधकत्वेन तत्साकाङ्क्षस्येत्यर्थः । विधेः-विधिवाक्यस्य । विहितार्थे पुरुषं प्रवर्तयन्ती प्रवर्तनारूपा शब्दभावना विहितार्थे पुरुषस्य प्राशस्त्यधीरूपां स्वस्येतिकर्तव्यतां आकाङ्क्षत इति भावः । सम्प्रदानभूतदेवतास्तुतिद्वारेणेति । त्यागकालोच्चार्यमाणचतुर्थ्यन्तपदार्थस्य प्राशस्त्यधीजननद्वारेत्यर्थः । तदंशपूरकत्वात् शब्दभावनायामुक्तधीरूपेतिकर्तव्यताया अन्वयबोधकत्वात् । अर्थवादानां प्रयोजनवदर्थकत्वस्य आवश्यकत्वात् विधिवाक्यापेक्षितप्राशस्त्ये लक्षणास्वीकारात् प्रयोजनवद्देवताप्राशस्त्यादिबोधनद्वारा तत्र(२) प्राशस्त्यादिबोधकत्वं प्रशस्तदेवताकत्वात् प्रशस्तं कर्मेति बोधोत्पत्त्या तादृशबोधस्य शाब्दभावनायामन्वयबोधकत्वमिति समु-

नारायणी ।

त्तेरित्यर्थः । शाब्देति । शाब्दभावनाया इतिकर्तव्यतासाकाङ्क्षत्वात्तद्बोधकत्वेन तत्साकाङ्क्षस्य लिङ्लोडादिघटितयजेतेत्यादिवाक्यस्येत्यर्थः । पुरुषं प्रवर्तयन्ती प्रवृत्त्यनुकूलव्यापाररूपा शब्दनिष्ठा भावना विहितार्थे पुरुषस्य प्राशस्त्यज्ञानरूपां स्वरूपस्येतिकर्त्तव्यतामाकाङ्क्षत इति भावः । सम्प्रदानेति । त्यागकालोच्चार्यमाणचतुर्थ्यन्तपदार्थादेः प्राशस्त्यधीजननद्वारेणेत्यर्थः । तदंशेति । शब्दभावनायामुक्तधीरूपेतिकर्त्तव्यतायामन्वयबोधकत्वात् । नष्टाश्वेति । यथैकस्य दग्धरथस्य जीवद्भिरश्वैरन्यस्य विद्यमानरथस्याविद्यमानाश्वस्य संयोग इति न्यायेन । तदुभयेति ।

(१) तद्बोधकत्वेनेति घपुस्तके । (२) कर्मप्राशस्त्येति पाठः घपुस्तके ।

दितोऽर्थः ।

ननु शाब्दभावनायामितिकर्तव्यतात्वेन प्राशस्त्यज्ञानस्यान्वयबोध इति यदुक्तं तन्न युक्तम् । प्रवृत्तिभावनात्वेन रूपेणाख्यातादु(१)पस्थापितशब्दभावना नेतिकर्तव्यतामाकाङ्क्षते । कर्तव्यत्वेनावगतस्य व्यापारस्यैव तथात्वात् । अत एव पचतीत्यादौ नार्थभावनापीतिकर्तव्यतापेक्षा ।(२)शाब्दभावनावत्त्वेन तस्य कर्तव्यत्वज्ञानात् । अत एव अध्ययनविधिकल्प्यो लिङ् पुरुषं प्रवर्तयेदिति विधौ लिङ्निष्ठव्यापारस्य शाब्दभावनारूपस्य शाब्दभावनान्तरविषयत्वेन (३)*ज्ञेयत्वात् कर्तव्यत्वेन ज्ञानादितिकर्तव्यतात्वेन तत्र न प्राशस्त्यज्ञानस्यान्वयः । तत्रापि पदसाधुत्वेन अर्थवादानां विनियोगः* । किञ्च 'स्वर्गकामो यजेते'त्यादौ प्राशस्त्यज्ञानस्य लिङादिपदशक्तिज्ञानस्य पदानुपस्थितस्य कथं शाब्दभावनायामितिकर्तव्यतात्वेन करणत्वेन चान्वयः ? इति चेदत्रोच्यते । प्रवृत्तिभावनात्वेनेत्यादिकं यदुक्तं तत्किं वार्तिकादिमूलग्रन्थमूलकं युक्तिमात्रमूलकं वा ? । नान्त्यः । भावनात्वेन रूपेणाख्यातोपस्थाप्यस्य शाब्दभावनान्वयेऽपि तुल्यत्वेनांशत्रयाकाङ्क्षाया युक्तिसिद्धत्वात् । न च प्रवर्तनात्वेनोपस्थितभावनायाः प्रवृत्तिभवनानुकूलव्यापारत्वरूपप्रवर्तनात्वस्य ज्ञातत्वेन न भाव्याकाङ्क्षेति वाच्यम् । प्रवृत्तिमात्रस्य (४)भाव्यत्वेनान्विते पुरुषार्थविशेषरूपभाव्यादिविशेषितरूपेण प्रवृत्तेर्भाव्यतया आकाङ्क्षासम्भवात् विध्यर्थं प्रवर्तयतीति । तथा च भावनाया भवितरीव करणेऽप्या-

(१)—दुपस्थितापि शब्दभावना नेतिकर्तव्यतासाकाङ्क्षा, कतव्यत्वेनत्यादिः पाठो भिन्नो घपुस्तके ।

(२) शाब्दभावनानतिरिक्तत्वेन तस्याः कर्त्तव्यत्वाज्ञानादिति घपुस्तके ।

(३) *·····* चिह्नद्वयमध्यवर्ती पाठो भिन्नो घपुस्तके । तत्रहि *ज्ञेयत्वादिति कर्तव्यतात्वेन तत्र प्राशस्त्यज्ञानस्यान्वयः तत्रापि साधनत्वेनार्थवादानां विनियोगः * ।

(४) भाव्यत्वे निश्चितेपि इति घपुस्तके ।

न्यायरत्नावली।

काङ्क्षायाः स्वारसिकत्वात्, करणविशेषस्य उपकारकविशेषसाकाङ्क्षत्वात्, इतिकर्तव्यताकाङ्क्षायाः पचतीत्यादावपि आवश्यकत्वात्, तस्याः(१) कर्तृत्वेन धीर्न प्रयोजिका। अत एव भावार्थाधिकरणे—

अस्त्यादावपि कर्त्रंशे भाव्येऽस्त्येव हि भावना।

इत्यादिवार्तिकग्रन्थे 'घटो भविष्यतीत्यादावपि भावना प्रतीयते। तस्याश्चांशत्रयं भवनेनैव प्रपूर्यते। घटस्य भवनं भाव्यम्, कपालस्य (२)तत्करणत्वम्, कपालावयवस्य तदितिकर्तव्यतात्व' मित्युक्तम्। न्यायसुधायां च 'अंशत्रयं विना भावनाया नैराकाङ्क्षाभावात् भवनेनैव तत्पूर्यत' इत्युक्तम्। नाद्यः। अर्थवादाधिकरणीयवार्तिकादौ भवत्प्रतिकूलस्यैवोक्तत्वात्। तथा हि—'तेन सर्वेषां मन्त्रादीनां भावनान्तर्गतिरुपपन्ना। यत्तु अर्थवादानां भावनांशत्रयानन्तःपातित्वात् अग्रहणमित्युक्तम्। अत्रोच्यते। सत्यमनन्तर्गतं न गृह्यते। अस्ति त्वन्तर्गतिः। कथम्? लिङादियुक्तेषु वाक्येषु द्वे भावने प्रतीयेते। तत्रार्थात्मिकयार्थवादा न गृह्यन्ते, शब्दात्मिकया तु ग्रहीष्यन्ते। सा ह्येवं प्रवर्तते 'लिङ् पुरुषं प्रवर्तयेदि'ति। केनेत्यपेक्षायां प्रेरणाज्ञानेन। प्रेरणायां लिङ्पदशक्तिज्ञानं(३) वा कथमिति? प्राशस्त्यज्ञानोपकृतेन तेनैव प्राशस्त्यज्ञाने साधनापेक्षायां अर्थवादेनेतिधीः। कुत एतत्? बुद्धिपूर्वकारिणो हि यावत् प्रशस्तोऽयमिति नावबुध्यन्ते, तावत् न प्रवर्तन्त इति'(४)।

(१) कर्तव्यत्वेनेति घपुस्तके।

(२) कपालस्य तत्—कपालस्य भवनं करणत्वम्। घटो भविष्यतीत्यत्र भावनायाः साध्यसाधनेतिकर्तव्यतारूपमंशत्रयं घटादिभवनेन प्रपूर्यते। घटभवनेन साध्यम्, कपालभवनेन साधनम्, कपालिकाभवनेनेतिकर्तव्यता च प्रपूर्यत इति भावः।

(३)—शक्तिज्ञानेन वा इति पाठो घपुस्तके।

(४) तेन सर्वेषामित्यारभ्य प्रवर्त्तन्त इतीत्यन्तो वार्तिकग्रन्थः, अधस्तनीया तु तस्यैव व्याख्या न्यायसुधानामिकेति बोध्यम्।

न्यायरत्नावली ।

न्यायसुधानुसारिणी तत्र व्याख्या । भावनान्तर्गतिः–भावनापेक्षितांशत्रयसमर्पकत्वम् । अनन्तःपातित्वात्–अनन्तःपातिप्राशस्त्यबोधकत्वात् । अग्रहणं–विधिवाक्यैकवाक्यत्वाभावः । अनन्तर्गतं–भावनांशत्रयानन्तर्गतबोधकम् । न गृह्यते–न विधिवाक्यैकवाक्यतापन्नम् । अन्तर्गतिः–अर्थवादानां भावनांशत्रयान्तर्गतबोधकत्वम् । लिङादीति–लिङ्लोडादीत्यर्थः । तत्र–लिङादियुक्तसर्ववाक्यप्रतीयमानभावनयोर्मध्ये । अर्थात्मिकया–पुरुषनिष्ठभावनासामान्येन । ग्रहीष्यन्ते–स्वांशबोधकतया अपेक्षिष्यन्ते । अर्थयते कामयते फलमित्यर्थः पुरुषः, तदात्मिका भावना(१)। भट्टमते धर्मधार्मिणोः समवायास्वीकारेण तादात्म्यस्वीकारात् । एवं शब्दात्मिका लिङ्शब्दधर्मत्वात् । अर्थवादानां तादृशापेक्षणीयत्वे (२)अध्ययनविधिना शब्दभावनांशप्राशस्त्यज्ञाने साधनतया विनियुक्तत्वे हेतुमाह—सा हीत्यादि । सा–शब्दभावनामात्रम् । हि–यस्मादेवं प्रवर्तते–वक्ष्यमाणरीत्या (३)अर्थवादसाधितप्राशस्त्यज्ञानरूपेतिकर्तव्यताविशिष्टरूपेण प्रेरणाविषयत्वेन कर्तव्यताया अध्ययनविधिकल्प्यविधिना ज्ञायते । कुत एतादृशीति ? न शब्दभावनायामितिकर्तव्यताकाङ्क्षा, तदविषयत्वेन करणेतिकर्तव्यताविशिष्टार्थभावनयेव प्रवृत्तिसिद्धेः । अथवा भावनान्तरदृष्टान्तेन तस्या अपि सा । तथापि प्रेरणाज्ञानं करणं(४) प्रेरणाशक्तिज्ञानमितिकर्तव्यतास्तिवति । तावत् न प्रवर्तन्त इति । तथाचोक्तविधिना कर्तव्यत्वेन ज्ञायमानासु करणेतिकर्तव्यताविशिष्टसर्वशब्दभावनासु

(१) तदात्मिका भावना अर्थभावनेत्यर्थः । (२) अध्ययनविधिकल्प्यविधिनेति घपुस्तके ।
(३) अर्थवादसाधनकप्राशस्त्येति घपुस्तके ।
(४) अत्र सर्व पुस्तकेषु प्रेरणाज्ञानं करणमित्यादिपाठमुपलभ्य न परिवर्तनं कृतं तथापि 'प्रेरणाज्ञनकरणं प्रेरणाशक्तिज्ञानम्, इतिकर्तव्यता स्तुतिज्ञानमिति' इति पाठस्यावश्यकता वर्तते ।

न्यायरत्नावली ।

करणांशे साधनाकाङ्क्षायां लिङादिपदस्य, इतिकर्तव्यांशे साधनाकाङ्क्षायामर्थवादमात्रस्य विनियोगात् सर्वेषु विधिवाक्येषु सर्वशब्दभावनान्वितं प्राशस्त्यज्ञानम् अर्थवादेन कर्तव्यमिति भावः । एवं च फलस्याविधेयत्वेन साधनेतिकर्तव्यताविशिष्टार्थभावनायामेव विध्यन्वयात् अनुष्ठेयत्वेन प्राशस्त्यज्ञानापेक्षणात् तस्यामेव अर्थवादेन प्रथमं प्राशस्त्यान्वयधीः । ततः पदानुपस्थितायास्तस्या वाक्यार्थबोधे भानासम्भवादर्थवादस्यैव ज्ञाने लक्षणास्वीकारात् प्राशस्त्यान्वितायाः तादृशभावनायाः अर्थवादार्थज्ञाने विषयितासम्बन्धेनान्वयात् तादृशभावनाविशेष्यकप्राशस्त्यप्रकारकज्ञानस्य लाभः । 'नीलस्य वस्त्रविशिष्टचैत्रस्य ज्ञानमि'त्यादौ वस्त्रविशिष्टचैत्रविशेष्यकनीलप्रकारकभानलाभव(१)त्तस्य ज्ञानस्येतिकर्तव्यतात्वेन प्रेरणायामन्वयः । एवमर्थवादस्य लिङादेर्वा लाक्षणिकार्थज्ञाने लिङर्थप्रेरणार्थान्वयात् प्रेरणाज्ञानस्य करणत्वेन तस्यामन्वयः । प्रेरणाशक्तत्वज्ञानस्य करणत्वपक्षे तु प्रेरणायास्स्वशक्तिविषयकत्वसम्बन्धेन ज्ञानेऽन्वयः । अन्यथा शक्त्यंशे लक्षणापत्तेः । गीताटिप्पण्यां तु पदानुपस्थितस्यापि ज्ञानादेर्वाक्यार्थस्य भानमध्ययनविधिगृहीततात्पर्यानुरोधात् । उक्तं हि वार्तिके उद्भिदधिकरणे—'पदानुपस्थितस्यापि नामधेयस्यान्वयधीरनुपस्थितविशेषणविशिष्टधीः न जायते नत्वनभिहितविशेषणेति' । ननु प्राशस्त्यज्ञानस्य नेतिकर्तव्यतात्वेन यजेतेत्यादौ प्रेरणास्वन्वयः किन्तु जनकत्वेनार्थभावनायाम्। तस्य जनकत्वेन तद्विशिष्टप्रेरणायां जनकत्वसम्भवात् । गुणवादस्त्विति सूत्रस्थवार्तिके 'आलभेत प्रशस्तत्वादि'त्यन्वयधीप्रकाकारस्य दर्शितत्वादिति चेन्न । तत्र हि वार्तिके पञ्चम्या न(२)

(१) लाभवत् ततस्तस्येति घपुस्तके । (२) न जनकहेतुत्वमर्थ इति घपुस्तके ।

न्यायरत्नावली ।

जनकत्वमर्थः । 'सत्यमनन्तर्गतं न गृह्यते, अस्ति त्वन्तर्गति' रित्याद्युक्तवार्तिके भावनांशप्रतिपादकत्वेनैवार्थवादानां प्रामाण्योक्तेः (१)विध्यर्थवाददूषणवार्तिकानां प्रशस्तत्वादित्यस्य शब्दभावनेतिकर्तव्यतापरत्वस्य दर्शितत्वात्। कुत एतदित्युक्तवार्तिकव्याख्याने,हेत्वधिकरणीये 'याप्यर्थवादाकाङ्क्षे'त्यादिवार्तिकव्याख्याने च न्यायसुधायामितिकर्तव्यता(२)त्वेनान्वयस्य स्पष्टमुक्तत्वाच्च । किन्तु प्राशस्त्यज्ञानज्ञाप्यत्वमेकप्रेरणानिष्ठम् । तथा च प्रेरणाज्ञानस्य प्राशस्त्यज्ञानोपकार्यत्वलाभात् प्रेरणां प्रति करणोपकारकत्वरूपमितिकर्तव्यतात्वं लब्धमिति सिद्धं नस्समीहितम् । न च व्याप्यतया ज्ञापकत्वमेव पञ्चम्यर्थः, प्राशस्त्यं च (३)व्याप्यतया न ज्ञापकम् , न वा तथा ज्ञापकतया बोधेन समीहितसिद्धिरिति वाच्यम् । प्रेरणाज्ञानं प्रत्युपकारकत्वरूपं प्रेरणेतिकर्तव्यतात्वं बोद्धव्यमिति प्रकृते समीहितम् । तदुपकारकत्वं च तत्फलप्रवृत्त्युत्पादकत्वम् । तथा चैकस्मिन् प्रवृत्तिरूपे फले प्रेरणाज्ञानप्राशस्त्यज्ञानयोः हेतुत्वात् , स्वज्ञानजन्यत्वरूपस्वपर्योज्यत्वसम्बन्धेन प्रवृत्तयोस्सत्त्वात् , प्रवृत्तिनिष्ठेन तादृशसम्बन्धेन व्याप्यव्यापकभावस्य प्राशस्त्यप्रेरणयोस्सम्भवात् प्रेरणां प्रति तादृशव्याप्यतया ज्ञापकत्वस्येतिकर्तव्यतात्वपर्यवसितत्वात् , तत्प्रतिपादनमस्मत्समीहितम् । किञ्च 'अस्माच्छब्दादयमर्थो न तु मानान्तरादि'त्यादिप्रयोगे प्रमाणान्तरादिविधया ज्ञापकत्वस्यापि पञ्चम्या बोधनात् व्याप्यविधयैव ज्ञापकत्वं तदर्थ इति न नियमः । तथा प्रेरणां प्रति (४)तज्ज्ञानम् । सहकारिज्ञानविषयत्वरूपज्ञाप-

(१) विध्युत्खातवाददूषणवार्तिकादौ प्रशस्तेति घपुस्तके ।

(२)—कर्तव्यतात्वेन प्राशस्त्यज्ञानान्वयस्य इति घपुस्तके ।

(३) व्याप्यतया न तज्ज्ञापकं न वा तथा ज्ञापकतया बोधने समीहितेति गपुस्तके ।

(४) तज्ज्ञानसहकारीत्यादिः घपुस्तके पाठः युक्तश्च ।

न्यायरत्नावली ।

कत्वमपि प्राशस्त्यनिष्ठं पञ्चम्यर्थः । तस्माद्विधिवाक्यमात्रे प्राशस्त्यज्ञानस्य प्रेरणायामितिकर्तव्यतात्वेनान्वय इति वार्तिकादिमूलसिद्धं भवत्येव । उपाध्यायादिप्राचीनग्रन्थेषु (१)कौस्तुभादिनवीनग्रन्थेषु चार्थवादाधिकरणे तथैवोक्तम् । ननु शब्दभावना मुख्यविशेष्यतया विधिवाक्यार्थबोधे भाति,अर्थभावना वा? आद्ये-

'भावनैव हि वाक्यार्थः सर्वत्राख्यातवत्तया ।
अनेकगुणजात्यादिवाक्यार्थानुरञ्जिता ॥

इति (२)उद्भिदधिकरणीयवार्तिकविरोधः । तत्र हि आख्यातसामान्यार्थभूताया नानागुणजात्यादिकारकविशिष्टाया वाक्यजन्यधीमुख्यविशेष्यत्व(३)रूपवाक्यार्थत्वमुक्तम् । न तु शब्दभावना आख्यातसामान्यार्थः । न वा जात्यादिकारकविशिष्टा । नान्त्यः । अर्थभावनादिकारकेषु शब्दभावनाया विशेष्यत्वस्यैवोचितत्वादिति चेत् । अत्रोच्यते । आद्य एव पक्षो युज्यते । न चोक्तवार्तिकविरोधः । अर्थभावनायाः शब्दभावनां प्रति कर्मत्वेऽपि स्वकारकाणि प्रति विशेष्यत्वस्य वार्तिकोक्तस्यानपायात् । अत एव 'प्रधानभावनायामङ्गभावनानामितिकर्तव्यतात्वेने'ति तन्त्ररत्ने एकादशे उक्तम् । अत एव 'पश्य मृगो धावती'त्यादौ मृगा धावन्तीति वाक्यार्थस्य दर्शनकर्मतया विशेषणत्वमिति महाभाष्ये उक्तम् । (४)तार्किकादिभिरपि तादृशविशेषणत्वं स्वीक्रियते एव । एतावांस्तु विशेषः । यद्वैयाकरणमते धावनादिधात्वर्थ एव मृगादिविशेषित उक्तवाक्यार्थः । तार्किकादिमते धावनभावनाविशिष्टप्रथमान्तनामार्थो मृगादिरेव । मीमांसकमते तु धावनकरणत्वादिविशिष्टभावनैव दर्शनकरणकभावनायामेव तस्यां कर्म-

(१) कौस्तुभादिनवीनग्रन्थेष्विति पाठो नास्ति गपुस्तके ।
(२) तद्भूताधिकरणीयवार्तिकेति घपुस्तके ।
(३) मुख्यविशेष्यत्वमुक्तमिति गपुस्तके । (४) वार्तिकादिभिरिति गपुस्तके ।

त्वेन विशेषणमिति। यत्तु प्रेरणायां कर्तव्यताधीर्न सर्वानुभवसिद्धेति, तन्न। प्रवर्तकं ज्ञानं वाक्यजन्यमिति हि सर्ववादिसिद्धम्। तच्च ज्ञानं मीमांसकमते यागादेः आप्तप्रेरणाविषयत्वम् इष्टसाधनतां विना अनुपपन्नमिखेवंरीत्या इष्टसाधनताक्षेपद्वारा प्रवर्तकं प्रेरणाविषयकम्। लोके राजगुर्वाज्ञादिप्रेरणाज्ञानस्य तादृशप्रवर्तकतया कल्पत्वात्। इष्टसाधनतैव विध्यर्थः न तु प्रेरणेतिवादिनां तत्र सम्मतिस्तु नोपयुज्यते। न हि सर्ववादिसम्मतो विध्यर्थोऽस्त्येकः। तथा च प्रवृत्तिभावनारूपप्रेरणायाः भावनास्वाभाव्येन अंशत्रयान्वयित्वं तन्मते (१)अनुभवारूढमेव। भावनात्वेनोपस्थिते अंशत्रयान्वयित्वमिति हि वार्तिकादौ प्रदर्शितम्। तस्मात्साधूक्तं शब्दभावना इतिकर्तव्यतांशमाकाङ्क्षेति। ननु किमिदं प्राशस्त्यम्? (२)सगुणत्वं चेत्, तस्य एकरूपस्य दुर्वचत्वेन अर्थवादानां नानार्थत्वापत्तेः, तज्ज्ञानस्य प्रवृत्तावनुपयोगाच्चेति चेन्न। बलवदनिष्टाजनकत्वस्यैव प्राशस्त्यरूपत्वात्। ननु अनुष्ठानश्रमरूपानिष्टजनकत्वात् यागादौ तद्बोधनासम्भवः। पापरूपानिष्टजनकत्वाभावस्य तद्रूपत्वे तद्बोधनस्य अप्रसक्तप्रतिषेधापत्तेः। न हि यागादेः पापजनकत्वं प्रसक्तम्। 'नैव सर्पं स्पृशेदि'ति लौकिकानिषेधशेषस्य मृत्युरयमित्यादिनिन्दार्थवादविशेषस्य अप्रामाण्यापत्तेः, तेन पापजनकत्वबाधस्यावाच्यत्वादिति(३) चेन्न। यत्र प्राशस्त्यं बोध्यं तज्जन्येष्टादधिकं यदनिष्टं तदजनकत्वस्य प्राशस्त्यरूपत्वात्। न चैवमपि अप्रसक्तप्रतिषेधापत्तिः। श्रमादिरूपानिष्टजनके यागादौ उक्ताजनकत्वरूपस्य श्रमादिनिष्टे उक्ताधिकत्वाभावे पर्यवसानात्।

(१) अनुभवरूपमेवेति घपुस्तके। (२) न गुणवत्त्वम्, तस्यैकरूपस्येति घपुस्तके। (३)—दिति वाच्यम् इति घपुस्तके।

दाधिकरणे निर्णीतम् । वेदान्तवाक्यजन्यज्ञानाच्च साक्षादेव परमानन्दप्राप्तिर्निःशेषदुःखनिवृत्तिश्च पुरुषार्थो लभ्यते इति निराकाङ्क्षत्वान्नान्यशेषत्वसम्भावना, प्रत्युत विधय एव अन्तःकरणशुद्धिद्वारा तच्छेषतां भज-

न्यायरत्नावली ।

घटवति' नीलघटो नास्ती'त्यभावस्य घटनिष्ठनैरुक्याभावे पर्यवसानात् । उक्ताधिकत्वं च यागादिजन्येष्टापेक्षया बहुत्वं बहुकालव्यापकत्वं तादृशेष्टसाक्षात्कारविरोधिजातिविशेषवत्त्वादिरूपं च । तदाश्रयजनकत्वज्ञानस्य प्रवृत्तिप्रतिबन्धकत्वात् तदभावकूटमर्थवादेन बोध्यत इति दिक् । अर्थवादेभ्यः 'तत्त्वमसी'त्यादिश्रुतेः वैषम्यमाह—वेदान्तेति । विधयः-दर्शादिविधायकवाक्यानि । शुद्धिद्वारा—'विविदिषन्ति यज्ञेने'त्यादिश्रुत्या तत्त्वज्ञानप्रतिबन्ध-

नारायणी ।

विध्यर्थवादयोः परस्पराकाङ्क्षितार्थबोधजनकता अर्थवादानां प्रयोजनवदर्थकत्वस्यावश्यकत्वाद्विधिवाक्यापेक्षितप्राशस्त्ये लक्षणाङ्गीकारात् प्रयोजनवद्देवताप्राशस्त्यद्वारा कर्मप्राशस्त्यबोधकत्वं प्रशस्तदेवताकत्वात्प्रशस्तं कर्मेति बोधोत्पत्त्या तादृशबोधस्य शाब्दभावनायामन्वयबोधकत्वमिति समुदायार्थः । स्वतः प्रयोजकत्वाभावमेव विध्यैकवाक्यत्वे बीजं वदतो मीमांसकस्य तत्प्रयोजनपराणामप्युपनिषदां विध्येकवाक्यत्वकल्पनं मान्द्यप्रयुक्तमिति ज्ञापयन्नतिवैषम्यमाह—वेदान्तेति । तत्त्वमस्यादिमहावाक्यजन्याखण्डार्थबोधाच्चेत्यर्थः । साक्षात्-अदृष्टमद्वारीकृत्य, परमानन्दप्राप्तिः परिपूर्णानावृतानन्दप्राप्तिरित्यर्थः । आवरणनाशे स्वप्रकाशानन्दात्मनावस्थितिरिति यावत् । निःशेषेति समूलेत्यर्थः । दुःखनिदाननिवृत्तितयैवावरणनाशस्य साक्षात्कारफलत्वात् दुःखाभावोऽपि स्वतः पुरुषार्थ एवेति भावः । निराकाङ्क्षत्वात्-विधिवाक्याकाङ्क्षारहितत्वात् । नान्येति । न विहितक्रियास्तुतिपरत्वसम्भावनापि । अपिशब्दादसङ्कुतत्वादिप्रतिपादकवाक्यानां कर्मणि प्रवृत्तिप्रतिबन्धकानां विधिशेषत्वसमर्थनं स्वाज्ञानख्यापनायैवेति ध्वनितम् । नोत्तरकाण्डस्य पूर्वकाण्डैकवाक्यत्वेन प्रामाण्यं किन्तु प्रथमभूमिप्रतिपादकस्य कर्मकाण्डस्यैवोत्तरभूमिप्रतिपादकोपनिषद्वाक्यैकवाक्यत्वेन प्रामाण्यमित्यभिप्रेत्याह—प्रत्युतेति । विधयः-

न्त इति । तस्मात्प्रयोजनवदबाधिताज्ञातज्ञापकत्वेन वेदान्तानां स्वत एव प्रामाण्यादस्त्येव ब्रह्मेति न मीमांसकमतसिद्धिः । तार्किकादीनां च मतं 'तत्त्वमस्यहं ब्रह्मास्मि अयमात्मा ब्रह्म सत्यं ज्ञानमनन्तं ब्रह्मे' त्या-

न्यायरत्नावली ।

कपापनाशनद्वारा तत्त्वज्ञानसाधनत्वेन विहितानां कर्मणामुत्पत्तिप्रयोगविधानद्वारा । तच्छेषतां-वेदान्तवाक्योपकारकताम् । स्वत एव-अन्यशेषतां विना । ब्रह्म-जीवाभिन्नं ब्रह्म । अथवा मास्तु 'तत्त्वमस्यादिश्रुतेः कर्तृस्तुतिपरत्वं ब्रह्माभिन्नत्वेन जीवोपासनापरत्वं तु स्यात् तत्राह—तस्मादिति । यथाश्रुतवाक्यार्थज्ञानादेव परमपुरुषार्थलाभादित्यर्थः । स्वत एवेति । इत्युपास्वेति पदयोः कल्पनां विनैव । प्रामाण्यात्—प्रामाण्यसम्भवात् । श्रुतहान्यश्रुतकल्पनापत्तेः दृष्टद्वारकपुरुषार्थसाधनधीपरत्वसम्भवे अदृष्टद्वारा तादृशधीपरत्वकल्पने गौरवाच्च नोपासनापरत्वमिति भा-

नारायणी ।

विधिवाक्यानि, अन्तःकरणशुद्धिद्वारा-ज्ञानप्रतिबन्धकपापनिवृत्तिद्वारा, तच्छेषतां-वेदान्तवाक्यगौणार्थताम्, 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेने'ति श्रुतेरिति भावः। मीमांसकमतनिरासमुपसंहरति-तस्मादिति। अर्थवादाधिकरणन्यायविषयत्वनिरासात् विपरीताङ्गाङ्गीभावस्यैव लाभाच्चेत्यर्थः । प्रयोजनेति । निरुक्तप्रयोजनवत्कालत्रयाबाधितं प्रमाणान्तरानधिगतं यद्ब्रह्म तद्विषयकप्रमाजनकत्वेन । स्वत एव-विध्येकवाक्यतां विनैव, प्रामाण्यात्-निश्चितप्रामाण्यात्। तार्किकादीनामित्यादिपदाद्वैशेषिकबौद्धादिपरिग्रहः, तदुच्छिष्टभुङ्माध्वादिपरिग्रहश्च। 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्यादिना 'तत्त्वमेव त्वमेवतत्,

त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् ।
तेभ्यो विलक्षणः साक्षी चिन्मात्रोहं सदाशिवः ॥

इत्यादिवाक्यपरिग्रहः । अनेन जीवेश्वरभेदनिरासः उपासीतेति पदकल्पनाविरोध्यसिपदादिघटितत्वात् । किञ्चनेत्यादिना 'अथातो नेतिनेती'त्यादिश्रुतिपरिग्रहः । अनेन भूतभौतिकादेः सत्यत्वनिरासः । स्वा-

दिश्रुतिबाधितम्। 'एकमेवाद्वितीय ब्रह्म नेह नानास्ति किञ्चने'त्यादिश्रुतिबाधितं च। (१)भिन्नाभिन्नत्वं क्षणिकत्वं च 'आकाशवत्सर्वगतश्च नित्य' इत्यादिश्रुतिबा-

न्यायरत्नावली।

वः। इत्यादिश्रुतीत्यादिना प्रपञ्चमिथ्यात्वबाधकश्रुतिसङ्ग्रहः। भिन्नाभिन्नत्वं प्रपञ्चब्रह्मणोः सत्यभेदाभेदौ। क्षणिकत्वं क्षणमात्रस्थायिज्ञानरूपत्वम्, ब्रह्मण इति शेषः। 'ऐतदात्म्यमिदं सर्व'मिति श्रुतौ एतत्सद्रूपं ब्रह्मैव आत्मा स्वरूपं यस्य, तादृशम्। स्वार्थे ष्यञ्प्रत्ययः। तथा च ब्रह्मैव प्रपञ्चस्य स्वरूपं तदन्य-

नारायणी।

धिकरणवृत्त्यभावप्रतियोगित्वबोधनात् दुग्धजलयोरिव भेदाभेदावेव जगज्जीवपरमात्मनाम्—

अविभक्तं च भूतेषु विभक्तमिव च स्थितम्।

इत्यादिवाक्यैरिति त्रैदण्डमतं निराकरोति — एक इति। शेषभागः—

सर्वव्यापीसर्वभूतान्तरात्मा।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेताः केवलो निर्गुणश्च॥

इतिश्रुत्या बाधितं भिन्नाभिन्नत्वमित्यन्वयः। श्रुत्यर्थस्तु दीव्यतीति देवः स्वप्रकाशः। एतेन देहादीनामात्मत्वं निराकृतं तेषामस्वप्रकाशत्वात्। स्वप्रकाशोऽपि प्रतिदेहं भिन्न इति साङ्ख्यमतनिरासायाह-एक इति। सजातीयभेदरहित इत्यर्थः। नन्वेकस्मिन्देहे एक एवास्तु तत्राह-सर्वेति। सर्वशरीरेष्वेक एवेत्यर्थः। ननु तर्हि 'पादे मे दुःखं शिरसि मे सुखमि'तिवत् 'चैत्रे मे सुखं मैत्रे मे दुःखमि'ति कुतो न भासते तत्राह-गूढ इति। अविद्ययाऽऽवृत इत्यर्थः। ननु 'इहैवास्मि सदने जानान' इति प्रतीत्या प्राप्तपरिच्छेदभावस्य कथं सर्वभूतेषु स्थितिः तत्राह-सर्वव्यापीति। तादात्म्येन स्वविवर्तानुस्यूत इत्यर्थः। ननु सर्वव्यापित्वे भेद एव प्राप्तः, व्यापकताप्रयोजकोपादानोपादेयभावस्य भेदगर्भितत्वात्तत्राह-सर्वभूतेति। सर्वभूतानां सत्ताप्रद आत्मेत्यर्थः। तथा च जगतः स्वतः सत्ताकत्वाभावेन व्यापित्वादेरपि प्रतीतिमात्रशरीरत्वान्न तन्निबन्धनो भेदो वास्तव इति भावः, कर्माध्यक्षः कर्मप्रवर्तक इत्यर्थः, सर्व-

(१) 'एको देवः सर्वभूतेषु गूढ' इति भिन्नाभिन्नत्वमिति कखपुस्तकयोर्नारायण्यां च।

धितम्। अत्र सर्वेषां मतस्यासत्त्वे प्रतिज्ञाते विशुद्धात्मकत्वादिति हेतुः। निर्विकल्पाद्वितीयचैतन्यरूपत्वादित्यर्थः। अत्र हेतुः-विशिष्टानुभूत्येति। विशिष्टा सविकल्पकानुभूतिभ्यो व्यावृत्ता या तत्त्वमस्यादिवाक्यजन्याखण्डानुभूतिस्तयेत्यर्थः। तेन सर्वव्यापकमद्वितीयं परमानन्दबोधरूपं च ब्रह्मेति सिद्धम् ॥ ४ ॥

ननु 'स य एषोऽणिमा, अणोरणीयानि'ति ब्रह्मणोऽणुत्वश्रुतेः 'अङ्गुष्ठमात्रः पुरुषः, आराग्रमात्रो ह्यवरोऽ-

न्यायरत्नावली।

न्मथ्यैवेति बाधनात् कुत उक्तभेदाभेदावांत भावः। मतस्य—सम्मतत्वस्य। असत्त्वे—ब्रह्मनिष्ठाभावे। ब्रह्मणि पक्षे सर्वसम्मतरूपत्वाभावे साध्ये इति यावत्। तत्त्वमस्यादीत्यादिपदेन 'एकमेवाद्वितीयमित्या'दिवाक्यस्य द्वितीयाभावादिविशिष्टे ब्रह्मण्यवान्तरतात्पर्यस्वीकारादद्वितीयत्वादिसिद्धेरिति भावः ॥ ४ ॥

अङ्गुष्टेत्यादि। 'अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठ-

नारायणी।

भूताधिवासःसकलप्रपञ्चाधिष्ठानम्, साक्षी सर्वावभासकः, चेताः स्वप्रकाशकचिद्रूपः, केवलः निर्धर्मकः, निर्गुणः स्वरूपातिरिक्तगुणशून्यः। तथा च शुक्तिव्यतिरेकेण जगतोऽसत्त्वान्न तदभिन्नाभिन्नत्वमात्मनो युक्तमिति भावः। क्षणिकत्वं क्षणमात्रस्थायिज्ञानरूपत्वं ब्रह्मण इति शेषः। इत्यादिना 'नित्यो नित्यानां'मिति श्रुतिपरिग्रहः। अत्र च श्लोके सर्वेषां मतस्य-साङ्ख्यादीनां मतस्य, असत्त्वे-असमीचीनत्वे, अखण्डानुभूतिः-संसर्गागोचरधीः। श्लोकार्थमुपसंहरति—तेनेति। उदाहृतश्रुतियुक्तिभिर्वादिविप्रतिपत्तिनिरासेनेत्यर्थः। (सर्वव्यापकम्) सर्वव्यापकत्वोपलिक्षितम्। अद्वितीयं-द्वितीयाभावोपलक्षितम् परमानन्दबोधरूपं-नित्यानन्दचिद्रूपं चकारात्सद्रूपम्। अखण्डार्थोपपत्तिस्त्वस्मत्कृतमहद्व्याख्याने ऽनुसन्धेया ॥ ४ ॥

पञ्चमश्लोकमवतारयति—नन्वित्यादिना। अणिमा-अत्यणुः। अणोः-परमाणोः अणीयान् अणुतरः। अङ्गुष्ठ इति स्पष्टम्। आरा लोहशलाका।

पि दृष्ट' इत्यादिश्रुतिप्रतिपादि(१)ताणुत्वविशिष्टजीवाभिन्नत्वाच्च न ब्रह्मणः सर्वव्यापकत्वमित्याशङ्क्य 'ब्रह्मैवेदममृतं पुरस्तात् ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम्, तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्य'मित्याद्याः श्रुतयो निर्विशेषमेव ब्रह्म प्रतिपादयन्तीति पूर्वोक्तमेव दृढयन्नाह—

न चोर्ध्वं न चाधो न चान्तर्न बाह्यं
न मध्यं न तिर्यङ् न पूर्वापरा दिक् ।
वियद्व्यापकत्वादखण्डैकरूप-
स्तदेकोऽवशिष्टश्शिवः केवलोऽहम् ॥ ५ ॥

न्यायरत्नावली ।

ति । ईशानो भूतभव्यस्ये' ति श्रुत्याऽङ्गुष्ठमात्रशब्दितजीवस्य सर्वेश्वरत्वम्, 'आराग्रमात्रो ह्यवरोऽपि दृष्ट' इति श्रुतौ नास्ति परो महान् यस्मात्तादृशत्वमाराग्रपरिमितस्य जीवस्योक्तम् । आरा-लोहशलाका, अपूर्वं-कारणभूतादिशून्यम्, अनपरं-कार्यभूताकाशादिशून्यम् । अनन्तरमबाह्यम्-अन्तरबाह्यशून्यम्, अपरिच्छिन्नमिति यावत् । न चोर्ध्वमित्यादि । मयि ऊर्ध्वादिकं येन सम्बन्धेन प्रसक्तं तेन सम्बन्धेन नास्ति । वियद्व्यापकत्वात्-येन

नारायणी ।

अवरोऽपि जीवोऽपि । अपिशब्देनान्तःकरणसमुच्चयः । ब्रह्मैवेदमिति । इदं नामरूपात्मकं पुरस्तात्पुरतः प्रसृतं भासमानम् अमृतं सच्चिदानन्दात्मकं ब्रह्मैवेत्यर्थः । एवमग्रेऽपि । अपूर्वं कारणरहितम्, अनपरं कार्यरहितम्, अनन्तरं भेदकधर्मशून्यम्, अबाह्यं-कालादिरूपोपाधिशून्यम्, अपरिच्छिन्नमिति यावत् । न चोर्ध्वमित्यादिकस्य येन सम्बन्धेनोर्ध्वादिकं प्रसक्तं तेन नास्तीत्यर्थः । वियद्व्यापकत्वादिति । यथा संयोगेन वियत् व्यापकं तथाऽऽत्मापि तादात्म्येन व्यापक इत्यर्थः । सर्वगतश्चेत्यत्र

(१)—त णुजीवाभिन्नेत्यादिर्गपुस्तके पाठः ।

वियद्व्यापकत्वात्, 'आकाशवत्सर्वगतश्च नित्य' इति श्रुतेः। वियतो व्यापकत्वादिति वा, 'ज्यायानाकाशान्महतो महीया'नित्यादिश्रुतेः। जीवस्यापि (१)सकलदेहव्यापिचैतन्योपलब्ध्या महत्त्वेऽपि उपाधिधर्माध्यासेनारा-

न्यायरत्नावली।

केनापि सम्बन्धेन वियद्यथा सर्वत्र व्यापकं तथा तादात्म्येनात्मा। चकाराः विजातीयान्तरस्य सजातीयधर्मस्य च समुच्चायकाः। तस्मादेकोऽहमित्यर्थः। येन केनापि सम्बन्धेन व्यापकत्वमादाय दृष्टान्तत्वे पृथिव्यादेरपि दृष्टान्तत्वसम्भवात् असामञ्जस्यम्। संयोगेन वियद्यथा सर्वव्यापकं तथा तादात्म्येनात्मापीत्युक्तेऽपि दृष्टान्तासङ्गतिः, सर्वप्रपञ्चनिषेधरूपस्य साध्यस्य वियति परेणास्वीकारात्, ऊर्ध्वादिनिषेधमात्रे साध्ये तदेकः केवलोऽहमिति उपसंहारानुपपत्तिः अत आह—वियतो व्यापकत्वादिति। अपरिच्छिन्नत्वादित्यर्थः। तथा च भेदादिरूपसर्वपरिच्छेदाभावस्य सर्वभेदाद्यभावं प्रति हेतुत्वं युक्तमेवेति भावः। सकलदेहव्यापिचैतन्येति। हस्तपादाद्यवच्छेदेन युगपज्ज्ञायमाननानासुखदुःखादिव्यक्तितादात्म्यापन्नचैतन्येत्यर्थः। उपाधिधर्मेति।

नारायणी।

चकारोऽनुक्तसमुच्चायकः यस्मादाकाशवत्सर्वदोषातीतश्च परमात्माऽत एकोहमिति भावः। आकाशस्य सिद्धान्ते आपेक्षिकव्यापकत्वात् तद्ब्रह्मणोप्यव्यापकत्वे वस्तुतोऽनित्यत्वमपि स्यादित्यतोर्थान्तरमाह—वियद्व्यापकत्वात्—(२)*वियद्व्यापकत्वात्, 'आकाशवत्सर्वगतश्च नित्य' इति श्रुतेः, वियतो व्यापकत्वादिति वा *तत्र हेतुमाह—ज्यायानिति। स्पष्टम्। सकलेति। 'पादे मे सुखं शिरसि मे वेदने'ति युगपन्नानावयवावच्छेदेन सुखदुःखाद्यवभासकचैतन्यानुभवेनेत्यर्थः। उपाधीति। मनोनिष्ठाराग्रमात्रत्वाध्यासेनेत्यर्थः। मनसः संकोचविकासशीलत्वात्

(१) जीवस्य महत्त्वेपि सूक्ष्मत्वाभिप्रायेणाणुत्वव्यपदेशादित्यन्वयः।

(२) *...* चिह्नितः पाठो नास्ति कपुस्तके।

ग्रमात्रत्वाभिधानात्, 'बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्र-मात्रो ह्यवरोऽपि दृष्ट' इति श्रुतेः। ब्रह्मणश्च (१)सूक्ष्मत्वा-भिप्रायेण अणुत्वव्यपदेशात्। शेषमतिरोहितार्थम् ॥ ५ ॥

ननु ब्रह्मणो जगदुपानत्वादुपादानोपादेययोश्चाभे-दाद्विचित्रजगदभिन्नत्वेन(२) ब्रह्मणः दुःखरूपत्वात् न त-दभिन्नत्वेन जीवस्य परमपुरुषार्थप्राप्तिरित्याशङ्क्य ब्रह्म-णः स्वप्रकाशपरमानन्दरूपत्वान्निखिलजगद्भ्रमाधिष्ठान-त्वेन कारणत्वव्यपदेशादध्यस्तेन च समं सम्बन्धाभा-

न्यायरत्नावली।

मनोनिष्ठाराऽग्रमात्रत्वेत्यर्थः। मनसस्सङ्कोचविकासशालित्वेन क-दाचित्तदस्तीत्यर्थः। बुद्धेरित्यादि। आत्मगुणत्वेन अवरः अप-रिच्छिन्नोऽपि बुद्धिगुणेनाराग्रमात्र इत्यर्थः। सूक्ष्मत्वेति। दुर्विज्ञेयत्वेत्यर्थः॥ ५ ॥

महदादिवाचकशब्दपूर्ववृत्तित्वेन कुञ्जशब्दस्याणुपरिमाण-

नारायणी।

कदाचिन्मनसः आराग्रमात्रत्वसम्पत्त्या तदुपाधिकस्यात्मनोऽपि तदा तदस्तीति भावः। बुद्धेरिति। आत्मनो गुणेनावरोऽपि बुद्धेर्गुणेनाराग्रमात्रो दृष्ट इत्यन्वयः। अवरः न विद्यते वरो महान्यस्मादित्यपरिच्छिन्नः। दुर्ल-क्ष्यत्वेति-लौकिकप्रमाणागोचरेत्यर्थः॥ ५ ॥

षष्ठं पद्यमवतारयति—नन्विति। अभेदात्-मृद्घटयोरिव तादात्म्यात्। विचित्रेति। सुखदुःखमोहमयप्रपञ्चाभेदेन। परमेति। निरतिशयसुखप्राप्तिः। उपादानोपादेयभावेऽपि शुक्तिरजतादाविवाध्यासिकाभेदस्यैवाङ्गीकारेणाधिष्ठानस्य ब्रह्मणो गुणदोषाप्रसक्तेर्न ब्रह्माभिन्नजीवस्य पुरुषार्थहानिरित्यभिप्रेत्य समाधत्ते—ब्रह्मण इत्यादि। कथं तर्हि कारणत्वोक्तिस्तत्राह-भ्रमेति। भ्रमकारणीभूताऽज्ञानविषयत्वेन। तावता किं तत्राह-अध्य-स्तेनेति। सम्बन्धाभावात्- धर्मिसमसत्ताकसम्बन्धाभावात्, अनर्थले-

(१) दुर्लक्ष्यत्वाभिप्रायेणेति कपुस्तके।

(२)—दभिन्नत्वनैव जीवस्य परमपुरुषार्थप्राप्तिरिति कपु०।

वाच्य तत्रानर्थलेशोऽप्यस्तीत्याह--

न शुक्लं न कृष्णं न रक्तं न पीतं
न कुब्जं न पीनं न ह्रस्वं न दीर्घम् ।
अरूपं तथा ज्योतिराकारकत्वा-
त्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ ६ ॥

कुब्जम्—अणु । पीनं-महत् । तेनाणु महत् ह्रस्वं दीर्घमिति चतुर्विधपरिमाणनिषेधात् द्रव्यत्वप्रतिषेधः । रूप्यत इति रूपं प्रमेयम् । (१)न प्रमेयमरूपम् । तेन सर्वेषामेव द्रव्यगुणकर्मादिपदार्थानां तत्तद्वाद्यभ्युपगतानां निषेधः । तथा च श्रुतयः—'अस्थूलमनण्वह्रस्वमदीर्घमलोहित'-

न्यायरत्नावली ।

वाचकत्वमित्याशयेनाह—कुब्जमाण्वति । रूपतादात्म्यस्य रूपाधारत्वस्य च न शक्यमित्यादिनैव निषेधसम्भवादाकाङ्क्षिताद्वितीयत्वप्रतिपादनस्य युक्तत्वाच्चाह—रूप्यत इत्यादि । रूप्यते-चिता भास्यते । प्रमेयं-चिद्भास्यम् । द्रव्यादेरिव तद्विशिष्टस्यापि प्रमेयत्वात् प्रमेयभेदोक्त्या द्रव्यादिवैशिष्ट्यात्यन्ताभावोऽपि लभ्यत इत्याशयेनाह--नेत्यादि । निषेधः-भेदात्यन्ताभावयोर्लाभः । अस्थूलमित्यादौ स्थूलादेर्भेद इवात्यन्ताभावोऽपि

नारायणी ।

शोऽपि-अध्यासकृतगुणदोषसम्बन्धोपि । महदादिवाचकशब्दपूर्ववर्तित्वेन कुब्जशब्दस्याणुवाचित्वमित्याशयेनाह—कुब्जमिति । रूपतादात्म्यस्य रूपाधारत्वस्य च 'न शुक्ल'मित्यादिनैव निषेधसम्भवादाकाङ्क्षिताद्वितीयत्वप्रतिपादनस्य युक्तत्वाच्चाह-रूप्यत इति । रूप्यते-साक्षिणा भास्यते, प्रमेयं-चिद्भास्यम्, द्रव्यादेरिव तद्विशिष्टस्यापि प्रमेयत्वात्तदुभेदोक्तया द्रव्यादिवैशिष्ट्यात्यन्ताभावोपि लभ्यत इत्याशयेनाह—तेनेति । निषेधः-भेदात्यन्ताभावयोर्लाभः । तत्र श्रुतिं प्रमाणयति-अस्थूलमिति । 'स होवा-

(१) न रूपमरूपमप्रमेयमित्यर्थ इत्यृजुनाऽव्याख्यायानृजुना पथा व्याख्यातम्पदमिति बोध्यम् ।

मित्याद्या 'अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगन्धवच्च यत्' इत्याद्याश्च सर्वानर्थशून्यं परमात्मस्वरूपं प्रतिपादयन्ति । श्रौतस्याप्यर्थस्य न्यायेन निर्णयाय

न्यायरत्नावली ।

बोध्यत इति वक्तुं शक्यते । अस्नेहमित्यादिवाक्यशेषस्य भेदबोधपरत्वे तत्पुरुषत्वेन नपुंसकत्वानुपपत्तेर्बहुव्रीह्यावश्यकत्वेन तत्समभिव्याहारात् अत्यन्ताभावमात्रबोधकत्वम् । अशब्दामित्यादौ तु नपुंसकत्वात् बहुव्रीहित्वनिर्णयेनात्यन्ताभावबोधकत्वमेवेत्याशयेनाह-अशब्दमित्यादि । अप्रमेयत्वात्-चिदभास्यत्वात् ॥६॥

नारायणी ।

चतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ती'ति पूर्वभागः । 'अस्नेहमच्छायमतमोऽवाय्वनाकाशमसङ्गमरसमगन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्रमाणमसुखमात्रमनन्तरमबाह्यं न तदश्नाति किञ्चन न तदश्नाति कश्चने'त्युत्तरभागः । श्रुत्यर्थस्तु-स याज्ञवल्क्य उवाच हे गार्गि एतद्वै तदक्षरं यत्त्वं पृष्टवत्यसि 'कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चे'त्यादिना अव्याकृतरूपाकाशाधिष्ठानं तत् अव्याकृताधिष्ठानम् एतदक्षरं न क्षरति न क्षीयते वाऽक्षरं शुद्धं ब्रह्म ब्राह्मणाः ब्रह्मविदः अभिवदन्ति कथयन्ति तद्ब्रूहीत्युक्त आह—अस्थूलमित्यादि । अस्थूलं न विद्यते स्थूलं यस्मिन्निति स्थूलभिन्नं स्थूलात्यन्ताभाववद्वेत्यर्थः । एवमग्रेऽपि बोध्यम् । अदीर्घमित्यनेन परिमाणवतां सामान्यतो निषेधमुक्त्वा विशेषत आह अलोहितमिति—लोहितवत्त्वं पृथिवीतेजसोरिति तयोर्निषेधः । अस्नेहमित्यनेन जलात्मत्वनिषेधः, अच्छायमतम इत्यनेन तमसः, अवायुरिति वायोः, अनाकाशमित्याकाशस्य निषेधः । असङ्गमिति वासनारहितम्, कुतः भोगहेतोरभावादित्याह-अरसमित्यादि । न केवलं भोग्याभावादेव भोगवासनाया अभावः किन्तु भोगकरणाभावादपीत्यभिप्रेत्याह--अचक्षुष्कमिति । संग्रहेण निषेधमाह-न तदिति । तद्ब्रह्म किञ्चन किमपि नाश्नाति न भुङ्क्ते स्वव्यतिरिक्तस्य भोग्यस्याभावात् । अत एव कश्चन कोऽपि जनः तदक्षरं नाश्नाति न भुङ्क्ते । अत्र कारणेऽक्षरे सर्वस्यापि जगत ओतप्रोतस्याभावोक्त्या स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वरूपमिथ्यात्वज्ञापनेन मिथ्याभूतानात्मगुणदोषादिकमधिष्ठानभूतस्य ब्रह्मणो नास्तीति समर्थितम् । श्रुत्यन्तरमाह-अशब्दमिति। न विद्यते शब्दो यस्येत्यशब्दम्, शब्दादिमानेव

हेतुमाह—ज्योतिराकारकत्वादिति । स्वप्रकाशज्ञानरूपत्वेनाप्रमेयत्वात्प्रमेयत्वे घटादिवज्जडत्वापत्तेः । 'एतदप्रमेयं ध्रुव'मित्यादिश्रुतेरित्यर्थः ॥ ६ ॥

ननु कस्य ब्रह्मभाव उपदिश्यते । ब्रह्मणः अब्रह्मणो वा ? नान्त्यः । तस्य जडत्वादसत्वाच्च । न प्रथमः ।

नारायणी ।

व्येति ब्रह्म च शब्दादिरहितत्वान्न तथेतीत्याह–अव्ययमिति । न व्येति न क्षीयत इत्यर्थः । अत एव नित्यं यद्व्येति तदेवानित्यं नायं तथेति भावः । इतश्च नित्यम्–अनाद्यनन्तं न विद्यते आदिः कारणं यस्य तदनादि न विद्यन्तेऽन्तः कार्यं यस्य तदनन्तं कार्यकारणभावरहितं तस्मान्नित्यमिति भावः । महतः बुद्धेः परं विलक्षणं नित्यविज्ञानस्वरूपं ध्रुवं कूटस्थनित्यं नाकाशादिवदापेक्षिकं नित्यं तमेवम्भूतं ब्रह्मात्मानं निचाय्य द्रष्ट्वा मृत्युमुखात् अविद्याकामकर्मलक्षणात् प्रमुच्यते वियुज्यते । सर्वानर्थशून्यं–सर्वप्रपञ्चतत्कृतगुणदोषरहितम् । स्वप्रकाशेति । स्वं स्वरूपं प्रकाशो यस्येति स्वपरसाधारणव्यवहारसाधनज्ञानरूपत्वेनेत्यर्थः । षष्ठ्यर्थ उपकारकत्वम् । उपकारश्च प्रमातृभावापन्नस्य स्वस्य सर्वव्यवहारः प्रमातृभावेनोपकार्यस्य साक्षिरूपेणोपकारकत्वं स्वप्रकाशत्वमिति निष्कर्षः । तथापि स्वव्यवहारसिद्धिः कथं ? स्वस्य स्वविषयत्वाभावादिति चेत् ? शृणु । यथा परेषामालोके आलोकान्तरसंयोगाभावेपि प्रतियोगितानुयोगितान्यतरसम्बन्धेनालोकसंयोगवत्त्वादेवालोकघटादेः प्रत्यक्षम्, तथा यावद्विदेहकैवल्यं प्रतियोगितानुयोगितान्यतरसम्बन्धेन साक्षितादात्म्यरूपविषयतासम्बन्धवत्त्वात्साक्षिदृश्योभयव्यवहारोपपत्तिरिति । अधिकं त्वस्मत्कृतमहद्व्याख्याने द्रष्टव्यम् । अप्रमेयत्वात्–चिद्विषयतावत्त्वाभावात्, प्रमेयत्वे–साक्षिविषयतावत्त्वे, जडत्वापत्तेः–भासकचिद्भेदापत्तेः । तथात्वे जगदान्ध्यं प्रसज्येतेति भावः । अप्रमेयत्वं श्रुतिसिद्धमप्याह—एतदिति । चकारो विदिताविदितात्परः 'इतिहोचुरि'त्यादिश्रुतिसमुच्चायकः ॥ ६ ॥

सप्तमं पद्यमवतारयति—नन्वित्यादिना । ब्रह्मभाव–अभेदः, उपदिश्यते–तत्त्वमसीत्यादिना ज्ञाप्यते । ब्रह्मणः–सच्चिदानन्दस्य साक्षिणः, अब्रह्मणः–कार्यकारणभावापन्नस्य मायातत्कार्यस्य । जडत्वात्–सच्चिद्भिन्नत्वात्, तथाचातद्रूपस्य तद्रूपत्वप्रतिपादनं बाधितार्थकत्वात् भ्रान्तप्रलाप

उपदेशानर्थक्यात् । ब्रह्मभावस्य स्वत एव सिद्धत्वात् । जीवस्य स्वतो ब्रह्मभावेऽप्यविद्याव्यवधानं ज्ञानेन निवर्त्यत इति चेन्न । अविद्यानिवृत्तेरात्मरूपत्वे द्वैतापत्तेर्ब्रह्मणोऽसिद्धिप्रसङ्गात् । तदुक्तं वार्तिके—

अव्यावृत्ताननुगतं वस्तु ब्रह्मेति भण्यते ।
ब्रह्मार्थो दुर्लभोऽत्र स्याद्वितीये सति वस्तुनि ॥

इति । अभिन्नत्वे चोपदेशानर्थक्यमित्युक्तम् । अत्र किं परमार्थतः फलाभावमभिप्रैषि, किं वा प्रतीतितो-

न्यायरत्नावली ।

अविद्याव्यवधानम्-अविद्यारूपं व्यवधायकम् । द्वैतापत्तेः-सत्यात्मभिन्नस्यापत्तेः । अव्यावृत्तम्-अननुगतम्, अनुगतधर्मशून्यम् अनुगतधर्मशून्यं च । द्वितीये-ब्रह्मभिन्ने । सति—सत्ये । परमार्थतः फलाभावं—पारमार्थिकस्वरूपेण फलस्याभावम् । प्र-

नारायणी ।

एव स्यादिति भावः । असत्त्वाच्चेति—मिथ्यात्वादित्यर्थः । उपदेशानर्थक्यात्—परमपुरुषार्थप्रयोजकापूर्वार्थकवाक्यप्रयोगवैयर्थ्यात् । तदेवोपपादयति—ब्रह्मभावस्येति । स्वतः—उपदेशं विनैव, विद्यमानत्वात् साधनीयांशाभावेन साधनप्रयासो निरर्थक इति भावः । नन्वज्ञाननिवृत्त्युपलक्षितात्मा पुमर्थः अज्ञाननिवृत्तिश्च ज्ञानेनेति तदर्थमुपदेशः सार्थक एवेत्याशङ्कते—जीवस्येति । स्वतः—उपदेशादिकं विना । अविद्येति-अविद्यारूपं व्यवधायकम् । अविद्यानिवृत्तिरात्मनो भिन्नाऽभिन्ना वा ? भिन्नापि सती असती वा ? इत्याद्यान्त्यपक्षस्य पुनः संसारोन्मज्जनप्रसञ्जकस्यातितुच्छत्वं मत्वा शेषपक्षौ दूषयति—अविद्यानिवृत्तेरिति । द्वैतापत्तेः-सत्यस्यात्मभिन्नस्यापत्तेः । नन्विष्टापत्तिः, न च श्रुतिविरोधः श्रुतेर्भावाद्वैतपरत्वेन विरोधाभावादित्यत आह—ब्रह्मण इति । असिद्धिप्रसङ्गात्—'सत्यं ज्ञानमनन्तं ब्रह्मे'ति श्रुत्युक्तस्वरूपहानिप्रसङ्गात् । वस्तुपरिच्छेदाङ्गीकारादिति भावः । अत्र वार्तिकवाक्यं प्रमाणयति—तदुक्तमिति । अव्यावृत्तेति—अननुगतानुगतधर्मशून्यम् । द्वितीये-ब्रह्मभिन्ने, सति-सत्ये, परमार्थतः-वस्तुतः, प्रतीतितः फलाभावमित्यस्य फलमलीकमित्यर्थः । तथाच किं वास्तवं फलमलीकं किं

ऽपि ? तत्राद्यमिष्टापत्त्या परिहरति—

न शास्ता न शास्त्रं न शिष्यो न शिक्षा
न च त्वं न चाहं न चायं प्रपञ्चः ।
स्वरूपावबोधो विकल्पासहिष्णु-
स्तदेकोवशिष्टः शिवः केवलोऽहम् ॥ ७ ॥

शास्ता उपदेशकर्ता गुरुः । शास्त्रमुपदेशकरणम् । शिष्य उपदेशकर्म । शिक्षा उपदेशक्रिया । त्वं श्रोता, अहं वक्ता, अयं सर्वप्रमाणसन्निधापितः प्रपञ्चो देहेन्द्रियादिरर्थः परमार्थतो नास्तीत्यर्थः । द्वितीयं नि-

न्यायरत्नावली ।

तीतितः—प्रातीतिकत्वेन रूपेण । फलाभावमित्यनुषज्यते । अत्र च फलाभावमित्यस्य फलरूपमलीकमित्यर्थः । तथा च ज्ञायमानं फलमलीकमिति भावः । एतेन प्रातीतिकफलस्य प्रातीतिकत्वरूपेणाभावस्यापि सिद्धान्तेऽपि स्वीकारात् पश्चात्तद्दूषणानुपपत्तिरित्यपास्तम् । परमार्थतो नास्तीति । तथा च शास्त्रादिसर्वप्रपञ्चस्य निषेधात् परमार्थत्वरूपेण ज्ञानफलस्यापि निषेधलाभ इति भावः । द्वितीयं—प्रातीतिकत्वविशिष्टं फलमलीकमित्यभिप्रा-

नारायणी ।

प्रातीतिकं फलमलीकमिति प्रश्ननिष्कृष्टार्थः । परमार्थतो नास्ति परमार्थत्वविशिष्टमलीकमित्यर्थः । द्वितीयं प्रातीतिकत्वविशिष्टं फलमलीकमित्यभिप्रायः । आत्मैवाविद्यानिवृत्तिः, नचोपदेशवैयर्थ्यम् ; ब्रह्मानुभवप्रतिबन्धकाज्ञानविघटकत्वेन सार्थकत्वादिति वाचस्पतिमिश्राः । तन्न सम्यक् । तन्निवर्त्तकत्वादिरूपतद्विघटकत्वस्य दुर्वचत्वात् । अतो नात्मस्वरूपा किन्तु पञ्चमप्रकारा निरुक्तप्रकारेण सत्त्वस्यासत्त्वस्य च विरोधेन सत्त्वासत्त्वयोश्चासमावेशात् । नाप्यनिर्वाच्या । जन्यस्याज्ञानोपादानकत्वेन मुक्तावन्वयित्वासम्भवादिति केचित् । तदपि न सम्यक् । ज्ञानसाध्यायास्तस्या अज्ञानोपादानकत्वेनानिर्वाच्यत्वात्पञ्चमप्रकारान्तर्भावे मानाभावाद् ब्रह्मणोऽसिद्धिप्रसङ्गाच्च । तस्मान्न पञ्चमप्रकारोऽवि-

राकरोति—स्वरूपावबोधो विकल्पासहिष्णुरिति । अयमर्थः—यद्यप्यविद्यानिवृत्तिरात्माऽनात्मा वेत्यादिविकल्पने किमपि फलं निरूपयितुं न शक्यते, तथापि स्वरूपावबोधो विज्ञानफलमनुभूयते । न

न्यायरत्नावली ।

यम् । स्वरूपावबोधः—प्रकाशमानपूर्णानन्दरूपः । विज्ञानफलं-

नारायणी ।

द्यानिवृत्तिः किन्त्वनिर्वाच्यैव, तदुपलक्षितश्चात्मा पुमर्थ इत्यज्ञाननाश्यस्य मिथ्यात्वेन मुक्तावनन्वयित्वेपि न हानिः । उपलक्षितस्यानुवृत्तेरित्यपरे । तदपि न सम्यक् । अविद्यानाशस्य सुखदुःखाभावेतरत्वेन स्वतोऽपुरुषार्थत्वात् , अतोऽनवच्छिन्नानन्द एव पुरुषार्थः । स च यद्यपि नित्यसिद्धस्तथापि विस्मृतग्रैवेयकादिरिव ज्ञातत्वेन प्राप्यत्वात्फलमिति चित्सुखाचार्याः । एतदपि न सम्यक् । अनिर्वचनीयख्यातिवादिमते जाग्रद्बोधादिना प्रातीतिकस्वप्नपदार्थनाशस्येव ब्रह्मसाक्षात्कारेण 'ब्रह्म नास्ति न भासत' इति भ्रमसिद्धानन्दावरणनिवृत्तेर्मुख्यफलस्यैव सम्भवात् । ब्रह्मण औपचारिकफलवत्त्वकल्पनं न युक्तमित्यन्ये । इदमपि न युक्तिसहम् । निवृत्तेरनिरूपणस्योक्तेः । अपि च निवृत्तिः प्रागभावो वा नाशो वा अत्यन्ताभावो वा ? नाद्यः । अनाद्यज्ञानस्य प्रागभावायोगात् । प्रागभावस्यानादित्वेन ज्ञानसाध्यत्वायोगाच्च । नापि द्वितीयः । तस्य पारमार्थिकत्वे ज्ञानसाध्यत्वानुपपत्तिः, व्यावहारिकत्वे प्रपञ्चवज्ज्ञानबाध्यत्वावश्यकतया प्रतियोग्युन्मज्जनापत्तिः,प्रातिभासिकत्वे तु प्रतियोगिनोऽज्ञानादेः सत्यत्वापत्तिः, प्रातिभासिकाभावप्रतियोगिनः साक्षिणः सत्यत्वदर्शनात् । अत एव न तृतीयः । त्रिविधसत्ताकातिरिक्तस्याऽप्रसिद्धेः । नापि चतुर्थः । तस्य प्रतियोगिसमानाधिकरणत्वेनाकिञ्चित्करत्वादिति । तस्मान्न किञ्चिदेतत् , किन्तु निरतिशयसुखापरोक्ष्यमेव पुरुषार्थः । निरतिशयत्वं तु स्वं प्रत्यनावृतभासकचैतन्याभेदरूपापरोक्षत्वम् । अनावृतत्वं च स्वं प्रति ज्ञाननेति केचित् । तदपि न सम्यक् । अनावृतत्वस्यावरणाभावघटितार्थत्वेन तद्दोषतादवस्थ्यात् , अतः सर्वस्याप्यज्ञाननाशद्वारकफलत्वात् अनिर्वाच्यत्वमेवेत्याशयेनाह—यद्यपीति । (१)*स्वरूपेति । परिपूर्णानन्दरूप-

(१) *अयमर्थः यद्यपि अविद्यानिवृत्तिरात्मानात्मा वेति विकल्पे न किमपि फलं

चैतत्कथमिति विकल्पनीयम् । सर्वद्वैतोपमर्देन विकल्पासहिष्णुत्वात् । न हि दृष्टेऽनुपपन्नं नाम । तथा

न्यायरत्नावली ।

चरममनोवृत्तिफलत्वेन प्रातीतिकेन विशिष्टम् । तथा च प्रातीतिकमज्ञाननिवृत्तित्वं पूर्णानन्दे प्रकाशमाने जीवन्मुक्तेन कल्पितम् । तद्विशिष्टस्य जन्यतारूपं फलत्वमपि प्रातीतिकम् । तदुक्तं वार्तिके—

निवृत्तिरात्मा माहस्य ज्ञातत्वनोपलक्षितः ।

इति भावः । न चैतत्कथमिति । वियदादिसर्वद्वैतोपमर्दरूपे कैवल्ये कल्पितस्य निवृत्तित्वस्यासम्भवात्सत्यमेव तद्वाच्यम्, अन्यथा ह्यविद्यैव स्यादिति भावः । विकल्पासहिष्णुत्वात्—आत्मनो विकल्पविषयवैशिष्ट्यस्यासहत्वात् । तथाचोक्तं निवृत्तित्वं जीवन्मुक्तिकाल एवास्ति न तु विदेहकैवल्य इति नोक्तदोष इति भावः । ननु तत्रापि किं मानम् ? तत्राह—न हीत्यादि । 'या या प्रमा सा सा समानविषयकाज्ञानतत्प्रयुक्तवत्कालपूर्वत्वशून्यक्षणवृत्तिर्भवति, यथा शुक्त्यादिप्रमे'ति नियमे दृष्टे प्रत्यक्षादि-

नारायणी ।

स्वरूपावाप्तिः* विज्ञानफलं शास्त्राचार्यप्रसादजचरममनोवृत्तिफलम् तस्य च तत्त्वज्ञानात्पूर्वं स्वरूपस्य बद्धत्वमिव तत्त्वज्ञानादूर्ध्वं फलत्वमपि जीवन्मुक्तिदशायां प्रातीतिकमेवेति भावः । तत्त्वज्ञानादूर्ध्वम् अज्ञानदृष्टिशून्यो जीवन्मुक्तः स्वरूपेऽज्ञाननिवृत्तित्वं परिकल्प्य तद्विशिष्टस्य ज्ञानजन्यत्वरूपं फलत्वमपि कल्पयन् कृतकृत्यो भवति स्वकल्पिताज्ञानतत्प्रयुक्तवत्कालपूर्वत्वशून्यक्षणवृत्तिर्भवतीति यावत् । फलत्वकल्पनैव कथमिति नाशङ्कनीयमित्याह—नचैतदिति । विकल्पेति । विकल्पविषयत्वायोगात् जीवन्मुक्तिकाले स्वानुभवसिद्धस्य सकलविकल्पातीतस्य फलस्य विकल्पवैशिष्ट्यबाधादिति भावः । विकल्पातीतत्वमेव कथं तत्राह—नहीति । दृष्टे प्रत्यक्षसिद्धे अनुपपन्नं नाम युक्तिविरुद्धं किञ्चित् अनुभवविरुद्धस्तर्को नोपादेय इति भावः । प्रातीतिकफलत्व-

निरूपयितुं शक्यते तथापि स्वरूपावबोधो विज्ञानफलमनुभूयते* विज्ञानफलमित्यादिसममग्रे । अयं चिह्नितः पाठो भिन्नः खपुस्तके ।

च श्रुतिः—

न निरोधो न चोत्पत्तिर्न बुद्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥

न्यायरत्नावली ।

सिद्धे हि यस्माद्वैशिष्ट्यासहत्वमात्मनो बोधयन्ती सती नानुपपन्ना । ननु नानाज्ञानपक्षे दृष्टान्तसम्भवात्तादृशनियमः प्रत्यक्षादिसिद्धः ' एकाज्ञानपक्षे तु का गतिः ? तत्राह–तथा च श्रुतिरिति । तथा विकल्पासहत्वमात्मनो बोधयन्ती सती ज्ञानात् ब्रह्मभावं दर्शयति द्वैतजातं च वारयतीत्यग्रेऽन्वयः । निरोधः नाशः, उत्पत्तिः जन्म, प्रपञ्चस्येति शेषः । बुद्धस्तत्त्वदर्शी । साधकः श्रवणादिमान् । मुक्तः अज्ञाननिवृत्तिमान् । परमार्थतेति भावार्थो विवक्षितः । निरोधादिशून्यं परमार्थ इत्युक्तं तच्छून्यत्वं विकल्पासहत्वं न लभ्येत, ततस्तथानुक्त्वा इत्येषा परमार्थतेत्युक्तम् । इतिशब्देन तु सर्ववैशिष्ट्यासहं शुद्धं चिद्रूपमुक्तम् । (१)तत्

नारायणी ।

कल्पना श्रुतिसिद्धापीत्याह—तथेति । निरोधः नाशः उत्पत्तिः जन्म, प्रपञ्चस्येति शेषः। बद्धः अनाद्यज्ञानवान्, साधकः तन्निवृत्त्यनुकूलश्रवणादिमान्, मुमुक्षुः मुक्तः स्यामितीच्छावान्, मुक्तः अज्ञाननिवृत्तिमान्। परमार्थतेति । भावार्थोऽविवक्षितः निरोधादिशून्यं परमार्थ

(१) तत्सर्वमभवदिति । एवकारानुषङ्गेण सर्वं दृश्यजातं ब्रह्मैव । न तु ज्ञातं ब्रह्म दृश्यतत्कालपूर्वकालवृत्तीत्यर्थः । 'सविशेषणे हीं'ति न्यायात् । ब्रह्मज्ञाने तादृशपूर्वकालवृत्तित्वाभावलाभः । यथा हि 'अयं पाण्डित एव न त्वस्य पाण्डित्यं चारु' इत्यादौ न त्वित्यादिनैवकारार्थस्यानुवादबलादेवकारस्य तादृशानुवादसमानार्थकत्वम् ,तथा 'यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः । तत्र को मोहः कः शोक एकत्वमनुपश्यत' इत्यादौ क इत्यादिनैवकारार्थानुवादबलात् ब्रह्मज्ञाने मोहादिपूर्वकालवृत्तित्वाभावः एवकारेण बोध्यत इति निर्णीयते । तथा च हेत्वर्थकशतृप्रत्ययेन पूर्वकालवृत्तिताघटितहेतुत्वोपस्थापनात् पूर्वकालवृत्तितासम्बन्धेन मोहाद्यभावधीसम्भवेन मोहादिकारणद्वैतसत्त्वे मोहादेरुक्ताभावानुपपत्त्या च द्वैतकालपूर्वकालवृत्तित्वाभावस्य ब्रह्मज्ञाने धीसम्भव इति ध्येयम् । इति पाठान्तरं छपुस्तके ।

'ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवदि'त्याद्याः । पूर्वमपि ब्रह्म-

न्यायरत्नावली ।

सर्वमभवदिति । सर्वं दृश्यजातं ब्रह्माभवदित्यर्थः । सर्वदृश्यानां ज्ञातब्रह्मभवनं स्वकालपूर्वकालवृत्तिभिन्नतया ज्ञातं यत् ब्रह्मतादात्म्यम् । शुक्तौ ज्ञातायां सत्तामारोपितं रजतादिकं नाभवदित्यादौ तादृशरजतादावुक्तभिन्नाया ज्ञातशुक्तेस्तादात्म्यं बुध्यते । अत एव 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत् तत् केन कं जिघ्रेदि'त्यादौ सर्वदृश्यानामात्मभवनमुक्त्वा अर्थात् प्राप्तं तत्त्वज्ञात्मनि स्वकालपूर्ववृत्तितासम्बन्धेन दृश्यादेरत्यन्ताभावमाक्षेपार्थकाकिंशब्देन श्रुतिरनुवदति । अस्येतिपदस्य तत्त्वसाक्षात्कारवदर्थकस्यानुषङ्गात्, किमित्यस्यापि विभक्तिव्यत्ययेन लिङ्गव्यत्ययेन चानुषङ्गात्, को ज्ञाता, किं यथा स्यात् तथा पश्येदित्यर्थलाभेन तत्त्वसाक्षात्कारवदात्मस्वरूपे द्रष्टृदृश्यदर्शनतत्साधनानामुक्तसम्बन्धेनात्यन्ताभावबोधः । एवं तत् केन कं जिघ्रेदित्यादावपि । किञ्च 'यत् फलं श्याममासीत्, तदिदानीं रक्तमेवाभवत्, न तु स्वनिष्ठश्यामतया समकालम्, नापि पूर्वकालम्' इत्यादौ नत्वित्यादिना तदिदानीमित्यादेरर्थानुवादात् तयोस्तुल्यार्थकत्वम् । रक्तादिपदस्य उक्तकालादिभिन्ने लक्षणा-

नारायणी ।

इत्युक्ते तच्छून्यत्वविकल्पासहत्वादिकं न लभ्येत ततस्तथाऽनुक्त्वा परमार्थतेत्युक्तम्, एतच्छब्देन सर्वनाम्ना सर्ववैशिष्ट्यासहं शुद्धचिद्रूपमुक्तम् । श्रुत्यन्तरमाह—ब्रह्म वेति । अग्रे-प्राग्बोधात्-वाः अपि, इदं-शरीरस्थं प्रमात्रादि साक्षिभूतं त्वंपदलक्ष्यं ब्रह्मैवासीन्न सांसारिकधर्मान्विततया, तथाच शुद्धचिदानन्दैकरसमेव त्वमासीरिति गुरुणा बोधितमात्मानं तदेवास्थूलादिलक्षणलक्षितं ब्रह्मैव अवेत् ज्ञातवान् । एवकारोत्राविनाभावरूपाभेदं वारयति ब्रह्माभिन्नं नावेदित्यर्थः । ज्ञानाकारमाह—अहमिति । ज्ञानफलमाह—तस्मादिति । तस्माद्विज्ञानात् सर्वं भो-

स्वीकारेण तदन्ययोगव्यवच्छेदार्थकस्यैवकारस्य तादृशसमकालादितादात्म्यव्यवच्छेदबोधकत्वेन च तत्सम्भवः । तथा 'तत् केने'त्याद्यनुवादतुल्यार्थकत्वात् 'यत्र त्वस्ये'त्यादेरुक्तार्थकत्वं स्वीक्रियते । लक्षणया आत्मपदोपस्थापितस्यापि तस्य दृश्यकालपूर्ववृत्तिभिन्नस्यात्मनो भिन्नस्यास्य दृश्यकालपूर्ववृत्तितादात्म्यव्यवच्छेदरूपस्य अन्ययोगव्यवच्छेदस्य एवकारेण बोधसम्भवात् । विशेषणगतैवकारस्यापि शिरोमण्यादिभिरप्यन्ययोगव्यवच्छेदबोधकत्वस्वीकारात् । तस्य अयोगव्यवच्छेदबोधकत्वस्वीकारेऽपि दृश्यकालपूर्ववृत्तिभिन्नतादात्म्यायोगव्यवच्छेदबोधकत्वसम्भवात् यत्रेत्यनेनोक्ते तत्त्वसाक्षात्कारकाले दृश्येषु तादृशव्यवच्छेदयोस्सत्त्वात् । यदि त्वात्मैव विशेष्योऽत्र स्वीक्रियते, अत एव 'यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानत' इत्यत्राभूदित्येकवचनान्तमित्यालोच्यते, तदा तादृशभिन्ने भूतपदमेव लाक्षणिकम् । तत्सर्वमभवदित्यत्रानुवादाभावेऽप्युक्तवाक्यसमानार्थत्वाय तादृशार्थकत्वम् । 'सविशेषणे ही'तिन्यायात् ब्रह्मज्ञाने तादृशपूर्ववृत्तित्वलाभः । एवं 'यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः । तत्र को मोहः कश्शोक एकत्वमनुपश्यत' इत्यादौ क इत्यादिना एवकारार्थवादबलात् ब्रह्मज्ञाने मोहादिपूर्वकालवृत्तित्वं एवकारेण बोध्यत इति निर्णीयते । हेत्वर्थकशतृप्रत्ययेन पूर्वकालवृत्तिताघटितहेतुत्वोपस्थापनात् पूर्वकालवृत्तितासम्बन्धेन मोहाद्यभावधीसम्भवेन मोहादिकारणद्वैतसत्त्वे मोहादेरुक्ताभावानुपपत्त्या द्वैतवत्कालपूर्वकालावृत्तित्वस्य ब्रह्मज्ञाने धीसम्भवः । यथाश्रुते साक्षात्सम्बन्धेन मोहादेरभावस्यात्मनि बोधे जीवन्मुक्तेः बाधात् । विवक्षितार्थे तु चरमज्ञाने पूर्वज्ञानहेतुकस्य उक्तकालावृत्तित्वस्य धीसम्भव इति ध्येयम् । इत्याद्येत्याद्यपदेन 'ब्रह्मवेद ब्रह्मैव भवती'त्यादिश्रुतिसङ्ग्रहः ।

स्वरूपस्यैव सतो जीवस्य ज्ञानाद्ब्रह्मभावं दर्शयति । सर्वं च द्वैतं वारयति ॥ ७ ॥

नन्वात्मनः स्वप्रकाशचैतन्यरूपत्वे सर्वदा भासमानत्वेन जाग्रत्स्वप्नसुषुप्त्यादिव्यवस्था कथम् ? न च भ्रान्त्येव व्यवस्थेति वाच्यम् । तथा सति सर्वस्यैव स्वा-

न्यायरत्नावली ।

ज्ञानादित्यादि । ज्ञानात् ब्रह्मभावो नाम ज्ञायमानजीवस्वरूपस्य ब्रह्माज्ञानकालपूर्वत्वशून्यक्षणवृत्तित्वम् । वारयतीत्यत्रापि ज्ञानादित्यनुषज्यते । तथा च ज्ञानस्वरूपं द्वैतवत्कालपूर्वत्वशून्यक्षणवृत्तितया बोधयतीत्यर्थः । अथवा ननु प्रातीतिकफलत्वाविशिष्टोद्देशेन मुमुक्षूणां सर्वत्यागपूर्वकं श्रवणादौ प्रवृत्त्यनुपपत्तिः । प्रवृत्तिकाल एव 'आत्मसुखमनादि तस्य फलत्वं प्रातीतिकमि'ति ज्ञानसम्भवेन सिद्धत्वेन ज्ञाते आत्मसुखे इच्छानुदयात् तत्राह— न हीत्यादि । दृष्टे अज्ञानतत्प्रयुक्तविरोधिमनोवृत्तिविषयत्वाविशिष्टात्मसुखे परमपुरुषार्थ उद्देश्ये सम्भवति सति श्रवणादौ प्रवृत्त्यादिकं न ह्यनुपपन्नमित्यर्थः । आत्माभिन्नस्य सर्वस्यापरमार्थत्वेन तद्विरोधित्वमात्माकारवृत्तेर्युक्तमित्याशयेन न निरोध इत्याद्युक्तम् । तस्यामुक्तविरोधित्वबोधकं 'ब्रह्म वा' इत्यादिकमित्याशयेन तदुक्तम् । तदेतत् अस्माभिरेतद्ग्रन्थादावेवोक्तम् ॥ ७ ॥

भ्रान्त्यैवेति । यथा स्वप्नमध्ये जाग्रदादिकं भिन्नतया भ्रा-

नारायणी ।

कृज्ञातं तद् ब्रह्म अविद्यातत्कार्याभिमाननिवृत्त्याऽनुगतसच्चिदानन्दात्मकम् अभवत् भवति । अधिकं महद्व्याख्यानेनुसन्धेयम् ॥ ७ ॥

अष्टमं पद्यमवतारयति—नन्विति । आत्मनः 'योयं विज्ञानमय' इति श्रुतिबोधितस्य मनआद्यतिरिक्तस्य । स्वप्रकाशेति । संविदन्तरानपेक्षत्वे सत्यपरोक्षव्यवहारचिदात्मत्वे(१) । सर्वदेति । 'अहं न प्रकाश'इत्यज्ञानभासकत्वेन व्यवहारविषयत्वे, सुषुप्त्यादीत्यादिना तत्तदवस्थाकृतभोगपरिग्रहः । व्यवस्था-असाङ्कर्यम् । भ्रान्त्येवेति । यथा स्वप्नेजाग्रदादि-

(१) अपरोक्षव्यवहारं विषयत्वे, विषयत्वयोग्यत्वे इत्यन्यतरपाठस्यावश्यकतात्र ।

प्नत्वापत्तिरिति चेन्न । लक्षणतस्त्रयाणामपि स्वप्नत्वेऽपि प्रतिभासतोऽविद्याकृतविशेषसम्भवात् सदसद्विलक्षणत्वेन च सविशेषत्वाद्व्यवस्थोपपत्तेः । परमार्थतस्तु न कापि व्यवस्थेत्याह—

न जाग्रन्न मे स्वप्नको वा सुषुप्ति-
र्न विश्वो न वा तैजसः प्राज्ञको वा ।
अविद्यात्मकत्वात्त्रयाणां तुरीय-
स्तदेकोऽवशिष्टश्शिवः केवलोऽहम् ॥ ८ ॥

अत्र लयक्रमेण पौर्वापर्यव्यपदेशः । तथा हि—अ-

न्यायरत्नावली ।

न्त्या कल्पितं तथेत्यर्थः । लक्षणतः—आविद्यकत्वादिरूपेण । त्रयाणामपीति । 'त्रयमप्येतत् स्वप्नं सुषुप्तं मायामात्रं त्रयस्त्वमा' इत्यादिश्रुतिभिरिपि तथोक्तम् । त्रयं जाग्रत्स्वप्नसुषुप्तिरूपम् । एवं त्रय इत्यपि । प्रतिभासतः व्यवहारतः । ननु मिथ्याभूतस्य सदन्यत्वेऽपि सविशेषत्वस्वीकारे तच्छब्दस्यापि स स्यात् तत्राह—सदित्यादि । लयक्रमेणेति । जाग्रद्विश्वयोः स्वप्नतैजसयोः

नारायणी ।

कमसाङ्कर्येणैव कल्पितं तथेत्यर्थः । सर्वस्यैव अवस्थात्रयस्यापि । लक्षणतः आविद्यकत्वादिरूपेण, त्रयाणां—जाग्रत्स्वप्नसुषुप्तीनां स्वप्नत्वेपि, त्रयमप्येत्स्वप्नं सुषुप्तं मायामात्रमि'ति श्रुतिसिद्धस्वप्नत्वेपि । प्रतिभासतः—व्यवहारतः । अविद्याकृतेति । अविद्याकृतो यो विशेषोऽविद्यातिरिक्तदोषजन्यत्वरूपस्तस्मात् । सविशेषत्वात्—आत्मज्ञानातिरिक्तज्ञाननाश्यत्वे सति सत्त्वात् आत्मज्ञानातिरिक्तज्ञानाबाध्यत्वे सति सत्वाच्च । व्यवस्थोपपत्तेः—असाङ्कर्योपपत्तेः । तत्राद्यस्य स्वप्ने द्वितीयस्य जागरणे सत्त्वादिति भावः । ननु परमार्थसदन्यत्वेपि यदि मिथ्याभूतसत्ताविशेषरूपं सविशेषत्वं तदाऽसन्नृशृंगस्य विकल्पोल्लिखिता सत्तापि स्यात्तत्राह—असद्विलक्षणेनेति । अपरोक्षतया प्रतीयमानत्वादिति भावः । लयक्रमेणेति । जाग्रद्विश्वयोः स्वप्नतैजसयोः सुषुप्तिप्राज्ञयोर्लय इति क्रमसदृशक्रमेणेत्यर्थः ।

स्मिन्मते पदार्थो द्विविधः, दृक् दृश्यं च। अन्येषां वादि-
परिकल्पितानां पदार्थानामत्रैवान्तर्भावात्। तत्र दृक्प-
दार्थः आत्मा पारमार्थिक एकः सर्वदैकरूपोऽप्यौपाधि-
कभेदेन त्रिविधः, ईश्वरो जीवस्साक्षी चेति। तत्र का-
रणीभूताज्ञानोपाधिरीश्वरः। अन्तःकरणतत्संस्कारावच्छि-
न्नाज्ञानोपहितो जीवः। प्रपञ्चितं चैतदधस्तात्। अवि-
द्याप्रतिबिम्बेश्वरपक्षे बिम्बचैतन्यं साक्षी, बिम्बेश्वरपक्षे
तु बिम्बप्रतिबिम्बमुखानुगतमुखस्वरूपवज्जीवेश्वरानुगत

न्यायरत्नावली।

तयोस्सुषुप्तिप्राज्ञयोर्लय इतिक्रममदृशक्रमेणेत्यर्थः। बिम्बेश्वरे-
त्यादि। यथा बिम्बत्वप्रतिबिम्बत्वोपहितरूपाभ्यां मुखं द्वेधा

नारायणी।

पूर्वं चापरं चेति पूर्वापरे तयोर्भावः पौर्वापर्यम्प्रथमपश्चाद्भावस्तेन निर्देशः प्रथमतः कार्यस्य जाग्रदादेः पश्चात्कारणस्य सुषुप्त्यादेः कथनम्। अत्रोक्तिलाघवात् लयक्रम एव प्रागुक्तः कार्यस्य कारणे लयप्रदर्शनेनैव कार्यकारणभावलाभात्, सृष्टिक्रमनिर्देशे तु लयक्रमस्य नैयायिकादिमतवारणाय पृथगुक्तिरवश्यं वाच्या तथाच गौरवं स्यादिति भावः। शिष्बुद्धिवैशद्याय सकलवेदान्तरहस्यं प्रदर्शयितुं टीकाकारो भूमिकामारचयति—तथाहीति। अस्मन्मते—वेदान्तमते, पदार्थः—पदस्यार्थः पदाभिधेय इति यावत्। द्विविधः—द्विप्रकारः। दृगिति। निरुक्तस्वप्रकाशत्वेन दृशः साक्षिभास्यत्वाभावात् पृथङ्निर्देशः। पदार्थत्वं दृग्दृश्योभयान्यतरत्वव्याप्यम्, दृक्त्वं दृश्यत्वं चोभयं पदार्थविभाजकमिति यावत्। ननु वैशेषिकादिभिर्द्रव्याद्यन्यतमत्वादिना पदार्थत्वव्यापकत्वाङ्गीकारात्कथमेतदित्याशङ्क्याह—अन्यति। अत्रैव दृग्दृश्ययोरेव अन्तर्भावं दर्शयिष्यन्नाह—तत्रेति। तत्र दृग्दृश्ययोर्मध्ये, आत्मा—अनात्मनामधिष्ठानम्, पारमार्थिकः—स्वान्यूनसत्ताकपरिच्छेदवद्भिन्नः, एकः—अद्वीतीयः, सर्वदैकरूपोपि—कूटस्थनित्योपि (औपाधिकभेदेन—उपाधिकृतभेदेन,) त्रिविधः—त्रिप्रकारः। तदेवाह—ईश्वर इति। तत्रेशादिपदप्रवृत्तिनिमित्तं प्रसङ्गादाह—तत्रेत्यादि। तत्र—ईश्वरादिषु, अधस्तात्प्रथमश्लोकव्याख्याने। तत्र यो विशेषस्तमाह—बिम्बेश्वरपक्षेति। दर्पणस्य ग्रीवास्थमुखयोर-

सर्वानुसन्धातृ चैतन्यं साक्षीत्युच्यते। (१)वार्तिककारमते त्वीश्वर एव साक्षीति द्वैविध्यमेव जीवेश्वरभेदेन दृशः। तत्रेश्वरोऽपि त्रिविधः। स्वोपाधिभूताविद्यागुणत्रयभेदेन विष्णुब्रह्मरुद्रभेदात्। कारणीभूतसत्त्वगुणावच्छिन्नो विष्णुः पालयिता। कारणीभूतरजउपहितो ब्रह्मा स्रष्टा। हिरण्यगर्भस्तु महाभूतकारणत्वा-

न्यायरत्नावली।

भिद्यते। दर्पणाद्युपाध्यन्तर्गतत्वे सत्यौपाधिकपरिच्छेदशून्यत्वे च सति बहिस्थितस्वरूपकत्वं प्रतिबिम्बत्वम्। बिम्बस्य वारणायाद्यम्। घटाकाशादिवारणाय द्वितीयम्। दर्पणाद्यन्तर्गततदवयववारणाय तृतीयम्। उपाध्यनन्तर्गतत्वे सति उपाध्यन्तर्गतरूपाभिन्नबहिस्थितत्वं बिम्बत्वमिति विवेकात्। तथोक्तोपहितमुखद्वयात् शुद्धरूपं मुखं भिद्यते। शुद्धस्योपहितकल्पनाधिष्ठानत्वेन ततो भेदस्यावश्यकत्वात्। तथा च बिम्बत्वप्रतिबिम्बत्वोपहितजीवेश्वराभ्यां शुद्धचिदन्या। विशिष्टकेवलयोर्भेदाभेदस्वीकारेण तस्यां तदुभयाभेदस्यापि स्वीकारात् तदुभयानुस्यूतापि सेति भावः। जीवस्यापि कार्यभूतमनोगतसत्त्वादिगुणावच्छिन्नत्वेन तत्रातिव्याप्तिवारणायाह—कारणीभूतेति। अका-

नारायणी।

नुगतं यन्मुखं स्वं स्वरूपं मुखाकृतिः तद्वज्जीवेश्वरयोरन्तःकरणावच्छिन्नयोरनुगतं यत्सर्वानुसन्धातृ चैतन्यम् उभयोपाध्युपलक्षित सर्वाधिष्ठानचिन्मात्रं साक्षीत्यर्थः। तत्र विशिष्टकेवलयोर्भेदाभेदाङ्गीकारात् बिम्बप्रतिबिम्बाभ्यां शुद्धस्य भिन्नत्वं तदनुस्यूतत्वं च द्वयमप्यविरुद्धमिति भावः। वाचस्पतिमते विशेषमाह—वाचस्पतीति। स्वोपाधीति ईश्वरोपाधिभूतायाः मायायाः सत्त्वरजस्तमोगुणानां भेदेन जीवस्यापि कार्यीभूतमनोगतसत्त्वगुणावच्छिन्नत्वात्तत्रातिव्याप्तिवारणाय। कारणीभूतेति-

(१) वाचस्पतिमते इति कखपुस्तकयोः।

भावात् न ब्रह्मा, तथापि स्थूलभूतस्रष्टृत्वात् (१)क्वचि-द्ब्रह्मेत्युपचर्यते । कारणभूततमउपहितो रुद्रः संहर्ता । एवं चैकस्यैव चतुर्भुजचतुर्मुखपञ्चमुखाद्या पुमाकाराः

न्यायरत्नावली ।

र्यभूतेत्यर्थः । क्वचिदिति ।

स वैशरीरी प्रथमः स वै पुरुष उच्यते ।
आदिकर्ता स भूतानां ब्रह्माग्रे समवर्त्तत ।
तस्मादेतत् ब्रह्म नामरूपमन्नं च जायते ।

इत्यादिश्रुतौ,

ब्रह्मतत्त्वं तपो वेदाः ब्रह्मा विप्रः प्रजापतिः ।

इत्यादिकोशे चेत्यर्थः । एवं चेति । चतुर्भुजादिशरीरकार्यपरि-पालनादेर्विष्ण्वादिकर्तृकत्वे चेत्यर्थः । एकस्यैवेति । ननु चतुर्भु-जाकारो विष्णोरवतारः, चतुर्मुखाकारो ब्रह्मणः, पञ्चमुखाकारो-रुद्रस्य, लक्ष्म्याकारो विष्णोः, भारत्याकारो ब्रह्मणः भवान्याकारो रुद्रस्येति विशिष्य वक्तव्यम्, किमिहैकस्येत्युक्तम् ? उच्यते । चतु-र्भुजशरीरस्य पालनमेव कार्यमिति वक्तुमशक्यम्, दैत्यसंहारा-दिकार्यस्य दर्शनात् । तस्य देवरक्षणफलकत्वेऽपि तमःकार्यत्वेन

नारायणी ।

अकार्यीभूतेत्यर्थः । क्वचिदिति ।

स वै शरीरी प्रथमः स वै पुरुष उच्यते ।
आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत ॥
तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते ।

इत्यादिश्रुतौ । एवं चेति । चतुर्भुजादिशरीरकार्यपालनादेर्विष्ण्-वादिकर्तृकत्वे चेत्यर्थः । एकस्यैवेति । मुख्यस्यैव कारणोपाधिकस्ये-त्यर्थः । ननु चतुर्भुजाकारो विष्णोरवतारः, चतुर्मुखाकारो ब्रह्मणः, पञ्चमुखाकारो रुद्रस्य, लक्ष्म्याकारो विष्णोः, भारत्याकारो ब्रह्मणः, भवान्याकारो रुद्रस्येति विशिष्यवक्तव्यं कथमेकस्योक्तम् ? उच्यते ।

(१) ब्रह्म तत्त्वं तपो वेदाः ब्रह्मा विप्रः प्रजापतिरिति कोशादित्यर्थः ।

न्यायरत्नावली।

रुद्रकार्यत्वात्। एवं पञ्चमुखशरीरे त्रिपुरसंहारादितमःकार्यस्य जगत्पालनफलकत्वेन विष्णुकार्यत्वदर्शनात् न रुद्रकार्यनिर्णयसम्भवः। एवं भवान्यादेः दैत्यादिसंहर्त्रीत्वेऽपि पालनरूपविष्णुकार्यदर्शनात् हरिवंशादौ विष्ण्वादिरूपत्वस्य स्पष्टमुक्तत्वाच्च न रुद्रादिरूपत्वनिर्णयः। अत एव सरस्वत्यादेरपि पालनादिकार्यं पुराणादौ तत्र तत्रोक्तमिति न ब्रह्मादिरूपत्वनिर्णयः। तस्मात् चतुर्भुजादिशरीरं रुद्रादेरपि। एतदभिप्रायेणैव—

हरिरूपी महादेवो लिङ्गरूपी जनार्दनः।
ईषदप्यन्तरं नास्ति भेदकृन्नरकं व्रजेत्।

इत्यादि ब्रह्मनारदीयस्थानि,

नामानि तव गोविन्द यानि लोके महान्ति च।

तान्येव मम'इत्यादिसहस्रनामभाष्योदाहृतानि च वचनानि समञ्जसानि। अन्यथा गुणभेदेन भेदसत्त्वात् विष्णुशिवादिपदानां शिवविष्ण्वादिनामत्त्वासम्भवाच्चासङ्गतेः। उक्ताभिप्रायादरे तु सत्त्वगुणावच्छिन्नचित इव चतुर्भुजशरीरवृत्ति-

नारायणी।

चतुर्भुजशरीरिणः पालनकर्तृताप्रयोजकं विष्णुत्वमेवेति वक्तुमशक्यम्। दैत्यसंहारादिरूपरुद्रकार्यदर्शनात्। तस्य देवरक्षणफलकत्वेऽपि तमःकार्यत्वेन रुद्रकार्य्यत्वात्। एवं पञ्चमुखशरीरावच्छिन्नस्य त्रिपुरादिसंहर्तृत्वेऽपि न रुद्ररूपत्वनिर्णयः। 'प्रज्ञा च तस्मात्प्रसृता पुराणी'ति श्रुत्या विज्ञानमुक्तिदानादिरूपविष्णुकार्यप्रतीतेः। ज्ञानादीनां सत्त्वकार्यत्वेन विष्णुकार्यत्वात्। एवं भवान्यादेर्दैत्यादिसंहर्तृत्वेऽपि पालनरूपविष्णुकार्यप्रतीतेर्न रुद्ररूपत्वनिर्णयः। एवं सरस्वत्या अपि ज्ञानपालनादिरूपविष्णुकार्यप्रतीतेर्न ब्रह्मरूपतानिर्णयः। तस्मात्सर्वाणि शरीराणि सर्वेषामपि पालनादिरूपस्य चतुर्भुजादिशरीरावच्छिन्ने क्लृप्तकार्यस्य रुद्रादावपि प्रतीतेः। एतदभिप्रायेणैव—

हरिरूपी महादेवो लिङ्गरूपी जनार्दनः।
ईषदप्यन्तरं नास्ति भेदकृन्नरकं व्रजेत्।

न्यायरत्नावली ।

जातिविशेषविशिष्टस्यापि हरिशब्दार्थत्वात् । अन्यथा श्रुतिपुराणादौ तत्तच्छब्देन तन्मात्रव्यवहारानुपपत्तेः । महादेवशब्दितस्य तमोऽवच्छिन्नचैतन्यस्य चतुर्भुजशरीराभिमानित्वात् महादेवाभिमानविषयस्य लिङ्गस्य पालनरूपसत्त्वगुणकार्याय जनार्दनशब्दितसत्त्वावच्छिन्नचिद्रूपविष्ण्वभिमानविषयत्वाच्च हरीत्यादेराञ्जस्यम् । चतुर्भुजशरीरस्येव तदभिमानिनोस्मत्त्वतमोऽवच्छिन्नचिद्रूपहरिहरयोरपि हरिनारायणादिशब्दार्थत्वान्नामानीत्यादेरप्याञ्जस्यम् । कारणीभूतसत्त्वाद्यवच्छिन्नचितां विष्ण्वादिरूपत्वं मैत्रायणीयशाखायां श्रूयते—'अथ यो ह खलु वा वास्य तामसोंऽशोऽसौ (१)स ब्रह्मचारिणो योऽयं रुद्रोऽथ यो ह खलु वा वास्य राजसोंऽशोऽसौ स ब्रह्मचारिणो योऽयं ब्रह्माऽथ यो ह खलु वा वास्य सात्त्विकोंऽशोऽसौ स ब्रह्मचारिणो यो यं विष्णुस्स वा एष पुरुषः एकस्त्रिधाभूत' इत्यादि । तत्र दीपिका व्याख्या । तामसः तमः प्रधानोंशः तमउपाधिको विशेषः, हे ब्रह्मचारिणः । एवमग्रेपीति । तथा भवान्यादीनामपीश्वरत्वमाश्वलायनैरामायते 'अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः यं कामये तन्तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधामहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे

नारायणी ।

इत्यादिबृहन्नारदीयवाक्यानि । तस्मादेकस्यैवेश्वरस्य सत्त्वगुणावच्छिन्नत्वादिनेव चतुर्भुजादिशरीरावच्छिन्नत्वादिना हरित्वादिकमिति संक्षेपः । एतच्च स्पष्टं मैत्रायणीयशाखादौ । 'अथ यो ह खलु वा वास्य तामसोंशोऽसौ स ब्रह्मचारिणो योऽयं रुद्रो अथ यो ह खलु वा वास्य राजसोंशोऽसौ स ब्रह्मचारिणो योऽयं ब्रह्माथ यो ह खलु वा वास्य सात्त्विकोंशोऽसौ स ब्रह्मचारिणो योऽयं विष्णुः स वा एष एकस्त्रिधाभूत' इत्यादि । अत्र च ब्रह्मचारिण इत्यादि

(१) अत्र स ब्रह्मचारिण इत्यादि सर्वत्र सपदरहितः पाठो गपुस्तके, परन्तु मन्त्रगतं पदं दृष्ट्वा प्रपूरितं सर्वत्राऽस्माभिः ।

न्यायरत्नावली ।

हन्त वा उ अहं जनाय समरं कृणोम्यहं द्यावापृथिवी आविवेश । अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वन्तस्समुद्रे ततोऽवतिष्ठे भुवनानि विश्वोतामूं द्यां वर्ष्मणोपस्पृशामि । अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वा । परो दिवा पर एना पृथिव्यै तावती महिना सञ्च बभूवे'ति भवान्याः। (१)अहमित्यादि। *(२)अनृणस्य ऋषेः दुहिता वाक् 'सैव भवान्या अवतारो वैदिकेषु प्रसिद्धेः । सा जगत्कारणतया आत्मानमुक्तवती–अहमेवेदं वदामि किं देवैर्मानुषैश्च सेवितं ब्रह्म यं पुरुषमनुकाम्पितं कामये इच्छामि तमुग्रं सर्वोत्कृष्टं कृणोमि करोमि, ब्रह्माणं स्रष्टारम् ऋषिमतीन्द्रियार्थदर्शिनं सुमेधां सुप्रज्ञं रुद्राय रुद्रस्य आतनोमि ज्यायुक्तं करोमि, ब्रह्मद्विषो ब्राह्मणद्वेष्टारं शरवे शरुं हिंसकं हन्त वा उ हन्त वै हन्तुम्, उः पादपूरणार्थः, समरं सङ्ग्रामं कृणोमि करोमि, किमर्थं जनाय मदीयस्तवादियुक्तजनाय तच्छरीरमाविश्य तदीयजयाय करोमि, "यथा कुरुपाण्डवयुद्धे श्रीकृष्णप्रेरितेनार्जुनेन स्तुता तदीयजयार्थं सङ्ग्रामं कृतवती" द्यावापृथिवी दृश्यमात्रम् आविवेश अन्तर्यामिरूपेण प्रविष्टा, पितरं द्युलोकं सुवे प्रसुवे जनयामि, 'द्यौः पिते'तिश्रुतेः, अस्य भूलोकस्य मूर्धन् मूर्ध्नि

नारायणी ।

सम्बोधनम् अन्यत्स्पष्टम् । एवं भवान्यादीनामीश्वरत्वं केनोपनिषदि

(१) ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियमित्यादि लक्ष्म्याः तस्यास्समुद्रा अधिविक्षरन्ति तेन जीवन्ति प्रदिशश्चतस्रः । ततः क्षरत्यक्षरन्तद्विश्वमुपजीवति । प्रणो देवी सरस्वती वाजेभिर्वाजनीवती । धीनामवित्र्यवित्वित्यादि सरस्वत्याः । अनुक्रमणिकाव्याख्याने तस्या इति वाचस्समुद्रा आप इत्युक्तम् । एवं भारतपुराणवचनान्यनन्तान्युक्तार्थानि सन्ति । विस्तरभयान्न लिख्यन्ते । इति पाठान्तरं छपुस्तके। अयं पाठ एतस्मिन्नपि पुस्तके अग्रे ३५७ पृष्ठे वर्तत एव ।

(२) अमरणस्येति गपुस्तके । अत ऊर्द्धं सर्वत्र गपुस्तके त्रुटितपाठस्यावश्यकस्य सन्धानं शोधनञ्च कृतम् *.....* एतच्चिह्नद्वयान्तर्गतपाठे क्वचित्क्वचित् ।

न्यायरत्नावली।

समुद्रे ब्रह्मणि अप्सु भूतेषु अन्तर्यामिकारणरूपा मम योनिः यस्यामीक्षणरूपं गर्भं करोमि।

मम योनिर्महद्ब्रह्म तस्मिन गर्भं दधाम्यहम्।

इति गीतोक्तेः, ततः हेतोः विश्वानि भुवनानि अनुतिष्ठं अनुप्रविश्य विविधं तिष्ठामि, उत अपि च वर्ष्मणा मायाशरीरेण वात इव अन्याप्रेरिता सती प्रवामि वर्ते, विश्वानि भुवनानि जनयन्ती दिवा द्युलोकस्य एनाः पृथिव्याः अस्याः भूमेः परः परस्तात् अहं (१)सम्बभूवेति*। एवं श्रुत्यन्तरमपि 'ब्रह्म ह

नारायणी।

श्रूयते (२)विस्तरभयान्न लिख्यते।

(१) सम्बभूव भवामि सर्वदृश्यविलक्षणसच्चिदानन्दरूपेत्यर्थः, महिना महिम्ना एतावतीं अहम्। एवं केन्नेपनिषदि श्रूयते 'ब्रह्म हे'ति घपुस्तके।

(२) 'ब्रह्म ह देवेभ्यो विजिग्ये तस्य ब्रह्मणो विजये देवा अमहीयन्त त ऐक्षन्तास्माकमेवायं विजयोऽस्माकमेवायं महिमेति। तद्धैषां विजिज्ञौ तेभ्यो ह प्रादुर्बभूव तन्न व्यजानत किमिदं यक्ष'मित्यादि। अथेन्द्रमब्रुवन्मघवन्नेतद्विजानीहि किमेतद्यक्षमिति। तथेति तदभ्यद्रवत्तस्मात्तिरोदधे। स तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमानामुमां हैमवतीं तां होवाच किमेतद्यक्षमिति। सा ब्रह्मेति होवाच ब्रह्मणो वा एतद्विजये महीयध्वमि'त्यन्तेन वाक्येन। तत्रायमर्थः। ब्रह्म कर्तृ देवासुरसङ्ग्रामे देवेभ्यो देवानां रक्षणाय देवशरीरेषु प्राविश्य असुरान् विजिग्ये अजयत् ततो देवास्तेन जयेन अमहीयन्त महिमानं प्राप्तवन्तः जितमिति। ततस्ते ऐक्षन्त मिथ्याभिमानं कृतवन्तः अस्माकमस्मत्कर्तृक एवायं विजयः जयप्रयुक्तमहिमा चेति। ततस्तदीक्षणं ब्रह्म विजिज्ञौ ज्ञातवन्तः ततस्तेभ्यो देवेभ्यो पृथगत्यद्भुतरूपेण प्रादुर्बभूव तेषां मिथ्याभिमाननाशाय। तद्रूपं देवा न व्यजानत न ज्ञातवन्तः इदं यक्षं पूज्यं किमिति। ततो देवा अज्ञात्वा इन्द्रमब्रुवन्विजानीहीति किमेतद्यक्षमिति। ततस्तथेति स्वीकृत्य तदभ्यद्रवत् आन्तिके गतः ततस्तस्य स्वस्मिन्मनःप्रणिधानार्थं तिरोदधे अन्तर्ध्यानं कृतवत्। ततः सर्वान् देवान् अज्ञानेनाकुलान् दृष्ट्वा तद् ब्रह्म जगन्मातृरूपेण तस्मिन्नाकाशे प्रादुर्भूतम्। तां स्त्रियमुमानामिकां हैमवतीं हिमवतः दुहितरम् इन्द्र आजगाम किमेतदन्तर्हितं यक्षम् इति पृष्टवान्। ततः सा देवानां हितैषिणी तमुवाच ब्रह्मेति। ब्रह्मणो विजये ब्रह्मकर्तृकविजये महीयध्वं ब्रह्मणोऽस्मासु पक्षपातो नासुरेष्विति महिमानं कुरुथ न तु अस्माभिर्जितमिति जयाभिमानमिति भावः। अत्रोमाया ईश्वरत्वं स्पष्टम्। अनीश्वरदेवाज्ञातपक्षतत्त्वप्रदर्शनोपदेशादिकर्तृत्वोक्तेरिति संक्षेपः। अयं पाठोऽधिकः खपुस्तके।

न्यायरत्नावली ।

देवेभ्यो विजिग्ये तस्य ह ब्रह्मणो विजये देवा अमहीयन्त त ऐक्षन्त अस्माकमेवायं विजयोऽस्माकमेवायं महिमेति । तद्धैषां विजज्ञौ तेभ्यो ह प्रादुर्बभूव तन्न व्यजानत किमिदं यक्षमिती'त्यादि 'अथेन्द्रमब्रुवन्मघवन्नेतद्विजानीहि किमेतद्यक्षमिति । तथेति तदभ्यद्रवत् तस्मात्तिरोदधे । स तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमानामुमां हैमवतीं तां होवाच किमेतद्यक्षमिति । सा ब्रह्मेति होवाच ब्रह्मणो वा एतद्विजये महीयध्वमिति ततो हैव विदाञ्चकार' इति । तत्रायमर्थः-देवासुरयुद्धे देवेभ्यः देवानां रक्षणाय देवशरीरेषु प्रविश्यासुरान्विजिग्ये ब्रह्माजयत् । ततो देवाः तेन जयेन अमहीयन्त तं महिमानं प्राप्तवन्तः अस्माकं अस्मत्कर्तृक एवायं जयः तत्प्रयुक्तमहिमा चेति ऐक्षन्त मिथ्याभिमानं कृतवन्तः । तदीक्षणं ब्रह्म विजज्ञौ ज्ञातवत् । तेभ्यः तेषां मिथ्याभिमाननाशायाद्भुतरूपेण ब्रह्म प्रादुर्बभूव । तद्रूपं देवास्सर्वे न व्यजानन्त किमिदं यक्षं पूज्यं वस्तु किमिति । ततो देवा अज्ञात्वा इदम्मघवन्विजानीहि किमेतद्यक्षमिति । ततः तथेति स्वीकृत्य इन्द्रः तदभ्यद्रवत् तदन्तिके गतः । तस्य स्वस्मिन् मनः प्रणिधानाय तद्यक्षमन्तर्धानं गतवत् । ततस्सर्वदेवानां परमाप्तेन जगन्मातृरूपेण निजरूपान्तरेण अन्तर्धानस्य तस्मिन् आकाशे अवकाशे यत्र ब्रह्म प्रादुर्भूतं तां स्त्रियमुमानामिकां हिमवतो दुहितरमिन्द्र आजगाम, किमेतद्यक्षमिति पृष्टवान् । ततः सा देवानां हितैषिणी तमुवाच ब्रह्मेति । ब्रह्मणो जगदीश्वरस्यैव एतत्, तत्कृत एव असुरविजयः न तु युष्मत्कर्तृकः, तत्रैव यूयम्महीयध्वम् । ब्रह्मणः युष्मासु पक्षपातः नत्वसुरेष्विति स्वीयं महिमानं स्वीकुरुथ जयाभिमानं तु न कुरुथेति । अत्र उमादेव्या ईश्वरत्वं स्पष्टम् । अन्यथा देवानामनीश्वराणां सर्वेषां यक्षाज्ञानस्य पूर्वमुक्तत्वात् ब्रह्मवि-

न्यायरत्नावली ।

ध्याधिष्ठातृत्वेन ईश्वरसहवासशीलसत्त्वेऽपि अनीश्वरत्वात् यक्षतत्त्वोपदेशकर्तृत्वासम्भवात् । एवम्—

'ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्' इत्यादिलक्ष्म्याः ।

तस्यास्समुद्रा अधिक्षरन्ति । तेन जीवन्ति प्रदिशश्चतस्रः ।

ततः क्षरत्यक्षरं तद्विश्वमुपजीवति ।

प्रणो देवी सरस्वती वाजेभिर्वाजिनीवती । धीनामविट्र्यवतु ।

इत्यादि सरस्वत्याः ।

तस्याः वाचः सकाशात् समुद्राः मेघाः नद्यश्च(१)=सम्यक् द्रवति जलमस्मादिति व्युत्पत्तेः=अधि अधिकं प्रभूतम् उदकं विक्षरन्ति वाग्देवतारूपेशप्रेरिता मेघनद्यादयः जलक्षरणादि कुर्वन्तीत्यर्थः । 'एतस्य वा अक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्यस्स्यन्दन्ते । श्वेतेभ्यः पर्वतेभ्यः, प्रतीच्याऽन्या' इति श्रुत्यन्तरात् । ततः पश्चात् तदक्षरप्रेरितमेघादिसम्बन्धि जल क्षरत । सस्यादिकार्यं करोति । विश्वं प्राणि कुलं तदुपजीवति । सरस्वती देवी वाजिनी अन्नादिस्वामिनी वाजेभिः अन्नैः नः अस्मान् अवातं रक्षातं प्रावतु । एव धीना मनोवृत्तीनां आवित्री असद्विषयेभ्यो वारयन्ती सद्विषय एव प्रावतु प्रेरयतु । तत्प्रेरकत्वेनान्तर्यामितया ईश्वरत्वम् । एवं भारतवचनानि उक्तार्थान्यनन्तानि सन्ति, विस्तरभयात् न लिख्यन्ते । ननु—

नवकोट्यस्तु चामुण्डाः भेदभिन्ना व्यवस्थिताः ।
या रौद्री तामसी शक्तिः चामुण्डा सा प्रकीर्तिता ।
अष्टादश तथा कोट्यः वैष्णव्या भेद उच्यते ।
या सा तु राजसी शक्तिः पावनी सैव वैष्णवी ।
या ब्रह्मशक्तिस्सत्त्वस्था साऽनन्ता वै प्रकीर्तिता ॥

(१) 'तस्याः समुद्रा' इति टीकोक्तमन्त्रस्थसमुद्रपदस्य मेघाः नद्यश्च इत्यर्थः कथं कृत इत्याशङ्क्य समुद्रपदस्य व्युत्पत्तिमाह सम्यगिति ।

न्यायरत्नावली ।

इत्यादिवाराहपुराणवचनैर्भवान्यादीनां शक्तिरूपता उक्ता । अत्र मूले तु चतुर्भुजाद्याः पुमाकारा श्रीभारतीभवान्याद्याः स्त्र्याकारा इति क्रमस्वारस्यात् विष्णुब्रह्मरुद्रभेदादित्यादिक्रमस्वारस्याच्च विष्णुब्रह्मशिवरूपत्वं श्रीभारतीभवानीनामुक्तम् । तदिदं मिथोविरुद्धमिति चेन्न । 'सेयम्माया चैतन्यदीप्ता ब्रह्मविष्णुशिवरूपिणी'त्यादिश्रुतेः 'साभासाज्ञानवाची यदि भवति पुनर्ब्रह्मशब्द' इत्यादिसंक्षेपशारीरकोक्तेः ।

प्रकृत्याः प्रथमो भाग उमा देवी यशस्विनी ।
व्यक्तस्सर्वमयो विष्णुः स्त्रीसंज्ञालोकभावनः ।

इति हरिवंशाद्युक्तेः । चिदाभासयुक्ताज्ञानस्यैव वार्तिकमते ईश्वरत्वस्वीकाराच्च विष्णुब्रह्मशिवानामपि साभाससत्त्वरजस्तमोरूपत्वेन शक्तिरूपत्वाविरोधात् सत्त्वादिगुणत्रयगताभासातिरिक्ताचितोऽपि वार्तिकमते ईश्वरत्वस्वीकाराच्च कारणीभूतसत्त्वगुणावच्छिन्नचैतन्यं विष्णुरित्यादिमूलस्यापि सङ्गतेः । ननु तथापि राजसशक्तिः वैष्णवी कथम् । सात्त्विकया एव शक्तेः वैष्णवीत्वौचित्यादिति चेन्न ।

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥

इत्यनेन विष्णोरतिशयितप्रवृत्तिमत्त्वेन तच्छक्तेरेव प्रवृत्त्यतिशयप्रधानत्वेन राजसीत्वौचित्यात् । ब्रह्मणस्तु महाभूतमात्रसृष्टृत्वेन न तथात्वम् । अत एव 'कमण्डलुजलाक्षेपहतवीर्याणि'त्यादिब्रह्मशक्तिकर्मोक्तम्, न तु युद्धादिप्रवृत्तिरिति ध्येयम् ।

भक्तेनापि न कात्स्न्र्येन ज्ञेया भक्तिर्जगद्गुरोः ।
किन्तु तेनैव तद्भक्तिः परिपाकजुषापि च ।

न्यायरत्नावली।

उक्तं हि यमेन स्वभटान् प्रति--

स्वयंभूर्नारदश्शम्भुः कुमारः कपिलो मनुः।
प्रह्लादो जनको भीष्मो बलिर्वैयासकिर्वयम्॥
द्वादशैते विजानन्ति धर्मान् भागवतान् भटाः। इति।

तथापि तद्गुणाः केचित् श्रुता वाचालयन्ति माम्।

(१)अयोग्योपि ततः स्वस्य शुद्ध्यै तान् कथयाम्यहम्।

तत्र भक्तिर्भजनं कायेन मनसा वाचा वा निष्पाद्यो भजनीयस्य तुष्टिहेतुर्व्यापारः भजमानपुरुषनिष्ठः। तत्र विभागो भागवतादावुक्तः--

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्॥
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा।
क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम्॥

भगवति सर्वात्मके परमप्रेमास्पदे अर्पिता पूर्वमपि विद्यमाना भक्तिः यदि शास्त्रेणाधीतेन तत्कालं नवलक्षणा क्रियेत, तदा तदधीतमुत्तमं मन्ये। तच्छब्दस्य उत्तरवाक्यस्थत्वात् न यच्छब्दापेक्षा। अयं भावः। विष्णोस्सर्वजीवात्मभूतत्वादात्मनि सर्वेषां जीवानां सदा भूयासमिति प्रेमसत्त्वात् स्वाभाविकतया अनुरागविशेषनियता भक्तिः विष्णावस्त्येव सार्वदिकी। सा तु शास्त्रेणाधीतेन नवविधा क्रियते श्रवणादिस्वरूपज्ञानस्य श्रोतव्यकीर्तनीयादिगुणग्रामज्ञानस्य श्रवणादीतिकर्तव्यताज्ञानस्य च शास्त्राधीनत्वात्। किञ्च पूर्वमपि स्वस्य वा पुत्रभार्यादेर्वा श्रवणादि कृतं तद्विष्णोरेव कृतम्, शास्त्रे अधीते तु अद्धा साक्षादेव विष्णौ क्रियते। 'सर्वं विष्णुरि'ति ज्ञानात् विष्णोरेव श्रवणादि सदा करोमीति

(१) अयोग्यत्वेपि सत्त्वस्य शुद्ध्यै इति गपुस्तके।

न्यायरत्नावली ।

ज्ञायते । 'सर्वं विष्णुरि'ति ज्ञानाभावेऽपि पुत्रादेः श्रवणादिकं नादरेण करोति किन्तु विष्णोरेव निखिलमङ्गलगुणवत्त्वेन ज्ञानात् साक्षात् श्रवणादि क्रियत इति । उत्तममिति ; श्रवणादेरुक्तज्ञानजननद्वारा श्रवणाद्यनुष्ठानमधीतशास्त्रस्य फलम्, तत्प्राप्तौ सत्यामधीतमुत्तमं मन्ये, तदप्राप्तौ गुणमात्ररूपमपि तन्नोत्तमम । मुक्तावपर्यवसानादित्यर्थः । अथ श्रवणादेः किं स्वरूपम् ? उच्यते । विष्णोस्सगुणस्य वा निर्गुणस्य वा शब्देन ज्ञानं तादृशविष्णुप्रतिपादकशब्दस्य श्रोत्रेण ग्रहणं च श्रवणम् । तच्च सर्वं सगुणस्य प्रीतिकरम् । साधारणोऽपि हि जनः तादृशे स्वीयश्रवणे प्रीणाति, उक्तं हि गीतायाम्—

प्रिया हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः । इति ।

तादृशज्ञानरूपस्य श्रवणस्य कीर्तनहेतुत्वात्तदाह--कीर्तनमिति । सगुणस्य वा निर्गुणस्य वा बोधकस्य शब्दस्योच्चारणम् । तत्राद्यस्य तत्प्रीतिकरत्वं स्पष्टम् । द्वितीयमपि तथा । प्रणवाद्युच्चारणस्यातिप्रीतिकरत्वेन भाष्यादावुक्तत्वात्

अशक्नुवन् भावयितुं वाक्यमेव समभ्यसेत् ।

इत्याचार्योक्तेश्च । (१)तादृशविष्णोश्चानुभूतत्वात् स्मरणं जायते ।

अतस्तदुत्तरं स्मरणमुक्तम् । तच्च तादृशविष्णोः शब्दानुकरणे। तद्ज्ञानं च श्रोत्रेण । तद्ज्ञानस्य श्रावणत्वात् तस्य प्रीतिकरत्वं स्पष्टम्। पादसेवनं परिचर्या विष्णुप्रतिमापादसम्मर्दन(२)मूहलेपनादिरूपा।

अविद्यो वा सविद्यो वा ब्राह्मणो मामकी तनूः ।

इति भगवदुक्तेः ब्राह्मणरूपस्य भगवद्देहस्य भगवद्भक्तस्य

(१) तदुत्तरं च तादृशशब्दस्य तादृशविष्णोरिति घपुस्तके ।

(२)—पादसम्बन्धीति सर्वपुस्तकेषु पाठः ।

न्यायरत्नावली ।

वा पादसंवाहनादिरूपा च । अर्चनं श्रवणादिभिन्नो विष्णुप्रीतिहेतुव्यापारः । वन्दनं पूजाबहिर्भूतनमस्कारः प्रतिमादौ । दास्यं दासभावः सेवा(१) विष्णुप्रीतिफलकं सर्वकर्मानुष्ठानम् । 'यत्करोषि यदश्नासी'त्यादिना लौकिकसकलक्रियासमर्पणस्य भगवति कर्तव्यत्वेनोक्तत्वात् । क्रियाया भगवत्प्रीतिफलकतापर्यवसानमेव हि भगवति समर्पणं विष्णुप्रीतिमुद्दिश्य तदनुष्ठानमिति यावत् । तच्च त्रिविधम् । पापक्षयमुद्दिश्य भगवत्प्रीतिमुद्दिश्य किमप्यनुद्दिश्य वा । यदुक्तं भागवतादौ—

कर्मनिर्हारमुद्दिश्य परस्मै वा तदर्पणम् ।
यजेद्यष्टव्यमिति वा पृथग्भावस्स सात्विकः ।

इति । कर्मनिर्हारः पापनाशः । परस्मै विष्णवे । तदर्पणं यागादिकर्मार्पणम् । विष्णुप्रीतिमुद्दिश्य तदनुष्ठानमिति यावत् । यष्टव्यमिति यजेत्–भगवदाज्ञारूपेण वेदेन कर्तव्यतया बोधितमिति मत्त्वैव यजेत् , न तु किञ्चिदुद्दिश्येत्यर्थः । एवं त्रिविधभावयुक्तः स सात्त्विकः । उक्तक्रमेणापकृष्टमध्यमोत्तमसात्त्विका इत्यर्थः । ननु पापक्षयरूपस्वर्गफलकामेन क्रियमाणस्य कर्मणः दास्यरूपत्वे स्वर्गादिकामेन क्रियमाणमपि तथा स्यादिति चेत् । न । पापस्य ईश्वरं प्रत्यपराधजन्यत्वेन तत्क्षयकामेन क्रियमाणस्यापि दास्यत्वौचित्यात् । अपराधिनो हि प्रभुं प्रति दास्यमाचरन्तोऽपराधान्मुच्यन्त इति लोके दृष्टम् । ननु प्रभोः कोपहेतुव्यापारः अपराध इति लोके व्यवहारः, पापजनकस्यापराधत्वे तथात्वं स्यादिति चेत् , स्यादेव । 'फलमत उपपत्ते' रित्यधिकरणे महर्षिणा बादरायणेन विहितनिषिद्धयोरीश्वरप्रसादकोपजनकत्वोक्तेः । न च तथापि पापनाशफलकक्रियायाः विष्णुप्रीतिफलत्व-

(१) सेवा दासस्येवं विष्णुप्रीतीत्यादि घपुस्तके ।

मपीति वाच्यम् । विहितक्रियामात्रस्येश्वरप्रसादजनकत्वात् ईश्वरप्रसादस्यैव पुण्यरूपत्वस्य बादरायणसम्मतत्वात् । अथैवं स्वर्गादिफलकक्रियापि दास्यं स्यादिति चेन्न । कर्तृसुखजनकेश्वरप्रीतिफलकक्रियाया एव दास्यभक्तित्वात् । अत एव—

यस्त आशिष आशास्ते न स भृत्यस्स वै वणिक् ।

इत्युक्तं भागवते । आशिषः स्वर्गादिसुखानि आशास्ते इच्छति भृत्यः दासः ते तव । एवं च कर्तृनिष्ठसुखफलकक्रियायाः राजसतामसभक्तित्वेन भागवतादावुक्तायां अर्चनमध्ये निवेशो बोध्यः । अत एव 'स्वकर्मणा तमभ्यर्च्यें'ति गीता । न चैवं पापनाशाद्युद्देशेन कृतश्रवणादिकमपि भगवद्दास्यं स्यादिति वाच्यम् । दास्यलक्षणे श्रवणाद्यन्यत्वस्यापि निवेशात् । मातापित्रादीनां विष्णुबुद्ध्या दासवत् शुश्रूषणमपि दास्यमिति बोध्यम् । सख्यं प्रेमविशेषादिरूपम् । यथा सख्यौ तथा विष्णौ । यथा च उपादेयं भक्ष्यादिकं प्राप्तं सख्ये निवेद्यते प्रेमविशेषपूर्वकं तथा विष्णवे । यथा सख्युः दूषणादिकं परेण क्रियमाणं सोढुं न शक्यते, तथा विष्णोस्तन्न सोढव्यम् । यथा तदीयकर्म स्वकीयकर्मवत् क्रियते, तथा विष्णुकर्म कार्यम् । अयम्मदिष्टं साधयिष्यत्येवेति विश्वासेन सख्युरनुवृत्तिः क्रियते, तथा विष्णोरित्यादि । आत्मनिवेदनं स्वस्य निवेदनम् । यथा विक्रीतस्य गवादेः योगक्षेमचिन्तायामनभिनिवेशः, तथा स्वकीयायां योगक्षेमचिन्तायाम् ।

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥

इति भगवदुक्तं प्रतिसन्धाय सदा विष्णुरेव चिन्त्य इत्यर्थः । विष्णुस्वरूपे सत्यज्ञानानन्दात्मके असङ्गसाक्षिरूपे स्वाभेदज्ञान-

न्यायरत्नावली ।

मपि आत्मनिवेदनं बोध्यम् । एतस्याः भक्तेः उक्तविश्वासादि-रूपसख्याधीनत्वेन तदुत्तरं मुक्तिः । दास्यस्यापि 'विष्णुः सर्वो-त्कृष्टः अहं तदपेक्षयापकृष्ट' इतिज्ञानाधीनत्वात् तादृशज्ञानपूर्वक-करशिरस्संयोगरूपवन्दनसापेक्षत्वात् वन्दनोत्तरं मुक्तिः । पञ्चोप-चारादिसाधनके अर्चने चिरमभिनिविशमानः भक्तः आलोच-यति 'किमस्य सर्वलोकनाथस्य परमसात्त्विकगणैरर्च्यमानस्य मा-दृशेन वराकेणार्चनमिति' ततश्च अर्चनाभिनिवेशात्(१)वन्दनादि-ष्वेव कायिकादिष्वाभिनिविशते । अतोऽर्चनोत्तरं वन्दनमुक्तम् । गृहलेपनादिरूपपादसेवने कृते पाद्यादिसमर्पणरूपमर्चनमभिल-षतीति पादसेवनोत्तरमर्चनमुक्तम् । पादसेवनमर्चनादिकं गुण-ग्रामस्मरणाधीनम् अतः स्मरणोत्तरं पादसेवनादिकमुक्तम् । स्म रणस्यापि श्रवणकीर्तनाधीनत्वात् कीर्तनस्यापि श्रवणाधीनत्वात् तयोरुत्तरयोः उक्तिः । उक्तश्रवणादिलक्षणानां क्वचिदेकत्र मेल-नेऽपि न दोषः । एकस्यानेकविधभक्तित्वसम्भवात् । अत्रेदं वि-वेचनीयम् । श्रवणादीनां सगुणनिर्गुणविषयतया सङ्कीर्णानां साधनभक्तित्वमेव । सख्यस्य तु साधनसाध्योभयविधभक्ति-त्वम् । प्रेममात्रस्य साधनत्वेऽपि परमकाष्ठापन्नप्रेम्णः सगुणवि-षयश्रवणादिसाध्यत्वात् । तदुक्तं विष्णुपुराणे प्रह्लादविष्णुसंवादे—

या प्रीतिरविवेकानां विषयेष्वनपायिनी ।
त्वामनुस्मरतस्सा मे हृदयान्मापसर्पतु ॥

अनपायिनी अव्यभिचारिणी । त्वामनुस्मरतः त्वदीयश्रव-णादिकुर्वतः । सा तादृशी । तादृशस्य सगुणविषयकप्रेम्णः निर्गुणश्रवणादिसहितस्य चरमाऽऽत्मनिवेदनरूपा ब्रह्मात्मैक्यसा-क्षात्काररूपज्ञानलक्षणा भक्तिः फलम् ।

(१) अर्चनाभिनिवेशं त्यक्त्वा वन्दनेति पाठः युक्तश्च

न्यायरत्नावली।

यस्य देवे परा भक्तिः यथा देवे तथा गुरौ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः॥
इति श्रुतेः।

मयि चानन्ययोगेन भक्तिरव्यभिचारिणि।

इति गीतोक्त्या तादृशप्रेमरूपस्य चरमभक्तेर्ज्ञानसाधनत्वोक्तेः। चकारात् पूर्वोक्तामानित्वमदाम्भित्वमित्यादिसाधनसमूहस्य समुच्चयः। भागवतेऽपि उक्तम्—

मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ॥
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम्।
अहेतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे॥ इति।

श्रुतिमात्रेणोपस्थितिमात्रेण (१)कारणेन तत्कार्यस्योक्तप्रेम्णः ग्रहणम्, तस्यैव निर्गुणभक्तिचरमसाधनत्वात्। सर्वगुहाशये सर्वदृश्याधिष्ठानभूते। अविच्छिन्ना क्वचिदपि विषयेऽनवच्छिन्ना सर्वं विष्णुरेवेत्याकारेति यावत्। मनोगतिः मनोवृत्तिः। यथा गङ्गा पूर्वपश्चिमादिसमुद्रभागेषु धाराचतुष्टयेन गच्छन्ती समुद्रभागेषु सर्वेषु सम्बध्यते, तथा मनोवृत्तिरपि सकलदृश्यावच्छिन्नेषु मद्भावेषु सम्बध्यते। ब्रह्माण्डस्यान्तर्बहिश्च सर्वं विष्णुरेवेति सर्वानुस्यूततया सर्वदृश्यानां अधिष्ठानतया ज्ञायत इति यावत्। स्वरूपमुक्त्वा लक्षणमाह-लक्षणमित्यादि। अहेतुकी फलानुस-

नारायणी।

ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्।

इत्यादिलक्ष्म्याः। एवं 'तस्याः समुद्रा अधिक्षरन्ति तेन जीवन्ति प्रदिशश्चतस्रः। ततः क्षरत्यक्षरं तद्विश्वमुपजीवति' इत्यादि सरस्वत्या ईश्वरत्वे मानम्। अयमर्थः। तस्या वाचः सकाशात् समुद्राः मेघा नद्यश्च,

(१) गुणोपस्थितिरूपकारणेन इति घपुस्तके।

श्रीभारतीभवान्याद्याश्च स्त्र्याकारा अन्ये च मत्स्य-

न्यायरत्नावली।

न्धानशून्या। न हि ज्ञानस्य फलमस्ति। तस्य सकलदृश्यविरोधितया मोक्षं प्रति व्यञ्जकत्वमात्रस्वीकारात्। अव्यवहिता अहमेव विष्णुरिति स्वाभेदेन क्रियमाणा। अत एव बृहन्नारदीयादावुक्तम्—

अहमेव परो विष्णुः मत्तस्सर्वमिदं जगत्।
इति यस्सततं पश्येत्तं विद्यादुत्तमोत्तमम्॥ इति।

सा च ब्रह्मसाक्षात्कारहेतुपरमप्रेमा त्रिधा—

तस्येवाहं ममैवासौ स एवाहमिति त्रिधा।
भगवच्छरणत्वं स्यात्साधनाभ्यासपाकतः॥ इति।

स एवाहमिति फलावस्थापि साधनस्य समकक्षतया उक्तप्रेम्ण एव साध्यरूपापत्त्या। गीतादौ—

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।

इति सर्वेषु धर्मेषु शरणताबुद्धिं त्यक्त्वा मय्येव तां कुरु तादृशबुद्धिहेतुं उक्तप्रेमाणं कुर्विति यावत्। (१)वस्तुतस्तु प्रेमरूपमख्यभक्तेः फलमात्मनिवेदनम्। अत्र त्रिविधत्वेन उक्ते, आद्यं-तस्यैवाहमित्याद्याकारत्वात् स्वीयपालनादित्यागेन विष्णुचिन्तारूपम्।

नारायणी।

समुद्रवति जलमस्मादिति व्युत्पत्तेः। अंधि अधिकम्, उदकं विक्षरन्ति-वाग्देवतारूपेण प्रेरिता मेघादयो जलभरणादिकं कुर्वन्तीति दिक्। विस्तरतस्तु भवानीस्वरूपं महद्याख्यानेऽनुसन्धेयम्। अधिकारिकावतारत्वाऽविद्यावद्विषयकर्मकर्तृत्वादिरूपजीवलिङ्गदर्शनात् महाभूतादिसर्जनाश्रवणाच्च जीवत्वमेवावताराणामिति मन्दमतीनां भ्रमं निराकुर्वन्नाह—अन्य इति। लीलयैव-स्वेच्छयैव, आविर्भवन्ति-प्रकटीभवन्ति न तु

(१) वस्तुतस्तु तादृशप्रेमरूपसख्यभक्तेः फलमात्मनिवेदनमेवोक्तत्रिविधत्वेनोक्तम्। तत्राद्यं तस्यैव पाल्योहमित्यादीति घपुस्तके।

कूर्मादयोऽनन्तावतारा लीलयैवाविर्भवन्ति भक्तानुग्रहार्थमित्यवधेयम् ।

न्यायरत्नावली ।

द्वितीयं तु—प्रेमातिशयेनेतरजीवादिद्वैततिरोधानात्(१) *ममैवासौ सेव्य इत्याद्याकारम्,तृतीयं तु—सेव्यसेवकभावादिभेदस्यापि तिरोधानात्* सच्चिदानन्दविष्णुप्रेमरूपमिति विवेकः । तस्य च परमप्रेम्णः साधनरूपा श्रवणादिभक्तिः तत्साध्यात्मनिवेदनपर्यन्तापि

नारायणी ।

जायन्ते, सच्चिदानन्दात्मकानामुत्पत्त्ययोगात् । सच्चिदानन्दरूपता च तेषां 'सच्चिदानन्दविग्रहं पञ्चपदं वृन्दावनभूरुहजलासीन'मित्यादिश्रुतिसिद्धा । महाभारते द्रोणपर्वणि भगदत्तवधे—

चतुर्मूर्तिरहं शश्वल्लोकत्राणार्थमुद्यतः ।
आत्मानं प्रविभज्येहं लोकानां हितमादधे ॥
एका मूर्तिस्तपश्चर्यां कुरुते भुवि मे स्थिता ।
अपरा कुरुते कर्म मानुषं लोकमाश्रिता ॥
अपरा पश्यति जगत्कुर्वाणा साध्वसाधुनि ।
शेते चतुर्थी त्वपरा वरार्हेभ्यो वरार्थदा ॥

इत्यादिवदता भगवता आधिकारिकावताराणामेव लोकानुग्रहार्थमविद्यावद्विषयकर्मकर्तृत्वोक्तेरनावृतत्वेनेश्वरत्वमेव न जीवत्वमिति भावः । (२)=अत्रायं निष्कर्षः । गुणावताराणां ब्रह्मविष्ण्वादीनामखिलशक्त्याविर्भावकत्वाद्गुणावतारत्वव्यपदेशः,मत्स्याद्यवताराणां त्वल्पशक्त्याविर्भावकत्वाद्गुणावतारत्वव्यपदेशः, गुणावतारांशावताराभ्यां भगवत एवानन्तशक्त्याविर्भावः सर्वदेति विवेकः । स च महाविष्णुरेवेति वैष्णवाः । परमशिव इति शैवाः । परदेवतेति शाक्ताः । परमेश्वर एवेति शुद्धस्मार्ता इति संक्षेपः= । ननु स्वेच्छामात्रेण जगद्रक्षणसमर्थोऽपि किमर्थमवतारादिभावेन क्लिश्यतीत्यत आह—भक्तेति । सङ्कल्पमात्रेण कर्तुं समर्थोऽपि स्वस्याष्टविधैश्वर्यसामर्थ्यमात्यन्तिकं प्रकटयन्भक्ता-

(१)—धानात् साच्चदानन्दमात्ररूपाविष्णुप्रेमरूपमिति विवेकः । इति गपुस्तके पाठः त्रुटितः प्रमादतः *·····* चिह्नद्वयवर्ती ।

(२) =···= अयं चिह्नितः पाठो नास्ति खपुस्तके ।

(१)चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः।
उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पना॥

न्यायरत्नावली।

उत्तमसात्त्विकोत्तमराजसोत्तमतामसमध्यमसात्त्विकादित्रयाधमसात्त्विकादित्रयभेदेन (२) एकाशीतिभेदा तत्र सात्त्विकत्रयं कर्मनिर्हारेत्यादिना उक्तम्।

नारायणी।

नामभिध्यानाय तानि तानि मनोहराणि चरितानि तत्तद्रूपेण विधत्त इत्यर्थः। तत्र—

स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं हरिम्।
भक्त्या सञ्जातया भक्त्या बिभ्रत्युत्पुलकां तनुम्॥

इत्यादिना साध्यसाधनभेदेन भक्तिद्वैविध्यस्योक्तेर्भक्ता अपि द्विविधाः सिद्धाः साधकाश्च। तत्र साध्यभक्तिभाजः सिद्धाः, साधनभक्तिभाजः साधकाः। तत्र भजनं भक्तिरिति व्युत्पत्त्या साध्यभक्तिः प्रेमभक्तिः। सा च—

प्राप्तेऽपि विषये यस्तु नैव पश्येत कर्हिचित्।
ममेति वचनाक्रान्तो वर्द्धते च पुनः पुनः॥

इतीच्छाविशेषः। यथा—

दृष्टेऽपि कृष्णे तृष्णेयं लोचने न विमुञ्चति।

इत्यादि। सैव च शुद्धा पुमर्थरूपा—

अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी।
अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे॥
सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः॥
स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः।
न ह्यतोन्यः शिवः पन्था विशतः संसृताविह॥
वासुदेवे भगवति भक्तियोगो यतो भवेत्।
बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः॥

इत्यादिस्मृतेः। सुखदुःखभावान्यत्वेऽपि पुमर्थरूपता च मायाना-

(१) अयं श्लोको नास्ति कपुस्तके। (२) एका त्रिभेदेति गपुस्तके।

नारायणी।

शस्येवोपलक्षणविधयाऽऽनन्दावच्छेदकत्वेन। अवच्छेदकत्वं च विजातीयप्रेमत्वेनेति न कोऽपि दोष इत्यन्यत्र विस्तरः। (१)साधनभक्तिस्तु भज्यते सेव्यते भगवताकारमन्तःकरणं क्रियतेऽनयेति व्युत्पत्त्या-

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्॥
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा।
क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम्॥

इति नवधा। तत्र श्रवणं भगवद्विषयकशब्दस्य श्रोत्रेण ग्रहणं तदर्थबोधश्च, कीर्तनं (२)भगवद्बोधकशब्दोच्चारणम्, स्मरणं भगवत्स्वरूपगुणस्मृतिः, पादसेवनं पित्राचार्यगुर्वादेः, अर्चनं चलाचलप्रतिमापूजनम्, वन्दनं पूजाबहिर्भूतनमस्कारो भगवद्भक्तप्रतिमादेः, दास्य दासस्येव स्वामिप्रीतिकरकर्मानुष्ठानम्, सख्यं विश्वासो मित्रवृत्तिश्च, विश्वासस्तदुक्तेऽवश्यंभावधीः, मित्रवृत्तिः बन्धुसमवयस्कादिव्यवहाराख्या सेवा, आत्मनिवेदनम् आत्मनः शरीरस्य स्वीयत्वाभिमानत्यागपूर्वकं स्वामिस्वत्वफलकः सङ्कल्पः, तदभेदेनाखण्डैकरसानन्दात्मस्वरूपज्ञानं च। सेयं भक्तिस्त्रेधा (३)+कर्ममिश्रा कर्मज्ञानमिश्रा ज्ञानमिश्रा च। तत्र कर्ममिश्रा+तामसी राजसी सात्विकी च। तामस्यपि हिंसार्था दम्भार्था मात्सर्यार्था चेति त्रिधा।

अभिसन्धाय यद्धिंसां दम्भं मात्सर्यमेव च।
संरम्भी भिन्नदृग्भावं मयि कुर्यात्स तामसः॥

(१) *तच्च प्रेम द्वादशविधम्। तत्र गुणश्रवणादिना द्रवच्चित्तस्य दर्शनोत्सुकतादिरूपम् १ कपटप्रश्नाद्यक्तः स एवेच्छाविशेषायत्तम् २ मुहुरीक्षणे दार्ढ्यकण्डूत्याद्याराम्भोपलक्षितम् ३ किञ्चिद्विरहादिना धाष्ट्यादीनां स्थूलादलितम् ४ विरहादिना द्रुतस्य चेतसो मिलने पुनस्तदाकारता मिलितम् ५ कर्मेन्द्रियादिहेतुकोपभोगजन्यः चित्तद्रावो ललितम् ६ प्रियविषयकरागनिन्दकविषयककोपाभिव्यङ्ग्यं छलितम् ७ पूर्वजन्मप्रेमैवानुवर्तमानं वलितम् ८ उद्योगं विना प्रारब्धाभिमानेनेच्छाविषयानुवर्तनं क्रान्तम् ९ तदेवानुक्षणपरितापसहकृतं संक्रान्तम् १० इदमेव भवान्तरे वासनापरिपक्वं विद्रुतम् ११ सर्वदा द्रवच्चित्तस्य मम स्यादितीच्छा गलितम् १२ इच्छाविषयाकारमखण्डानन्दाद्वर्याविषयं सतृप्तम् १२ इति। अयं पाठः कपुस्तकेऽधिकः।

(२) श्रवणं भगवद्विद्वद्विषयकशाब्दबोधः तद्बोधकशब्दस्य श्रोत्रेण ग्रहणम् इति खपुस्तके। (३) +···+ चिह्नितः पाठः खपुस्तके नास्ति।

नारायणी।

इति स्मृतेः। एवं राजस्यपि विषयार्था यशोर्था ऐश्वर्यार्था चेति त्रिधा।

विषयानभिसन्धाय यश ऐश्वर्यमेव वा।
अर्चादावर्चयेद्यो मां पृथग्भावः स राजसः।

इति स्मृतेः। एवं सात्त्विक्यपि पापनाशार्था भगवत्प्रीत्यर्था विधिसिध्यर्था चेति त्रिधा।

कर्मनिर्हारमुद्दिश्य परस्मै वा तदर्पणम्।
यजेद्यष्टव्यमिति वा पृथग्भावः स सात्त्विकः॥

इति स्मृतेः। एवं कर्मज्ञानमिश्रापि त्रेधा। उत्तमा मध्यमाऽपकृष्टा च सत्त्वतारतम्यात्। तत्रोत्तमा—

सर्वभूतेषु यः पश्येद् भगवद्भावमात्मनः। इति।

मध्यमा—

ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः॥ इति।

अपकृष्टा—

अर्चायामेव हरये पूजां यः श्रद्धयेहते।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः॥ इति।

ज्ञानमिश्रा—

मद्गुणस्मृतिमात्रेण मयि सर्वगुहाशये।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोम्बुधौ॥ इति।

अविहिता चतुर्धा। कामजा १ द्वेषजा २ भयजा ३ स्नेहजा ४ च।

कामाद् द्वेषाद्भयात्स्नेहाद्यथा भक्त्येश्वरे मनः।
आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः॥
गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः।
सम्बन्धाद् वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो॥

इत्यत्र सम्बन्धात्स्नेहाद्वृष्णयो यूयं चेत्येवं भक्त्या विहितया वयमिति विभागः। तत्र कर्ममिश्रा नवधा गृहस्थानां कर्मज्ञानमिश्रास्तिस्रो वनस्थानां ज्ञानमिश्रैका भिक्षूणां शुद्धैका सर्वेषां निर्विण्णानां ज्ञानयोगो सन्यासिनाम्। इह कर्मसु—

जीवोऽपि त्रिविधः । स्वोपाध्यवान्तरभेदेन विश्व-तैजसप्राज्ञभेदात । तत्र अविद्यान्तःकरणस्थूलशरीरा-

न्यायरत्नावली ।

विषयानभिसन्धाय ज्ञानमैश्वर्यमेव वा ॥
अर्चादावर्चयेद्यो मां पृथग्भावस्स राजसः ।

इति राजसत्रयम् ।

अभिसन्धाय चेद्धिंसां दम्भं मात्सर्यमेव वा ।
स्मरन्विभिन्नदृग्भावं मयि कुर्यात्स तामसः ॥

इति तामसत्रयम् । संरम्भी क्रोधी इति भक्तिविवेचनम् ॥ तत्रा-विद्येत्यादि। 'जागरितस्थानो वैश्वानरः,स्वप्नस्थानस्तैजसः,सुषुप्त-

नारायणी ।

तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु कामिनाम् ॥
यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् ।
न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः ॥

इत्यादिस्मृतेः । अत्रानिर्विण्णानां सन्यासिनां कर्मसु सत्सु ज्ञान-योगः कर्मज्ञानयोग इत्यर्थः । तत्राविहिताश्चतस्रो गोप्यादितुल्यानाम् ।

तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत् ।

इति स्मृतेः । (१)*भक्तिभूमयस्तु-

प्रथमं महतां सेवा तदृयापात्रता ततः ।
श्रद्धा च तेषां धर्मेषु ततो हरिगुणश्रुतिः ॥
ततो रत्यङ्कुरोत्पत्तिः स्वरूपाधिगतिस्ततः ।
प्रेमवृद्धिः परानन्दे तस्याप्यस्फुरणं ततः ॥
भगवद्धर्मनिष्ठातः स्वस्मिंस्तद्गुणशालिता ।
प्रेम्णोथ परमा काष्ठेत्युदिता भक्तिभूमयः ॥

इति संक्षेप*। त्वंपदार्थं विविच्य दर्शयति—जीवोपीत्यादि । सोपा-धीति । जीवोपाधेरविद्याया योऽवान्तरभेदः कार्यकारणतया भेदस्तेने-त्यर्थः । तत्राद्यमाह । 'जागरितस्थानो वैश्वानरः स्वप्नस्थानः तैजसः सुषुप्तस्थानः प्राज्ञः' इत्यादिमाण्डूक्यादिश्रुतिभिर्जाग्रदाद्यभिमा-नीनां विश्वादिसंज्ञा उक्ता अभिमानित्वं चोपाधित्रयद्वयैकावच्छिन्नानां

(१) *...* अयं पाठो नास्ति खपुस्तके ।

वच्छिन्नो जाग्रदवस्थाभिमानी विश्वः । स एव स्थूलशरीराभिमानरहित उपाधिद्वयोपहितः स्वप्नाभिमानी तेजसः । शरीरान्तःकरणोपाधिद्वयरहितोऽन्तःकरणसंस्कारावच्छिन्नाविद्यामात्रोपहितः सुषुप्त्यभिमानी प्राज्ञः । एतेषां च स्वतन्त्रोपाधिभेदाभावेन स्वतन्त्रभेदाभावेऽप्यवान्तरोपाधिभेदादेकत्वेऽप्यवान्तरभेदो व्यव-

न्यायरत्नावली ।

स्थानः प्राज्ञ' इत्यादिमाण्डूक्यादिश्रुतिभिर्जागराद्यभिमानिनां विश्वादिसंज्ञा उक्ताः । अभिमानित्वं च उपाधित्रयद्वयैकावच्छिन्नानां क्रमेण योग्यत्वादित्याशयः । स्थूलशरीराभिमानेति । व्यावहारिकस्थूलशरीराभिमानेत्यर्थः । स्वतन्त्रोपाधीति । निरपेक्षत्रयोपाधीत्यर्थः । स्वतन्त्रभेदेति । अत्यन्तभेदेत्यर्थः । अवान्तरोपाधीति । संस्कारावच्छिन्नत्वादिरूपोपाधिविशेषणेत्यर्थः । एकत्वेऽपि–तादात्म्येऽपि । यथा घटपटयोरमिलितत्वेन निरपेक्षयोस्त्वोपहिताकाशभेदकत्वमत्यन्तभेदप्रयोजकत्वरूपम् । यथा वा बिम्बत्वप्रतिबिम्बत्वयोस्तादृशयोस्तथात्वं तथा संस्कारावच्छिन्नाविद्यादीनां प्राज्ञादिषु विश्वादितो नात्यन्तभेदकत्वम् । विश्वाद्युपाधिमध्येऽविद्यादीनां निवेशात्, य एव सुषुप्तावविद्योपाधिकः स्थितः, स एव जागरे इदानीमुपाधित्रयोपहित इति न हि मलिनतद्वस्त्रवतश्चैत्रस्य निर्मलतद्वस्त्रवि।शष्टचैत्रादत्यन्तभेदो व्यवहियते । प्रत्युत य एव मलिनतद्वस्त्रः स्थितः, स एवेदानीं निर्मलतद्वस्त्र इति अभेद एव प्रतीयते । वस्तुतस्तु दृष्टान्ते मालि-

नारायणी ।

क्रमेण योग्यत्वादिति भाव. । स्थूलेति । व्यावहारिकस्थूलशरीराभिमानीत्यर्थः । स्वतन्त्रोपाधीति । परस्परं कार्यकारणभावरहितोपाधीत्यर्थः । स्वतन्त्रभेदेति । अत्यन्तभेदेत्यर्थः । अवान्तरोपाधिभेदेन–कार्यरूपोपाधिभेदेन, अवान्तरभेदः–व्याप्यव्यापकभावनिबन्धनो भेदः । यथा मृद्घटा-

ह्रियते । साक्षी तु सर्वानुसन्धाता सर्वानुगतस्तुरीयाख्य एकविध एव । तत्रोपाधिभेदेनापि न क्वचिद्भेदः । तदुपाधेरेकरूपत्वात् । अविद्यातद्व्याप्यतत्कार्यात्मकः प्रपञ्चो दृश्यपदार्थः । तस्यापारमार्थिकत्वेऽपि व्यावहारिकसत्त्वाभ्युपगमात् न स्वाप्निकपदार्थवन्निरूपणं व्यर्थम् । उपासनादावुपयोगादिति । सोऽपि त्रिविधः । अव्याकृतमूर्तामूर्तभेदात् । तत्र साभासाविद्या मूर्ता-

न्यायरत्नावली ।

न्योपलक्षिततद्ब्रह्मोपहितस्यैव निर्मलब्रह्मोपहिततादात्म्यं प्रतीयते, न तु मालिन्योपहिततद्ब्रह्मोपहितस्येति दार्ष्टान्तिकेऽपि संस्कारोपहिताविद्यादिमद्भेदस्य विम्बादिष्वस्वीकारे तात्पर्यमिति बोध्यम् । भेदेनापीति । बिम्बत्वोपहितस्य साक्षित्वपक्ष इति शेषः । तद्व्याप्येति । अविद्याचितोस्सम्बन्धादित्यर्थः । साभासेत्यादि । साभासा अविद्या तद्व्याप्यैश्चैतन्यसम्बन्धादिभिः सहिता

नारायणी ।

काशयोर्भेद इति दिक् । भेदवार्ता जीवेश्वरयोरेव न लक्ष्यस्य साक्षिण इत्याह—साक्षी त्विति । तुरीयाख्यः अकारोकारमकारार्थाद्भिन्नश्चतुर्थः । उपाधिभेदेनापीति । बिम्बत्वोपहितस्य साक्षित्वपक्ष इति शेषः । तद्व्याप्येति । तत्समनियतेत्यर्थः । चिदचित्सम्बन्धादीति यावत् । ननु दृग्भिन्नः पदार्थो यद्यस्ति तर्हि द्वैतापत्तिः, नास्तीति चेत्कथं निरूप्यते ? स्वप्नवदङ्गीकारेऽपि स्वप्नस्येव निरूपणवैयर्थ्यं तदवस्थमेवेत्य आह—तस्येति । दृश्यपदार्थस्य अपारमार्थिकत्वेऽपि-मिथ्यात्वेऽपि । व्यावहारिकसत्त्वेति । अर्थक्रियाकारितायोजकसत्त्वेत्यर्थः । न स्वाप्निकेति । यथा प्रातिभासिकस्वप्नादेरर्थक्रियाकारित्वायोगस्य करदन्तान्वेषणवन्निरूपणं व्यर्थं तथा न व्यावहारिकपदार्थानां निरूपणं व्यर्थमित्यर्थः । तत्र हेतुमाह—उपासनादाविति । तथा च न दृग्भिन्नपदार्थाङ्गीकारमात्रेण निरूपणानर्हत्वं वस्तुतोऽसत्त्वेन द्वैताभावात्, व्यावहारिकत्वेन निरूपणार्हत्वादिति संक्षेपः । साभासेत्यादि । साभासाविद्यातद्व्याप्यैश्चैतन्यतत्सम्बन्धा-

मूर्तप्रपञ्चबीजशक्तिरूपा । तदजन्यत्वेऽपि तन्निवृत्तौ निवर्तमानत्वेन तद्व्याप्यैः चैतन्यतत्सम्बन्धजीवेश्वर-विभागचिदाभासैः सहानादित्वादव्याकृतमित्युच्यते ।

न्यायरत्नावली ।

अव्याकृतमित्युच्यते इति योजना । बीजशक्तिरूपेति । प्रयोजकशक्तितादात्म्यापन्नेत्यर्थः । शक्तिश्च त्रिधा । अदृष्टप्रपञ्च(१)संस्काररूपा सूक्ष्मावस्था अज्ञाननिष्ठावरणविक्षेपशक्ती च । एवं चादृष्टादीनां अव्याकृतमध्ये निवेशाभावेऽपि न क्षतिः । अत एव वक्ष्यति 'पूर्वपूर्वसंस्कारजीवकर्मप्रयुक्ते' ति । ननु चैतन्याविद्यासम्बन्धादेरविद्याकार्यत्वाभावात् कथं तद्व्याप्यता ? तत्राह—तदजन्यत्वेऽपीति । तन्निवृत्तौ निवर्तमानत्वेनेति । यद्यपि तन्नाविद्याकार्यं तथापि यदा यदा चैतन्यतत्सम्बन्धादि तदा तदाऽविद्येति कालिकव्याप्तिरस्त्येव । अविद्योच्छेदक्षण एवाविद्याचित्सम्बन्धादेरप्युच्छेदात् । शुक्त्याद्यवच्छिन्नचिदविद्यासम्बन्धादौ तथादर्शनात् । चैतन्यतत्सम्बन्धेति । चिदविद्यासम्बन्धेत्यर्थः । जीवेशविभागेति । जीवेशभेदेत्यर्थः । जीवेशयो-

नारायणी ।

दिभिः सहाव्याकृतमित्युच्यत इति योजना । बीजशक्तिरूपेति । प्रयोजकशक्तितादात्म्यापन्नेत्यर्थः । शक्तिश्च त्रेधा जीवादृष्टं प्रपञ्चसंस्काररूपा सूक्ष्मावस्था अज्ञाननिष्ठावरणविक्षेपशक्ती च । ननु चैतन्याविद्यासम्बन्धादेरविद्याकार्यत्वाभावात् कथं तद्व्याप्यता तत्राह—तदजन्यत्वेऽपीति । यद्यपि तन्नाविद्याकार्यं तथापि यदा यदा चैतन्यतत्सम्बन्धादि तदा तदाऽविद्येति कालिकी व्याप्तिरस्त्येव । अविद्योच्छेदक्षण एवाविद्याचित्सम्बन्धादेरुच्छेदात् शुक्त्याद्यवच्छिन्नचिदविद्यासम्बन्धादौ तथा दर्शनात् । चैतन्यसम्बन्धेति । चिदविद्यासम्बन्धेत्यर्थः । जीवेशविभागेति । जीवेशयोर्भेदेत्यर्थः । जीवेशयोस्तु दृक्पदार्थ एवान्तर्भावो नाव्याकृते दृश्ये । चिदाभासैः—वृत्तिप्रतिबिम्बादिरूपैरवान्तरैः । कार्यक्रमवैचित्र्ये

(१) अदृष्टं पूर्वसंस्कारेति गपुस्तके

(१)+अयं चाव्याकृतपदार्थ ईश्वरोपाधिः+। सा च स्वयं जडाप्यजडेन चिदाभासेनोज्वलिता पूर्वपूर्वसंस्कारजीवकर्मप्रयुक्ता सती शब्दस्पर्शरूपरसगन्धात्मकान्याकाशवायुतेजोजलपृथिव्याख्यानि पञ्च महाभूतानि जनयति। तत्र पूर्वपूर्वभूतभावापन्नाया अविद्याया उत्तरोत्तरं

न्यायरत्नावली।

स्तु दृश्यन्तर्भावः, नाव्याकृते दृश्ये। चिदाभासेति। चित्तादात्म्यापन्नाभासेत्यर्थः। साभासेत्यनेनैवाभासस्य लब्धत्वेऽपि तस्य तद्गतचित्तादात्म्यस्य चाविद्याव्याप्यतालाभाय चिदाभासेत्युक्तम्। तथा च अनादिपञ्चकमेव शक्तिद्वयसंस्काराद्दृश्यसहितमव्याकृतमित्युच्यते। व्याक्रियमाणाकाशादिकार्यान्यत्वादिति भावः। 'तद्धेदन्तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यां व्याक्रियत' इत्यादिश्रुतिभिस्तु अव्याकृतपदार्थैकदेशस्यैवाज्ञानस्य उपादानत्वादिकमुच्यते। शक्तिद्वयोपहिताज्ञानस्य परिणामित्वात्तद्गतचिदाभासस्य वार्तिकमते उपादानत्वात्कर्तृत्वाच्च अज्ञानस्येव तुल्यन्यायेन अज्ञानसम्बन्धादेः कालविधया निमित्तत्वात् अदृष्टादेर्निमित्तत्वादित्याशयेनाह—सा चेति। चिदाभासेनोज्वलिता—चिदाभासरूपेणेश्वरेणाधिष्ठिता। प्रयुक्ता—सहकृता। गन्धात्मकानीति। गुणगुणिनोस्तादात्म्यस्वीकारात्। युक्तमेतत्। अत एव श्रुतौ गुणानां पृथक्सृष्टिर्नोक्ता। भूतभावापन्नाया इति।

नारायणी।

उपपादयिष्यन् सहकारिभेदसहकृताविद्यातः सृष्टिमाह—सा चेति। चिदाभासेनोज्वलिता—चिदासरूपेणेश्वरेणाधिष्ठिता चिदाभासाविवेकेनेश्वरेणाधिष्ठिता वा, प्रयुक्ता—सहकृता। गन्धात्मकानीति। गुणगुणिनोस्तादात्म्याङ्गीकारात्। युक्तं चैतत्, श्रुतौ गुणानां पृथगुत्पत्तेरश्रवणात्। अविद्यैव यदि साक्षात् सर्वेषां जनिका तदा भूतपरिणामविशेषगुणादिव्यवस्था कथं तत्राह—तत्रेति। तेषु तेषु भूतेषु मध्ये। पूर्वपूर्वेति। पूर्वपूर्वभूतरूपेण प-

(१) + ... + एतच्चिह्नमध्यस्थः पाठो नास्ति कपुस्तके।

प्रति कारणत्वात् पूर्वपूर्वभूतगुणानामुत्तरोत्तरभूतेष्व-
नुप्रवेशः । एवमविद्यात एवान्धकारोऽपि भावरूप
एवावरणात्मा चाक्षुषज्ञानविरोधी आलोकनाश्यश्च

न्यायरत्नावली ।

भूतविशिष्टाया इत्यर्थः । तथा च पूर्वपूर्वभूतानामप्युत्तरोत्तरभूते-
पूपादानत्वम् । अत एवाकाशादीनां वाय्वाद्यपेक्षया महत्त्वं पुरा-
णाद्युक्तं युज्यते । न ह्याकाशादीनां कात्स्न्र्येन वाय्वादिरूपेण
परिणामः, तथासति उत्तरोत्पत्तिकाले पूर्वपूर्वोच्छेदप्रसङ्गः, कि-
न्त्वेकदेशेन; तथा च सुतरां पूर्वपूर्वस्य महत्त्वम् । नन्वेवं 'प्रमा
स्वनाश्यत्वादिविशिष्टवस्तुपूर्विका प्रकाशत्वादालोकवदि'त्यनुमा-
नादालोकस्य स्वनाश्यतमःपूर्वकत्वं स्वीकृत्य विवरणादि-
ग्रन्थोक्तेः कथं सङ्गतिः ? । तमस आलोकनाश्यभावरूपत्वे
श्रुतिषु तत्सृष्ट्युक्त्यापत्तेः (१)आलोकरूपतेजोऽभावरूपत्वात्तत्राह—
एवमित्यादि । आवरणात्मकत्वं प्रकटयति—चाक्षुषज्ञानवि-

नारायणी ।

रिणताया इत्यर्थः । आकाशरूपेण परिणताया वायुं प्रति, वायुरूपेण
परिणतायास्तेजः प्रतीत्येवं कारणत्वादिति यावत् । तथाच पूर्वपूर्व-
भूतानामप्युत्तरोत्तरेषु भूतेषूपादानत्वम् 'आकाशाद्वायुः वायोरग्निरि'-
ति श्रुतेः । अत एवाकाशादीनां वाय्वाद्यपेक्षया महत्त्वं पुराणादिषूक्तं यु-
ज्यते । नह्याकाशादीनां कात्स्न्र्येन वाय्वादिपरिणामः तथासत्युत्तरो-
त्पत्तिकाले पूर्वरूपोच्छेदप्रसङ्गात्, किन्त्वेकदेशेन; तथा च सुतरां
पूर्वपूर्वस्य महत्त्वमिति संक्षेपः । पूर्वपूर्वभूतगुणानामिति । आकाशादिगु-
णानां शब्दादीनां वाय्वादावुत्पत्तिरित्यर्थः । कारणगुणा हि कार्य-
गुणानारभन्त' इति न्यायादिति भावः । आलोकनिरपेक्षचक्षुर्ग्राह्य-
त्वात्तमो न भावरूपं किन्त्वालोकाभाव एवेति तार्किकमतं निराकरि-
ष्यन्प्रसङ्गादन्धकारं निरूपयति—एवमिति । भावरूप एव-अभावभिन्न
एव अबाधितनीलरूपवत्त्वादिप्रतीतेरिति भावः । लाघवतर्कं निरसिष्य-
न्नाह—आवरणात्मेति । आवरणात्मत्वं स्फुटयति—चाक्षुषेति । चाक्षुषधीप्रति-

(१) आलोकाभावरूपत्वादिति घपुस्तके ।

झटिति महाविद्युदादिवदाविर्भवति तिरोभवति चेति सि-

न्यायरत्नावली ।

रोधीति । चाक्षुषधीप्रतिबन्धक इत्यर्थः । नन्वन्वयव्यतिरेकाभ्यामालोकस्य चाक्षुषहेतुत्वात् तमसस्तत्प्रतिबन्धकत्वे मानाभावस्तत्राह—आलोकनाश्य इति । आलोकस्य संयोगसम्बन्धेन चाक्षुषहेतुत्वे आलोके तदभावेन चाक्षुषं नोत्पद्येत, तस्माद्विषयतासम्बन्धेन चाक्षुषं प्रति अवच्छेदकतासम्बन्धेन तमः प्रतिबन्धकम् , आलोकासम्बद्धद्रव्यावच्छिन्नचैतन्ये तमउत्पत्त्या तत्र न चाक्षुषोत्पत्तिः, आलोकावच्छिन्नचैतन्ये तमोऽनुत्पत्त्या तत्र चाक्षुषोत्पत्तिः । आलोकस्य तमोनाशकत्वेन चाक्षुषोपयोगितया तदन्वयव्यतिरेकावुपक्षीणाविति भावः । ननु तर्हि तमसः सृष्टिः

नारायणी ।

बन्धक इत्यर्थः । नन्वन्वयव्यतिरेकाभ्यामालोकस्य चाक्षुषहेतुत्वात्तमसस्तत्प्रतिबन्धकत्वे मानाभावस्तत्राह —आलोकनाश्य इति । संयोगेनालोकस्य समवायेनालोकसंयोगस्य वा चाक्षुषहेतुत्वे स्वर्णभिन्नत्वमहत्त्वावच्छिन्नत्वादिकमवश्यं निवेश्यम्, अन्यथा स्वर्णपरमाण्वादिसंयोगेनान्धकारादौ चाक्षुषापत्तेस्तथात्र गौरवम् । अस्मन्मते तु विषयतासम्बन्धेन चाक्षुषं प्रत्यवच्छेदकतासम्बन्धेन तमः प्रतिबन्धकम, आलोकासम्बद्धद्रव्यावच्छिन्नचैतन्ये तम उत्पत्त्या चाक्षुषानुत्पत्तिः, आलोकावच्छिन्नचैतन्ये तमोनुत्पत्त्या चाक्षुषोत्पत्तिरित्यालोकस्य तमोविघटकत्वेन चाक्षुषोपयोगितयान्वयव्यतिरेकावुपक्षीणाविति भावः । तर्हि तदङ्गीकारे तदुत्पत्तिविनाशकल्पनातो महागौरवं तत्राह—झटितीति । स्पष्टम् । एतेन गृहादावारोपितमञ्जनादिमालिन्यादिकमेव तम इत्यपि मतं न समीचीनमिति ज्ञापितम् , आलोकाजन्यचाक्षुषविषयत्वात् । न च गृहादावञ्जनादिमालिन्यस्यानुभूयमानारोपासम्भवेऽपि स्मर्यमाणारोपे बाधकाभाव इति वाच्यम् । तथा सति 'गृहे तम'इति तमोविशेष्यकचाक्षुषानुपपत्तेः बहिरिन्द्रियजन्यज्ञान उपनीतस्य विशेषणतया भाननियमात् । 'उपनीतं विशेषणतयैव भासते मानसे त्वनियम' इति सिद्धान्तात् । न चायंप्रत्ययो मानस एवेति वाच्यम् । चाक्षुषत्वानुभवविरोधात् । न च चाक्षुषत्वाऽनुभवोऽपि भ्रम

द्धान्तः । संसारहेतुदेहोपादानत्वाभावाच्च न श्रुतिषु सृष्टिप्रक्रियायामाम्नात इत्यविरोधः । दिक्कालौ त्वप्रामाणिकत्वान्नोक्तौ । आकाशस्यैव दिग्व्यवहारजनकत्वसम्भवात् 'दिशः श्रोत्र' मिति श्रुतेश्च । कालस्त्वविद्यैव ।

न्यायरत्नावली ।

कथं न श्रूयते ? तत्राह—संसारेति । देहमध्ये तमस्सत्त्वे मानाभावेन तमसो न देहोपादानत्वम् , आकाशं त्ववकाशदानाय देहान्तरस्त्येवेति भावः । दिक्कालाविति । क्लृप्तपदार्थान्याविति शेषः । श्रुतिषु सृष्टिप्रक्रियायामित्यनुषज्यते । आकाशस्यैवेति । पराभिमतादिश इव आकाशस्य सर्वगतत्वात् दिक्कृतविशेषणतासम्बन्धेन सर्वाधारत्वसम्भवात् उदयाचलसन्निकृष्टमूर्तविशेषोपहितत्वादिरूपेण प्राचीत्वादिसम्भवादिति भावः । ननु आकाशः अविद्यादिकं वा दिगित्यत्र विनिगमकाभावात् अतिरिक्ता दिगास्ताम् तत्राह—दिश इति । दिग्जन्यमित्यर्थः । तथा च श्रुतिरेव आकाशस्य दिक्त्वे मानम् , नाभसत्वेन प्रमितस्य श्रोत्रस्य दिग्जन्यताबोधकत्वादिति भावः । अविद्यैवेति । ननु

नारायणी ।

इति वाच्यम् । घटादेरपि अचाक्षुषत्वप्रसङ्गात् । ननु तर्हि तमसोऽपि श्रुतिषु सृष्टिः श्रूयते तत्राह—संसारेति । देहमध्ये तमसः सत्त्वे मानाभावेन तमसो न देहोपादानत्वम् , आकाशं त्ववकाशदानाय देहमध्येऽस्त्येवेति भावः । दिक्कालाविति । क्लृप्तपदार्थान्याविति शेषः । नोक्तौ—कालत्वदिक्त्वादिना पृथङ्नोक्तौ । श्रुतिषु सृष्टिप्रक्रियायामित्यनुषज्यते । यदि नातिरिक्तौ तर्हि 'इहेदानीमि'त्यादिप्रतीतेः का गतिस्तत्राह—आकाशस्यैवेति । पराभिमतदिश इवाकाशस्यापि सर्वगतत्वादिकृतविशेषणतासम्बन्धेन सर्वाधारत्वसम्भवात् उदयाचलसन्निकृष्टमूर्तविशेषोपहितत्वादिरूपेण प्राचीत्वादिसम्भवादिति भावः । नन्वाकाशोऽविद्यादिकं वादिगित्यत्र विनिगमकाभावादतिरिक्ता दिगास्तां तत्राह—दिश इति । दिग्जन्यमित्यर्थः । तथाच श्रुतिरेवाकाशस्य दिक्त्वे मानं नाभसत्वेन प्रमितस्य श्रोत्रस्य दिग्जन्यताबोधकत्वादिति भावः । अविद्यै-

तस्या एव सर्वाधारत्वादिति। तानि च सूक्ष्माण्यपञ्चीकृतानि पञ्च महाभूतान्यमूर्ताख्यानि कारणैक्यात्सत्त्वरजस्तमोगुणात्मकानि सत्त्वांशप्राधान्येन ज्ञानक्रियाशक्त्यात्मकमेकं स्वच्छद्रव्यं चित्ररूपमिव मिलित्वा जन-

न्यायरत्नावली।

नेदं युक्तम्, प्रतिबिम्बत्वोपहितं जीवं प्रत्यविद्याया आधारत्वेऽपि ईशं प्रति तत्सत्त्वे मानाभावः, शुद्धं प्रति तु सुतराम्, तस्यैव सर्वाधारत्वात्; तत्राह-तस्या एवेति। सर्वाधारत्वात् कालिकसम्बन्धेन स्वेतरसर्वाधारत्वात्। ईशादिकमपि तत्सम्बन्धेन तद्वृत्ति, शुद्धचितस्तु तत्तद्वृत्तित्वाभावेऽपि न क्षतिः। 'ज्ञः कालकालो गुणी सर्वविद्य' इत्यादिश्रुतिषु (१)सर्वदृश्याधारकालाधारत्वात्, 'चक्षुषश्चक्षुरि'त्यादिश्रुतिषु दृश्यभासकचक्षुरादिभासकत्ववत्। वस्तुतस्तु महाकाले मानाभावः, इदानीमिदमित्यादिबुद्धेर्जन्यमात्ररूपखण्डकालमात्रविषयकत्वमेव। अयं साभासाविद्यारूपः, अविद्यागताभासावेवेक्षचित एव ईश्वरत्वस्योक्तत्वात्। साभासाविद्याया ईश्वरोपाधित्वमिति भावः। स्वच्छत्वसम्पादनायाह—सत्त्वांशप्राधान्येनेति। ज्ञानक्रियाशक्त्यात्मकं ज्ञानक्रिययोर्जननानुकूले ये शक्ती, तद्विशिष्टम्। धर्मधर्मिणोस्ता-

नारायणी।

वेति। लाघवादिति भावः। ननु तथाप्यविद्यात्मक एवेत्यत्र किं बीजं? तत्राह—तस्या एवेति। अविद्याया एव कालिकसम्बन्धेन स्वेतरसर्वदृश्याधारत्वादित्यर्थः। अयं साभासाविद्यारूपः। अमूर्तमाह—तानि चेति। शब्दादितन्मात्रात्मकानीत्यर्थः। लिङ्गस्य स्वच्छत्वज्ञापनायाह—सत्त्वप्राधान्येनेति। सत्त्वांशाधिक्ययुक्तानीत्यर्थः। ज्ञानेति। ज्ञानक्रिययोर्जननानुकूले ये शक्ती तद्विशिष्टम्, धर्मधर्मिणोस्तादात्म्यात्तदात्मकोक्तिः। एकमिति। (२)प्रतिजीवं स्थूलशरीरवदेकं चित्प्रतिबिम्बयो-

(१) सर्वदृश्याधारो यः कालः तस्याप्याधारत्वस्य अवगतत्वादित्यर्थः।

(२) एकं स्वच्छं द्रव्यमिति प्रतिजीवमित्यादि खपुस्तके।

यन्ति । तस्य च ज्ञानशक्तिप्रधानांशोऽन्तःकरणम् । तच्च बुद्धिर्मन इति द्विधोच्यते । क्रियाशक्तिप्रधानांशः प्राणः । स च पञ्चधा—प्राणोऽपानो व्यान उदानस्समान

न्यायरत्नावली ।

दात्म्यात् तदात्मकत्वोक्तिः । प्रधानः—उपहितः । बुद्धिर्मन इति द्विधेति । बुद्धेरप्यहमित्याकारकनिश्चयतदन्यनिश्चयरूपवृत्तिभेदेनाहङ्कारोऽनहङ्कारश्चेति द्वैविध्यम् । मनोऽपि द्विविध संशयवृत्त्या चित्तम्, सङ्कल्पादिवृत्तिभिरचित्तम् । 'कामस्सङ्कल्पो विचिकित्से'त्यादि 'एतत्सर्वं मन एवे'त्यादिश्रुतेः । प्राण इत्यादि ।

'हृदि प्राणो गुदेऽपानस्समानो नाभिसंस्थितः ।

नारायणी ।

ग्यं सकलवृत्त्याश्रयीभूतमित्यर्थः । एतेन वक्ष्यमाणसप्तदशराशिरूपमेव लिङ्गशरीरं नावयव्यन्तरं कल्पनागौरवादित्यर्वाचीनानामुक्तिर्निराकृता । 'तमुत्क्रामन्तं सर्वे प्राणा अनुत्क्रामन्ती'त्यादिश्रुतेः—

पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् ।
अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम् ॥
इत्याचार्योक्तेश्च विरोधात् ।
कर्मात्मा पुरुषो योसौ बन्धमोक्षैस्स युज्यते ।
स सप्तदशकेनापि राशिना युज्यते त्वसौ ॥

इतिमोक्षधर्मे । राशिपदोक्तिस्तु तार्किकाभिमतावयवावयविभावनिरासाय न धर्मिप्रतिषेधायेति न कोपि विरोध इत संक्षेपः । ननु विजातीयभूतानां कथमेकवस्त्वारम्भकत्वं तत्राह—चित्ररूपमिवेति । यथा नीलपीतादिगुणाः परस्परमेलने सति चित्ररूपं जनयन्ति तथा विजातीयभूतान्यपि परस्परं मेलने सति चित्रद्रव्यमुत्पादयन्तीत्यर्थः । एवं लिङ्गशरीरं व्युत्पाद्य तस्यावयवान् विभजते—तस्य चेति । लिङ्गस्य चेत्यर्थः । प्रधानः—उपहितः विशिष्ट इति यावत् । द्विविधेति । बुद्धेरप्यहमित्याकारनिश्चयतदान्यरूपवृत्तिभेदेनाहङ्कारोनहंकारश्चेति द्वैविध्यम् । मनोपि द्विविधं संशयवृत्त्यान्वितं सङ्कल्पादिवृत्तिभिरन्वितं 'कामः सङ्कल्पो विचिकित्सेति' श्रुतेः । प्राण इति ।

इति । एवमेकैकभूतेभ्यो ज्ञानक्रियाशक्तिभेदात् प्रत्येकमिन्द्रियद्वयं जायते । आकाशाच्छोत्रवाचौ, वायोस्त्वक्पाणी, तेजसश्चक्षुष्पादौ, अद्भ्यो रसनपायू, पृथिव्याः घ्राणोपस्थौ । अत्र 'तेजोमयी वागि'ति श्रुतेस्तैजसी वाक् । पादस्तु नाभस इति केचित् ।। शब्दव्यञ्जकेन्द्रियत्वेन श्रोत्रवद्वाचो नाभसत्वम् । पादचिकित्सया च चक्षुषः स्वास्थ्यदर्शनाच्चक्षुर्वत्पादस्यापि तैजसत्व-

न्यायरत्नावली ।

उदानः कण्ठदेशस्थो व्यानस्सर्वशरीरगः ॥

इति हृदयाद्यवच्छिन्नक्रियाजनकत्वमेव प्राणत्वादिकमिति भावः । शक्तिभेदादिति । द्वयं द्वयमिति योजना । तथा चैकैकभूतेभ्यो ज्ञानशक्तिमदेकैकं क्रियाशक्तिमदेकैकं चेत्यर्थः । शब्दव्यञ्जकेत्यादि । वागिन्द्रियस्य शब्दोत्पादनद्वारा शब्दव्यञ्जकत्वम् । पादचिकित्सयेत्यादि । तथा च संस्कृतस्य पाद-

नारायणी ।

हृदि प्राणो गुदेऽपानः समानो नाभिदेशगः ।
उदानः कण्ठदेशे स्याद्व्यानः सर्वशरीरगः ।

इत्युक्तेर्हृदयाद्यवच्छिन्नक्रियाजनकत्वादिकमेव प्राणत्वादिकमित्यर्थः । श्रोत्रत्वगक्षिरसनघ्राणमनांस्येवेन्द्रियाणि, ज्ञानजनकत्वात् । 'मनः षष्ठानीन्द्रियाणी'ति भगवदुक्तेश्च, न वागादीनिति तार्किकाः । तन्न साधीयः । 'दशेमे पुरुषे प्राणा'इत्यादिश्रुतिविरोधात् । तत्र 'वाक् च वक्तव्यं च हस्तौ चादातव्यं च पादौ च गन्तव्यं च पायुश्च विसर्जयितव्यं च उपस्थश्चानन्दयितव्यं चे'त्यादिना वागादीनामपीन्द्रियत्वसूचनात्तथाच प्राणेतरत्वे सत्यपञ्चीकृतभूतोपादानकत्वमेवेन्द्रियत्वं न ज्ञानकरणत्वमात्रमित्यभिप्रेत्य ज्ञानकर्मप्रधानं फलभेदतोभिन्नमिन्द्रियं विशिष्य सकारणं दर्शयति-शक्तिभेदादिति । द्वयं द्वयमित्यत्र योजना । तथाचैकैकगुणप्रधानेभ्यो भूतेभ्यो ज्ञानशक्तिमदेकं क्रियाशक्तिमदेकं चेत्यर्थः । शब्दव्यञ्जकेति । वागिन्द्रियस्य शब्दोत्पादनद्वारा शब्दव्यञ्जकत्वम् । पादचिकित्सेति । तथाच संस्कृतस्य पादस्य चक्षुषः

मिति तु युक्तमुत्पश्यामः। तेजोमयत्वश्रुतिस्तु मनसः पञ्चभूतकार्यस्यापि अन्नमयत्वश्रुतिरिव तदुपका-

न्यायरत्नावली।

स्य चक्षुस्स्वास्थ्यात्पादनद्वारा रूपव्यञ्जकत्वात्तैजसत्वमात भावः। एवं त्वचस्स्पर्शव्यञ्जकत्वेन पाणेः क्रियाशक्त्याधिक्येन वायवीयत्वम्। स्पर्शो हि वायावेव प्रथममभिव्यक्तत्वाद्वायोरेव गुणः। वायूपादानकत्वात् भूतान्तरेऽनुगच्छति। एवं वायोरेव क्रियाशक्तिः, चलस्वभावत्वात्। तत्सम्बन्धादन्यत्रापि। अत एव शब्दस्याकाशमात्रगुणत्वात्तद्व्यञ्जकयोश्श्रोत्रवाचोर्नाभसत्वम्। रसनेन्द्रियस्य रसव्यञ्जकत्वेन जलीयत्वम्, पायोस्तु जलवन्मलशोधकत्वेन तत्। घ्राणस्य गन्धव्यञ्जकत्वेन पार्थिवत्वम्, उपस्थस्य तु दुर्गन्धातिशयव्यञ्जकत्वात् तत्। श्रुतिपुराणवाक्यादिनि सर्वत्र साधकानि सन्त्येव। तदुपकार्यतयेति।

नारायणी।

स्वास्थ्योत्पादनद्वारा रूपव्यञ्जकत्वात्तैजसत्वमित्यर्थः। एवं त्वचः स्पर्शव्यञ्जकत्वेन, पाणेः क्रियाशक्त्याधिक्येन वायवीयत्वम्। स्पर्शो हि वायावेव प्रथममभिव्यक्तत्वाद्वायोरेव गुण, वायूपादानत्वाद्भूतान्तरे तु गच्छति, एवं वायोरेव क्रियाशक्तिश्चलनत्वात्तत्सम्बन्धादन्यत्रापि। रसनेन्द्रियस्य रसव्यञ्जकत्वेन जलीयत्वम्, पायोस्तु जलवन्मलशोधकत्वेन (१)तत्। घ्राणस्य गन्धव्यञ्जकत्वेन पार्थिवत्वम्। उपस्थस्य च(२) शुक्राभिव्यञ्जकत्वेन तत्। उपकार्यतयेति। सुवर्णादिभक्षणोपकार्यतयेत्यर्थः(३)*वायुभुजामपि मोददर्शनेन 'अन्नमयं हि सोम्य मन'इ-

(१) मलशोधकत्वेन स्निग्धत्वेन च तदिति खपुस्तके।

(२) उपस्थस्य च दुर्गन्धातिशयव्यञ्जकत्वेन कठिनत्वेन च तत् इति खपुस्तके।

(३) अत्रायमधिको भिन्नश्च पाठः खपुस्तके। *तत्र दृष्टान्तमाह--मनस इति। अन्तःकरणाख्यलिङ्गशरीरभागस्य। पञ्चभूतकार्यस्यापीति--उक्तश्रुतिभिरपश्रीकृतपञ्चभूतकार्यस्यापि। अन्नमयत्वश्रुतिवत्--'अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषम्भवति यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मन' इत्याद्युपक्रम्य 'अन्नमयं हि सोम्य मन'इति स्निग्धदन्नकार्यत्वबोधकश्रुतिवदित्यर्थः। वायुभुजामपि

र्यतया व्याख्येया । मनसश्च पञ्चभूतगुणग्राहकत्वेन

न्यायरत्नावली ।

तैजसस्वर्णादिभक्षणोपकार्यतयेत्यर्थः । ननु मनसः पाञ्चभौतिकत्वे किं मानम्? तत्राह—मनसश्चेति । तद्वत्त्वनिश्चयात्—पञ्चभूत-

मोददर्शनाल्लोकान्तरगतिसमर्थस्य स्थूलभूतकार्यत्वायोगात्पञ्चभूतगुणग्राहकस्य पृथिवी-मात्रकार्यत्वायोगाच्च श्रुतिर्न यथाश्रुतार्थपरा किन्तु मनःस्थूलान्नोपकार्यमित्यर्थपरा । उपकार्यता च ततकृतोपचयवत्त्वेन तत्कृतबलवत्त्वेन वेति अन्यदेतत् । एवमापोमयः प्राण इति श्रुतिः प्राणाख्यलिङ्गशरीरभागस्य न जलकार्यत्वबोधिका तस्यापि अपञ्चीकृतभूतकार्यत्वात् । तैः सर्वैः सहितैः प्राणो वृत्तिभेदात् स पञ्चधा । इत्यादिवाक्यैः सिद्धान्ते तथा प्रतिपादनात् । समानयुक्तित्वाच्च । तस्मात् 'अन्नमयं हि सोम्य मनः आपोमयः प्राण' इति श्रुतेः यथा श्रुतार्थबाधवत् 'तेजोमयी वाग्' इति श्रुतेः यथाश्रुतार्थबाधो इष्ट इति भावः । ननु कथं तर्हि मनसो भौतिकत्वसिद्धि ? तत्राह—मनसश्चेति । अन्तःकरणाख्यलिङ्गशरीरभागस्य तु इत्यर्थः । पञ्चभूतगुणग्राहकत्वेन पञ्चभूतानां पृथिव्यप्तेजोवायुगगनानामसाधारणगुणाः पञ्चभूतगुणाः गन्धरसरूपस्पर्शशब्दास्तेषां ग्राहकं पञ्चभूतगुणग्राहकं पञ्चभूतगुणानापरोक्षप्रत्यक्षस्य जनकं तस्य भावः तत्त्वं तेन पञ्चभूतसाधारणगुणप्रत्यक्षजनकत्वेनेति यावत् । अत्र कालादृष्टादौ व्यभिचारवारणाय हेतौ इन्द्रियत्वं देयम् । तथा चायं प्रयोगः 'मनः पञ्चभूतगुणवत्पञ्चभूतारब्धं पञ्चभूतसाधारणगुणप्रत्यक्षजनकेन्द्रियत्वात् यदिन्द्रियं यद्भूतासाधारणगुणग्राहकं भवति तत्तद्भूतासाधारणगुणवत्तद्भूतोपादानक भवति, यथा घ्राणादिकं पृथिव्यसाधारणगुणं गन्धादिग्राहकं गन्धादिमत् पार्थिवमिति । नच घ्राणादीनां गुणप्रत्यक्षं प्रति असाधारणकारणत्वात् मनसश्च ज्ञानसामान्यं प्रति कारणस्य गुणप्रत्यक्षं प्रति साधारणकारणत्वात् दृष्टान्तदार्ष्टान्तिकयोर्वैशम्यमिति वाच्यम् । विषयसाधारणरूपचाक्षुषं प्रति चक्षुष इव विषयसाधारणगुणप्रत्यक्ष प्रति विषयमनोयोगस्याहेतुत्वे मनसोऽपि असाधारणत्वाद् वैषम्याभावात् । एतत्सर्वमभिप्रत्योक्तं वार्तिककारपादैः—

स्वग्राह्यार्थसजातीयमिन्द्रियं स्यात्प्रदीपवत् ।
रूपस्यैवावभासित्वान्न चेत्स्याच्चित्ररूपवत् ॥
न चेदर्थसजातीयं सर्वार्थग्रहणं भवेत् ।
एकैकस्येन्द्रियस्येह मनोबुद्ध्योर्यथा तथा ॥
सर्वभूतात्मकत्वात्तु सर्वार्थग्रहणं तयोः ।

इत्यादि । न चाहङ्कारिकत्वादिबोधकपिलादिस्मृतिविरोधात्तर्कोऽप्रमाणं तत्राह—अन्यदिति* ।

तत्त्वनिश्चयात्पञ्चभूतात्मकत्वमित्यन्यदेतत् । एतेषाम-

न्यायरत्नावली ।

गुणवत्त्वनिश्चयात् । अन्यदेतदिति । यथा 'चक्षुस्तेजोमात्रोपादानकम्, रूपादिषु मध्ये रूपस्यैव व्यञ्जकत्वात् प्रभादिवदि'त्याद्यनुमानैः चक्षुरादीनां तेजोमात्रोपादानकत्वादिकं सिध्यति, तथा 'मनः पञ्चभूतोपादानकम्, पञ्चभूतगुणानां ग्राहकत्वादि' त्यनुमानेन मनसः पाञ्चभौतिकत्वं सिध्यति । तार्किकादिमते तु तस्याणुत्वात् पञ्चभूतानारभ्यत्वेन न तथानुमानमिति भावः । एतषां–ज्ञानक्रियेन्द्रियाणाम् । ज्ञानक्रियाशक्तिप्रधानाः–ज्ञानक्रिययोर्जननानुकूलशक्तिमन्तः । ज्ञानशक्तिसमष्टिः–ज्ञानेन्द्रियाणां सहकारि,क्रियाशक्तिसमष्टिः क्रियेन्द्रियाणां सहकारी। ननु देवानामधिष्ठातृत्वे किं मानमिति चेत्, उच्यते । अचेतनस्य रथादेः चेतनाधिष्ठानेनैव क्रियादर्शनात् जीवस्यापरोक्षज्ञानरूपाधिष्ठानविषयत्वस्येन्द्रियादिष्वमम्भ-

नारायणी ।

त्यादिश्रुतेर्यथाश्रुतार्थबोधेनोपपद्यमकत्वरूपार्थमात्रपरत्वान्मनसो भौतिकत्वेमानत्वायोगादनुमानमेवापन्यस्यति–मनस इत्यादि । पञ्चभूतासाधारणगुणधीकरणत्वेन तद्वत्त्वनिश्चयात्–पञ्चभूतासाधारणगुणवत्त्वनिश्चयात् पञ्चभूतात्मत्वमिति शेषः । तथाचायं प्रयोगः 'मनः पञ्चभूतगुणवत् पञ्चभूतारब्धं च, पञ्चभूतासाधारणगुणग्राहकत्वात् यद्यद्भूतासाधारणगुणग्राहकं भवति तत्तद्भूतासाधारणगुणवत् तद्भूतोपादानकं च, यथा घ्राणादिकं पृथिव्याद्यसाधारणगुणगन्धादिग्राहकं गन्धादिमत्पार्थिवमिति दिक् । ननु श्रुतिविरोधात्तर्कोऽप्रमाणं तत्राह—अन्यदिति* । अनुमानस्य स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामतो'ति बृहदारण्यकश्रुत्याद्यनुकूलत्वान्नाप्रामाणिकत्वं तथाच मनसो भौतिकत्वमेव युक्तमिति भावः स–प्रमाता, तेजोमात्राः तेजःप्रधानभूतसूक्ष्मांशान् समभ्याददानः सम्यक् निःशेषमाभिमुख्येनोपसंहरमाणः हृदयमेव हृदयस्थां बुद्धिमेव अन्ववक्रामति अन्वागच्छतीत्यर्थः । अत्र भूतसूक्ष्मसंहारपूर्वकसंहारोक्तेरूपसंह्रियमाणस्यापञ्चीकृतभूतारब्धत्वं ज्ञापितम् । नच स्पर्शवत्त्वेन द्रव्यारम्भकत्वापत्तिः । चक्षुरादितुल्यत्वाभ्युपगमादित्यन्यत्र विस्तरः । एतेषां–ज्ञानकर्मेन्द्रियाणाम्, अधिष्ठातारः–प्रव-

धिष्ठातारो देवा अपि ज्ञानक्रियाशक्तिप्रधानाः-दिगग्नी, वातेन्द्रौ, आदित्यविष्णू, वरुणमित्रौ, अश्विप्रजापती । तत्र ज्ञानशक्तिसमष्टिरन्तःकरणम् । क्रियाशक्तिसमष्टिः प्राणः । शब्दस्पर्शरूपरसगन्धग्राहकाणि श्रोत्रत्वक्चक्षूरसनघ्राणाख्यानि पञ्च ज्ञानेन्द्रियाणि । त्वक्चक्षुषी स्वग्राह्यगुणाश्रयं द्रव्यमपि गृह्णीतः ।

न्यायरत्नावली ।

वात् इन्द्रियापरोक्षज्ञानवन्तो देवा एव अधिष्ठातारो न जीवः । अथ कर्मेन्द्रियेषु किं मानमिति चदुच्यते । 'श्रोत्रं च श्रोत्रव्यं च वाक्च वक्तव्यं चे' ति श्रुतौ (१)श्रोत्रादीनामिव वागादीनामपि सविषयकत्वेनोक्तिरेव । शब्देत्यादि । शब्दादिनामिव तद्वृत्तिजातीनामपि ग्राहकाणि बोध्यानि । गृह्णीत इति । द्रव्याविषययोः चाक्षुषस्पार्शनयोरनुपलम्भादिति शेषः । ननु श्रोत्रस्य केन सन्निकर्षेण शब्दग्राहकत्वम् ? स्वाश्रयाकाशसमवेतत्वेनेति चेत्, तर्हि श्रोत्रस्य श्रावणप्रत्यक्षहेतुत्वे मानाभावः । शब्दे विद्यमाने श्रोत्रसन्निकर्षस्य सदा सत्त्वेन तद्व्यतिरेकेण कार्यव्यतिरेकानु-

नारायणी ।

र्त्तकाः, देवाः-ज्ञानक्रियाशक्तिप्रधानाः । ज्ञानक्रिययोर्जनानुकूलशक्तिमन्तः । इन्द्रियगोचरापरोक्षज्ञानस्य जीवे बाधेन देवानामेव तादृशज्ञानवतामधिष्ठातृत्वमुचितमिति भावः । ज्ञानशक्तिसमष्टिः-ज्ञानजनकेन्द्रियाणां सहकारि, क्रियाशक्तिसमष्टिः-कर्मेन्द्रियाणां सहकारी शब्देत्यादि। शब्दादीनामिव तद्वृत्तिजातीनामपि ग्राहकाणि बोध्यानि।गृह्णीत इति। द्रव्याविषयकयोश्चाक्षुषस्पार्शनयोरनुपलम्भादिति शेषः । घ्राणजरासनश्रावणप्रत्यक्षं तु द्रव्याविषयकमेव, द्रव्यग्रहणे प्राणादीनामसामर्थ्यात् । कर्णशष्कुल्यवच्छिन्नं नमः श्रोत्रं तच्च निरवयत्वान्न बहिर्गच्छति किन्तु वीचीतरङ्गन्यायेन प्राप्तशब्दस्यैव ग्राहकमिति तार्किकास्तन्न सम्यक् । 'आत्मन आकाशः संभूत' इतिश्रुत्या जन्यत्वोक्तेराकाशस्य निरवयवत्वायोगात् , वीचीतरङ्गन्यायेन शब्दानन्त्यकल्पने

(१) श्रोत्रादीनां समभिव्याहारविशेषेण वागादीनामुक्तिरेव इति घपुस्तके ।

श्रोत्रमपि चक्षुर्वत् गत्वा शब्दग्राहकम्(१) दूरे शब्द इति प्रत्ययात्। वचनादानगतिविसर्गानन्दजनकानि वाक्पा-

न्यायरत्नावली ।

पलम्भात् । अथ स्पर्शादिषु श्रावणादिप्रत्यक्षवारणाय विषयतया श्रावणं प्रति शब्दत्वादिना हेतुत्वस्य वाच्यतया तद्बलात्सर्वेषु शब्देषु सर्वेषां पुरुषाणां प्रत्यक्षं कुतो न स्यादिति चेन्न । शब्द-निष्ठविषयतासम्बन्धेन तत्पुरुषीयश्रावणं प्रति तत्पुरुषीयकर्णगोलकस्यावच्छेदकतासम्बन्धेन हेतुत्वात्, तस्माच्छोत्रस्येन्द्रियत्वे मानाभावः तत्राह--श्रोत्रमपीति । गत्वा—शब्दावच्छेदकदेशेन संयुज्य । ग्राहकं—शब्दस्य प्रत्यक्षजनकम् । 'दूरे शब्द'इति प्रत्ययात्-'अयं श्रुतं शब्दः दूरस्थः विलक्षणध्वनिविशिष्टत्वा' दित्यनुमितेः। तथा च स्वसंयुक्तावच्छिन्नत्वसम्बन्धेन श्रोत्रं शब्दस्य ग्राहकमिति तादृशसम्बन्धाभावकाले तत्पुरुषीयशब्दप्रत्यक्षानुपपत्त्या श्रोत्रस्य शब्दग्राहकत्वमावश्यकम् । शब्दस्य नाकाशसमवेतत्वं किन्तु (२)ककारादिसमवेतत्वमिति स्वीकारे तु स्वसंयुक्तसमवेतत्वमेव सम्बन्धः समवेतत्वं तादात्म्यम् । एवं च तत्पुरुषीयकर्णस्यावच्छे-

नारायणी ।

गौरवाच्च चक्षुरादिवच्छ्रोत्रमपि बहिर्गत्वैव गृह्णातीत्याह—श्रोत्रमिति । गत्वा—शब्दाद्यनवच्छेदकदेशेन संयुज्य, ग्राहकं शब्दप्रत्यक्षजनकम् । दूरे शब्देति । श्रुतः शब्दो दूरस्थो विलक्षणध्वनिविशिष्टत्वादित्यनुमितेः । तथाच विषयतासम्बन्धेन शब्दप्रत्यक्षं प्रति स्वसंयुक्तत्वावच्छिन्नत्व-सम्बन्धेन श्रोत्रं कारणमिति दिक् । भूतसूक्ष्माणि मनोबुद्धिदशेन्द्रियाणि लिङ्गं न, किन्तु--

पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम्।

इत्याचार्योक्तम् । प्राणस्यान्तःकरणेऽप्रवेशात्, भूतसूक्ष्माणि विहाय गमनायोगात्तेषामावश्यकत्वादिति । सांङ्ख्यमताभिमानिनां मतनिरा-

(१) दूरे शब्द इति प्रत्ययात् इति पाठो नास्ति गघपुस्तकयोः । आपश्यकश्चायं न्यायरत्नावल्यां नारायण्यां च व्याख्यातत्वादिति ।

(२) किन्तु भेर्यादिसमवेतत्वमिति पाठेन भाव्यम् ।

णपादपायूपस्थाख्यानि पञ्च कर्मेन्द्रियाणि । एतच्च सर्वं मिलित्वा सप्तदशकं लिङ्गं ज्ञानशक्तिप्राधान्येन हिरण्यगर्भ

न्यायरत्नावली ।

दकतासम्बन्धेन न हेतुत्वम् । तत्पुरुषीयकर्णावच्छेदेनानुत्पद्यमानस्यापि दूरस्थस्य शब्दस्य तत्पुरुषीयश्रोत्रेण ग्रहणात् । तार्किकादिमते तु गगनरूपत्वेन श्रोत्रस्य देशान्तरे गत्यसम्भवादुक्तरीत्या शब्दाग्राहकत्वमिति भावः । सप्तदशकं 'पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वित' मिति सप्तदशसङ्ख्याकं लिङ्गं यावत्संसारकालमनपायितया आत्मोपाधित्वेनात्माभिव्यञ्जकम् । ज्ञानशक्तीति । ज्ञानशक्तिमष्टीत्यर्थः । हिरण्यगर्भ इति । हिरण्यमिव प्रकाशजनको ज्ञान

नारायणी ।

सायाह-एतच्चेति । एतदेव सर्वं पञ्चप्राणमनोबुद्धिदशेन्द्रियाणि तदा श्रयश्च मिलित्वा-धर्मधर्मीभावापन्नीभूय, सप्तदशावयवा विद्यन्ते यस्य तत्सप्तदशकं (सप्त) दशावयवकधर्मिरूपं लिङ्गं लिङ्गशरीरम् । अयं भावः । भूतसूक्ष्माणां न लिङ्गशरीरप्रवेश उचितः भोक्तृकरणभिन्नत्वेन साक्षाद्भोगोपधायकत्वाभावात् । नाऽपि प्राणस्यान्तःकरणे प्रवेश उचितः । सत्त्वप्रधानाऽपञ्चीकृतमहाभूतकार्यत्वे सति ज्ञानशक्तिसमष्टित्वमन्तःकरणत्वम् । रजःप्रधानाऽपञ्चीकृतमहाभूतकार्यत्वे सति क्रियाशक्तिसमष्टित्वं प्राणत्वमिति लक्षणभेदात् । 'एतस्माज्जायते प्राणो मन.सर्वेन्द्रियाणि च' इति श्रुत्यापि भेदोक्तेश्च । अत एव नेन्द्रियसामान्यवृत्तिरूपोऽपि । तस्य चैकत्वेपि पूर्वोक्तावान्तरभेदमादाय भोगवैचित्र्याधायकत्वादवान्तरभेदेन भिन्नस्यैव लिङ्गप्रवेशोक्तिः । नागकूर्मकृकलदेवदत्तधनञ्जयादीनां तु लिङ्गवृत्तिभोगोपधायकत्वाभावान्न लिङ्गशरीरप्रवेशसम्भावनापीति दिक् । एवं मनोबुद्ध्योः संशयत्वनिश्चयत्वरूपविरुद्धधर्माध्यासादत्यन्तभिन्नयोरेव पृथगुक्त्या प्रवेशो न चित्ताहङ्कारयोस्तयोरन्तःकरणविभाजकत्वाभावात् । लिङ्गत्वं यावत्संसारकालमनपायितयात्माभिव्यञ्जकत्वम् । अभिव्यञ्जकत्वं त्वहमिति व्यवहारविषताप्रयोजकत्वे सति भोगोपधायकत्वमित्यन्यत्र विस्तरः । ज्ञानशक्तीति । ज्ञानशक्तिसमष्टीत्यर्थः । हिरण्यगर्भेति । हिरण्यमिव प्रकाशजनको ज्ञप्तिशक्तिरूपो गर्भो यस्येति व्युत्पत्तेः ।

इति क्रियाशक्तिप्राधान्येन सूत्रमिति चोच्यते । अयममूर्तपदार्थः कार्यत्वाद्व्यष्टौ समष्टौ च जीवोपाधिरेव । तानि च तथाभूतानि भूतानि भोगायतनं शरीरं भोग्यं च विषयमन्तरेण भोगं जनयितुमशक्नुवन्ति जीवकर्मप्रयुक्तत्वात्स्थौल्याय पञ्चीकृतानि भवन्ति । तत्र च प्रत्येकं पञ्च भूतानि द्विधा विभज्यन्ते । तत्रैकैको भागश्चतुर्धा विभज्यते । तद्भागचतुष्टयं च स्वभागं विहायेतरभूतचतुष्टयार्धभागेषु प्रविशतीति स्वस्यार्धभागेनेतरेषामष्टमभागेन च पञ्चीकरणान्मेलनेऽप्यधि-

न्यायरत्नावली ।

शक्तिरूपो गर्भो यस्येति व्युत्पत्तिः । क्रियाशक्तीति । क्रियाशक्तिसमष्टीत्यर्थः । सूत्रं सर्वशरीरावच्छिन्न(१)हस्तादिक्रियाजनकत्वेन सूत्रवदनुस्यूतम् । कार्यत्वादिति । सोपाधिकेश्वरस्य सर्वकार्यजनकत्वात् कार्यं नेशोपाधिरिति भावः । अशक्नुवन्तीति शतृप्रत्ययान्तम् । स्थौल्याय-शरीरादिनिष्ठस्थौल्यप्रयोजकं स्थौल्यं लब्धुम् । पञ्चीकरणस्वरूपमाह—तत्रेत्यादि । तत्र द्विधाकृतभागयोः । स्वभागं-द्विधाकृतभागयोश्चतुर्धात्वमनापन्नमविशिष्टमेकम् । इतरेषामष्टमभागेन चेति । आकाशादीना(२)म-

नारायणी ।

क्रियाशक्तीति । क्रियाशक्तिसमष्टीत्यर्थः । सूत्रं-सर्वशरीरावच्छिन्नक्रियाजनकत्वेन सूत्रवदनुस्यूतम् । कार्यत्वादिति । सोपाधिकस्येश्वरस्य सर्वकार्यजनकत्वात्कार्यं नेश्वरोपाधिरिति भावः । तानि अपञ्चीकृतानि च, तथाभूतानि-सूक्ष्माणि, शरीरं-स्थूलशरीरम् । अशक्नुवन्तीति शतृप्रत्ययान्तम् । स्थौल्याय शरीरनिष्ठस्थौल्यप्रयोजकस्थौल्यं लब्धुम् । पञ्चीकरणस्वरूपमाह—तत्र चेत्यादि । तत्र-द्विधाकृतभागयोः, स्वभागं द्विधाकृतभागयोश्चतुर्धात्वानापन्नमवशिष्टमेकम् । इतरेषामिति । आ-

(१) प्रत्यक्षादिक्रिया-इति पाठान्तरम् । छपुस्तके ।

(२)—दीनामर्धभागप्राविष्टो य इतरेषोमकैको भागः सोष्टमः । आकाशादेर्भागचतुष्टयात्मकोऽर्धभाग इतरेषां भागचतुष्टयं चेत्यादिः पाठो ग्वपुस्तके ।

क्याद्याकाशादिशब्दप्रयोगः। अत्र च 'त्रिवृतं त्रिवृतमेकैकां करवाणी'ति श्रुतेः 'त्रिवृत्कुर्वत उपदेशा'दिति सूत्राच्च त्रयाणामेव मेलनप्रतीतेश्च त्रिवृत्करणमेव केचि-

न्यायरत्नावली ।

ष्टमभागं प्रविष्टः इतरेषामेकैको भागः सोऽष्टमः। आकाशादेर्भागचतुष्टयात्मकोऽर्धभागचतुष्टयं चेत्यष्टभागात्मकमेकैकं भूतं जातमिति भावः। आधिक्यात्-आकाशादिभागचतुष्टयस्याकाशादिशब्दवाच्ये प्रविष्टवाय्वादिभागापेक्षयाऽऽधिक्यात्। तथा च यत्राकाशस्यार्धं तत्रैवाकाशत्वजातिः, एवं यत्र वाय्वादेरर्धं तत्र वायुत्वादिजातिरिति स्वीकारात् तद्वाचकाकाशादिपदस्य प्रयोग इति भावः। त्रिवृतं-त्रिभागम्।पूर्ववत् त्रयाणां भूतानां द्विधा द्विधा त्रिभागं कृत्वा स्वीयमर्धमितरार्धीयभागद्वयस्यैकैकेन संयोज्य तेजआदिभूतं तदीयार्धेन इतरीयार्धयोर्भागद्वयेन च त्रिभागं करवाणीत्यर्थः। केचित्-वाचस्पतिमिश्रकल्पतरुकारादयः। तदुक्तं

नारायणी ।

काशादीनामर्धभागे प्रविष्टो य इतरेषामेकैको भागः सोऽष्टमस्तेनेत्यर्थः। पञ्चीकरणात्-आकाशादीनामचतुष्टयात्मकोर्धभाग इतरेषां भागचतुष्टयं चेत्येकैकस्य पञ्चात्मकत्वसंपादनात्। आधिक्यात्-आकाशादिभागचतुष्टयस्याकाशादिशब्दवाच्ये प्रविष्टवाय्वादिभागापेक्षयाऽधिकत्वात्। तथा च यत्राकाशादेरर्धं तत्राकाशत्वादीनामङ्गीकारात् तत्रैव तद्वाचकाकाशादीनां प्रयोग इति भावः। अत्र-भूतेषु, त्रिवृत्तं-त्रिभागम्, करवाणि-करोमि। (त्रिवृदिति)-'संज्ञा मूर्त्ति क्लृप्तिस्त्विति'सूत्रप्रथमदलम्। अस्यार्थः-संज्ञा आदित्यादिनाम्,मूर्त्तिः रूपं सितासितादि, तयोः क्लृप्तिः कल्पनं प्रकटीकरणं तु न जीवात् किन्तु त्रिवृत्कुर्वतः तेजोबन्नानि त्रिभागं कुर्वतः परमेश्वरात्, कुतः? उपदेशात्-व्याकरवाणीत्युत्तमपुरुषनिर्देशादित्यर्थः। त्रयाणां-तेजोबन्नानाम्। मेलनप्रतीतेः-परस्परवैशिष्ट्यविषयकप्रत्यक्षात्। त्रिवृत्करणमेवम्-भूतत्रयं प्रत्येकं द्विधा विभज्यते तत्रैकैको भागः (पुनः) द्विधा विभज्यते तद्भागद्वयं स्वभागं विहायेतरभूतद्वयार्धभागे प्रविशतीति स्वस्याद्ध्यात्मकेऽर्द्धभागे इतरयोर्द्वयोर्मेलनेन त्रिवृत्करणम्।

न्मन्यन्ते । ते वियदधिकरणन्यायेनैव निराकृताः । तथा हि तैत्तिरीयके 'तस्माद्वा एतस्मादात्मन आकाशस्सम्भूतः आकाशाद्वायुरि'त्यादिश्रुतेः छान्दोग्ये च त्रयाणां तेजोबन्नानां सृष्टिश्रवणेऽपि द्वयोरुपसंहारः । तेजः प्राथम्यपदार्थधर्मापेक्षया आकाशवायुपदार्थयो-

न्यायरत्नावली ।

कल्पतरौ—

सम्प्रदायाध्वना पञ्चीकरणं यद्यपि स्थितम् ।
तथापि युक्तिरूढत्वाद्वाचस्पतिमतं शुभम् ॥

मते त्रिवृत्करणमिति शेषः । इत्यादिश्रुतेरित्यादिपदेन छान्दोग्यीयसप्तमाध्यायस्थस्य 'आत्मन आकाशः आत्मनो वायु'रित्यादिवाक्यस्य सङ्ग्रहः । छान्दोग्ये 'तत्तेजोऽसृजते'त्यादिषष्ठाध्यायस्थवाक्ये । द्वयोः—आकाशवाय्वोः । तेजःप्राथम्येत्यादि ।

नारायणी ।

केचित्—वाचस्पतिमिश्राः । तदुक्तं कल्पतरुकारैः—

सम्प्रदायाद्ध्वना पञ्चीकरणं यद्यपि स्थितम् ।
तथापि युक्तिरूढत्वाद्वाचस्पतिमतं शुभमिति ॥

(१)+इतिमतं त्रिवृत्करणपक्षः+ । वियदिति । द्वितीयाध्यायतृतीयपादे वियतोऽनित्यत्वसमर्थकया 'न वियदश्रुते'रित्यादिसूत्ररचिताधिकरणयुक्तयेत्यर्थः । निराकरणमेव स्फुटयति—तथाहीति । इत्यादिश्रुतेरित्यादिपदात् छान्दोग्यीयसप्तमप्रपाठकस्थस्य 'आत्मन आकाश आकाशाद्वायुरि'त्यादिवाक्यस्य संग्रहः । छान्दोग्ये 'तत्तेजोऽसृजदि'त्यादिषष्ठप्रपाठकस्थवाक्ये द्वयोः आकाशवाय्वोः । प्राथम्येति । प्राथम्यरूपो यः पदार्थधर्मस्तदपेक्षया । यथा 'वेदं कृत्वा वेदि करोती'ति श्रौतक्रमस्य बाधेन वेदवेदिकरणयोर्मध्ये 'क्षुत आचामेदि'ति स्मार्तमाचमनं विधीयते पदार्थधर्मक्रमापेक्षया पदार्थस्य बलवत्त्वात्तथा प्रथमोक्त्या लब्धस्य तेजसि प्राथम्यस्य बाधेनाकाशवाय्वोः सृष्टिबोधकवाक्ये उपसंहारः कल्प्यत इति भावः । उपसंहारे हेत्वन्तरमाह—छान्दोग्ये चेति । सर्वेति ।

(१) +···+ चिह्नितः पाठो नास्ति कपुस्तके ।

बलीयस्त्वात् छान्दोग्ये चैकविज्ञानेन सर्वविज्ञानप्रतिज्ञानादाकाशवाय्वोरचेतनयोर्ब्रह्मकार्यत्वस्यावश्यवाच्यत्वात् । तत्र पञ्चानामेव मेलनेऽप्यवयुत्यानुवादेन

न्यायरत्नावली ।

यथा वेदवेदिकरणयोर्मध्ये क्षुते जाते 'वेदं कृत्वा वेदिं करोती'ति श्रुतिबोधितस्यापि क्रमस्य बाधेन 'क्षुत आचामे'दिति शास्त्रबोधितमाचनमनुष्ठीयते । पदार्थधर्मक्रमापेक्षया पदार्थस्य बलवत्त्वात्, तथा प्रथमोक्तत्वेन लब्धस्य तेजसि प्राथम्यस्य न्यायेनाकाशवाय्वोस्सृष्टिबोधकवाक्यरूपोपसंहारः कल्प्यते इति भावः । उपसंहारे हेत्वन्तरमाह—छान्दोग्ये चैकेत्यादि । ब्रह्मकार्यत्वस्येति । अचेतनत्वेन ब्रह्मस्वरूपत्वासम्भवेन ब्रह्मकार्यत्वेनाकाशवाय्वोः ब्रह्मतादात्म्यं स्वीकृत्यैव ब्रह्मज्ञानेनाकाशवायुज्ञानमुपपाद्यमिति भावः । नन्वविद्यादेरनादित्वेऽपि ब्रह्मणि तादात्म्येन कल्पितत्वात्तादृशप्रतिज्ञोपपादनं कर्तव्यम् । तथाचाकाशवाय्वोरनादित्वमपि कुतो नोच्यते ? नचाविद्यादेरावरणत्वाद्युपपादनाय ब्रह्मणि तादात्म्येन कल्पितत्वं युक्तम्, तादात्म्यस्य क्वचित् स्वीकृतत्वेन तदन्यसम्बन्धकल्पने गौरवात्, अनुपपन्नत्वेन चाविद्यादेः कल्पितत्वात् नाद्वैतविरोधित्वम्, वाय्वाकाशयोस्तु ब्रह्मतादात्म्ये न मानमिति वाच्यम् । दृश्यत्वाद्यन्यथानुपपत्त्या तयोरपि तथात्वस्यौचित्यात् । अत्रोच्यते—उक्तरीत्या तयो-

नारायणी ।

'येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमि'ति सर्वविज्ञाननिर्देशात् । ब्रह्मकार्यत्वस्येति । अचेतनत्वेन ब्रह्मस्वरूपत्वासम्भवात् ब्रह्मकार्यत्वेनाकाशवाय्वोर्ब्रह्मतादात्म्यं स्वीकृत्यैव ब्रह्मज्ञानेनाकाशवाय्वोर्ज्ञानमुपपाद्यमिति भावः । अवयुत्यनुवादेन—समुदायादेकदेशस्य पृथगुक्त्या, पञ्चीकरणस्य न्यायसिद्धस्य त्रिवृत्करणरूपैकदेशोक्त्येति यावत् । त्रिवृत्करणोपपत्तेः 'त्रिवृतं त्रिवृतमेकैकां करवाणीति' त्रिवृत्करणस्योक्तिसहस्वादित्यर्थः । नन्वब्भक्षो वायुभक्ष इत्यादिवत्सावधारणेयमुक्तिस्त-

त्रिवृत्करणोपपत्तिः। त्रिवृतमेवेति मतकल्पनायां वाक्यभेदप्रसङ्गः। 'त्रिवृत्कुर्वत उपदेशा'दिति सूत्रं त्वनुवादकत्वान्न पञ्चीकरणं न्यायासिद्धं बाधितुमुत्सहते। मेलनप्रतीतिश्च शरीरादौ पञ्चानामविशिष्टैव

न्यायरत्नावली।

र्मिथ्यात्वे सिद्धे तैत्तिरीयश्रुत्यबाधाय उत्पत्तिकल्पनं युक्तमेव। ब्रह्मणि कल्पितयोर्ब्रह्मज्ञाननाश्यत्वस्यावश्यकत्वेन तार्किकादिस्वीकृताविनाशित्वादेस्त्याज्यत्वादिति भावः। अवयुत्यानुवादेन—पञ्चीकरणस्य न्यायासिद्धस्यैकदेशोक्तित्वेन, उपपत्तिः—कथनोपपत्तिः। ननु 'अब्भक्षो वायुभक्ष' इत्यादिवत् सावधारणेयमुक्तिः, तथा च त्रिवृतमेव, न पञ्चीकृतमित्यर्थः तत्राह—त्रिवृतमेवेति। वाक्यभेदः 'त्रिवृतं करवाणि, पञ्चीकृतं न करवाणी'त्यर्थद्वयभेदेन तद्बोधकवाक्यभेदः स्यादित्यर्थः। न्यायमेवाह—मेलनप्रतीतिरिति। मेलनविषयिका धीः पृथिव्यादौ प्रत्यक्षरूपा यथास्ति, तथा वायोरपि शीतस्पर्शयुक्तजलविशिष्टतया उष्णस्पर्शविशिष्टतेजोविशिष्टतया सुरभिपार्थिवादिभागविशिष्टतया च धीरस्ति। तथाकाशस्यापि तेजःपार्थिवादिभागविशिष्टतया चाक्षुषादिरूपा साक्षिरूपा वा धीरस्ति। तथा च वाय्वाकाशयोरितरभूतसंसृष्टत्वस्यावर्जनीयतया पञ्चीकरणमेव भूतानां व्यवहार्यत्वे

नारायणी।

थाच त्रिवृत्करणमेव न पञ्चीकरणमित्यर्थः तत्राह—त्रिवृतमेवेति। सावधारणकल्पनायामित्यर्थः। वाक्यभेदप्रसङ्गः—'त्रिवृतं करवाणि, पञ्चीकृतं न करवाणीत्यर्थद्वयभेदेन तद्बोधकवाक्यभेदः स्यादित्यर्थः। अनुवादकत्वात्-श्रुत्युदितार्थनिर्देशरूपत्वात्। न्यायसिद्धं श्रुत्यनुकूलतर्कसिद्धम्। श्रुतिमानागोचरत्वशङ्कां परिहृत्य प्रत्यक्षागोचरत्वशङ्कां परिहरति—मेलनेति। मेलनविषयकप्रतीतिः साक्षिरूपा चाक्षुषादिरूपावेत्यर्थः। अविशिष्टैव-तुल्यैव पृथीव्यां जलतेजसोरिव तयोः पृथिव्या इवान्वयधीवद्वाय्वाकाशयोरपि पृथिवीजलतेजोभिः सह परस्परमन्व-

'पञ्चीकृत पञ्चमहाभूतानी'ति च भाष्यकारवचनम्। तस्मादलमनेनानात्मचिन्तनेनेति दिक्। तानि च पञ्चीकृतानि पञ्च महाभूतानि मूर्ताख्यानि मिलित्वैकं कार्यमिन्द्रियाणामधिष्ठानं भोगायतनमुत्पादयन्ति । तदेव शरी-

न्यायरत्नावली ।

प्रयोजकम् , नार्धजरतीयं त्रिवृत्करणम् । किञ्च 'यदग्ने रोहितं रूपमि'इत्यादिनाग्न्यादेस्तेजआदिभूतत्रयरूपत्वमुक्त्वा 'यदविज्ञातमिवाभूदित्येतासामेव देवतानां समास'इति श्रुत्या भूतमात्रस्यैव तेजआदिभूतत्रयरूपत्वमुक्तम् । यद्भूतत्रयवत्त्वेन पूर्वोक्तेन नोपलभ्यते वाय्वादिकं तदेतासां तेजआदिस्वरूपाणां देवतानां समासस्समुदाय एवेति तच्छ्रुतेरर्थः । तथा च यद्योगप्राथम्येन यद्यत् रूपत्रयवत्त्वेनाप्रत्यक्षं तत् सर्वं तेजआदित्रयसमुदाय एवेत्यर्थलाभात् श्रुत्यैवाकाशादेस्तेजआदिभागघटितत्वोक्तेः कथं पञ्चीकरणे विवादः । न चैवकारेण तेजआदित्रयमात्रात्मकं बोध्यत इति वाच्यम् । वाय्वाकाशादेरप्यविज्ञातपदार्थत्वेन कात्स्न्यं बोधकयद्योगप्राथम्येन तत्रापि त्रयमात्रात्मकत्वस्य बोध्यत्वेन बाधादेवकारस्यायोगव्यवच्छेदकत्वनिर्णयात् । वचनमिति । पञ्चीकरणनामकग्रन्थस्थमिति शेषः । अधिष्ठानं संयोगसम्बन्धेनाश्रयः । तदेव शरीरमिति । 'त्वगिन्द्रियस्य साक्षाद्।श्रयश्शरी-

नारायणी ।

यधोरस्त्येव, वायोर्गन्धवत्त्वेनाकाशस्य नीलरूपवत्त्वेन प्रतीतेरिति-भावः । सिद्धान्तसिद्धत्वादपि पञ्चीकरणमावश्यकमित्याह—पञ्चीकृतेति । पञ्चीकरणनामकगन्थस्थमिति शेषः । श्रुतिमूलकोप्यनात्मविचारो न पूर्वपक्षसिद्धान्तैः समर्थयितुमाग्रहेण युक्तो व्यर्थत्वादित्यभिप्रेत्य झटिति प्रकृतविचारमुपसंहरति—तस्मादिति । लोकत एवावगतस्य श्रुतितर्काविषयत्वेन विफलत्वादित्यर्थः । प्रक्रान्तम्-पुनराह—तानि चेति । पञ्चीकृतानीत्यर्थ. । पञ्चभूतानि-बहिरिन्द्रियैः शब्दस्पर्शरूपरसगन्धवत्तया गृहीतुं योग्यानि शान्तघोरमूढात्मकानि, मिलित्वा-यथायोग्यं

रमित्युच्यते । तत्र सत्त्वप्रधानं देवशरीरम् । रजःप्रधानं मनुष्यशरीरम्, तमःप्रधानं तिर्यगादिस्थावरान्तं शरीरम् । तस्य च शरीरस्य पाञ्चभौतिकस्यापि चित्ररूपस्येव क्वचित् न्यूनाधिकभावो भूतानां न विरुध्यते । एवं विषया अपि पञ्चीकृतैकैकभूतजन्याश्चतु-

न्यायरत्नावली ।

रमि'ति विवरणोक्तलक्षणात् । तिर्यगादि-पश्वादि । चित्रेत्यादि । यथा नीलपीतादिनानारूपसमुदायरूपस्य चित्ररूपस्य मध्ये कस्यचिद्रूपस्य रूपान्तरावच्छेदकावयवपरिमाणापेक्षयाधिकपरिमाणावयवावच्छिन्नत्वरूपमाधिक्यं तथा मनुष्यादिशरीरे भूतान्तरापेक्षया पार्थिवभागस्याधिक्यम् , देवादिशरीरे तेजोभागाधिक्यम् , वरुणादिलोकस्थशरीरे जलीयादिभागाधिक्यमित्यर्थः । पृथिव्यादेः सचराचरपृथिव्यादिहेतुत्वमित्याह-एकैकभूतेति । चतुर्दशभुवनेत्यादि । घनोदकाख्यमहाजलराशिमध्ये ऊर्ध्वाधोभावापन्नं संयुक्तं महाकटाहद्वयं तिष्ठति, तन्मध्येऽपि जलराशिः, तदुपरि महानौरिव पञ्चाशत्कोटिविस्तीर्णा महापृथिवी सप्तनिमहस्रयोजनोन्नता, तस्या दशदशयोजनसहस्रपरिमितभागेभ्यो-

नारायणी ।

गुणप्रधानभावेनैकत्रीभूय, अधिष्ठानं-संयोगसम्बन्धेनाश्रयः । तदेवेन्द्रियाणामाश्रय एव, (शरीरमिति) 'त्वगिन्द्रियस्य साक्षादाश्रयः शरीरमि'ति विवरणोक्तलक्षणात् , तिर्यगादि—पश्वादि । चित्ररूपस्येवेति । यथा नीलपीतादिनाना(रूप)समुदायस्य मध्ये कस्यचिद्रूपस्य रूपान्तरविच्छेदकावयवपरिमाणापेक्षयाधिकपरिमाणावयवावच्छिन्नत्वरूपाधिक्यं तथा मनुष्यादिशरीरे पार्थिवभागस्याधिक्यं देवशरीरे तेजोभागस्य वरुणलोकस्थशरीरे जलभागस्याधिक्यमित्यर्थः । पृथिव्यादेः सचराचरपृथिव्यादिहेतुत्वमाह—एकैकशरीरभूतेति । चतुर्दशभुवनेत्यादि । घनोदकाख्यमहाजलराशिमध्ये ऊर्ध्वाधोभावापन्नं संयुक्तकटाहद्वयमस्ति तन्मध्येऽपि जल-

दंशभुवनाख्या ऊर्ध्वमध्याधोभावेन सत्त्वरजस्तमोंश-प्रधानाः । एतत्सर्वं ब्रह्माण्डाख्यं विराडिति मूर्तामिति

न्यायरत्नावली ।

ऽधस्तात् एकैकं पातालम् । इत्थं सप्त पातालानि स्वर्लोकादपि रम्याणि । तानि सप्त भुवनानि । तस्या उपरि पृादगम्यः सर्वो लोकः भूर्लोकः, (१)तदुपरि भुवः स्वः महः जनः तपस्सत्यमिति षड् भुवनानि । तान्येतानि चतुर्दशभुवनानि संयुक्तकटाहद्वयमध्यस्थानि । कटाहद्वयस्योर्ध्वमपि घनोदकाख्यं महाजलमस्ति । तदेव त्रिविक्रमाख्यविष्णुचरणसरोजाङ्गुष्ठतलनिर्भेदाधीनाछिद्रद्वारा कटाहान्तःप्रविष्टं शिशुमारचक्रसुमेर्वादिपतनद्वारा हिमालयमवतीर्णं गङ्गारूपेण त्रिलोकीं पावयतीति भावः । ऊर्ध्वेत्यादि ।

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।

नारायणी ।

राशिस्तदुपरि महानौरिव पञ्चाशत्कोटियोजनविस्तीर्णा महापृथिवी सप्ततिसहस्रयोजनोन्नता तस्या दशदशसहस्रयोजनपरिमितभागेभ्योऽधस्तादेकैकं पातालम् । इत्थमतलवितलसुतलरसातलतलातलमहातलपातालभेदेन सप्त पातालानि स्वर्लोकादपि रम्याणि । तस्या उपरि पादगम्यो देशो भूर्लोकः, तदुपरि भुवः स्वर्महर्जनः तपः सत्यमिति षड्भुवनानि । तान्येतानि चतुर्दशभुवनानि संयुक्तकटाहद्वयमध्यस्थानि । कटाहद्वयस्योर्ध्वमपि घनोदकाख्यो महाजलराशिरस्ति स एव त्रिविक्रमाख्यविष्णुचरणसरोजाङ्गुष्ठतलनिर्भिन्नछिद्रद्वारा कटाहान्तःप्रविष्टः शिशुमारचक्रसुमेर्वादिपतनद्वारा हिमालयमवतीर्णो गङ्गारूपेण त्रिलोकीं पावयतीति भावः । ऊर्ध्वेत्यादि ।

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥

इतिभगवद्वाक्येन ऊर्ध्वादिलोकानां सात्त्विकादिपुरुषप्राप्यत्वोक्तेः सत्त्वादिप्रधाना इत्यर्थः । तर्कबलेन नैयायिकसाधितसृष्टिक्रमस्याप्रामाणिकत्वं ज्ञापयिष्यन्स्वोक्तसृष्टिक्रमस्य प्रामाणिकत्वमाह—अयमिति ।

(१) तदुपरि भुवर्लोकः । तदुपरि स्वः···इति षड् भूवनानीति पाठ उपलब्धोऽपि प्रत्यक्षमशुद्धः, भुवर्लोकादन्येषां षण्णां भुवनानामभावादिति शोधतोऽस्माभिरिति बोध्यम् ।

चोच्यते। अयमौपनिषदः सृष्टिक्रमः। तद्विपरीतो लयक्रमः। मूर्ते पञ्चीकृतपञ्चमहाभूततत्कार्यात्मकं विराडाख्यं पृथिव्याद्येकैकभूतलयेनामूर्ते अपञ्चीकृतपञ्चमहाभूतात्मके हिरण्यगर्भाख्ये स्वकारणे लीयते। स एव दैनन्दिनः प्रलयः। अमूर्ते चाव्याकृते परमेश्वरो-

न्यायरत्नावली।

इत्यादिस्मृत्या ऊर्ध्वलोकानां सात्त्विकादिपुरुषप्राप्यत्वोक्तेः सत्त्वादिप्रधानतेति भावः। तद्विपरीत इति। 'विपर्ययेण तु क्रमोऽत उपपद्यते चे'ति न्यायात्। पृथिव्यादीत्यादि। पृथिव्या जले, तस्य तेजसि, तस्य वायौ, तस्याकाशे, तस्यापञ्चीकृतभूतेषु लयेनेत्यर्थः। दैनन्दिनेति। सङ्कर्षणमुखानलेन भूर्भुवस्स्वारूपलोकत्रयदाहे सति तत्तापक्रान्त्या महर्लोकस्थेषु जनलोकं गतेषु हिरण्यगर्भस्य सत्यलोकस्थस्य रात्रिर्भवतीति दैनन्दिनप्रलयः। तत्र महर्लोकस्य तापितत्वेन निर्जनत्वेऽप्यनाशात् जनलोकादौ च तापितत्वस्याभावात् न विराजस्सम्पूर्णस्य लयो दैनन्दिनप्रलये, किन्तु चतुर्दशभुवनैकदेशावच्छिन्नस्येति बोध्यम्। उपाधाविति यत्र लीयत इत्यनुपज्यते। तल्लक्षणादिति। तथा च प्रलयबोधकश्रुतिस्मृतीनां स्वपरिणामिकारणे संस्काररूपेण कार्याणामवस्थानरूपस्य प्रलयस्य बोधकत्वादव्याकृतस्य तदसम्भवात् तत्प्रलये मानाभावः। अत एव—

नारायणी।

प्रतिपादितः सृष्टिक्रम उपनिषत्प्रमाणक इत्यर्थः। तथाच तत्तद्वाद्यभ्युपगतः सृष्टिक्रमोऽप्रामाणिकोऽश्रौतत्वादिति भावः। तदिति। सृष्टिक्रमविपरीत इत्यर्थः। 'विपर्ययेण तु क्रमोऽत उपपद्यते चे'ति न्यायादिति भावः। पृथिव्यादीति। पृथिव्या जले तस्य तेजसि तस्य वायौ तस्याकाशे तस्यापञ्चीकृतभूतेषु लयेनेत्यर्थः। दैनन्दिनः—ब्रह्मणो दिवसावसाननिमित्त इत्यर्थः। सङ्कर्षणमुखानलेन भूर्भुवःस्वर्लोकानां दाहे सति तत्तापेन महर्लोकस्थेषु जनलोकं गतेषु हिरण्यगर्भस्य सत्यलोकस्थस्य रात्रि-

पाधौ । अव्याकृतस्य त्वनादित्वेन कारणाभावान्न लयः । स्वकारणे सूक्ष्मरूपेणावस्थानं लय इति तल्लक्षणात् । अयमेव प्राकृतः प्रलयः । ब्रह्मज्ञानादात्यन्तिक उच्छेदस्त्वात्यन्तिकः प्रलयः । स च कारणक्रमेणैव । कारणोच्छेदादेव

न्यायरत्नावली ।

अव्याकृतं परे तत्त्वे लीयते सकलाश्रये ।
.....अव्यक्तं परमात्मनि ॥

इत्यादिवाक्यानां परिणामशून्यतयावस्थानरूपभाक्तलयबोधकत्वम् । मुख्यलयबोधकत्वे 'तद्धेदं तर्ह्यव्याकृतमासीत्' 'नासदासीन्नोसदासीत्तम आसी'दित्यादिश्रुतिभिरव्याकृतरूपेण जगतः प्रलयकाले सत्त्वाभिधानानुपपत्तेः । प्राकृत इति । दैनन्दिनस्तु न प्राकृतः । प्रकृतौ संस्काररूपेणावस्थानस्यैव प्राकृतशब्दार्थत्वात् । दैनन्दिनस्तु न संस्काररूपेण पृथिव्यादेरवस्थानम् । शतवर्षीयानावृष्ट्यादिना पृथिव्यादेः शुष्कगोमयपिण्डाकारत्वादेः पुराणादिषूक्तत्वात् । किन्तूक्तपिण्डादिरूपेणैव हिरण्यगर्भेऽवस्थानम् । अत एव दैनन्दिनप्रलयसाधारणवाक्ये सूक्ष्मरूपेणेति मूले उक्तम् , न तु संस्काररूपेण । परमसूक्ष्मरूपं हि संस्कारः, न तु सूक्ष्मरूपमात्रमिति भावः । कारणक्रमेणेति ।

नारायणी ।

भवतीति दैनन्दिनप्रलय इत्युच्यते, तत्र महर्लोकस्य तत्तत्त्वेन निर्ज्जनस्याप्यनाशात् जनलोकादौ तापस्याप्यभावाद्विराजः संपूर्णस्य न लयो दैनन्दिनप्रलये, किन्तु चतुर्दशभुवनैकदेशावच्छिन्नस्येति ज्ञेयम् । उपाधावित्यत्र लीयते इत्यनुषज्यते । लयव्यवस्था जन्येष्वेव नाव्याकृत इत्याह-अव्याकृतस्येति । सूक्ष्मरूपेण-संस्काररूपेण, तल्लक्षणात्-लयस्य लक्षणात् । प्राकृतः-प्रकृतौ भवः प्राकृतः मायायां संस्काररूपेणावस्थितिरूप इतियावत् । ब्रह्मज्ञानात्-निरुक्ताखण्डाकारवृत्तेः । आत्यन्तिकः-मूलाविद्यारहितः, उच्छेदः-नाशो वर्णितप्रकारः । कारणक्रमेणेति । आदौ मूलाविद्यारूपकारणोच्छेदः पश्चात्तत्कल्पितकार्यस्येत्यर्थः । ननु भवन्मते

कार्योच्छेदात् । सर्वं च सृष्टिप्रलयादिकं स्वप्नसृष्टिप्रलयवद्-पारमार्थिकमपि वासनादार्ढ्याद्व्यवहारक्षममिति न मा-

न्यायरत्नावली ।

आदौ कारणस्योच्छेदः । पश्चात् कार्यस्येत्यर्थः । वस्तुतस्तु कार्योच्छेदस्य पूर्वभावित्वनिरासे तात्पर्यम् । तथा च कार्यं प्रथमतो नोच्छिद्यते, किन्तु युगपदेवाज्ञानतत्प्रयुक्तोच्छेद इत्यर्थः । उच्छेदादेवेति पञ्चमी ज्ञापकहेतौ 'धूमादग्निमानि'तिवत् । न च कार्योच्छेदं प्रति कारणोच्छेदस्य हेतुत्वात् कथमेवमिति वाच्यम् । उच्छेदस्य सिद्धान्ते जन्यत्वास्वीकारादेरुक्तत्वात् । 'या या प्रमा सा सा स्वसमानविषयकाज्ञानतत्प्रयुक्तविशिष्टकालपूर्वत्वशून्यकालवृत्तिरिति नियमेन युगपदुच्छेदस्य युक्तत्वात्, अज्ञानसम्बन्धाद्यनादिदृश्योच्छेदस्य अज्ञानोच्छेदसमकालत्वावश्यकत्वेनाज्ञानप्रयुक्तमात्रोच्छेदस्यैवाज्ञानोच्छेदसमकालताया युक्तत्वाच्च। ज्ञानस्याज्ञाननाशकत्वेऽपि न क्षतिः । अज्ञानोच्छेदस्य सर्वदृश्योच्छेदव्यापकत्वेऽपि अज्ञाननाशस्य (१)सर्वदृश्यनाशाव्याप्यत्वात् । वासनेति । सत्यत्ववासनेत्यर्थः । व्यवहारक्षममिति—मिथ्यात्वज्ञानात्पूर्वमूर्ध्वं वा तत्त्वसाक्षात्कारात्पूर्वं निष्कम्पप्रवृत्त्यादिक्षमम्, तत्त्वे साक्षात्कृते तु नैव (२)प्रवृत्त्यादिकम्, बलवत्तरक-

नारायणी ।

दृश्यत्वेन मिथ्याभूतमिदं कथं निरूपणार्हमित्याशङ्क्य न खपुष्पादिवदलीकं किन्तु सदसद्विलक्षणमतोऽर्थक्रियाकारित्वान्निरूपणार्हं भवत्येवेत्यभिप्रेत्याह—सर्वं चेति । वासनेति । सत्यत्ववासनेत्यर्थः । व्यवहारक्षमम्—अर्थक्रियाकारीत्यर्थः । मायिकत्वेऽपि तत्त्वदृष्टिकालीनाभावप्रतियोगिमायाविलासत्वेऽपि, तुच्छत्वप्रसङ्गः-खपुष्पादिवदलीकत्वप्रसङ्गः । सर्वदेशकालवृत्त्यभावप्रतियोगित्वरूपमिथ्यात्वा(३)विशेषेऽपि

(१) सर्वदृश्यनाशोत्पत्त्यव्याप्यत्वादिति गपुस्तके पाठः ।

(२) प्रवृत्त्यादिबलवत्तरकर्मवशात् सकम्पं तत् इति घपुस्तके । युक्तमिदम् ।

(३)—मिथ्यात्वविशेषेपि सत्त्वेन प्रतीयमानत्वादेर्विशेषादिति भावः इति खपुस्तके ।

ग्निकत्वेऽपि तुच्छत्वप्रसङ्गः । यथा चैतत्तथा व्यक्तमाकरे । एवं स्थिते जागरणादिव्यवस्थोच्यते । इन्द्रियवृत्तिकालीनार्थोपलम्भो जागरणम् । तत्र च मूर्तं विराडाख्यं भोग्यं प्रत्यक्षादिप्रमाणषट्केन व्यवह्रियमाण-

न्यायरत्नावली ।

र्भवशात् सकम्पम् । तदुक्तम्—

'शास्त्रेण नश्येत्परमार्थबुद्धिः कार्यक्षमं नश्यति चापरोक्षात् । इति । व्यक्तमाकर इति । उक्तं हि भाष्यादौ–'ननु भवन्मते जगतोऽसत्त्वेन तुच्छत्वमिति चेत्, क एवमाह जगत्तुच्छमिति। आविद्यकत्वात् सदसद्विलक्षणमित्यस्मदर्शनम् । अथ पुनर्विद्योदये तुच्छमुच्यते ! काममुच्यताम्, न त्वेतावता तत्पूर्वव्यवहारस्यानुपपत्ति' रिति । इन्द्रियवृत्तीति । स्वसमानाधिकरणा या इन्द्रियजन्यवृत्तयः, तत्कालीनोऽर्थोपलम्भ इत्यर्थः । स्वपदमर्थोपलम्भपरम् । यदि च जागरे सर्वदा इन्द्रियवृत्तौ न प्रमाणम्, कदाचिदनुमित्यादेरेव सम्भवात्, तदेन्द्रिय(वृत्ति)पदं प्रमापरं बोध्यम्। प्रमाणषट्केन--अज्ञाताबाधितविषयकधीरूपप्रमित्यादिषट्केन ।

नारायणी ।

सत्त्वेन प्रतीयमानाप्रतीयमानत्वादेर्विशेषादिति भावः । व्यक्तमिति। उक्तं हि भाष्यादौ "ननु भवन्मते जगतोऽसत्त्वेन तुच्छत्वमिति चेत् ! क एवमाह जगत्तुच्छमिति । किन्त्वाविद्यकत्वाच्छुक्तिरजतादिवत्सदसाद्वलक्षणमित्याह । 'इन्द्रियैरर्थोपलब्धिर्जागरणमि'तिपञ्चीकरणग्रन्थे भाष्यकारवचनम्, तत्र जन्यत्वस्य तृतीयार्थत्वे साक्षिमात्रभास्याकाशशुक्तिरजतादिज्ञानानां जागरणानापत्तेरतस्तत्रेन्द्रियकवृत्तिकालीनत्वमेवार्थ इत्यभिप्रेत्य तथैव लक्षणमाह—इन्द्रियेति । स्वसमानाधिकरणा या इन्द्रियाणां वृत्तिस्तत्कालीनोऽर्थोपलम्भ इत्यर्थः । स्वपदमुपलम्भपरम्, उपलम्भः साक्षिरूपः । तावन्मात्रं जागरणमित्युक्ते स्वप्नादेरपि जागरणत्वापत्तिरत उक्तं–(१)स्वसमानाधिकरणेति । प्रमाणष-

(१) उक्तम्–इन्द्रियवृत्तिकालीनेति । तन्निवेशेऽपि तत्पुरुषीयस्वप्नस्य पुरुषान्तरीयेन्द्रियवृत्तिकालीनत्वाज्जागरणापत्तिरत उक्तं–स्वसमानेति । इति खपुस्तके पाठः ।

त्वाद्व्यावहारिकं विश्वाख्येन जीवेनोपभुज्यते । स च देहेन्द्रियादिषु प्रवेशात् व्यापनाद्वा विश्व इत्युच्यते । विश प्रवेशने विष्लृव्याप्ताविति च स्मरणात् । अत्र यद्यपि विश्वेनामूर्तमव्याकृतं चानुमानादिनानुभूयते, तथापि व्यावहारिकं सर्वं विश्वेनैव ज्ञायत इति

न्यायरत्नावली ।

प्रत्यक्षानुमानशब्दानामिवोपमानार्थापत्त्यनुपलब्धीनामपि पृथगेव प्रमाणत्वम् । गोसादृश्यविशिष्टगवयादिप्रत्यक्षोत्तरं 'स गौरेतद्गवयसदृश' इति ज्ञानस्य मानान्तरानवतारकालीनस्योपमानमात्राधीनत्वात्, व्यतिरेकव्याप्तिज्ञानजन्यज्ञानस्यानुमितित्वे मानाभावात्, अर्थापत्तित्वस्यैवान्वयव्याप्तिज्ञानजन्यज्ञाने स्वीकारेणानुमितित्वलोपापत्तेश्च, अर्थापत्तिप्रमाणस्यान्यस्यावश्यकत्वात्, प्रतियोग्यनुपलब्धिजन्याया अभावप्रमाया इन्द्रियसन्निकर्षादिजन्यत्वे मानाभावेनानुपलब्धित्वजात्याश्रयतादृशप्रमाकरणत्वस्यानुपलब्धावेवोचितत्वात् । व्यावहारिकमिति । अज्ञातविषयकधीविषयत्वेनाज्ञातत्वात् ब्रह्मज्ञानात् पूर्वमबाध्यत्वाच्च प्रातीतिकान्यदृश्यत्वेन व्यावहारिकमिति भावः । अमूर्तं—स्वाप्नं वस्तु । अव्याकृतं—सौषुप्तम् । व्यावहारिकं—व्यावहारिकप्रमाणग्राह्यम् । अवस्थान्तरव्यापकत्वम्—अवस्थान्तरभोक्तृतैजसादिवाचिपदवाच्य-

नारायणी ।

ष्टकेति । प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धिरूपप्रमाणषट्केन । व्यतिरेकव्याप्तिजन्यज्ञानस्यानुमितित्वे मानाभावादर्थापत्तेः प्रतियोग्यनुपलब्धिजन्याया अभावप्रमाया इन्द्रियसन्निकर्षजन्यत्वे मानाभावादनुपलब्धेश्च पृथगेव प्रमाणत्वमिति भावः । व्यावहारिकम्—आत्मज्ञानातिरिक्तज्ञानाबाध्यत्वे सत्यात्मज्ञानबाध्यम् । स च—मूर्तभोक्ता जीवः । प्रवेशात्—सच्छिद्रान्तर्भावात्, व्यापनात्—सर्वमूर्तसंयोगित्वात्, विष्लृ व्याप्ताविति पृषोदरादित्वेन मूर्धन्यस्य षस्य तालव्यशत्वादिति भावः । अमूर्तं—स्वाप्नं वस्तु. अव्याकृतं सौषुप्तम् । व्यावहारिकं—व्यवहारक्षममर्थक्रिया-

नियमात् स्थूलशरीरोपाध्यभिमानित्वाच्च न तस्यावस्थान्तरव्यापकत्वम् । शुक्तिरजतादिज्ञानानामप्रामाणिकत्वात्तद्विषयस्याव्यावहारिकत्वेऽपि इन्द्रियव्यापारकालीनत्वाज्जागरणत्वोपपत्तिः । ज्ञानोत्पत्त्यादिप्रक्रिया चाधस्तादुक्तैव । एवं जाग्रद्भोगजनककर्मक्षये स्वाप्नभोग-

न्यायरत्नावली ।

त्वम् । तथा च जाग्रदवस्था येनैवानुभूयते तस्यैव विश्वशब्दवाच्यतेति भावः । स्वप्नो येनैवानुभूयते स एव तैजस इत्यादेर्वक्तुमशक्यत्वेन वैरूप्यापत्तेराह—स्थूलशरीरोपाध्यभिमानित्वाच्चेति । स्थूलशरीरघटितोपाध्यभिमानिवाचकपदवाच्यत्वाच्चेत्यर्थः । तथा चोपाधित्रयाभिमानी विश्वशब्दस्य, द्वयमात्राभिमानी तैजसशब्दस्य, एकमात्राभिमानी प्राज्ञशब्दस्य वाच्य इति भावः । अप्रामाणिकत्वात्—अज्ञातविषयत्वात् । इन्द्रियव्यापारेति । व्यावहारिकविषयक(१)बहिरिन्द्रियजन्यमनोवृत्तीत्यर्थः । कालीनत्वादिति । ज्ञानानां कालीनत्वाज्जागरणत्वोपपत्तिरिति योजना । तथा च शुक्तिरूप्यादिज्ञानाव्याप्तेः इन्द्रियजन्यवृत्तित्वमात्रं न जागरणलक्षणमिति भावः । कर्मोदये-कर्म-

नारायणी ।

कारितायोग्यम् । स्थूलशरीरेति । व्यावहारिकस्थूलशरीर इत्यर्थः । अवस्थेति । अवस्थान्तरोक्तैतैजसादिपदवाच्यत्वं तथाच जाग्रदवस्था येनैवानुभूयते स एव विश्वपदवाच्य इत्यर्थः । इन्द्रियजन्यं ज्ञानं जागरणमि'ति विहायेन्द्रियवृत्तिकालीनेत्युक्तेरभिप्रायं स्वयमेव प्रकटयति—शुक्तीति । अप्रामाणिकत्वात्—अज्ञातविषयकत्वात् । अव्यावहारिकत्वेऽपि—स्वोचितार्थक्रियाकारित्वाक्षमत्वेऽपि । इन्द्रियव्यापारकालीनत्वात्—विषयेन्द्रियसंप्रयोगकालीनत्वात् । स्वप्नावस्थां निरूपयितुमुपक्रमते—एवमिति । कर्मोदये—कर्मणः सहकारिसमवधाने, निद्राख्यया—'अभावप्रत्ययालम्बनावृत्ति-

(१)—विषयकप्रत्यक्षादिप्रमाणजन्येति घपुस्तके ।

जनककर्मादये च सति निद्राख्यया तामस्या वृत्त्या स्थूलदेहाभिमाने दूरीकृते सर्वेन्द्रियेषु देवतानुग्रहाभावान्निर्व्यापारतया लीनेषु विश्वोऽपि लीन इत्युच्यते। तदा च स्वप्नावस्था। तत्र चान्तःकरणगतवासनानिमित्त इन्द्रियवृत्त्यभावकालीनोऽर्थोपलम्भः स्वप्नः। तत्र मन एव गजतुरगाद्यर्थाकारेण विवर्तते, अविद्यावृत्त्या

न्यायरत्नावली।

रूपसहकारिसमवधाने। तामस्येति। तमोगुणविषयिकयेत्यर्थः। दूरीकृत इति। 'अभावप्रत्ययालम्बना वृत्तिर्निद्रे'ति पातञ्जलसूत्रेण व्यावहारिकविषयकवृत्त्युपरमोपहिततमोगुणविषयकवृत्तेर्निद्रात्वोक्त्या देहाभिमानरूपवृत्तेर्निद्रया दूरीकरणम्। व्यावहारिकाकारवृत्त्यभावस्य प्रत्ययः प्रयोजकः उद्रिक्ततमोगुणस्तद्विषयिका वृत्तिर्निद्रेति सूत्रार्थः। इन्द्रियेष्विति। जाग्रद्भोगमदकर्माभावप्रयुक्तादिति शेषः। इन्द्रियेति। बाह्येन्द्रियजन्येत्यर्थः। विवर्तते—परिणमते। सर्वत्र—प्रातिभासिकाध्यासस्थले

नारायणी।

निद्रे'तिसूत्रलक्षितया, तामस्या—तमोगुणप्रधानया, स्थूलदेहाभिमाने—तदुपलक्षितव्याहारिकसामान्यविषयकाभिमाने, दूरीकृते—उपरमिते। सर्वेति—दशसु ज्ञानकर्मेन्द्रियेषु। देवतेति। तत्तदिन्द्रियाधिष्ठातृदेवताप्रेरणाभावात् जाग्रद्भोगजनककर्मतिरोधानप्रयुक्तादिति शेषः। निर्व्यापारेति। स्वोचितव्यवहारसामान्याभावविशिष्टतयोपरतेषु भोगोपधायकवृत्त्यात्मत्वोपरमेण कारणात्मतां प्राप्तेष्विति यावत्। विश्वेति। स्थूलभोगोपधायकाभावेन भोगाभावात्तद्भोगभोक्ता विश्वपदाभिधेयो न भवति, तर्ह्येतत्सकलक्लृप्तसामग्र्यभावे भोग एव तत्र न स्यादित्याशङ्क्य तदुचितां तत्रत्यविशेषसामग्रीमाह—तत्रेति। तत्र—स्वप्नावस्थायां (१)मनोगतो यो जाग्रद्भोगजः संस्कारस्तदुद्बोधकः। इन्द्रियेति—बाह्येन्द्रियव्यापाराभावकालीनेत्यर्थः। अर्थेति—वक्ष्यमाणरीत्या प्रातीतिकपदार्थोपलम्भः। तत्र—स्वप्ने। गजेति—गजतुरगाद्याकृतिविशिष्टपरिणा-

(१) अन्तःकरणवासनानिमित्तमनोगतो यो०. इति खपुस्तके।

च ज्ञायत इति केचित्। अविद्यैव शुक्तिरजतादिवत् स्वप्नार्थाकारेण परिणमते ज्ञायते चाविद्यावृत्त्येत्यन्ये। कः पक्षः श्रेयान्? उत्तरः। अविद्याया एव सर्वत्रार्थाध्यासज्ञानाध्यासोपादानत्वेन कल्पनत्वान्मनोगतवासनानिमित्तत्वेन च क्वचिन्मनः परिणामत्वव्यपदेशात्। ननु तदा मनसो दृश्याकारपरिणामानभ्युपगमे द्रष्टृत्वसम्भवेनात्मनः स्वयंज्योतिष्ट्वसिद्धिरिति चेन्न।

न्यायरत्नावली।

सर्वत्र। क्वचित्-'सधीः स्वप्नो भूत्वे'त्यादिश्रुतौ। नन्वित्यादि। मनसः परिणामानभ्युपगमे मनसो द्रष्टृत्वसम्भवेनेति योजना। दृष्टृत्वं-ग्राहकत्वम्। स्वयंज्योतिष्ट्वेति। 'अत्रायं पुरुषस्स्वयंज्योतिर्भवती'त्यादिश्रुत्युक्तस्वयंज्योतिष्ट्वेत्यर्थः। अत्र-स्वप्ने। स्वयंज्योतिरिति। आदित्यादिमनोवृत्तिपर्यन्तानां ज्योतिषामभा-

नारायणी।

वबद्भवति। अविद्यावृत्त्या-ज्ञानाख्याऽविद्यापरिणामेन ज्ञायते-विषयीक्रियते। शुक्तीति-शुक्तिरजताद्याकारेणैव। स्वाप्नेति। अध्यस्यत इत्यध्यासः अर्थश्चासावध्यासश्चेत्यर्थाध्यासः स्वाप्नश्चासावर्थाध्यासश्चेति स्वाप्नार्थाध्यासः, [(१)तदा-कृत्या सर्वत्र प्रातीतिकाध्यासस्थले] अर्थेति। अर्थरूपभ्रमज्ञानरूपभ्रमपरिणामित्वेन अविद्याया एवोपादानत्वानङ्गीकारे तस्यात्यन्तोच्छेदानापत्तेः, परिणामिनो मनसोऽविनाशात्, तथाच विशेषदर्शनोत्तरमपि कदाचित्प्रतीयेत! न च प्रतीयते, तस्मान्नाशान्यथानुपपत्त्याऽविद्यैव परिणामिनीति भावः। मनोगतेति। मनोगतवासनाहेतुकत्वेनैव। क्वचित्-'स हि स्वप्नो भूत्वेमं लोकमतिक्रामती'ति श्रुतौ। नन्वित्यादि। मनसः परिणामानभ्युपगमे मनसो द्रष्टृत्वसम्भवेनेति योजना। द्रष्टृत्वं-ग्राहकत्वम्। आत्मनः-साक्षिणः। स्वयमिति। 'अत्रायं पुरुषः स्वयंज्योतिर्भवतीति श्रुत्युक्तस्वयंप्रकाशत्वेत्यर्थः। अत्र-स्वप्ने, अयं पुरुषः जीवः, स्वयंज्योतिः-स्वयमेव व्यवहारसाधनज्योति-

(१) इदं तदा इति पदं मूलेऽस्मिन्वाक्ये कस्मिन्नपि पुस्तके नास्ति ततस्तस्य व्याख्या निरुपयोगिनी।

बहिरिन्द्रियजन्यवृत्त्यभावेन तदानीं मनसोऽग्राहकत्वात्, तत्सहकारेणैव तस्य ग्राहकत्वनियमात्, सवृत्तिकान्तःकरणावच्छिन्नस्यैव चैतन्यस्य प्रमातृत्वनियमात्, तदान्तःकरणसत्त्वेऽपि प्रमात्रभावः। किमधिष्ठानं स्वप्नाध्यासस्य? मनोवच्छिन्नं जीवचैतन्यमित्येके। मूलाज्ञानावच्छिन्नं ब्रह्मचैतन्यमित्यपरे। किं श्रेयः? मतभेदेनोभयमपि। त-

न्यायरत्नावली।

वेन स्वयमेवात्मा स्वीयव्यवहारसाधनरूपं ज्योतिरित्यर्थः। बहिरिन्द्रियजन्येति। प्रत्यक्षादिप्रमाणजन्येत्यर्थः। तत्सहेत्यादि। प्रत्यक्षादिप्रमाणजन्यमनोवृत्तावेव मनसः परिणामित्वमिति नियमादित्यर्थः। तथा चाहमित्याकारकवृत्तिरविद्यापरिणाम एवेति भावः। ननु तथापि स्वप्ने मनसस्सत्त्वे मनोविशिष्टचिद्रूपप्रमातृसत्त्वापत्तिः तत्राह—सवृत्तिकेत्यादि। प्रमानुकूलव्यापारवत्त्वं प्रमातृत्वं वृत्त्यसत्त्वे न सम्भवतीत्यर्थः। मूलाज्ञानाव-

नारायणी।

र्भवतीत्यर्थः। बहिरिति। बहिरिन्द्रियसम्प्रयोगाभावेन इत्यर्थः। तदानीं स्वप्ने, अग्राहकत्वात्–ज्ञानजनकत्वाभावात्। तथाच प्रत्यक्षादिप्रमाणसहकारेणैवार्थग्राहकता नान्यथेति भावः। ननु नायं नियमः बाह्यप्रमाणसंयोगं विनाप्यात्ममानसस्य तार्किकादिभिरङ्गीकारात्तत्राह—तदिति। बहिरिन्द्रियसहकारेणैवेत्यर्थः। (१)प्रमाणान्तरसापेक्षस्य मनस आलोकादेरिव स्वतःप्रमाणत्वायोगात् नात्मनो मानसं किन्तु शाब्दमेवातो न तार्किकोक्तिः साध्वीति भावः। ननु तथापि मनसः सत्त्वे मनोनिष्ठस्य चिद्रूपस्य प्रमातुः सत्त्वप्रसङ्गस्तत्राह—सवृत्तिकेत्यादि। प्रमानुकूलव्यापारवत्त्वरूपं प्रमातृत्वं प्रथमश्लोके वर्णितं वृत्तिं विना न सम्भवतीति भावः। तदा-स्वप्ने। जाग्रत्यपि साक्षिण एव दृष्टृत्वेऽपि प्रमाणजन्यवृत्त्यारोहेणविषयीकरणात्प्रमात्रादिभावोऽप्यस्ति स्वप्ने तु न तथेति विशेषः। मूलेति। मूलाज्ञानावृतत्वोपलक्षितं ब्रह्माधिष्ठानमित्यर्थः।

(१) तस्य—मनसः ग्राहकत्वनियमात्–ज्ञानपारणामित्वनियमादित्यर्थः। अयं पाठोधिकः खपुस्तके।

था हि-जाग्रद्बोधेन स्वप्नभ्रमनिवृत्त्यभ्युपगमादधिष्ठान-ज्ञानादेव च भ्रमनिवृत्तेर्ब्रह्मचैतन्यस्य चाधिष्ठानत्वे संसारदशायां तज्ज्ञानाभावात्, ज्ञाने वा सर्वद्वैतनिवृत्तेर्न जाग्रद्बोधात्स्वप्ननिवृत्तिः स्यात्। 'स हि कर्ते'ति च जीव-कर्तृत्वश्रुतेः आकाशादिप्रपञ्चवत् सर्वसाधारण्यापत्तेश्च

न्यायरत्नावली।

च्छिन्नं ब्रह्मचैतन्यमिति। मूलाज्ञानावृतं ब्रह्माधिष्ठानमित्यर्थः। यथाश्रुते अज्ञानावच्छिन्नब्रह्मणः सर्वद्वैताधिष्ठानत्वेनाग्रे(१) तज्ज्ञानात्तन्निवृत्त्युक्त्यसङ्गतेः। निवृत्त्यभ्युपगमात्-बाधाभ्युपगमात्। ब्रह्मचैतन्यस्येत्यादि। ब्रह्मचैतन्यस्य चाधिष्ठानत्वे जाग्रद्बोधात् स्वप्ननिवृत्तिर्न स्यादिति योजना। कर्तेति चेति चकारेण-पूर्वोक्तस्य निवृत्तिर्न स्यादित्यस्य हेतुतया समुच्चयः। कर्तृत्वेति। तथा च सिद्धान्ते (२)*यस्मिन् कार्ये यः कर्ता स एवोपादानम्। घटादावपि कपालाकारनिर्गतमनोवृत्त्या कुलालादेः कपालाद्य-वच्छिन्नचिद्रूपत्वसम्पत्त्या उपादानत्वमस्त्येवेति स्वप्ने ब्रह्मण

नारायणी।

यथाश्रुतेऽज्ञानावच्छिन्नब्रह्मणः सर्वद्वैतानधिष्ठानत्वेनाग्रे तज्ज्ञानात्तन्निवृ-त्त्युक्त्यसङ्गतेः। जाग्रद्बोधेन-प्रमाणवृत्तिकालीनापरोक्षज्ञानेन, निवृत्त्य-भ्युपगमात्-बाधाभ्युपगमात्, अधिष्ठानज्ञानादेव-भ्रमकारणीभूताज्ञानवि-षयापरोक्षज्ञानादेव। ब्रह्मेत्यादि। ब्रह्मचैतन्यस्याधिष्ठानत्वे जाग्रद्बोधात्स्व-प्ननिवृत्तिर्न स्यादिति योजना। (तत्रोपपत्तिमाह—) संसारेति। आध्या-त्मिकप्रपञ्चावभासदशायाम्। तज्ज्ञानेति-मूलाज्ञानविषयत्वोपलक्षितब्रह्म-ज्ञानाभावात्। श्रवणादिनिदिध्यासनान्तव्यापारं विना तज्ज्ञानासम्भ-वादिति भावः। ज्ञाने वेति। स्वप्रकाशमाहात्म्यादिनेति शेषः। तथाच जाग्रत्स्वप्नादिव्यवस्थाप्रसङ्ग एवोच्छिद्येतेति भावः। स हीति। 'न तत्र

(१) सर्वद्वैताधिष्ठानत्वे जाग्रद्बोधान्तन्निवृत्त्युक्त्यसङ्गतेरिति घपुस्तके।

(२) *विवर्तोपादानस्य कर्तृत्वनियमात् स हि कर्तेत्यत्र जीवस्यैव स्वप्नकर्तृत्वा-वधारणाच्च स्वप्ने ब्रह्मण उपादानत्वे जीवस्य कर्तृत्वं न स्यादिति भावः* इति पाठान्तरं घपुस्तके।

न मूलाज्ञानावच्छिन्नं ब्रह्मचैतन्यमधिष्ठानम् ।

ननु जीवचैतन्यस्यानावृतत्वेन सर्वदा भासमानत्वात् कथमधिष्ठानत्वम्? सत्यम् । तत्रापि स्वप्नाध्यासानुकूल-व्यावहारिकसंघातभानविरोध्यवस्थाज्ञानाभ्युपगमात्,

न्यायरत्नावली ।

उपादानत्वे जीवस्य कर्तृत्वं न स्यादिति भावः । 'न तत्र रथा न रथयोगा न पन्थानो भवन्ति । अथ रथान्रथयोगान् पथः स्रृजते स हि कर्ते'ति श्रुतौ, तत्र—स्वप्ने, स हि—जीवो हि । अत्र जीवस्य स्वप्नानुकूलव्यापारालोचनादिमत्त्वरूपस्य स्वप्नकर्तृत्वस्यासम्भवात् अदृष्टद्वारा कर्तृत्वमेव श्रुत्योक्तम्, तच्चाकाशादाविव स्वप्नेऽपि ब्रह्मोपादानके सम्भवतीति नेदं दूषणं युक्तम् । प्रपञ्चवादिति । स्वप्नस्येति शेषः । सर्वसाधारण्येति । सर्वान् जीवान् प्रत्यापरोक्ष्येत्यर्थः । भानविरोधीति । मनोऽवच्छि-

नारायणी ।

रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान्पथः सृजत' इति पूर्वभागः । अयमर्थः । स्वप्ने यद्यपि रथादयो व्यावहारिका न सन्ति अथ अथापि भोगोपधायकान् रथादीन्सृजते । स्रष्टारं स्पष्टयति-स हि कर्तेति । स हि जीवः कर्ता स्रष्टव्यस्वप्नानुकूलालोचनादिमानित्यर्थः । तथाच श्रुतिबलादपि जीव एवाधिष्ठानमिति भावः । नन्वस्तु जीवः कर्ता उपादानत्वं तु प्रपञ्चोपादानत्वेन कल्पितस्य ब्रह्मण एवास्तु लाघवात्तथाच नाधिष्ठानं जीव इत्यत आह—आकाशादीति । स्वप्नस्येति शेषः । सर्वेति । सर्वजीवान्प्रति भोगयोग्यत्वापत्तेः । अधिष्ठानावरणं विना नाध्यासः आवरणं च न जीवे सम्भवति 'सर्वदाहमस्मी'त्यपरोक्षात् अतः स्वंप्रत्यावृतं ब्रह्मैवोपादानं युक्तमित्यभिप्रेत्य शङ्कते—नन्विति । जीवचैतन्यस्य—मनोऽवच्छिन्नचैतन्यस्य प्रमातृरूपस्य, अनावृतत्वेन—'नास्ति न भाति' इत्याद्यावरणाविषयत्वेन, सर्वदा भासमानत्वात्—यावत्स्वसत्त्व'महमस्मी'त्यपरोक्षधीविषयत्वात् । कथमिति । अध्यासाधिष्ठानताप्रयोजकावृतत्वाभावादिति भावः । स्वरसतो न सम्भवत्येवेत्यङ्गीकारपूर्वकमुत्तरमाह—सत्यमित्यादि । व्यावहारिकेति । ब्रह्मज्ञानमात्रबाध्यजगज्जीवादिसमुदायभा-

स्वप्नदशायां चाहं मनुष्य इत्यादिप्रातीतिकसंघातान्तर-भानाभ्युपगमात्। 'शय्यायां स्वपिमी'ति शय्यान्तरभानवत्। भानसामग्र्यभावश्च तुल्य एव। नन्वहं म-

न्यायरत्नावली।

न्नचिद्विषयकं यदज्ञानं तदेव व्यावहारिकशरीराद्यवच्छिन्नचिद्विषयकमपि स्वीक्रियते, अन्यथा शरीरादेस्साक्षिणा भानं स्यात्; घटाद्यवच्छिन्नचितस्तु स्वप्नकाले नाज्ञानविषयत्वे मानमस्ति, प्रमातृरूपसाक्षिचिदुपरागाभावादेव तदभानसम्भवात्। जीवस्य जगदुपादानत्वपक्षे घटादौ साक्षिसम्बन्धस्य सदा सत्त्वेऽपि जागरणकालिकाज्ञानेनैव तदावरणादिति ध्येयम्। शय्यान्तरभानवादित्यत्र व्यावहारिकान्यशय्याभानाभ्युपगमवत्। उक्तं हि मणिकारादिभिः "संशयस्वप्नौ न प्रमे, अत एव 'शय्यायां स्वपिमी'त्यादौ सुषुप्तपुरुषसंसृष्टशय्या भाती"त्यादि। भानसा-

नारायणी।

नविरोधीत्यर्थः। अवस्थेति। मूलाज्ञानावस्थारूपजायमाननिद्रादिरूपावरकाभ्युपगमात् स्वतोऽनावृतत्वेऽपि जीवस्य ब्राह्मणशरीरादिपुरस्कारेणावृतत्वमस्त्येव 'व्याघ्रोहं शूद्रोहमि'त्यादिभ्रमस्य स्वप्ने दर्शनादिति भावः। ननु तर्हि 'मनुष्योहमि'त्यादिप्रतीतिः स्वप्ने न स्याज्जीवस्य तज्ज्ञानविरोध्यज्ञानाभ्युपगमात्तत्राह—स्वप्नेति। 'अहं मनुष्य' इत्यादिना 'ब्राह्मणोहं क्षत्रियोहमि'त्यादिपरिग्रहः। प्रातीतिकेति। व्यावहारिकान्यप्रातीतिकसमुदायभानेत्यर्थः। तथाच प्रातीतिकदेहपुरस्कारेण प्रातीतिकाहमर्थस्यैव व्यावहारिकाहमर्थेऽध्यस्तस्य भानं व्यावहारिकाहमर्थज्ञानाच्चारोप्याधारयोरपि निवृत्तिरिति न कोपि दोष इति संक्षेपः। ननु व्यावहारिकेणैव तदुपपत्तिसम्भवे तस्याधिष्ठानत्वमङ्गीकृत्य भोक्तृभोग्यभेदकल्पनमन्याय्यं गौरवात्तत्राह—शय्यायामिति। इति प्रतीतौ व्यावहारिकान्यशय्याया इवेत्यर्थः। 'संशयस्वप्नौ च न प्रमे'ति वदतां मणिकारादीनां मत इति शेषः। ननु तत्र परमतानुसारेण तथोक्तिः परेणापनयस्य ज्ञानादेः सन्निकर्षत्वानङ्गीकारादित्यत आह—भानेति। व्यावहारिकविषयप्रमाकरणेन्द्रियरूपसामग्र्या

नुष्य इत्यादिव्यावहारिकसंघातज्ञानस्य प्रमाणाजन्य-

न्यायरत्नावली।

मग्रीति। व्यावहारिकविषयकप्रमाकरणेन्द्रियसन्निकर्षादीत्यर्थः। तुल्य इति। यथा व्यावहारिके शय्यादौ प्रत्यक्षादिसामग्न्य-भावः तथा मनुष्यशरीरादावित्यर्थः। ज्ञानस्य—जाग्रदशागतप्रथ-

नारायणी।

अभावश्चेत्यर्थः। तुल्य इति। यथा व्यावहारिके शय्यादौ भासकसामग्न्यभावस्तथा अहमर्थमनुष्यशरीरादावपीत्यर्थः। ननु तत्र ज्ञानलक्षणसन्निकर्षस्य भासकस्य सम्भवात्कथं सामग्न्यभावः अन्यथा 'सुरभि चन्दनम्, घटो नास्ति, घटं पश्यामि, वन्हिमनुमिनोमि'इत्यादौ घटसौरभादेर्भानं न स्यात् लौकिकसन्निकर्षबाधात्, अलौकिकस्य चानङ्गीकारादिति चेन्न। सौरभाद्यंशे स्मृतित्वादेरङ्गीकारात्, ज्ञानलक्षणायाः प्रत्यासत्तित्वे मानाभावात्। न च तर्हि कथमपूर्वार्थककाव्यरचना? अप्रसिद्धसंसर्गकस्य स्मृत्यसम्भवादिति वाच्यम्। तत्रावश्यकतत्तत्पदार्थस्मृत्या विशिष्टप्रत्यक्षमप्रकल्प्यैव तत्तत्पदस्मृतेरेव कल्पनात्। शाब्दस्यायोग्यताज्ञानेनाप्रतिबध्यतायाः कलहस्थले क्लृप्तत्वात्। उक्तपदस्मृतिजन्यशाब्दबोधादेव काव्यरचनोपपत्तेः, अक्लृप्तसन्निकर्षकल्पनमपेक्ष्य पदतदर्थोभयस्य स्मरणवृत्तिकल्पनस्यैव युक्तत्वात्। तस्मादलौकिकप्रत्यक्षान्यथानुपपत्त्या ज्ञानलक्षणप्रत्यासत्तेरसिद्धेर्न तेन सन्निकर्षेण देशान्तरस्थरजतादे'रिदं रजतमि'ति भ्रमे भानं किन्त्वधिष्ठाने ज्ञायमानानिर्वचनीयरजतादेरेव, निर्विषयज्ञानानभ्युपगमात्। आध्यासिकतादात्म्यस्य उत्पत्तेरावश्यकत्वे विनिगमकाभावेन रजतोत्पत्तेरपि युक्तत्वाच्चेत्यन्यत्र विस्तरः। अनिर्वाच्यत्वं च सद्विलक्षणत्वे सत्यसद्विलक्षणत्वम्। एतच्चार्थापत्तिप्रमाणकम्। तथाहि—सच्चेन्न बाध्येत, असच्चेन्न प्रतीयेत, विरोधाच्च न सदसदात्मकम्, अतः सदसद्भिन्नमिति। तस्मात्सिद्धानिर्वचनीयख्यातिः। एतेन भ्रमेऽसदेव रजतम् भाति वासनाविशेषादिति माध्यमिकस्य, 'सदेवान्तःकरणपरिणामात्मकम् भाती'ति साङ्ख्यादेः, 'क्षणिकविज्ञानात्मनो विशेषपरिणामो रजतादिरिदंत्वादिना भाती'त्यात्मख्यातिवादिनो योगाचारादेः, 'इदमिति पुरोवर्तिनो ग्रहणम्, रजतमिति रजतस्य स्मरणं तयोश्च स्वरूपतो विषयतश्च भेदाग्रहाद्विशिष्टव्यवहारोऽतः प्रवृत्तिश्चेत्यख्या-

त्वात्कथमज्ञाननिवर्तकता ? अवस्थान्तरान्यथानुपपत्त्या तत्कल्पने सुषुप्तावपि स्वप्नबाधकज्ञानमास्थीयेत। तच्चानिष्टम्, जाग्रत्त्वापत्तेरिति चेत्, साध्ववोचः। स्वप्नावस्थाज्ञानस्यैवान्तःकरणलयसहितस्य सुषुप्तिरूप-

न्यायरत्नावली।

मज्ञानस्य। अज्ञानेति। स्वप्नप्रयोजकाज्ञानेत्यर्थः। अवस्थान्तरान्यथानुपपत्त्या—पूर्वावस्थाया बाधाभावे अवस्थान्तरोत्पत्त्यन्यथानुपपत्त्या। तत्कल्पने-प्रमाणाजन्यज्ञानस्यापि बाधकत्वकल्पने। सुषुप्तावपीत्यादि। सुषुप्तावविद्यावृत्तिरूपमहमित्याकारकज्ञानं स्वप्नबाधकमङ्गीक्रियत इत्यर्थः। जाग्रत्त्वेति। स्वप्नसुषुप्तिशून्यत्वेत्यर्थः। स्वप्नावस्थाज्ञानस्य-स्वप्नावस्थाविषयकाज्ञानस्य, सुषुप्तौ यद्यद्भासते अज्ञानादि तदन्यस्वाप्रार्थविषयकाज्ञानस्येति यावत्। अथवा स्वप्नावस्थाज्ञानस्य-स्वप्नावस्थाधिष्ठानावषयकाज्ञानस्य, तस्यैव जीवेशादिभेदविषयकत्वस्वीकारात्। एवं च सुषुप्तौ साक्षिमात्रभास्यजीवेशतद्भेदादेरभानमुपपद्यते। त-

नारायणी।

तिवादिनो मीमांसकस्य च मतम् परास्तम्। आद्यद्वितीययोः ख्यातिबाधानुपपत्तेरेव, तृतीये रजतत्वेनेदंत्वस्य इदन्त्वेन रजतत्वस्य चारोप इत्यत्र विनिगमकाभावात् उभयारोपे सदसदादिविकल्पेनोक्तदोषात्, चतुर्थे रजतप्रकारकपुरोवर्तिविशेष्यकज्ञानत्वेन हेतुतायाः सत्यरजतादिस्थले क्लृप्ताया इह बाधेन हेत्वन्तरकल्पने गौरवात्। परिशेषात् अनिर्वचनीयख्यातिसिद्धिरित्यन्यत्र विस्तरः। ज्ञानस्य-जाग्रद्दशागतप्रथमज्ञानस्य। प्रमाणेति। अहमित्थंशस्याविद्यावृत्त्यारूढसाक्षिमात्रवेद्यत्वात् प्रमातृवेद्यत्वानङ्गीकारादिति भावः। अज्ञानेति। स्वप्नप्रयोजकाऽज्ञाननिवर्तकता। अवस्थेति। पूर्वावस्थाया बाधं विनाऽवस्थान्तरस्याऽसम्भवेन। तत्कल्पने-प्रमाणाजन्यज्ञानस्यापि बाधकत्वकल्पने। सुषुप्तावपीति। सुषुप्तावविद्यावृत्तिरूपमहमित्याकारकं स्वप्नबाधकमङ्गीक्रियत इत्यर्थः। जाग्रत्वापत्तेः-स्वप्नसुषुप्तिशून्यत्वापत्तेः। स्वप्नेति। स्वप्नावस्थाया जनकाऽज्ञा-

त्वान्न तत्र तद्बाधः । जागरणे तु मिथ्यैव स्वप्नोऽभादित्यनुभवादहमिति ज्ञानस्य प्रमाणजन्यत्वेऽपि यथार्थत्वाच्छरीरादिज्ञानस्य च प्रमाणजन्यत्वादवस्थाज्ञान-

न्यायरत्नावली ।

त्र-सुषुप्तौ । तद्बाधः-स्वप्नावस्थाबाधः । यथार्थत्वात्-अज्ञाताबाधितमनोऽवच्छिन्नचिद्विषयकत्वात् । प्रमाणजन्यत्वादिति । मनुष्यत्वादिविशिष्टरूपेण साक्षिमात्रेण कदाचित् भास्यत्वेऽपि चक्षुरादिप्रमाणभास्यत्वस्यापि कदाचित्तेन रूपेण शरीरादौ सत्त्वात् 'मनुष्यं मामहं पश्यामी'ति प्रतीतेरिति भावः । अनुभवादिति । तथा च प्रमाणजन्यज्ञानत्वेन नाज्ञानविरोधिता किन्त्वज्ञाताबाधितविषयकनिश्चयत्वेन, तत्समनियतजातिविशेषरूपमात्वेन वेति भावः । नन्वविद्यावृत्तिरूपेणाहमित्याकारकज्ञानेन यदि मनोऽवच्छिन्नचिद्विषयकं व्यावहारिकशरीराद्यनेकावच्छिन्नचिद्विषयकत्वेन सामान्याज्ञानशब्दवाच्यमज्ञानं निवर्तते तदा 'घटं न जानामी'त्याकारेणाज्ञातत्वविशिष्टघटविषयकेणाविद्यावृत्तिरूपज्ञानेनापि घटाद्यवच्छिन्नचिद्विषयकमज्ञानं निवर्त्तेत, तस्याप्यज्ञाताबाधितघटविषयकत्वस्वीकारात् । अज्ञानतत्कार्याविषयकमेव ज्ञानमज्ञाननिवर्तकमिति स्वीकारेऽपि आत्ममात्रविषयकसौषुप्ताविद्यावृत्त्या मूलाज्ञानं निवर्तेत, प्रमाणजन्यत्वत्यागे श्रवणादिजन्यत्वस्यापि त्यागौचित्यात् श्रवणादीनां प्रमाणाश्रितत्वात् तत्रा-

नारायणी ।

नस्यैव । तत्र-सुषुप्तौ । तद्बाधः-स्वप्नावस्थाबाधः । प्रमाणाजन्यत्वेऽपि-अविद्यावृत्तिमात्रारूढसाक्षिरूपत्वेपि । यथार्थत्वात्-अज्ञाताऽबाधितमनोवच्छिन्नचिद्विषकत्वात् । बहिरिन्द्रियसंप्रयोगसम्भवेन बहिरिन्द्रियजन्यमनोवृत्तिरूपत्वात् । ननु प्रमाणजन्यत्वं विनापि यथार्थत्वमात्रेण ज्ञानस्याज्ञाननिवर्तकत्वाङ्गीकारे सौषुप्तात्मबोधादप्यज्ञाननिवृत्तिप्रसङ्ग-

विरोधित्वमनुभवसिद्धम् । विशेषाज्ञानं तु न प्रमाणजन्यवृत्तिमन्तरेण निवर्तते । साक्षिणश्चाविद्यानिवर्तक-

न्यायरत्नावली ।

ह-विशेषाज्ञानं त्विति । (१)घटाद्येकैकमात्रविषयकाज्ञानं त्वित्यर्थः । अन्तरेणेति । 'घटं न जानामी'त्याकाराविद्यावृत्तौ घटाद्यंशे निश्चयत्वाभावात् प्रमात्वजात्यभावाद्वा नाज्ञाननिवर्तकता । अत एव स्वप्नेऽपि कदाचिन्मनो न जानामीत्याकारकाविद्यावृत्त्युदयेऽपि न (२)सामान्याज्ञाननिवृत्तिरिति भावः । ननु प्रमाणजन्यज्ञानस्याविद्यानिवर्तकत्वे साक्षिणोऽपि तत् स्यात्, अज्ञानसाक्षिणोऽज्ञातविषयांशे न निश्चयत्वमिति चेत्तर्हि तत्र ज्ञापकं वाच्यं तत्राह—साक्षिणश्चेति । निवर्तकत्वेऽपि । निवृ-

नारायणी ।

त्तादृशबोधस्याऽबाधिताऽज्ञातात्मविषयकत्वादित्यत आह—विशेषेति । परिपूर्णचिदानन्दरूपाऽखण्डार्थगोचराज्ञानं त्वित्यर्थः । प्रमाणेति । तत्त्वमस्यादिवाक्यहेतुकाखण्डार्थबोधं विना सौषुप्तबोधस्य चिन्मात्रगोचरत्वेऽप्यज्ञाताऽभेदाऽविषकत्वान्न ततोऽज्ञाननिवृत्तिः सम्भवति, किन्तु वाक्यजन्यवाक्यार्थबोधादेवेति दिक् । अथवा जाग्रद्बोधेन अहं मनुष्य' इत्यादिना यदि स्वप्नावस्थाजनकस्य व्यावहारिकद्वैतज्ञानस्य निवृत्तिस्तदा जागरे 'घटमहं न जानामी'त्यज्ञानप्रतीतिर्न स्यात् घटाज्ञानस्य नाशादित्यत आह-विशेषेति । घटत्वादिप्रकारकाऽज्ञानमित्यर्थः । प्रमाणेति । प्रमाणजन्यविशेषप्रकारकवृत्तिं विना यथा द्रव्यत्वेन घटज्ञानाद् द्रव्यत्वेन घटाज्ञाननिवृत्तावपि घटत्वेन न घटाऽज्ञाननिवृत्तिः, किन्तु घटत्वेन घटज्ञानादेव, तथाऽत्रापि सामान्यतोऽवस्थाऽज्ञाननिवृत्तावपि विशेषतः प्रमाणजन्यज्ञानादेव, तथा च ततः पूर्वं न विशेषज्ञानानुभवानुपपत्तिरिति भावः । ननु प्रमाणजन्याऽजन्योभयज्ञानादज्ञाननिवृत्तेर्दर्शनात् तदुभयसाधारणाज्ञाताबाधितगोचरज्ञानत्वेनैव विशिष्य निवर्तकता वाच्या, तथा च साक्षिणोऽप्यविद्यानिवर्तकत्वापत्तिः, साक्षिणोऽपि तथाविध-

(१) उक्तसामान्याज्ञानभिन्नाज्ञानमित्यर्थः इति घछपुस्तकयोः ।

(२) ज्ञानसामान्यस्य स्वविषयानिवर्तकतायाः क्लृप्तत्वादिति भावः । इति पाठान्तरं घछपुस्तकयोः ।

त्वाभाव अज्ञानसाधकत्वेनैव धर्मिग्राहकमानसिद्ध इति न किञ्चिदनवद्यम् । यावन्ति ज्ञानानि तावन्त्यज्ञानानीति चाभ्युपगमात् शुक्तिज्ञानेनैव व्यावहारिकसंघातज्ञानेनाज्ञाननिवृत्तावपि पुनरपि कदाचिद्रजतभ्रमवन्न स्वप्नाध्यासानुपपत्तिरिति जीवचैतन्यमेवाधिष्ठानमिति

न्यायरत्नावली ।

त्तिजनकतावच्छेदकनिश्चयत्वेत्यर्थः । अज्ञानसाधकत्वेति । अज्ञानविषयकत्वेत्यर्थः । ननु तत्साधकमपि पश्चात्तन्निवर्तकं भवतु तत्राह–धर्मीति । अविद्यासाधकं साक्षीति येन मानेन सिद्धं तेनैव तस्य तदनिवर्तकत्वं सिध्यति(१) । निवर्तकत्वसत्त्वे साधकत्वक्षण एव तदापत्तिरिति भावः । यावन्तीत्यादि । व्यावहारिकसंघातज्ञानेनाज्ञाननिवृत्तावपि पुनरपि स्वाप्नाध्यासस्याज्ञानान्तरेणोत्पत्तेर्नानुपपत्तिः, यावन्ति ज्ञानानि तावन्त्यज्ञानानीत्यस्याभ्युपगमात् । शुक्तिज्ञानेनाज्ञाननिवृत्तावपि पुनरप्यज्ञानान्तरेण रजतभ्रमोत्पत्तिवदित्यर्थः । एकाज्ञानपक्षे शुक्तिरूप्यादेरिव स्वाप्नस्यापि ब्रह्मज्ञानात् पूर्वं न बाधः, किन्तु निवृत्तिः ।

नारायणी ।

विषयधीरूपत्वात्तत्राह––साक्षिणश्चेति । निवर्तकत्वेऽपि । निवृत्तिजनकतावच्छेदकप्रमात्वाभावेत्यर्थः । धर्मिग्राहकेति । अविद्यासाधकः साक्षी येन मानेन सिद्धस्तेनैव तदनिवर्तकत्वमपि, ज्ञानस्य स्वविषयानिवर्त्तकतायाः क्लृप्तत्वात् । तथा च नापरोक्षज्ञानत्वं तथा किन्त्वज्ञातत्वाभावप्रयोजकवृत्तित्वमेवेति भावः । ननु यदि सामान्यविशेषोभयज्ञानात् सामान्यतो विशेषतश्चाज्ञाननिवृत्तिः कथं पुनः स्वाप्नभ्रमः ? कारणाभावात्तत्राह––यावन्तीति । व्यावहारिकसंघातज्ञानेनाज्ञाननिवृत्तावपि पुनरपि स्वप्नाध्यासस्याज्ञानान्तरेणोत्पत्तेर्नानुपपत्तिः,'यावन्ति ज्ञानानि तावन्त्यज्ञानानि' इत्यभ्युपगमात्, यथा श्रुतिज्ञानेनाज्ञाननिवृत्तावपि पुनरप्यज्ञानान्तरेण रजतभ्रमोत्पत्तिस्तद्वदित्यर्थः । एकाज्ञानपक्षे न ब्रह्मज्ञानात्स्वप्नबाधः किन्तु निवृत्तिमात्रम्, अतो ब्रह्मैवाध्यासाधिष्ठानमित्याशयेना-

(१) ज्ञानस्य स्वविषयनिवर्तकत्वस्य क्वचिदप्यक्लृप्तत्वादित्यर्थः ।

पक्षे न कोऽपि दोषः । यदा तु पुनर्ब्रह्मज्ञानादेवाज्ञाननिवृत्त्यभ्युपगमः, तदा रज्ज्वां दण्डभ्रमेण सर्पभ्रमतिरोधानवदधिष्ठानज्ञानाभावेऽपि जाग्रद्भ्रमण स्वप्नभ्रमतिरोभावोपपत्तेः ब्रह्मचैतन्यमेव स्वप्नाध्यासाधिष्ठानमिति पक्षेऽपि न कश्चिद्दोषः । प्रतिजीवं स्वप्नाध्यासासाधारण्यं तु मनोगतवासनानामसाधारण्यादेव । म-

न्यायरत्नावली ।

अतो ब्रह्मैवाध्यासमात्रेऽधिष्ठानमित्याशयेनाह-यदेत्यादि । पक्षेऽपीति । न दोष इत्यनुषज्यते । प्रतिजीवमित्यादि । एकेन जीवेनोपलभ्यमानः स्वप्नो नान्येन उपलभ्यत इति यत् स्वप्ने असाधारण्यं ब्रह्मणः स्वप्नोपादानत्वे (१)तदनुपपन्नमिति यत् पूर्वमुक्तं तन्न । ब्रह्मोपादानकस्यापि स्वप्नस्य तत्तज्जीवीयवासनाजन्यत्वेनोक्तासाधारण्यसम्भवादित्यर्थः । पक्षान्तरमाह-मनोवच्छिन्नं ब्रह्मेत्यादि । अविद्याप्रतिबिम्बितचिद्रूपजीवान्यत् ब्रह्मचैतन्यं नियन्तृरूपं मनोऽवच्छिन्नमधिष्ठानमित्यर्थः । प्रथमकल्पेऽपि अविद्याप्रतिबिम्बितचैतन्यस्य न तद्रूपतया अधिष्ठानत्वम्, 'अज्ञोऽहं घटं जानामी'त्येवं ज्ञातृतया स्वप्ने भानात्,

नारायणी ।

ह- यदेति । अज्ञानेति । अज्ञानोच्छेदाभ्युपगमः । तिरोधानवत्-कार्यावस्थामात्रपरित्यागवदिति यावत् । अधिष्ठानेति । अङ्गीकृतब्रह्मरूपाधिष्ठानज्ञानाभावेऽपि । आकाशादिवत् सर्वसाधारण्यं स्वप्नस्य वारयति—प्रतिजीवमिति । एकजीवेनोपलभ्यमानः स्वप्नो नान्येन जीवेनोपलभ्यत इत्याह-स्वप्नेति । भ्रमहेतुभूतानां मनोगतसंस्काराणां प्रतिजीवं नियतत्वात् उपपद्यत इति शेषः । संस्कारविशिष्टत्वेनैव मूलाज्ञानं भ्रमोपादानमिति मूलाज्ञानस्य साधारणत्वेपि कारणतावच्छेकानां संस्काराणामसाधारण्यात् स्वप्नासाधारण्यमिति भावः । पक्षान्तरमाह--मन इति । अविद्याप्रतिबिम्बितचिद्रूपजीवादन्यत् ब्रह्मचैतन्यं मनोवच्छिन्नं नियन्तृरूपमधिष्ठानमित्यर्थः । ननु मनोवच्छिन्नचित्त्वेन रूपेण ब्रह्मणोऽपि जागरे

(१) तदनुपपन्नं सदोष इति यत् पूर्वमिति घपुस्तके ।

नावच्छिन्नं ब्रह्मचैतन्यमेवाधिष्ठानम्। एतस्मिन्नपि पक्षेऽवस्थाज्ञानस्यावारकत्वाङ्गीकारान्न काप्यनुपपत्तिः। अत एव शास्त्रेषु क्वचित्क्वचित्तथा व्यपदेशः।

ननु मनोऽवच्छिन्नचैतन्यस्याधिष्ठानत्वे 'अहं गज' इत्याद्यहङ्कारसामानाधिकरण्येन गजप्रतीतिः स्यात् 'इदं

न्यायरत्नावली।

किन्तु मनोऽवच्छिन्नत्वेनेति। ननु मनोऽवच्छिन्नचिरूपेण जागरणे ब्रह्मणोऽपि भासमानत्वात् कथमधिष्ठानता? तत्राह—एत-

नारायणी।

भासमानत्वात् कथमधिष्ठानत्वं तत्राह—एतस्मिन्नपीति। अवस्थाऽज्ञानस्य—निद्रादिरूपस्योक्तस्य, न कापि अनुपपत्तिः—न स्वप्नाध्याससामग्र्यनुपपत्तिः। न चाज्ञानाज्ञानविकल्पदोषापत्तिः, मनोवच्छिन्नचिद्विषयकज्ञानेनावस्थाऽज्ञाननाशाङ्गीकारादित्यन्यत्र विस्तरः। अत्र भाष्यकारसम्मतिरप्यस्तीत्याह—अत एवेति। [मनोवच्छिन्नचितम् अधिष्ठानत्वस्य सोपपत्तिकत्वादेवेत्यर्थः]। शास्त्रेषु—भाष्यादौ। क्वचित्—तृतीयाध्यायद्वितीयपादादौ। तथेति। बाध्यन्ते चैते रथादयः स्वप्नदृष्टाः प्रबोध' इत्यादिना बाध्यशब्देनोच्छेदोक्त्या स्वप्नज्ञानस्यावरकावस्थाऽज्ञाननाशपूर्वकत्वनिर्देशः मूलाज्ञाननाशपूर्वकत्वस्य जागरे बाधात्, तथा च स्फुटमेव लब्धमवस्थाऽज्ञानस्यैव तदावरकत्वात् स्वप्नोपादानकत्वम्, अतोऽनयोः पक्षयोः परिणामिनि न विवादः, किन्तु विवर्ते। तत्र यस्मिन्पक्षे मनोवच्छिन्नचैतन्यमेवाधिष्ठानं तस्मिन्पक्षेन्तःकरणावच्छिन्न एव रजताद्युत्पत्तेरवश्यं वक्तव्यत्वान्नियमतोऽहमंशतादात्म्यविशिष्टतयैव प्रतीतिः स्यान्न त्विदमंशसामानाधिकरण्येनापि, रजतादाविव बाह्यांशाभावात्। यस्मिन्पक्षे ब्रह्मचैतन्यमेवाधिष्ठानं तस्मिन्पक्षे बाह्यांशाभावात्सामान्यत एव प्रतीतिः स्यादिति पक्षद्वयेप्याशङ्कते—नन्वित्यादि। मन इति। जीवरूपस्य तादृशब्रह्मणो वा अधिष्ठानत्वे—स्वप्नाध्यासाधिष्ठानत्वे। 'अहं गज' इत्यादिना 'अहं गजवानि'त्यादिपरिग्रहः। अहङ्कारेति। अहमंशस्याधारत्वादहमंशवैशिष्ट्यावगाहित्वेनैव। तथा च तादात्म्येन रजतादेरिवोत्पत्ता'वहं गज' इति संसर्गितया सुखादेरिवोत्पत्तौ 'चाहं सुखी'तिवदहं गजवानि'त्यादिप्रतीतिः स्यादित्यर्थः। सामानाधिकरण्येनैवेत्येवकारार्थं स्फुटयति—इदमिति। द्वितीयपक्षे

रजतमि'ति शुक्तिसामानाधिकरण्येन रजतप्रतीतिवत्, न 'त्वयं गज' इति। ब्रह्मचैतन्यस्याधिष्ठानत्वपक्षेऽपि 'गज' इत्याकारैव प्रतीतिः स्यान्न 'त्वयं गज इति। तत्रापीदङ्कारास्पदीभूतबाह्यार्थाभावस्य समानत्वादिति चेन्न। आद्ये पक्षे अहङ्कारस्य शुक्तिवदधिष्ठानानवच्छेदकत्वात् 'शुक्तिरजतमि'तिव'दहं गज' इति न भ्रमाकारप्रसङ्गः। 'अहमि'ति ज्ञानस्येव 'शुक्ति'रिति ज्ञानस्यैव भ्रमविरोधित्वात्, इदमंशस्य च भ्रमाविरोधिन एव तत्र भानाभ्युपगमात्। स्वप्ने तु गजं इत्याकारवदयमीत्याकारोऽपि कल्प्यते एव। उभयाकारबाधेऽप्यधिष्ठानीभूतचैतन्याबाधान्न शून्यवादप्रसङ्गः। जाग्रद्दशागामपि शु-

न्यायरत्नावली।

स्मिन्नित्यादि। अधिष्ठानानवच्छेदकत्वात्-भ्रमप्रयोजकाज्ञानविषयतावच्छेदकत्वात्। भ्रमाविरोधिनः-भ्रमविरोधिधीविषयशुक्तित्वाद्यविशेषितस्य। तत्र-भ्रमे। कल्पित एव न तु बाह्यः। जाग्रद्दशायां-जाग्रद्दशागतभ्रमे। शुक्तीदङ्कारविलक्षणस्य-रज-

नारायणी।

आह—ब्रह्मेति। गज इत्येव-इदमंशाहमंशवैशिष्ट्यानवगाहिनी। एवकारार्थं स्वयमेव स्फुटयति—नत्वित्यादि। समाधत्ते—आद्य इत्यादि। अधिष्ठानावच्छेदकत्वात्-भ्रमप्रयोजकाज्ञानविषयतावच्छेदकत्वात्, अधिष्ठानावच्छेदकस्य च भानं तत्प्रकारकधियो भ्रमविरोधित्वादित्याह—अहमिति। भ्रमेति। भ्रमबाधकज्ञानाविषयस्यैव आधारत्वादिति भावः। तत्र-भ्रमे। ननु तथापि कथं रजतादिभ्रम इव स्वप्नभ्रमे इदमंशभानम्? अधिष्ठानेऽसत्त्वादित्याशङ्क्य मास्त्वधिष्ठाने इदमंशस्तथापि संस्कारेण गजादिवत्कल्पितेदमंशस्यापि भानान्न कोपि दोष इति पक्षद्वयेप्येकोक्त्या समाधानमाह—स्वप्ने त्विति। कल्पित एव न तु बाह्यः। ननु प्रतीयमानमात्रांशस्य कल्पितत्वेन बाधावश्यकत्वात् शून्यताप्रसङ्ग इत्यत आह—उभयेति। अध्यस्ताधारांशोभयबाधेपीत्यर्थः। न स्वप्नभ्रम एवेयं कल्पना किन्तु जागरेपीत्याह—जाग्रदिति।

क्तीदङ्कारविलक्षणस्य प्रातीतिकस्यैव रजतेदङ्कारस्य भानाभ्युपगमाच्च । 'अध्यस्तमेव हि परिस्फुरति भ्रमेष्वि'ति न्यायात् । शुक्तीदमंशभानपक्षेऽपि नेदमंशसत्यत्वमध्यासे प्रयोजकम् । किन्त्वधिष्ठानसत्यत्वम् ।

न्यायरत्नावली ।

तसंसृष्टत्वानापन्नादिदमंशात् विलक्षणस्य रजतेदङ्कारस्य । रजतसंसृष्टेदमंशस्य प्रातीतिकेन रजततादात्म्येन विशिष्टतया प्रातीतिकमेवेदन्त्वविशिष्टं भ्रमे भाति, नातादृशं व्यावहारिकमित्यत्र सङ्क्षेपशारीरकोक्तिं प्रमाणयति—अध्यस्तमेवेत्यादि । नन्विदं रजतमिति भ्रमे शुक्तीदमंशस्य भानपक्षे भ्रमे(१) विशिष्टस्याप्रातीतिकत्वनियमात् 'अयं गज' इति स्वप्नानुपपत्तिस्तत्राह—शुक्तीति । सत्यत्वं—प्रातीतिकान्यत्वम् । प्रयोजकं-व्यापकम् ।

नारायणी ।

जाग्रद्दशागतभ्रमेपीत्यर्थः । शुक्तीति । शुक्तीदमंशाद्व्यावहारिकाद्भिन्नस्य, प्रातीतिकस्यैव—प्रतीत्याभावव्यापकीभूताभावप्रतियोगिनः, रजतेदङ्कारस्य-रजतसंसृष्टेदमंशस्य । अस्मिन्नर्थे संक्षेपशारीरकाचार्योक्तिं प्रमाणयति—अध्यस्तमिति ।

अध्यस्तमेव हि परिस्फुरति भ्रमेषु नान्यत्कथंचन परिस्फुरति भ्रमेषु ।
रज्जुत्वशुक्तिशकलत्वमरुक्षितित्वचन्द्रैकताप्रभृतिकानुपलम्भनेन ॥

इति संक्षेपशारीरकाचार्योक्तयुक्त्येत्यर्थः । नन्विदं रजतमिति भ्रमे शुक्तिदङ्कारस्यैव भानपक्षे भ्रमविषयस्य प्रातीतिकत्वनियमाभावा 'दयं गज'इति भ्रमानुपपत्तिस्तदवस्थेत्यत आह—शुक्तीति । सत्यत्वं-प्रातीतिकान्यत्वं प्रयोजकं व्यापकं भ्रमनिवर्तकधीविषयांशस्यैव भ्रमनाशकत्वान्यथानुपपत्त्या सत्यत्वावश्यकत्वादिदमंशस्य तादृशसत्यत्वावश्यकत्वे मानाभावादिति भावः । धर्मिण इदमंशस्य सत्यत्वाभावेऽपि भ्रमस्सदधिष्ठान एक एवेति नियमोऽधिष्ठानस्य सत्यत्वादव्यभिचार्येवेत्यभिप्रेत्याह—किन्त्विति । तत्सत्यत्वं विना तद्भानाद्भ्रमनिवृत्तेरसम्भवादिति भावः । ननु विशेष्यतया भातस्येदमंशस्य चेन्नाधि-

(१) विशेष्यस्याप्रातीतिकेति घपुस्तके ।

अधिष्ठानं च तत्राज्ञातं शुक्तिचैतन्यमिवात्रापि साक्षिचैतन्यं विद्यते एवेत्युपपादितम्। तस्मान्न पक्षद्वयेऽपि काप्यनुपपत्तिः। अत्र च स्वाप्निकपदार्थभोक्ता तैजस इत्युच्यते। पित्ताख्यतेजःप्रधानकत्वात्। आदित्यादिज्योतिरन्तरेणापि भासकत्वादिति वा। एवं जाग्र

नारायणी।

ष्ठानत्वं किमधिष्ठानं तर्हि स्वप्नभ्रमस्य? तत्राह-अधिष्ठानमिति। परमते यद्धर्मप्रकारकज्ञानस्यैव भ्रमविरोधित्वम्, अज्ञानविषयतावच्छेदकतादृशधर्मावच्छिन्नमेवाधिष्ठानं न ज्ञातसामान्यधर्मावच्छिन्नमित्यर्थः। विशेषणभेदेन विशिष्टभेदात् ज्ञातेदन्त्वादिरूपधर्मविशिष्टमाधारः, अज्ञातशुक्तित्वादिरूपधर्मविशिष्टमधिष्ठानमिति यावत्। तत्र-जाग्रदवस्थाकालीनशुक्तिरजतभ्रमे, अत्रापि-स्वप्नभ्रमेऽपि। साक्षिचैतन्यम्-अहङ्कारोपहितं मूलाज्ञानावृतत्वोपहितं वा, तस्यापि जीवचैतन्येनैक्यमादाय विषयेभिव्यक्तस्य विषयावभासकत्वाङ्गीकारात् साक्षितया निर्देशः। एतेन मनोवच्छिन्नचैतन्यस्य स्वप्नाध्यासाधिष्ठानत्वपक्षेऽहमर्थ आधारो वा अधिष्ठानं वा? नाद्यः। 'अहं गज'इत्येव स्यान्न त्वयं गज इति। आधारारोप्ययोरेवाभेदप्रतीतेः। इदमंशभेदप्रतीत्ययोगात्। न द्वितीयः। कदाचिदहं व्याघ्र इति भ्रमानुपपत्तेः। अधिष्ठानारोप्ययोरभेदाप्रतीतिरिति निरस्तम्। व्यावहारिकाहङ्कारोपहिते साक्षिणि सकलाध्यासाङ्गीकारात्। अधिष्ठानतावच्छेदकत्वेन व्यावहारिकाहङ्कारस्य भ्रमे भानाभावात्। निद्रादिदोषवशात् अधिष्ठानाधारोभयकोटिबहिर्भूतकालपनिकाहङ्कारेणैवेदङ्कारसामानाधिकरण्येनारोप्यस्य भ्रमे भानमिति न कोऽपि दोष इत्यन्यत्र विस्तरः। स्वयमेव स्वस्य 'द्वितीयपक्षे त्विति' विशेषाकथनन्यूनतां परिहरन्नुपसंहरति--तस्मादिति। स्वप्ननिरूपणस्य पर्यवसानमाह—अत्र चेति। स्वप्नावस्थायां तेजःप्रधानत्वमिति प्रसक्तमित्याशङ्क्याह--आदित्येति। 'अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेग्नौ शान्तायां वाचि किं ज्योतिरयं पुरुष' इति प्रश्ने 'आत्मैवास्य ज्योतिरि'ति याज्ञवल्क्योत्तरश्रुतेरिति भावः। इति स्वप्नप्रकरणम्। विश्वतैजसोपाधी जाग्रत्स्वप्नौ 'एतावुभावनुसञ्चरति स्वप्नान्तं च बुद्धान्तं चे'ति श्रुत्युक्तौ निरूप्य 'तद्यथा श्येनो वा सुपर्णो वे'ति श्रुतिबोधितं प्राज्ञोपाधिं निरूपयितुमुपक्रमते—एवमिति।

त्स्वप्नभोगद्वयेन श्रान्तस्य जीवस्य तदुभयकारणकर्म-क्षये ज्ञानशक्त्यवच्छिन्नस्य सवासनस्यान्तःकरणस्य कारणात्मनावस्थाने सति विश्रामस्थानं सुषुप्त्यवस्था। 'न किञ्चिदवेदिषमि'ति कारणमात्रोपलम्भः सुषुप्तिः। तत्र जाग्रत्स्वप्नभोग्यपदार्थज्ञानाभावेऽपि साक्ष्याकारं

न्यायरत्नावली ।

तत्रापि-स्वप्नेऽपि । कारणेति । तदानीमुपधायकेत्यर्थः । क्रिया-शक्त्यवच्छिन्नमात्रस्य प्राणस्य सुषुप्तौ लयाभावादाह—ज्ञानश-क्त्यवच्छिन्नस्येत्यादि । कारणात्मना-कारणीभूताज्ञानग-तसंस्काररूपेण । कारणमात्रोपलम्भः-स्थूलसूक्ष्मरूपदेहानुपल-म्भविशिष्टः कारणोपलम्भविशेष इत्यर्थः । यथाश्रुतेऽविद्यावृत्ति-रूपकार्योपलम्भस्य साक्षिणस्सत्त्वादसङ्गतिः । मूर्छाप्रलयादि-वारणाय विशेष्यदलम् । अवस्थाज्ञानाकारं संस्कारतापन्नजाग्रत्स्व-प्नाविषयकम(१)नादिजीवेशभेदादिविषयकं च यदवस्थारूपमज्ञानं

नारायणी ।

तदुभयेति। जाग्रत्स्वप्नोभयेत्यर्थः। क्रियाशक्तिविशिष्टस्य सुषुप्तौ लयाभावा-दाह-ज्ञानेति । ज्ञानशक्तिसमष्टिरूपस्य अन्तःकरणस्य लयेऽपि वासनाभि भोगस्तत्र स्यात्तत्राह—सवासनस्येति । कारणात्मना-कारणीभूताऽज्ञा-नगतसंस्कारेण । कारणेति । स्थूलसूक्ष्मदेहानुपलम्भविशिष्टः कारणोप-लम्भः इत्यर्थः । मूर्च्छाप्रलयादिवारणाय विशेष्यदलम् । सुषुप्तौ मनसः पुरीतति प्रवेशाद्ज्ञानसामान्यं प्रति वाङ्मनोयोगरूपकारणस्य सुषु-प्तिकाले बाधान्न कारणोपलम्भोऽपि युक्तिसह इति तार्किका-दिशङ्कामपाकर्तुमाह—तत्रेति । तत्र-सुषुप्तौ, जाग्रदिति । जाग्रत्स्वप्ना-वस्थयोर्भोग्या ये पदार्था व्यावहारिकप्रातिभासिकरूपास्तद्विषयक-ज्ञानाभावेऽपि । तत्तदर्थावभासकेन्द्रियवासनादिरूपविशेषसामग्र्या अ भावादिति शेषः । साक्ष्याकारम्-निकृष्टाहङ्काररूपसाक्षिविषयकम्, सु-खाकारं-ब्रह्मरूपसुखविषयकम्, अवस्थाऽज्ञानाकार च—स्वप्नाधिष्ठा-नविषयकं यदवस्थाज्ञानं तद्विषयकं च, अविद्यावृत्तीत्यनेन

(१) स्वप्नाधिष्ठानविषयकं च इति पाठान्तरम् । घपुस्तके ।

सुखाकारमवस्थाज्ञानाकारं चाविद्याया वृत्तित्रयमभ्युपेयते। अहङ्काराभावाच्च नैका विशिष्टवृत्तिः, सुषुप्त्यभा-

न्यायरत्नावली।

तद्विषयकम्। संस्कारादीनां साक्षिसम्बन्धेन प्रकाशप्रसक्तेस्तत्राज्ञानमावश्यकम्। त्रयमिति-आकारत्रयोपहितरूपभेदसम्भवादित्यभिप्रायम्, समूहालम्बनैकवृत्त्या निर्वाहे वृत्तित्रयकल्पने गौरवात्। ननु मूलाज्ञानाकारवृत्त्यापि 'नावेदिष' मिति स्मरणोपपत्तेः अवस्थाज्ञानविषयकवृत्तिः किमित्युक्ता? उच्यते—'न किञ्चिदवेदिषमि' त्यनेकपदार्थविषयकज्ञानस्मृतेर्मूलाज्ञानेनानुपपत्तेः तस्य चिन्मात्रविषयकत्वात्। अत एव(१)'आत्मानमीशान्यं मनुष्यं वा नावेदिषम्, आकाशादिकं नावेदिषम्' इति स्मृतेरुपपत्तिः। इदं तु बोध्यम्। मूलाज्ञानाकाराप्यविद्यावृत्तिस्सुषुप्तावश्यं वाच्या। प्रलयान्यकाले सर्वदैव तत्स्वीकारात्। 'एतावत्कालं मूढोऽहमास'मिति नानाविषयाविशेषितरूपेणाप्यज्ञानस्य जागराद्यकाले तत्त्वज्ञानकाले च स्मरणात्। एवञ्च मनोऽवच्छिन्नचितः स्वप्नाधिष्ठानत्वपक्षेऽप्युक्तस्मरणोपपत्तिरिति। नन्वज्ञानविशिष्टसाक्षिविषयिका सुखाभिन्नसाक्षिविषयिका च वृत्तिः कुतो नोक्ता? तत्राह-नैकेति। विशिष्टवृत्तिः-अज्ञानादिविशिष्टसाक्षात्कारवृत्तिः। अहङ्काराभावादिति। तथा च संसर्गविषयकवृत्तौ अहङ्कारत्वेन हेतुता। सा च हेतुता निमित्ततया कार्यसहभावेनैवेति नाहङ्कारलयोत्पत्तिकालेऽपि विशिष्टविषयकवृत्त्युत्पत्तिः। अहङ्कारत्वं च

नारायणी।

त्वङ्मन योगाभावेऽपि न सुषुप्तावनुभवाभावः साधयितुं शक्यः, त्वङ्मनोयोगस्य प्रमाणजन्यज्ञानं प्रत्येव हेतुत्वाङ्गीकारादिति सूचितम्। त्रयं—निर्विकल्पवृत्तित्रयम्। ननु लाघवात्त्रिषयसंसर्गावगाह्येक एव प्रतियोगी क्रियतां तत्राह—अहङ्कारेति।

(१) आत्मानं गौरं मनुष्यमिति घपुस्तके।

वप्रसङ्गाच्च । अत एव वृत्तिरूपस्योपलम्भस्याभावान्न

न्यायरत्नावली ।

स्थूलावस्थमनस्त्वम्, (१)अहमाकाराविद्यावृत्तित्वं वा । तार्किकादिमते तु निर्विकल्पकस्यापि सुषुप्तावस्वीकारात् जन्यज्ञानमात्रे त्वज्ञनोयोगस्य हेतुत्वम् । नन्वस्थाज्ञानस्यैवाज्ञानसाक्षिणोस्संसर्गविषयकत्वं स्वीकृत्य तादृशसंसर्गभानमुपपाद्यताम्, किमहङ्कारहेतुतयेति चेन्न । तावतापि संसर्गाकारवृत्तेर्वारयितुमशक्यत्वात्, सुषुप्तिपूर्वक्षणे लिङ्गपरामर्शादिसत्त्वे संसर्गानुमित्यादेर्दुर्वारत्वाच्च । अत एवाह—सुषुप्त्यभावप्रसङ्गादिति । सुषुप्तौ संसर्गाकारवृत्तिस्वीकारे सुषुप्त्यभावप्रसङ्गात्तादृशवृत्तावहङ्कारहेतुताकल्पनात् तादृशहेत्वभावात्तादृशवृत्त्यभाव इति समुदायार्थः । न च निर्विकल्पकाविद्यावृत्तेस्संस्कारतापन्नमनआदाविवाज्ञानसंसर्गादावप्यविद्यावृत्युत्पत्तिवारणमिति वाच्यम् । जागरस्वप्नयोरज्ञानादिसंसर्गविषयिकाया 'न जानामि' इत्यादिवृत्तेरुत्पत्त्या तत्सामग्र्याश्चाज्ञानादिरूपायाः सुषुप्तावपि तदापत्तेः । संस्कारतापन्नमनआदौ तु संसर्गविषयकानुमित्यादिकमहङ्कारहेतुकमेव जाग्रदादिवृत्तेरुत्पत्तिकाले जायते, नाविद्यावृत्तिरिति वैषम्यम् । वृत्तीत्यादि । तथा च वृत्तिरूपः कारणोपलम्भो लक्षणे निवेश्य

नारायणी ।

स्थूलावस्थस्यान्तःकरणसंसर्गस्याभावाच्च नैकाहमर्थविशेष्यकसुखाभिन्नस्वापप्रकारकानुभवमित्यर्थः । घटत्वप्रकारकवृत्तिमात्रेऽहङ्कारस्य हेतुत्वकल्पनादिति भावः । अस्त्वज्ञानवदहङ्कारोऽपि तत्रेत्यत आह—सुषुप्त्यभावेति । बाह्यार्थविषयकवृत्त्यन्तरस्यापि तत्राहङ्कारसत्त्वेन सम्भवादिति भावः । कारणात्मनावस्थितिः सुषुप्तिरिति लक्षणस्य प्रलयेऽतिव्याप्तावपि कारणमात्रोपलम्भः सुषुप्तिरिति लक्षणस्य नातिव्याप्तिरित्याह—वृत्तिरूपस्येति । एतेन साक्षिरूपस्योपलम्भस्य तत्र सत्त्वेऽपि नातिव्याप्तितादवस्थ्यम् । लक्षणे उपलम्भपदस्य वृत्तिपरत्वादिति

(१) अहमाकारेति द्वितीयं लक्षणं नास्ति घपुस्तके ।

प्रलयेऽतिव्याप्तिः । तत्र तत्कल्पनाबीजाभावात् । इह च 'सुखमहमस्वाप्सं न किञ्चिदवेदिषमि'ति सुप्तोत्थितस्य परामर्शात् । अननुभवे च परामर्शानुपपत्तेः । अन्तःकरणोपरागकालीनानुभवजन्यत्वाभावाच्च न तत्तोल्लेखा-

न्यायरत्नावली ।

इति भावः । इह-सुषुप्तौ । परामर्शात्-स्मरणात् । अननुभवे-वृत्त्यनुत्पादे । ज्ञानसूक्ष्मावस्थारूपसंस्काराभावादिति शेषः । अन्तःकरणेति । अहङ्कारेत्यर्थः । जन्यत्वाभावात्तत्तोल्लेखाभावः । तस्मिन् सत्यपि न स्मरणत्वानुपपत्तिरित्यर्थः । अहङ्काराभावेन कालदशविशिष्टरूपेणाज्ञानादरननुभवात्तेन रूपेण न स्मरणम्, किन्तु केवलाज्ञानत्वादिविशिष्टरूपेणेति भावः । (१)ननु सौषुप्ता

नारायणी ।

ज्ञापितम् । अविद्यारूपकारणसत्त्वे वृत्तिः कथं नेत्यत आह—तत्कल्पनेति । वृत्तिकल्पने, बीजाभावात्-अनुमापकहेत्वभावात्, फलानुसारेणादृष्टादिघटिता सामग्री कल्प्यते 'आरोपे सति निमित्तानुसरणं न तु निमित्तमस्तीत्यारोप' इति न्यायात्, तत्र च फलानुपलब्धेर्नादृष्टादिकं न वा तज्जन्यानुभवः कल्प्यतेऽतोऽविद्यायास्तत्र सत्त्वेऽपि न वृत्तिप्रसङ्ग इति संक्षेपः । ततः सुषुप्तौ वैलक्षण्यमाह—इहेति । इह-सुषुप्तौ । सुखमिति । स्वापो नाम मनोलयसहितमज्ञानम् । धात्वर्थः क्रिया सुखं नामार्थः तयोश्च स्तोकः पाक इत्यादाविवाभेदेन स्वापस्य चाख्यातार्थे तस्य चाहमर्थे लुङर्थस्यातीतत्वस्य धात्वर्थे स्वापेऽन्वयात्, सुखाभिन्नातीतस्वापवानहमित्यर्थः । सुखस्वापयोरभेदस्तु व्यङ्ग्यव्यञ्जकभावनिबन्धनो बोध्यः । न किञ्चिदिति । न किमपि ज्ञातवान् सकलपदार्थाज्ञानवानित्यर्थः । अत्रोभयत्रातीतत्वांशस्याधिकस्य भानं तु 'सा गङ्गा मया दृष्टे'त्यादाविवाऽसंसर्गाऽग्रहादित्यन्यत्र विस्तरः । परामर्शात्-स्मरणात् । अननुभवे-अनुभवाभावे, परामर्शानुपपत्तेः-स्मरणासम्भवात् । ज्ञानसूक्ष्मावस्थारूपसंस्काराभावादिति शेषः । स घट इत्याद्याकारस्यैव स्मरणस्योपलम्भात् प्रकृते विना तत्तोल्लेखं कथं स्मृतित्वं तत्राह—अन्तरिति । अन्तःकरणाश्रितत्वरूपो य उपरागः सम्बन्धस्तत्काली-

(१) अत एव स्मरणे तत्तोल्लेखानियम इत्याह—स्मरणेति । इति पाठश्छपुस्तके ।

न्यायरत्नावली ।

नुभवे यद्यज्ञानांशे देशादिवैशिष्ट्यं न भाति अहङ्कारस्फुरणाभावात्तर्हि सविषयकत्वाज्ञानत्वयोरपि वैशिष्ट्यं तत्र न भायात्, इष्टापत्तौ च न किञ्चिदवेदिषमिति स्मृतौ तदुल्लेखानुपपत्तिः, उक्तवैशिष्ट्यांशे न स्मृतित्वं किन्त्वनुभवत्वमित्यस्याद्वैतसिध्युक्तस्य स्वीकारेऽपि अवस्थाज्ञानाकारा वृत्तिरिति मूलासङ्गतिः, स्मृतिकाले स्मर्यमाणस्यावस्थाज्ञानस्यो(१)च्छिन्नत्वेन तत्रोक्तवैशिष्ट्यस्य साक्षिणो भानासम्भवादिति चेन्न । यथाऽभावस्य प्रतियोग्यनुयोगिविशिष्टत्वाभावत्वरूपाभ्यामेव ज्ञानस्य सविषयकत्वज्ञानत्वाभ्यामेव च प्रत्यक्षे भानं तथैवाज्ञानस्य सविषयकत्वाज्ञानत्वाभ्यामेव प्रत्यक्षे भानं न तु शुद्धाज्ञानस्य, तयोरिव तस्यापि निर्विकल्पकावेद्यत्वात् । किञ्च तदुभयरूपविशिष्टत्वेनाज्ञानस्मृतिः तादृशीमेव स्वकारणीभूतामविद्यावृत्तिं(२) कल्पयति । एवं चाज्ञानत्वादिसंसर्गान्यसंसर्गविषयकवृत्तावेवाहङ्कारस्य हेतुत्वं कल्प्यम् । ननु ज्ञानस्य प्रत्यक्षे सविषयकत्वसप्रकारकत्वनियमो युक्तः, विषयस्य पूर्वमुपस्थितत्वात् । ज्ञानत्वप्रकारकत्वनियमस्त्वयुक्तः, तस्य पूर्वमनुपस्थितत्वात् । अत एव सविषयकत्वांशे सविकल्पकं ज्ञानत्वांशे निर्विकल्पकं नृसिंहाकारं ज्ञानस्य प्रत्य-

नारायणी ।

नेत्यर्थः । जन्यत्वाभावात्ततोल्लेखाभावस्तस्मिन्सत्यपि न स्मरणत्वानुपपत्तिरित्यर्थः । सुषुप्तावहङ्कारस्याभावादेशकालविशिष्टरूपेणाज्ञानादेरननुभवान्न तेन रूपेण स्मृतिः, किन्तु केवलाज्ञानत्वादिनैव, तथा च यस्य कालादिविशिष्टरूपेणानुभवस्तस्यैव तद्रूपेण स्मृतिरिति भावः । एतेन जाग्रति तत्तादेरस्मणेऽपि परमते सुषुप्तौ न निर्विकल्पाभावसिद्धिः । तन्मते सप्रकारकत्वेनैव स्मृत्यनुभवयोः कार्यकारणभावात्, तत्तादिप्रकारकस्मरणस्य स्मरणाऽहेतुनिर्विकल्पकाभावासाधकत्वादित्यपि सूचितम् । ननु प्रमाणजन्यसप्रकारकज्ञानं प्रत्येव मनसो हेतुत्व-

(१)—ज्ञानस्याभिन्नत्वेनेति गपुस्तके । (२)—विद्यास्मृतिमिति गपुस्तके ।

भावेऽपि स्मरणत्वानुपपत्तिः। स्मरणे तत्तोल्लेखनियमाभावाच्च जाग्रद्दशायामस्वाप्समित्यनुभवानुपपत्तेः

न्यायरत्नावली।

क्षं नव्यतार्किकैरुच्यते इति चेन्न। ज्ञानस्योत्पद्युत्तरं प्रत्यक्षतामते (१)हि तादृशयुक्तत्वायुक्तत्वविचारः न तु तस्य साक्षिवेद्यत्वमते पूर्वानुपस्थितस्यापि ज्ञानत्वादेरपि भानस्वीकारादिति ध्येयम्। (२)स्मरणेति। यस्य कालादिविशिष्टरूपेणानुभवस्तस्यैव तद्रूपेण स्मृतिरिति भावः। ननु सुषुप्तौ तादृशवृत्त्यभावेऽपि जाग्रत्काल एव 'सुखमहमस्वाप्समि'त्यनुभवः कल्प्यताम्, तत्राह—जाग्रादित्यादि। ननु जागरे सुषुप्तेः प्रत्यक्षं मास्तु,

नारायणी।

स्य व्यवस्थापयिष्यमाणत्वात्परिभाषितप्रमाणाजन्ययोराविद्यकयोः स्वापानुभवस्मृत्योस्तत्तात्प्रकारकत्वे बाधकाभावात्कथमतथाभूतस्य स्मृतित्वं तत्राह— स्मरण इति। स्मृतित्वावच्छेदेनेत्यर्थः। तत्तेति। तत्ताप्रकारकत्वनियमाभावात् चिन्तितार्थगोचरस्मृतौ व्यभिचारात् तत्र चिन्तयैव पश्चात्तद्भानदर्शनादिति भावः। तथा चात्र विशिष्टसंस्कारजन्यत्वाङ्गीकारेऽपि तत्रैवोद्बोधकाऽलाभेन तत्ताद्यभानं युक्तमतो नैतावता सुषुप्तावनुभवाभावः साधयितुं योग्यः, ज्ञानस्य स्मृतिजनकत्वानियमेन स्मर्यमाणत्वस्य व्यभिचारित्वादिति संक्षेपः।(३)

प्रेमानुपाधिरसुखात्मनि नोपलब्धः स प्रत्यगात्मनि क्रमेरपि नित्यसिद्धः।
प्रेयः श्रुतेरपि ततः सुखतानुमानं नैयायिकोपि न दृगात्मनि निह्नुवीत॥
प्राज्ञे सुखं समनुभूय समुत्थितः सन्सर्वप्रकारविषयप्रतिपत्तिशून्ये।
सुप्तोहमत्र सुखमित्यनुसन्दधानः सर्वोपि जन्तुरवगच्छति तस्य सौख्यम्॥

ननु सुषुप्तौ मनस उपरमात्तादृशवृत्त्यभावेऽपि जाग्रत्काल एव 'सुखमहमस्वाप्समि'त्यनुभवः कल्प्यतां? तत्राह—जाग्रदिति। अवस्था-

(१)—प्रत्यक्षतापत्तेर्हि तादृशयुक्तत्वायुक्तत्वविचारो न युक्तः तस्य साक्षिवेद्यत्वमते स्ववेद्यत्वमते—वा पूर्वेत्यादिः घपुस्तके पाठः।

(२) अत एव स्मरणे तत्तोल्लेखानियम इत्याह स्मरणेति। इति घपुस्तके।

(३) अधस्तनीये संक्षेपशारीरकीयपद्ये कपुस्तकेऽत्रैवोपलब्धेपि सम्बन्धप्रदर्शकशब्दाभावादिति संक्षेप इत्युक्तेश्च निरुपयोगिनीति ज्ञेयम्।

लिङ्गाभावेनाश्रयासिद्धया चानुमानस्यासम्भवात् । अ-

न्यायरत्नावली ।

अवस्थाज्ञानं मनोलयश्चेति द्वयं हि सुषुप्तिः, तत्राद्यं जागरकालीनधिया नष्टत्वात्, द्वितीयं चायोग्यत्वात् नष्टत्वाच्च न प्रत्यक्षम्, अनुमितिस्तु स्यात्तत्राह—लिङ्गेत्यादि। 'स्वप्नजागरणयोर्मध्यकालस्सुषुप्तिमान् ज्ञानसामान्याभावात्, जन्यज्ञानसामान्याभावाद्वे'त्यनुमानं न सम्भवति। आद्यो हि न हेतुः। असिद्धत्वात्, पक्षे ज्ञातुमशक्यत्वाच्च। अत एव न द्वितीयः। न च तत्कालविशिष्टरूपेण कस्याप्यस्मृतेः तत्काले जन्यज्ञानसामान्याभावोऽनुमेयः यदा ह्यनुभवो जायते तदा तत्कालविशिष्टं स्वविषयं संगृह्णाति, ततश्च तद्रूपेण स्मृतेरुत्पत्तिस्स्यात्, तदभावाच्च तादृशज्ञानाभाव इत्यनुमानसम्भव इति वाच्यम्। ज्ञानस्य स्मृतिजनकत्वानियमात्। तस्माल्लिङ्गासम्भवः, आश्रयासिद्धिश्च। तत्कालस्यानुपस्थितत्वात्। ननु स्मृतिरपि न सम्भवति। 'अहमस्वाप्समि'ति स्मर्यमाणाहङ्कारस्य पूर्वमननुभवात् तत्राह—अहङ्कार इत्यादि। अनुभूयते—साक्षिणा विषयीक्रियते। ननु तथाप्यज्ञानादि-

नारायणी ।

ऽज्ञानं मनोलयश्च सुषुप्तिः आद्यस्याधिष्ठानधिया नष्टत्वात्, द्वितीयस्यायोग्यत्वादिति भावः। ननु मास्तु प्रत्यक्षम्,'स्वप्नजागरयोर्मध्यकालः सुषुप्तिमान् ज्ञानसामान्याभावात्, जन्यज्ञानसामान्याभावाद्वे' त्यनुमानं स्यादित्यत आह—लिङ्गेति। निरुक्तहेतुद्वयस्याभासत्वेनेत्यर्थः। आश्रयेति। निरुक्तकालस्यानुपस्थितत्वात्, तादृशकालरूपपक्षस्यानिर्णयेन। तथाहि नाद्यो हेतुः। निरुक्तरीत्या तस्यासिद्धेः, पक्षे ज्ञातुमशक्यत्वाच्च। नापि द्वितीयः। तस्याप्यसिद्धेः। न च जन्यज्ञानसामग्र्यभावेन तत्सिद्धिः। अन्योन्याश्रयापत्तेः। जन्यज्ञानसामान्याभावनिश्चयेन तत्सामग्र्यभावकल्पनं सामग्र्यभावनिश्चयेन च जन्यज्ञानाभावकल्पनमिति। एतेन 'न किञ्चिदवेदिषमि'ति ज्ञानाभावानुमितिरित्यपि निराकृतम्। अनुमानस्य निरुक्तरीत्याऽसम्भवादित्यन्यत्र विस्तरः। ननु स्मृतिरपि न सम्भवति, स्मर्यमाणाहङ्कारस्य सुषुप्तावननुभवात्तत्राह—अहङ्कार इति। उत्थानस-

हङ्कारस्तूत्थानसमय एवानुभूयते । सुषुप्तौ लीनत्वेन तस्याननुभूतत्वात् स्मरणानुपपत्तेः । मुखप्रतिबिम्बाश्रये दर्पणे जपाकुसुमलौहित्याध्यासेन 'रक्तं मुखमि'ति प्रतीतिवदहङ्काराश्रयतया साक्षिचैतन्यस्य स्मरणाश्रयत्वादहमस्वाप्समिति सामानाधिकरण्यप्रतीतिः, न पुन-'रहं सुखी'तिवदाश्रयतया । स्मृतिसंशयविपर्ययाणां सा-

न्यायरत्नावली ।

स्मृत्याश्रयतयाऽहङ्कारस्य साक्षिभास्यत्वानुपपत्तिः अज्ञानाद्यनुभवानाश्रयत्वात् तत्राह—मुखेत्यादि । रक्तं मुखमिति प्रतीतिवत्-'अत्र रक्तं मुखमि'ति प्रतीतावेकत्र दर्पणे रक्तरूपमुखयोर्भानवत् । यत्र मुखं दर्पणस्थं पूर्वमदृष्ट्वा रक्तरूपस्य दर्पणे आरोपः, तत्र मुखे न रक्तत्वारोपसम्भवः,अधिष्ठानीभूतमुखस्य पूर्वं ज्ञानाभावात्तादृशस्थलं दृष्टान्त इति भावः । आश्रयतयेति । अहङ्कारस्य स्मरणाश्रयतयेत्यर्थः । प्रतीतिरित्यनुषज्यते । साक्षिचैतन्याश्रयत्वात्-अविद्योपहितचिदाश्रयत्वात् । ननु प्रमायामिव स्मृत्यादा-

नारायणी ।

मये—जाग्रद्दशायाम्, अनुभूयते—साक्षिणा विषयीक्रियते, तथाच नाहङ्कारांशे स्मृतिः, तत्र हेतुमाह—सुषुप्ताविति । लीनत्वेन-स्थूलात्मनाऽसत्त्वेन, तस्य-अहङ्कारस्य, स्मरणानुपपत्तेः-अहमित्यंशस्मृत्यसम्भवात् । ननु सुषुप्तावहङ्काराभावश्चेत्कथमहमस्वाप्समिति स्वापाश्रयत्वेन प्रतीतिः तत्राह—मुखेति । रक्तं मुखमिति प्रतीतावेकत्र दर्पणे रक्तरूपमुखयोर्भानात्, यत्र मुखं दर्पणस्थं पूर्वमदृष्ट्वा रक्तरूपस्य मुखे आरोपस्तत्र मुखे न रक्तारोपसम्भवोऽधिष्ठानीभूतस्य मुखस्य पूर्वं ज्ञानाभावात्तादृशस्थलं दृष्टान्त इति भावः । सामानाधिकरण्येन एकधर्मिणि तदुभयसम्बन्धावगाहिनी, प्रतीतिः—स्मृतिः । सुखीतिवत्—अहंपदार्थे सुखवत्त्वावगाहिप्रत्यक्षवत्, आश्रयतया-स्वापाश्रयत्वावगाहिनी । ननु साक्षिचैतन्याश्रिता स्मृतिः साक्षिणि तदुभयसामानाधिकरण्यमात्रं गृह्णाति ननु तयोराश्रयाश्रयीभावमपीत्युक्तं तन्न युक्तं स्मृतेरहमर्था-

क्षिचैतन्याश्रयत्वनियमादहङ्कारस्य च प्रमाणजन्यज्ञानाश्रयत्वनियमात्, प्रमात्वेनैव तत्कार्यतावच्छेदात्, अप्रमात्वावच्छेदेन च अविद्याया एव कारणत्वात्। अत एवानाप्तवाक्यादिजन्यपरोक्षविभ्रमोऽप्यविद्यावृत्तिरेवेत्यभ्युप-

न्यायरत्नावली ।

वप्यहङ्कार आश्रयस्स्यात् तत्राह—अहङ्कारस्येत्यादि। ज्ञानाश्रयत्वात्–ज्ञानमात्राश्रयत्वात् । तत्र हेतुः—प्रमात्वेनेत्यादि । तत्कार्यतेति । अहङ्काररूपपरिणामिकार्यतेत्यर्थः । अप्रमात्वेति । स्मृतिसंशयविपर्ययसाधारणाप्रमात्वेत्यर्थः । कारणत्वात्–परिणामित्वात् । प्रमां प्रत्यप्यविद्यायाः परिणामित्वम् , कार्यमात्रं प्रति तत्स्वीकारात्; अप्रमायां त्वविद्याया एव, नाहङ्कारस्येति ज्ञापनार्थमेवकार उक्तः । स्मृतेरज्ञाताविषयकत्वात् संशयविपर्ययो-

नारायणी।

श्रितत्वानुभवात्तत्राह—स्मृतीति । साक्षीति । अविद्योपहितचिदाश्रितत्वनियमात् । किमित्ययं नियमस्तत्राह—प्रमाणेति । प्रमाणमात्रजन्यज्ञानाश्रयत्वनियमात् । तत्र हेतुः—प्रमात्वेनेति । तत्कार्यता—अहङ्कारकार्यता । एवकारार्थमाह—अप्रमात्वेति । स्मृतिसंशयविपर्ययसाधारणाप्रमात्वेनेत्यर्थः । कारणत्वात्–परिणामिकारणत्वात्, प्रमां प्रत्य(प्य)विद्यायाः परिणामित्वम्, कार्यमात्रं प्रति तत्स्वीकारात्, अप्रमां प्रति-त्वविद्याया एव, नाहङ्कारस्येति ज्ञापनाय एवकारः। स्मृतेरज्ञातविषयकत्वाभावादप्रमात्वं संशयविपर्यासयोर्बाधितार्थकत्वात् (अप्रमात्वमित्यर्थः) । ननु नाप्रमामात्रं प्रत्यविद्याया हेतुत्वं युक्तम्, अनाप्तवाक्यादिना बोधे व्यभिचारात् । तत्र पदज्ञानादिरूपबहिःप्रमा(१)करणकमनोवृत्तेरेवौचित्यादित्याशङ्क्य कार्यकारणभावकल्पनस्य लाघवगौरवतर्काधीनत्वात्, तत्र सामग्रीसत्त्वेऽपि नहि प्रमाकरणिका मनोवृत्तिः, किन्त्वविद्यावृत्तिरेवेत्यतिदेशेनाह–अत एवेति ।

(१) प्रमाणकरणिकेति खपुस्तके । एवमग्रेपि 'सामग्रीसत्त्वेपि न बहिःप्रमाणकरणिका' इति पाठः । साधुरयम् ।

गमो वेदान्तविदाम्। तत्रान्तःकरणवृत्तिजनकसामग्रीसम्भवेऽपि प्रमात्वाभावा(१)वरोधेनान्तःकरणस्यासामर्थ्यात्। नामादिषु ब्रह्माध्यासस्तु इच्छाधीनतया भ्रमप्रमाविलक्षणा मनोवृत्तिरेव कामादिवत्, तदुक्तम्-'अत एव चो-

न्यायरत्नावली।

बाधितार्थकत्वादप्रमात्वम्। तत्रान्तःकरणेति। शब्दज्ञानमर्थोपस्थितिरित्यादिसामग्र्या यथा मनोवृत्तिश्शाब्दप्रमारूपा जायते, तथा शाब्दभ्रमरूपापि सम्भवति, परन्तु भ्रमं प्रत्यविद्याया एव परिणामित्वात् न मनसः परिणामित्वमिति भावः। ननु नामादौ ब्रह्मैक्योपासना न प्रमा, बाधितविषयकत्वात्; नापि भ्रमः, नामादौ ब्रह्मभेदस्य ज्ञातत्वेऽपि तदुत्पत्तेः; तथा च तत्राविद्याया इव मनसोऽपि परिणामित्वसम्भव इत्यत आह—नामादीति। ब्रह्माध्यासः—ब्रह्मतादात्म्याकारवृत्तिः। कामादिवत्—इच्छाद्वेषादिवत्। चोदनाजन्यत्वात्—'नाम ब्रह्मेत्युपासीते'त्यादिविधिवाक्यार्थस्य इष्टसाधनत्वस्य ज्ञानाधीनेच्छाजन्य-

नारायणी।

प्रमां प्रत्येव मनसः परिणामित्वाभ्युपगमादेव। तत्र-अनाप्तवाक्यादौ, सामग्रीसम्भवेऽपि-प्रमायामिव शब्दज्ञानतज्जन्यपदार्थोपस्थितिसम्भवेऽपि। अपराधेनेति। बाधितविषयत्वादिति भावः। अन्तरिति। लाघवादप्रमात्वावच्छिन्नं प्रत्यविद्यायाः कारणत्वकल्पनाद् भ्रमं प्रति मनसः कारणत्वायोगादिति भावः। ननु प्रमां प्रति मनसः अप्रमां प्रत्यविद्यायाः कारणत्वे नामादौ ब्रह्मैक्योपासनावृत्तिराकस्मिकी स्यात्, तादृशवृत्तेर्भ्रमप्रमाबहिर्भूतत्वात्। तथाहि सा न प्रमा, विषयबाधात्। नापि भ्रमः, नामादौ ब्रह्मभेदस्यानावृत्तत्वेऽपि तदुपपत्तेः, भेदग्रहपूर्वकत्वादिति यावत्। तथा च नाविद्या न वा मनसस्तत्र परिणामिता सम्भवतीत्यत आह—नामादिष्विति। इच्छेति। बाधकालीनेच्छेत्यर्थः। ब्रह्माध्यासः-ब्रह्मैक्याकारावृत्तिः, कामादिवत्-इच्छाद्वेषादिवत्, चोदनाजन्यत्वात्-'नाम ब्रह्मेत्युपासीते'त्यादिविधिवाक्यार्थस्येष्टसाधनत्वज्ञानाधीनेच्छाजन्यप्रयत्नसाध्य-

(१)—भावापराधेनेति कपुस्तके।

दनाजन्यत्वान्मानसी क्रियैव सा। न ज्ञान'मिति। एतेन तर्कस्यापि मनोवृत्तित्वं व्याख्यातम्। व्याप्यारोपेण व्यापकप्रसञ्जनात्मकस्य तर्कस्येच्छाधीनतया भ्रमप्रमाबहिर्भूतत्वादिति। अत एव मननानिदिध्यासनसहिते श्रवणाख्ये

न्यायरत्नावली।

प्रयत्नसाध्यत्वात्। न ज्ञानमिति। ज्ञानस्योक्तप्रयत्नं विनापि दुर्गन्धादिविषयकस्योत्पत्तेः प्रमाणव्यापाराभावे उक्तप्रयत्नसत्त्वेऽप्यनुत्पादान्नोक्तप्रयत्नजन्यता। (१)अत एव 'पत्न्याज्यमवेक्षेत' इत्यादौ ज्ञानानुकूलव्यापारे विधिरिति भावः। व्याप्येत्यादि। 'वह्निव्याप्यधूमवान् ह्रद' इत्याद्यारोपजन्यस्य 'ह्रदो वह्निमान् स्यादि'त्याकारकपरिणामस्य इच्छाधीनत्वेन (२)भ्रमत्वप्रमात्वे इत्यर्थः। निदिध्यासनसहितेति। निदिध्यासनरूपफलोपकार्यङ्गसहितेत्यर्थः। साक्षात्कारमुद्दिश्य मननादिसहितं श्रवणं

नारायणी।

त्वात्। न ज्ञानमिति। ज्ञानस्योक्तप्रयत्नं विनापि दुर्गन्धादिविषयकस्योत्पत्तेः, प्रमाणव्यापाराभावे उक्तप्रयत्नसत्त्वेपि अनुत्पादान्नोक्तप्रयत्नसाध्यता, अत एव 'पत्न्याज्यमवेक्षेत' इत्यादौ ज्ञानानुकूलव्यापारे विधिरिति भावः। श्रवणादिषु विषयत्वं समर्थयितुं दर्शितनियमफलं तर्केऽतिदिशति— एतेनेति। भ्रमप्रमाबहिर्भावनियमप्रदर्शनेनेत्यर्थः। मनोवृत्तित्वम्—इच्छादेरिव ज्ञानान्यपरिणामविशेषरूपत्वम्, व्याख्यातं-सूचितम्। स्पष्टयति—व्याप्येत्यादि। व्याप्यारोपे-ह्रदो यदि वह्निव्याप्यधूमवान् स्यादित्यारोपे, व्यापकप्रसञ्जनात्मकस्य-ह्रदो वह्निमान्स्यादित्याकारकपरिणामविशेषस्य, इच्छाधीनतया-आपाद्यव्यतिरेकनिश्चयकालीनेच्छाजन्यत्वेन। भ्रमेति। भ्रमत्वप्रमात्वशून्यत्वात्, अत एव-तर्कस्य भ्रमप्रमाबहिर्भूतवृत्तित्वसमर्थनादेव। मननेति। मननिदिध्यासनरूपफलोपकार्यङ्गसहिते। सहित इत्यनेन मननिदिध्यासनयोरङ्गत्वमात्रं श्रवणस्य प्राधान्यं सूचितम्, तत्र बीजमाह—श्रवणाख्य इति। तत्त्वमस्यादिवाक्या-

(१) अत एव यत्नाजन्यमवेक्षेत इति पाठे घपुस्तके।

(२) भ्रमत्वप्रमात्वशून्यत्वादित्यर्थ इति घपुस्तके।

वेदान्तवाक्यविचारे 'श्रोतव्यो मन्तव्यो निदिध्यासित-

न्यायरत्नावली।

विधीयते। तत्र श्रवणं नाम 'तत्त्वमस्यादिवाक्यं यदि ब्रह्मात्मैक्यपरं न स्यात्, तदोपक्रमोपसंहारादिभिरपि अद्वैतब्रह्मबोधकं न स्यादि'त्यादितर्करूपम्। तस्य च प्रमाणीभूतवाक्यतात्पर्यविषयकत्वेन प्राधान्यम्। ब्रह्मात्मैक्यसिद्ध्यनुकूलतर्कादयोऽपि श्रवणेऽन्तर्भवन्ति। मननं तु वाक्यजन्यज्ञानस्य परोक्षनिश्चयभावसम्पादकस्तर्कः। निदिध्यासनमपरोक्षनिश्चयत्वसम्पादकस्तर्कः। 'तत्त्वमस्यादिवाक्यजं ज्ञानं यदि परोक्षं स्यात्, तर्हि अपरोक्षात्मविषयकं न स्यादि'त्यादिरूपः। तयोस्तत्सम्पादनरूपफलोपकारकारित्वेन श्रवणाङ्गत्वम्। तदसम्पादने हि श्रवणफलीभूतं वाक्य-

नारायणी।

नामद्वैततात्पर्यानुकूलमानसक्रियारूपव्यापारविशेषेत्यर्थः। आत्मज्ञानस्योपनिषत्प्रमाणमात्राधानत्वान्न तत्र विधिर्युक्तः, किन्तु श्रवणादावेव, तादृशं व्यापारं विना प्रतिबन्धानिवृत्तेः पुरुषार्थासिद्धेः, प्रतिबन्धश्च (१)प्रमाणप्रमेययोर्गताऽसम्भावना विपरीतभावना चेति। तत्राद्या क्रियार्थत्वादितिहेत्वाभासैः ब्रह्मात्मैक्ये वेदान्तानां प्रामाण्यं न सम्भवतीत्याकारकश्चित्तदोषः, द्वितीया वेदान्तानां स्वार्थपरत्वसम्भवेऽपि ब्रह्मात्मैक्यं कर्तृत्वादिप्रत्यक्षविरोधात् सर्वथा नोपपद्यत इत्येवमाकारकश्चित्तदोषः, तृतीया अनादिकालात्प्रवृत्तदेहात्मज्ञानजनितसंस्कारप्रचयश्चित्तदोषः। तत्राद्या श्रवणेन, द्वितीया मननेन, तृतीया निदिध्यासनेनापसार्यते। तत्र श्रवणं वेदान्तपदवाक्यशक्तितात्पर्यावधारणम्। मननम्-अभेदाभावेऽनिष्टप्रसञ्जनरूपस्तर्कः। 'यदि तयोरभेदो न स्यात्तदा समस्वभावतया प्रतिपत्तिर्न स्यादि'ति। निदिध्यासनं ब्रह्मात्मैक्यवृत्तीनां पौनःपुन्यम्, अत एव एतेषु श्रवणं प्रधानम्, तद्विशिष्टस्यैव शब्दस्य तात्पर्यभ्रमसंशयोत्तरशाब्दबोधे हेतुत्वादित्यन्यत्र विस्तरः। ननु श्रवणं नाम श्रुतिकरणकशाब्दबोधः, मननमनुमितिः, निदिध्यासनम्-धारावाहिकात्मगोचरवृत्तिः—

(१) प्रमाणगतासम्भावना प्रमेयगताऽसम्भावना विपरीतभावना चेति खपुस्तके।

व्य' इत्यादिविधिरप्युपपद्यते। तस्य चतुर्विधान्वयव्यतिरेकादितर्करूपत्वात्। दृग्दृश्यान्वयव्यतिरेकः, साक्षिसा-

न्यायरत्नावली।

जज्ञानं नापरोक्षभ्रमहेत्वज्ञानस्य निवर्तकम् । अथवा ब्रह्मात्मैक्यसिद्ध्यनुकूलस्तर्को मननम्। निदिध्यासनं तु श्रवणमननयोरैकाग्र्यं पौनःपुन्यरूपम् । तयोश्चोक्तैक्यविषयकासम्भावनाविपरीतभावनाबुद्धिनिरासद्वारा साक्षात्काररूपफलाप्रामाण्यधीनिरासकत्वेन उपकारित्वात् श्रवणाङ्गत्वम् । आद्यकल्पो विवरणे, द्वितीयकल्पस्संक्षेपशारीकादावुक्तः । दृग्दृश्यान्वयव्यतिरेक इत्यादि । दृशि दृश्यानां तादात्म्यमन्वयः । तस्य च निरूपणासम्भवात् दृशि दृश्यानि कल्पितानीति दृशि दृश्यानामन्वयेनैव व्यतिरेकस्सिध्यतीत्यर्थः । 'स्वप्रकाशदृशस्तादात्म्येन सिद्धं जडं यदि सत्यं स्यात्, तदा जडत्वादिना स्वप्रकाशादत्यन्तविलक्षणं स्यादि'ति तर्को बोध्यः। एवमग्रेऽपि 'निर्विकारसाक्षितादात्म्येन सिद्धं जडं यदि सत्यं स्यात्, तदा विकारवत् न स्यात्' । 'एवमागमापायशून्यात्मतादात्म्येन सिद्धं दृश्यं यदि सत्यं स्यात्, तदा आगमापायित्वरूपकादाचित्कत्ववन्न स्यात्, 'परमप्रेमास्पदात्मतादात्म्येन प्रतीयमानं यदि सत्यं स्यात्, तदा

नारायणी।

श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः ।

इत्यादिना वाक्यकरणकशाब्दबोधादेव श्रवणत्वादिलाभात् । तथा च ज्ञानरूपेषु तेषु कथं विधिरुपपद्यते ? तत्राह—चतुर्विधेत्यादि । तस्य—मननिदिध्यासनसहितस्य श्रवणस्येत्यर्थः । चतुर्विधान्वयव्यतिरेकानेव दर्शयति-दृग्दृश्येति । दृशि दृश्यानामन्वयेन व्यतिरेक इत्यर्थः । अन्वयस्तादात्म्यादिः, तस्य कल्पितत्वात्तत्प्रतियोगिनामनात्मनामन्वयेनैव व्यतिरेकः सिद्धतीति भावः । तथा च स्वप्रकाशदृशस्तादात्म्येनाभातं जडं यदि सत्यं स्यात्तदा जडत्वादिना 'स्वप्रकाशादत्यन्तविलक्षणं न स्यादि'ति तर्को बोध्यः । साक्षीति । साक्षिणि साक्ष्यस्यान्वयेन व्यति-

क्ष्यान्वयव्यतिरेकः, आगमापायितदवध्यन्वयव्यतिरेकः, दुःखिपरमप्रेमास्पदान्वयव्यतिरेक इति (१)समन्वयाध्या-

न्यायरत्नावली।

दुःखसाधनं न स्यात्' 'सद्वस्तुतादात्म्येन प्रतीयमानं पटादिकं यदि सत्यं स्यात् तदा (२)मिथ्याभूतं न स्यादि'ति बोध्यम् । एवं साक्षिणो निर्विकारत्वात् साक्ष्याणां च विकारित्वात् साक्षिणि साक्ष्यस्यान्वयेन व्यतिरेकः सिध्यतीत्यर्थः । एवमागमापायितया उत्पत्तिविनाशवत्त्वरूपया(३) कादाचित्कत्वेन मिथ्यात्वात् सर्वकादाचित्कानामधिष्ठानमात्मा । स हि तेषामवधिः, आगमापायशून्यत्वात् । यथा वृष्टिमतां देशानां वृष्टिशून्या गङ्गाऽवधिरुच्यते, तथा च तेषां तत्र तादात्म्येनानुपपन्नेन व्यतिरेकः । एवं दुःखित्वेनोपलभ्यमानस्याहङ्कारादेः परमप्रेमास्पदात्मभिन्नत्वात् तयोस्तादात्म्यरूपान्वयेनानुपपद्यमानेनात्मन्यहङ्कारादि कल्पितम् । एवं सर्वेषु दृश्येषु मिथो व्यावृत्तेषु भिन्नेषु सद्रूपेणानुवृत्त आत्मा, तस्मात्तत्र तेषामन्वयेन तादात्म्यरूपेण व्यतिरेकसिध्यति । यत् येषु व्यावृत्तेषु तादात्म्येनान्वितं तत्र तानि कल्पितानि। यथा रज्जौ मालास-

नारायणी।

रेक इत्यर्थः । व्यतिरेकश्च प्राग्वद् बोध्यः । तर्कश्च 'अधिष्ठानभूतनिर्विकारसाक्षितादात्म्येन भातं जडं यदि सत्यं स्यात् सविकारं न स्यादि'ति । आगमापायीति । आगमापायिनस्तदवधौ उत्पत्तिविनाशधर्मकस्य बाधकधीविषयेऽन्वयेन व्यतिरेक इत्यर्थः । तर्कश्च 'नित्यधर्मितादात्म्येन भातं जड़म् यदि सत्यं स्यात्तदोत्पत्तिविनाशि न स्यादि'ति । दुःखीति । दुःखिनः परमप्रेमास्पदेन्वयेन व्यतिरेक इत्यर्थः । तर्कश्च 'प्रेमास्पदानन्दतादात्म्येन भातं जडं यदि सत्यं स्यात्तदा

(१) समन्वयाद्यध्याया इत्यन्तः पाठो नास्ति कखपुस्तकयोः ।

(२) मिथो व्यावृत्तं नेत्यादि घपुस्तके ।

(३)—रूपया सर्वदृश्यानां कादाचित्कत्वमात्मा तु तेषामवधिरागमापायशून्यत्वात् इति घपुस्तके भिन्नः पाठः ।

याविरोधाध्यायसाधनाध्यायफलाध्यायाः । अनुवृत्त-व्यावृत्तान्वयव्यतिरेकः पञ्चमः । एतच्च सर्वेषां वेदान्तानुकूलतर्काणां चतुर्लक्षणीमीमांसाप्रतिपादितानामुपल-

न्यायरत्नावली ।

र्पादि यथा वा जातौ व्यक्तय इति भावः । अनुकूलेति ! अनुग्राहकेत्यर्थः । तर्काणामिति । कार्यकारणानन्यत्वादितर्काणामित्यर्थः । चतुर्लक्षणीति ।चतुरध्यायीत्यर्थः । प्रतिपादितानामिति।'तदनन्यत्वमारम्भणशब्दादिभ्य' इत्यादिसूत्रेषु प्रपञ्चमिथ्यात्व-जीवब्रह्मैक्यबोधकवेदान्तानुग्राहकतर्काः प्रतिपादिताः । तथाहि-तदनन्यत्वं तस्य ब्रह्मणः अनन्यत्वं ब्रह्मान्यशून्यत्वम् , वाचारम्भणश्रुतेः । आदिपदोदितश्रुतियुक्तिभ्यः। वाचेत्यादिश्रुतेरयमर्थः। आरम्भणम् आरभ्यमाणं कार्यमात्रं वाचा वाङ्मात्रं मिथ्येति यावत् । अकार्यमप्यविद्यादिकं नाममात्रम् । उभयत्र हेतुगर्भं विशेषणं विकार इति । यतो नाशोत्पत्त्यादिविकृतिमत् , अतो मिथ्येत्यर्थः । कार्यनष्टयोर्हि कदाचिदसत्त्वं वाच्यम् , सर्वदा सत्त्वासम्भवात् । तथा च तदनधिकरणकालस्य तदृतसत्त्वावच्छेदकत्वासम्भवात् असत्त्वं दुर्वारमिति । अधिष्ठानरूपकारणानन्यत्वं दृश्यमात्रस्य मिथ्यात्वमिति यावत् । तथा च दृश्यमात्रं यदि सत्यं स्यात्, तदा किञ्चित्कालावच्छिन्नेनासत्त्वेन निरूपणानर्हं न

नारायणी ।

दुःखी दुःखसाधनम् च न स्यादि'ति । अनुवृत्तेति । अनुवृत्ते व्यावृत्तस्यान्वयेन व्यतिरेक इत्यर्थः । तर्कश्च 'अनुवृत्ततादात्म्येन प्रतीयमानं जडं यदि सत्यं स्यात्तदा मिथो व्यावृत्तं न स्यादि'त्यादिः बोध्यः । यथा चैतेषां तर्काणां श्रुतिमूलत्वं तथा व्याख्यातमस्माभिर्महह्याख्याने । एतच्चेति । पञ्चविधान्वयव्यतिरेकरूपतर्ककथनं चेत्यर्थः । तर्काणां-कार्यकारणानन्यत्वादितर्काणाम् । चतुर्लक्षणीति । चतुरध्यायशारीरकमीमांसेत्यर्थः । प्रतिपादितानां-'तदनन्यत्वमारम्भणशब्दादिभ्य' इत्यादिसूत्रैर्विषयपरिशोधकतया सूचितानाम् । आनन्द-

क्षणमित्यभियुक्ताः । विस्तरस्तु वेदान्तकल्पलतिकायामनुसन्धेयः । तदेवं सुषुप्त्यवस्थायामस्त्यानन्दभोगस्तद्भोक्ता च सुषुप्त्यभिमानी प्राज्ञ इत्युच्यते । प्रकर्षेणाज्ञत्वात्तदानीं विशेषावच्छेदाभावेन प्रकृष्टज्ञत्वाद्वा । तदा चान्तःकरणस्य लयेऽपि तत्संस्कारेणावच्छे

न्यायरत्नावली ।

स्यादित्यादितर्का बोध्याः । कल्पलतिकेति । श्रवणादिस्वरूपनिरूपणमुक्तरीत्या तत्र कृतम् । आनन्दभोगः सुखाकारवृत्तिः । भोक्ता आश्रयः । अभिमानी आश्रयः । प्रकर्षेणेति । मूलाज्ञानं सर्वदास्ति । अवस्थाज्ञानमपि सुषुप्ताविति प्रकर्षः । विशेषावच्छदाभावेन-वृत्तित्रयविषयान्यविषयविशेषविषयकत्वाभावेन । सौषुप्तसाक्षिण इति शेषः । विशेषविषयकत्वस्य दुःखप्रयोजकत्वेन तदभावो ज्ञानस्य प्रकर्षः । प्रज्ञ एव प्राज्ञः । प्रज्ञादिभ्यश्चेत्यनेन स्वार्थेऽणिति भावः । अवच्छेदादिति । मनोऽवच्छिन्नचैतन्यमेव जीव इति पक्षे इति शेषः । अविद्योपहितचैतन्यस्य जीवत्वपक्षे नोक्तप्रसङ्गः । मनोलयेऽप्यविद्ययैव जीवत्वासार्वज्ञ्यादिसम्पादनात् । मनोऽवच्छिन्नस्य जीवत्वे तु मनउच्छेदेन जीवत्वाभावस्स्यात्, ईशाभेदसम्पत्त्या सार्वज्ञ्यापत्तिश्च स्यात् । जीवस्याभावेन तं प्रत्यविद्याऽऽवृणोतीत्यस्य वक्तुमशक्यत्वादिति

नारायणी ।

भोगः-सुखाकारा वृत्तिः, भोक्ता-आश्रयः, अभिमानी-अभिमानवान् । प्रकर्षेणेति । मूलाज्ञानं सर्वदास्ति तूलाज्ञानमपि सुषुप्ताविति प्रकर्षः । विशेषावच्छेदाभावेन-वृत्तित्रयविषयान्यविषयविशेषविषयकत्वाभावेन, सौषुप्तसाक्षिण इति शेषः । विषयविशेषविषयकत्वस्य दुःखप्रयोजकत्वेन तदभावो ज्ञानस्य प्रकर्षः, प्रज्ञ एव प्राज्ञ इति । अवच्छेदात् जीवभावात् । ननु यदि न जीवभावनिवृत्तिः तर्हि 'प्राज्ञेनात्मना सम्परिष्वक्त' इत्यादिपरमात्मभावसम्पच्छ्रवणं कथमित्याशङ्क्य न तन्मु

दान्न जीवाभावप्रसङ्गः, न वा सार्वज्ञ्यापत्तिः । ईशाभेदप्रतिपादनं च शरीरेन्द्रियाद्यभिमानरहितत्वेनोपचारात् तत्संस्कारस्य च निमित्तकारणत्वेन साक्ष्याश्रितकार्योपादानकोटावप्रवेशान्न तद्भेदेऽपि साक्षिभेदः । जागरणे त्वन्तःकरणस्य प्रमात्राश्रितकार्योपादानकोटौ

न्यायरत्नावली ।

भावः । ईशाभेदेति । 'प्रजा अहरहर्ब्रह्म गच्छन्त्योऽपि न विन्दन्ती'त्यादिश्रुतेरित्यादिः । गच्छन्त्यः ऐक्येन समाश्रिताः । ननु तदा वृत्तिरूपेण परिणतमनसः संस्कारसत्त्वे तज्जन्यस्मृतिरूपकार्याणां साक्ष्याश्रितत्वात् तादृशसंस्काराणामुक्तस्मृतिहेत्वविद्यायामिव साक्षिकोटौ निवेशेन तद्भेदेन साक्षिभेदः स्यात् । वार्तिकमते हि साक्षिमात्राश्रितं स्मरणादिकम्, न साक्ष्यनन्तर्गतवस्त्वाश्रितम् । तस्य संस्काराश्रितत्वे तु संस्कारोऽपि साक्ष्यन्तर्गतो वाच्यस्स्यात्, तथा च वक्ष्यमाणवार्तिकविरोधः तत्राह—संस्कारस्येति । निमित्तेति । स्मृतिनिमित्तेत्यर्थः । कार्येति । स्मृ-

नारायणी ।

स्यं किन्तु गौणमेवेत्याह—ईश्वराभेद इति । उपचारात् 'सिंहो माणवक' इति गौणीलक्षणातः । ननु सुखदुःखव्यवस्थार्थं प्रमातारो भिन्नाः साक्षीत्वेक एवेत्युक्तं तन्न युक्तम्, प्रमातृशरीरप्रविष्टोपाधिभेदेन प्रमातृणामिव साक्षिशरीरप्रविष्टोपाधिभेदेन साक्षिणोऽपि भेदावश्यम्भावात्, तत्राविद्याया इव संस्कारस्यापि स्मृतिव्यवस्थान्यथानुपपत्त्योपाधित्वादित्याशङ्क्य न संस्कारविशिष्टाविद्यात्वेन स्मृतिं प्रत्युपादानता किन्त्वविद्यात्वेनैव, संस्कारस्तु निमित्तमात्रमतो न संस्कारभेदेन स्मृतिविवर्त्तोपादानस्य साक्षिणो भेदो युक्त इत्याशयेनाह—संस्कारस्य चेति । निमित्तकारणत्वेन—स्मृतौ निमित्तकारणत्वेन । साक्ष्याश्रितेति । साक्षिमात्राश्रितत्वेन अङ्गीकृतस्मृतिरूपकार्योपादानभूताविद्याशरीरे अप्रवेशात् उपादानांशतया अविशेषणत्वात्, उपादानतानवच्छेदकत्वादिति यावत् । तद्भेदेन-संस्कारभेदेन । प्रमातरि ततो विशेषमाह—जागरणे त्विति । उपदानेति । सुखदुःखादिकं प्रति मनसोऽसाधार-

प्रवेशात्तद्भेदेन प्रमातृभेद एव । साक्षिण एव चाधिकोपाधिविशिष्टस्य प्रमातृत्वान्न प्रतिसन्धानानुपपत्तिरिति ।

न्यायरत्नावली ।

त्यादिकार्येत्यर्थः । स्मृत्यादेरविद्यामात्रपरिणामत्वस्योक्तत्वात् न मनसस्तत्र उपादानत्वं नतरां तत्संस्कारस्येति भावः । अत्रेदं बोध्यम् । मूले साक्षिमात्राश्रितत्वरूपं साक्ष्याश्रितत्वं स्मरणादेर्यदुक्तं तदविद्यागतचिदाभासः साक्षीति वार्तिकमतमवलम्ब्यैव । अत एव मनोगतचिदाभासस्य जीवत्वेन तन्मतेऽविद्यायाः जीवानुपाधित्वेन भेदास्वीकारात् साक्षिणः सर्वजीवेष्वैक्यमेव । 'बिम्बप्रतिबिम्बानुगतशुद्धचित् साक्षी'तिमते तु स्मृत्यादिकार्यं न साक्षिमात्राश्रितम् , किन्त्वविद्याविशिष्टचिदाभासाश्रितमपि । ननु पूर्वदिनस्थप्रमात्रानुभूतमध्यदिनस्थप्रमात्रा न स्मर्येत, तयोर्भेदात् तत्राह—साक्षिण इत्यादि । अधिकोपाधीति । (१) सवृत्तिकमन इत्यर्थः । प्रमातृत्वात्—सवृत्तिकमनोऽवच्छिन्नचिद्रूपस्य च प्रमातुस्स्वरूपत्वात् । न प्रतिसन्धानेति (२)*तथा च साक्षिणि प्रमास्मृत्योः सामानाधिकरण्यसम्भवेन कार्यकारणभावसम्भवः* । न चैकमनोगतस्य मनोऽन्तरावच्छिन्नसाक्षिण्यपि

नारायणी ।

णत्वादिति भावः । तद्भेदेन-अन्तःकरणभेदेन । ननु पूर्वदिनस्थप्रमात्रानुभूतं मध्यदिनस्थप्रमात्रा न स्मर्येत, अन्यद्रष्टृस्थान्येनास्मरणात् तयोर्भेदादित्यत आह—साक्षिण एव चेति । अधिकेति । मनःस्वरूपोपाधिविशिष्टस्य, प्रमातृत्वात्—सवृत्तिकमनोवच्छिन्नचिद्रूपस्य प्रमातुः स्वरूपत्वात् । प्रतिसन्धानेति । स्मरणेत्यर्थः । तथा च मनोवस्थाया भेदेऽपि सर्वावस्थानुस्यूतमनस्त्वोपलक्षितस्वरूपस्यैकत्वात्तद्विशिष्टसाक्षि-

(१) मनःस्वरूपेत्यर्थ इति घपुस्तके ।

(२) *स्मरणेत्यर्थः । तथाच मनसोऽवस्थाव्यक्तिभेदेपि सर्वावस्थानुस्यूतमनस्त्वोपलक्षितस्वरूपैक्यात् तद्विशिष्टसाक्षिण एकत्वेन नानुभवस्मृत्योर्वैयाधिकरण्यमिति भावः* इति पाठो भिन्नो घपुस्तके चिह्नद्वयवर्ती । अयञ्च युक्ततरः ।

मातृमानप्रभेदेऽपि प्रतिदेहं न भिद्यते ।
साक्षी बाह्यार्थवद्यस्मात्स आत्मेत्युच्यते ततः ॥
व्यभिचारो मिथो गच्छत्प्रमात्रादेः स्वसाक्षिकः ।
सर्वमात्राद्यभावार्थसाक्षित्वान्न तथात्मनः ॥

इति वार्तिककारपादैर्व्यवहारदशायामपि साक्षिभेदनिराकरणात् । सुषुप्तौ तद्भेदकल्पनं केषा-

न्यायरत्नावली ।

स्मृत्यापत्तिरिति वाच्यम् । तन्मनोगतप्रमाजन्यसंस्कारस्य मनोऽन्तरावच्छिन्ने विरहात् तत्तच्छरीरावच्छिन्ने स्मृत्यादौ तत्तच्छरीराणामपि हेतुत्वाच्च । मनस्तत्संस्कारान्यतरावच्छिन्नं चैतन्यं साक्षीति केचित् । तदुक्तन्यायेन वार्तिकोक्तयुक्त्या च विरुद्धमिति ज्ञापयितुमाह—मातृमानेत्यादि । स तव आत्मेत्युच्यते 'एष त आत्माऽन्तर्याम्यमृत' इति श्रुताविति शेषः । व्यभिचारः—मिथः परस्पराभावकालीनत्वम् । स्वसाक्षिकः-आत्मसाक्षिकः । सर्वमात्राद्यभावार्थेति । सर्वे ये मात्रादिरूपाः तदभावरूपाश्चार्था इत्यर्थः । व्यवहारेति । जागरेत्यर्थः । साक्षिभेदेति-प्रतिदेहं साक्षिभेदेत्यर्थः । तद्भेदेति । एकस्मिन्नपि देहे मनोऽवच्छिन्नसा-

नारायणी ।

ण एकत्वेन नानुभवस्मृत्योर्वैयधिकरण्यमिति भावः । नन्वविद्याया इव विनिगमकाभावान्मनसोऽपि प्रमात्रुपाधित्वेन कल्पितस्य साक्ष्युपाधित्वमप्रतिहतं तथा च साक्षिणोऽप्यौपाधिकभेदोस्त्येवेति केषांचिदनभिज्ञवेदान्तिनामुक्तिः सिद्धान्तविरोधान्न युक्तेत्याह—मातृमानेत्यादि । आत्मेत्युच्यते 'एष त आत्मान्तर्याम्यमृत'इति श्रुताविति शेषः । व्यभिचारो मिथः—परस्पराभावसामानाधिकरण्यादिरूपः । स्वसाक्षिकः-आत्मसाक्षिकः । सर्वेति । सर्वे ये प्रमात्रादिरूपास्तदभावरूपाश्चार्थास्तत्साक्षित्वादित्यर्थः । व्यवहारदशायामपि-जागरेऽपि । साक्षात्ति । प्रतिदेहं साक्षिभेदनिराकरणात् । तद्भेदकल्पनम्-(१)मनउपाधिक-

(१) अत्र कपुस्तके 'मनउपाधिकसाक्षिकसंस्कारोपाधिकः' इति, खपुस्तके 'मनउपाधिसाक्षिकः संस्कारोपाधिकः' इति च पाठः ।

न्यायरत्नावली ।

क्षितो मनस्संस्कारावच्छिन्नसाक्षिणो भेदेत्यर्थः । यथा मनोभेदेन साक्षिभेदः, तथा (१)तत्संस्कारभेदेनेति तेषां भावः । महामोह एव न तु न्यायानुसरणम् । ननु साक्षिण एकत्वे एकस्य प्रमातुः प्रमात्रन्तरीयसुखाद्यनुभवापत्तिरिति चेन्न । अहमन्यमनोगतसुख-विशिष्ट इत्यनुभवस्यापादनासम्भवात् एक मनोऽवच्छेदेनापरम-नोगतसुखादिवैशिष्ट्यस्य उक्तानुभवविषयस्य अप्रसिद्धेः । ननु तथापि तत्पुरुषीयसुखादिभासकचितस्तन्मनोऽवच्छिन्नचित्त्वेन रूपेण साक्षितास्तु, सुषुप्तावपि तन्मनोव्यक्तिरस्त्येव, अवस्था-भेदेऽपि स्वरूपाभेदात्; किञ्चाविद्यावच्छिन्नचितस्साक्षित्वपक्षे मनोऽवच्छिन्नचितमादाय विनिगमकाभाव इति चेन्न । शुद्धचि-तोऽन्तर्यामिणो वा चैतन्यस्य साक्षित्वपक्षे मनोभेदेन साक्षि-भेदे(२) मानाभावात् , किञ्च अविद्यावच्छिन्नस्य साक्षित्वपक्षेऽपि मनोऽवच्छिन्नस्य न साक्षितासम्भवः । अविद्यातद्वृत्त्यादीनां मनो-देशापेक्षया अधिकदेशव्यापकानां कात्स्न्र्येन मनोऽवच्छिन्नचित्स-म्बन्धाभावात् । अत एव मनोवृत्त्यनिर्गमकालेऽविद्यावच्छिन्नचि-ता घटाद्युपादानभूतया घटादेर्भानवारणाय घटाद्यवच्छेदेनावरणं कल्प्यत इति मूल एव पूर्वमुक्तम् । तदस्वीकारे च वृत्तेरावरण-

नारायणी ।

साक्षितः संस्करोपाधिकः साक्षी भिन्न एवेति साक्षिभे-दकल्पनं महामोह एव-अति भ्रम एव, मनआदेः सा-क्षिशरीरे अप्रवेशस्य बहुधोक्तेरिति भावः । ननूत्थितस्य सुखस्मृतिवद् दुःखस्मृतिरप्यस्ति अतस्तदन्यथानुपपत्त्या नित्यसु-

(१) तथा मनस्तत्संस्कारेति घपुस्तके ।

(२) अत्रायमधिकः पाठो घपुस्तके । साक्षिभेदे गौरवान्मानाभावाच्च । अन्यथा तत्तत्सुखदुःखादिदृश्यावच्छिन्नचितो वा भासकत्वेन सुखादिदृश्यभेदेन क्षणभेदेन वा साक्ष्यभे-दापत्तेः । तस्मात् आध्यासिकस्य तादात्म्यस्य भासकतानियामकत्वामिति सिद्धान्तादधिष्ठा-नमेव साक्षीति युक्तम् ।

श्चिद्यामोह एवेत्यवधेयम् । ननु 'दुःखमहमस्वाप्समि'ति कस्यचित्कदाचित्परामर्शात् सुषुप्तौ दुःखानुभवोऽप्यस्तु । न । तदानीं दुःखसामग्रीविरहेण तदभावात् । सुखस्य चात्मस्वरूपत्वेन नित्यत्वात् शय्यादेरसमीचीनत्वेन च दुःखमित्युपचारात् 'दुःखमहमस्वाप्समि'ति प्रत्ययोपपत्तिः । अथवा अवस्थात्रयस्यापि त्रैविध्याङ्गीकारात् सुषुप्तावपि दुःखमुपपद्यते । तथा हि—प्रमाज्ञानं जाग्रज्जाग्रत्, शुक्तिरजतादिविभ्रमो जाग्रत्स्वप्नः, श्रमादिना स्तब्धीभावो जाग्रत्सुषुप्तिः । एवं स्वप्ने मन्त्रादिप्राप्तिः स्वप्नजाग्रत् , 'स्वप्नेऽपि स्वप्नो मया दृष्ट' इति बुद्धिः स्वप्नस्वप्नः, जाग्रदशायां कथयितुं न शक्यते, स्वप्नावस्थायां च यत्किञ्चिदनुभूयते,

न्यायरत्नावली ।

भङ्गार्थत्वपक्षस्य उच्छेदस्स्यात् । उपचारात्—जाग्रत्कालीनाच्छय्यादौ दुःखसाधनत्वज्ञानात् । दुःखमित्यादि । दुःखसाधनशय्याधिकरणकं शयनं कृतवानहमित्यर्थः । जागरे त्रैविध्यमाह—प्रमेत्यादि । स्तब्धीभावः—अहमाकारवृत्त्यन्यवृत्तिसा-

नारायणी ।

खस्येव नित्यदुःखस्याप्यनुभवोऽस्तु सामग्रीबाधेन जन्यसुखस्येव जन्यदुःखस्यापि भानासम्भवादित्यभिप्रेत्याशङ्कते—नन्विति । दुःखेति । तथाचात्मनो दुःखरूपतापि स्यादिति भावः । सुखदुःखयोः साम्यं परिहृत्य दुःखानुभवमन्यथा नयति—शय्यादेरित्यादि । उपचारात्–जाग्रत्कालीनात् शय्यादौ दुःखसाधनत्वज्ञानात् । दुःखमहमिति । दुःखसाधनशय्याधिकरणकं शयनं कृतवानहमित्यर्थः । ननु शय्यादेरसमीचीनत्वेनैव दुःखप्रतीतिर्न युक्ता (चेत्) सुखप्रतीतेरपि शय्यादेः समीचीनप्रयुक्तत्वापत्तिः युक्तेस्तौल्यादतः पक्षान्तरमाह—अथवेति । त्रैविध्याङ्गीकारात् तापनीयादिश्रुताविति शेषः । जागरे त्रैविध्यमाह—प्रमेत्यादि । स्तब्धिभावः—अहमाकारवृत्त्यन्यवृत्तिसामान्याभावः एवं स्वप्नेत्यादि स्पष्टम् ।

तत्स्वप्नसुषुप्तिः । एवं सुषुप्त्यवस्थायामपि सात्त्विकी या सुखाकारा वृत्तिः, सा सुषुप्तिजाग्रत्, तदनन्तरं 'सुखमहमस्वाप्स'मिति परामर्शः । तत्रैव या राजसी वृत्तिः, सा सुषुप्तिस्वप्नः, तदनन्तरमेव दुःखमहमस्वाप्समिति परामर्शोपपत्तिः । तत्रैव या तामसी वृत्तिः, सा सुषुप्तिसुषुप्तिः, तदनन्तरं 'गाढं मूढोऽहमस्वाप्स'मिति

न्यायरत्नावली ।

मान्याभावः । सात्त्विकी—सत्त्वगुणपरिणामरूपसुखाकारात्मसुखविषयिका । राजसी—रजोगुणविषयिका । रजोगुणस्य दुःखादिपरिणामयोग्यत्वेन दुःखत्वोपचार इति भावः । तामसी—तमोगुणविषयिका । तिस्रोऽपि वृत्तयः सत्त्वगुणस्यैव परिणामाः, ज्ञानत्वात् । अथवा सुखरूपेण परिणतसत्त्वगुणविषयिका सात्त्विकी, दुःखरूपेण परिणतरजोगुणविषयिका राजसी, मोहरूपेण परिणततमोगुणविषयिका तामसी । न च सत्त्वादिगुणपरिणामरूपा वृत्तिस्सात्त्विक्यादिरूपा आत्मसुखविषयिका(१), एवं सुखाकारेत्यस्य सर्वत्रानुषङ्गादिति वाच्यम् । दुःखविषयकज्ञानेन विना दुःखविषयकस्मृत्यसम्भवात् ज्ञानरूपाया(२) वृत्तेः सत्त्वान्यगुणपरिणामत्वासम्भवात् ।'सत्त्वात्सञ्जायते ज्ञान'मिति स्मृतेः । सुखादिरूपेण परिणामे तु धातुसाम्यादिकमेव निमित्तम् । अथ राजसी वृत्तिर्दुःखम्, तामसी वृत्तिः तमःपरिणामो मोहरूपः, तत्संस्कारश्च तदवच्छिन्नचैतन्यनाश एवेति न तदर्थं तद्गोचरवृत्त्यपेक्षेति चेन्न । दुःखमो-

नारायणी ।

सात्त्विकी-सत्त्वगुणपरिणामरूपा, सुखाकारा-आत्मसुखविषयिका,राजसी-दुःखरूपरजःपरिणामगोचरा,तामसी-तमोगुणविषयिका । तिस्रोऽपि वृत्तयः सत्त्वगुणस्यैव, ज्ञानत्वात् ; 'सत्त्वात्संजायते ज्ञान'मिति स्मृत्या सत्त्वपरिणामस्यैव ज्ञानात्मवृत्तित्वोक्तेरित्यन्यत्र विस्तरः । मुख्याधि-

(१)—विषयिका एव सुखाकारेत्यस्येति घपुस्तके । (२) ज्ञानरूपाऽविद्यावृत्तेरित्यर्थः ।

परामर्शः । यथा चैतत्, तथा (१)वासिष्ठवार्तिकामृतादौ स्पष्टम् । एवमध्यात्मं विश्वः, अधिभूतं विराट्, (२)अधिदैवं विष्णुः । अध्यात्मं जाग्रत्, आधिदैवम्, (३)पालनं, अधिभूतं सत्त्वगुणः । एवमध्यात्मं तैजसः, अधिभूतं

न्यायरत्नावली ।

हयोः वृत्तिपदेनाव्यवहारात् सविषयके ज्ञानेच्छादावेव वृत्तिपदप्रयोगादिति भावः । एवमध्यात्मामित्यादि । (४)एवमभिहितानामेतेषामैक्योपासनया हिरण्यगर्भलोकप्राप्तिः अन्तःकरणशुद्धिद्वारा क्रममुक्तिश्चेति योजना । एतेषां विश्वादिसमूहानां प्रथमं समूहमाह-रजोगुण इत्यन्तेन । अध्यात्मं-शरीरमधिकृत्य स्थितः । अधिभूतं-स्थूलभूतमधिकृत्य स्थितः । अधिदैवं-शरीरस्थूलसमष्टिभिन्नसोपाधिरजोगुणरूपमधिकृत्य स्थितः । अध्यात्मं जाग्रादिति । अध्यात्मेन विश्वेनानुभूयमाना जाग्रदवस्थेत्यर्थः । अधिदैवं-ब्रह्मकारणिका सृष्टिः । अधिभूतं सर्वभूतान्यधिकृत्य स्थितः । रजोगुणो-ब्रह्मोपाधिः । एष प्रथमस्समूहः । एवमध्या-

नारायणी ।

कारिणां परमहंसानां श्रवणादिद्वारकमात्मज्ञानं मोक्षोपायमित्यभिधाय मन्दाधिकारिणामविद्वत्सन्यासिनां ज्ञानसाधनोपायमाह— एवमिति । एवमुपहितानामेतेषामैक्योपासनया हिरण्यगर्भलोकप्राप्तिः, अन्तःकरणशुद्धिद्वारा क्रममुक्तिश्चेति योजना । अध्यात्मं शरीरमधिकृत्य स्थितः, अधिभूतं स्थूलभूतसमष्टिमधिकृत्य स्थितः, अधिदैवं स्थूलसमष्टिभिन्नं सोपाधिरजोगुणरूपमधिकृत्य स्थितः, (५)रजोगुणोपाधिको ब्रह्मा । जाग्रदिति । अध्यात्मेन विश्वेनानुभूयमाना जाग्रदवस्थेत्यर्थः । अधिदैवं ब्रह्मकार्यम्, अधिभूतं सर्वभूतान्यधिकृत्य स्थितः, एष प्रथमः समूहः । एवमध्यात्मामिति । लिङ्गमधिकृत्य स्थित इत्य-

(१) वासिष्ठेतिशब्दो नास्ति कखपुस्तकयोः । (२) अधिदैवं ब्रह्मा इति कखपुस्तकयोः ।
(३) अधिदैवं सृष्टिः, अधिभूतं रजोगुणः इति कखपुस्तकयोः ।
(४) एवमुपहितानामिति घपुस्तके ।
(५) रजोगुणो ब्रह्मोपाधिः अध्यात्मम् इति खपुस्तके ।

हिरण्यगर्भः, अधिदैवं (१)ब्रह्मा, अध्यात्मं स्वप्नः, अधिदैवं (२)सृष्टिः, अधिभूतं रजोगुणः । एवमध्यात्मं प्राज्ञः, अधिभूतमव्याकृतम् , अधिदैवं रुद्रः, अध्यात्मं सुषुप्तिः, अधिदैवं प्रलयः, अधिभूतं तमोगुणः । एवमध्यात्माधिभूताधिदैवानामेकत्वात् प्रणवावयवत्रयमहितानामु-

न्यायरत्नावली ।

त्मं—लिङ्गशरीरमधिकृत्य स्थितः । अधिभूतं—सूक्ष्मभूतसमष्टिमधिकृत्य स्थितः । अधिदैवं—तदुभयान्यसत्त्वगुणोपाधिकः । अध्यात्मम्—अज्ञानमधिकृत्य स्थितः । अधिभूतम्—अव्याकृतचिदाभासादियुक्तमधिकृत्य स्थितः । अव्याकृतम्—ईश्वरः । अधिदैवम्—अज्ञानाव्याकृतान्यतमो गुणोपाधिकः । एवमध्यात्मेत्यादि । प्रणवावयवरूपवाचकसहितानामुक्तसमूहानामेकत्वादेकत्वं विचिन्त्य उपहितस्वरूपाणामुक्तसमूहानामैक्योपासनया सत्यलोकप्राप्तिपूर्वकं कैवल्यमित्यर्थः । प्रथमावयवो वाचकः, प्रथमसमूहश्च वाच्यः, तयोरेकत्वं विचिन्त्यम् । एवं द्वितीयौ तृतीयौ चावयवसमूहावेकत्वेन विचिन्त्यौ । ततः प्रथमसमूहस्य कारणेन द्वितीये-

नारायणी ।

र्थः । अधिभूतं सूक्ष्मभूतसमष्टिमधिकृत्य स्थितः, अधिदैवं तदुभयान्यः सत्त्वगुणोपाधिकः, अध्यात्मं तैजसेनानुभूयमाना स्वप्नावस्था, अधिदैवं विष्णुकार्यम्, अधिभूतं सर्वभूतान्यधिकृत्य स्थितः, एष द्वितीयः समूहः । अध्यात्ममज्ञानमधिकृत्य स्थितः, अधिभूतमव्याकृतं चिदाभासादियुक्तमज्ञानमधिकृत्य स्थितः, अव्याकृतमीश्वरः, अधिदैवं तदुभयान्यस्तमोगुणोपाधिकः, अध्यात्मं प्राज्ञेनानुभूयमाना सुषुप्त्यवस्था, अधिभूतं भूतान्यधिकृत्य स्थितः, अधिदैवं रुद्रकार्यम् । एवमिति । प्रणवावयवत्रयसहितानां—प्रणवावयवरूपाकारोकारमकाररूपवाचकसहितानामुक्तसमूहानाम्, एकत्वात्—व्याप्यव्यापकभावमर्यादयाऽभेदात् । उपहितेति । उपहितस्वरूपाणामुक्तसमूहानामैक्योपासनया ।

(१) अधिदैवं विष्णुरिति पाठः कखपुस्तकयोः ।

(२) अधिदैवं पालनम्, अधिभूतं सत्त्वगुणः । इति कखपुस्तकयोः ।

पहितानामैक्योपासनया हिरण्यगर्भलोकप्राप्तिः, अन्तः-करणशुद्धिद्वारा क्रममुक्तिश्च । एतत्सर्वोपाधिनिराकर-णेन साक्षिचैतन्यमात्रज्ञानेन तु साक्षादेव मोक्ष इति ।

न्यायरत्नावली ।

नैकत्वं द्वितीयस्यापि तृतीयेन कारणैकत्वं चिन्तयित्वा सत्यलोकं प्राप्य हिरण्यगर्भेण तत्र विद्यमानेन सह मुच्यते । नृसिंहतापि-न्यथर्वशिखामाण्डूक्यादिश्रुतिः तद्भाष्यं चात्र प्रमाणं बोध्यम् । अत्र प्रथमसमूहे सत्त्वगुणपालनाविष्णूनां द्वितीयसमूहे रजोगुण-सृष्टिब्रह्मणां च पाठः प्रामादिकः । विपरीतपाठस्य युक्तत्वात्, अथर्वशिखातापनीयादौ तथैवोक्तत्वात्, 'त्रयीं तिस्रो वृत्ती'रित्या-दिमहिम्नस्तोत्रीयव्याख्याने आचार्यैरेवोक्तत्वात् । अत्र ब्रह्म-निर्देशेन तदुपाधिरजोगुणादिलाभेऽपि तेषामपि स्वातन्त्र्येणाका-

नारायणी ।

हिरण्यगर्भलोकः—सत्यलोकः, अनन्तरं विदेहकैवल्यमित्यर्थः । प्रथमावयवोऽकारो वाचकः प्रथमसमूहो वाच्यः तयोरेकत्वं चिन्त्यम्, एवं द्वितीयावयवद्वितीयसमूहयोस्तृतीयावयवतृतीय-समूहयोरेकत्वं विचिन्त्य ततः प्रथमसमूहस्य द्वितीयेन कारणेन द्वि-तीयस्य तृतीयेन समूहेनैक्यं चिन्त्यम्, तच्चिन्तनेन सत्यलोकावाप्तिर्भ-वति । अनन्तरं तेन सह मुच्यते ।

ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे ।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम् ॥

इत्यादिश्रुतेरिति संक्षेपः । पुनरपि मुख्यानां प्रसङ्गात्कैवल्योपाय-माह—एतदिति । (१)*उपास्योपासकभावपरित्यागेनेत्यर्थः । साक्षिचैत-न्यमात्रज्ञानेन—

अभोक्ताहमकर्ताहमसङ्गोऽहं सदाऽमलः ।
सर्वावभासकज्योतिस्स्वप्रकाशं निरञ्जनम् ॥
ब्रह्म पूर्णं पराऽनन्दमहमस्मि सनातनम् ।
कालत्रये द्वैतजातं नास्ति मायाविजृम्भितम् ॥

(१) *...* चिह्नितः पाठः कपुस्तके भ्रष्टः प्रतिभाति ।

तदेवं त्रयाणामप्यवस्थात्रयसहितानां विश्वतैजसप्राज्ञानामविद्यात्मकत्वात् दृश्यत्वेन च मिथ्यात्वादनुपहितः केवलः साक्षी तुरीयाख्योऽहमस्मीत्यर्थः। एवं व्यवहारतः सर्वव्यवस्थोपपत्तेः परमार्थतः कस्या अपि व्यवस्थाया अभावान्न काप्यनुपपत्तिः। विस्तरेण चैतत्प्रपञ्चितमस्माभिर्वेदान्तकल्पलतिकायामित्युपरम्यते ॥८॥

ननु जाग्रत्स्वप्नसुषुप्त्यवस्थासहितानां त्रयाणामपि तदभिमानिनां मिथ्यात्वात्तत्साक्षिणोऽपि मिथ्यात्वं स्यादविशेषादित्याशङ्क्य विशेषाभिधानेन साक्षिणः सत्यत्वमाह—

अपि व्यापकत्वाद्धितत्वप्रयोगा-
त्स्वतस्सिद्धभावादनन्याश्रयत्वात्।
जगत्तुच्छमेतत्समस्तं तदन्य-
त्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ ९ ॥

न्यायरत्नावली।

रादिवाच्यत्वात् पृथगुक्तिः। अत एव गार्हपत्याद्यग्नीनां पृथिव्यन्तरिक्षद्युलोकानाम् ऋगादिवेदानां च विराडन्तःपातित्वेऽपि अथर्वशिखादौ प्रथमादिसमूहे पृथगुक्तिरभङ्गच्छते। स्वातन्त्र्येण वाच्यता तु त्रयीमित्यादिपद्यादौ स्पष्टा। पद्यार्थमुपसंहरति—तदेवमिति ॥ ८ ॥

नारायणी।

इति सर्वद्वैतबाधसाक्षिपरमात्माभेदज्ञानेन*। तापिन्यादा'वथात आदेशः, न स्थूलप्रज्ञमि'त्यादिना सर्वोपाधिविनिर्मुक्तस्यैव मुमुक्षुज्ञेयत्वोक्तेः। पद्यार्थमुपसंहरति—तदेवमिति।

नवमं पद्यमवतारयति—नन्विति। तत्साक्षिणः—अवस्थासाक्षिणः। अविद्याप्रयुक्तदभिमानिन इवाविद्याप्रयुक्तदवभासकस्यापि मिथ्यात्वमावश्यकमिति भावः। अविशेषात्—मिथ्यात्वप्रयोजकयोराविद्यकत्वदृश्य-

'न दृष्टेर्द्रष्टारं पश्ये' रिति साक्षिणं प्रकृत्य 'अतोऽन्यदार्त'मिति श्रुतेः साक्षिणोऽन्यत्साक्ष्यं सर्वं जगत्तुच्छं न तु साक्षी। बाधावधित्वात् भ्रमाधिष्ठानतया ज्ञात-

न्यायरत्नावली।

जगत्तुच्छमिति। जगन्मिथ्येत्यर्थः। आर्तशब्देन विनाशित्वोक्तावर्थान्मिथ्यात्वलाभः। आर्तं बाधेन पीडितमित्यर्थे मिथ्यात्वं शाब्दमेवेति भावः। बाधावधित्वादिति। यद्विषयकप्रमा बाधिका, तत्त्वादित्यर्थः। तथा च साक्षिणो मिथ्यात्वे बाधकप्रमैव दुर्लभेति कुतो मिथ्यात्ववार्तेति भावः। भ्रमेत्यादि। अतत्त्वारोपरूपभ्रमस्य तत्त्वाज्ञानपूर्वकत्वनियमेनाज्ञानविषयत्वरूपादधिष्ठानत्वात् साक्षिणस्तात्त्विकत्वमित्यर्थः। ननु माध्यमिकस्य शून्यवादिनो मते न तत्त्वप्रमा बाधिका, सर्वस्यैव विचारासहत्वेन युक्तिबाध्यत्वात्। अत एव भ्रमो न तत्त्वाज्ञानप्रयुक्तः। तथा च पूर्वपूर्वभ्रमवासनामात्रादुत्तरोत्तरभ्रमः, न किञ्चिदस्थिरमुपादानं निमित्तं वास्ति, 'यत् सत् तत् क्षणिक'मिति नियमाभ्युपगमात्। तथा च साक्षिण एव क्षणिकविज्ञानरूपस्य घटपटादिरूपत्वस्वीकारात् साक्षिणःघटाद्याकारस्येव घटादिरूपाकारेण साक्षि-

नारायणी।

त्वयोः साम्यात्। तत्रादौ युक्त्यसहत्वेन प्राप्तं तुच्छत्वं परिहरिष्यन् तदभावे हेतुभूतामपरिच्छिन्नत्वसाधिकां श्रुतिं पठति--न दृष्टेरिति। श्रुतिस्थार्तपदस्य दुःखित्वमर्थ इति तार्किकभ्रमनिरासाय श्रुत्यर्थं विशदयति--साक्षिण इति। तुच्छं मिथ्या, तथा च 'अर्द हिंसाया'मिति धातुनिष्पन्नार्तपदस्य बाधितार्थकत्वान्मिथ्यात्वं शाब्दमेवेति भावः। आस्तिकाभिमानिनं श्रुत्या निराकृत्य शून्यवादिनिरासाय तर्कमाह-बाधेति। बाधकधीविषयत्वादित्यर्थः। साक्षिणा मिथ्यात्वे तु बाधकप्रमाया एव दौर्लभ्यात्कुतो मिथ्यावार्तेति भावः। भ्रमेति। अज्ञत्वारोपरूपभ्रमस्य तत्त्वज्ञानपूर्वकत्वाद् भ्रमकारणीभूताज्ञानविषयत्वरूपादधिष्ठानत्वात्। ननु शून्यवादिमते भ्रमो न तत्त्वाज्ञानपूर्वकः, किन्तु पूर्वपूर्ववासनाप्रयुक्त एव तथा च घटाद्याकारस्यैव कल्पितस्य साक्षिणोऽपि बाधः स्यादेवेत्यत आह--

त्वाच्च । तद्बाधग्राहकाभावाच्चेत्याद्यनुक्तसमुच्चयार्थोऽपि-शब्दः । 'अथ यदल्पं तन्मर्त्यं' मिति श्रुतेः परिच्छिन्नत्व-तुच्छत्वयोः समव्याप्तत्वात्परिच्छिन्नत्वतुच्छत्वनि-वृत्तीत्याह—व्यापकत्वादिति । 'सर्वं खल्विदं ब्रह्मे'ति सर्वात्मत्वोपदेशेन देशकालापरिच्छिन्नत्वाद्वाकाशादी-नां च देशकालपरिच्छिन्नत्वेऽप्यापेक्षिकमहत्त्वेन व्याप-

न्यायरत्नावली ।

णोऽपि बाधः सम्भवति तत्राह-तद्बाधग्राहकेत्यादि । घटाद्याकारे साक्षिसामान्याभावज्ञानं बाधकं तत्तेनैव गृह्यते अन्येन वा ज्ञानेन ? नाद्यः । बाध्यमानेन तेन तद्ग्रहणेऽपि तसिद्ध्यसम्भवात् । ना-न्त्यः । (१)तस्यापि घटवत् बाध्यमानत्वेन घटविषयकत्वासिद्ध्या घटज्ञानाभावविषयकबाधासाधकत्वात्, ज्ञानान्तरस्य ज्ञानान्तररूप-प्रत्यक्षतायास्त्वयाऽनङ्गीकारात्, ज्ञानस्य स्वात्मकप्रत्यक्षविषयत्व-स्यैव त्वया स्वीकारादिति भावः । अल्पं-परिच्छिन्नम्, मर्त्यं-वि-नाशि बाधरूपमृत्युग्रस्तं वा । अपरिच्छिन्नत्वात्-देशकालनिष्ठा-भावाप्रतियोगित्वात् । व्यापकत्वोपचारात्-'आकाशवत्सर्वगतः, वायुस्सर्वत्रगो महा'नित्यादिश्रुतिस्मृत्यादिव्यवहारात् । सर्व-

नारायणी ।

तद्बाधेति । साक्षिबाधग्राहकाभावादित्यर्थः । असाक्षिकस्य बाधस्यायो-गात् परवेद्यत्वे सर्वशून्यताभङ्गात्, स्ववेद्यत्वे विरोधात्, स्वप्र-काशत्वे च संज्ञाकलहप्रसङ्गात्, सर्वबाधसाक्षितया सिद्धस्य साक्षि-णो न बाधो युक्त इति भावः । युक्त्या नित्यत्वं प्रसाध्य श्रुत्या तदाह-अल्पमिति । अल्पं परिच्छिन्नम्, मर्त्यं विनाशि बाधरूपमृत्युग्रस्तं वा, सम-व्याप्तत्वात्-परस्परं व्याप्यव्यापकभावात् । देशेत्यादि । देशकालनि-ष्ठाभावाप्रतियोगित्वात्, आपेक्षिकमहत्त्वेन-यावन्मूर्तापेक्षयाऽधिकपरि-माणवत्त्वेन, व्यापकत्वोपचारात्—'आकाशवत्सर्वगतः,वायुः सर्वत्रगो महानि'ति श्रुतिस्मृत्यादिव्यवहारात् । आत्मनोऽपुरुषार्थत्वमाशङ्क्य-

(१) तस्यापि घटे बाध्यमानत्वेन घटविषयकत्वासिद्ध्या घटे ज्ञानाभावसाधकेत्यादि घपुस्तके ।

कत्वोपचारात् । ननु सर्वव्यापकत्वेन नित्यत्वाद्भाव-रूपत्वाच्चात्मा न दुःखनिवृत्तिरूपः । नापि सुखरूपः । सुखस्यानित्यत्वेन नित्यात्मस्वरूपत्वानुपपत्तेः । तथा चात्मस्वरूपो मोक्षोऽपुरुषार्थ एवेत्याशङ्क्य नेत्याह–हि-तत्वप्रयोगादिति । हितत्वं पुरुषार्थत्वम् । 'तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमा-त्मे'ति 'यो वै भूमा तत्सुखम्, एष परम आनन्दः, (एष ह्येवानन्दयाति) विज्ञानमानन्दं ब्रह्म'इत्यादिभिः श्रुतिभिः तस्य परमानन्दरूपत्वोपदेशात् । तस्य च नित्यत्वेऽपि

न्यायरत्नावली ।

व्यापकत्वेन–कालतः सर्वव्यापकत्वेन सर्वदा सत्त्वेनेति यावत् । प्रेयः–प्रियतरम् । अन्यस्मात्—आत्मभिन्नात् । अन्तरतरम्–आरो-पितत्वेन बाह्यात् सर्वस्मात् दृश्यात् सत्यानन्दरूपत्वेन अधिष्ठा-नत्वात् यतोऽन्तरम् अतस्सर्वस्मात् स्वतादात्म्याध्यासेन प्रियादपि प्रियतममेतदित्यर्थः । यत्–यः । भूमा–अपरिच्छिन्नः । आन-न्दयाति–सर्वानानन्दयति । महाकाशस्य घटाकाशादाविव महा-

नारायणी ।

नन्विति । सर्वव्यापकत्वेन—कारणतया सर्वदृश्यानुस्यूतसच्चिन्मात्रत्वेन, नित्यत्वात् ध्वंसप्रागभावाप्रतियोगित्वात्, अतो न दुःखाभावरूपस्त-स्य(१)जडत्वादिति भावः । ननु दुःखनिवृत्तिर्मास्तु दुःखध्वंसरूपः दुःखा-त्यन्ताभावरूपः स्यात् तस्य नित्यत्वात्तत्राह–भावरूपत्वाच्चेति । प्रतियोग्य-निरूप्यसत्यपदार्थस्वरूपत्वादित्यर्थः । तथा चात्मा यदि दुःखाभावरूपः स्यात्तदा प्रतियोगिनिरूपणाधीननिरूपणविषयः स्यात्,न तु तथाऽतो न दुःखाभावस्वरूप इति भावः । प्रेयः–प्रियतरम्,अन्यस्मात्-आत्मभिन्ना-त्,अन्तरतरं–आरोपितत्वेन बाह्यात्सर्वस्माद्दृश्याद्यतोन्तरतरं ब्रह्म स-च्चिदानन्दरूपत्वादतः स्वतादात्म्याध्यासेन प्रियादपि प्रियतरमेतदिति

(१) तस्य जन्यत्वादिति भावः । मास्तु दुःखध्वंसरूपः दुखात्यन्ताभावरूपः स्यात् इत्यादिपाठः खपुस्तके । युक्तश्च ।

लोके धर्मजन्यतत्तदन्तःकरणवृत्तिव्यङ्ग्यतया तदुत्पत्ति-विनाशोपचारः । अज्ञानव्यवहितस्य च तस्याप्राप्तस्यैव ज्ञानमात्रादविद्यानिवृत्त्या प्राप्तिरिव भवतीति तदुद्देशेन मुमुक्षुप्रवृत्त्युपपत्तिः । अध्यस्तस्य प्रपञ्चस्य दुःखरूपस्या-

न्यायरत्नावली ।

नन्दस्य परिच्छिन्नानन्दे हेतुत्वमिति भावः । तत्तदन्तःकरण-वृत्तीति । चन्दनादियोगजन्यमनोवृत्तीत्यर्थः । लोके इत्यनेनेदं सूचितम्-'सुखस्य स्वरूपेणाजन्यत्वेऽपि स्वावरकाज्ञानविरोधिवि-शिष्टरूपेण लोके काम्यत्वात् मुमुक्षोरपि पूर्णानन्दस्वरूपमोक्षस्या-वारकमूलाज्ञानविरोधिविशिष्टतया काम्यते'ति तदिदमुक्तं-तदु-द्देशेन मुमुक्षुप्रवृत्तीति । इति-इत्थमज्ञानविरोधिज्ञानविशिष्टरू-

नारायणी ।

भावः ।भूमा-अपरिच्छिन्नः । नित्यत्वे-आत्मनो ध्वंसप्रागभावरहितत्वे । तत्तदिति । स्रक्चन्दनवनितादिसंयोगजन्यवृत्तीत्यर्थः । व्यङ्ग्यतया-प्रकाश्यतया । तदुत्पत्तीति । सुखमुत्पन्नं नष्टमिति व्यवहारे सुखपदस्य व्यञ्जकवृत्तौ लक्षणेत्यर्थः । ननु यदि सुखमात्मरूपतया नित्यं तर्हि सिद्धत्वात्कथं तदुद्दिश्य प्रेक्षावतां प्रवृत्तिरित्याशङ्क्य (१)सुखस्यात्म-रूपतया नित्यत्वेऽपि विस्मृतग्रैवेयकादाविव ज्ञानसाध्यायाः प्राप्तेः फलत्वसम्भवात् तदुद्दिश्य प्रवृत्तिर्नानुपपन्नेत्याह—अज्ञानेति । अज्ञान-रूपावरकान्वितस्येत्यर्थः । अप्राप्तस्येव न तु वस्तुगत्या ग्रामादिवद-प्राप्तस्य । ज्ञानेति । अपरोक्षसाक्षात्कारादविद्यानिवृत्त्या । प्राप्तिरिवेति । विस्मृतग्रैवेयकादेरिवेति शेषः । अत एव मोक्षस्य ज्ञानफलत्वात्पुमर्थत्व-म्, अनित्यत्वे तु ग्रामादेरिव क्रियाप्राप्यत्वेऽनित्यत्वप्रसक्त्याऽपुमर्थत्वा-पत्तेरिति दिक् । सुखात्मना पुमर्थत्वमुपपाद्य दुःखाभावात्मनाऽपि तदुपपादयति—अध्यस्तस्येति । इदं च विशेषणं 'प्रतियोग्यधिकरण-तया प्रसिद्ध एवाभावस्तिष्ठतो'ति पक्षे दुःखाभावस्य तत्र सम्भव-

(१) नित्यत्वेन फलत्वाभावो नेच्छानुदयात् कथं तदुद्दिश्य साधने प्रेक्षावतां प्रवृत्तिः कथं च तस्य पुमर्थत्वम्,अन्येच्छाधीनेच्छाविषयस्यैव लोके पुरुषार्थतापदार्थत्वात् इत्याशङ्क्य सुखस्यानित्यत्वे फलाभावन इच्छानुदयादात्मरूपतयेत्यादिः पाठः खपुस्तके । युक्तश्च ।

धिष्ठानत्वात् स एवाभाव इति दुःखाभावरूपत्वेनापि तस्य पुरुषार्थता। ननु मोक्षे सुखं संवेद्यते, न वा ? नाद्यः। तदानीं देहेन्द्रियाद्यभावेन तद्व्यञ्जकाभावात्,

न्यायरत्नावली।

पेण तदुद्दिश्य प्रवृत्तीत्यर्थः। स एव-परमानन्दात्मैव। पुरुषार्थ-

नारायणी।

ज्ञापनाय, तथा च सुखरूपस्यात्मनो विरुद्धस्वभावत्वेन दुःखभाक्त्वायोगात्, तदभावाधारत्वायोगेऽपि प्रकृष्टप्रकाशे विभिन्नसत्ताकस्य कल्पितस्योलूकान्धकारस्येवाध्यासिकदुःखप्रसक्तेर्वास्तव तदभावाधिष्ठानत्वे न किमपि बाधकमिति सङ्क्षेपः। स एव-परमानन्दात्मा एव। दुःखाभावरूपत्वेनापीत्यपिशब्दः सुखात्मत्वसमुच्चायकः। सुखदुःखाभावान्यतरात्मकत्वेनेत्यर्थः। तस्य-आत्मनः अज्ञानाभावस्य स्वत इच्छाविषयत्वाभावेन दुःखनिदाननिवृत्तितयैव पुमर्थत्वस्यावश्यं वाच्यत्वादज्ञाननिवृत्तित्वेनेति विहाय दुःखाभावत्वेनापीत्युक्तम्। दुःखस्य नित्यपरिहृतत्वेऽप्यपरिहार्य्याऽनाद्यविद्यया ऽपरिहृतस्येव ज्ञानमात्राद्रज्जुसर्पादेरिव भ्रमनिवृत्या परिहृतिरिव भवतीति प्राक्प्रवृत्युपपत्तिः। पुमर्थो द्वेधा। प्राप्तिरिष्टस्य, परिहारश्च निवृत्तिरनिष्टस्य। इष्टं द्विविधम्। वस्तुतोऽप्राप्तं ग्रामादि, प्राप्तमपि भ्रमव्यवहितं ग्रैवेयकादि। परिहार्यं द्वेधा। वस्तुतोऽपरिहृतं गर्तादि, सर्वदा परिहृतमपि भ्रमव्यवहितं रज्जुभुजङ्गादि। तत्र प्रथमौ प्राप्तिपरिहारौ क्रियाधीनौ, द्वितीयौ ज्ञानमात्राधीनौ। (१)अत्रैव च क्रियाऽव्यवधानात् पुमर्थत्वं युक्तमिति भावः। शङ्कते—नन्वित्यादि। मोक्षे--मोक्षावस्थायाम्। तद्व्यञ्जकेति। नित्यसुखाविर्भावकेत्यर्थः। लाघवाज्जन्यज्ञानसामान्यं प्रति शरीरेन्द्रियादीनां हेतुत्वकल्पनात्, तत्र तदङ्गीकारे तु संसारावस्थातोऽविशेषः स्यादिति भावः। ननु सावच्छिन्नानुभवं प्रत्येव देहेन्द्रियादीनां हेतुत्वं न तु निरवच्छिन्नानुभवं प्रति, अतस्तदा देहेन्द्रियादि-

(१) सर्वदा प्राप्तिश्च स्वरूपसम्बन्धः। अनेन सम्बन्धेन सर्वदा ब्रह्मणो जीवे सत्त्वेऽपि कण्ठे विद्यमानचार्माकरादाविव सम्बन्धस्याभावदशायां सम्बन्धेपीच्छोदयेन कण्ठचार्माकरन्यायेन विद्योपलक्षितसच्चिदानन्दस्वरूपब्रह्मावाप्तेः 'ब्रह्मैव सन्ब्रह्माप्येति' इति सिद्धायाः क्रियाया व्यवधानाभावात्पुमर्थत्वं युक्तमिति भावः। इति पाठः खपुस्तकेऽधिकः।

व्यञ्जकाभावेऽपि तत्संवेदनाभ्युपगमे संसारदशायामपि तथा प्रसङ्गात् । न द्वितीयः । अपुरुषार्थतापत्तेः । ज्ञायमानस्यैव तस्य पुरुषार्थत्वात् । अत एव शर्करातद्भोजिनोरिवेति वैष्णवंमन्यानामुद्गार इति चेन्नेत्याह-

न्यायरत्नावली ।

ता-काम्यता । ज्ञायमानस्येति । अनावृतसुखमेव काम्यते अत एव तवावृतसुखं मया सम्पाद्यमिति केनचित्प्रतारितः पुरुषो वदति मास्तु मे तत्सुखमिति । शर्करेति । यथा शर्करा स्वरूपेण न सुखप्रकाशः, तत्प्रयोजकस्य शर्करासंवेदनस्याभावात् ; किन्तु तद्भोजिनस्तत्संवेदनवतः । एवं विष्णुभावापन्नस्य सुखरूपत्वेऽपि न सुखप्रकाशः, तत्संवेदनाभावात् ; किन्तु तद्वेदनावस्थितस्य 'अयं विष्णुस्सकलकल्याणगुणो मत्सेव्य' इति संवेदनवतः । तस्मात् विष्णुभावो न मोक्षः, किन्तु तत्सन्निधिस्थितस्य तत्संवेदनमिति । तदेतन्मतमाश्रिता माध्वाः वैष्णवंमन्या एव न तु वैष्णवाः ।

नारायणी ।

भावेऽपि न हानिरिति तत्राह —व्यञ्जकेति । देहेन्द्रियादिरूपव्यापकाभावेपीत्यर्थः । तत्संवेदनेति । नित्यसुखसंवेदनेत्यर्थः । संसारदशायां—मोहतत्कार्यान्यतरकाले, तथात्वप्रसङ्गात्,--संवेद्यत्वप्रसङ्गात्, व्यञ्जकसामग्र्या अनपेक्षणादिति शेषः । पुरुषार्थत्वात्-काम्यत्वात्, असंवेद्यस्य पुमर्थत्वे परकीयसुखादेरपि तथात्वापत्तेरिति संक्षेपः । अत एव—संवेद्यस्य पुमर्थत्वाङ्गीकारादेव । शर्करेति । विशेषो ब्रह्मभावापन्नतद्भक्तयोरिति शेषः । यथा शर्करायां रसरूपत्वेन न सुखानुभवस्तत्प्रयोजकस्य शर्करासंवेदनस्याभावात्, एवं ब्रह्मभावापन्नस्याखण्डानन्दानुभवरूपत्वेऽपि न सुखाविर्भावः तत्संवेदनाभावात् , किन्तु शर्कराभोक्तुरिव तद्भक्तस्यैव भेदेनावस्थितस्य 'अयं विष्णुर्वैकुण्ठाधिपतिः सर्वेश्वरोऽखिलगुणपरिपूर्णो मत्सेव्योहं तु दास इति संवेदनवतः । तस्माद् ब्रह्मभावो न मोक्षः, किन्तु तत्सन्निधिस्थितस्य तत्प्रसादेन निःशेषदुःखनिवृत्तिविशिष्टः स्वतो नीचोच्चभावापन्नस्वरूपानन्दाविर्भावो विदेहमुक्तिः ।

न्यायरत्नावली।

एवमेकमिदं ब्रह्म न भेदि सकलं जगत्।
वासुदेवाभिधानस्य स्वरूपं परमात्मनः॥
तदेतदुपदिष्टं ते संक्षेपेण महामुने।
परमार्थं सारभूतं यत्तदद्वैतमशेषतः॥
तद्भावभावनापन्नस्ततोऽसौ परमात्मना।
भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेत्॥

नारायणी।

अपरोक्षज्ञानसत्त्वेऽपि स्वयोग्यपरमानन्दहेतुरूपमत्तमभावे मोक्षरूपेश्वरप्रसादस्याभावादारब्धकर्मणा संसारानुवृत्तौ तु जीवन्मुक्तिरिति। तदेतन्मतमाश्रिता माध्वादयो वैष्णवंमन्या एव न तु वैष्णवाः।

एकः समस्तं यदिहास्ति किञ्चित्तदच्युता नास्ति परं ततोन्यत्।
सोहं स च त्वं च हि सर्वमेतदात्मस्वरूपं त्यज भेदमाहम्॥

एवमेकमिदं ब्रह्म न भेदि सकलं जगत्।
वासुदेवाभिधानस्य स्वरूपं परमात्मनः।
तदेतदुपदेश्यं ते संक्षेपेण महामुने।
परमार्थसारभूतं यत्तदद्वैतमशेषतः॥
तद्भावभावनापन्नस्ततोऽसौ परमात्मना।
भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेत्॥

इत्यादिविष्णुपुराणाद्युक्तेः। ब्रह्मैव सन्ब्रह्माप्येति, ब्रह्म वेद ब्रह्मैव भवति' इत्यादिश्रुतेः। अधिकदर्शने दुःखद्वेषादेरपि संभवान्मधुविषसंपृक्तान्नवन्मुक्तेर्दुःखसंभिन्नसुखाविर्भावरूपत्वप्रसक्त्या हेयत्वोपपत्तेश्चेत्याद्यन्यत्र विस्तरः। मुक्तावुच्चनीचभावाङ्गीकारे तु 'अदृष्टमव्यवहार्य्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शिवमद्वैतं चतुर्थं मन्यन्ते' इति माण्डूक्यश्रुतिविरोधः।

अनेकजन्मसाहस्रीं संसारपदवीं व्रजन्।
मोहश्रमं प्रयातोऽसौ वासनारेणुगुण्ठितः॥
प्रचाल्यते यदा सोऽस्य रेणुर्ज्ञानोष्णवारिणा।
तदा संसारिपान्थस्य याति मोहश्रमः शमम्॥
मोहश्रमे शमं याते स्वस्थान्तःकरणः पुमान्।
अनन्यातिशयाबाधं परं निर्वाणमृच्छति।

स्वतस्सिद्धभावादिति। स्वप्रकाशज्ञानरूपत्वादित्यर्थः। यद्यपि संसारदशायामविद्यावृतस्वरूपत्वादात्मा परमानन्दरूपतया न प्रथते, तथापि तत्त्वविद्यया ऽविद्यानिवृत्तौ स्वप्रकाशतया स्वयमेव परमानन्दतया प्रकाशत इति न व्यञ्जकापेक्षा। ननु सुखस्य स्वप्रकाशज्ञानरूपत्वेऽपि नात्मरूपता। ज्ञानस्य धात्वर्थरूपतया क्रियात्वेन साश्रयत्वात्, जानामीति प्रतीतेर्ज्ञानमहमस्मीत्यप्रतीतेश्च;

न्यायरत्नावली।

इति विष्णुपुराणाद्युक्तेः। 'ब्रह्म वेद ब्रह्मैव भवती'त्यादिश्रुतेश्चेति भावः। प्रथते-भाति। प्रकाशते-संशयाद्यविषयत्ववान्। स्वयमेवेत्यस्य संशयाद्यविषयत्वेऽन्वयः। तथा च पूर्णानन्दस्य संसारकाले संशयादिविषयत्वमावरणप्रयुक्तम्। आवरणनिवर्तकवृत्तिनाशोत्पत्तिक्षणपर्यन्तक्षणत्रये संशयाद्यविषयत्वं तु तादृशवृत्तिप्रयुक्तम्। तदुत्तरकाले तु वृत्त्यभावेऽप्यावरणाभावादेव तदि-

नारायणी।

इति विष्णुपुराणाविरोधश्च। कैवल्ये ज्ञानमात्रस्य हेतुत्वात् भगवत्प्रसादश्चैतादृशनिष्ठाविरोधिविघ्ननिवारण उपक्षीयते। तदुक्तम्—

तस्माददृष्टश्रुतदूषणं परं भक्त्यैकयेशं भजतात्मलब्धये।

इति दिक्। स्वप्रकाशरूपत्वेऽपि ब्रह्मणो व्यञ्जकं विना संसारकाल इव मुक्तिकाले प्रकाशायोगात्कथं पुरुषार्थत्वमित्याशङ्क्य व्यञ्जकाभावेऽप्यनावृतत्वरूपविशेषबलादेव प्रकाशसम्भवात्तस्य तद्युक्तमित्याह—यद्यपीत्यादि। न प्रथते—न भाति, प्रकाशते—भाति, अनावृतत्वेन संशयाद्यविषयत्वात्। न व्यञ्जकापेक्षा—न वृत्त्यपेक्षा, तथाच मुक्तिकालेऽनावृतत्वेन भासमानस्य पुमर्थत्वं युक्तमिति भावः। पुरुषार्थस्योपपादनेऽपि नाद्वैतं सिद्ध्यति, धर्मरूपतया तस्यातिरिक्ताश्रयावश्यंभावात्; न च धर्मिरूपमेव तत्, प्रत्यक्षविरोधादित्यभिप्रेत्याशङ्कते—नन्विति। आत्मरूपत्वाभावे हेतुमाह—ज्ञानस्येति। सुखज्ञानयोरेकत्वाङ्गीकारादिति भावः। साश्रयत्वात्—स्वभिन्नधर्मावृत्तित्वात्। साश्रयत्वे प्रमाणमाह—जानामीति। साश्रयत्वांशे भ्रमोस्तु तत्राह—ज्ञानमिति। बाध-

तथा च कथमद्वैतवाद इत्याशङ्क्य नेत्याह-अनन्याश्रयत्वादिति। 'यत्साक्षादपरोक्षाद् ब्रह्म, अयमात्मा सर्वान्तरः, सत्यं ज्ञानमनन्तं ब्रह्म, विज्ञानमानन्दं ब्रह्मे'ति श्रुतेः स्वप्रकाशज्ञानानन्दरूप एवात्मा । अन्तःकरणाद्युपाधितादात्म्याध्यासेन च तद्वृत्तौ ज्ञानाध्यासाज्ज्ञानामीति तदाश्रयत्वप्रतीतिः । धात्वर्थत्वमुत्पत्तिविना-

न्यायरत्नावली ।

ति भावः । साश्रयत्वात्-स्वसमानसत्ताकाश्रयकत्वात् । अद्वैतेति। अद्वैतज्ञानेत्यर्थः । अन्तःकरणेति । आत्मनि मनस्तादात्म्याध्यासेनेत्यर्थः । तद्वृत्तौ-तत्परिणामरूपायां वृत्तौ । ज्ञानाध्यासात्-स्वधर्मत्वेन कल्पितस्यात्मस्वरूपस्य ज्ञानस्य तादात्म्याध्यासात् । धात्वर्थत्वेत्यादि । धात्वर्थत्वं जानातीत्यादिधातुवाच्य-

नारायणी ।

कं विना भ्रमत्वकल्पनाया अन्याय्यत्वादिति भावः । जानामीत्यादिप्रतीतेरन्तःकरणतद्धर्मवृत्तिविषयकत्वेन सावकाशत्वान्निरवकाशश्रुतिसिद्धज्ञानत्वमेवोचितमित्यभिप्रेत्य तदर्थिकां श्रुतिमुदाहरति--यत्साक्षादित्यादि । एवञ्चात्मनः स्वप्रकाशत्वबोधनद्वारा ज्ञानात्मत्वज्ञापिका (एषा), 'यः सर्वान्तरः' इति व्यापकत्वबोधनेनाखण्डताज्ञापिका, 'सत्यं ज्ञानमनन्तमि'ति च धर्मधर्मिभावनिरासेन साक्षात् ज्ञानात्मत्वज्ञापिका, विज्ञानमानन्दमि'ति तु ज्ञानानन्दयोरेकत्वबोधिका, तदेवाह --स्वप्रकाशेति । प्रत्यक्षस्य सावकाशतां दर्शयति--अन्तःकरणेति । आत्मनि मनस्तादात्म्याध्यासेनेत्यर्थः । तद्वृत्तौ--अन्तःकरणपरिणामरूपायां वृत्तौ, ज्ञानाध्यासात्--आत्मरूपज्ञानस्य तादात्म्याध्यासात्, तदाश्रयत्वप्रतीतिः--जानामीति ज्ञानाश्रयत्वप्रतीतिः, तथा चास्मन्मते ज्ञानसुखादिवृत्तीनां मनोधर्मत्वात्तादृशप्रतीतीनां विशिष्टाहङ्कारे स्वरूपज्ञानसुखतादात्म्यापन्नमनोधर्मरूपवृत्तिविषयकत्वेनानुपपत्त्यभावान्न तद्विरोधेनात्मनो ज्ञानानन्दत्वस्यासिद्धिरिति भावः । यद्यात्मैव ज्ञानं तर्हि नित्यतया धात्वर्थत्वानुपपत्तिः । धात्वर्थक्रियायाः कारणसाध्यत्ववत्साश्रयत्वाच्च, एवं ज्ञानमुत्पन्नं नष्टमिति प्रतीतयोऽनुपपन्ना इत्याशङ्क्यान्तःकरणवृत्तेरेव धात्वर्थत्वाद्यङ्गीकारा-

शवत्त्वं चान्तःकरणवृत्तेरेवेति ज्ञप्तिरूपमु(१)खज्ञानस्य सर्वाधिष्ठानत्वेनान्याश्रयत्वाभावान्न द्वैतापत्तिः। तेन ज्ञानसुखात्मक आत्मा सत्यः, तद्भिन्नं च सर्वं जगदसत्यमिति सिद्धम् ॥ ९ ॥

ननु सर्वस्य जगतस्तुच्छत्वे तन्निषेधेनात्मतत्त्वप्रतिपत्तिर्न स्यात्। न हि शशविषाणं निषिध्यते।

न्यायरत्नावली।

त्वम्। वृत्तेः-वृत्त्यवच्छिन्नचितः। सुखादिज्ञानमपि सुखादिरूपवृत्त्यवच्छिन्नचिदेव। वस्तुतस्तु वृत्तेर्वर्तमानरूपसम्बन्धस्य असत्त्वापादकाज्ञानशून्यत्वविशिष्टचित इति यावत्। एतेन यस्य विषयस्य ज्ञानं तदाकारवृत्त्यवच्छिन्नचित् तस्य ज्ञानमिति वाच्यम्। तथा च सुखादिस्थले तथा न सम्भवतीत्यपास्तम्। ज्ञप्तीति। चिदित्यर्थः। सर्वाधिष्ठानत्वेन-स्वान्यसर्वाधारत्वेन। अन्याश्रयत्वेति। अन्याश्रितत्वेत्यर्थः। ज्ञानसुखात्मकः-ज्ञप्तिसुखस्वरूपात्मकः ॥ ९ ॥

नारायणी।

न्नानुपपत्तिगन्धोपीत्याह--धात्वर्थत्वमिति। धात्वर्थत्वं ज्ञाऽवबोधन इत्यादिधातुपदेन बोध्यक्रियारूपता, वृत्तेरेव-वृत्त्यवच्छिन्नचित एव। ज्ञप्तिरूपसुखज्ञानस्य—शुद्धचिद्रूपसुखाभिन्नज्ञानस्य। अन्याश्रयत्वाभावात्--अन्याश्रितत्वाभावात्, न द्वैतापत्तिः—नाश्रयावश्यंभावनिबन्धनद्वैतापत्तिः, क्रियारूपत्वाभावेनाश्रयानपेक्षणात्, तथा चाहङ्कारज्ञानयोर्विशिष्टविवक्षायां नाहं ज्ञानमिति प्रतीतिः तयोर्धर्मधर्मिभावाङ्गीकारात्, निष्कृष्टविवक्षायां त्विष्टापत्तिरेवेति न काप्यनुपपत्तिरिति भावः। ज्ञानसुखात्मकः--ज्ञानाभिन्नसुखात्मक इत्यर्थः ॥ ९ ॥

दशमश्लोकमवतारयति—नन्विति। जगतः—शुद्धचिन्मात्राभिन्नस्य, तुच्छत्वे—शशविषाणादिवदलीकत्वे, तन्निषेधेन—एकमेवाद्वितीयमिति द्वैतनिराकरणेन, आत्मतत्त्वप्रतिपत्तिः-अद्वितीयात्मयाथार्थ्यज्ञानम्, प्रतियोगिज्ञानं विनाऽभावबुद्धेरनुदयादिति भावः। अप्रसिद्धप्रतियोगिक-

(१) ज्ञप्तिरूपसुखज्ञानस्येति कखपुस्तकयोः।

'क्वचित्प्रमितं क्वचिन्निषिध्यत' इति न्यायात्। तथा च निषेधानुपपत्त्यैव न जगतस्तुच्छत्वमिति नेत्याह--

न चैकं तदन्यद् द्वितीयं कुतस्या-
न्न वा केवलत्वं न चाकेवलत्वम्।
न शून्यं न चाशून्यमद्वैतकत्वा-
त्कथं सर्ववेदान्तसिद्धं ब्रवीमि॥ १०॥

एकत्वसङ्ख्यायोगि एकम्। तदपेक्षाबुद्धिजन्यद्वित्व-सङ्ख्यायोगि द्वितीयम्। तत एकाभावे द्वितीयं कुतः

न्यायरत्नावली।

क्वचित् प्रमितमित्यादि। प्रतीयमानं सर्वं सत्यमेव परन्तु एकत्र प्रमितमन्यत्र निषिध्यत इत्यन्यथाख्यातिविशेषवादिनां मतम्। तदपेक्षाबुद्धीति। नानैकत्वसापेक्षबुद्धीत्यर्थः। 'अयमेकोऽ

नारायणी।

निषेधोस्तु तत्राह—न हीति। किमिति तत्राह—क्वचिदिति। क्वचिद्देशान्तरे क्वचिद् भ्रमाधिष्ठाने निषिध्यतेभ्रमप्रसिद्धिमादायापीति भावः। भ्रमस्यान्यत्र प्रमामूलकत्वदर्शनात्तत्र तद्भ्रमप्रसिद्धिमादाय तस्य निषेधेऽन्यत्र प्रमितत्वावश्यकत्वान्न भ्रममात्रप्रसिद्धिमादाय तन्निषेधः तर्कसह इति भावः। अत एवानिर्वचनीयत्वमङ्गीक्रियत इत्यापातवेदान्तिनामुक्तिमात्रं न प्रामाणिकमित्यभिप्रेत्याह—तथा चेति। वास्तवाभावप्रतियोगित्वमेवानिर्वचनीयत्वम्, तज्ज्ञानं चाभावप्रतियोगिताज्ञानाधीनम्, प्रतियोगिज्ञानं च परोक्षं भ्रमात्मकं वा अन्यत्र प्रतियोगिप्रमाधीनम्, प्रमा च विषयसत्ताधीना ततश्च विषयस्य ब्रह्मणि निषेधेऽन्यत्र सत्त्वमवश्यमङ्गीकार्यम्, अन्यथा तन्निषेधानुपपत्तेरित्याद्यन्यत्र विस्तरः। 'एकधैवानुद्रष्टव्य'मिति श्रुतेर्निर्विकल्पात्मज्ञानमेव कारणं न द्वितीयाभावप्रकारकमतस्तज्ज्ञानार्थं प्रतियोगिसत्त्वापादनमनुपयुक्तमित्यभिप्रायकं न चैकमिति श्लोकं व्याचष्टे—एकत्वेति। अयमेकोयमेक'इति गणनव्यवहारासाधारणकारणमेकत्वसङ्ख्या तद्विशिष्टमित्यर्थः। तदपेक्षेति। अनेकैकत्वसापेक्षबु-

स्यात् ? द्वितीयं च तृतीयादीनामप्युपलक्षणम्। ननु 'एकमेवाद्वितीयमि'ति श्रुत्या एकत्वं प्रतिपाद्यते। नेत्याह-न वा केवलत्वमिति। केवलत्वम् एकत्वम्। तस्याविद्यकत्वात्। यद्यात्मन एकत्वं श्रुत्या न प्रतिपाद्यते, तर्हि प्रत्यक्षादिप्रमाणवशादनेकत्वमेव स्यादिति चेन्नेत्याह-न चाकेवलत्वमिति। अकेवलत्वम् अनेकत्वम्। 'नेह नानास्ति किञ्चन, एकमेवाद्वितीयं ब्रह्म, अथात आदेशो नेति नेतीत्यादिश्रुतिभ्यः। तर्हि सर्वप्रतिषेधाच्छून्यमेव स्यादिति नेत्याह-न शून्यमिति। 'असन्नेव स भवति असद्ब्रह्मेति वेद चेत्। अस्ति

न्यायरत्नावली।

यमेक' इत्येकत्वद्वयविषयकज्ञानेति यावत्। आविद्यकत्वात्-'अतोऽन्यदार्तमि'ति श्रुतिबाधितत्वात्। अनेकत्वं-द्वित्वसम्बन्धित्वम्। इह ब्रह्मणि नाना तद्भिन्नं किञ्चन नेत्यर्थः। 'विनञ्भ्यां नानाञौ न सह' इत्यनेन सूत्रेण नसहशब्दार्थे भेदादौ वर्तमानाभ्यां विनञ्श-

नारायणी।

द्धीत्यर्थः। अयमेकोयमेक इत्येकत्वद्वयविषयकत्वज्ञानमिति यावत्। द्वितीयं कुतः स्यादिति। द्वितीयाऽप्रसिद्ध्या तदभावानिरूपणप्रसक्तिरिष्टेत्येति भावः। नन्विति। आविद्यकत्वात्—धर्मरूपत्वेन तस्याविद्याकार्यत्वादित्यर्थः। तदप्याविद्यकं बाधितमिति भावः। अनेकत्वं-द्वितीयसम्बन्धित्वम्, इह-ब्रह्मणि, नाना-भिन्नम्, किञ्चन-किमपि, 'एकमेवाद्वितीयमि'ति सजातीयविजातीयस्वगतभेदरहितमित्यर्थः। अथेति। मूर्तामूर्तकथनानन्तरम्। आदेशः-अज्ञातार्थज्ञापनम्। नेति नेतीति। पूर्वोक्तं मूर्तामूर्तात्मकं नास्ति नास्तीत्यर्थः 'असन्नेव स भवति'-पुमर्थसम्बन्धी न भवति, 'असद्ब्रह्मेति वेद चेत्' चेत्-यदि, असत्-अविद्यमानम्, ब्रह्म वेद-जानाति। शून्यसाक्षितयापि ब्रह्मणोस्तित्वमावश्यकमित्यभिप्रेत्याह—अस्ति ब्रह्मेति। अस्तीति वेद जानाति, चेत्-यदि, सन्तं-परमार्थसदात्मापन्नम्, एनम्-एवंविदम्, विदुः-ब्रह्मविदो ज्ञातवन्तः, तस्मादस्तित्वदर्शनात्सोन्येषां ब्रह्मविद्भिर्ज्ञेयो भवतीत्यर्थः।

ब्रह्मेति चेद्वेद । सन्तमेनं ततो विदु'रिति, सत्यं ज्ञानमनन्तं ब्रह्म । 'सदेव सोम्येदमग्र आसी' दित्युपक्रम्य ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसी'त्यादिश्रुतिभिः सत्यत्वप्रतिपादनात्, सर्वभ्रमाधिष्ठानत्वात्सर्वबाधावधित्वाच्च । तर्हि सत्यत्वज्ञानत्वादिधर्मवदपि

न्यायरत्नावली ।

ब्दाभ्यां नानाञ्प्रत्ययौ भवत इत्यर्थकेन नञ्छन्दात् स्वार्थिकनाञ्प्रत्ययान्तात् नानापदनिष्पत्तेस्तस्य भेदार्थकत्वात् । ऐतदात्म्यम्-एतदात्मकम्, अशून्यं-सत्यत्वादेयुक्तम् । सर्वभेदेति । सजातीय-

नारायणी ।

श्रुत्यन्तरमाह—सत्यमिति । सत्यं-त्रिकालाबाधितम्, ज्ञानम्-ज्ञप्तिरूपम्, अनन्तं-न विद्यतेऽन्तः देशकालवस्तुपरिच्छेदलक्षणो यस्य तत् । श्रुत्यन्तरं-सदेवेति । इदं-नामरूपात्मकम्, अग्रे-सृष्टेः पूर्वं, सदेवासीत्-अधिष्ठानभूतसन्मात्रमासीदित्यर्थः । यथा घटःस्वोत्पत्तेः पूर्वं मृदेव तद्वदिति भावः । ऐतदात्म्यमिदम्-एतदात्मस्वरूपं सर्वं जगत् । सदेवेत्यादौ स्पष्टं (१)ब्रह्मात्मत्वं न लभ्यत इत्यत आह-इत्यादीति । 'ब्रह्मैवेदं विश्वम्' 'आत्मैवेदं सर्वमि'त्यादिश्रुतिभिरित्यर्थः । तथाचेयं श्रुतिः श्रुत्यन्तरेणैव व्याख्यातेति भावः । आत्मैवेदमित्यादौ श्रुत्यर्थस्तु यथा यो राधेयः स कौन्तेय इत्यादौ यथा राधापुत्रत्वेन प्रतीतः कर्णो न वस्तुतो राधापुत्रः किन्तु कुन्तीपुत्र इति, तथा नामरूपात्मना प्रतीतमिदं जगत् न वस्तुतोस्ति किन्त्वात्मैव सद्रूपः सर्वाधिष्ठानभूत इति बाधायां सामानाधिकरण्यम्,(२) अतो न सर्वाभेदकृतविकारित्वादिसंभावनापीति दिक् । श्रुत्या सत्यत्वं समर्थ्य युक्त्यापि तदाह—सर्वेति । सर्वभ्रमकारणीभूताज्ञानविषयत्वादित्यर्थः । एतदुक्तिकृत्यमाह—सर्वेति । सर्वबाधकप्रमाविषयत्वादित्यर्थः ।

(१) ब्रह्मात्मत्वेन लभ्यत इति पाठः । परम्त्वासङ्गतत्वात् परिवर्तितः ।

(२) अत एव न सर्वब्रह्मबोधकसर्वमिथ्यात्वश्रुत्योरन्योन्यं विरोधः, रज्जुरियं न सर्प इत्यादेरेवोपदेशभेदस्य भिन्नाधिकारिकस्य फलत एकार्थत्वात् । तथाहि छायादृष्टान्ते स्वरूपजिज्ञासुं प्रति प्रथमो भीतं प्रति द्वितीयस्तथा अत्रापि जगत्तत्त्वजिज्ञासुं प्रति प्रथमः संसाराद्भीतं प्रति द्वितीयः । तत्र प्रथमेन भावमुखतोऽर्थान्निषिध्यते द्वितीयेन साक्षादित्यर्थः । अतएव न सर्वाभेदकृतविकारित्वादिसम्भावनापीति दिक् । इति पाठोऽधिकः खपुस्तके ।

स्यात् ! नेत्याह—न चाशून्यमिति । एकमद्वितीयमिति पदद्वयेन सर्वभेदप्रतिषेधेऽप्येवकारेण धर्मधर्मिभावादि-भेदप्रतिषेधात् । सर्वत्र हेतुमाह—अद्वैतकत्वादिति । द्विधा इतं द्वीतं तस्य भावो द्वैतम् । तदुक्तं वार्तिके—

द्विधेतं द्वीतमित्याहुस्तद्भावो द्वैतमुच्यते । इति ।

न विद्यते द्वैतं द्विधाभावो यत्र तदद्वैतमित्यक्षरार्थः । 'म-

न्यायरत्नावली ।

यविजातीयप्रतियोगिकभेदेत्यर्थः । धर्मधर्मिभावादीति । धर्मधर्मि-भावादिप्रयोजकौ यौ भेदाभेदौ, तत्प्रतिषेधादित्यर्थः । भेदमात्रे स्वीकृते सामानाधिकरण्यप्रत्ययानुपपत्तेः । अभेदमात्रे स्वीकृते धर्मधर्मिभावानुपपत्तेः भेदाभेदौ स्वीक्रियेते । तत्र भेदस्य धर्मिप्र-तियोगिभावादिसापेक्षत्वेन संसृष्टत्वेन च मिथ्यात्वादभेदस्यापि भेदाभावरूपत्वादिरूपेण तादृशत्वादेवकारेण निषेधः । तदुक्तं खण्डने—एकमद्वितीयमित्युक्त्वा यदेवकारमादत्ते श्रुतिस्तदात्यन्तिकाद्वैतं प्रतिपादयितुमिति । द्विधाभावः—प्रकारद्वयसत्ता । सद्रूपाधिष्ठानसंसर्गस्य घटादिरूपारोप्यस्य च 'सन घट' इत्यादिभ्रमसिद्धस्य च सत्ता यत्र शुद्धे ब्रह्मणि न विद्यते, तदद्वैतम् । तत्त्वादिति हेत्वर्थः । सलिल इति । आचारार्थिकिबन्तत्वात् सलिलमिवाचरतीत्यर्थः, निर्मल इति यावत् । अत एव नपुंसकस्यापि

नारायणी ।

तथाच जगद्बाधान्यथानुपपत्त्या बाधकप्रमाविषयस्य तस्य सत्यत्वमावश्यकमेव शुक्तिरजतादौ अधिकसत्ताकगोचर प्रमाया एव न्यूनसत्ताकबाधकत्वदर्शनादिति भावः । सर्वप्रतिषेधेऽपि—सजातीयविजातीयनिराकरणेपि धर्मेति । धर्मधर्मिभावप्रयोजकौ यौ भेदाभेदौ तत्प्रतिषेधादित्यर्थः । भेदमात्रेऽङ्गीकृतेऽश्वमहिषयोरिव सम्बन्धानुपपत्तेः । भेदस्यानिर्वाच्यत्वेनाभेदस्यापि तदभावरूपस्यानिर्वाच्यत्वात्तयोर्द्वयोरपि निषेधः । सलिलमिव सलिलः, स्वच्छो निरुपाधिक इति यावत् । एकः सजातीयभेदशून्यः, अद्वैतः—विजातीयरहितः, तथापि प्रति-

लिल एको द्रष्टाद्वैत' इति श्रुतेः । प्रतियोगिज्ञानस्यैव लाघवेनाभावबुद्धौ कारणत्वात्, द्वैतस्यानिर्वचनीयत्वाङ्गीकारेण प्रत्यक्षादिवेद्यत्वान्निषेधोपपत्तिरित्यर्थः । त-

न्यायरत्नावली ।

सलिलपदस्य पुंस्त्वोपपत्तिः । प्रतियोगीत्यादि प्रमितमेव निषिध्यते इति यदुद्दूषणमुक्तं तत् समाधत्ते—प्रतियोगीति । ज्ञानस्य—ज्ञानत्वेन । लाघवेन—प्रमात्वानिवेशलाघवेन । न च विशेषणतावच्छेदकप्रकारकधीविषया प्रतियोगिज्ञानस्य कारणत्वं वाच्यम्, तत्राप्रमात्वनिश्चये अभावज्ञानानुदयात् अनावृतेन प्रतियोगिप्रमात्वेन हेतुत्वोक्तेरावश्यकत्वमिति वाच्यम् । तत्र प्रमात्वनिश्चयेसत्यप्यभावज्ञानोदयेनानावृतप्रमात्वेन हेतुत्वास्वीकारात्, अनावृतप्रमात्वीयप्रातीतिकसंसर्गस्य भ्रमेऽपि सत्त्वेनाप्रमात्वनिश्चयाभावकाले भ्रमादप्यभावबुद्धिसमम्भवेन च भ्रमसाधारणकारणतासम्भवेनास्मदिष्टाविघाताच्च । ज्ञानस्यैव कारणत्वात् द्वैतस्य प्रत्यक्षादिवेद्यत्वाच्च निषेधोपपत्तिरिति योजना । ननु प्रत्यक्षादिप्रमाणवेद्यस्य कथं निषेधस्तत्राह—अनिर्वचनीयत्वाङ्गीकारेणेति । मिथ्यात्वस्वीकारेणेत्यर्थः । तथा च प्रत्यक्षादीनां न तात्त्विकं प्रामाण्यं येन निषेधावरोधः, किन्तु व्यावहारि-

नारायणी ।

योगिज्ञानस्यावश्यकत्वमागतमेव ततश्च तद्दोषतादवस्थ्यमत आह—प्रतियोगीत्यादि । ज्ञानस्यैव न तु प्रमायाः । लाघवेन-प्रमात्वानिवेशलाघवेन, अगृहीताबाधितार्थज्ञानत्वरूपप्रमात्वापेक्षया ज्ञानत्वस्य लघुशरीरत्वादिति भावः । अत्र ज्ञानस्यैव कारणत्वात्, द्वैतस्य च प्रत्यक्षादिवेद्यत्वात् निषेधोपपत्तिरिति योजना । ननु प्रत्यक्षादिवेद्यस्य कथं निषेधस्तत्राह—अनिर्वचनीयेति । । मिथ्यात्वाङ्गीकारेणेत्यर्थः । तथाच प्रत्यक्षादीनां न तात्त्विकं प्रामाण्यं येन तत्सिद्धस्य निषेधोनुपपन्नः स्यात्, किन्तु व्यावहारिकम्, विशेष्ये विशेषणसंसर्गमात्रबोधजननादिति

ऐतादृश आत्माङ्गुलिनिर्देशेन प्रतिपाद्यतामिति, नेत्याह—कथं ब्रवीमीति । किमाक्षेपे । अद्वैतकत्वेन वागविषयत्वात् । 'अवचनेनैव प्रोवाच यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । न विज्ञातेर्विज्ञातारं वि-

न्यायरत्नावली ।

कमिति भावः । अङ्गुलिनिर्देशेन-प्रमाणफलविषयतया । अद्वैतकत्वेन वागविषयत्वादिति । अद्वैतकत्वात् स्वसमानसत्ताकद्वैतविशिष्ट(१)दृश्यभिन्नत्वे वागादिप्रमाणफलाविषयत्वमित्यर्थः । अवचनेन-वचनं विनैव । प्रोवाच-ज्ञापितवान् । वचनस्य मुख्यवृत्तेर्ब्रह्मण्यसम्भवात् तत्र तत्फलाविषयत्वाच्च लक्षणावृत्त्या बोधनप्रकारस्य दुर्बोधत्वाच्च गुरुणा शिष्यपृष्टेन वचनं नोक्तम् । तादृशं च गुरोरभिप्रायमजानन् शिष्यः पृष्टवान् । ततो गुरुराह-'ब्रूमः खलु उपशान्तस्वभावो ह्ययमात्मे'ति । तस्यायमर्थः-ब्रूमो वचनमनुकत्वैव त्वां ज्ञापयामः, अयमात्मा वचनमुख्यवृत्त्यविषयत्वात् प्रमाणफलाविषयत्वाच्चोपशान्तस्वभावः स्वाभाविकेन द्वैतसम्बन्धेन विशिष्टात् दृश्याद्विलक्षण इति । निवर्तन्ते-फलविषयतया बोधनासमर्थाः । अप्राप्य-फलविषयत्वद्वारकसम्बन्धेनासम्बध्य ।

नारायणी ।

भावः । अङ्गुलिनिर्देशेन-प्रमाणफलविषयतया । अद्वैतेति । स्वसमसत्ताकत्वसम्बन्धेन यत्किञ्चिद्विशिष्टान्यत्वेन वागादिप्रमाणफलाविषयत्वादित्यर्थः । शब्दस्य पदार्थतावच्छेदकपुरस्कारेणैव प्रमितिजनकत्वस्वभावादिति भावः । अवचनेनैव वचनं विनैव, प्रोवाच-ज्ञापितवान् । यत इति । यतो-यस्मान्निर्विकल्पकाद्ब्रह्मणः । वाचः वचांसि, निर्धर्मकत्वान्मुख्यवृत्तेरसंभवेनासम्बध्य निवर्तन्ते तद्बोधनसामर्थ्याद्धीयन्ते इदमित्थन्तया प्रतिपादनेऽसमर्थानि भवन्तीति यावत् । ननु मास्तु शब्दाद्बोधः मनसा तु स्यादेव स्वच्छस्य स्वसम्बद्धार्थग्राहकत्वदर्शनादित्यत आह—मनसा सहेति । श्रतार्थ एव (२)मनसः प्रवृत्तिसंभवात्,

(१) द्वैतविशिष्टं यद्दृश्यं तद्भिन्नत्वेन वागादिप्रमाणेति घपुस्तके ।

(२) श्रुतार्थ एव मनसा श्रवणे सति मनस इति खपुस्तके ।

जानीया'दित्यादिश्रुतिभ्यः । वागविषयत्वे वेदान्तानां कथं तत्र प्रामाण्यमिति चेन्न । अविषयेऽप्यात्मनि तदाकारवृत्तिमात्रेण तदविद्यानिवर्तकत्वादित्याह—सर्ववेदान्तसिद्धमिति । तथा च श्रुतिः—

न्यायरत्नावली ।

विज्ञातेः–मनोवृत्तिरूपज्ञानस्य । विज्ञातारं–स्वप्रकाशसाक्षिणम् । अविषये–फलाविषये । तदाकारेति । शुद्धात्माकारेत्यर्थः । तथा च तत्र प्रामाण्यं तदाकारप्रमाकरणत्वम्, न तु तद्विषयकफलकरणत्वमिति भावः । तदुक्तम्—

फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निराकृतम् ।
ब्रह्मण्यज्ञाननाशार्थं वृत्तिव्याप्यत्वमिष्यते ॥ इति ।

वेदान्तसिद्धं–वेदान्तवाक्यजन्यवृत्तिप्रयुक्ताज्ञानतत्प्रयुक्तोच्छे-

नारायणी ।

श्रवणं विना मनोऽपि न ग्रहणे समर्थमिति भावः । श्रुत्यन्तरं––न विज्ञातेरिति । विज्ञातेः–मनोवृत्तिरूपस्य(१), विज्ञातारं–भासकचिद्रूपं, न विजानीयाः–प्रमाणफलविषयतया न जानासि, निराकारत्वादिति भावः । वागविषयत्वे–वचनाविषयत्वे, तत्र–ब्रह्मणि, प्रामाण्यं–तद्विषकप्रमाजनकत्वरूपम्, अविषये–फलाविषये, तदाकारवृत्तिमात्रेण–शुद्धचिन्मात्रगोचरवृत्तिमात्रेण । तथाच तत्र वेदान्तानां प्रामाण्यं तदाकारवृत्तिरूपप्रमाकरणत्वं न तु तद्विषयकफलरूपप्रमाप्रयोजकत्वरूपमपि । तदुक्तम्—

फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम् ।
ब्रह्मण्यज्ञाननाशार्थं वृत्तिव्याप्यत्वमिष्यते ॥ इति ।

अन्यथा वेदान्तानामानमर्थक्यमेव स्यात्, न तु तद्युक्तं 'तं त्वौपनिषदं पुरुषं पृच्छामी'ति श्रुत्यैव श्रुतीनामेव तत्र प्रामाण्यसमर्थनादित्यभिप्रेत्याह––सर्ववेदान्तसिद्धमिति । सर्ववेदान्ताः–उपनिषत्, तन्मूलकसूत्रभाष्यादीनि च तत्सिद्धं तत्करणकवृत्तिविषय इत्यर्थः । वृत्तिविषयत्वमेवास्ति न फलविषयत्वमित्याचार्याभिप्रायं श्रुत्या दर्श-

(१) ज्ञानस्येत्यर्थः ।

यस्यामतं तस्य मतं मतं यस्य न वेद सः ।
अविज्ञातं विजानतां विज्ञातमविजानताम् ॥
यन्मसा न मनुते येनाहुर्मनो मतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥
इत्यादिरविषयत्वमात्मनो दर्शयति । तदेवं वेदान्त-

न्यायरत्नावली ।

दवत् । अमतं-परोक्षप्रमाणफलाविषयत्वेन ज्ञातम् । मतम्-उक्तफलविषयत्वेन ज्ञातम् । विजानतां-प्रत्यक्षप्रमाणफलाविषयत्वेन-जानतां पुरुषाणाम् । अविज्ञातं-चैतन्यविषयत्वरूपस्वप्रकाशत्वेनाज्ञातम्, अविजानताम्-उक्तफलविषयत्वेनाजानताम् । विज्ञातम्-उक्तस्वप्रकाशत्वेन ज्ञातुं शक्यम् । मनुते-फलविषयीकरोति । तदेव-फलाविषयीभूतम् । उपासते श्रुत्यादिप्रमाणेन तत्तद्गुणवत्तया फल-

नारायणी ।

यति—यस्येति । अमतं प्रमाणजन्यफलविषयत्वेनाज्ञातं, मतं स्वप्रकाशचिदात्मना परिशेषाद्भातम्, सर्वभासकतया प्रमितस्य प्रमाणफलाविषयत्वे स्वप्रकाशत्वमर्थात्सिद्धमेवेति भावः । तत्रोपपत्तिमाह—अविज्ञातेति । विजानतां प्रमाणफलविषयत्वेन ज्ञानवतां पुरुषाणाम्, अविज्ञातं-स्वप्रकाशत्वेनाज्ञातम्, अविजानतां—प्रमाणफलविषयत्वेनाजानताम्, विज्ञातं-स्वप्रकाशप्रत्यगात्मना ज्ञातम् । प्रमाणजन्यफलविषयत्वं मास्तु प्रमातृवेद्यत्वमस्त्विति भ्रान्तं प्रति श्रुत्यन्तरमाह—यन्मनसेति । यद्वस्तु सर्वावभासकं मनसा विज्ञानरूपकरणेन न मनुते न फलविषयीकरोति प्रमातेति शेषः । येन ब्रह्मणा मनः विज्ञानरूपं करणं मतं विषयीकृतमाहुः श्रुतय इति शेषः । तदेव सकलकरणानामविषयीभूतम् । कथं तर्हि तदुपास्यमित्याशङ्क्योपास्यं तन्न भवत्येवेत्याह-नेदमिति । यदिदं उपासाकर्मत्वेनाभिमतमुपासते श्रुत्यादिप्रमाणेन तत्तद्गुणवत्तया जानन्ति उपासका इति शेषः, नेदं-तदिदं सगुणत्वादिनाभिमते सर्वाधिष्ठानचिन्मात्राखण्डानन्दाद्वयपरमात्मरूपं न भवतीत्यर्थः । गुणवत्तयाऽवगतस्य मायिकत्वेन परमात्मत्वायोगादिति भावः । मास्तु केवलगोचरत्वं घटाद्यवच्छेदेन सद्रूपस्य सन्घट इति चाक्षुषत्वानुभवात्, चक्षुरादिसहकृतमनोगोचरत्वं तु स्यादेवेत्यत आह—इत्यादिरिति । 'यच्चक्षुषा न पश्यति येन चक्षूंषि प-

वाक्यजन्याखण्डाकारवृत्त्या अविद्यानिवृत्तौ तत्कल्पितसकलानर्थनिवृत्तौ परमानन्दरूपस्सन् कृतकृत्यो भवतीति सिद्धम् ॥

न स्तौमि तं व्यासमशेषमर्थं समग्रसूत्रैरपि यो बबन्ध ।
विनापि तैस्सङ्ग्रथिताखिलार्थं तं शङ्करं नौमि सुरेश्वरं च॥१॥

न्यायरत्नावली ।

विषयरूपेण जानन्ति । अविषयत्वमिति । चिद्रूपस्यैव मुख्यज्ञानरूपत्वेन तदीयसम्बन्धस्यैव मुख्यविषयतारूपत्वेन तत्सामान्याभावं फलविषयत्वनिराकरणद्वारा दर्शयति । वृत्तेराकाराख्यसम्बन्धस्तु न मुख्यविषयतेति तस्य ब्रह्मणि स्वीकारेऽपि न विरोध इति भावः । विनापि तैरिति । सूत्रशब्दस्य तन्तौ सङ्ग्रहवाक्ये च प्रयोगात् श्लेशमूलको व्यतिरेकालङ्कारोऽयम् । सूत्रैरपि व्यासस्सर्वार्थान् न बबन्ध न सङ्ग्रहीतवान्, शङ्कराचार्यास्तु सूत्राण्यनाश्रित्यापि सर्वार्थान् सङ्ग्रहीतवन्तः सूत्रानुक्ता-

नारायणी ।

श्यति यच्छोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतमित्यादिश्रुतिरिन्द्रियागोचरत्वमपि वदतीत्यर्थः । तथाच सन्घट इत्यादावप्युपादानभूतं मायोपाधिकमेव भाति न तूपलक्षितमपि तदेव चास्माकं परमात्मभूतमिति भावः । अविषयत्वमिति । चित एव मुख्यज्ञानरूपत्वात्तदीयसम्बन्धस्यैव मुख्यविषयतारूपत्वात्तत्सामान्याभावं फलविषयत्वनिराकरणद्वारा दर्शयतीत्यर्थः । (१)वृत्तेरावरणनिवृत्तियोग्यत्वरूपाकारत्वाख्यसम्बन्धस्तु न मुख्यविषयता, तस्या ब्रह्मणि स्वीकारेऽपि न विरोध इति भावः । उपसंहरति—तदेवमिति । तथाचायं समुदितग्रन्थार्थः । सकलोपाध्यतीतः परमात्मैव वस्तुतो वर्णाश्रमादिरहितः, स्वकल्पितानाद्यविद्यया जीवेशादिविभागेन स्वस्वोचितानि कर्माणि कुर्वन् प्रतिदेहमहमहमिकया बद्ध इव शास्त्रजन्यज्ञानेन मुक्त इव भवति,न वस्तुतो बन्धमोक्षवान्,बन्धहेतोरज्ञानस्यानिर्वाच्यत्वात्, अज्ञानस्य च कल्पितस्याधिष्ठानव्यतिरेकेणाभावात्, परमात्मैव जीवजगद्भावादिना व्यवह्रियमाणं वस्तु नान्यत् श्रुतियुक्तिविरोधात्, अतः द्वैततत्सत्यत्ववादो मूढानामज्ञानविजृम्भित एवेति शिवम् । विनापि सूत्रैरिति सूत्रशब्दस्य तन्तौ स्पल्पाक्षरत्वादिगुणयुक्तसं-

(१) वृत्तेरावणविषयतया निवृत्तीति पाठः खपुस्तके ।

लघुरपि बहूर्थवहश्चिन्तामणिरिव निबन्धोऽयम् ।
मधुसूदनेन मुनिना विहितो गुणिनां विनोदाय ॥२॥
यदत्र सौष्ठवं किञ्चित्तद् गुरोरेव मे न हि ।
यदत्रासौष्ठवं किञ्चित्तन्ममैव गुरोर्न हि ॥ ३ ॥
बहुयाचनया मयाऽयमल्पो बलभद्रस्य कृते कृतो निबन्धः ।
यददुष्टमिहास्ति यच्च दुष्टं तदुदारास्सुधियो विवेचयन्तु॥४॥

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वती-
भगवत्पादपूज्यशिष्यश्रीमधुसूदनसरस्वतीविरचितः
सिद्धान्तबिन्दुनामग्रन्थः समाप्तः ।

न्यायरत्नावली ।

र्थानामपि वक्तृत्वादित्यर्थः । लघुः—अतिस्वल्पः । बहूर्थवहः—(बहूर्थ) प्रापकः । निबन्धः—ग्रन्थः । अत्र—ग्रन्थे । सौष्ठवं—गुणवत्त्वम् । बलभद्रस्य—आचार्याणां सेवकब्रह्मचारिणः ॥

श्रीनारायणतीर्थानां गुरुणां चरणाम्बुजम् ।
नमामि वाङ्मनःकायैरनन्यशरणैस्सदा ॥
भजे श्रीपरमानन्दसरस्वत्याः पदाम्बुजम् ।
यदेवालम्ब्य संसारसागरो गोष्पदीकृतः ॥

इति श्रीब्रह्मानन्दसरस्वतीविरचिता सिद्धान्तबिन्दुटीका
न्यायरत्नावली समाप्ताः ।

नारायणी ।

ग्रहवाक्ये च प्रयोगात् श्लेषमूलको व्यतिरेकालङ्कारोऽयम् । भगवत्पूज्यपादास्तु विनापि सूत्रैः सर्वार्थान्संगृहीतवन्त इत्यर्थः । लघुः अतिस्वल्पः, वहः प्रापकः, निबन्धः ग्रन्थः, गुणिनां सकलविद्यापारङ्गतानामीर्ष्यासूयादिरहितानाम्, अत्र ग्रन्थे सौम्यगुणवत्त्वं सर्वार्थसंग्राहकत्वादिरूपं गुरोरेव न ममेत्यर्थः । श्रुत्यर्थतदनुकूलतर्काणां श्रीमदाचार्यपरंपराप्राप्तगुरुमूलकत्वादिति भावः । असौष्ठवं-भाष्यभामतीविवरणाद्यपेक्षया कठिनत्वरूपम् । अखिलविद्याप्रवीणतार्किकशिरोमणिभट्टाचार्यरीत्यनुसरणादिति भावः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीरामगोविन्दतीर्थशिष्य-
[तथा] श्रीवासुदेवतीर्थविद्य शिष्य-श्रीनारायणतीर्थ-
विरचिता सिद्धान्तबिन्दुलघुव्याख्या सम्पूर्णा ॥

काशिसंस्कृतसीरीज़-ग्रन्थमाला ।

इयं काशी-संस्कृतग्रन्थमाला विभागशः प्रकाशिता भवति । एतस्यां प्राचीनाः नवीनाश्च दुर्लभाः सुलभाश्च अत्युपयुक्ताः संस्कृतग्रन्थाः काशिकराजकीयसंस्कृतपाठशालीयैः पण्डितैरन्यैरपि विद्वद्भिः संशोधिताः क्रमेण संमुद्रिता भवन्ति । अस्यां प्रकाश्यमाणानां ग्रन्थानां मूल्यं सूचीपत्रे प्रकाशितं वर्तते ।

१ नलपाकः नलविरचितः । संपूर्णः (पाकशास्त्रम् १) रु० १—८
२ संक्षेपशारीरकम् । रामतीर्थस्वामिकृतान्वयार्थबोधिनीटीकासहितम् । (वेदान्तं १) रु० ८—०
३ वैशेषिकदर्शनम् । पं० श्रीदुण्ढिराजशास्त्रिकृतविवरणोपेताभ्यां प्रशस्तपादभाष्योपस्काराभ्यांसमन्वितम् (वैशेषिकं१)रु०२—०
४ श्रीसूक्तम् । विद्यारण्यपृथ्वीधरश्रीकण्ठाचार्यकृतभाष्यत्रयेण टिप्पण्या च समलङ्कृतम् । (वैदिकं १) रु० ०—६
५ लघुशब्देन्दुशेखरः (भैरवी) चन्द्रकलाटीकासहितः-प्रथम भाग अव्ययीभावान्तः । (व्याकरणं १) रु० ५—०
५ लघुशब्देन्दुशेखरः (भैरवी) चन्द्रकलाटीकासहितः तत्पुरुषादिसमाप्तिपर्यन्तः । द्वितीय भाग (व्याकरणं १) रु० ८—०
६ कारिकावली मुक्ता० दिन० राम० शब्दखण्डसहिता तथा "गुणनिरूपणदिनकरीय" महामहोपाध्याय पं० श्रीलक्ष्मणशास्त्रिकृतव्याख्यासहिता । (न्यायं १) रु० ६—०
७ पञ्चीकरणम् । वार्तिकाभरणालङ्कृतवार्तिकटीकया-तत्त्वचन्द्रिकासमवेतविवरणेन च समन्वितम् । (वेदान्तं २)रु० ०—८
८ अलङ्कारप्रदीपः । श्रीविश्वेश्वरपाण्डेयनिर्मितः । (काव्यं १) रु० ०—८
९ अनङ्गरङ्गः । महाकविकल्याणमल्लविरचितः । (कामशास्त्रं१) रु० ०—१२
१० जातकपारिजातः । श्रीवैद्यनाथशर्मणा विरचितः । (ज्यो० १) रु० २—०
११ पारस्करगृह्यसूत्रम् । कात्यायनसूत्रीयश्राद्ध-शौच-स्नान-भोजन-कल्पसहितम् । (कर्मकाण्डम् १) रु० ७—८
१२ पुरुषसूक्तम् । सायणभाष्य-महीधरभाष्य-मंगलभाष्य-निम्बार्कमतभाष्यचतुष्टयसहितम् । (वैदिकं २) रु० १—४
१३ श्रीमत्सनत्सुजातीयम्—श्रीमच्छङ्करभगवत्पादविरचितभाष्येण नीलकण्ठीव्याख्यया च संवलितम । (वेदान्तं ३) रु० १—४
१४ कुमारसंभवं महाकाव्यम् । महाकवि श्रीकालिदासवि० । सञ्जीवनी शिशुहितैषिणी-टीकाद्वयोपेतम् सम्पूर्णम् । (काव्यं२) रु० १—८
१५ श्रुतबोधश्छन्दोग्रन्थः । आनन्दवर्द्धिनीतात्पर्यप्रकाशाख्यसंस्कृत-भाषाटीकासहितः । (छंदः १) रु० ०—६
१६ कारिकावली । मुक्तावली-न्यायचन्द्रिकाटीकाद्वयसहिता सटिप्पणा । (न्यायं २) रु० १—०
१७ पारस्करगृह्यसूत्रम् । काण्डद्वये हरिहर-गदाधर० तृतीयकाण्डे हरिहर-जयरामं-प्रणीतभाष्येण समलङ्कृतम् । हरिहरभाष्यसहितस्नानत्रिकण्डिकासूत्र—गदाधरभाष्यसहितश्राद्धनवकण्डिकासूत्रैः यमलजननशान्ति-पृष्टोदिवि-शौच-भोजन—कामदेवकृतभाष्यसहितोत्सर्गपरिशिष्टसूत्रैः परिष्कृतं-टिप्पण्यादिभिः सहितं च । (कर्मकाण्डं २) रु० ३—०

१८ संक्षेपशारीरकम्। मधुसूदनीटीकासहितम् संपूर्णं (वेदान्तं४) रु० ८—०
१९ लघुज्यूटिका—अर्थात् अभिनवा परिभाषेन्दुशेखरपरिष्कृतिनिर्मितिः। (व्याकरणं २) रु० ०—८
२० कातीयेष्टिदीपकः । (दर्शपौर्णमासपद्धतिः) महामहोपाध्याय-पं० श्रीनित्यानन्दपन्तपर्वतीयविरचितः। (कर्मकाण्डं) रु० १—०
२१ सप्तपाठि श्रीशिवमाहिम्नस्तोत्रम्। श्रीगन्धर्वराज पुष्पदन्ताचार्य-विरचितम्। हरिहरपक्षीय-मधुसूदनीटीकया (संस्कृतटीका—संस्कृतपद्यानुवाद—भाषाटीका—भाषापद्यानुवाद—भाषाबिम्ब) पञ्चमुखीनाम्न्या टीकया—शक्तिमहिम्नस्तोत्रेण च समन्वितम्। (स्तोत्रवि० १) रु० १—०
२२ बौद्धाऽऽचार्यश्रीधर्मकीर्तिप्रणीतः सटीकन्यायबिन्दुः। भाषाटीकासहितः। (बौद्धन्याय वि० १) रु० १—८
२३ सपरिष्कृत-दर्पणसहितवैयाकरणभूषणसारः। (व्याकरणं ३) रु०४—०
२४ न्यायवार्त्तिकतात्पर्य्यटीका। श्रीवाचस्पतिमिश्रविरचिता। सम्पूर्ण (न्यायविभाग ३) रु० ६—०
२५ मीमांसान्यायप्रकाशः। (आपदेवीयः) श्रीचिन्नस्वामिशास्त्रिकृतया सारविवेचिन्या व्याख्यया सहितः। (मीमांसा १) रु० २—०
२६ पौरोहित्यकर्मसारः। (टिप्पणीसमलंकृतः) प्रथमो भागः श्रीरमाकान्तशर्मणा संगृहीतः। (कर्मकाण्डवि० ३) रु० ०—४
२७ लघुशब्देन्दुशेखरः। म० म० श्रीनागेशभट्टविरचितः अव्ययीभावान्तो भागः, म०म० पण्डित श्रीनित्यानन्दपन्त-पर्वतीयकृतशेखरदीपकाख्येन टिप्पणेन समुज्ज्वलितः। (व्या०४) रु० ४—८
२८ रघुवंशमहाकाव्यम्। श्रीकालिदासविरचितम् पञ्चसर्गात्मकम्। म० म० श्रीमल्लिनाथसूरिकृतसञ्जीविनीटीकया पं०श्रीकनकलाल ठक्कुरकृताऽर्थप्रकाशिकाटीकया च समलङ्कृतम्। (काव्य३) रु० १२—०
२९ कामसूत्रम्। श्रीवात्स्यायनमुनिप्रणीतं बहुयत्नरासादितया पूर्णयाजयमङ्गलरचितया टीकया समेतम्। बहुखण्डितपाठान् परिपूर्य, सूत्राङ्कांश्च संयोज्य, परिष्कृत्य संशोधितम्। (काम०२) यन्त्रस्थ
३० न्यायकुसुमाञ्जलीः। न्यायाचार्यपदाङ्कितश्रीमदुदयनाचार्यविरचितः। म० म० रुचिदत्तकृतमकरन्दोद्भासित म० म० वर्द्धमानोपाध्यायप्रणीतप्रकाशसहितः। (न्यायं ४) रु० ६—०
३१ परिभाषेन्दुशेखरः। म० म० श्रीनागेशभट्टरचितः। म० म० भैरवमिश्रविरचितया भैरवीत्यपराख्यया परिभाषाविवृत्या—तत्त्वप्रकाशिकया टीकया च सहितः। (व्याकरणं ५) यन्त्रस्थ
३२ अर्थसंग्रहः। पूर्वमीमांसासारसंग्रहरूपः। श्रीलौगाक्षिभास्करविरचितः। श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामेश्वरशिवयागिभिक्षुविरचितमीमांसार्थकौमुद्याख्यव्याख्यासहितः। (मीमां०२) रु०१—०
३३ न्यायवार्त्तिकम् न्यायदर्शनवात्स्यायनभाष्योपबृंहणम्। परमर्षिभारद्वाजोद्योतकरविरचितम्। महर्षि—गोतमादिचरितसम्व

३४ शुक्लयजुर्वेदसंहिता। वाजसनेयिमाध्यन्दिनशाखीया। श्रीमदुव्वटाचार्यविरचितमन्त्रभाष्येण श्रीमन्महीधराचार्यविरचितवेददीपेन च सहिता। (भाग १-२-३-४) (वैदिकं ३) रु० ८—०

३५ शुक्लयजुर्वेदकाण्वसंहिता। श्रीसायणाचार्यविरचितभाष्यसहिता। १ अध्यायादारभ्य २० अध्यायपर्यन्ता। (वैदिकं ४) रु० ६—०

३६ सिद्धान्तलेशसंग्रहः। श्रीमदप्पयदीक्षितविरचितः। श्रीमत्परमहंसपरिव्राजकाचार्यकृष्णानन्दतीर्थविरचितया कृष्णालङ्काराख्यया व्याख्यया समलंकृतः। (वेदान्तं ४) रु० ६—०

३७ काशिका। श्रीपाणिनिमुनिविरचितव्याकरणसूत्राणां वृत्तिः विद्वद्वर-वामन-जयादित्यविनिर्मिता। (व्याकरणं ६) रु० ६—०

३८ प्राकृतप्रकाशः। भामहकृतः। श्रीमद्वररुचिप्रणीतप्राकृतसूत्रसहितः। टिप्पण्या च संयोजितः। (व्याकरणं ७) रु० १—४

३९ जीवन्मुक्तिविवेकः श्रीमद्विद्यारण्यस्वामिविरचितः। भाषानुवादसमेतः। (वेदान्तं ६) रु० २—०

४० श्रीनारदीयसंहिता। ब्रह्मणोपदिष्टो नारदमहामुनिप्रोक्तो ज्यौतिषग्रन्थः। (ज्यातिषं २) रु० ०—६

४१ मेदिनीकोशः मेदिनीकारविरचितः। (कोशं १) रु० १—८

४२ मीमांसादर्शनम्। श्रीशबरस्वामिविरचितभाष्यसहितम् सपूर्णम्। (भाग१—२) (मीमांसा ३) रु० १०—०

४३ न्यायदर्शनम्। श्रीगोतममुनीप्रणीतम्। श्रीवात्स्यायनमुनीप्रणीतभाष्यसहितम्। श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यविरचितन्यायसूत्रवृत्त्यनुगतम्। टिप्पण्यादिसहितम् (न्यायं ६) रु० ३—०

४४ दानमयूखः। विद्वद्वरश्रीनीलकण्ठभट्टविरचितः। (धर्मशास्त्रं १) रु० १—८

४५ कालमाधवः। विद्वद्वरश्रीमाधवाचार्यविरचितः। (धर्मशास्त्रं २) रु० १—८

४६ भास्वती। श्रीमच्छतानन्दविरचिता। श्रीमातृप्रसाद (दैवज्ञभूषण) पाण्डेयेन कृताभ्यां छात्रबोधिनीनाम संस्कृतसोदाहरण भाषाटीकाभ्यां सहिता। (ज्योतिषं ३) रु० २—०

४७ फक्किकाप्रकाशः। उपाध्यायोपाह्ववैयाकरणकेसरीबिरुदाङ्कितमैथिलेन्द्रदत्तशर्मविरचितः। पं० सीतारामशर्मकृतटिप्पण्या विभूषितः। (व्याकरणं ८) रु० १—४

४८ मिताक्षरा। श्रीगौडपादाचार्यकृतमाण्डूक्यकारिकाव्याख्या-श्रीमत्परमहंसपरिव्राजकाचार्यस्वयम्प्रकाशानन्दसरस्वतीस्वामिकृता। शंकरानन्दकृतमाण्डूक्योपनिषद्दीपिका च। (वेदा०७) रु० १—४

४९ काव्यप्रकाशः। श्रीमम्मटाचार्यविरचितः। पं० श्रीहरिशङ्करशर्मणा मैथिलेन संगृहीतया नागेश्वरीटीकयाऽलङ्कृतः। (काव्य०४) रु० ४—०

५० अधिकरणकौमुदी। श्रीदेवनाथठक्कुरकृता। (मीमां० ४) रु० १—०

५१ रघुवंशमहाकाव्यम्। श्रीकालिदासविरचितम् म.म. श्रीमल्लिनाथकृतसञ्जीविनीटीकयोपेतम् पं० श्रीकनकलालठक्कुरेण कृता भावबोधिनी टिप्पण्या समलङ्कृतः संपूर्णम्। (काव्य ५) रु० १-४

५२ काथबोधः। साजनीकृत टीकोपेतः। दत्तात्रेय सम्प्रदायाऽनुगतः। रु०—८

५३ रसचन्द्रिका। श्रीविश्वेश्वरपाण्डेय निर्मिता। (काव्य० ६) रु०१—०

५४ अलङ्कारमुक्तावली। श्रीविश्वेश्वर पाण्डेयनिर्मिता। (काव्य०७) रु०-१२-०

५५ वृत्तरत्नाकरः-भट्टकेदारप्रणीतः। नारायणभट्टीयव्याख्यासहितः। सम्पादकनिर्मितविषमस्थलटिप्पणोपेतः। श्रुतबोधच्छन्दो-

५६ अलङ्कारशेखरः । केशवमिश्रकृतः । साहित्योपाध्याय श्री अनन्तराम-शास्त्रिणा भूमिकादिभिः संभूष्य संशोधितः । (अल०वि०१) रु० १-४

५७ शक्तिवादः । श्रीगदाधरभट्टाचार्यप्रणीतः । टीकात्रयोपेतः । कृष्ण-भट्टकृतया मञ्जूषया-माधवभट्टाचार्यनिर्मितया विवृत्या श्रीमन्माध्वसंप्रदायाचार्य्यदार्शनिकसार्वभौमसाहित्यदर्शनाद्याचार्यतर्करत्नन्यायरत्न गोस्वामिदामोदरशास्त्रिरचितया विनोदिन्या च समेतः । (न्या० वि० ७) रु० २-०

५८ प्रौढमनोरमा । म. म. श्रीभट्टोजीदीक्षितावरचिता तत्पौत्र म. म. श्रीहरिदीक्षितविरचितलघुशब्दरत्नाख्यव्याख्ययासमेता । म. म. पण्डितश्रीभैरवमिश्रविरचितशब्दरत्नव्याख्यया युक्ता । श्रीयुतभाण्डारीत्युपाह्वमाधवशास्त्रिविरचित प्रभानामकटिप्पण्या समलङ्कृता । श्रीयुतजगन्नाथशास्त्रिविरचितायव्ययीभावस्य शब्दरत्नप्रदीपकनामकटीप्पण्याऽलङ्कृता (अव्ययीभावान्तः प्रथमो भागः) (व्याकरण वि० ९) रु० ५—०

५९ आपस्तम्बगृह्यसूत्रम् । श्रीहरदत्तप्रणीतयाऽनाकुलाख्यया व्याख्यया, श्रीसुदर्शनाचार्यप्रणीतया तात्पर्यदर्शनाख्यया व्याख्यया च समलङ्कृतम्, पृथक् सूत्रपाठेन, पाठभेदेन, मीमांसापदार्थविवरणेन च संयोजितम् । (कर्म० वि० ५) रु० ३—०

६० नाट्यशास्त्रम् । भरतमुनिप्रणीतम् (सम्पूर्णम्) साहित्योपाध्याय एम.ए. इत्यादिपदवीभाजा पण्डित बटुकनाथ शर्म्मणा तथा साहित्यशास्त्रि एम.ए. पदवीभृता पण्डित बलदेवोपाध्यायेन च सम्पादितम् । (नाट्यशास्त्र वि० १) रु० ५-०

६१ काव्यालङ्कारः । श्रीभामहाचार्येण विनिर्मितः । काशीविश्वविद्यालयाध्यापकाभ्यां पण्डित बटुकनाथ शर्मा एम० ए० साहित्योपाध्यायः तथा पण्डित बलदेव उपाध्याय एम० ए० साहित्यशास्त्री इत्येताभ्यां भूमिकादिभिः समलङ्कृत्य सम्पादितः, काशी विश्वविद्यालयोपकुलपतिपदं विभूषयद्भिः श्रीमदाचार्यप्रवरैः आनन्दशङ्कर ध्रुव महोदयैः लिखितेन प्राक्कथनेन सनाथीकृतः । (अलङ्कार वि० २) रु० १-८

६२ ब्रह्मवादः । गोस्वामि श्रीहरिरायजी महाराज विरचितः । श्रीगोपालकृष्णभट्ट विरचित विवरणाख्यव्याख्यासमलङ्कृतः । तथा गोस्वामी श्रीव्रजनाथविरचितो ब्रह्मवादः । तथा शुद्धाद्वैतपरिष्कारः श्रीमद्रामकृष्णभट्ट विरचितः । श्रीरघुनाथशास्त्रि विरचित शुद्धाद्वैतपरिष्कारतात्पर्यम् । श्रीहरिशङ्कर शास्त्रि-वेदान्तविशारदेन विस्तृत भूमिकया विविधपारिशिष्टैर्भाषानुवादेन टिप्पण्यादिना च समलङ्कृतः । (शुद्धाद्वैतसम्प्रदाय वि० १) रु० १—०

६३ प्रेमरसायनम् । श्रीविश्वनाथपण्डितरचितम् (का०वि० ८) रु० १—०

सिद्धान्तबिन्दुः । श्रीमधुसूदनसरस्वती विरचितः । श्रीभगवान्-शङ्कराचार्य विरचित दशश्लोकव्याख्यारूपः श्रीगौड ब्रह्मानन्दविरचित न्यायरत्नावली-नारायणतीर्थ विरचित लघु-

बनारस-संस्कृत-सीरीज़-ग्रन्थमाला।

इयं बनारस-संस्कृत ग्रन्थमाला खण्डशो मुद्रिता भवति। अस्यां संस्कृतभाषानिबन्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमा ग्रन्था मुद्रिता भवन्ति तांश्च ग्रन्थान् काशिक-राजकीयसंस्कृतपाठशालीयपण्डिता अन्येऽपि विद्वांसः शोधयन्ति। अस्यां प्रकाश्यमानानां ग्रन्थानां मूल्यं सूचीपत्रे प्रकाशितं वर्तते।

१ सिद्धान्ततत्त्वविवेकः। (ज्योतिष) श्री कमलाकरभट्टविरचितः। म. म. पण्डित श्रीसुधाकरद्विवेदिटिप्पणीभिस्तथा म. म. पण्डित श्रीमुरलीधरशर्मकृत टिप्पणीभिश्च सहितः। (सिरीज़ नं० १, २, ३, ६, १४) ५ खण्डानि मूल्यम् रु० १०—८—०

२ अर्थसङ्ग्रहः। (मीमांसा) श्री लौगाक्षिभास्करप्रणीतम्। आङ्गल-भाषानुवादसहितः (नं० ४) द्वितीयावृत्तिः मुद्रयमाणः

३ तन्त्रवार्त्तिकम्। (मीमांसा) श्रीमत्कुमारिलभट्टपादविरचितम्। श्री शबरस्वामिभाष्यप्रथमाध्यायद्वितीयपादा तृतीयाध्यायपर्यन्तम् व्याख्यानरूपम्। (नं० ५, ७, १६, २३, २७, २९ ३२, ३४, ३६, ३९, ६०, ६२, ७२) १३ खण्डानि द्वितीयावृत्तिः मुद्रयमाणः

४ तन्त्रवार्त्तिकावशेषः टुप्टीका। (मीमांसा) श्रीमत्कुमारिलभट्टपाद विरचितम्। श्री शबरस्वामिभाष्य चतुर्थाध्यायप्रथमपादाद्द्वादशाध्यायपर्यन्तम् व्याख्यानरूपम्। (नं० ७३, ७४, ७८, ८१) ४ खण्डानि मूल्यम् रु० ६—०—०

५ शुक्लयजुः प्रातिशाख्यम्। (शुक्लयजुर्वेद) श्रीकात्यायनमहर्षि प्रणीतम्। उव्वटभाष्यसहितम्। (नं० ८, १०, १८, २१ २६, ३१) ६ खण्डानि मूल्यम् रु० ६—०—०

६ सांख्यकारिका। (सांख्य) श्रीईश्वरकृष्णविरचिता। श्रीनारायणतीर्थकृतचन्द्रिकाटीका श्रीगौडपादाचार्यकृतभाष्यसहिता। (नं० ९) १ खण्डम् मूल्य रु० १—०—०

७ वाक्यपदीयम्। (व्याकरण) श्रीभर्तृहरिमहावैयाकरणविरचितम्। प्रथमभागे प्रथमद्वितीयकाण्डे पुण्यराजटीकासहिते खण्डानि ३ द्वितीयभागे तृतीयकाण्डं हेलाराजटीकासहितं खण्डानि ४ (प्रथमभागे नं० ११, १९, २४, द्वितीय भागे नं० ९५, १०२, १३०, १६०) मूल्यम् रु० ७—४—०

८ रसगङ्गाधरः। (अलङ्कार) पण्डितराजजगन्नाथविरचितः। श्रीनागेशभट्टकृतगुरुमर्मप्रकाशिका व्याख्यासहितस्तथा म. म. पण्डित श्रीगङ्गाधरशास्त्रिकृतटिप्पणीसहितः (नं० १२, १७, २०, २५, २८, ३०, ३३, ३७, ७१) ९ खण्डानि मूल्यम् रु० ४—८—०

९ परिभाषावृत्तिः। (व्याकरण) श्री क्षीरदेवकृता (नं० १३, २२) मूल्यम् रु० २—०—०

१० वैशेषिकदर्शनं। (वैशेषिक) श्रीमहामुनिकणादविरचितम्।

मदुदयनाचार्यविरचितकिरणावलीटीका सहितम् (नं० १५, ५०, १५५, १५६, १५७) ५ खण्डानि मूल्यम् रु० ६—४—०

११ पाणिन्यादि३२शिक्षासङ्ग्रहः । (वेद) महर्षियाज्ञवल्क्यादि-महामुनिप्रणीतम्। (नं० ३५, ४०, ४२, ४४, ४६) ५ खण्डानि मूल्यम् रु० ५—०—०

१२ नैष्कर्म्यसिद्धिः । (वेदान्त) श्री सुरेश्वराचार्यविरचिता । श्री ज्ञानोत्तममिश्र कृत चन्द्रिकाव्याख्या सहिता । (नं० ३८, ४१, ४३, ८८) ४ खण्डानि मूल्यम् रु० ४—०—०

१३ शुक्लयजुस्सर्वानुक्रमसूत्रम्। (शुक्लयजुर्वेद) महर्षिकात्यायनप्रणीतम्। श्रीयाज्ञिकानन्तदेवविरचितभाष्यसहितम्। (नं० ४५, ४७, ४९, १५८) खण्डानि ४ मूल्यम् रु० ४—०—०

१४ ऋग्वेदप्रातिशाख्यम्। (ऋग्वेद) श्रीमहर्षिशौनकप्रणीतम्। उव्वटभाष्यसहितम्। (नं० ४८, ५९, ६४, ७९) ४ खण्डानि मूल्यम् रु० ६—०—०

१५ बृहद्वैयाकरणभूषणं पदार्थदीपिकासहितम्। (व्याकरण) पं० श्री कौण्डभट्टविरचितम्। (नं०५१से५४) ४ खण्डानि मूल्यम्रु०६—०—०

१६ विवरणोपन्यासः । (वेदान्त) श्रीरामानन्दसरस्वती विरचितः (विवरणतात्पर्यस्य व्याख्यानम्) तथा—

* वाक्यसुधा। (वेदान्त) श्री शङ्कराचार्यविरचिता । श्रीब्रह्मानन्दभारतीकृतव्याख्यासहितः । (नं० ५५, ५६) २ खण्डानि मूल्यम् रु० ३—०—०

१७ तत्त्वदीपनम्। (वेदान्त) श्री अखण्डानन्दमुनिकृतम्। (पञ्चपादिकाविवरणस्य व्याख्यानम्) (नं० ५७, ५८, ६१, ६३, ६५, ६६, ६७, ६८) ८ खण्डानि मूल्यम् रु० १२—०—०

१८ वेदान्तदीपः । (वेदान्त) श्रीभगवद्रामानुजाचार्यविरचितः। (ब्रह्मसूत्रव्याख्या) (नं० ६९, ७०, ८०) मूल्यम् रु० ४—८—०

१९ पातञ्जलदर्शनम्। (योग) श्रीमहर्षिपतञ्जलिप्रणीतम्। श्रीरामानन्दयतिकृतमणिप्रभाख्यवृत्तिसहितम्। (नं०७५) मूल्यम् रु० १—०—०

२० पाणिनीयमिताक्षरा। (व्याकरण) श्रीमदन्नंभट्टप्रणीता (नं० ७६, ७७,८२,८५,९३,९८,११५,१२१,१२२,१२६) मूल्यम् रु० १५—०—०

२१ रसमञ्जरी। (अलङ्कार) श्रीभानुभट्टकृता। श्रीअनन्तपण्डितकृतव्यङ्ग्यार्थकौमुद्यास्तथा श्रीनागेशभट्टकृतप्रकाशव्याख्या सहितम्। (नं ८३, ८४, ८७) मूल्यम् रु० ३—०—०

जयकृष्णदास-हरिदास गुप्त—
चौखम्बा संस्कृत सीरिज़ आफिस, विद्याविलास प्रेस
गोपालमन्दिर के उत्तर फाटक बनारस सिटी।